THE

VÊDÂNTA VÂDÂVALÎ SERIES

THE WORKS OF

SRI U. VIDWAN ANANDALWAR.

VOL. I.

प्रथमसम्पुट—विषयसूची.

॥ श्रीः ॥

विज्ञापना

विदितमेव किल यदियं वेदान्तवादावली श्रीमद्विशिष्टाद्वैतसिद्धान्तप्रबन्धप्रचारणाय प्रवृत्ता श्रीभगवतः कृपया निरन्तरायमेतावन्तमनेहसं प्रचलितेति। अद्यावधि मुद्रितासु पञ्चविंशतिसङ्ख्यासु सञ्चिकासु बहवश्श्रीमदनन्तार्यविरचिता वेदान्तवादार्थाः प्रकाशिताः प्रायेण सम्पूर्णाः। यद्यपि सन्त्येव सुविदिताः केचनान्येऽपि तदीयवादार्थाः; तथाऽपि तादृशवादार्थकोशानां प्रायशोऽलाभात्, क्वचित् क्वचिल्लाभेऽपि जीर्णतया त्रुटिततयाऽसमग्रतया च मुद्रणमतिदुष्करमिति भावयन्तस्तदुपक्रमादद्य निवृत्ताः स्मः। यदि पुनर्महनीयास्समीचीनकोशवन्तस्तादृशकोशप्रदानेन कृपयोपकुर्युस्तदाऽविलम्बितमेव तन्मुद्रणाय च यतेमहि ॥

सम्प्रति मुद्रिताश्च वादार्था ग्राहकाध्येतृजनसौकर्याय सम्पुटद्वयात्मकतया निबद्धा वर्तन्ते। तत्र च प्रथमसम्पुटे श्रीभाष्याधिकरणक्रमपरतन्त्राः, द्वितीये तु स्वतन्त्राः यथाक्रमं विनिवेशिता इति विदांकुर्वन्तु विद्वांसः ॥

इति निवेदयितारौ—

म. अ. अनन्तार्यः

प्र. भ. तो. नृसिंहार्यश्च ॥

शुभकृत् सं.
ज्येष्ठशुक्लदशम्यां
भानुवासरे.

R. Krishnaswami Sastri

॥ श्री ॥

शास्त्रारम्भसमर्थनम्

श्रीमन्महीशूरमहाराजाधिराजमहास्थानसभाभूषणैः
शेषार्यवंशमुक्ताफलैः श्रीयादवाद्रिनिवासरसिकैः
पण्डितमण्डलीसार्वभौमैः

श्री ॥ उ ॥ म. अ. अनन्तार्यवर्यैः

विरचितम्।

विद्वद्वरैः परिशोध्य

श्रीयादवाद्रिनिवासि-
पण्डितवर्य-श्रीकुप्पनैय्यङ्गार्यविरचितया।
तात्पर्यदीपिकाख्यया टिप्पण्या
समेतम्।

म. अ. अनन्तार्येण
प्र. भ. तो. नरसिंहार्येण च
कल्याणपुर-विचारदर्पण-मुद्राक्षरशालायामङ्कयित्वा
प्राकाश्यं नीतम् ॥

१८०८.

मूल्यं रु. १ -८---०

श्री

भूमिका.

विदितमिदं किल महाशयानां यदियं वेदान्तवादावली श्रीमद्विशिष्टाद्वैतसिद्धान्तप्रतिपादकपरमोत्कृष्टप्रबन्धप्रचारणाय प्रवृत्ता सकलजनसौकर्याय देवनागराक्षरैरङ्किता चेति ।

तत्र च प्रथमभागे श्रीमन्महीशूरमहाराजमहास्थानसभाभूषणैः शेषार्यवंशमुक्ताफलैः श्रीयादवाद्रिनिवासरसिकैः पण्डितमण्डलीसार्वभौमैः श्रीमदनन्तार्यवर्यैर्विरचितानां वादार्थानां मुद्रणं समारब्धमिति ॥

तदेतेषां ग्रन्थानां परिशोधनकार्यं परमकृपयाऽङ्गीकृतवतां विद्वदग्रेसराणां—

श्री ॥ उ ॥ ति. अ. पु. श्रीरङ्गाचार्यवर्याणां,
,, ,, ति. अ. कु. श्रीनिवासाचार्यवर्याणां,
,, ,, ति. ऐ. स्था. कुप्पैनैयङ्गार्यवर्याणां,
,, ,, म. अ. आळ्वार् तिरुमलैयङ्गार्यवर्याणां;

वादार्थानाममीषां प्रत्यन्तरप्रेषणेन सहायकानां महाशयानां-

श्री ॥ उ ॥ ति. अ. कुमारताताचार्याणां
,, ,, ति. अ. कु. श्रीनिवासाचार्याणां
,, ,, नाविल्पाकं नरसिंहाचार्याणां
,, ,, नु. श्यामाचार्याणां ;

आस्माकीनमुद्यममिमं महान्तं धनसहायेन प्रोत्साहयितॄणां उदारशीलानां महतां च—

परमोपकारमत्र सधन्यवादं सम्भावयावः ॥

मुद्रणसमयोचितरचनादिसूचनैस्सहायकयोः अस्मत्सुहृत्तमयोर्विदुषोः श्री ॥ उ ॥ जयराम. वेङ्कटाचार्य—कृ. तिरुनारायणाचार्ययोः उपकृतिं सर्वदा स्मरावः—

म. अ. अनन्तार्यः,
प्र. भ. तो. नरसिंहार्यः.

|| श्रीः ||

उपोद्घातः ॥

जयन्तु नित्यं जगताममन्दानन्दहेतवः ।
श्रीलक्ष्मणमुनीन्द्रस्य पादपाथोजरेणवः ॥

अचिन्त्यविविधविचित्ररचनाप्रपञ्चे प्रपञ्चेऽस्मिन् अनाद्यविद्यासञ्चितपुण्यपापरूपकर्मप्रवाहहेतुकब्रह्मादिसुरनरतिर्यक्स्थावरात्मकचतुर्विधदेहप्रवेशकृतनत्तदात्माभिमानजनितावर्जनीयभवभयाभितप्तान्परिभ्राम्यतो जीवानवलोक्य परमकारुणिको भगवान् सर्वेश्वरः श्रियःपतिर्वेदव्यासरूपेणावतीर्य सर्वेषां संसारिचेतनानां जीवपरयाथात्म्यज्ञानजननेन समस्तसांसारिकदुःखजातमुन्मूलयितुमशेषजगद्धितानुशासनप्रवृत्तश्रुतिनिकरशिरस्समधिगम्यमानार्थनिष्कर्षकं **शारीरकमीमांसा**शास्त्रमुपदिदेश । तथा चोक्तं स्कान्दे—

"तैर्विज्ञापितकार्यस्तु भगवान्पुरुषोत्तमः ।
अवतीर्णो महायोगी सत्यवत्यां पराशरात् ॥"

इत्यारभ्य—

"चकार ब्रह्मसूत्राणि येषां सूत्रत्वमञ्जसा ।
अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम् ॥
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ।
एवंविधानि सूत्राणि कृत्वा व्यासो महायशाः ॥
ब्रह्मरुद्रादिदेवेषु मनुष्यपितृपक्षिषु ।
ज्ञानं संस्थाप्य भगवान्क्रीडते परमेश्वरः ॥"

—इत्यनेन ॥

व्याख्यातं चैतन्महाशास्त्रमतिगम्भीरं **भगवद्बोधायनेन** महर्षिणा वृत्त्यात्मना, **द्रमिडाचार्येण** भाष्यात्मना, अन्यैश्च **टङ्काचार्य-भारुचि-गुहदेव**प्रभृतिभिर्महात्मभिस्स्वस्वप्रणीतैर्महानिबन्धैः ॥

एतेषु च श्रीमद्विशिष्टाद्वैतसिद्धान्तप्रदर्शकेषु महर्षिप्रणीतेषु महानिबन्धेषु कलिकालकलुषितमतिभिरेतद्ग्रन्थाध्ययनाध्यापनविमुखैरत्यन्तमपरिचिततया विलुप्तप्रायेषु **भगवद्यामुनाचार्य**चरणास्सकलसात्विकजनानुजिघृक्षया **सिद्धित्रय**प्रमुखान्प्रबन्धाननेकांस्तदर्थप्रकाशनपटीयसो व्यरचयन् ॥

तदनु सूत्रभाष्यस्य दुर्लभतां मन्वानस्य भगवद्यामुनमुनेर्हृदयशोकशङ्कुसमुद्धरणायावतीर्णाः परमपुरुषपर्यङ्कायमानफणीन्द्रांशभूताः

'पुण्याम्भोजविकासाय पापध्वान्तक्षयाय च ।
श्रीमानाविरभूद्भूमौ **रामानुजदिवाकरः** ।'

इत्यादिप्रमाणप्रसिद्धावतारवैभवा **भगवन्तो भाष्यकाराः** परमपुरुषार्थाभ्यर्थिजनमार्गसमुज्जिजीविषया महर्षेः कृष्णद्वैपायनस्याभिप्रायं साक्षादवगत्य तदनुसारेण महता ग्रन्थसमुदायेन ब्रह्मसूत्रवृत्तिं प्रणीतवतो महामुनेर्भगवतो बोधायनस्य मतमनुसृत्य अविस्तृतैस्सुगम्भीरैर्वचोऽमृतैस्सूत्राक्षरार्थमाविदयितुं **श्रीभाष्यनामकं** महानिबन्धमन्वगृह्णन् ॥ विशदीकृतश्चेदं श्रीभाष्यं श्रीरङ्गराजदिव्याज्ञालब्धवेदव्यासापरनामधेयेन **श्रीसुदर्शनसूरिणा** स्वाचार्योपदिष्टैश्शब्दैर्गुम्भितेन **श्रुतप्रकाशिकाभिधानेन** महानिबन्धेन ॥

तदनु मनुष्यजन्मातिसुलभमात्सर्येण वा श्रीभाष्यतद्व्याख्यानाद्यर्थानवधारणेन वा कैश्चिद्व्याकुलीकृते विशिष्टाद्वैतसिद्धान्ते पुनरपि तत्प्रतिनिष्ठापयिषोर्भगवतस्सर्वेश्वरस्य श्रीवेङ्कटाद्रिनिलयस्य श्रीनिवासस्य निरुपाधिककृपाप्रवाहपात्रीभूतः तत्पूजाविधौ सकलजगदादिपुरुषेण भगवन्नाभीनालीकसम्भवेन विश्वसृजा तदाराधनोपकरणतया

समर्पितदिव्यघण्टावतारस्सर्वतन्त्रस्वतन्त्रः **कवितार्किकसिंहः श्रीवेदान्ताचार्यः** तत्त्वटीकाशतदूषणीप्रभृत्यनेकग्रन्थान् निर्माय प्राचीनमेव श्रीभाष्योपदर्शितमुक्तिघण्टापथं पर्यरक्षत् ॥

तत्प्रणीतानां दुरुद्धरयुक्तिमुक्तापरिकर्मितानां प्रबन्धानां अतिगूढाशयविवरणे प्रवृत्तः श्रीमद्वाधूलकुलतिलक **श्रीमहाचार्यः** समस्तविद्वज्जनमनोऽनुकूलानपूर्वरचनापरिशोभितान्पूर्वाचार्यपरिचितप्रबन्धार्थप्रकाशकान् **चण्डमारुत**प्रमुखान्बहून्ग्रन्थानकल्पयत् ॥

एवंप्रकारेण श्रीमति विशिष्टाद्वैतसिद्धान्ते सुदृढं प्रतिष्ठापितेऽपि कालवशात्पुनरपि तत्र तत्र कुमतिजनदुर्वचनशतोपप्लुते पूर्वाचार्यपरिचितन्यायमार्गे अतिगम्भीरभाष्याद्यभिप्रायसुखावबोधानुकूलग्रन्थनिर्माणाय समस्तसात्विकजनैरभ्यर्थितश्शोपार्यवंशमुक्ताफलायमानः श्रीयादवाद्रिनिवासरसिकष्षड्दर्शनीपारावारपारीणः **श्रीमदनन्तार्यवर्यः** श्रीभाष्येऽवश्यं ज्ञातव्यस्य प्रतितन्त्रसिद्धान्तस्य निष्कलङ्कज्ञानजननक्षमान्नवीनन्यायमार्गानुसारिणो **न्यायभास्करा**द्यनेकवादार्थान् विरचय्य तत्समयसमुदिताज्ञानान्धकारमपाकरोत् ॥ एतद्ग्रन्थपरिशीलनपराणां व्युत्पित्सूनां सौकर्याय कुतूहलिना मया तत्र तत्र विरला टीका विलिखिता। तदवलोक्य गुणैकपक्षपातिनस्सुधियस्सन्तुष्यन्तु ॥

क्वाहं मन्दमतिः क्व तादृशगिरष्षड्दर्शनीपारगाः
तेऽनन्तार्यविपश्चितस्सुमनसां सन्दोहसम्पूजिताः ।
तद्ग्रन्थाशयवर्णनोदितमिदं मौख्यं मदीयं वरं
सोढव्यं हृदयालुभिर्बुधवरैर्वात्सल्यवाराकरैः ॥

श्रीयादवाद्रिनिवासी
विद्वान् ए. स्था. कुप्पनैयङ्गार्यः ॥

॥ श्रीः ॥

ग्रन्थावतरणम् ।

तत्रास्मिन् **शास्त्रारम्भसमर्थनवादे** वेदान्तशास्त्रस्य कर्मविचारानन्तरमारम्भणीयत्वं व्यवस्थाप्यते । तत्र पदानां सिद्धरूपार्थे शक्तिग्रहासम्भवात् सिद्धरूपब्रह्मप्रतिपादकं वेदान्तशास्त्रमनारम्भणीयमिति शङ्कायां—बालानां कार्यरूपार्थ इव सिद्धार्थेऽपि व्युत्पत्तिसम्भवात् इदं शास्त्रमारम्भणीयमिति सिद्धे व्युत्पत्तिसमर्थनपरं प्रथमं **जिज्ञासासूत्रम्** ॥

विचारविषयत्वेन प्रतिज्ञातस्य ब्रह्मणो लक्षणतः प्रतिपत्तिसम्भवप्रतिपादनपरं द्वितीयं **जन्मादिसूत्रम्** ॥

प्रमाणान्तरप्राप्ते शास्त्रस्य तात्पर्यासम्भवात् ब्रह्मणश्च कार्यत्वाद्यनुमानगम्यतया इदं शास्त्रमनारम्भणीयमिति **शङ्कायां—ब्रह्मणः** प्रमाणान्तरागम्यत्वप्रतिपादनपरं तृतीयं **शास्त्रयोनित्वादिति सूत्रम्** ॥

प्रवृत्तिनिवृत्त्यन्वयविरहिणो ब्रह्मणः अफलत्वेन तत्र **शास्त्रस्य** तात्पर्यासम्भवात् अनारम्भणीयमिति **शङ्कायां—निरतिशयसुखत्वेन** ब्रह्मणः परमपुरुषार्थत्वसम्भवात् इदं **शास्त्रमारम्भणीयमिति ब्रह्मणः** पुरुषार्थत्वसमर्थनपरं चतुर्थं **समन्वयसूत्रम्** ॥

तदेवमनिपतितमकलेतरप्रमाणसम्भावनाभूमितया **शास्त्रैकसमाधिगम्यस्य परस्य ब्रह्मणः परमप्राप्यत्वरूपपरमपुरुषार्थत्वे ज्ञाते तदितरवैराग्यस्य सुखेन सम्भवात् मुमुक्षुभिरिदं शास्त्रमवश्यं श्रोतव्यमित्युक्तं** भवतीति सुधियो विदांकुर्वन्तु ॥

॥ श्रीः ॥

शास्त्रारम्भसमर्थनविषयसूचिका ॥

शास्त्रारम्भसमर्थन शोधनपत्रिका.

पृ.	प.			
५	२२	तात्पर्यविषयत्व	स्थाने	तात्पर्य
६	२	तात्पर्यस्या	,,	तात्पर्यभ्रमस्याप्य
,,	४	अश्वसंसर्ग	,,	अश्वानयन
,,	५	रित	,,	रितस्य
७	२१	विषं भुं	,,	भुं
८	१	शास्त्रस्थे	,,	शास्त्रस्थे
,,	५	लाक्षिणिक	,,	लाक्षणिक
,,	२४	घटत्व	,,	घटत्वादि
९	१९	कार्यघटित	,,	कार्यान्वित
,,	२३	द्रव्या	,,	द्रव्य
१२	५	कारण	,,	कारणता
१३	७	संभवात्	,,	संभवात्
१४	२४	व्यपारा	,,	व्यापारा
१५	३	गृहीतुं	,,	ग्रहीतुं
,,	१०	न्तर	,,	न्तरशङ्का
१६	२१	श्वैतिमं रूपं	,,	श्वैतिमाकारं चेत्यपि पाठः
,,	२६	न्यायरत्ने	,,	न्यायरत्नाकरे
१७	१	इति	,,	....
१८	१४	उपपत्ति	,,	उत्पत्ति
२०	७	संसर्गता	,,	संसर्ग
२१	३	विपयतात्वा	,,	विपयत्वा
,,	८	धटा	,,	घटा
२२	५	आकाङ्क्षाभिधानत्व	,,	आकाङ्क्षात्व
२४	२४	समभित्वा	,,	समभिव्या

पृ.	पं.			
२६	२	नत्वस्य	स्थाने	नस्य
२७	१	कारणताजन्य	,,	कारणतानिरूपितजन्य
,,	,,	त्वावच्छेदकत्वात्	,,	त्वावश्यकत्वात्
,,	१३	विशिष्ट	,,	विशेष
३८	३	ग्रामस्य सिद्ध	,,	ग्रामस्यासिद्ध
४०	१२	दुर्वारे	,,	दुर्वारे
,,	१९	सामन्य	,,	सामान्य
४२	८	रैकग्रन्थ	,,	रैकग्रन्थ्य
४२	१८	क्तातिव्याप्तिः	,,	क्तापत्तिः
,,	२२	धर्मपर	,,	ब्रह्मपर
४४	१०	पूर्णमा	,,	पूर्णमा
,,	१९	पथं त	,,	पथस्त
,,	२९	मकर	,,	मुकर
४९	९	श्रीभप्ये	,,	श्रीभाष्ये
४६	१८	कारकस्य	,,	कारकत्वस्य
,,	१९	पपत्तेः	,,	पपत्तिः
४९	२	कारणत्वस्य	,,	कारणस्य
,,	३	एवमपि	,,	एवमेव
,,	९	तद्बाधात्	,,	तद्बाधात्
५०	१२	स्त्रियं पांसुला	,,	स्त्री पांसुलाः
५१	१३	प्रथमे भेद	,,	प्रथमेऽभेद
५४	४	तत्पर	,,	तत्त्वपर
५५	१७	मात्रस्येव	,,	मात्रस्य
,,	,,	कारित्वस्य च	,,	कारित्वस्य
६१	२	नरोधात्	,,	नुरोधात्
६४	९	उभय	,,	उभयवादि
६६	८	वद्बोधा	,,	वद्बोगा
६९	२	श्रयाश्रय	,,	श्रय

पृ.	प.			
७०	१०	तात्पर्या	स्थाने	तात्पर्यकत्वा
७३	९	शक्तित्वे	,,	शक्तत्वे
७५	१२	जीव्यत्वेन	,,	जीविम्लेच्छा
,,	१३	जीव्ये	,,	जीविम्ले
,,	२४	नेप्व	,,	नेष्ट
७६	१४	तर	,,	तम
७६	१५	तर	,,	तम
,,	२२	योर्दृष्टान्तो	,,	दृष्टान्तयोरु
७७	१९	वाक्यात्ता	,,	वाक्यानां ता
७८	१८	भवनिवेशे	,,	भवे निवेशे
८०	१५	अनन्दो ब्र	,,	आनन्दो ब्र
,,	१८	पुरूपा	,,	पुरुपा
८१	१४	न्तर्गत	,,	न्तर्गतस्य
८३	१३	दनिष्टाननु	,,	दनिष्टानु
,,	२५	पवर्ग	,,	पवाद
८४	७	शेपित्वे	,,	शेपत्वे
८५	४	ध्येक	,,	ध्येक
,,	९	प्रवक्ष्ये	,,	ब्रवीम्योमित्येतत्
८६	१०	पादका	,,	पादिका
,,	११	पादका	,,	पादिका
,,	२२	त्यथर्वा	,,	त्यर्थवा
८८	१५	विपय	,,	विपयि
,,	,,	द्रष्टव्य'	,,	द्रष्टव्यः'
,,	१६	ब्रह्म	,,	——
८९	७	सिद्धिस्त	,,	सिद्धिर
९०	५	निर्वाहाय	,,	निर्वाहाय च
,,	१८	संस्कृत	,,	संस्कृताधीत

पृ	प			
९१	१२	ब्रह्मविषयक	स्थाने	ब्रह्मविषयकज्ञानवि
९२	३	ब्रह्मीव	,,	ब्रह्मवि
९३	१२	विषय	,,	विषयक
९४	९	योगे	,,	योगेन
९५	९	विषय	,,	विषयत्व
,,	२५	त्यदि	,,	त्यादि
९६	१८	ज्ञानत्वा	,,	ज्ञाना
,,	२३	हृदय	,,	हृदयादि
९८	१	ग्रहणो	,,	ग्रहेणो
१००	१४	एवमिति	,,	एवं—इति
१०२	१४	कालिका	,,	कलिका
,,	१६	मुद्गरादि	,,	मुद्गराभि
,,	२०	कारण	,,	करण
१०३	१३	ग्रहं	,,	ग्राहकः
,,	१७	त्यनन्त	,,	त्यन्त
,,	१९	तत्र	,,	अत्र
,,	२५	त्यदि	,,	त्यादि

टिप्पण्याम्

i	२२	होमादौ	स्थाने	हुमादौ
v	२०	ब्रह्मशरीरक	,,	ब्रह्मशरीर
x	१	सुस्व	,,	सुख

उपोद्घाते—

iii	२०	वरं	स्थाने	परं

श्रीः

श्रीमते रामानुजाय नमः.

शास्त्रारम्भसमर्थनम्.

हेतवे सर्वजगतां हेयपापाब्धिसेतवे ।
शान्ताय यादवगिरौ कान्तायास्तु नमः श्रियः ॥

श्रीमद्रामानुजार्यं श्रुतिशिखरशिखाधाविमेधाविलासैः
प्रोद्यद्व्याहारगुम्भैर्विदलितकुमताडम्बरं तं भजामि ।
यद्भाष्याम्भोधिगर्भप्रसृमरसुमहायुक्तिवीचीविहारा
वेलान्ते विक्षिपन्ति प्रतिकथकघटादूषणालीतृणानि ॥१॥

मत्वा पूर्वगुरूणां सरणिं शेषार्यवंशवार्धीन्दुः ।
शास्त्रारम्भविचारं तनुते कुतुकादनन्तार्यः ॥२॥

शास्त्रारम्भार्था चतुस्सूत्रीति सिद्धान्तः । अत्र शास्त्रशब्देन मीमांसाशास्त्रैकदेशभूता शारीरकमीमांसा विवक्षिता । तेन चतुस्सूत्र्या विंशतिलक्षणीपूर्वत्वाभावेन विशिष्टशास्त्रारम्भार्थत्वासंभवेऽपि न क्षतिः । तत्रापि "ईक्षतेर्नाशब्दम्" इत्यादिकमेव विवक्षितम् । तेन चतुस्सूत्रीजन्यज्ञानस्य चतुस्सूत्रीविषयकप्रवृत्तिसाध्यस्य तत्र प्रवर्तकत्वाङ्गीकारेऽन्योन्याश्रयापत्तावपि न क्षतिः । आरम्भशब्देन प्रवृत्तिसामान्यं विवक्षितम्, नत्वाद्यप्रवृत्तिः । तेनेष्टसाधनताज्ञानस्य प्रवृत्तित्वावच्छिन्नं प्रत्येव कारणतया तत्प्रयोजकचतुस्सूत्र्या आद्यप्रवृत्तित्वरूपारम्भत्वावच्छिन्नप्र-

योजकत्वासंभवेऽपि न क्षतिः। सा च प्रवृत्तिरध्येतृपुरुषसमवेता ग्राह्या, न तु सूत्रकारसमवेता। सर्वज्ञस्य तस्य स्वतस्सिद्धेष्टसाधनताज्ञाने चतुस्सूत्र्याः प्रयोजकत्वासंभवेऽपि न क्षतिः। एवं चेक्षतेर्नाशब्दमित्यादिशास्त्र विषयकप्रेक्षावत्प्रवृत्तिहेतुभूतज्ञानसंपादकत्वं चतुस्सूत्र्याश्शास्त्रारम्भार्थत्वमिति फलितम्.

ननु शास्त्रप्रवृत्तिहेतुभूतज्ञानस्य चतुस्सूत्रीसाध्यत्वे चतुस्सूत्र्यां प्रवर्तकं ज्ञानं केन जायते, आप्तोपदेशेन तादृशज्ञानस्वीकारे शास्त्रप्रवृत्ति हेतुभूतज्ञानस्याप्याप्तोपदेशेनैव संभवेन चतुस्सूत्रीवैयर्थ्यमितिचेन्न। अल्पायाससाध्यचतुस्सूत्रीप्रवृत्तौ अप्रामाण्यज्ञानास्कन्दितस्यापीष्टसाधनताज्ञानस्य कारणतया तादृशज्ञानस्याप्तोपदेशादिना संभवेऽपि बहुप्रयाससाध्यशास्त्रविषयकप्रवृत्तौ अप्रामाण्यज्ञानानास्कन्दिततज्ज्ञानस्यैव हेतुतया तत्संपादकतया चतुस्सूत्रीसार्थक्यात् ॥

ननु चतुस्सूत्र्या ब्रह्मणि जिज्ञास्यत्व–जगत्कारणत्व–शास्त्रप्रमाणकत्व-पुरुषार्थत्व-प्रतिपादकत्वेऽपि शास्त्रत्वावच्छिन्नविशेष्यकेष्टसाधनत्व प्रकारकबोधजनकत्वाभावाच्छास्त्रत्वावच्छिन्नविशेष्यकप्रवृत्तिजनकत्वानुपपत्तिः। न च प्रवृत्तौ फलसाधनताज्ञानमिव फलज्ञानमपि कारणम्, प्रकृते चानवधिकातिशयानन्दब्रह्मानुभव एव फलमिति तज्ज्ञानस्य प्रवृत्तिकारणतया तादृशफलज्ञानेऽनवधिकातिशयानन्दब्रह्मज्ञानस्य विशेषणज्ञानविधया कारणत्वात् प्रवृत्तिप्रयोजकत्वम्, एवं च तादृशज्ञानजनकस्य समन्वयसूत्रस्य प्रवर्तकत्वमुपपन्नमिति वाच्यम्। उपासनात्मकज्ञानस्यैव मोक्षकारणत्वेन शास्त्रजन्यज्ञानस्य तथात्वासंभवेन शास्त्रस्य मोक्षसाधनत्वरूपेष्टसाधनत्वानुपपत्तेः। महावाक्यतात्पर्यमजानतः परस्परविरुद्धतया प्रतीयमानतत्तद्वाक्यजन्यशाब्दबोधाधीनमहावाक्य तात्पर्यसंदेहवतस्तात्पर्यनिर्णयद्वारा वेदान्तार्थनिर्णयेच्छोरेवात्र शास्त्रे प्रवर्तमानतया तादृशनिर्णयस्यैव फलताया उचितत्वेन तादृशफलज्ञान-

स्यैव प्रवर्तकत्वात् । न च वेदान्तार्थनिर्णयस्य साक्षाच्छास्त्रफलत्वेऽपि परम्परया फलत्वं मोक्षस्यापि संभवति, मोक्षजनकस्योपासनस्य स्मृति सन्ततिरूपस्य समानाकारानुभवजन्यत्वेन शास्त्रजन्यज्ञानजन्यत्वात्, "अनुविद्य विजानाति," "विज्ञाय प्रज्ञां कुर्वीत" इत्यादिश्रुत्या शास्त्र जन्यज्ञानस्योपासने हेतुत्वावगतेरिति वाच्यम् । मोक्षजनकोपासनार्थं वेदान्तार्थनिर्णयस्योपासकैस्संपाद्यत्वेऽपि प्रपन्नैस्तदर्थं तस्य संपादनीयत्वा भावात्— । "संतोषार्थं विमृशति मुहुः सद्भिरध्यात्मविद्याम्" इत्युक्त रीत्या संतोषार्थमेव तस्य संपादनीयत्वात् प्रपन्नसाधारण्यानुरोधेन वेदान्तार्थनिर्णयस्यैव शास्त्रफलत्वस्य युक्तत्वात् मोक्षस्य फलत्वेऽपि प्रवृत्ति हेतुभूतफलज्ञानप्रयोजकतया चतुर्थसूत्रस्य शास्त्रारम्भार्थतासंभवेऽपीतरे षां त्रयाणां तदनुपपत्तेश्चेति ॥ मैवम् ॥

शास्त्रप्रवृत्तिहेतुभूतेष्टसाधनताज्ञानप्रतिबन्धकनिरासकत्वमेव शास्त्रारम्भार्थत्वम् । तथाहि—शास्त्रप्रवृत्तौ हि शास्त्रविशेष्यकं निरतिशयबृहत्त्वविशिष्टब्रह्मरूपसिद्धार्थविषयकनिर्णयशाब्दबोधात्मकेष्टसाधनत्वज्ञानं कारणं, तादृशशाब्दबोधस्यैव शास्त्रफलत्वात् । सिद्धब्रह्मविष यकशाब्दबोधजनकत्वज्ञाने च तादृशबोधजनकत्वाभावव्याप्यसिद्धब्रह्म तात्पर्यकत्वाभावज्ञानं प्रतिबन्धकम्, तद्वत्ताबुद्धौ तदभावव्याप्यवत्ता ज्ञानस्य प्रतिबन्धकत्वात् । तत्र शब्दत्वावच्छिन्नस्य सिद्धे व्युत्पत्त्यभा वात्सिद्धार्थतात्पर्यकत्वासंभव इति शङ्कायां, सिद्धे व्युत्पत्तिसमर्थन पूर्वकं शब्दत्वरूपसामान्यधर्मावच्छिन्नस्य सिद्धार्थत्वरूपसामान्यधर्माव- च्छिन्नविषयकतात्पर्यसमर्थनद्वारा तादृशप्रतिबन्धकज्ञाननिरासकं प्रथम सूत्रम् ॥ निरतिशयबृहत्त्वस्य दुर्निरूपत्वेन तद्विशिष्टब्रह्मणो बाधित त्वात् प्रमाणभूतशब्दत्वरूपविशेषधर्मावच्छिन्नस्य निरतिशयबृहत्त्व रूपविशेषधर्मावच्छिन्नतात्पर्यकत्वं न संभवतीति शङ्कायां, तादृशब्रह्मणोऽ बाधितत्वप्रतिपादनेन तादृशतात्पर्यसमर्थनद्वारा उक्तप्रतिबन्धकनिरा-

सकं द्वितीयसूत्रम् ॥ एवञ्च प्रथमद्वितीयसूत्रयोर्लौकिक[1]शब्दसाधारण धर्मावच्छिन्ने तात्पर्यसमर्थनपरत्वादेकपेटिकात्वमुपपन्नम् । श्रुतित्व रूपविशेषधर्मावच्छिन्नस्य प्रमाणान्तरानधिगतत्वरूपापूर्वताविशिष्टार्थ एव तात्पर्याद्ध्वणश्चानुमानगम्यत्वेन तत्र तात्पर्यासंभव इति शङ्का निरामकं तृतीयसूत्रम् ॥ श्रुतित्वावच्छिन्नस्य सफल एवार्थे तात्पर्या द्ध्वणश्च प्रवृत्त्याद्यविषयत्वेन फलत्वाभावात्तत्र तात्पर्यासंभव इति शङ्कानिरामकं चतुर्थसूत्रम् ॥ अत्र श्रुतित्वावच्छिन्नस्य तात्पर्य समर्थन परत्वात्तृतीयचतुर्थसूत्रयोरेकपेटिकात्वम् । तथा च शास्त्रगोचरप्रेक्षाव-त्प्रवृत्तिहेतुभूतेष्टसाधनताज्ञानप्रतिबन्धकज्ञानविघटकत्वरूपं शास्त्रार-म्भार्थत्वं चतुःसूत्र्या उपपन्नम् । तथा चोक्तम्—

"व्युत्पत्त्यभावः प्रतिपत्तिदौस्थ्य
मन्येन लभ्यत्वमथाफलत्वम् ।
एतानि वै सूत्रचतुष्टयेना
ऽनारम्भमूलानि निराकृतानि ॥" इति.

अनारम्भमूलानि - शास्त्रप्रवृत्तिहेतुभूतज्ञानप्रतिबन्धकसंपादकानीत्यर्थः, अनारम्भपदस्यारम्भहेतुभूतेष्टसाधनताज्ञानप्रतिबन्धकत्वद्वारा आरम्भप्र-तिबन्धकपरत्वात् । एवं चारम्भहेतुभूतेष्टसाधनताज्ञानप्रतिबन्धकतात्प-र्याभावग्रहसंपादकसिद्धव्युत्पत्त्यभावादिनिरासकत्वमेव शास्त्रारम्भार्थत्व मित्युक्तं भवति ॥

ननु शब्दसामान्यस्य सिद्धार्थविषयकशक्त्यभावेऽपि सिद्धार्थतात्प-र्यकत्वं संभवति. पदानां यादृशार्थगोचरशक्तिमत्त्वं तादृशार्थतात्पर्यकत्व मिति नियमाभावात् । गङ्गादिपदस्य तीरे शक्त्यभावेऽपि तीरतात्पर्यकत्व दर्शनात्. धूमोऽस्तीतिवाक्यस्य स्वघटकपदाशक्ये वह्निसद्भावे तात्पर्य

---

१ (पा.) लौकिकवैदिकशब्दसाधारणधर्मावच्छिन्नस्य सामान्यविशेषधर्मावच्छिन्न तात्पर्यसमर्थनद्वारा, उक्तप्रतिबन्धकनिरसनपरत्वात्.

दर्शनाच्चेति चेन्न॥ प्राभाकरमते पदानां तादृशार्थविषयकशाब्दधीजनकतावच्छेदकधर्मवत्त्वमेव तादृशार्थगोचरशक्तिमत्त्वम् । स च धर्मो वह्न्यादिनिष्ठदाहानुकूलशक्तिरिव पदार्थान्तरमेव. लाक्षणिकं चाननुभावकमेवेति न तत्र शक्तिः । तन्मते ज्ञानसामान्यस्य मितिमातृविषयकतया घटमानयेत्यादौ मितिमातृविषयकस्यानयनादिरूपसमभिव्याहृतपदार्थान्तरविषयकस्य च घटादिबोधस्य जनकताया घटादिपदे सत्त्वेऽपि न तस्य मितिमातृवाचकत्वमानयनादिवाचकत्वं च तद्विषयत्वावच्छिन्नजन्यतानिरूपितजनकत्वस्यैव तद्वाचकत्वरूपत्वात् मितिमातृविषयताया ज्ञानसामान्यसामग्रीप्रयोज्यायाः पदजन्यतावच्छेदकत्वाभावात्— । आनयनादिविषयतायाश्च पदान्तरजन्यतावच्छेदकत्वेन घटादिपदजन्यतावच्छेदकत्वाभावात्। तद्विषयत्वावच्छिन्नेत्यत्रावच्छेदकत्वं साक्षात्परम्परासाधारणनिरूपितत्वाविशेषणतया ग्राह्यम् । तेन घटादिपदानां साक्षात्परम्परया वा कार्यत्वविषयतानिरूपितघटादिविषयकत्वावाच्छिन्नजनकत्वेऽपि न कार्यतावाचकत्वम् ॥ न च कार्यानुकूलशक्तेः स्वरूपसत्त्या एव कार्यानुकूलतया पदार्थोपस्थितौ शाब्दबोधे च ज्ञाततयोपयोगिनोऽर्थे पदस्य वृत्तिरूपशक्त्यन्तरस्य स्वीकार आवश्यक इति वाच्यम् । दाहादिरूपकार्ये वह्न्यादिनिष्ठशक्तेः स्वरूपसत्त्या एवोपयोगित्वेऽपि शाब्दबोधानुकूलशक्तेः शाब्दबोधे पदार्थोपस्थितौ च ज्ञातोपयोगित्वोपगमे बाधकाभावात् ॥ न चातीतानागतपदज्ञानादपि शाब्दबोधोत्पत्त्या पदानामहेतुत्वेन न तत्र हेतुतावच्छेदकशक्तिसंभव इति वाच्यम् । तन्मते पदानां नित्यत्वात् तद्विषयकबोधजनकतावच्छेदकधर्मवज्ज्ञानविषयत्वं वा तच्छक्तत्वमिति । एवं तन्मते तात्पर्यविषयत्वमपि न तत्प्रतीतीच्छयोच्चरितत्वम्, वेदस्यापौरुषेयत्वेन तात्पर्यानुपपत्तेः ॥ न च वेदे स्वतन्त्रवक्तुरभावेऽपि परतन्त्रवक्तॄणामध्यापकादीनां सत्त्वात्तदीयेच्छामादाय तात्पर्योपपत्तिरिति वाच्यम् । अर्थज्ञानशून्याध्यापकोच्चरितवेदाच्छाब्दबोधाभावप्रसङ्गात्,

अगमस्यापकोऽव्युत्पन्नइति विशेषदर्शनदशायामपि बोधोत्पत्त्या तत्र तात्पर्यस्यासंभवात् । किन्तु तदितरप्रतीतीच्छयानुच्चरितत्वे सति तद्विषयकबोधजनकतावच्छेदकधर्मवत्त्वमेव तात्पर्यम् । अत्र लवणानयनपरस्य सैन्धवमानयेति वाक्यस्य अश्वसंसर्गपरत्ववारणाय सत्यन्तम् । बुभोधयिषाशून्यशुकाद्युच्चारितघटमानयेत्यादिवाक्यस्य पटादिपरत्ववारणाय विशेष्यदलम् । न चोभयप्रतीतीच्छयोच्चरितवाक्येऽव्याप्तिः, तदन्यमात्र प्रतीतीच्छयानुच्चरितत्वस्य सत्यन्तार्थत्वात् । एवञ्च निरुक्ततात्पर्यस्य निरुक्तशक्तिव्याप्यत्वासिद्धे पदानां शक्त्यभावे तात्पर्यमपि न संभवतीति प्राभाकराक्षेपनिरसनाय सिद्धे व्युत्पत्तिसमर्थनपरं प्रथमसूत्रं युक्तम् । न च प्राभाकरमते शक्तितात्पर्ययोर्व्याप्यव्यापकभावसत्त्वेऽपि तदन्यमते तद भावाद्व्याप्यव्यापकभावनिराकरणमात्रेण सिद्धब्रह्मविषयकबोधजनकत्व रूपेष्टसाधनत्वस्य शास्त्रे संभवेन शास्त्रारम्भसंभवादुक्तव्याप्यव्यापक भावमभ्युपगम्य सिद्धे व्युत्पत्तिसमर्थनमयुक्तमिति वाच्यम् । प्राभाकर निरुक्तयोरेव शक्तितात्पर्ययोःसिद्धान्ते स्वीकारेण तयोर्व्याप्यव्यापकभा वनिराकरणायोगेन सिद्धे व्युत्पत्तिसमर्थनावश्यकत्वात् । उक्तं च—बोध कत्वमेव शक्तिरिति श्रीभाष्ये जिज्ञासाधिकरणे "शब्दार्थयोस्संबन्धा न्तरादर्शनात्सङ्केतयितृपुरुषाज्ञानाच्च तेषुतेष्वर्थेषु तेषां शब्दानां प्रयोगो बोधकत्वनिबन्धन इति निश्चिन्वन्तीति"॥ सूचितं च निरुक्तरूपमेवतात्पर्यमिति विवक्षितगुणोपपत्तेरित्यत्र टीकायाम्- "विवक्षितत्वं वक्तुमिच्छा विषयत्वम्, अपौरुषेयवाक्यप्रतिपाद्यगुणानां पुरुषेच्छापूर्वकत्वायोगात्क थं विवक्षितत्वमितिशङ्कायां विवक्षितपदं व्याचष्टे वक्ष्यमाणा इति. विवक्षितानामेव वक्ष्यमाणत्वाद्विवक्षितशब्देन वक्ष्यमाणत्वं लक्ष्यतइत्यर्थः" इति॥ यत्तु तत्तदर्थविषयकबोधजनकत्वमेव तत्तदर्थे शक्तिरिति न संभवति—तीरादिबोधजनकस्य गङ्गादिपदस्यापि तीरादिशक्तत्वापत्तेः। न च लाक्षणिक पदस्य नानुभावकत्वं, पदार्थोपस्थित्याऽन्यथासिद्धत्वादिति वाच्यम् ।

शक्तस्यापि तुल्यन्यायेनान्यथासिद्ध्यापत्तेः। न चानुभावकतावच्छेदकश क्त्यभावाल्लाक्षणिकस्य नानुभावकत्वम्, किन्तु लक्ष्यार्थान्वितस्वार्थबोधे पदान्तरमेव कारणमिति वाच्यम्। तथा सति गङ्गायां घोषइत्यादौ घोषा दिपदस्यैव तीरान्वितस्वार्थबोधकत्वेन तीरादिबोधजनकतावच्छेदकश- क्तिमत्तया तीरादिवाचकत्वापत्तेः, धूमादिति हेतुवाक्याद्बोधानुपपत्तेश्च, तत्र धूमपदस्य धूमज्ञाने पञ्चम्याश्चज्ञाप्यत्वे लाक्षणिकत्वेन मुख्यार्थक पदाभावात्—इति शक्तिवादे गदाधरेण दूषणमुक्तम्; तन्न, लाक्षणिक पदस्य पदार्थोपस्थित्याऽन्यथासिद्धत्वेऽपि शक्तपदस्य तथाऽन्यथासि द्ध्यभावात्, वृद्धव्यवहारेण शक्तिग्रहकाले प्रवृत्त्यनुमितशाब्दबोधं प्रति पदज्ञानस्य हेतुतां कल्पयित्वा तस्यास्साक्षादसंभवेन तदुपपादकतया पदार्थोपस्थितेर्द्वारत्वस्य कल्पनात्, व्यापारिकारणतानिर्वाहकेण व्यापारे- ण व्यापारिणोऽन्यथासिद्ध्यसंभवात्। अन्यथा यागकारणतानिर्वाहकेणा प्यपूर्वेण यागस्यान्यथासिद्ध्यापत्तेः। न च लाक्षणिकपदस्य शाब्दबोधा जनकत्वे धूमादित्यादिसर्वलाक्षणिकस्थलीयबोधस्य शाब्दत्वानुपपत्तिः, पदजन्यत्वाभावादिति वाच्यम्। पदप्रयोज्यत्वादेव तदुपपत्तेः। धूमा- दित्यादौ पञ्चम्या एव ज्ञानज्ञाप्यत्वे लक्षणा, धूमपदं चालाक्षणिकमेवेति नवीनमतस्यावयवदीधित्यादिसिद्धतया तत्पक्षस्यैव युक्तत्वेन सर्वपदल- क्षणास्थले बोधानभ्युपगमाच्च। अत एवोक्तं श्रुतप्रकाशिकायाम्, "यच्च विषं भुंक्ष्वेत्यादौ सर्वपदलक्षणा दृष्टेति, तच्च विधिप्रत्ययस्यमुख्यार्थत्वा दयुक्तमिति"॥ शतदूषण्यामपि "यत्पुनर्विषं भुंक्ष्वेत्यादिषु सर्वपदलक्षणा दृष्टेति, तदपि न, विषं भुंक्ष्वेत्यस्य प्रतियोगिविशेषसमर्पकस्य तत्रापि मुख्यत्वात्। विषशब्देनैव ह्यनर्थकरभक्ष्यरूढेन भुज्यमाने तस्मिन्ननर्थे हेतुतया निषिद्धतामभिप्रयता भोजननिषेधोप्यभिप्रेतः" इत्युक्तम्॥ न चैवं प्राभाकराणामपि सर्वपदलक्षणा न स्यादिति वाच्यम्, इष्टत्वात्। अथैवं प्राभाकराणां सर्वपदलक्षणाभ्युपगमप्रतिपादकश्रीभाष्यविरोधः,

तथाच प्रथमसूत्रे भाष्यम् "तथा च शास्त्रस्थैरभ्युपगम्यते, कार्यवाक्या र्थवादिभिर्लौकिकवाक्येषु सर्वेषां पदानां लक्षणा समाश्रीयते, अपूर्वकार्य एव लिङादेर्मुख्यवृत्तत्वात्, लिङादिभिः क्रियाकार्यं लक्षणया प्रतिपाद्यते, कार्यान्वितस्वार्थाभिधायिनां चेतरेषांपदानामपूर्वकार्यान्वित एव मुख्योर्थ इति क्रियाकार्यान्वितप्रतिपादनं लाक्षणिकमेव" इति चेन्न॥ अद्वैतिभि स्सत्यज्ञानादिवाक्येषु सर्वपदलक्षणाव्यवस्थापनाय प्राभाकरानभ्युपगता- मपि सर्वपदलक्षणां तदभ्युपगतत्वेन कल्पयित्वा स्वग्रन्थेषु तथा प्रति- पादिततया तद्ग्रन्थार्थानामेव श्रीभाष्येऽनूदितत्वेन तादृशार्थस्य प्राभाक- रमतसिद्धतया भाष्यतात्पर्यविरहात् । सूचितं चेदं तथाचाभ्युपगम्यत इत्यस्य व्याख्यानावसरे श्रुतप्रकाशिकायाम् "तथा—सर्वपदलक्षणाया अदोषत्वं. अभ्युपगम्यते, अभ्युपगमहेतु सद्भावादभ्युपगमः फलित इति भावः" इति ॥

यदि च लाक्षणिकपदस्यापि शाब्दबोधजनकत्वं शक्तपदस्येवा भ्युपगम्यते, न चैवं गङ्गापदस्य तीरबोधजनकत्वरूपतीरशक्तत्वापत्तिरि- ति वाच्यम्. स्वजन्यशक्यार्थस्मृतिजन्यलक्ष्यार्थस्मृतिद्वारैव तत्र गङ्गा पदेन तीरबोधाङ्गीकारेण एकमात्रस्मृतिद्वारकबोधजनकत्वाभावात्, अतस्सर्वपदलक्षणास्थलेऽपि बोधस्य शाब्दत्वमुपपद्यते। अत एव "चराच- रव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्" इत्यत्र श्रीभा- ष्ये ब्रह्मभिन्नद्रव्यवाचिनां सर्वेषां पदानां स्वस्वार्थशरीरकब्रह्मण्येव शक्तिः स्वस्वार्थेषु तु लक्षणेति व्यवस्थापनेन घटोद्रव्यमित्यादिवाक्येषु सर्वपदल क्षणास्वीकारः सूचितः। एवं च तात्पर्यानुरोधेन शास्त्रस्थानां सर्वपदलक्ष णाभ्युपगमः संभवतीति विभाव्यते। तथापि प्राभाकराणां लौकिकवाक्येषु सर्वपदलक्षणाभ्युपगमो न युज्यते ; तन्मते हि स्मारकशक्तिरानुभाविकी शक्तिरिति शक्तिद्वयं पदानां स्वीक्रियते, तत्र घटादिपदानां घटत्वजातौ स्मारकशक्तिः, कार्यान्वितघटादौ चानुभाविकशक्तिः, तत्राद्या घटत्व-

निष्ठविषयत्वावच्छिन्नशाब्दबोधनिष्ठजन्यतानिरूपितजनकत्वरूपा घटादिपदनिष्ठा घटःकर्मत्वमानयनंकृतिरित्यादिवाक्यघटकपदसाधारणी, द्वितीया च कार्यत्वविषयतानिरूपितघटविषयत्वावच्छिन्नबोधनिष्ठजन्यतानिरूपितजनकतारूपा, घटमानयेत्यादिवाक्यघटकलिङादिपदसमभिव्याहृतद्वितीयान्तघटादिपदनिष्ठा। एवं च यत्र स्मारकशक्तिर्नास्ति तत्र लक्षणया बोधः — यथा यष्टीः प्रवेशयेत्यादौ। आनुभाविकशक्तिविरहे च लक्षणयाऽपि न बोधः। उक्तानुभाविकशक्ते नैयायिकमतसिद्धाकांक्षास्थानीयतया आकांक्षाविरहेण घटःकर्मत्वमित्यादौ बोधाभाववत् कार्यतावाचकपदसमभिव्याहारव्याप्यानुभाविकशक्त्यभावे शाब्दबोधस्याङ्गीकर्तुमशक्यत्वात्। कार्यताविषयकबोधत्वस्य शाब्दबोधत्वव्यापकतया तदवच्छिन्नजनकलिङादिपदजन्यकार्यत्वोपस्थित्यभावेन व्यापकधर्मावच्छिन्नजनकसामग्रीविरहात् तादृशशाब्दबोधाभावः॥

न च—अपूर्वरूपकार्यान्वितार्थ एवानुभाविकीशक्तिरिति तदभावात् क्रियाकार्यान्वितबोधो लक्षणयैवेति—वाच्यम्, आनुभाविकशक्त्यभावस्थलेऽपि बोधाङ्गीकारे घटोऽस्तीति सिद्धार्थपरवाक्येऽपि लक्षणया बोधाङ्गीकारस्य दुर्वारत्वात्। अतोऽपूर्वक्रियाकार्योभयसाधारणकार्यान्वितार्थ एव पदानामानुभाविकीशक्तिः, तदभावे च न शाब्दबोध इत्येव **प्राभाकर सिद्धान्तः**॥

अत एव क्रियाकार्यघटितार्थ एव गामानयेत्यादिवाक्यस्य वृद्धव्यवहारेणानुभाविकशक्तिग्रहोपपादनं तेषामुपपद्यते, क्रियाकार्यान्विते वाक्यस्यानुभाविकशक्त्यभावे तदुपपादनासाङ्गत्यापत्तेः। अतः **प्राभाकरमते** लौकिकवाक्ये सर्वपदलक्षणोदाहरणमभ्युपगम्यवादमात्रमिति ज्ञेयम्॥

न चैवं द्रव्यावाचिपदानां तत्तच्छरीरकब्रह्मण्येव शक्तिस्वीकारे तत्तदर्थेषु शक्त्यभावादम्बातातमातुलादिपदानां तत्तदर्थेषु शक्तिग्रहोपपादनं **श्रीभाष्ये** विरुध्यत इति वाच्यम्, "चराचरव्यपाश्रयस्तु स्यात्तद्व्य-

पदेशो भाक्तः" इति **सूत्रस्य** जङ्गमस्थावरविषयस्तेजआदिशब्दस्तेजः प्रभृतिषु **भाक्तः**—लाक्षणिक इत्येकां व्याख्यां कृत्वा लोकविरोधाद्यनुसन्धानेन **अभाक्त** इति च्छेदं कृत्वा तेजःप्रभृतिशब्दानां ब्रह्मण्यभाक्तत्वपरतया द्वितीयव्याख्यानकरणेन तद्व्याख्यानपक्षे तेजआदिशब्दानां स्वार्थे तच्छरीरकब्रह्मणि च शक्त्यङ्गीकारेण तद्व्याख्यानानुरोधेनैवाम्बातातमातुलादिपदानां शक्तिग्रहवर्णनोपपत्तेः ।

"शब्द इति चेन्नातःप्रभवात्प्रत्यक्षानुमानाभ्याम्"
इति **सूत्रमपि** चराचरव्यपाश्रय इति सूत्रस्य द्वितीयव्याख्यानाभिमतार्थ एव तात्पर्यं ग्राहयति । तत्सूत्रे इन्द्रादिशब्दानामाकृतिविशेषावच्छिन्नवाचित्वस्य वाचकशब्दज्ञानेन वाच्यार्थं स्मृत्वा तत्सृष्टेश्च प्रतिपादनात् । "स भूरिति व्याहरत्" "स भूमिमसृजत" इत्यादि **श्रुत्या**

"नाम रूपं च भूतानां कृत्यानां च प्रपञ्चनं ।
वेदशब्देभ्य एवादौ देवादीनां चकार सः ॥"

इति **स्मृत्या** च तथा प्रतिपादनात् ॥

न च—लाक्षणिकशब्देन लक्ष्यार्थस्मरणपूर्वकसृष्ट्याऽपि तादृशश्रुत्याद्युपपत्तिः, एकसम्बन्धिज्ञानस्यापरसम्बन्धिस्मारकतया लक्षणासम्बन्धेनापि स्मरणोपपत्तेरिति—वाच्यम्, लाक्षणिकशब्दस्य नाम रूपं चेति नामशब्देनग्रहणानुपपत्तेः, नामशब्दस्य शक्तपरत्वात्; अतो द्वितीय व्याख्यायामेव निर्भरादम्बातातादिशब्दानां शक्तिग्रहवर्णनोपपत्तिः ॥ वस्तुतः प्रथमव्याख्यानपक्षेऽपि शक्तिग्रहवर्णनमुपपन्नम् । अम्बादिशब्दस्य अम्बादिशरीरकपरमात्मनि शक्तिर्नाम-- अम्बादिनिष्ठविषयतानिरूपितपरमात्मनिष्ठविषयत्वावच्छिन्नशाब्दबोधनिष्ठजन्यतानिरूपितजनकत्वम् । तद्घटकजन्यतायां वेदान्तश्रवणात्प्रागम्बादिविषयत्वावच्छिन्नत्वमात्रं प्रतीयते, वेदान्तश्रवणानन्तरं च तादृशविषयतानिरूपितपरमात्मविषयत्वावच्छिन्नत्वमपि प्रतीयत इति पूर्वागृहीतविशेषग्रह-

णाद्वेदान्तश्रवणाद्व्युत्पत्तिः पूर्यत इति सिद्धान्तोपपत्तिः । यथा "ज्योतिष्टोमेन स्वर्गकामोयजेत" इति वाक्यात् प्रथमं यागे स्वर्गत्वावच्छिन्नसाधनत्वग्रहेऽपि गङ्गास्नानादिजन्यस्वर्गे व्यभिचारज्ञानानन्तरं विजातीयस्वर्गत्वावच्छिन्नसाधनत्वं गृह्यते, तद्वत्प्रकृतेऽपीति न पूर्वोत्तरशक्तिग्रहयोर्विरोधः ॥ अत एवोक्तं **न्यायपरिशुद्धौ**—

"स्वर्गकामादिशब्दानामपि जीवादिमात्रेऽपि मुख्यत्वमेव । अत एव भाक्तपदस्य भङ्क्त्वा व्यपदेशार्थत्वमपि **भाष्यकारै**रुक्तम् । विशिष्टवेषस्य शक्तिविषयत्वात् तत्त्यागे कथं न लक्षणेति चेत्, परित्यक्तप्रवृत्तिनिमित्तकस्य व्युत्पत्त्यनुप्रविष्टमात्रबोधनं हि मुख्यता. तदभावकृत उपचार इति व्यवस्थापनात्" इति-

इत्यलं प्रसक्तानुप्रसक्त्या । तस्माच्छक्तितात्पर्ययोर्द्वयोरेव बोधजनकत्वघटितत्वात् शक्त्यभावे तात्पर्यायोगात् सिद्धे व्युत्पत्तिसमर्थनपरं प्रथमसूत्रमावश्यकं ॥ * * *

अत्र प्राभाकराः-- लिङाद्यसमभिव्याहृतानां सिद्धब्रह्मपरवाक्यानां बोधजनकत्वं न संभवति, बालस्य लिङादिसमभिव्याहृतवाक्य एव साक्षात्परम्परया वा कार्यत्वविषयतानिरूपितविषयताशालिबोधजनकत्वरूपानुभाविकशक्तिग्रहात् ॥ न च पदार्थोपस्थितिजनकतया स्मारकशक्तिज्ञानस्य कारणत्वेऽपि आनुभाविकशक्तिज्ञानस्य शाब्दबोधकारणत्वमसिद्धमिति वाच्यम् ॥ घटःकर्मत्वमानयनंकृतिरित्यादिवाक्ये निरुक्तानुभाविकशक्तिग्रहशून्यानां बोधानुत्पत्तेः तद्वाक्यस्यापि बोधकत्वग्रहवतां च शाब्दबोधोत्पत्त्या ऽन्वयव्यतिरेकाभ्यां तादृशशक्तिज्ञानस्य शाब्दबोधहेतुत्वावश्यकत्वात् । एतेन—घटःकर्मत्वमित्यादिवाक्याद्बोधवारणाय लोडन्तपदधर्मिकद्वितीयान्तघटादिपदसमभिव्याहारज्ञानस्य कारणत्वमिति नैयायिकोक्तं निरस्तम्--घटःकर्मत्वमित्यादिवाक्ये व्युत्पन्नानामपि तद्वाक्याद्बोधानुपपत्तेः ॥

यत्तु--प्रायशः पुरुषाणां घटमानयेत्यादिवाक्य एव व्युत्पन्नत्वात् तद्वाक्यजन्यबोधे द्वितीयान्तघटादिपदसमभिव्याहारज्ञानस्य कारणत्वे सिद्धे घटःकर्मत्वमित्यादिवाक्ये व्युत्पन्नानामपि न तादृशवाक्याद्बोधसंभवः, तथासति पुरुषभेदेन कारणताभेदकल्पनापत्तेरिति—**शितिकण्ठेनोक्तम्** ॥ **तन्न**--बोधेऽनुभवसिद्धे तन्निर्वाहाय कारणभेदकल्पनाप्रयुक्तगौरवस्य सोढव्यतया गौरवपरिहाराय बोधापलापस्यायुक्तत्वात्। अन्यथा लाक्षणिकस्थलेऽपि बोधाङ्गीकारे लक्षणाज्ञानजन्योपस्थितेरपि कारणत्वस्य कल्पनीयतया गौरवेण तत्र बोधापलापप्रसङ्गात्। अस्मदुक्तरीत्या निरुक्तानुभाविकशक्तिज्ञानस्य कारणत्वे पुरुषभेदेन कारणताभेदाभावाच्च। तस्मात् कार्यतावाचकलिङाद्यसमभिव्याहृतवाक्येषु आनुभाविकशक्तिग्रहाभावात्सिद्धपरवाक्येषु न शाब्दबोधसम्भवः॥

यत्तु सिद्धपरवाक्येष्वपि शाब्दबोधसंभवः, चैत्र पुत्रस्ते जातः इत्यादिवाक्यश्रवणानन्तरं चैत्रस्य मुखविकासादिलिङ्गेन तद्धेतुभूतपुत्रोत्पत्त्यादिप्रियविषयकबोधमनुमाय बालस्तादृशबोधस्योपस्थिततद्वाक्यजन्यत्वमनुमिनोतीति सिद्धपरवाक्येऽपि बालस्यानुभाविकशक्तिग्रहादिति **भाट्टोक्तम्**। **तन्न**—

तत्तदर्थविषयकशाब्दबोधे हि तत्तदर्थविषयकत्वावच्छिन्नबोधनिष्ठजन्यतानिरूपितजनकत्वरूपानुभाविकशक्तिज्ञानं कारणम्। न तु सामान्यतश्शाब्दबोधजनकत्वज्ञानं कारणम्, तथासति प्रमेयं कर्मत्वं पश्येति वाक्यस्य प्रमेयाभिन्नकर्मत्वकर्मकदर्शनविषयकबोधजनकत्वेन गृहीतस्य प्रमेयकर्मकदर्शनविषयकबोधजनकत्वप्रसङ्गात्। तथा च पुत्रस्ते जात इति वाक्यस्य मुखविकासादिलिङ्गेन हर्षहेतुभूतार्थविषयकबोधजनकत्वग्रहेऽपि विशिष्य पुत्रोत्पत्तिरूपार्थविषयकबोधजनकत्वरूपानुभाविकशक्तिग्रहो न संभवति। हर्षहेतूनां पुत्रोत्पत्तिभिन्नानामेव कालत्रयवर्तिनामनन्तानां संभवात्। न च तत्काले हेत्वन्तराभावनिश्च-

यात्पुत्रोत्पत्तिरूपहर्षहेतुविशेषनिश्चयस्संभवतीति वाच्यम् । तावताऽपि सुलग्न–सुखप्रसव–पित्राद्यनिष्टाभाव–भाविसमृद्ध्यादीनां बहूनां हेतूनां सत्त्वात् ॥ एतेन–नायं सर्पो रज्जुरेषेति वाक्ये निष्कम्पगात्रत्वलिङ्गेन भयाभावानुमित्यैतद्धेतुभूतसर्पभेदादिविषयकबोधजनकत्वग्रहस्संभवतीति निरस्तम् ॥ तादृशवाक्ये निष्कम्पगात्रत्वलिङ्गेन भयाभावहेतुभूतार्थविषयकबोधजनकत्वग्रहसंभवेऽपि सर्पभेदादिभिन्नानामनन्तानां सत्त्वेन तादृशग्रहासम्भवात् ॥[1]

यदपि–केनचित् कः कूजतीति पृष्टे पिकः कूजतीत्यन्येनोत्तरिते प्रश्नघटकपदानां शक्तिग्रहवतःउत्तरघटकपिकपदमात्रशक्तिज्ञानशून्यस्य कूजन्तं पक्षिविशेषं पश्यतः पुरोवर्तिपक्षिविशेषे पिकपदस्य शक्तिग्रहो जायते । एवं काष्ठकरणकपाकं पश्यतः काष्ठपदशक्तिग्रहशून्यस्य पुरुषस्य काष्ठैः पचतीति वाक्यात्पुरोवृत्तिपाककरणपदार्थे काष्ठपदशक्तिग्रहो जायते. इति सिद्धार्थेऽपि प्रसिद्धपदसान्निध्येन शक्तिग्रहाद्बोधोपपत्तिरिति–**नैयायिकोक्तं॥ तदपिन**–प्रसिद्धपदसान्निध्येन शक्तिग्रहो हि न पदसामान्यशक्तिज्ञानशून्यस्य पुरुषस्य जायते । किं तु कतिपयपदशक्तिग्रहवत एव । तथा च तत्र पदान्तरशक्तिग्रहस्य वृद्धव्यवहारेण कार्यार्थे एव वाच्यतया तत्समभिव्याहृतपिकपदादीनामपि न सिद्धार्थे शक्तिग्रह इति ॥

यदपि–पदानां कार्यार्थपरत्वस्य सकलपदानुगतस्यैकस्याभावात्कार्यार्थपरत्वं पदानामयुक्तम् । कार्यार्थपरत्वं नाम–कार्यरूपार्थाभिधायित्वम्, उत कार्यान्वितस्वार्थाभिधायित्वं, कारकान्वितस्वार्थाभिधायित्वं वा? नाद्यः, घटमानयेत्यादौ घटादिपदस्य कार्याभिधायित्वाभावेन व्यभिचारात् । न द्वितीयः, लिङादौ व्यभिचारात् तस्य कार्याभिधायित्वेन कार्यान्वितार्थाभिधायित्वाभावात् । न तृतीयः, कार-

१. (पा.) संभवेन विशिष्य सर्पभेदविषयकबोधजनकत्वग्रहासम्भवात् .

कपदेषु व्यभिचारात् । तस्मादन्यान्वितस्वार्थाभिधायित्वमेव पदानामनुगतमिति तदेव युक्तमभ्युपगन्तुमिति—**वाचस्पतिनोक्तम्** ॥**तदयुक्तम्**—कार्यरूपार्थाभिधायित्वस्य कार्यत्वविषयित्वावच्छिन्नशाब्दबोधनिष्ठजन्यतानिरूपितजनकतारूपत्वे घटादिपदे व्यभिचाराभावात् । कार्यत्वविषयितानिरूपितघटादिविषयित्वावच्छिन्नजनके घटादिपदे कार्यत्वाविषयत्वावच्छिन्नजनकत्वस्याक्षतत्वात्, कार्यान्वितस्वार्थाभिधायित्वस्य कार्यत्वघटितार्थाभिधायित्वरूपत्वे द्वितीयपक्षेऽपि दोषाभावात्। कार्यत्वाविषयकप्रतीत्यविषयत्वरूपस्य कार्यत्वघटितत्वस्य कार्यत्वेऽपि सत्त्वेन तदभिधायिलिङादौ व्यभिचारप्रसक्तेः कारकान्वितत्वस्य कारकघटितत्वरूपस्य कारकसाधारणत्वेन कारकपदे व्यभिचाराभावात् तृतीयपक्षस्याप्यदुष्टत्वात्। तस्मात्कार्यार्थ एव शक्तितात्पर्ययोस्सत्त्वात् सिद्धार्थविषयकबोधजनकत्वं न संभवतीति वेदान्तानां ब्रह्मणि प्रामाण्याभावाद्विचारो न युक्तः— **इति वदन्ति** ॥ * * *

अत्रोच्यते—प्रथमं वृद्धव्यवहारेणैव शक्तिग्रह इत्ययुक्तम्। चेष्टात्वस्य प्रवृत्तिजन्यत्वव्याप्यत्वं प्रवृत्तित्वस्य कार्यताज्ञानजन्यत्वव्याप्यत्वं च जानत एव उक्तरीत्या व्यवहारेण शक्तिग्रहसंभवेऽपि तच्छून्यस्य बालस्य तेन शक्तिग्रहायोगात्॥ न च स्वीयचेष्टासु बहुशः प्रवृत्तिपूर्वकत्वस्य स्वीयप्रवृत्तिषु बहुशः कार्यताज्ञानपूर्वकत्वस्य च दर्शनेन व्यभिचारज्ञानाभावसहकृतसहचारज्ञानसत्त्वेन बालस्यापि व्याप्तिज्ञानं संभवतीति वाच्यम्॥ एवमपि गामानयेतिवाक्ये सामान्यतस्तद्वाक्यानन्तरकालीनक्रियाहेतुभूतकार्यताज्ञानजनकत्वग्रहसंभवेऽपि विशिष्य गवानयनधर्मिककार्यताज्ञानहेतुत्वग्रहासंभवात्, तादृशवाक्यप्रयोगानन्तरं गवानयनात्पूर्वमेव आसनादुत्थानोत्तरीयाच्छादन—दण्डग्रहण—यादृच्छिकसंभाषण—गमनाद्यवान्तरव्यापाराणां बहूनां प्रयोज्यवृद्धगतानामुपलम्भात् ॥

---

१. प्रवृत्तिद्वारेत्यर्थः.

न च तादृशवाक्यप्रयोगानन्तरं व्यापारान्तराणामनियमात् गवानयनस्य नियतत्वात् तत्तद्विशेष्यककार्यताज्ञानहेतुत्वं विशिष्य तद्वाक्ये गृहीतुं शक्यत इति वाच्यम् । एवमपि--गां सन्दर्शय, गां पुरतःस्थापय, गां देहीत्यर्थान्तरपरत्वशङ्कासंभवेन विशिष्य गवानयनकार्यताबोधजनकत्वग्रहासंभवात् ॥

यदि च--बहुभिः प्रयोगैरर्थान्तरपरत्वशङ्कावारणपूर्वकं गवानयनहेतुत्व निश्चयस्संभवतीति--विभाव्यते । तदा 'चैत्र पुत्रस्ते जातः', 'नायं सर्पः' इत्यादिवाक्येषु प्रीत्यभीत्यादिलिङ्गेन विवक्षितार्थबोधहेतुत्वग्रहसंभवात् सिद्धे व्युत्पत्तिरनिवार्या, तत्रापि बहुभिः प्रयोगैरन्वयव्यतिरेकाभ्यामर्थान्तरनिराससंभवात् ॥ किं चोक्तरीत्या वृद्धव्यवहारेण पदानां यादृच्छिक व्युत्पत्तिवर्णनं लोकानुभवविरुद्धं । बालस्य स्वयंव्युत्पत्त्यक्षमतादशायां वृद्धैरुपाध्यायादिभिरेनं व्युत्पादयितुं श्रद्धातिशयदर्शनात् , व्युत्पत्तिक्षमतादशायां उपेक्षकत्वायोगाद्यादृच्छिकवृद्धव्यववहारेणानन्तशब्दानां व्युत्पत्त्यनुपपत्तेश्च, प्रथमत एवाक्षरग्रहणाद्युपयोगिशिक्षादर्शनाच्च । तस्मात्प्रथमतो बुद्धिपूर्विकैव व्युत्पत्तिः ॥

तथा च भाष्यम्--"एवं किल बालाः शब्दार्थसम्बन्धमवधारयन्ति--माता पितृप्रभृतिभिरम्बातातमातुलादीन् शशिपशुनरमृगपक्षिसर्पादींश्च 'एनमवेहि', 'इमं चावधारय' इत्यभिप्रायेणाङ्गुल्यानिर्दिश्य निर्दिश्य तैस्तैश्शब्दैस्तेषुतेष्वर्थेषु बहुशःशिक्षिताः शनैश्शनैस्तैस्तैरेवशब्दैस्तेषुतेष्वर्थेषु स्वात्मनां बुद्ध्युत्पत्तिं दृष्ट्वा शब्दार्थयोस्सम्बन्धान्तरादर्शनात्सङ्केतयितृपुरुषाज्ञानाच्च तेष्वर्थेषु तेषां शब्दानां प्रयोगो बोधकत्वनिबन्धन इति निश्चिन्वन्ति"-- इति ॥

अत्र टीका--"अम्बातातप्रभृतिस्सप्रतियोगिकश्शब्दगणः, शशिपशुप्रभृतिरप्रतियोगिकश्शब्दगण इति विभागः । असम्बन्धिशब्दव्युत्पत्तेः पूर्वमेवाम्बादिशब्दव्युत्पत्तिर्दृश्यते, सा च त्वदभिमतशब्दार्थ

संबन्धग्रहणे तु नोपपद्यते, नहि कञ्चित्प्रति पिताऽन्यस्यापि पिताभवति, तस्माद्युत्पित्सोर्मातापित्रादिषु अन्यैस्तत्तच्छब्दप्रयोगासंभवात्प्रथममम्बादिशब्दार्थव्युत्पत्तिस्त्वन्मते न संभवति । अतो बुद्धिपूर्विकैव प्रथमव्युत्पत्तिरिति ज्ञापनार्थं कोटिद्वयं शब्देषु दर्शितम् । यादृच्छिकवृद्धव्यवहारेणानन्तशब्दव्युत्पत्त्यनुपपत्तिश्च,सर्वलोकसंप्रतिपन्नव्युत्पत्तिप्रकारापह्नवश्च। (एनमवेहि इमंचावधारयेति) **एनं**–बोधकशब्दं, **इमं**-बोध्यमर्थं च, अवेहीत्यर्थः। **बहुशइति**–यावदङ्गुलिनिर्देशशब्दप्रयोगसाहचर्यदर्शनजनितवासनाभूयस्त्वोदयेन स्वयमेव तत्तदर्थेषु तत्तच्छब्दान्प्रयोक्तुमर्थमात्रदर्शनेन शब्दं स्मर्तुं शब्दमात्रश्रवणेनार्थं स्मर्तुं च क्षमा भवन्ति तावदित्यर्थः" इति ॥

नन्वङ्गुलिनिर्देशपूर्वकेणेयमम्बेतिवाक्येन जायमानमम्बादिपदस्य पुरोवर्तिनि शक्तिज्ञानं न तावत्प्रत्यक्षं शक्तेः प्रत्यक्षायोगात्, नाप्यनुमितिः लिङ्गाभावात्, नापि शाब्दबोधरूपं पदसामान्यशक्तिग्रहशून्यस्य बालस्य इयमम्बेतिवाक्यघटकपदानामपि शक्तिज्ञानाभावात् तद्वाक्याच्छाब्दबोधानुपपत्तेः, नापिस्मरणं समानविषयकानुभवजन्यसंस्कारविरहादिति चेत्—

अत्रवदन्ति–शाब्दबोधो हि द्विविधः–पदवृत्त्युपस्थापितपदार्थानां संसर्गावगाही प्रत्यक्षादिप्रमाणान्तरोपस्थापितानामर्थानां संसर्गावगाही चेति–तत्र प्रथमबोधः सर्वमते प्रसिद्धः, द्वितीयबोधस्तु भाट्टमते स्वीक्रियते ॥ उक्तं च **वाक्याधिकरणे भाट्टैः**–

"पश्यतःश्वैतिमं रूपं हेषाशब्दं च शृण्वतः ।
खुरविक्षेपशब्दं च श्वेताश्वो धावतीति धीः ।
दृष्टा वाक्यविनिर्मुक्ता न पदार्थैर्विना क्वचित्" इति ॥

शबरभाष्येऽप्युक्तं–"अन्तरेणापि पदं शुक्लादेरन्वयधीः" इति.
इदं च **न्यायरत्ने** व्याख्यातं–अश्वत्वाद्युपलक्षितं श्वेतं पश्यन् तत्प्रदेशे

हेषाशब्देनाश्वं खुरशब्देन गमनं चानुमिनोति-इति। अनुपलब्धिप्रमाणेन तत्प्रदेशे श्वेतत्वाद्यन्वययोग्यवस्त्वन्तरस्यानुपपन्नत्वं जानन् पुरुषः कल्पयति-श्वेतत्वादीनामन्यान्वयसाकांक्षाणां मिथोऽन्वयं विनाऽनुपपन्नत्वधीसहकृतं साकांक्षाणां मिथोऽन्वययोग्यत्वधीसहकृतं च श्वेतत्वादीनां ज्ञानं मिथोऽन्वयधीकरणमिति ॥

न च—घटमानयेत्यादौ पदानां समभिव्याहारज्ञानस्यापि कारणत्वेन कॢप्ततया तदभावे कथं शाब्दबोधः, अतस्तत्र श्वेतो धावतीति वाक्यकल्पनावश्यकत्वात् पदवृत्तिज्ञानजन्योपस्थितेरेव शाब्दधीहेतुत्वात् इयमम्बेत्यादौ न शाब्दबोधसंभव इति—वाच्यम् । पर्यायपदान्तरजन्यबोधे व्यभिचारवारणाय समभिव्याहारजन्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशावश्यकतया तदनुत्तरबोधे तस्य कारणताविरहेण वाक्यकल्पनस्यैव विफलत्वात् ॥ एवमनुपपत्तिज्ञानजन्यतावच्छेदकमपि तदुत्तरबोधत्वम् । अतो वाक्यजन्यबोधस्थले तदसत्त्वेऽपि न क्षतिः ॥ न च—वाक्याजन्यबोधस्थलेऽनुपपत्तिज्ञानकल्पनापेक्षया वाक्यकल्पनमुचितमिति— वाच्यम्, नानावर्णघटितपदानां कल्पनापेक्षया एकस्यानुपपत्तिज्ञानस्यैव कल्पयितुमुचितत्वात् ॥ संभवति च—श्वेतत्वं तद्देशदृश्यमानमश्वान्यासंसर्गित्वेन प्रतीयमानमश्वसंसर्गित्वं विनाऽनुपपन्नमिति — धीः। एवं धावनेऽप्यनुपपत्तिर्बोध्या ॥

श्रीभाष्येऽपि शब्दार्थयोस्संबन्धान्तरादर्शनादित्यनुपपत्तिज्ञानमुक्तं, संबन्धान्तरानुपपत्तिज्ञानादित्यर्थः। तथा च श्रावणप्रत्यक्षोपस्थिताम्बादिशब्दचाक्षुषप्रत्यक्षोपस्थितपुरोवर्तिपदार्थयोः संबन्धावगाहिवाक्यजन्यबोधरूपमेव शक्तिज्ञानं प्रथमतो जायत इति श्रीभाष्येऽनुपपत्तिज्ञानोक्त्या प्रात्यक्षिकोपस्थितिजन्यबोधरूपं शक्तिज्ञानमिति सूच्यते ॥ **श्रुतप्रकाशिकायामपि** भाट्टोदाहृतस्य पुत्रजन्मवाक्ये शक्तिग्रहस्य पूर्वपक्षिणा दूषितस्य सिद्धान्ते व्यवस्थापनात् भाट्टाभिमतबोधरूपमियमम्बेत्यादि-

शक्तिज्ञानमित्यवगम्यते ॥ **पाराशर्यविजये** " प्राभाकरमतरीत्या पूर्वपक्षः, भाट्टरीत्या सिद्धान्तः" इत्युक्तत्वादुक्तबोधात्मकमेव शक्तिज्ञानमिति व्यज्यत इति॥

वेदान्ताचार्यास्तु—इयमम्बेत्यादिवाक्यात् न शाब्दबोधरूपं शक्तिज्ञानं येन पदवृत्तिज्ञानापेक्षा स्यात्, किन्तु स्मरणरूपं जन्मान्तरीयसंस्कारजन्यम् । तत्र चाङ्गुलीनिर्देशपूर्वकाम्बादिपदप्रयोगस्योद्बोधकविधया हेतुत्वात् तद्वाक्यात्सिद्धे शक्तिग्रहोपपत्तिः ॥ न च जन्मान्तरीयानुभवजन्यसंस्कारस्यैतज्जन्मन्युद्बोधकवशात् स्मरणमासिद्धमिति वाच्यम् । बालकस्य स्तन्यपानादौ प्रवृत्त्यन्यथाऽनुपपत्त्या तद्गतेष्टसाधनत्वांशे जीवनादृष्टरूपोद्बोधकवशाज्जन्मान्तरीयानुभवजन्यसंस्कारजन्यस्मरणस्य सर्ववादिसिद्धत्वात्, शिल्पसङ्गीतादौ केषांचिदनायासेन विशदज्ञानोत्पत्तिदर्शनेन तत्र जन्मान्तरीयसंस्कारकल्पनावश्यकत्वात्, गजविहगादीनामाधोरणाद्यैः क्रियमाणशिक्षाविशेषेण सिद्धार्थेऽपि कतिपयपदानां शक्तिग्रहोपपत्तिदर्शनाच्च । "तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च" इति **श्रुत्या** विद्याकर्मणोरिव पूर्वप्रज्ञाशब्दितजन्मान्तरीयसंस्कारस्यानुवृत्तिबोधनाच्च ॥ तस्मात्पदसामान्यशक्तिज्ञानशून्यस्योक्तवाक्याज्जन्मान्तरीयसंस्कारजन्यस्मरणरूपं शक्तिज्ञानं जायते—**इत्याहुः** ॥

न चोक्तस्थलेऽम्बादिपदस्य सिद्धार्थे स्मारकशक्त्युपपादनेऽप्यानुभाविकशक्त्यभावेन सिद्धपरवाक्यानामबोधकत्वमिति वदतां प्राभाकराणां मतनिरासो न संभवतीति वाच्यम् । तत्र स्मारकशक्तेरिव आनुभाविकशक्तेरपि गृहीतत्वात्, **श्रीभाष्येऽपि** "तैस्तैश्शब्दैस्तेषुतेष्वर्थेषुबहुशश्शिक्षिताः"इत्यनेन स्मारकशक्तेः, "तैस्तैरेवशब्दैस्तेषुतेष्वर्थेषु स्वात्मनां बुद्ध्युत्पत्तिं दृष्ट्वा" इत्यनेन आनुभाविकशक्तेश्च ग्रहस्य प्रतिपादनात्॥

ननु—उक्तरीत्या अम्बादिपदानां पुरोवृत्तिव्यक्तिविशेषे शक्तिग्रहोपपादनेऽप्यन्वयांशे तदनुपपादनात् अन्विताभिधानस्य सिद्धान्त-

सिद्धस्य भङ्गप्रसङ्गः । अन्वयेऽपि पदानां शक्तिर्हि अन्विताभिधानं । उक्तं च **श्रुतप्रकाशिकायां**—"शब्देनान्वयपर्यन्ताभिधानं ह्यन्विताभिधानं" इति। एवञ्च—अन्विताभिधानपक्षे इतरान्वितो घटो घटपदवाच्यः इत्येतादृशमेव शक्तिज्ञानं शाब्दबोधप्रयोजकं, घटो घटपदवाच्यइत्याकारकस्य अन्वयानन्तर्भावेण शक्तिज्ञानस्य तथात्वे च शक्तिग्रहाविषयतया पदार्थसंसर्गस्य शाब्दबोधविषयत्वानुपपत्तेः। न च-इतरान्वितघटस्य वाक्यप्रतिपाद्यतया शाब्दबोधात्प्राक् शक्तिग्रह एव दुर्घटोऽनुपस्थितत्वादिति-वाच्यम्। विशेषतः पदार्थान्तरघटितस्य तदन्वितघटादिरूपवाक्यार्थस्य प्रागनुपस्थितावपि इतरपदार्थत्वादिरूपसामान्यधर्मप्रकारेण तद्घटितस्य तदन्वितघटादेः प्रागुपस्थितिसम्भवेन तत्र शक्तिग्रहस्य सुघटत्वात्॥ वस्तुतस्तु—पदार्थान्तरमनन्तर्भाव्य केवलान्वयांशान्तर्भावेण शक्तिग्रहस्य अन्वितघटोघटपदवाच्यइत्याकारकस्य शाब्दधीप्रयोजकता उपेयते । पदार्थान्तरस्य पदान्तरलभ्यतया तदंशान्तर्भावेण शक्तिग्रहस्यानुपयुक्तत्वात् ॥ न च—अन्वयस्य पदवाच्यत्वे तदंशे शक्तिग्रहस्य शाब्दबोधोपयोगित्वे मानाभाव इति—वाच्यम्। तद्विषयकशाब्दबोधं प्रति वृत्तिज्ञानजन्यतदुपस्थितिहेतुतायास्सामान्यत एव क्लृप्तया वृत्तिज्ञानात्तदनुपस्थितौ तस्य शाब्दबोधविषयत्वासम्भवात् , अन्वयांशे शक्तिग्रहस्यापि शाब्दबोधे ऽपेक्षणीयत्वात्, संसर्गत्वभिन्नविषयतायास्तादृशोपस्थितिजन्यतावच्छेदकत्वे गौरवात् । तथाच अस्मादिपदस्यान्वयांशानन्तर्भावेण शक्तिग्रहवर्णनमसङ्गतम्—इति ॥ * *

अत्रकेचित्—अभिहितान्वयपक्ष एव सिद्धान्तसिद्धः । तत्पक्षे संसर्गस्य तत्तत्पदसमभिव्याहाररूपवाक्यादेव भानाङ्गीकारेण तत्रशक्तिग्रहानपेक्षणात्। अन्वये शक्त्यङ्गीकारेऽप्यभेदान्वयबोधे समानविभक्तिकपदसमभिव्याहारज्ञानस्य भेदान्वयबोधे च तत्तत्पदसमभिव्याहारज्ञानस्य

१. (पा.) पुरस्कारेण.

कारणत्वात् । अन्यथा नीलोघट इत्यादावभेदसंसर्गभानानिर्वाहात्तत्र श-क्तिकल्पनमयुक्तम् । न च–वृत्तिज्ञानजन्योपस्थितिजन्यतावच्छेदककोटौ संसर्गताभिन्नत्वनिवेशो गौरवमिति–वाच्यम् ॥ शक्तिलक्षणाज्ञानजन्योपस्थित्योः परस्परजन्यबोधे व्यभिचारवारणाय तत्तत्कारणाव्यवहितोत्तरत्वनिवेशावश्यकतया तत्पदानुपस्थितस्य संसर्गस्य शाब्दबोधोपगमे व्यभिचाराप्रसक्तेः संसर्गताभिन्नत्वस्य कार्यतावच्छेदककोटावनिवेशात् । समभिव्याहारेणैव संसर्गताभानं च **भाष्यकृतामिष्टम्** ॥

तथा च **वेदार्थसंग्रहे**—

"एवं बोधकानां पदसङ्घातानां संसर्गविशेषबोधनेन वाक्यशब्दाभिधेयानामुच्चारणक्रमो यत्र पुरुषबुद्धिपूर्वकः" इत्युक्तम् । तथा तत्रैव "प्रकृतिप्रत्ययरूपेण पदस्यैव अनेकविशेषगर्भत्वादनेकपदार्थसंसर्गबोधकत्वाच्चवाक्यस्य"—इति ॥

भाष्येऽपि–

"शब्दस्य तु विशेषेण सविशेष एव वस्तुन्यभिधानसामर्थ्यं, पदवाक्यरूपेण प्रवृत्तेः । प्रकृतिप्रत्यययोगेन हि पदत्वम्, प्रकृतिप्रत्यययोरर्थभेदेन पदस्यैव विशिष्टार्थबोधपरत्वमवर्जनीयम् । पदभेदश्चार्थभेदनिबन्धनः । पदसङ्घातरूपस्य वाक्यस्य अनेकपदार्थसंसर्गविशेषाभिधायित्वेन"– इत्युक्तम् ॥

तथा **वेदार्थसंग्रहे**–

सिद्धवस्तुषु शक्तिग्रहमुपपाद्य–"एवमेव सर्वपदानां स्वार्थाभिधायित्वं सङ्घातविशेषाणां च यथावस्थितसंसर्गविशेषबोधकत्वं च जानाति"– इत्युक्तम् ॥

तस्मात् संसर्गबोधे समभिव्याहाररूपवाक्यज्ञानस्य कारणत्वेन पदशक्तिग्रहानपेक्षणात् तदन्वयांशे शक्तिग्रहानुपपादनेऽपि न क्षतिः—**इति वदन्ति** ॥ * * * *

वस्तुतस्तु—अन्विताभिधानपक्ष एव युक्तः। सिद्धान्ते शक्तेर्बोधजनकत्वरूपत्वेन घटादिपदानां घटत्वावच्छिन्नविषयतानिरूपितसांसर्गिकविषयतात्वावच्छिन्नबोधजनकत्वस्यैव अन्विताभिधानरूपत्वेन तस्य पदे निषेद्धुमशक्यत्वात्॥ न च—समभिव्याहारज्ञानजन्यतावच्छेदककोटावेव सांसर्गिकविषयतानिवेशात्पदजन्यतावच्छेदके तदनिवेशात् घटादिविषयकत्वावच्छिन्नबोधं प्रत्येव घटादिपदस्य कारणत्वान्नान्विताभिधानम्—इति वाच्यम्। समभिव्याहारजन्यतावच्छेदकस्य पदजन्यतावच्छेदकत्वाभावे घटादिविषयत्वस्यापि तदनुपपत्त्या घटादावपि शक्त्यासिद्धिप्रसङ्गात्। परामर्शत्वादेरनुमित्यादिकरणतावच्छेदकघटकतयाऽव्याप्तिज्ञानत्वादेरिव प्रथमान्तनीलादिपदसमभिव्याहृतप्रथमान्तघटपदत्वादिरूपकारणतावच्छेदकघटकतया घटपदत्वादेरप्यन्यथासिद्धत्वात्॥

अथ— स्वतन्त्रान्वयव्यतिरेकाभ्यां प्राचीनमते वह्निव्याप्तिज्ञानत्वादिना वह्न्यनुमिताविव घटादिपदज्ञानत्वेन घटादिविषयत्वावच्छिन्नशाब्दबोधहेतुत्वमिति चेत्, तर्हि— घटादिविषयतानिरूपितसांसर्गिकविषयत्वावच्छिन्नशाब्दबोधहेतुत्वमेव पदस्य युक्तम्, तादृशसांसर्गिकविषयत्वावच्छिन्नबोधं प्रत्येव अन्वयव्यतिरेकज्ञानात्। 'नीलो घटः,' 'घटमानय,' इत्यादौ घटपदस्यान्वये तादृशशाब्दबोधस्यान्वयः, तदभावे अवश्यं तदभावः—इति॥ वस्तुतो घटमानयेत्यादौ अम्पदपूर्वघटपदज्ञानस्य शाब्दबोधे साक्षात्कारणत्वं केवलघटपदज्ञानस्य स्वजन्योपस्थितिद्वारा कारणत्वमिति कारणताद्वयं न युक्तम्। गौरवात्। 'घटः कर्मत्वं,' इत्यादिपदजन्योपस्थितिसहिताद्घटमानयेतिवाक्याद्बोधापत्तेः॥ किन्तु अम्पूर्वघटादिपदज्ञानस्य स्वजन्योपस्थितिद्वारा एकमेव हेतुत्वम्। एवञ्च तादृशाकांक्षाजन्यतावच्छेदककोटौ सांसर्गिकविषयतानिवेशनस्य सर्वमतसिद्धतया आन्विताभिधानं दुर्वारम्॥

एवं च– अभिहितान्वयपक्षे केवलघटादिविषयताशालिशाब्दत्वावच्छिन्नं प्रति स्वजन्योपस्थितिद्वारा घटादिपदज्ञानस्यैकं हेतुत्वम् । आकांक्षाज्ञानस्य च साक्षाच्छाब्दबोधे अपरं हेतुत्वम् । सांसर्गिकविषयताभिन्नविषयताया उपस्थितिजन्यतावच्छेदकत्वञ्चेति–त्रयं कल्पनीयम् ॥

अन्विताभिधानपक्षे च–आकांक्षाभिधानवत्पदज्ञानस्य घटादिविषयतानिरूपितसांसर्गिकविषयताशालिशाब्दत्वावच्छिन्नंप्रति–एकमेव हेतुत्वमिति लाघवम् ॥

तथा चोक्तं **श्रुतप्रकाशिकायां** ।

"अभिहितान्वयपक्षे--अर्थानांपरस्परान्वयबोधनयोग्यत्वं, शब्दानां स्वार्थबोधनशक्तिः, शब्दैरपि परस्परान्वययोग्यत्वेनार्थाभिधानमिति--त्रयं कल्पनीयम् । अन्विताभिधानपक्षे तु–शब्दानां स्वार्थबोधनशक्तेरेवान्वयपर्यन्तत्वाभ्युपगमात्कल्पनालाघवमस्तीति सएवात्र स्वीक्रियते" –इति ॥

अर्थानां–पदोपस्थापितानां, अर्थोपस्थितीनामिति यावत् । अन्वयबोधनयोग्यत्वं– सांसर्गिकविषयताघटितधर्मावच्छिन्नजनकाकांक्षाज्ञानसहकृतत्वम् , स्वयं तादृशधर्मावच्छिन्नजनकत्वाभावः, सांसर्गिकविषयताभिन्नविषयत्वावच्छिन्नशाब्दबोधजनकत्वमिति यावत् ॥

शब्दानां स्वार्थबोधनशक्तिः–घटादिविषयत्वावच्छिन्नबोधं प्रति स्वजन्योपस्थितिद्वारा पदानां कारणत्वम् ॥ शब्दैरपि परस्परान्वययोग्यत्वेनअभिधानम्--घटादिविषयतानिरूपितसांसर्गिकविषयताशालिशाब्दत्वावच्छिन्नं प्रत्याकांक्षाज्ञानस्य हेतुत्वमिति–त्रितयं कल्पनीयमित्यर्थः ॥

न च–शक्तिलक्षणाज्ञानजन्योपस्थित्योः परस्परजन्यबोधे व्यभिचारवारणाय अव्यवहितोत्तरत्वस्य जन्यतावच्छेदकत्वेन व्यभिचाराभावात् सांसर्गिकविषयताभेदो न निवेश्य इति–वाच्यम् । एकोपस्थितिद्वारक-

बोधजनकत्वोपस्थितिद्वयद्वारकबोधजनकत्वरूपयोः शक्तिलक्षणयोरुपस्थितिद्वारकबोधजनकतात्वेन अनुगमसम्भवेन तज्जन्योपस्थित्योरनुगत रूपेणैककारणतासम्भवेन व्यभिचाराप्रसक्त्या अव्यवहितोत्तरत्वस्य जन्यतावच्छेदके अनिवेशेन सांसर्गिकविषयताभेदनिवेशावश्यकत्वात् । शक्तिलक्षणयोरेकोपस्थित्युपस्थितिद्वयघटितशाब्दबोधजनकतारूपत्वं, उक्तरूपेणानुगमश्च **तत्वरत्नाकरे** प्रतिपादितः—

"अभिधानाभिधेयत्वमतश्शब्दार्थयोस्स्थितम् ।
सम्बन्धोऽत्राभिधा द्वेधा बोध्यमुख्यजघन्यतः ॥
अभिधाऽर्थावगत्यात्मा शब्दं व्यापारयिष्यतः ।
शब्दशक्तिनिमित्ता सा स्वार्थे मुख्याऽभिधीयते ॥
स्वार्थाभिधानद्वाराऽन्या जघन्याऽर्थान्तरे मता ॥" इति ॥

शब्दं व्यापारयिष्यतः—शृण्वतः पुरुषस्य, अर्थावगत्यात्मा अर्थबोध जनकत्वं. अभिधेत्यर्थः । एवञ्च अभिहितान्वयवादे गौरवात् अन्विताभिधानमतमेव सम्प्रदायसिद्धम् ।

उक्तं च—**आगमप्रामाण्ये**—

"अवश्याश्रयणीयेयमन्विताभिधायिता" ॥

इत्यारभ्य

"तस्मादाकांक्षितासन्नयोग्यार्थान्तरसङ्गते ।
स्वार्थे पदानां व्युत्पत्तिरास्थेया सर्ववादिभिः ॥" —इति ॥

तत्वरत्नाकरेऽपि—

"षड्भिः प्रतीतिप्रमुखोपपत्तिभि
निर्धूतचोद्याभिरिहान्विताभिधा ।
सिद्धा पदैर्नाभिहितान्वयस्थिति
विपर्ययादित्यखिलं समञ्जसम् ॥"— इति ॥

वेदार्थसंग्रहेऽपि—

"शोधकेष्वपि सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिषु सामानाधिकरण्य व्युत्पत्तिसिद्धानेकगुण विशिष्टैकार्थाभिधानमविरुद्धमिति सर्वगुण विशिष्टं ब्रह्मैवाभिधीयते।"—इति॥

अन्वेवापूर्वभङ्गे—

" समभिव्याहृतपदान्तरवाच्यान्वययोग्यमेवेतरपदप्रतिपाद्य मिति अन्विताभिधायिपदसङ्घातरूपवाक्यश्रवणसमनन्तरमेव प्रतीयते"— इति॥

श्रीभाष्येऽपि—नानाशब्दादिभेदादित्यधिकरणे—

'यद्यपि वेद, उपासीत, इत्यादयश्शब्दाः प्रत्ययावृत्त्यभिधायिनः। प्रत्ययाश्च ब्रह्मैकविषयाः, तथापि तत्तत्प्रकरणोदितजगदेककारणत्वापहतपाप्मत्वादिविशेषणविशिष्टब्रह्मविषयप्रत्ययावृत्त्यवबोधिनः। प्रत्ययावृत्तिरूपा विद्या भिन्दन्ति'—इति॥

सूत्रकारस्यापि— अन्विताभिधानमेवेष्टम्। भिन्नधर्मावच्छिन्नबोधकशब्दभेदाद्विद्याभेदसमर्थनात्। अभिहितान्वयपक्षे वेद, उपासीत, इत्यादीनां भक्तित्वरूपैकधर्मावच्छिन्नबोधकत्वेन शब्दभेदाभावेन तदसङ्गतेः। अन्विताभिधानपक्षे च तत्तद्गुणवाचकपदसमभिव्याहृतब्रह्मपदसमभिव्याहृतोपासिधातुत्वेन तत्तद्गुणविशिष्टब्रह्मविषयकोपासनत्वावच्छिन्नबोधजनकत्वेन भिन्नधर्मावच्छिन्नशक्तिभेदरूपशब्दभेदसत्त्वात् नानाशब्दादि भेदादित्युपपद्यते॥

नन्वेवं-घटादिपदानामपि नानार्थत्वापत्तिः, शुक्लनीलरक्तादिपदसमभिव्याहृतघटादिपदत्वेन नानाधर्मावच्छिन्नबोधकत्वात्। न च—नीलादिपदसमभिव्याहृतघटादिपदत्वेन सामान्यकारणताऽप्यस्ति, यद्विशेषयोरिति न्यायात्; एवञ्च पदान्तरसमभिव्याहारानवच्छिन्ननानाधर्मावच्छिन्नबोधकत्वमेव नानार्थत्वमिति न घटादिपदस्य नानार्थत्वप्रसङ्गः, हर्यादिपदस्य

तु केवलहरिपदत्वेनैव विष्णुत्वेन्द्रत्वादिनानाधर्मावच्छिन्नबोधकत्वात् नानार्थत्वमिति—वाच्यम्। तथा सति पदान्तरसमभिव्याहारानवच्छिन्न-बोधजनकत्वमेव शक्तिरिति वेदोपासीतेत्यादीनां पदान्तरसमभिव्या-हारानवच्छिन्नभिन्नधर्मावच्छिन्नबोधकत्वाभावात् शब्दभेदानुपपत्तिः। एवमुक्तसामान्यकारणतानिरूपितकार्यतावच्छेदककोटौ सांसर्गिकविषय-ताया अनिवेशादन्विताभिधानानुपपत्तिश्च—इति चेत्॥ **उच्यते**—सूत्रेषु पदान्तरसमभिव्याहारानवच्छिन्नबोधजनकतावतः पदस्यैव न शब्दपदेन ग्रहणं, तथासति '**द्युभ्वाद्यायतनं स्वशब्दात्**' इत्यत्र शब्दपदेन 'अमृतस्यैष सेतुरिति' वाक्यस्य, '**शब्दादेव प्रमितः**' इत्यत्र 'ईशानो भूतभव्यस्येति' वाक्यस्य च पदान्तरसमभिव्याहारावच्छिन्नबोधजनक-तावतो ग्रहणानुपपत्तेः। किं तु पदवाक्यसाधारणबोधजनकतावत एव शब्दपदेन ग्रहणम्॥

तथा च **द्युभ्वाद्यधिकरणश्रीभाष्ये**—

'अमृतस्यैष सेतुरिति हि परस्य ब्रह्मणः असाधारणशब्दः' इति॥

प्रमिताधिकरणश्रीभाष्ये—

'अङ्गुष्ठप्रमितः परमात्मा ईशानो भूतभव्यस्येति शब्दादेव' इति॥

पाराशर्यविजयेऽपि—

"शब्दादेव प्रमित इत्यत्र शब्दो न वाक्यव्यावृत्तः वाक्यस्यापि शब्दत्वात्, अतश्शब्दशब्दो भूतभव्यस्येशान इति वाक्यपरः" इति॥

अतो नानाशब्दादिभेदादित्यत्र पदान्तरसमभिव्याहारावच्छिन्नभिन्नधर्मावच्छिन्नबोधकतावतः पदान्तरसमभिव्याहृतोपास्यादिधातोर्ग्रहणान्नानुपपत्तिः॥

केचित्तु—भिन्नधर्मावच्छिन्नबोधकपदभेद एव शब्दभेदादित्यनेन विवक्षितः; 'वैश्वानरस्साधारणशब्दविशेषात्', 'नानुमानमतच्छब्दात्प्राणभृच्च" इत्यादौ शब्दशब्दस्य पदपरत्वादुपासनसामान्ये निरुक्त-

शब्दभेदविरहेऽपि न क्षतिः ; संज्ञारूपादिभेदैरेव तेषां भेदसाधनाच्च भक्ति-प्रपत्त्योरेव शब्दभेदेन भेदसाधनत्वस्य विवक्षितत्वात् , न्यासविद्यागतधा-तोरसकृदावृत्तज्ञानपरत्वाभावेन शब्दभेदसम्भवात् ॥

उक्तञ्च **न्यासविंशतौ** वेदान्ताचार्यैः—

"नानाशब्दादिभेदादिति तु कथयता सूत्रकारेण सम्यङ्
न्यासोपासे विभिन्ने यजनहवनवच्छब्दभेदादभाक्तात् ।
आख्याभेदादिरूपः परमितरसमः किञ्च भिन्नोऽधिकारः
शीघ्रप्राप्त्यादिभिस्स्याज्जगुरिति च मधूपासनादौ व्यवस्थाम् ॥"

इत्याहुः—

एवं पदान्तरसमभिव्याहारानवच्छिन्नसामान्यकारणतानिरूपितका-र्यतावच्छेदके सांसर्गिकविषयताया अनिवेशे तस्याः पदवृत्तिज्ञानजन्यो-पस्थितिप्रयोज्यत्वाभावेन तदवच्छेदेन शाब्दत्वाभावात् तदुपरागेण शाब्दयामीति प्रतीत्यनुपपत्तिः ॥ न चेष्टापत्तिः । नीलो घट इत्यादौ नीलघटाभेदं शाब्दयामीत्यनुभवात् ॥

न च सांसर्गिकविषयतायाः पदप्रयोज्यत्वाभावेऽपि शाब्दबोधानिष्ठतया तदवच्छेदेन शाब्दत्वं संभवतीति वाच्यम् ॥ अनुमितिशाब्दादिसामग्री-मेलनस्थाने अनुमितिं प्रति शाब्दादिसामग्र्याः प्रतिबन्धकत्वे गौरवेण तत्रानुमितित्व-शाब्दत्वादिविशिष्टस्यैकस्यैव ज्ञानस्योत्पत्त्यङ्गीकारात् , अनुमितित्वादीनां जातिरूपत्वानङ्गीकारेण साङ्कर्यस्याबाधकत्वात् ॥

एवं च घटमानयेत्यादियादृशशाब्दबोधात्पूर्वं वह्न्याद्यनुमितिसा-मग्री, तत्र पर्वतो वह्निमानित्यनुमित्यात्मकस्य घटानयनबोधस्योत्पत्त्या तदुत्तरं घटानयनं शाब्दयामीतिवत् वह्निं शाब्दयामीति प्रतीत्यभावेन पदवृत्तिप्रयोज्यविषयत्वावच्छेदेनैव शाब्दत्वमिति वृत्त्युपस्थाप्यविष-योपरागेणैव शाब्दयामीति प्रतीतिरित्यङ्गीकार्यत्वात्, अन्वयस्य पद-वृत्त्यनुपस्थाप्यत्वे तदुपरागेण शाब्दयामीति प्रतीत्यभावापत्तेः, संसर्ग-

ताया उक्तसामान्यकारणताजन्यतावच्छेदकत्वावच्छेदकत्वात् ॥

न च--सांसर्गिकविषयताया उपस्थितिजन्यतावच्छेदकत्वाभावेऽप्याकांक्षाज्ञानजन्यतावच्छेदकत्वात्तदुपरागेण शाब्दयामीतिप्रतीत्युपपत्तिः, सर्वत्र तादृशप्रतीतावाकांक्षाज्ञानजन्यतावच्छेदकत्वस्यैव नियामकत्वादिति--वाच्यम् ॥ तथा सति घटत्वविषयताशालिबुद्धित्वमेव घटादिपदजन्यतावच्छेदकमस्तु, घटादिविषयतायाश्चाकांक्षाज्ञानप्रयोज्यत्वात्, घटं शाब्दयामीत्यनुभवोपपत्तिरिति क्रमेण जातिशक्तिवादापत्तेः । अतो व्यक्तिशक्तिवादिना पदवृत्तिप्रयोज्यविषयताया एव शाब्दत्वावच्छेदकत्वमभ्युपगन्तव्यमित्यन्वयशक्तिरावश्यकी संप्रदायसिद्धा च ॥

न च--बोधकानां पदसंघातानामित्यादिवेदार्थसंग्रहादिविरोधः--इति वाच्यम् ॥ अन्विताभिधानमते घटादिपदानां घटविषयतानिरूपितसांसर्गिकविषयताशालिशाब्दत्वावच्छिन्नं प्रति हेतुत्वेन संसर्गसामान्यभाने कारणत्वेऽपि अभेदात्मकसंसर्गविशिष्टबोधे समानविभक्तिकपदसमभिव्याहाररूपवाक्यस्य भेदरूपसंसर्गविशेषबोधे चान्यादृशवाक्यस्य कारणत्वेन संसर्गविशेषभाने वाक्यस्यैव कारणत्वात्संसर्गविशेषबोधनेन 'वाक्यशब्दाभिधेयानामिति' **वेदार्थसंग्रहस्य,** 'वाक्यस्यानेकपदार्थसंसर्गविशेषाभिधायित्वेनेति' **श्रीभाष्यस्य** च, अन्विताभिधानमत एव सुसङ्गतत्वात् । अभिहितान्वयपक्षे सामान्यतस्संसर्गभानस्यापि वाक्यप्रयोज्यत्वेन **संसर्गविशेषेति** विशेषपदस्वारस्यहानेः ॥

न च-- अन्विताभिधानस्य सिद्धान्तसिद्धत्वादम्बाताितादिपदानां पुरोवृत्तिव्यक्तिविशेषे शक्तिग्रहाभिधानमफलम्, अन्विते शक्तिग्रहस्यैव शाब्दबोधप्रयोजकत्वात्--इति वाच्यम् । अम्बातातादिपदानामपि देशकालसम्बन्धविशेषविशिष्टव्यक्तिविशेषं निर्दिश्य प्रयोगेणान्वित एव शक्तिग्रहस्य विवक्षितत्वात् ॥

अत एव **श्रुतप्रकाशिकायाम्**—

'अस्य शब्दस्यायमर्थ इति व्युत्पत्तिश्चेदन्विताभिधानभङ्गप्रसङ्गः'

इत्याशङ्क्य—

"शब्देनान्वयपर्यन्ताभिधानं ह्यन्विताभिधानम्, प्रातिस्विकव्युत्पत्तावपि तत्रैव व्युत्पत्तिः क्रियत इति न विरोधः"

इति समाहितम् ॥

एवं च—सिद्धेऽपि प्राथमिकव्युत्पत्तिसत्त्वात्तत्र तात्पर्यसम्भवेन वेदान्तस्य सिद्धब्रह्मरूपार्थबोधसाधनत्वेन प्रेक्षावत्प्रवृत्तिविषयत्वमुपपन्नम् ॥

किञ्च—अपूर्वस्यैवाप्रामाणिकत्वादपूर्वरूपकार्यान्विते पदानां व्युत्पत्तिरित्यप्ययुक्तम् ॥ न च—आशुतरविनाशिनो यागस्यैव द्वारत्वेनापूर्वस्य कल्पनमिति वाच्यम्; अपूर्वस्य तथात्वकल्पनाया अयोगात्, कल्पनेऽपि तस्य वाच्यत्वाभावेन तदन्विते पदानां व्युत्पत्त्यसम्भवात्, स्वर्गकामो यजेतेत्यादौ यागस्यैव स्वर्गरूपेष्टसाधनत्वेन स्वर्गकामकृतिसाध्यत्वेन वा बोधेन अपूर्वस्य कृतिसाध्यत्वरूपकार्यत्वेन स्वर्गकामकृतिसाध्यत्वेन वा बोधस्याप्रामाणिकत्वात्, लौकिकवाक्येऽपूर्वबोधस्य प्राभाकरैरनभ्युपगमेन तत्रापूर्वरूपकार्यान्विते शक्तिग्रह इत्यस्यात्यन्तमनुचितत्वात् ॥

उक्तं च **श्रीभाष्ये**—

"गामानयेत्यादिवाक्येष्वपि न कार्यार्थे व्युत्पत्तिः, भवदभिमतकार्यस्य दुर्निरूपत्वात्" इति ॥

अपूर्वकार्यस्य लौकिकवाक्येष्वबोधाद्वैदिकवाक्येऽपि तद्बोधस्याप्रामाणिकत्वात्—इत्यर्थः ॥ * * *

अत्र प्राभाकराः—

'स्वर्गकामो यजेत' इत्यत्रेष्टसाधनत्वस्य लिङर्थत्वात् स्वर्गकामपदोपस्थापितस्वर्गस्येष्टांशेऽभेदेनान्वयात् 'विश्वजिता यजेत' इत्यादा-

वपि स्वर्गकामादिपदाध्याहारादिष्टांशे स्वर्गाभेदबोधसम्भवात् स्वर्गसाधनयागानुकूलकृतिमान् स्वर्गकाम इति बोधस्तावन्न सम्भवति. अव्यवहितपूर्ववृत्तित्वघटितस्वर्गसाधनत्वस्याशुविनाशिनि यागे बोधासम्भवात् ॥

न च—आशुविनाशिनो यागस्य स्वजन्यापूर्ववत्तासम्बन्धावच्छिन्नाव्यवहितपूर्ववृत्तित्वसम्भवात्तथा बोधसम्भवः इति वाच्यम् । अपूर्वस्य पूर्वमनुपस्थितत्वेन तथाविधसम्बन्धघटितसाधनत्वबोधासम्भवात् ॥

नापि—लिङः कृतिसाध्यत्वार्थकतामभ्युपगम्य व्युत्पत्तिवैचित्र्येण स्वर्गकामस्य लिङर्थैकदेशे कृतावप्यन्वयमभ्युपगम्य स्वर्गकामकृति साध्ययागानुकूलकृतिमान् स्वर्गकाम इति—बोधाङ्गीकारो युक्तः । योग्यताविरहात् । अन्वयप्रयोजकरूपवत्त्वं हि योग्यता. अतएव वह्निना सिञ्चतीत्यादौ सेकान्वयप्रयोजकीभूतपयस्त्वस्य वह्नावभावान्न योग्यता ॥ प्रकृते स्वर्गकामकृतिसाध्यत्वान्वये स्वर्गसाधनत्वं प्रयोजकम् । उक्तरीत्या यागे तज्ज्ञानासम्भवान्न कृतिसाध्यत्वान्वयबोधसम्भवः ॥

किं तु—कृतिसाध्यत्वरूपकार्यत्वावच्छिन्ने लिङ्शक्तेस्तदेकदेशकृतौ यागस्य विषयतासम्बन्धेनान्वयाद्यजेतेत्यादौ यागविषयकं कार्यमिति कार्यत्वेनापूर्वावगाही **प्राथमिको बोधः** ॥

तदनन्तरं च—नियोजकतासंबन्धेन स्वर्गकामीयं यागविषयकं कार्यमिति द्वितीयो बोधो न सम्भवति, उक्तसंबन्धेन स्वर्गकामान्वयप्रयोजकस्य स्वर्गसाधनत्वस्य पूर्वमज्ञातत्वात् । अतो यागविषयकं कार्यं स्वर्गसाधनमिति **द्वितीयो बोधः** । अर्थाध्याहारवादिनां प्राभाकराणां मते पदानुपस्थितस्यापि स्वर्गसाधनत्वस्य बोधसंभवात्, अपूर्वस्य स्थायित्वेन स्वर्गसाधनतासंभवाच्च ॥

ततश्च स्वर्गसाधनं यागविषयकं कार्यं स्वर्गकामनियोज्यकमिति **तृतीयो बोधः** ॥

स्वर्गसाधनं स्वर्गकामनियोज्यकं यागविषयकं कार्यं स्वर्गकामकृति-साध्यमिति **चतुर्थो बोधः** ॥

ततश्चापूर्वं कृतिसाध्यत्वं यागे कृतिसाध्यत्वं विनाऽनुपपन्नमित्य-नुपपत्तिज्ञानसहकारेण स्वर्गसाधनं स्वर्गकामनियोज्यको यागस्स्वर्ग-कामकृतिसाध्यइत्यौपादानिको यागविशेष्यकः **पंचमो बोधः** ॥ स एव प्रवर्तकः, अपूर्वस्य पूर्वमुपस्थितत्वेन तद्घटितसंसर्गकाव्यवहितपूर्व-वृत्तित्वस्य पञ्चमबोधे भानसम्भवात् । उपादानमनुपपत्तिज्ञानं, तत्सह-कृतशब्देन जनितो बोध औपादानिक इत्युच्यते ॥

अथ—यागविषयककार्यत्वस्य यागविषयककृतिजन्यत्वरूपस्य या-गस्वर्गोभयसाधारणत्वात्तादृशकृतिनिरूपितविषयताविशेषरूपकृतिसा-ध्यत्वस्यापि यागसाधारणत्वात् तेन रूपेणापूर्वस्यैव बोधनमिति न सम्भवति ॥ न च—कार्यांशे नियोज्यनियोजकभावसम्बन्धस्य स्वर्ग-कामप्रतियोगिकस्य भानादपूर्वस्यैव भाननिर्वाहः । तत्र कामी नियोज्यः, नियोजकं च कार्यं. ममेदं कर्तव्यमिति ज्ञानवत्त्वं नियोज्यत्वं, तादृशज्ञा-नविषयत्वं च नियोजकत्वम् । उदाहृतं च **वेदार्थसंग्रहे**—

'नियोज्यस्स च यः कार्यं स्वकीयत्वेन बुध्यते' इति ।

नियोज्यान्वयप्रयोजकं च काम्यसाधनत्वमिति काम्यसाधनत्वविशि-ष्टस्वर्गकामनियोज्यकत्वस्य यागस्वर्गोभयव्यावृत्तत्वादिति—वाच्यम् ॥ एवमपि प्राथमिकबोधे स्वर्गकामान्वयाविषयके कार्यत्वेनापूर्वस्यैव भानमिति न सम्भवति—**इति चेत्** ॥

उच्यते ॥ कार्यत्वं हि न केवलकृतिसाध्यत्वमात्रं, किन्तु कृतिसा-ध्यत्वे सति कृत्युद्देश्यत्वं । तच्च यागस्वर्गोभयव्यावृत्तं, स्वर्गे सत्यन्ता-भावात्, यागे च विशेष्याभावात् । उक्तञ्च **प्रकरणशालिकायां**—

'कृतिसाध्यं प्रधानं यत्तत्कार्यमभिधीयते' इति ॥

प्रधानं—कृत्युद्देश्यमित्यर्थः ॥ कृत्युद्देश्यत्वं च—कृत्याप्राप्तुमिष्टतमत्व-

रूपं कृतिकर्मत्वं, अपूर्वप्राप्तीच्छया यागस्य करणान्निरुक्तयागकृतिकर्मत्वमपूर्वे सिद्धं ; यद्वा—कृतिजनकेच्छाजनकेच्छाविषयत्वरूपप्रेरकत्वमेव कृत्युद्देश्यत्वम्. स्वर्गेच्छया तज्जनकापूर्वेच्छा. तया च यागेच्छा, ततो यागकृतिरिति कृतिजनकेच्छाजनकेच्छाविषयत्वरूपप्रेरकत्वमपूर्वे उपपन्नम् ; अथवा अनुकूलत्वमेव कृत्युद्देश्यत्वं, क्रियारूपयागे तदसम्भवेऽपि अपूर्वे तत्सम्भवति, कृतिं प्रति शेषित्वं कृतिप्रयोजनत्वं वा तदिति तस्य यागव्यावृत्तत्वमपूर्वसाधारणत्वञ्चोपपद्यते -
इति वदन्ति ॥ * * *

तन्न ॥ यजदेवपूजायामित्यनुशासनानुरोधेन यजधातोर्देवताप्रीत्यवच्छिन्नव्यापारार्थकतया तादृशप्रीत्यवच्छिन्नव्यापारे स्वर्गसाधनत्वबोधे धनवान् सुखीत्यादौ धने सुखजनकत्ववत् प्रीतावपि स्वर्गजनकत्वबोधात् देवताप्रीतेर्द्वारत्वलाभात्तद्घटितसम्बन्धेन यागस्य स्वर्गाव्यवहितपूर्ववृत्तित्वबोधे बाधकाभावात् इष्टसाधनत्वस्य लिङर्थत्वे दोषाभावात् कृतिसाध्यत्वस्य लिङर्थत्वेऽपि नानुपपत्तिः । तदन्वयप्रयोजकस्य स्वर्गसाधनत्वस्य यागे निर्बाधत्वात् ॥

उक्तञ्च **वेदार्थसंग्रहे**—

"यजदेवपूजायामिति देवताराधनभूतयागादेः प्रकृत्यर्थस्य कर्तृव्यापारसाध्यतां व्युत्पत्तिसिद्धां लिङादयोऽभिदधतीति न किञ्चिदनुपपन्नम्" इति ॥

अत्र—स्वर्गकामकृतिसाध्यत्वान्वयप्रयोजकस्य स्वर्गसाधनत्वस्य यागे बोधोपपादनाय देवताराधनभूतेतिविशेषणं ; देवताप्रीतिजनकस्य प्रीतिद्वारा स्वर्गजनकस्य यागादेरित्यर्थः ॥

एवञ्च—'यजेत स्वर्गकामः' इत्यत्र **प्रथमं** यागः कृतिसाध्य इति बोधः, ततस्स्वर्गकामपदान्वये स्वर्गसाधनं स्वर्गकामकृतिसाध्यो याग इति **द्वितीयो** बोध इति बोधद्वयमेव प्रामाणिकं ॥ नचैवमपि—स्वर्गसाधनं

स्वर्गकामकृतिसाध्यो याग इति द्वितीयबोधो न सम्भवति, पूर्वं स्वर्गसाधनत्वज्ञानरूपयोग्यताज्ञानाभावात्। अतस्स्वर्गसाधनं याग इति द्वितीयबोधः, ततश्चोक्तो बोध इति बोधत्रयमावश्यकमिति—वाच्यम्। अयोग्यताज्ञानस्य प्रतिबन्धकत्वेनैव वह्निना सिञ्चतीत्यादौ शाब्दवारणसम्भवात्, योग्यताज्ञानस्य तत्र कारणत्वाकल्पनात्, संशयसाधारणस्यैकपदार्थेऽपरपदार्थवत्त्वज्ञानस्य कारणत्वेऽपि प्रथमबोधानन्तरमेव तादृशबोधसम्भवात् इष्टसाधनत्वस्यापदार्थत्वात् ॥ एवञ्च—प्रागनुपस्थितस्वर्गसाधनत्वावगाहिबोधस्य प्रथमबोधोत्तरमेव सम्भवात् बोधद्वयमेव प्रामाणिकम् ॥

उक्तं च **वेदार्थसंग्रहे**—

"यथा भोक्तुकामो देवदत्तगृहं गच्छेदित्युक्ते भोजनकामस्य देवदत्तगृहगमने कर्तृत्वश्रवणादेव प्रागज्ञातमपि भोजनसाधनत्वं देवदत्तगृहगमनस्यावगम्यते, एवमत्रापि भवति"—इति ॥

विवृतञ्च **व्यासाचार्यैः**—"स्वर्गकामस्य यागे कर्तृत्वश्रवणात्प्रागज्ञातमपि यागस्य स्वर्गसाधनत्वमवगम्यत इत्यर्थः"—इति ॥

एवं च—औपादानिकत्वेन पराभ्युपगतः पञ्चमबोध एवास्माकं द्वितीयबोध इति **भावः** ॥

एतदप्युक्तं **वेदार्थसंग्रहे**—"फलसाधनत्वावगतिरौपादानिकीत्येतदपि न सङ्गच्छते"— इत्यादिना ॥

श्रीभाष्येऽपि प्रतिपादितम्—

"नियोगस्यापि साक्षादिषिविषयभूतसुखदुःखनिवृत्तिभ्यामन्यत्वात्तत्साधनतयैवेष्टत्वं, कृतिसाध्यत्वञ्च । अत एव हि तस्य क्रियातिरिक्तता। अन्यथा क्रियैव कार्यं स्यात्। स्वर्गकामपदसमभिव्याहारानुगुण्येन लिङादिवाच्यं कार्यं स्वर्गसाधनमेवेति

१. (पा) साक्षादिच्छाविषयीभूत.

क्षणभङ्गिकर्मातिरेकि स्थिरं स्वर्गसाधनमपूर्वमेव कार्यमिति स्वर्गसाधनत्वोल्लेखेनैव ह्यपूर्वव्युत्पत्तिः । अतः प्रथममनन्यार्थतया प्रतिपन्नस्य कार्यस्यानन्यार्थत्वनिर्वहणायापूर्वमेव पश्चात्स्वर्गसाधनं भवतीत्युपहास्यम् । स्वर्गकामपदान्वितकार्याभिधायिपदेन प्रथममप्यनन्यार्थतानभिधानात्, सुखदुःखनिवृत्तितत्साधनेभ्योऽन्यस्यानन्यार्थस्य कृतिसाध्यताप्रतीत्यनुपपत्तेश्च''—इति॥

अयमर्थः ॥ नियोगस्येष्टत्वं कृतिसाध्यत्वं च—तत्साधनतयैव नियोजकापूर्वनिष्ठमिच्छाविषयत्वं कृतिसाध्यत्वप्रकारकशाब्दबोधविशेष्यत्वं च, स्वर्गादिरूपसुखादिसाधनत्वावच्छिन्नमेवेत्यर्थः; तथा च यागविषयकं कार्यमित्याकारकस्वर्गसाधनत्वाविषयकापूर्वविषयकबोधो न युक्त इत्यर्थः । अत एव—स्वर्गसाधनतया भासमानत्वादेव । तस्य- नियोगस्य । अन्यथा- स्वर्गसाधनत्वाभाने । क्रियैव कार्यं स्यात् -यागस्यैव शाब्दबोधे कार्यत्वेन भानं स्यादित्यर्थः । स्वर्गसाधनत्वोल्लेखेनैव ह्यपूर्वव्युत्पत्तिः--स्वर्गसाधनत्वप्रकारेणैवापूर्वविषयकबोधः ॥ तथा च--स्वर्गकामपदान्वयात्पूर्वं यागे कृतिसाध्यत्वावगाही प्राथमिको बोधः, तदन्वये स्वर्गसाधनत्वविशिष्टापूर्वे कार्यत्वावगाही द्वितीयो बोध इति--**प्राभाकर** रङ्गीकार्यमितिभावः ॥

अत्र—**प्रथमतो** यागविषयकं कार्यमिति कृतिसाध्यत्वे सति कृत्युद्देश्यत्वलक्षणानन्यार्थत्वरूपप्राधान्येनापूर्वविषयकबोधो जायते, तत्र कृत्युद्देश्यत्वस्य मुख्यफलावान्तरफलोभयसाधारणस्य मुख्यफलभिन्नेऽपूर्वे स्वर्गसाधनत्वलक्षणावान्तरफलत्वेनैव निर्वहणीयतया तन्निर्वाहकस्वर्गसाधनत्वावगाही **द्वितीयो** बोधो जायत इति—**प्राभाकराभिप्रेतम्** । उक्तञ्च पञ्चिकायां—

> "आत्मसिद्ध्यनुकूलस्य नियोज्यस्य प्रसिद्धये ।
> कुर्वत्स्वर्गादिकमपि प्रधानं कार्यमेव नः ॥" इति ॥

स्वर्गादिकमपि कुर्वन् कार्यं—कृतिसाध्यमपूर्वं, प्रधानं—कृत्युद्देश्यमेवे-त्यर्थः ॥ **तदिदमयुक्तं**। प्राथमिकबोधस्योक्तरीत्या क्रियाविषयकत्वेऽप्यपूर्वविषयकत्वायोगात् ॥ एतदभिप्रेत्यानुवादपूर्वकं दूषयति—**अतः प्रथम**मित्यादिना । प्रथममनन्यार्थतया प्रतिपन्नस्य—प्राथमिकबोधे कृत्युद्देश्यत्वेन भासमानस्य, अनन्यार्थत्वनिर्वहणाय—उद्देश्यत्वनिर्वाहाय, पश्चात्स्वर्गसाधनं भवतीति—द्वितीयबोधे स्वर्गसाधनत्वरूपावान्तरफलत्वेन भासत इत्यर्थः ॥ एवञ्च पूर्वोक्तबोधद्वयस्यैव युक्तत्वात् बोधपञ्चकमप्रामाणिकमेव ॥

किञ्च कृतिसाध्यत्वविशिष्टकृत्युद्देश्यत्वरूपकार्यत्वस्य यागस्वर्गोभयव्यावृत्तत्वात्तेनरूपेणापूर्वस्यैव प्राथमिकबोधे भानमित्यपि न युक्तं, साक्षात्कृतिजन्यस्य यागस्य कृतिसाध्यताया युक्तत्वेऽपि परम्परया कृतिजन्यस्य परमापूर्वस्य कृतिसाध्यत्वायोगात् ॥ यागविषयककृत्या-यागः, ततः कालिकापूर्वं दक्षिणादानाद्युत्तराङ्गजन्यकालिकापूर्वसहकृतेन यागजन्यकालिकापूर्वेण परमापूर्वं जायते। तदेव लिङ्वाच्यम्। कालिकापूर्वं च परमापूर्वजनकत्वान्यथानुपपत्त्या कल्प्यमिति हि **प्राभाकरसिद्धान्तः** ॥ सूचितं चेदमपूर्वद्वयं तदभ्युपगतमिति **वेदार्थसंग्रहे**—

> "तस्मादग्न्यादिसर्वदेवतान्तरात्मभूतपरमपुरुषाराधनभूतानि सर्वाणि कर्माणि, स एव चाभिलषितफलप्रदातेति किमत्रापूर्वेण-व्युत्पत्तिपथदूरवर्तिना वाच्यतयाऽभ्युपेतेन कल्पितेन वा प्रयोजनम्" इति ॥

एवं—दर्शपूर्णमासस्थले दर्शत्रिकजन्यकालिकापूर्वत्रयेण समुदायापूर्वमेकं जायते । तथा पूर्णमासजन्यकालिकापूर्वत्रयेणापि समुदायापूर्वं जायते। दर्शत्रिकत्वेन पूर्णमासत्रिकत्वेन च हेतुत्वे लाघवात् ॥ 'पौर्णमास्यां पौर्णमास्या यजेत', 'अमावास्यायाममावास्यया यजेत' इति वाक्यद्वयेन

१. (पा.) कालिकापूर्वमिति क्वचित्क्वाचिदस्मिन् प्रकरणे पाठो दृश्यते ॥

दर्शत्रिकपूर्णमासत्रिकयोरेकैकहेतुताप्रतीतेः समुदायापूर्वद्वयावश्यकत्वात्. ताभ्यां च समुदायापूर्वाभ्यां फलशिरस्कापूर्वरूपं परमापूर्वं जायते । लिङ्वाच्यञ्च तादृशपरमापूर्वमिति **तन्मते** स्वीक्रियते ॥

एवञ्च यागकालिकापूर्वव्यवहितस्य यागकालिकापूर्वसमुदायापूर्वव्यवहितस्य वा परमापूर्वस्य कथं कृतिसाध्यत्वं, तथा सति स्वर्गस्यापि कृतिसाध्यत्वापत्त्या तद्दलेन स्वर्गव्यावृत्त्ययोगः ॥

एतेन साक्षात्परम्परासाधारणकृतिजन्यत्वरूपकृतिभावभावित्वमेव कृतिसाध्यत्वम्, अत एव **श्रीभाष्ये**

"कृतिभावभावि कृत्युद्देश्यं हि भवतः कार्यम्"

इत्युक्तम्, तादृशञ्च कृतिसाध्यत्वं परमापूर्वस्योपपद्यत इति **निरस्तम्।** तद्दलस्य स्वर्गव्यावर्तकत्वासम्भवात् ॥ किञ्च कृत्युद्देश्यत्वमप्यपूर्वस्य न युज्यते, मुख्यफलस्य स्वर्गादेरेव तदुद्देश्यत्वात् । अवान्तरफलस्यापि तदुद्देश्यत्वे यागजन्ये हविरग्निसंयोगेऽप्युद्देश्यत्वापत्त्या निरुक्तरूपेणापूर्वस्यैव बोध इति न युज्यते ॥

न च यत्प्राप्तीच्छया यागकृतिस्तत्त्वमेवकृत्युद्देश्यत्वं, तच्च नोक्तसंयोग इति वाच्यम्। लेपरूपयागफलेऽपि निरुक्तकृत्युद्देश्यत्वसत्त्वात् कृतिभावभावित्वस्यापि तत्र सत्त्वात्. तेनरूपेणापूर्वस्यैव भानमित्यस्यायोगात् । पुण्यपापयोर्हि फलं द्विविधं

"लेपो विपाकश्चेति । तत्र पापस्य लेपः- अप्रयतत्वं, स्नानाद्यपनेयं; विपाकः- नरकपातादिः । सुकृतस्यापि लेपः- महत्त्वपङ्क्तिपावनत्व-शापानुग्रहसामर्थ्य-काम्यकर्मसन्निरूपः; विपाकः - स्वर्गादिः । तत्र महत्त्वं नाम- 'सवनगतौ क्षत्रियवैश्यौ हत्वा ब्रह्महा भवति', 'अग्निर्वै दीक्षितस्तस्मादेनं नोपस्पृशेत्' इति शास्त्रसिद्ध उत्कर्षः"—

इत्यादिकं **तदधिगमउत्तरपूर्वाघयोरित्यधिकरणटीकायां** प्रप

श्चितम्। तथा च निरुक्तलेपेऽपि यागकृतिसाध्यत्वं तदुद्देश्यत्वं चाक्षतमिति ॥

न च--यत्प्राप्तिविषयकोत्कटेच्छया यागकृतिस्तत्त्वमेव कृत्युद्देश्यत्वं, उक्तविधलेपप्राप्तौ नोत्कटेच्छा, मुख्यफल एवोत्कटेच्छास्वीकारात्--इति वाच्यम्। उक्तविधकृत्युद्देश्यत्वस्य स्वर्ग एव सम्भवादपूर्वे तदनुपपत्तेः॥ उक्तं च श्रीमति **भाष्ये**---

"कृत्युद्देश्यत्वं च--कृतिकर्मत्वं; कृतिकर्मत्वं च--कृत्या प्राप्तुमिष्टतमत्वं; इष्टतमं च--सुखं, वर्तमानदुःखस्य तन्निवृत्तिर्वा" इति।

इष्टतमत्वं--उत्कटेच्छाविषयत्वम् ॥

एतेन--कृतिजनकेच्छाजनकेच्छाविषयत्वरूपप्रेरकत्वमेव कृत्युद्देश्यत्वं, पुरुषानुकूलत्वं वा तदिति-- **निरस्तम्**। महत्त्वादिरूपलेपेऽपि उक्तविधोद्देश्यत्वसत्त्वात् उत्कटतादृशेच्छाविषयत्वमुख्यानुकूलत्वयोः निवेशे चापूर्वेऽप्युक्तरीत्या तदसम्भवात्॥ उक्तं च श्रीमति **भाष्ये** --

'न च पुरुषानुकूलत्वं कृत्युद्देश्यत्वं,
यतस्सुखमेव पुरुषानुकूलम्' इति॥

कृतिप्रयोजनत्वं कृत्युद्देश्यत्वमिति पक्षोऽप्युक्तरीत्या निरसनीयः। कृतिं प्रति शेषित्वं कृत्युद्देश्यत्वमित्यपि न युक्तं, शेषित्वस्यानिरूपणात्॥

न च--यदुद्देशप्रवृत्तपुरुषकृतिसाध्यत्वं यस्य, तस्य तं प्रति शेषत्वं; यागस्य स्वर्गोद्देशप्रवृत्तपुरुषकृतिसाध्यत्वाद्यागस्य स्वर्गशेषत्वोपपत्तिः; प्रधानभूतयागोद्देशभूत-यागोद्देशप्रवृत्त-पुरुषकृतिसाध्यत्वात्प्रयाजादावपि लक्षणसमन्वयः; यदुद्देशप्रवृत्तकृतिसाध्यं यागादिकं भवति, तत्त्वं यागादिशेषित्वं स्वर्गादाविति--वाच्यम्॥ व्रीहिभिर्यजेतेत्यादौ व्रीह्यादिरूपद्रव्यस्य यागशेषतायाः, अरुणया क्रीणातीत्यादावारुण्यरूपगुणस्य क्रयशेषतायाः, व्रीहीनवहन्तीत्यादाववघातादिरूपसंस्कारस्य व्रीह्यादि-

शेषतायाश्च—सिद्धत्वेन तत्र संस्कारादिरूपशेषे लक्षणसमन्वयेऽपि द्रव्यगुणयोरव्याप्तेः, व्रीह्यारुण्ययोः पुरुषकृतिसाध्यत्वाभावात् ॥

न च —परोद्देशप्रवृत्तपुरुषकृतिविशिष्टत्वमेव परं प्रति शेषत्वं; वैशिष्ट्यञ्च साध्यत्व-साध्यतावच्छेदकत्व साध्यतावच्छेदकतावच्छेदकत्वान्यतमसम्बन्धेन; तथा च न द्रव्यगुणयोरव्याप्तिः, द्रव्यस्य कृतिसाध्यत्वाभावेऽपि व्रीहिविशिष्टयागस्य कृतिसाध्यत्वेन व्रीहेस्साध्यतावच्छेदकत्वात्, अरुणद्रव्यकरणकक्रयस्य कृतिसाध्यत्वेनारुण्यस्य साध्यतावच्छेदकतावच्छेदकत्वात् —इति वाच्यम्॥ एवमपि 'पुरुषश्च कर्मार्थत्वात्' इति सूत्रे पुरुषस्यापि कर्मशेषतायाः पूर्वतन्त्रसिद्धतया तत्राव्याप्तेः। अन्यतमसम्बन्धमध्ये आश्रयतासम्बन्धमप्यन्तर्भाव्य पुरुषस्य सङ्ग्रहेऽपि कृतौ निरुक्तशेषत्वाभावेन तां प्रत्यपूर्वस्य शेषित्वानुपपत्तिः ॥

अथ—यदुद्देशप्रवृत्तपुरुषकृतिविशिष्टं यत्, तत्त्वं तदङ्गत्वं; कृतिवैशिष्ट्यञ्च स्वकारकत्वेनविहितत्व-तादात्म्यान्यतरसम्बन्धेन। स्वर्गोद्देशप्रवृत्तपुरुषकृतौ यागस्य करणतया विहितत्वात् लक्षणसमन्वयः। प्रधानयागोद्देशप्रवृत्तपुरुषकृतौ प्रयाजादेरपि तथात्वाल्लक्षणसङ्गतिः। द्रव्यगुणकर्तृकालदेशादेश्च यागाद्युद्देश्यकयागानुकूलकृतौ करणत्वकर्तृत्वाधिकरणत्वादिना विधेयत्वाद्यागशेषता। षष्ठीस्थले सम्बन्धसामान्याभिधानेऽपि कारकत्व एव पर्यवसानान्नाव्याप्तिः। पुत्रजननादिरूपस्य जातेष्ट्यादिक्रियायां समानकालीनत्वसम्बन्धेनान्वयेऽपि कारकत्वाभावान्न शेषत्वापत्तिः। तादात्म्यसम्बन्धनिवेशाच्च कृतेरपि शेषत्वोपपत्तिः—इति चेन्न ॥ कृत्युद्देश्यत्वनिर्वचनरूपशेषित्वशरीरे यदुद्देशप्रवृत्तत्युद्देश्यत्वस्य प्रवेशेनात्माश्रयस्य दुर्वारत्वात् ॥

न च—यदुद्देशप्रवृत्तत्वस्य यद्विषयकेच्छाधीनप्रवृत्तिमत्पुरुषत्वार्थत्वान्नात्माश्रय इति —वाच्यम्। एवमपि भृत्ये राजशेषत्वानापत्तेः भृत्यस्य

राजाभिमतार्थविषयकेच्छाधीनप्रवृत्तिमत्त्वेऽपि राजेच्छाधीनप्रवृत्तिमत्त्वाभावात् राजसिद्धत्वेनेच्छाविषयत्वविरहात् ॥

न च ग्राममिच्छतीत्यादौ सिद्धस्यापि ग्रामस्य सिद्धस्वत्वविशिष्टाकारेणेच्छाविषयत्ववत् प्रीतिविशिष्टाकारेणेच्छाविषयत्वं राज्ञोऽपि सम्भवतीति--वाच्यम् । एवमपि तादृशराजोद्देशप्रवृत्तपुरुषकृतौ भृत्यस्य कर्तृकारकत्वेऽपि तेन रूपेण विधेयत्वाभावात् भृत्येऽव्याप्तेः ॥

न च-- विहितत्वपरित्यागेन स्वकारकत्वतादात्म्यान्यतरसम्बन्धेन कृतिवैशिष्ट्यनिवेशान्नाव्याप्तिरिति--वाच्यम् । कृष्यादेरपि यागानुकूलकृतौ कारकत्वेन तच्छेषत्वापत्तेः, तद्वारणायैव मीमांसकैर्विहितत्वनिवेशात् । राज्ञो भृत्यशेषत्वापत्तेश्च, पोषणविशिष्टभृत्योद्देशप्रवृत्तकृतौ राज्ञः कर्तृत्वात् ॥ न च-यद्विषयकेच्छायामितरेच्छानधीनत्वनिवेशान्न राज्ञो भृत्यशेषत्वापत्तिः, पोषणविशिष्टभृत्यविषयिण्या राजगतेच्छायाः स्वकार्यसिद्धीच्छाधीनत्वात्--इति वाच्यम् । तथा सत्यपूर्वं प्रत्यपि यागकृतेश्शेषत्वानापत्तेः, अपूर्वेच्छायास्स्वर्गेच्छाधीनत्वात् भृत्ये राजशेषत्वानापत्तेश्च प्रीतिविशिष्टराजेच्छाया भृत्यगताया अपि स्वसमीहितसिद्धीच्छाधीनत्वात् ॥ उक्तं शेषत्वलक्षणद्वयमुक्तरीत्यैव **श्रीभाष्ये** दूषितम् —

"न च कृतिं प्रति शेषित्वं कृत्युद्देश्यत्वम्, भवत्पक्षे शेषित्वस्यानिरूपणात् ॥ न च परोद्देशप्रवृत्तकृतिव्याप्त्यर्हत्वं शेषत्वमिति तत्प्रतिसम्बन्धि शेषित्वमवगम्यते[२] । तथा सति कृतेरशेषत्वेन तां प्रति तत्कार्यस्य शेषित्वाभावात् ॥ न च परोद्देशप्रवृत्त्यर्हतायाश्शेषत्वेन परश्शेषी, उद्देश्यत्वस्यैव निरूप्यमाणत्वात्, प्रधानस्यापि भृत्योद्देशप्रवृत्त्यर्हत्वदर्शनाच्च ॥ प्रधानस्तु भृत्यपोषणेऽपि स्वोद्देशेन प्रवर्तत इति चेन्न । भृत्योऽपि हि प्रधानपोषणे स्वोद्देशेनैव प्रवर्तते"--इति ॥

१. (पा) कृत्यादेरपि. २. तत्प्रतिसम्बन्धी शेषीत्यवगम्यते-इति मुद्रितश्रीभाष्यपाठः

परोद्देशप्रवृत्तकृतिव्याप्यत्वं साध्यत्वाद्यन्यतमसम्बन्धेनोक्तकृतिविशिष्टत्वम्। परोद्देशप्रवृत्तत्वं–स्वकारकत्वतादात्म्यान्यतरसम्बन्धेनोक्तकृतिविशिष्टत्वं। प्रधानस्तु भृत्यपोषणं स्वोद्देशेन प्रवर्तते स्वाभिमतसिद्धीच्छाधीनेच्छया प्रवर्तते। तथा चेतरेच्छानधीनयद्विषयकेच्छाधीनप्रवृत्तिमत्पुरुषत्यादिलक्षणात्र राज्ञो भृत्यशेषत्वापत्तिरिति भावः॥

तस्मात्कार्यान्विते शक्तिरित्यस्यानुपपन्नत्वात् सिद्धेऽपि व्युत्पत्तेरुपपादितत्वात्सिद्धब्रह्मविचारात्मकं **शास्त्रमारम्भणीयमेव** ॥

अत्रेदं बोध्यं–प्राभाकरमते ब्रह्मविचारो न कर्तव्य इति ब्रह्मविचारे पक्षे कर्तव्यत्वाभावसाधनं न सम्भवति; ब्रह्मविचाररूपपक्षस्यैव तन्मतेऽप्रसिद्ध्या आश्रयासिद्धेः, तैर्ब्रह्मण एवानङ्गीकारात् ॥ न च निरतिशयोत्कर्षवत्त्वरूपं ब्रह्मत्वं तन्मते जीव एव स्वीक्रियते, वेदान्तानां कर्मकर्तृजीवप्रशंसापरत्वाङ्गीकारात्, तथा च तद्विचाररूपपक्षस्य नाप्रसिद्धिरिति–वाच्यम्। ब्रह्मत्वं हि–अचेतनगतस्थूलत्वावस्था चेतनगतसर्वज्ञत्वरूपज्ञानबृहत्त्वोभयहेतुभूतसङ्कल्पवत्त्वे[1] सत्यनन्तकल्याणगुणवत्त्वे सति परममहत्परिमाणवत्त्वरूपं; 'बृहति बृंहयति, तस्मादुच्यते परं ब्रह्म' इत्यथर्वशिरःश्रुत्या तथा बोधनादिति–स्पष्टं **ब्रह्मपदशक्तिवादे**। तादृशब्रह्मत्वस्य प्राभाकरैर्जीवेऽनङ्गीकारादाश्रयासिद्धिर्दुर्वारा, कर्मण एव तन्मते ज्ञानानन्त्यरूपमोक्षहेतुत्वाङ्गीकारेण जीवे तदनङ्गीकारात्॥ न च–निरुक्तब्रह्मत्वविशिष्टविचारत्वेन न पक्षत्वं, किन्तु ब्रह्मपदार्थविषयकविचारत्वेनेति नासिद्धिः, तन्मते ब्रह्मपदस्यार्थवत्त्वेन तदर्थविचारस्य प्रसिद्धेरिति–वाच्यम् । कर्मकर्तृजीवस्यैव ब्रह्मपदार्थत्वमङ्गीकृत्य तद्विचारस्य पक्षत्वाङ्गीकारे तादृशब्रह्मपदार्थस्य कार्यान्वितत्वेन तदनन्वितत्वरूपसिद्धत्वाभावेन सिद्धे व्युत्पत्त्यभावात् ब्रह्मविचारो न कर्तव्य इत्यस्यासङ्गतेः, तादृशब्रह्मपदार्थविचारस्य कर्मविचारान्तर्गतत्वेन तत्कर्तव्यतायाः प्राभाकराणामपीष्टत्वात् ॥

---

१. (पा.) गतज्ञानानन्त्योभयहेतुभूत.

अतो ब्रह्मविचारः कर्मविचारसमाप्त्यनन्तरकालीनकर्तव्यत्वाभाववान्, कार्यान्वितार्थविषयकत्वात्, यागादिविचारवत् । न च हेतोरसिद्धिः। ब्रह्मविचारः कार्यान्वितार्थविषयकः, कार्यानन्विताथाविषयकत्वे सति सविषयकत्वात्, यो यदनन्विताथाविषयकत्वे सति सविषयकस्स तद्विषयक इति व्याप्तेः। न च सत्यन्तमसिद्धं। ब्रह्मविचारः कार्यानन्विताथाविषयकः, वाक्यार्थविचारत्वात्, पूर्वकाण्डार्थविचारवत्-इति रीत्या ब्रह्मपदार्थविचारस्य कर्मविचारानन्तरकर्तव्यत्वाभावः **प्राभाकरैः** साधनीयः ॥

तत्र च सिद्धे व्युत्पत्तिसत्त्वेन कार्यान्वितस्यैव वाक्यार्थत्वमिति नियमाभावेन वाक्यार्थविचारत्वस्य सिद्धपरवाक्यार्थविचारे कार्यानन्विताथाविषयकत्वरूपसाध्यव्यभिचारेण तृतीयानुमानस्य दुष्टत्वेन द्वितीयानुमाने सत्यन्तासिद्ध्या प्रथमानुमाने स्वरूपासिद्धिर्दुर्वारेति प्राभाकराभिमतानुमानेषु दोषमभिप्रेत्य--ब्रह्मविचारः कर्मविचारानन्तरकालीनकर्तव्यतावान्, कर्मविचारहेतुकत्वात्, यो यद्धेतुकः स तदनन्तरकर्तव्य इति सामान्यव्याप्तेः—इत्यनुमानपरं **अथातोब्रह्मजिज्ञासेति** सूत्रं वेदाचार्येण प्रणीतम् ॥ कर्मविचारध्वंसाधिकरणकालवृत्तित्वरूपं तादृशकालरूपं वा कर्मविचारानन्तर्यम्—**अथशब्दार्थः**, तस्याध्याहृतकर्तव्यपदार्थघटककृतौ आश्रयतासम्बन्धेनाधेयतासम्बन्धेन वाऽन्वयः । **अत** इत्यनेन अथशब्दोपस्थितकर्मविचारः परामृश्यते, जनकत्वं जन्यत्वं वा पञ्चम्यर्थः । तथा च—कर्मविचारहेतुको ब्रह्मविचारः कर्मविचारानन्तरकर्तव्यत्ववानिति—**सूत्रार्थः** । **अत** इत्यस्य हेतुगर्भविशेषणत्वादुक्तानुमानलाभः ॥

अथ— अत्र कर्मविचारानन्तर्यं नाथशब्दार्थः, अन्यत्रान्यानन्तर्यबोधनेनाथशब्दस्य नानार्थकत्वापत्तेः॥ न च—केवलानन्तर्यमथशब्दार्थः, सिद्धान्ते कर्मब्रह्ममीमांसयोरेकशास्त्रत्वेन पूर्वभागप्रथमसूत्रस्थधर्मजि-

ज्ञासापदानुषङ्गात् तदुपस्थापितस्य धर्मविचारस्याथशब्दार्थैकदेशध्वंसे प्रतियोगितासम्बन्धेनान्वयात् कर्मविचारानन्तर्यलाभ इति– वाच्यम् । चैत्रेण पच्यते, अथ भुज्यते- इत्यादौ भोजने पाकानन्तर्यस्यालाभापत्तेः पाकस्याख्यातार्थे विशेषणतयाऽन्वितत्वेनैकत्र विशेषणतयाऽन्वितस्यान्यत्र विशेषणतयाऽन्वयायोगात्॥ न च–प्रक्रान्तक्रियानन्तर्यमथशब्दार्थः; चैत्रेण पच्यते अथ भुज्यते इत्यत्र पाकस्य प्रक्रान्तत्वात् पाकानन्तर्यलाभः, धर्मविचारस्य प्रक्रान्तत्वात् तदानन्तर्यस्य कर्तव्यतायां लाभ इति वाच्यम् । एवमपि प्रक्रान्तक्रियाणामनुगमकरूपाभावेन अथशब्दस्य शक्त्यानन्त्यापत्तेर्दुर्वारत्वात् **इति चेन्न**॥ स्वपूर्ववाक्यस्थधातुतात्पर्यविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नक्रियानन्तर्येऽथशब्दस्य शक्तिस्वीकारेणानुपपत्त्यभावात्, बुद्धिविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नवाचकतदादिपदानामिव शक्त्यैक्यसम्भवात् । स्वपदमथशब्दपरं ॥ स्पष्टश्चेदं - **'अथशब्दो निरूप्यते'** इत्यत्र **मूलगादाधर्यां** ॥ स्वपूर्ववाक्यस्थत्वं च वाक्यघटकत्वेनानुसन्धीयमानत्वं, तेन धर्मविचारकरणस्य तत्सूत्रघटकतयाऽध्याह्रियमाणकर्तव्यपदतात्पर्यविषयत्वेऽपि न क्षतिः ॥

एतेन—साधनचतुष्टयानन्तर्यमथशब्दार्थ इति – **निरस्तम्** ॥ उक्तरीत्या प्राभाकरैर्ब्रह्मविचारे कर्तव्यत्वसामान्याभावस्य साधयितुमशक्यतया कर्मविचारानन्तरकर्तव्यत्वाभावस्यैव साधनीयतया तदीयपूर्वपक्षनिरासाय साधनचतुष्टयानन्तर्यविशिष्टकर्तव्यत्वसाधनस्यानुपयुक्तत्वात् साधनचतुष्टयस्य स्वपूर्ववाक्यस्थधातुतात्पर्यविषयत्वाभावेन तदानन्तर्येऽथशब्दलक्षणापत्तेश्च ॥

'अथातो धर्मजिज्ञासा' इत्यत्र च--अथशब्दस्य लक्षणया वेदाध्ययनानन्तर्यपरत्वमगत्या स्वीक्रियते, तस्यैव प्रथमसूत्रत्वेन तत्पू

र्वैवाक्याभावात् ॥ न चास्मिन्मते ऐकशास्त्र्यागावेन पूर्ववाक्याभावादत्रापि लक्षणा न दोषायेति वाच्यम् । **शंकरभाष्ये**--'एक आत्मनश्शरीरेभावात्' इतिसूत्रे देहातिरिक्तात्मास्तित्वस्य पूर्वतन्त्रप्रथमपादे व्यवस्थापनादत्र तद्व्यवस्थापनं पुनरुक्तमित्याशङ्क्य--शबरस्वामिना तत्र तत्कृतं न सूत्रारूढमिति पौनरुक्त्यपरिहारात्, ब्रह्मजिज्ञासासूत्रे **भामत्यां** धर्मजिज्ञासासूत्रस्थधर्मपदस्य वेदार्थमात्रोपलक्षणत्वाभिधानात्, तद्भाष्योदाहृत-**उपवर्ष**-वृत्तौ पूर्वतन्त्रे आत्मास्तित्वाभिधानप्रसक्तौ शारीरके वक्ष्याम इत्युक्तत्वाच्च, पूर्वोत्तरतन्त्रयोरेकग्रन्थस्य भवतामप्यनुमतत्वेनाथशब्दस्य लक्षणाश्रयणायोगात् ॥

ननु-- स्वपूर्ववाक्यस्थधातुतात्पर्यविषयक्रियाध्वंसाधिकरणकालस्य तादृशकालवृत्तित्वस्य वा अथशब्दार्थत्वे 'देवदत्तेन पच्यते, अथ पच्यते'--इति वाक्यस्य प्रामाण्यापत्तिः; यत्किञ्चित्पाकध्वंसाधिकरणकालवृत्तित्वस्य पाकेऽक्षतत्वात् । अतः स्वपूर्ववाक्यस्थधातुतात्पर्यविषयतावच्छेदकावच्छिन्नक्रियाध्वंस एवाथशब्दार्थः, तस्य च स्वाधिकरणकालावच्छिन्नत्व-स्वान्वयितावच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन पाकादावन्वय इत्यभ्युपगन्तव्यम् । तथा च पाके पाकध्वंसाधिकरणकालवृत्तित्वसत्त्वेऽपि स्वान्वयितावच्छेदकीभूतचैत्रकर्तृकपाकत्वाद्यनवच्छिन्नत्वाभावान्नोक्तातिव्याप्तिः[1] । प्रकृतेऽपि धर्मजिज्ञासाकृतिध्वंसस्याथशब्दार्थस्य स्वाधिकरणकालवृत्तित्वसम्बन्धेन ब्रह्मजिज्ञासाकृतावन्वयेऽपि स्वान्वयितावच्छेदकीभूतधर्मजिज्ञासाकृतित्वानवच्छिन्नत्वं न सम्भवति, धर्मजिज्ञासासूत्रघटकधर्मपदस्यालौकिकश्रेयस्साधनत्वेन रूपेण साध्यधर्मात्मकयागादिपरत्ववत् सिद्धधर्मात्मकधर्मपरत्वमपि सम्भवतीति तत्सूत्रस्य भागद्वयसाधारणप्रतिज्ञापरत्वस्य श्रुतप्रकाशिकायामुपपादितत्वेन धर्मविचारत्वस्य ब्रह्मविचारसाधारण्यात्--

१. (पा.)-भावेन नोक्तापत्तिः ।

इति चेन्न ॥ तत्सूत्रस्य भागद्वयसाधारणप्रतिज्ञापरत्ववत् पूर्वभागमात्रार्थप्रतिज्ञापरत्वस्याप्यावश्यकतया धर्मपदस्य कृतिसाध्यत्वविशिष्टश्रेयस्साधनत्वेन रूपेण कर्मविचारमात्रपरत्वस्यापि **श्रुतप्रकाशिकाया**मुपपादितत्वात्, तन्त्रेण साधारणार्थबोधासाधारणार्थबोधोभयपरत्वात्कर्मविचारध्वंसमादायाथशब्दार्थोपपत्तेः, स्वपूर्ववाक्यस्थधातुतात्पर्यविषयतावच्छेदकयत्किञ्चिद्धर्मावच्छिन्नक्रियाध्वंसस्यैवाथशब्दार्थत्वात्।

"उल्लसितार्जुनदीप्तिः कुवलयसम्मोदको हरिः प्राप्तः ।
अथ वारणावतस्था जहृपुर्विदुरादयः कुरूत्तंसाः ॥"

इत्यादौ प्रकृताप्रकृतश्लेषोत्तरवाक्यस्थाथशब्दस्य प्रकृतार्थमात्रानन्तर्यपरत्वात्, तत्र पूर्ववाक्यस्थधातोश्चन्द्रकृष्णोभयप्राप्तिपरत्वेऽपि कृष्णप्राप्तिरूपयत्किञ्चित्क्रियाध्वंसस्यैवाथशब्दार्थत्वात् ॥

एतेन—अतश्शब्दस्य धर्मविचारहेतुत्वार्थकत्वमयुक्तम्, धर्मविचारत्वस्य ब्रह्मविचारसाधारणत्वेन तादृशधर्मविचारहेतुकत्वस्य ब्रह्मविचारेऽसिद्धेरिति—**निरस्तम्** ॥ 'चोदनालक्षणोऽर्थो धर्मः' इति द्वितीयसूत्रेण ब्रह्मभिन्नधर्मस्यैव लक्षणोक्त्या धर्मजिज्ञासासूत्रस्योक्तरीत्या तन्त्रेण भागद्वयसाधारणप्रतिज्ञापरत्ववत् पूर्वभागमात्रगोचरासाधारणप्रतिज्ञापरत्वस्याप्यावश्यकत्वेनासाधारणप्रतिज्ञाविषयकर्मविचारध्वंसस्यैवाथशब्देन बोधनान्निर्दिष्टपरामर्शकातश्शब्देनापि कर्मविचारहेतुकत्वस्यैव बोधनेनासिद्धिविरहात् ॥

नन्वेवमप्यसिद्धिर्दुर्वारा, ब्रह्मविचारं प्रति कर्मविचारस्य हेतुत्वे मानाभावादिति चेन्न। कर्मविचारस्य ब्रह्मविचारे साक्षाद्धेतुत्वे मानाभावेऽपि कर्मविचारस्य ब्रह्मविचारेच्छाप्रतिबन्धकनिरासकत्वेन प्रयोजकत्वात्। तथाहि—ब्रह्मविचारेच्छां प्रति कर्मविचारेच्छा स्वानन्तर्येण प्रतिबन्धिका, सुकरोपायज्ञानाधीनतदुपायेच्छाया दुष्करोपायेच्छां प्रति प्रतिबन्धकतायाः सर्वानुभवसिद्धत्वात् ॥ प्रतिबध्यप्रतिबन्धकभावश्च—स्वस-

मानधर्मितावच्छेदककत्वस्वसामानाधिकरण्योभयसम्बन्धेन। तद्धर्मावच्छिन्नफलसाधनताज्ञानविशिष्टसुकरत्वज्ञानत्वेन तज्जन्येच्छात्वेन वा प्रतिबन्धकता, उक्तोभयसम्बन्धेन तद्धर्मावच्छिन्नफलसाधनताज्ञानविशिष्टदुष्करत्वज्ञानत्वेन तद्विषयकेच्छात्वेन वा प्रतिबध्यता। तृष्णानिवृत्तीच्छोः पुरुषस्य तत्प्रयोजकघटोदकज्ञानस्य तदिच्छाया वा घटोदकं विहाय दूरस्थनदीगमनेच्छाप्रतिबन्धकत्वात्। प्रतिबन्धककोटौ विशिष्टान्तनिवेशात्—'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत', 'अग्निहोत्रं जुहुयात्स्वर्गकामः'—इत्यादौ दर्शपूर्णमासापेक्षयाऽग्निहोत्रस्य सुकरत्वेऽपि न तज्ज्ञानस्य दर्शपूर्णमासप्रतिबन्धकत्वापत्तिः, अग्निहोत्रसाध्यस्वर्गस्य दर्शपूर्णमाससाध्यस्वर्गविजातीयतया तयोरेकधर्मावच्छिन्नजनकत्वाभावात् गुरुलघुविकल्पानुपपत्त्यैवाग्निहोत्रदर्शपूर्णमाससाध्यस्वर्गयोर्वैजात्यस्य पूर्वतन्त्रसिद्धत्वात्। सामानाधिकरण्यनिवेशान्नभिन्नपुरुषीयफलसाधनताज्ञानविशिष्टसुकरत्वज्ञानस्य प्रतिबन्धकत्वापत्तिः॥

तथा च—कर्मणामनन्ताक्षयफलकत्वस्य 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति,' 'अनन्तं ह वा अपारमक्षय्यं लोकं जयति', 'योऽग्निं नाचिकेतं चिनुते'—इत्यादिश्रुत्या ज्ञातत्वेनानादिवासनावशाच्च तत्र सुकरत्वस्य गृहीतत्वेन 'न पुनर्मृत्यवे तदेकं पश्यति', 'न च पुनरावर्तते'—इत्यादिनाऽनन्तस्थिरफलसाधनत्वेनावगतब्रह्मज्ञाने 'दुर्गं पथं तत्कवयो वदन्ति' इत्यादिश्रुत्या दुष्करत्वावगमेन ब्रह्मज्ञानगोचरेच्छायां कर्मण्यक्षयफलसाधनताधीविशिष्टसुकरत्वज्ञानस्य प्रतिबन्धकत्वावश्यकतया, उक्तरीत्या विचारयोरपि तदुपायभूतयोः प्रति बध्यप्रतिबन्धकभावोऽव्याहतएव। कर्माणि विचारिते तु तस्याल्पास्थिरफलकत्वनिश्चयान्निरुक्तप्रतिबन्धकतावच्छेदकरूपविघटनमिति कर्म-

१. (पा.) तत्रापि समानधर्मितावच्छेदककत्वनिवेशाद्दर्शपूर्णमासविशेष्यकसाधनताज्ञानविशिष्टाग्निहोत्रविशेष्यकसुकरत्वज्ञानस्य न प्रतिबन्धकत्वापत्तिः॥

विचारस्य ब्रह्मविचारे प्रयोजकता । ब्रह्मविचारेच्छाप्रतिबन्धकीभूतं यत्कर्मणामनन्ताक्षयफलसाधनत्वज्ञानविशिष्टसुकरत्वज्ञानं, तद्विघटकाल्पास्थिरफलसाधनत्वज्ञानसम्पादकत्वमेव कर्मविचारस्य ब्रह्मविचारप्रयोजकत्वं । निरुक्तरूपेच्छाद्वारकप्रयोजकत्वसूचनायैव सूत्रे सनन्तनिर्देशः, सनइच्छावाचित्वात् ॥ **श्रीभाष्येऽपि**—

'अतश्शब्दो वृत्तस्य हेतुभावे' इति कर्मविचारस्य प्रयोजकत्वपरत्वमतश्शब्दस्योक्त्वा—किंद्वारकं प्रयोजकत्वमित्यपेक्षायामिच्छाघटितं निरुक्तरूपमेव कर्मविचारस्य प्रयोजकत्वमिति प्रतिपादितम्—

> "अधीतसाङ्गसशिरस्कवेदस्याधिगताल्पास्थिरफलकेवलकर्मज्ञानतया सञ्जातमोक्षाभिलाषस्यानन्तस्थिरफलब्रह्मजिज्ञासा ह्यनन्तरभाविनी ।"—इति ॥

अत्र—**अधीतसाङ्गसशिरस्कवेदस्ये**त्यनेन साङ्गाध्ययनजन्यमापातप्रतीतिरूपं यत्कर्मब्रह्मज्ञानोभयसाधारण्येनाक्षयफलसाधनत्वज्ञानं तद्वतः अनादिवासनावशेन कर्मणिसुकरत्वज्ञानवत इत्यर्थस्य विवक्षितत्वात्, **अधिगताल्पास्थिरफलकेवलकर्मज्ञानतये**त्यनेन कर्मविचारस्य कर्मण्यक्षयफलसाधनताधीविघटकत्वस्य विवक्षितत्वात्, **ब्रह्मजिज्ञासे**त्यस्य ब्रह्मविचारेच्छापरत्वान्निरुक्तरूपप्रयोजकतालाभः ॥

न च—चिकित्सादिपदानां व्याधिप्रतीकारत्वाद्यवच्छिन्ने रूढिवज्जिज्ञासापदस्यापि पञ्चाव्यात्मकावयवोपेतन्यायवाक्यप्रयोज्यपरार्थानुमानरूपविचारत्वावच्छिन्ने रूढत्वान्न सन इच्छार्थकत्वम्, अन्यथा इच्छाविषयीभूतज्ञानस्य ज्ञानगोचरेच्छाया वा लाभेऽपि निरुक्तविचारत्वावच्छिन्नस्य जिज्ञासापदेनालाभात् ज्ञाधातोस्तत्र लक्षणाप्रसङ्ग इति—वाच्यम् ॥ जिज्ञासापदस्य परार्थानुमितित्वरूपविचारत्वावच्छिन्ने रूढिग्राहकप्रमाणाभावेन रूढेरप्रामाणिकत्वात्, चिकित्सादिपदानां

१. (पा.) सूत्रे.

'गुप्तिज्किद्भ्यस्सन्–निन्दाक्षमाव्याधिप्रतीकारेष्विति वाच्यम्' इति शास्त्रस्यैव रूढिग्राहकप्रमाणस्य सत्त्वेन तत्तदर्थेषु रूढ्युपपत्तेः॥ न चैवं ज्ञाधातोर्लक्षणापत्तिः। वह्निमनुमिनोति वह्नेरनुमितिरितिवत्, वह्नित्वमनुमिनोति पर्वतमनुमिनोति वह्नित्वस्यानुमितिः पर्वतस्यानुमितिरित्यादिव्यवहाराभावेनानुमितितात्पर्यकधातुसमभिव्याहृतद्वितीयाषष्ठ्यो-र्विधेयतारूपविषयताविशेषावश्यकत्वात्[1]। **ब्रह्मणो जिज्ञासेत्यत्रापि** षष्ठ्या विधेयत्वार्थकत्वेन समासे पूर्वपदस्य ब्रह्मविधेयके लाक्षणिकतया वह्निमनुमिनोतीत्याद्यनुभवसिद्धविधेयत्वाख्यविषयताविशेषस्यानुमिति-भिन्नज्ञानेऽप्रामाणिकतया ज्ञाधातुलक्षणां विनैव ब्रह्मजिज्ञासेत्यनेन ब्रह्मविचारलाभात्॥

ननु–ब्रह्मणो जिज्ञासेत्यत्र षष्ठ्यन्तार्थब्रह्मविधेयकत्वस्य न ज्ञानेऽन्वयः, किन्तु सन्प्रत्ययार्थेच्छायामेव प्रकारतासम्बन्धेनान्वयात् ब्रह्मविधेयकत्वप्रकारकज्ञानविशेष्यकेच्छैव प्रतीयते, न तु ब्रह्मविधेयकं ज्ञानं; सनन्तधातुसमभिव्यहारस्थले कारकविभक्त्यर्थानां सर्वेषां प्रकारतासम्बन्धेन सनर्थेच्छायामेवान्वयात्। अन्यथा विषसंपृक्तान्नभोजनस्थले विषाज्ञानेन तादृशान्नभोक्तरि विषं बुभुक्षत इति प्रयोगापत्तेः, भोजने विषकर्मकत्वस्याबाधात्; इच्छायामन्वये च नापत्तिः, विषकर्मत्वप्रकारकस्य इच्छायां बाधात्। एवं गगनं दिदृक्षत इति प्रयोगानुपपत्तेः, गगनविषयकत्वस्य धात्वर्थदर्शने बाधात्; गगनविषयकत्वप्रकारकत्वस्येच्छायामबाधात्।

"दोर्भ्यां तितीर्षत्यम्भोधिं तुष्टूषुस्तद्गुणार्णवम्।"

इत्याद्यनुपपत्तिश्च, दोःकरणकत्वप्रकारकेच्छासत्त्वेप्यम्भोधितरणे दोःकरणकत्वस्य बाधात्। तस्माद्व्युत्पत्तिवादे **गदाधरोक्त**रीत्या विभक्त्य-

---

१. (पा.) विशेषार्थकत्वस्यावश्यकत्वात्.

र्थानां प्रकारतासम्बन्धेन सनर्थ एवान्वयात् ब्रह्मविषयकत्वस्यापि न ज्ञानान्वयो युक्तः— इति चेत् ।

मैवं । सनन्तस्थले विभक्त्यर्थकर्मत्वादीनां धात्वर्थे सनर्थे चान्वयः । यत्र धात्वर्थे बाधः, तत्र केवलं सनर्थ एवान्वय इति स्वीक्रियते ॥ एवञ्चोक्तस्थले विषं बुभुक्षत इत्यस्य नापत्तिः, इच्छायां तदन्वयबाधात् । गगनं दिदृक्षत इत्यादौ च धात्वर्थे गगनविषयकत्वस्य बाधात् प्रकारतासम्बन्धेनेच्छायामेव तदन्वयान्नानुपपत्तिः ॥

न च—प्रकारतासम्बन्धेन सर्वत्र विभक्त्यर्थानामिच्छायामेवान्वयो ऽस्तु, किमर्थं धात्वर्थे तदन्वयाङ्गीकरणम्—इति वाच्यम् ॥ तथा सति चैत्रो ग्रामं जिगमिषतीतिवत् स्वं जिगमिषतीति प्रयोगापत्तेः ॥

न च—ग्रामादिपदोत्तरद्वितीयायाः फलान्वय्याधेयत्वं क्रियान्वयिभेदप्रतियोगितावच्छेदकत्वं चार्थ इति देवदत्तो ग्रामं गच्छतीत्यादौ ग्रामवृत्तिसंयोगजनिका ग्रामनिष्ठभेदप्रतियोगितावच्छेदकीभूता या क्रिया तद्वानिति बोधाद्देवदत्तस्स्वंगच्छतीति व्यवहारवारणवत् द्वितीयार्थाधेयत्वभेदप्रतियोगितावच्छेदकत्वयोर्द्वयोरेव प्रकारतासम्बन्धेनेच्छायामन्वयात् न स्वं जिगमिषतीति प्रयोग इति- वाच्यम् । यदा ग्रामगमनं भवत्विति ग्रामनिष्ठभेदप्रतियोगितावच्छेदकत्वाप्रकारिका ग्रामगमनेच्छा, तदानी ग्रामं जिगमिषतीत्यस्यानुपपत्तेः ; तादृशेच्छायां प्रकारतासम्बन्धेन भेदप्रतियोगितावच्छेदकत्वान्वयासम्भवात् ॥

न च—द्वितीयार्थाधेयत्वस्यैव प्रकारतया सनर्थेच्छायामन्वयः, भेदप्रतियोगितावच्छेदकत्वस्य च क्रियायामेवान्वयान्नानुपपत्तिरिति—वाच्यम् ॥ एवमपि यदा मल्लो ग्रामं जिगमिषति तदा मल्लो मल्लं जिगमिषतीत्यस्यापत्तेः । स्वात्मकमल्लवृत्तित्वप्रकारकसंयोगावच्छिन्नव्यापारविषयकेच्छाश्रये मल्लान्तरनिष्ठभेदप्रतियोगितावच्छेदक-

त्वस्य क्रियायामबाधात् धात्वर्थफलेऽपि द्वितीयार्थाधेयत्वान्वयाभ्युपगमे च नानुपपत्तिः । फलव्यापारयोः धातोः खण्डशक्तिस्वीकारेण मल्लवृत्तित्वविशिष्टसंयोगस्य स्वजनकत्व–स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वोभयसम्बन्धेनान्वयोपगमान्मल्लनिष्ठक्रियायाः तन्मल्लनिष्ठसंयोगजनकत्वेन जनकतासम्बन्धेन संयोगवत्त्वेऽपि मल्लवृत्तित्वविशिष्टतत्संयोगाश्रयतन्मल्लनिष्ठभेदप्रतियोगितावच्छेदकत्वाभावान्नोक्तोभयसम्बन्धेन विशिष्टसंयोगवत्त्वमित्यनतिप्रसङ्गात् ॥

एवं–सनन्तसमभिव्याहारे कारकविभक्त्यर्थस्य सनर्थएवान्वये मल्लो वृक्षात्पिपतिषतीतिवत् स्वस्मात्पिपतिषतीति प्रयोगापत्तिः, तत्र विभागजनकत्वस्यैव पञ्चम्यर्थत्वेन तत्प्रकारकेच्छाया मल्लवृत्तित्वात् भेदप्रतियोगितावच्छेदकत्वस्यापि पञ्चम्यर्थतामुपगम्य स्वनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य पतने बाधान्न तादृशप्रयोग इति तु–न सम्भवति ॥ पञ्चम्यर्थस्य धात्वर्थेऽन्वयस्यानङ्गीकारात् सनर्थे प्रकारतासम्बन्धेन भेदप्रतियोगितावच्छेदकत्वान्वयाङ्गीकारे च स्ववृक्षयोर्विभागजनकं पतनं भवत्विति भेदप्रतियोगितावच्छेदकत्वानवगाहीच्छादशायां वृक्षात्पिपतिषतीति प्रयोगानुपपत्तेः ॥

न च—भेदप्रतियोगितावच्छेदकत्वरूपपञ्चम्यर्थस्य धात्वर्थ एवान्वयः, विभागजनकत्वस्य च प्रकारतासम्बन्धेनेच्छायामन्वय इति नानुपपत्तिः–इतिवाच्यम् ॥ एवमपि मल्लो मल्लात्पिपतिषतीति प्रयोगापत्तेः, स्वनिष्ठविभाजकक्रियायां मल्लान्तरनिष्ठभेदप्रतियोगितावच्छेदकत्वस्यापि सत्त्वात् । अत एव विभागाधिकरणताप्रयोजकत्वं पञ्चम्यर्थः । वृक्षात्पर्णं पततीत्यादौ वृक्षस्यावधित्वसम्बन्धेन विभागेऽन्वयः, वृक्षावधिकत्वविशिष्टविभागनिरूपिताधिकरणतायाश्च निरूपितत्वसम्बन्धेन प्रयोजकतायामन्वयात् । वृक्षात्पर्णं पततीतिवत् पर्णात्पर्णं पततीति न प्रयोगः ; पत्रनिष्ठपतने वृक्षावधि-

कत्वविशिष्टविभागनिरूपिताधिकरणताप्रयोजकत्वसत्त्वेऽपि पत्रावधिकत्वविशिष्टविभागाधिकरणताप्रयोजकत्वासम्भवात्, कारणत्वस्य स्वाश्रयनिष्ठकार्याधिकरणतामात्रप्रयोजकत्वात् ॥ एवमपि—सनन्तस्थलेऽपि मल्लो मल्लात्पिपतिषतीति न प्रयोगः, तत्र मल्लावधिकत्वविशिष्टविभागाधिकरणताप्रयोजकत्वप्रकारकेच्छाबोधेन मल्ले तदबाधादिति--निरस्तम् ॥ स्ववृक्षयोर्विभागजनकं पतनं भवत्वित्यधिकरणत्वानवगाहीच्छादशायामपि वृक्षात्पिपतिषतीति प्रयोगात्तदनुपपत्तेः । पञ्चम्यर्थस्य धात्वर्थसनर्थयोर्द्वयोरेवान्वयाभ्युपगमे च विभागमात्रस्य प्रकारतासम्बन्धेनान्वयात् वृक्षावधिकत्वविशिष्टविभागाधिकरणताप्रयोजकत्वस्यधात्वर्थे अन्वयाभ्युपगमान्नानुपपत्तिः ॥

एतेन--जिज्ञासापदस्य विचारे रूढ्यनङ्गीकारे ज्ञाधातोर्लक्षणाप्रसङ्गात् सनर्थेच्छायामेव ब्रह्मविषयकत्वप्रकारकत्वलाभेऽपि ब्रह्मविषयकविचारालाभप्रसङ्गाच्च रूढिस्वीकार एव युक्त इति- **केषांचित्प्रत्याशा निरस्ता** । रूढ्यनङ्गीकारेऽपि लक्षणाविरहस्य, विचारे ब्रह्मविषयकत्वलाभस्य चोपपादितत्वात् ॥ एतदभिप्रेत्यैव -विद्या यज्ञादिकरणिका, 'यज्ञेन दानेन तपसाऽनाशकेन' इत्यादिश्रुत्या विद्यायां यज्ञादिकरणकत्वबोधनात्-- इत्यर्थपरं **सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदिति** सूत्रं प्रणीतम् सनर्थेच्छायामेव प्रकारतासम्बन्धेन करणत्वस्यान्वये विद्यायां यज्ञादिकरणकत्वाबोधात्तादृशश्रुत्युदाहरणानुपपत्तेः॥

यदपि--ब्रह्मणि गुणप्रतिपादकश्रुतिसामान्यस्य तत्तद्गुणविशिष्टं ब्रह्मोपासीतेत्यर्थपरत्वात् तादृशगुणानां च प्रकारतासम्बन्धेनोपासन एवान्वयात्तत्तद्गुणप्रकारकब्रह्मविशेष्यकोपासनलाभेऽपि ब्रह्मणि गुणानामन्वयाभावान्न ब्रह्मणस्तादृशश्रुत्या सगुणत्वसिद्धिः॥ नीलं घटं जानातीत्यादौ नीलादिज्ञान एव प्रकारतासम्बन्धेनान्वयात्तत्र प्रातिपदिकार्थयोः परस्परमभेदान्वये इदं रजतं जानातीत्यादौ बाधेन, ज्ञाधातुसमभिव्या-

हारे सर्वत्र प्रकारतासम्बन्धेन विशेषणस्य ज्ञान एवान्वयात् । व्यव स्थापितं चेदं व्युत्पत्तिवादे इति–तदप्यनेन निरस्तम् ॥ नीलं घटं जानातीत्यादौ अभेदेन नीलादेर्घटे प्रकारतासम्बन्धेन ज्ञाधात्वर्थेऽप्यन्वयाङ्गीकारात्, अभेदान्वयबोधप्रयोजकसमानविभक्तिकपदसमभिव्याहारसत्त्वेन तदनुत्पादे बीजाभावात्, ज्ञाधातुसमभिव्याहारस्य प्रतिबन्धकत्वे गौरवात्, 'इदं रजतं जानाति' 'शङ्खं पीतं जानाति' इत्यादावपि रजतपीतादिपदानां रजतपीतादिज्ञानविषयार्थकतया तत्राप्यभेदान्वयस्य निर्बाधत्वात्। अन्यथा 'रङ्गाणि रजतं जानाति' 'स्त्रियं पांमुलान् जानाति' इत्यादिप्रयोगस्य दुर्वारत्वात्, समानाधिकरणपदयोरिव यत्पदार्थविशेष्यकत्वविशिष्टे ज्ञाने यत्पदार्थनिष्ठाभेदसम्बन्धावच्छिन्नप्रकारताकत्वस्यान्वयः, तयोरपि समानलिङ्गवचनकत्वमिति नियमान्तराङ्गीकारे गौरवात्। 'रङ्गाणि रजतं ज्ञायन्ते' 'स्त्रियं पांमुला ज्ञायते' इत्यस्योक्तनियमेनावारणाच्च, यत्पदार्थेऽभेदसम्बन्धावच्छिन्नप्रकारतासम्बन्धेन यत्पदार्थविशेषितज्ञाधात्वर्थज्ञाननिरूपिताख्यातार्थविशेष्यत्वान्वयः तयोरपि पदयोस्समानलिङ्गवचनकत्वमिति नियमान्तरस्यापि स्वीकारे चातिगौरवात् ॥ नीलो घटो ज्ञायत इत्यादौ नीलपदोत्तरं प्रथमानुपपत्तिः, नीलगतकर्मत्वस्यानभिहितत्वेनानभिहिते कर्मणि द्वितीयाविधानेन द्वितीयाया एव दुर्वारत्वात् ॥ न च–तत्रोभयकर्मत्वमेवाख्यातेनाभिधीयत इति–वाच्यम्, तथा सति वाक्यभेदापत्तेः। नीलः पटो घटो द्रव्यमित्यादिसमूहालम्बनदशायामपि नीलो घटो ज्ञायत इत्यस्य दुर्वारत्वापत्तेश्च ॥

अथ–नीलो घटो ज्ञायत इत्यादौ नीलादिपदोत्तरं न द्वितीयापत्तिः। अभेदसम्बन्धावच्छिन्नप्रकारतारूपकर्मत्वस्य संसर्गतया विवक्षितत्वात्। प्रातिपदिकार्थविशेष्यतया कर्मत्वविवक्षायां द्वितीयेत्यस्यैवानभिहिते कर्मणि द्वितीयेत्याद्यनुशासनार्थत्वात्। अत–एव अर्घ्यं नम इत्यादौ नमः-

पदार्थत्यागे अर्घ्यादिपदार्थस्य कर्मताबोधनेऽप्यर्घ्यादिपदात्प्रथमैव, निपातार्थत्यागे कर्मतासम्बन्धेनैव नामार्थस्यान्वयात् । एवं भूतले न घट इत्यादावपि घटसम्बन्धस्याभावे संसर्गतया षष्ठीविषयेऽपि प्रथमा—इति चेन्न ॥ अर्घ्यं नम इत्यादौ निपातार्थे प्रातिपदिकार्थस्य भेदेनान्वयसम्भवेऽपि धात्वर्थे तथाऽन्वयायोगात् । कर्मतासम्बन्धेन तण्डुलान्वयतात्पर्येण तण्डुलः पचतीत्यादिप्रयोगवारणाय धात्वर्थप्रातिपदिकार्थयोर्भेदेनान्वयो नास्तीति नियमस्याङ्गीकार्यत्वात् ॥

यत्तु—घटो नीलो भवतीत्यादौ भूधात्वर्थेऽसाधारणधर्मे नीलपदार्थस्याधेयतया अन्वयात् 'वृक्षो नौका भवति' 'काष्ठं भस्म भवति' इत्यादौ नौकाभस्मादेस्तेन सम्बन्धेन भूधात्वर्थेऽन्वयाद्व्यभिचारवारणायोक्तनियमे भूधात्वर्थातिरिक्तत्वं यथा धात्वर्थे निवेश्यते, तथा 'घटो नीलो ज्ञायते' 'काष्ठं भस्मराशिः क्रियते' इत्यादावपि भेदसम्बन्धेनान्वयादुक्तनियमे सविषयकधात्वर्थातिरिक्तत्वमपि निवेशनीयम् । तत्र प्रथमे भेदसम्बन्धावच्छिन्नप्रकारतासम्बन्धेन नीलादेः ज्ञाधात्वर्थेऽन्वयः । द्वितीये भस्मराशित्वविशिष्टस्य साध्यतासम्बन्धेन कृतावन्वयान्नाश्यत्वस्याख्यातार्थत्वात् भस्मराशित्वविशिष्टसाध्यककृतिनाश्यं काष्ठमिति बोधः—इति ॥ तन्न । भूधात्वर्थो हि नासाधारणधर्मः । तथा सति घटो नीलो भवतीत्यादौ नीलवृत्त्यसाधारणधर्मवानिति बोधेन न नीलो भवतीत्यत्र तद्वृत्त्यसाधारणधर्मात्यन्ताभाववानिति बोधापत्तेः । इदमिदं नभवतीति वाक्ये सर्वसिद्धस्य भेदबोधकत्वस्यापलापापत्तेः, घटे नैल्यस्य भविष्यत्त्वतात्पर्येण घटो नीलो भविष्यतीत्यस्यानुपपत्तेः, धातूत्तरप्रत्ययेन धात्वर्थासाधारणधर्म एव भविष्यत्त्वबोधात् । अतो भूधात्वर्थो धर्माश्रयः । तत्र नीलत्वविशिष्टस्याभेदेनान्वयान्नीलत्वाभिन्नधर्मविशिष्टलाभः । तस्य च तादात्म्येन घटादावन्वयः, सति तात्पर्ये पदार्थयोरिव पदार्थतावच्छेदकयोरप्यभेदबोधात् ॥

एवञ्च—तादात्म्येन नीलत्वाभिन्नधर्मविशिष्टवान् घट इति बोधस्य घटो नीलो भवतीति वाक्यादुत्पत्त्या घटो नीलो न भवतीत्यनेन भेदबोधनिर्वाहः । भूधात्वर्थविशिष्टैकदेशधर्मे प्रत्ययार्थभविष्यत्त्वस्यान्वयाद्घटोनीलोभविष्यतीत्यनेन नैल्यस्य भविष्यत्त्वबोधनिर्वाहः । तादृशधर्मे नीलपदार्थतावच्छेदकधर्मस्याभेदान्वयात् ॥

न च—धात्वर्थैकदेशे प्रत्ययार्थभविष्यत्त्वान्वयो न युक्त इति—वाच्यम् । नश्यतीत्यादावुत्पत्तिमदभावरूपधात्वर्थैकदेशोत्पत्तौ लडर्थवर्तमानत्वान्वयस्य नैयायिकैरङ्गीकारात् । अन्यथा तन्मते नाशस्य नाशाभावेन वर्तमानतया चिरातीतेऽपि घटे घटो नश्यतीत्यस्यापत्तेः । भूधातुसमभिव्याहारस्थले उक्तरीत्या बोधमभिप्रेत्यैव **पटवच्चेत्यत्र** टीकायां 'जातिर्व्यक्तिर्भवति न भवति चेति, खण्डो मुण्डो भवति न भवति चेति' भेदाभेदयोरभिलापस्स्वीकृतः[1] । अत उक्तनियमे भूधात्वर्थातिरिक्तत्वं न निवेशनीयम् । एवं सविषयकातिरिक्तत्वमपि न निवेशनीयम् । नीलो घटो ज्ञायतइत्यादौ नीलपदार्थस्य घटेऽभेदेनान्वितस्यैव ज्ञाधात्वर्थे धर्मिपारतन्त्र्येणान्वयेन स्वातन्त्र्येणान्वयाभावात्, नामार्थयोर्भेदेनान्वयो नास्ति, नामार्थधात्वर्थयोर्भेदेनान्वयो नास्तीति नियमयोरन्वयपदस्य स्वातन्त्र्येणान्वयपरत्वात् । अन्यथा 'धनवान्सुखी' 'धनवान्सुख्यति' 'ब्रह्मविदाप्नोति परम्' इत्यादौ धनस्य सुखे ब्रह्मवेदनस्य परप्राप्तौ च प्रयोज्यतासम्बन्धेनान्वयादुक्तनियमानुपपत्तेः । एवं 'काष्ठं भस्मराशिः क्रियते' इत्यादौ भस्मराशिपदार्थस्य काष्ठेऽभेदेनान्वितस्यैव धात्वर्थे पारतन्त्र्येणान्वयात्, भस्मत्वावस्थापन्नं काष्ठं भस्मत्वसाध्यककृतिसाध्यमिति बोधाङ्गीकारादनुपपत्तिविरहात् । तत्राभेदान्वयबोधानङ्गीकारे, यत्र काष्ठत्वावस्थानाशककृत्या काष्ठादेर्भस्मताप्राप्तिः, घटादेः रक्तताप्राप्तिश्च, तत्र 'काष्ठं रक्तं क्रियते' इति प्रयो-

---

१. (पा.) अलाभः स्वीकृतः ।

गापत्तेश्च, रक्तत्वसम्पादककृतिनाश्यत्वस्य काष्ठेऽबाधात् । एवमुक्त-नियमे सविषयकातिरिक्तत्वान्तर्भावे विषयतायास्संसर्गत्वविवक्षया 'घटो जानाति चैत्रः' 'घटः करोति चैत्र.' इत्यादिप्रयोगापत्तिर्दुर्वारा । अभेदसम्बन्धावच्छिन्नप्रकारत्वसाध्यत्वयोः प्रातिपदिकार्थविशेष्यत्व-विवक्षायां 'घटो नीलं ज्ञायते' 'काष्ठं भस्मराशि क्रियते' इत्यादिप्र-योगापत्तिश्च । कर्मत्वविशेषणतानापन्नकृधात्वर्थज्ञाधात्वर्थयोरेव द्वि-तीयार्थकर्मत्वान्वयः इति नियमेनोक्तप्रयोगवारणेऽपि संसर्गतात्पर्येण-'काष्ठं भस्मराशिः करोति' इतिप्रयोगापत्तिः । कर्मत्वविशेषणतानापन्न-कृधात्वर्थज्ञाधात्वर्थयोरेव कर्मत्वस्य संसर्गत्वमिति नियमेनोक्तप्रयो-गवारणे च गौरवम् । तस्मात्सविषयकधातुसमभिव्याहारेऽपि विशे-षणस्य प्रातिपदिकार्थधात्वर्थयोर्द्वयोरेवान्वय इति सिद्धम् ॥

एतदेव मतं वेदाचार्यस्य 'अन्तस्तद्धर्मोपदेशात्' 'विवक्षित-गुणोपपत्तेश्च' इत्यादिपूपासनवाक्येपूपास्ये जीवादि भेदस्य तद्वाक्य-प्रतिपन्नगुणैस्साधनात्, गुणानामुपास्येऽन्वयाभावे तदनुपपत्तेः । 'सत्यं ज्ञानमनन्तं ब्रह्म, यो वेद' इत्यादावपि सत्यत्वादेर्वेदन एवान्वयाप-त्त्या ब्रह्मणि सत्यत्वादीनामसिद्ध्यापत्तेः—इत्यादिकमन्यत्र प्रप-ञ्चितमित्यलं प्रासङ्गिकेन ॥

तस्मात्-ब्रह्मजिज्ञासेत्यत्र सन इच्छार्थकत्वेऽपि ब्रह्मविषयकविचा-रलाभात् ब्रह्मविषयकविचारे कर्मविचारानन्तरकर्तव्यत्वसाधनद्वारा प्रथ-मसूत्रेण सिद्धेव्युत्पत्तिसमर्थनात् सिद्धब्रह्मविषयकबोधजनकत्वाभाव-व्याप्यसिद्धब्रह्मतात्पर्यकत्वाभावज्ञानरूपप्रवृत्तिहेतुभूतेष्टसाधनताज्ञान-प्रतिबन्धकनिरासकतया **तत्सूत्रस्य शास्त्रारम्भार्थत्वमुपपन्नम्** ॥

नन्वेवमपि--निरतिशयबृहत्त्वविशिष्टस्य वस्तुनो बाधितत्वान्न तत्र तात्पर्यसम्भवः । निरतिशयबृहत्त्वं हि स्वेतरसमस्तनिरूपितोत्कर्षव-

त्त्वं ; तच्चानेकेषां न घटते, स्वपदेनैकैकस्यैवोपादेयत्वेन स्वेतरयावद्वस्तुषु तादृशवस्त्वन्तरस्यापि प्रवेशात् 'नकिरिन्द्र त्वदुत्तरः' 'न वा ओजीयो रुद्र त्वदस्ति' इत्यादिश्रुतीनां सर्वोत्कृष्टत्वोक्त्या बाधस्य दुष्परिहरत्वात् ॥ अथ--'नकिरिन्द्र' इत्यादेः स्तुतिपरत्वेन तत्परत्वाभावान्नेन्द्रादेस्सर्वोत्कृष्टत्वे तद्वाक्यतात्पर्यम् । किन्तु 'अधीहि भगवो ब्रह्मेति' इति प्रश्नपूर्वकं 'यतो वा इमानि भूतानि जायन्ते' इत्यारभ्य 'तद्ब्रह्म' इत्युत्तररूपेण प्रवृत्तया तत्त्वपरया तैत्तिरीयश्रुत्या जगज्जन्मादिकारणत्वविशिष्टे निरतिशयबृहत्त्वाभिधानात् । कारणत्वस्य च 'एको ह वै नारायण आसीत्' इत्यनेन नारायणे पर्यवसानात्तस्यैव निरतिशयबृहत्त्वं निराबाधं सिध्यति--इति चेन्न ॥ जगज्जन्मकारणत्वस्थितिकारणत्वादीनामेकस्मिन् वस्तुनि विरुद्धतया समावेशायोगेन जन्मादिकारणत्वस्यैव बाधिततया तेन निरतिशयबृहत्त्वव्यवस्थापनस्यासिद्धमसिद्धेनेति न्यायेन दुर्घटत्वात् । तथा च वेदान्तानां स्वार्थे तात्पर्यासम्भवात् कर्मकर्तृस्तावकत्वस्यागत्या वाच्यत्वात् कर्मशेषभूतवाक्यविचारत्वात् ब्रह्मविचारः पृथङ् न कर्तव्यः--इति पूर्वपक्षे ; जन्मकारणत्वस्थितिकारणत्वादीनां कालभेदेनाविरुद्धतया अबाधितत्वेन जन्मादिकारणत्वेन निरतिशयबृहत्त्वोपपादनसम्भवात् कारणताविशिष्टे नारायण एव निरतिशयबृहत्त्वसिद्ध्या तद्विशिष्टस्य शास्त्रतात्पर्यविषयत्त्वोपपादकं **जन्मादिसूत्रम्** ॥

अत्र--**जन्म आदिर्येषामिति** विग्रहवाक्यात् यत्पदार्थजन्मस्थितिलयसमुदायप्रथमघटकतावज्जन्मेति बोधात् जन्मनिष्ठप्रथमघटकतानिरूपकसमुदायस्य समासवाक्याद्बोधेन तादृशसमुदायस्य कारणतासम्बन्धेन लक्षणत्वं लभ्यते । तादृशसमुदायनिरूपितप्रथमघटकत्वं च तादृशसमुदायघटकधर्मध्वंसासमानकालीनत्वे सति तादृशसमुदायघटकधर्मप्रागभावसमानकालीनत्वम् ॥ एवं च--**आदिपदेन** निरुक्तप्रथ-

सघटकत्वार्थकेन जन्मस्थित्यादीनां कालभेदस्य लाभादविरोधस्सूचित इति बोध्यम् ॥

ननु—उक्तरीत्या बृहत्त्वविशिष्टस्याबाधितत्वेऽपि न तत्र श्रुतेस्तात्पर्यं सम्भवति ; प्रमाणान्तरबाधित इव प्रमाणान्तरसिद्धेऽपि श्रुतेस्तात्पर्यायोगात्, निरतिशयबृहत्त्वस्य नित्यज्ञानचिकीर्षाकृतिमत्त्वातिरिक्तस्य दुर्वचत्वात् तादृशबृहत्त्वविशिष्टस्यानुमानसिद्धत्वात् । तथा हि—कार्यं विशेष्यतासम्बन्धावच्छिन्नकृतित्वावच्छिन्नकारणतानिरूपितसमवायसम्बन्धावच्छिन्नकार्यताशालि प्रागभावप्रतियोगित्वात् घटवत्—इत्यनुमानात् नित्यैकत्वेन कृतिसिद्धौ लाघवमिति लाघवज्ञानसहकृतात् नित्यैककृतिजन्यं कार्यमित्यनुमितिर्जायते । एवं ज्ञानचिकीर्षाघटितानुमानमपि बोध्यम् ॥ एवमुक्तानुमानेन नित्यज्ञानादिसिद्धौ तदाश्रयतया ईश्वरस्सिद्ध्यति इति पूर्वपक्षे ; ईश्वरस्यानुमानगम्यत्वनिरासपरं शास्त्रयोनित्वसूत्रम् ॥

अयं भावः--किमिदमनुमानमीश्वरानङ्गीकर्तारं चार्वाकं प्रति प्रयुज्यते, निरीश्वरसाङ्ख्यादीन् प्रति, औपनिषदेश्वराङ्गीकर्तृवेदान्तिनं प्रति वा? नाद्यः -- तन्मतेऽनुमानप्रामाण्यस्यैवानङ्गीकारात्, जन्यजनकभावमात्रस्यैव काकतालीयन्यायानुकारित्वस्य च तैरङ्गीकारेण समवायानङ्गीकारेण च तद्घटितसाध्याप्रसिद्धेः । न द्वितीयः—साङ्ख्यमतेऽपि समवायानङ्गीकारात्, प्रत्यक्षसामान्ये विषयस्य कारणतया योगिनामतीतानागतपदार्थविषयकसाक्षात्कारस्य सकलशास्त्रसिद्धत्वादस्यानुपपत्त्या घटत्वादिरूपाणामवस्थानामपि तन्मते नित्यत्वाङ्गीकारेण कृतिजन्यत्वस्य घटादावनङ्गीकारेण दृष्टान्ते साध्यवैकल्यात्, तन्मते कुलालादिकृतेर्घटाद्यभिव्यक्तावेव प्रयोजकत्वात् । न तृतीयः—वेदान्तिभिरवस्थाया उत्पत्त्यभ्युपगमेऽपि द्रव्यस्योत्पत्त्यनभ्युपगमेनावयविद्रव्यानभ्युपगमेन च समवायानभ्युपगमेन च समवायेन कार्यं प्र-

ति विशेष्यतया कृतेः कारणत्वमित्यस्यासम्भवात् साध्याप्रसिद्धेर्दुर्वारत्वात्; घटत्वाद्यवस्थायां प्रागभावप्रतियोगित्वसत्त्वेऽपि घटे तदभावेन साधनवैकल्याच्च ॥

न च—तादात्म्येन घटत्वावस्थाविशिष्टं प्रति विशेष्यतया कृतेः कारणत्वं वेदान्तिभिरपि स्वीकरणीयम्, अन्यथा कुलालो घटं करोतीति व्यवहारानुपपत्तिः; एवं च कार्यतायां समवायसम्बन्धावच्छिन्नत्वानिवेशेन न साध्याप्रसिद्धिः, नैयायिकाभिमतसमवायावच्छिन्नजन्यताया इव वेदान्तिमतसिद्धतादात्म्यसंबन्धावच्छिन्नजत्यताया अपि विशेष्यतासम्बन्धावच्छिन्नजनकतानिरूपितजन्यतात्वेन क्रोडीकारात्; एवं घटो भविष्यतीति व्यवहारानुरोधेन घटत्वावस्थाविशिष्टे प्रागभावप्रतियोगितापर्याप्तेः स्वीकारावश्यकत्वात् न साधनवैकल्यमिति—वाच्यम् ॥ कुलालादिकृत्या हि कुलालशरीरे चेष्टा जायते, तादृशचेष्टया कपालद्वयसंयोगहेतुभूतकपालक्रिया चक्रभ्रमणादिहेतुभूतदण्डक्रिया च जायते । एतावतैव कुलालादिकृतेर्घटादिप्रयोजकत्वमित्यस्य प्रामाणिकत्वेऽपि साक्षाद्घटं प्रति विशेष्यतया कुलालादिकृतेर्हेतुत्वमित्यस्याप्रामाणिकत्वेन कुलालकृत्या पटस्य कुविन्दकृत्या घटस्योत्पत्तिवारणाय विशेषकार्यकारणभावस्यावश्यकतया सामान्यकार्यकारणभावे मानाभावेन च साध्याप्रसिद्धेर्दुर्वारत्वात् ॥

न च—सामान्यकार्यकारणभावानङ्गीकारे गुणादिनिष्ठकार्यसामान्याभावे तत्तत्कृत्यभावकूटस्य प्रयोजकत्वं वक्तव्यमिति गौरवं; सामान्यहेतुतास्वीकारे च कृतित्वावच्छिन्नाभावस्यैकस्यैव प्रयोजकत्वं सम्भवतीति सामान्यहेतुत्वाभ्युपगम आवश्यक इति—वाच्यम् । समवायेन कार्यसामान्ये तादात्म्येन द्रव्यस्य हेतुतया गुणादिनिष्ठकार्यसामान्याभावे द्रव्यभेदस्यैकस्य प्रयोजकतयैवोपपत्तौ कृत्यभावकूटस्य प्रयोजकत्वासम्भवात् ॥

न च -कादाचित्के गगनादिनिष्ठे कार्यसामान्याभावे द्रव्यभेदस्य प्रयोजकत्वासम्भवात्[1] तत्तत्कृत्यभावकूटस्य[2] प्रयोजकत्वावश्यकत्वात् गौरवमिति वाच्यम् ॥ भवन्मते तत्र शब्दादिरूपकार्यानुरोधेन विशेष्यतया ईश्वरीयकृतेरावश्यकत्वेन तदभावघटितकूटस्य सामान्याभावस्य चासम्भवात्, ईश्वरीयकृतेर्नित्यत्वेन कालविशेषावच्छेदेन तदभावस्य वक्तुमशक्यत्वात् । वेदान्तिनां तु भगवत्सङ्कल्पस्यानित्यस्य सत्त्वेन विषयतया तदभावस्य कार्यसामान्याभावप्रयोजकतासम्भवाच्च कृतित्वेन कार्यत्वेन सामान्यकार्यकारणभावमभ्युपगम्य, कृतिसामान्याभावस्य कार्यसामान्याभावप्रयोजकत्वकल्पनापेक्षया तादृशप्रयोजकत्वमात्रकल्पनस्यैवोचितत्वेन तादृशसामान्यकार्यकारणभावकल्पनस्य गुरुत्वात् । यद्विशेषयोः कार्यकारणभावः, असति बाधके तत्सामान्याभावयोः[3] प्रयोज्यप्रयोजकभाव इत्येव नियमस्य युक्तत्वात् । न हि—कार्याभावकारणाभावयोरेव प्रयोज्यप्रयोजकभावनियमः ; विशिष्टाभावे विशेषणाभावादीनां प्रयोजकत्वाभावस्य, प्रतिबध्यतावच्छेदकविषयित्वाभावे प्रतिबन्धकतावच्छेदकविषयित्वादीनां प्रयोजकत्वाभावस्य च प्रसङ्गात् । तस्मादनुभवानुरोधात्कल्पनीयः प्रयोज्यप्रयोजकभावः सामान्यरूपेण कारणताविरहेऽपि सामान्याभावे सम्भवत्येव । विशेषाभावकूटातिरिक्तसामान्याभावादीनामप्रामाणिकत्वञ्चान्यत्र प्रपञ्चितम ॥

किञ्च—जीवेन सिद्धसाधनं दुर्वारं, लाघवज्ञानबलेनानुमिता नित्यैकत्वादिभानस्याप्रामाणिकत्वात् ; वह्निव्याप्यवत्तापरामर्शकाले महानसीयत्वेन तादृशवह्निसिद्धौ लाघवमिति लाघवज्ञानबलान्महानसीयवह्निमानित्यनुमितिस्वीकारे लाघवज्ञानं विनाऽपि महानसीयवह्निव्याप्यवत्ताज्ञानादपि तादृशानुमितेरावश्यकतया तादृशलाघवज्ञानमहान-

१. (पा) असम्भवेन. २. (पा) कूटस्यैव. ३. (पा) तत्सामान्ययोः.

सीयवह्निव्याप्यवत्ताज्ञानयोः परस्परजन्यतादृशानुमितौ व्यभिचारस्य दुर्वारत्वात् ॥

न च—वह्नेर्महानसीयत्वे लाघवमिति लाघवज्ञानजन्यतावच्छेदके विशेष्ये विशेषणमिति रीत्या विषयता निवेश्यते, पूर्वं विशेषणताव-च्छेदकप्रकारकज्ञानाभावेन तत्र विशिष्टस्य वैशिष्ट्यमिति रीत्या भानासम्भवात्, तादृशपरामर्शजन्यानुमितौ च विशिष्टवैशिष्ट्यविषयतेति न व्यभिचार इति—वाच्यम् ॥ महानसीयो वह्निर्लघुरित्यादिरूप-लाघवज्ञानस्य महानसीयवह्नीतरवह्न्यभाववानिति बाधज्ञानस्य च विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन तज्जन्यानुमितौ विशिष्टवैशिष्ट्यविषयताया दुर्वारतया व्यभिचारतादवस्थ्यात् ॥ * *

ननु—वह्नेर्महानसीयत्वे लाघवं महानसीयो वह्निर्लघुः इत्यादिविभिन्नाकारलाघवज्ञानानां, पर्वतो महानसीयवह्नीतरवह्न्यभाववान् तादृशवह्निमद्भिन्नस्तादृशवह्निः पर्वतावृत्तिः इत्यादिबाधज्ञानानां चाव्यवहितोत्तरत्वं निवेश्य महानसीयवह्न्यनुमितिहेतुत्वाङ्गीकारान्न व्यभिचारः। लाघवज्ञानस्य सामान्यपरामर्शकालीनस्य विशेषाकारानुमितिहेतुत्वं च पूर्वोत्तरतन्त्रसिद्धम् । **छागो वा मन्त्रवर्णा**दित्यस्मिन्नधिकरणे—पशुना यजेतेति वाक्यघटकं पशुपदं विशेषधर्मावच्छिन्नपरं, यागादिरूप-विशेषधर्मान्वितार्थपरत्वात्, द्रव्यं गन्धवदिति वाक्यघटकद्रव्यपदवत्—इत्यनुमानेन छागस्य वपाया इति वाक्ये छागस्योपस्थितत्वेन छागत्वा-वच्छिन्नपरत्वे उपस्थितिकृतलाघवमिति लाघवज्ञानानुरोधेन पशुपदं छागत्वावच्छिन्नपरमित्यनुमितेरङ्गीकारात्। उत्तरतन्त्रेऽपि **जन्माद्य**-धिकरणे—'सदेव सोम्येदमग्र आसीत्' इति कारणवाक्यघटकसत्पदं विशेषधर्मावच्छिन्नपरं, जगत्कारणत्वरूपविशेषधर्मान्वितार्थबोधकत्वात्, इत्यनुमानेन 'एको ह वै नारायण आसीत्' इति श्रुत्युपस्थितपरत्वे

---

१. (पा) निर्णयाभावेन.

लाघवमिति लाघवज्ञानसहकृतेन सत्पदं नारायणत्वावच्छिन्नपरमित्य-
नुमितेरङ्गीकारात् ॥

यद्यपि - **जन्माद्यधिकरणभाष्ये** उक्तानुमानपरत्वं सूत्रस्य नोक्तं.
तथापि **पाशुपताधिकरणे** 'एको ह वै नारायण आसीत्' इत्यारभ्य
'स एकाकी न रमेत' इति सृष्टिवाक्योदितं स्रष्टारं नारायणमेव 'सदेव
सोम्येदमग्र आसीत्' इत्यादिषु साधारणास्सदादिशब्दा प्रतिपादय
न्तीति 'जन्माद्यस्य यत' इत्यत्र प्रतिपादितमिति **श्रीभाष्ये** उक्तत्वात्
तादृशानुमानस्य सूत्राभिप्रेतत्वमावश्यकम् । **प्रतिपादितमिति**
प्रतीकमुपादाय **टीका** -

"'यतो वा इमानि' इति वाक्ये अस्यार्थस्याभिप्रेतत्वात् सूत्रका-
रेणापि तथाभिप्रेतमित्यर्थ । जन्मादिसूत्रभाष्येण परस्मात्पुंस
इत्यन्तेनायमर्थस्सूचित" इति ॥

न चैवं 'आकाशादेव समुत्पद्यन्ते' इत्यादिवाक्येषु आकाशा
देरप्युपस्थितत्वाल्लाघवस्य तुल्यत्वात् आकाशत्वावच्छिन्नपरं नाराय
णत्वावच्छिन्नपरं वेति संशयाकारानुमितिस्स्यात इति वाच्यम् ।
आकाशाद्यधिकरणेषु आकाशादिपदानामपि परमात्मपरत्वस्थापने
नाकाशत्वावच्छिन्ने उपस्थितिलाघवाभावात् ;एवं **समवायाभ्युपगमाच्च
साम्यादनवस्थिते**रिति सूत्रे विशिष्टबुद्धिविशेषणविशेष्यसम्बन्धवि
षया. विशिष्टबुद्धित्वात. दण्डीति विशिष्टबुद्धिवत इति नैयायिकाभिम
तानुमाने स्वरूपसम्बन्धविषयकत्वे लाघवमिति लाघवज्ञानानुरोधेन स्व
रूपसम्बन्धविषयकत्वमादाय सिद्धसाधनस्याभिप्रेतत्वात । **भावेचोप-
लब्धे**रिति सूत्रे घटइत्यादिबुद्धिस्तादृशव्यवहारश्च तन्मृदित्यादिबुद्धि-
विषयभिन्नविषया तादृशव्यवहारविषयभिन्नविषय . तद्बुद्धिविलक्षण-
बुद्धित्वात् तद्व्यवहारविलक्षणव्यवहारत्वाद्वा, कुड्यादिव्यवहारवत्-

१ (पा) सदस्मादि.

इत्याद्यवयवावयविभेदसाधकनैयायिकानुमानेऽवस्थाभेदस्योभयवादिसिद्धतया तद्विषयकत्वे लाघवमिति लाघवज्ञानानुरोधेनावस्थाभेदमादाय सिद्धसाधनस्याभिप्रेतत्वाच्च लाघवज्ञानहेतुत्वं सूत्रकारानुमतम् ॥

किञ्च—'त्रयो धर्मस्कन्धाः' इत्यत्राश्रमाणां विधिकल्पनार्थं प्रवृत्ते **विधिर्वाधारणव**दितिसूत्रे—त्रयो धर्मस्कन्धा इति प्रतिपाद्यमाना आश्रमा विधिविषयाः, इष्टसाधनतया श्रुतिबोधितत्वात्, ज्योतिष्टोमादिवत् ; न चासिद्धिः, 'सर्व एते पुण्यलोका भवन्ति' 'ब्रह्मसंस्थोऽमृतत्वमेति' इत्युत्तरवाक्ये ब्रह्मज्ञानवैधुर्ये पुण्यलोकावाप्तिहेतुतायाः सतिब्रह्मज्ञाने मोक्षहेतुतायाश्च बोधनादिति—**बादरायणा**भिमतानुमाने छान्दोग्य एव विधिवाक्यं कल्पयित्वा, तद्विषयत्वकल्पनापेक्षया 'ब्रह्मचर्यं समाप्य गृही भवेत्, गृहाद्वनी भूत्वा प्रव्रजेत् ।' इति जाबालश्रुतिसिद्धविधिविषयत्वकल्पने लाघवमिति लाघवज्ञानानुरोधेन सिद्धसाधनमभिप्रेत्य सूत्रस्य कृत्वाचिन्तापरतायाः **श्रीभाष्यकारै**रुक्तत्वात् तद्धेतुत्वं तेषामप्यभिमतं। 'द्यां मूर्धानम्' इति स्मृतिवचनं स्वसमानविषयकश्रुतिमूलं, स्मृतित्वात्—इत्यनुमानेन वैश्वानरविद्यायाः परमात्मविषयत्वं सिद्ध्यतीति **स्मर्यमाणमनुमानं स्यादिति** इति सूत्रस्य पराभिमतयोजनायां परमात्मपरत्वेन सन्दिग्धाया वैश्वानरविद्यायाः परमात्मपरत्व-स्मृतिमूलत्वोभयकल्पनापेक्षया परमात्मपरत्वेन प्रसिद्धायाः "अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ' इति श्रुतेः स्मृतिमूलत्वमात्रकल्पने लाघवमिति लाघवानुरोधेन सिद्धसाधनोद्भावनस्य श्रुतप्रकाशिकासिद्धत्वेन **व्यासाचार्याणामपि** तद्धेतुत्वमिष्टम्। अपि च—प्रत्यक्षसिद्धार्थस्यापलापाभावः, अनुमानस्य लाघवानुरोधित्वं, प्रमाणाविरुद्धे शास्त्रसिद्धार्थे नास्तिकत्वाभावः—इत्येतत्त्रयं हि **नाथमुनिप्रभृत्याचार्य**सम्प्रदायसिद्धम् ।

---

१. (पा) साधकनैयायिकानुमानैः.

उक्तञ्च तत्त्वमुक्ताकलापे —

"दृष्टेऽपह्नुत्यभावादनुमितिविषये लाघवस्यानरोधात्

शास्त्रेणैवावसेये विहतिविरहिते नास्तिकत्वप्रहाणात् ।

नाथोपज्ञं प्रवृत्तं बहुभिरुपचितं यामुनेयप्रबन्धैः

त्रातं सम्यग्यतीन्द्रैरिदमखिलतमःकर्शनं दर्शनं नः ॥" इति ।

अधिकरणसारावल्यामपि —

"दृष्टं नापह्नुवीरन् लघुमनुमिनुयुः शेषमिच्छन्ति शास्त्रात् ।"

इत्युक्तं । तस्माल्लाघवज्ञानहेतुत्वस्य निराबाधत्वात् नित्यैककृत्यनुमित्या तदाश्रयत्वस्य जीवेऽसम्भवान्न सिद्धसाधनावकाशः इति चेत् ॥*

मैवम् ॥ सिद्धान्ते जीवीयधर्मभूतज्ञानस्य नित्यैकत्वयोरङ्गीकारेण सिद्धसाधनस्य दुर्वारत्वात् ; घटज्ञानमुत्पन्नं, पटज्ञानमुत्पन्नं, घटज्ञानं नष्टं, पटज्ञानं नष्टमित्यादिप्रतीतीनामवस्थागतोत्पत्तितद्गतभेदविषयकत्वोपगमात्, जीवज्ञाने स्वाधिकरणावृत्तिस्वभिन्नज्ञानकत्वरूपस्य आत्मानात्मोभयावृत्ति दुःखवदवृत्तिद्वित्वासमानाधिकरणत्वरूपस्य चैकत्वस्य सिद्धान्तेऽक्षतत्वात् ॥

न च—कार्यसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वमेव कृतावेकत्वं, यत्र समवायेन कार्यं तत्र विशेष्यतासम्बन्धेन कृतिमत्त्वात् ; भिन्नाभिन्नकार्याणां भिन्नभिन्नजीवकृतिजन्यत्वे चालिनीन्यायेन तत्तत्कृतिमद्भेदस्य कार्याधिकरणे सत्त्वेनोक्तभेदप्रतियोगितानवच्छेदकत्वासम्भवात् निरुक्तैकत्वस्यैवानुमितिविषयत्वान्न सिद्धसाधनम्—इति वाच्यम् । निरुक्तभेदप्रतियोगितानवच्छेदकत्वविशिष्टकृतिजन्यत्वस्य साध्यत्वे साध्याप्रसिद्धेः ॥

न च—स्वसमानाधिकरणभेदप्रतियोगितानवच्छेदककृतिजन्यत्वस्य साध्यत्वान्न साध्याप्रसिद्धिः, कुलालसमवेतैककृतिजन्यायामेकघटव्यक्तौ

१. (पा) अनुरागात्. २. (पा) समवेतैककृति

साध्यप्रसिद्धिसम्भवात्तस्या एव स्वपदेनोपादानेन दृष्टान्ततासम्भवाच्चेति--वाच्यम् । कुलालस्य हस्तद्वये कपालद्वयसंयोगानुकूलयोश्चेष्टयोरुत्पत्त्या एकहस्तगतचेष्टाया अन्यहस्त उत्पत्तिवारणाय समवायेन तत्तच्चेष्टां प्रति अवच्छेदकतासम्बन्धेन तत्तत्कृतेर्हेतुत्वस्यावश्यकत्वात् तत्तद्धस्तचेष्टाजन्यक्रियावतोः कपालयोस्तत्तद्धस्तावच्छिन्नकृत्योरेव विशेष्यतया सत्त्वेनैककृतेस्तेन सम्बन्धेन द्वयोरभावात् साध्याप्रसिद्धेर्दुर्वारत्वात् ॥

न च--समवायसम्बन्धेन विजातीयचेष्टां प्रति स्वीयविजातीयेनचेष्टावृत्तिसाध्यत्वाख्यविषयतानिरूपितसिद्धत्वाख्यविषयतासम्बन्धेन कृतिर्हेतुरित्येककृतिस्वीकारेऽपि नानुपपत्तिः, एकस्या एव कृतेर्विजातीयैतद्धस्तचेष्टावृत्तिसाध्यत्वाख्यविषयतानिरूपितसिद्धत्वाख्यविषयतासम्बन्धेन हस्तान्तरे सद्भावात् ; एवं चैकघटव्यक्तौ साध्यप्रसिद्धिस्सम्भवतीति वाच्यम् । यदा चैत्रहस्ते विजातीयचेष्टासाधिका मैत्रस्य कृतिरुत्पन्ना तद्दशायां चैत्रस्य स्वहस्ते विजातीयचेष्टादर्शनेन तत्पुरुषीयत्वं निवेश्य कार्यकारणभावस्य कल्पनीयतया गौरवात्, नानाकृतिस्वीकारे त्ववच्छेदकतासम्बन्धेन मैत्रकृतेश्चैत्रहस्तेऽभावादेवोत्पत्तिवारणात् । तथा च निरुक्तैककृतिजन्यत्वस्य साध्यत्वे साध्याप्रसिद्धिः ॥

न च--एककर्तृजन्यत्वस्य साध्यत्वान्नाप्रसिद्धिरिति--वाच्यम् । यत्र समवायेन घटादिकं तत्र स्वीयकृतिविशेष्यतासम्बन्धेन कर्तेति व्याप्तिमङ्गीकृत्य स्वसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वेन कर्तुर्निवेशः, कार्यसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वेन वा ? आद्ये--अनेककर्तृकरथगोपुरादौ व्यभिचारः ; द्वितीये--साध्याप्रसिद्धिः, दृष्टान्ते साध्यवैकल्यं च, कार्यसमानाधिकरणभेदप्रतियोगितानवच्छे-

१. (पा) हस्तजन्यचेष्टावतोः.

दकस्य कर्तुरप्रसिद्धेः। उक्तञ्च **श्रीभाष्ये** ईश्वरानुमानदूषणोपसंहारे -

> "अतो बुद्धिमदेककर्तृकत्वे साध्ये कार्यत्वस्यानैकान्त्यं; पक्षस्याप्रसिद्धविशेषणत्वं, साध्यविकलता च दृष्टान्तस्य, सर्वनिर्माणचतुरस्यैकस्याप्रसिद्धेः" इति ॥

अप्रसिद्धविशेषणत्वं साध्याप्रसिद्धिः। अत्र **सर्वनिर्माणचतुरस्ये**-त्यनेन कार्यसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वं विवक्षितम् ॥

अत्र **टीका** -

> "फलितं दूषणं दर्शयति। **अत** इति किं सामान्यतो बुद्धिमदेककर्तृकत्वं साध्यं, उत सर्वज्ञसर्वशक्त्येककर्तृकत्वं साध्यम्? इति विकल्पमभिप्रेत्य प्रथमकल्पेऽनैकान्त्यं, अनेककर्तृकरथगोपुरादिषु कार्यत्वस्य विद्यमानत्वादिति भावः। सर्वज्ञसर्वशक्त्येककर्तृकत्वपक्षे दूषणमाह **पक्षस्ये**त्यादिना।"

अयमर्थः। सामान्यतो बुद्धिमदेककर्तृकत्वं स्वसमानाधिकरणभेदप्रतियोगितानवच्छेदककर्तृजन्यत्वं, सर्वज्ञसर्वशक्त्येककर्तृकत्वं - कार्यसमानाधिकरणभेदप्रतियोगितानवच्छेदककर्तृजन्यत्वं ॥ तत्र - सर्वशक्तिमत्पदं च सर्वविषयककृतिमत्परतया स्वीयकृतिविशेष्यत्वसम्बन्धेन कार्यव्यापकत्वस्य कर्तरि लाभादिति पूर्वोक्तार्थ एव पर्यवसानमिति **श्रीभाष्ये**ऽनैकान्त्यशब्देन सन्दिग्धव्यभिचारो विवक्षितः। तेन रथगोपुरादिष्वपि भगवत एकस्य कर्तुरस्मिसाधयिषितत्वया निश्चितव्यभिचारासम्भवेऽपि न क्षतिः। एवं **साध्यवैकल्य**शब्देनापि कार्यसमानाधिकरणभेदप्रतियोगितानवच्छेदककर्तृजन्यत्वमेव विवक्षितम्; साध्यवैकल्यशब्दस्य साध्यप्रकारकज्ञानप्रतिबन्धकज्ञानविषयार्थकत्वात्। तेन साध्यस्याप्रसिद्धत्वेन दृष्टान्तगतसाध्याभावरूपस्य साध्यवैकल्यस्य सुतरामप्रसिद्धत्वेऽपि न क्षतिः - इति बोध्यम् ॥

न च—कार्यसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वविशिष्टकर्तृजन्यत्वस्य साध्यत्वं नोपेयते, किन्तु केवलकर्तृजन्यत्वमेव साध्यं, लाघवज्ञानबलाच्चोक्तभेदप्रतियोगितानवच्छेदकत्वस्य कर्तरि भानान्न सिद्धसाधनं न वा साध्याप्रसिद्ध्यादिकमिति—वाच्यम् । निरुक्तैककर्तृजन्यत्वानुमित्यङ्गीकारे जीवातिरिक्तेश्वरस्य कल्पनीयतया गौरवेणानेककर्तृजन्यत्व एव लाघवेन तथा सिद्धिमादाय सिद्धसाधनस्य दुर्वारत्वात्, भवदीयलाघवज्ञानस्य भ्रमत्वेन विषयाबाधकत्वात् ।

उक्तञ्च **श्रीभाष्ये**—

"उभयसिद्धानां जीवानामेव लाघवेन
कर्तृत्वाभ्युपगमो युक्तः" इति ।

तत्र टीका—"कार्यत्वहेतोर्लाघवतर्कमुखेन सिद्धसाध्यतामाह—**किञ्चेति** । **उभयवादिसिद्धानामिति** लाघवस्य हेतुरुक्तः, 'कॢप्तकल्प्यविरोधे तु युक्तः कॢप्तपरिग्रहः' इत्याहुः" इति ।

न च—प्रवृत्त्यात्मककृतावुपादानसाक्षात्कारस्य कारणतया जीवानां जगदारम्भप्रवृत्तिर्न सम्भवति, तदुपादानपरमाण्वादिसाक्षात्कारासम्भवादिति—वाच्यम् । उपादानसाक्षात्कारस्य प्रवृत्तिसामान्ये हेतुत्वे मृदङ्गादौ शब्दसाध्यकप्रवृत्त्यनुपपत्तेः, भवन्मते शब्दोपादानस्य गगनस्यातीन्द्रियत्वात्; एवं ध्वंससाध्यकप्रवृत्त्यनुपपत्तेश्च, तदुपादानाप्रसिद्धेः; अत उपादानप्रत्यक्षस्य तदुत्तरप्रवृत्तावेव हेतुत्वात् भवदभिमतत्र्यणुकातिरिक्तपरमाणोरप्रामाणिकतया जीवानां तत्साक्षात्कारसम्भवाच्च ॥ तथा च—उक्तरीत्या भगवतोऽनुमानगम्यत्वाभावात्तत्र शास्त्रतात्पर्यसम्भवेन ब्रह्मविचारः कर्तव्य इत्येवं परं **शास्त्रयोनित्वादिति सूत्रम्** ॥

१. (पा) जन्यानुमित्यङ्गीकारे.

यद्यपि—तत्सूत्रेऽनुमानदूषणं न कण्ठोक्तम् । **तथा च** पाशुपताधिकरणस्थेन—**अधिष्ठानानुपपत्तेश्च, करणवच्चेन्न भोगादिभ्यः, अन्तवत्त्वमसर्वज्ञता वा**—इति सूत्रत्रयेणानुमानदूषणस्य वक्ष्यमाणत्वादत्र कण्ठोक्त्यभावः । तदुक्तं पाशुपताधिकरणटीकायां—

"वक्ष्यमाणदूषणानामुपजीव्यत्वमभिप्रेत्य शास्त्रैकप्रमाणकत्वं सूत्रितं, न तु दूषणानां कण्ठोक्तिः । भाष्ये च वक्ष्यमाणदूषणमाकृष्य व्याख्यानम्" इति ।

अधिष्ठानानुपपत्तेरित्यादिसूत्रत्रयस्यायमर्थः । **अधिष्ठानानुपपत्तेः** जगदुत्पत्तिहेतुभूतोपादानविषयककृतिमत्त्वानुपपत्तेः, भगवतोऽशरीरत्वात् । समवायेन घटादिकार्यं प्रति विशेष्यतासम्बन्धेन कृतेः कारणत्वं न सम्भवति, हस्तचेष्टायास्तदधीनकपालक्रियायाश्चानुत्पत्तौ घटाद्युत्पत्त्यदर्शनात्, किन्तु स्वजन्यचेष्टाजन्यक्रियावत्त्वसम्बन्धेन हेतुत्वरूपं तादृशक्रियाद्वारकमेव हेतुत्वं वाच्यम् । एवं चोक्तक्रियावत्त्वसम्बन्धावच्छिन्नजनकतानिरूपितजन्यतास्य साध्यत्वे बाधः, भवन्मते भगवतश्शरीराभावेनोक्तसम्बन्धघटितजनकत्वासम्भवादिति भावः ॥

ननु—उक्तसम्बन्धावच्छिन्नजनकताघटितं साध्यं नोपेयते येन बाधस्स्यात्, किन्तु समवायेन शरीरगतचेष्टां प्रत्यवच्छेदकतासम्बन्धेन कृतेर्हेतुत्वदर्शनात् अवच्छेदकतासम्बन्धावच्छिन्नकृतिनिष्ठजनकतानिरूपितजन्यत्वमेव साध्यमङ्गीक्रियते ; एवं च परमाण्वादीनामेव भगवच्छरीरत्वाङ्गीकारात् तत्रावच्छेदकतासम्बन्धेन कृतिमत्त्वात् समवायेन द्व्यणुकादिकार्योत्पत्तिः ; उक्तसाध्ये च कुलालादिचेष्टैव दृष्टान्तः—इति चेत् ॥ **तत्रोत्तरं** । **'करणवच्चेन्न भोगादिभ्यः'** । करणकलेबरादौ यथाऽवच्छेदकतासम्बन्धेन कृतेस्समवायेन कार्यजनकत्वं तद्वज्जगज्जनकत्वं भगवत्कृतेरिति चेन्न, तथा सति भगवतस्सुखदुःखादिभोगतद्धेतुभूतपुण्यपापादिमत्त्वप्रसङ्ग इत्यर्थः । भवन्मते विभोः कुलालाद्यात्मनः

कृतेश्शरीरेऽवच्छेदकतासम्बन्धेनोत्पत्तिवत् तेन सम्बन्धेन घटादावु-त्पत्तिवारणायावच्छेदकतासम्बन्धेन तदीयकृतिं प्रति तादात्म्येन तदीयभोगावच्छेदकस्य कारणत्वमङ्गीकार्यम् । एवं च तादात्म्येन घटादौ तदीयभोगावच्छेदकत्वाभावान्न तत्रावच्छेदकतासम्बन्धेन तदीयकृत्यापत्तिः ॥

न च—घटादिषु भोगोऽप्यवच्छेदकतासम्बन्धेनापाद्यते--इति वाच्यम्। तत्र तदीयादृष्टाधीनत्वस्य नियामकत्वादिति भवद्भिरङ्गीकार्यम् । तथा च परमाण्वादेर्भगवत्कृत्यवच्छेदकत्वे भगवद्भोगावच्छेदकत्वाददृष्टाधीनत्वानां स्वीकार्यतया भगवतो भोगतत्प्रयोजकपुण्यपापादिप्रसङ्गो दुर्वार इति भावः ॥ उक्तं च **करणवच्चेदिति सूत्रे** टीकायां—

> "किं शरीरत्वेन जगदधितिष्ठति, उत तद्व्यतिरिक्तत्वेन ? शरीरत्वेन चेद्भोगादिप्रसङ्गः ; नोचेत् शरीरान्तरसापेक्षत्वं स्यादित्यर्थः । शरीरनिरपेक्षाधिष्ठानं शरीरे दृष्टमिति चेन्न, शरीरत्वप्रयुक्तं तदित्युक्तं भवति॥" इति ।

शरीरत्वेन जगदधितिष्ठति--समवायेन जगदुत्पत्तिं प्रति अवच्छेदकतासम्बन्धेन हेतुभूता या कृतिस्तदाश्रय इत्यर्थः । तद्व्यतिरिक्तत्वेन—स्वजन्यचेष्टाजन्यक्रियावत्त्वसम्बन्धेन हेतुभूता या कृतिस्तदाश्रय इत्यर्थः ॥

ननु—भगवति भोगादृष्टयोरस्वीकारेऽपि नानुपपत्तिः, सुखभोगपुण्ययोरेव स्वीकारेण दुःखभोगपापयोरभावेन जीववैलक्षण्योपपत्तेः जगत्कर्तृत्व-सर्वज्ञत्वयोस्सत्त्वेनेश्वरत्वाविघातात्--**इति चेत्** । **अत्रोत्तरम्** **'अन्तवत्त्वमसर्वज्ञता वा'** इति । **वाशब्दश्चार्थे**; ईश्वरस्य पुण्यवत्त्वे जीववदन्तवत्त्वं—सृष्टिसंहारकर्मत्वं, असर्वज्ञत्वं च स्यात् । तथा च सृष्टिसंहारकर्मत्वापत्त्या तत्कर्तृत्वं सर्वज्ञत्वं च न सम्भवतीति तस्येश्वरत्वमेवानुपपन्नमित्यर्थः ॥

ननु–अन्तवत्त्वमसर्वज्ञतावेति सूत्रस्य वैयर्थ्यं, करणवदिति पूर्वसूत्रेणैव जीवत्वापादनात्. पुनरपि जीवत्वापादने प्रयोजनाभावात् ; अतश्शङ्कराद्यभिमतयोजनैव युक्ता ; तैरेवं तत्सूत्रार्थ उक्तः–

"प्रधानपुरुषेश्वरास्सर्वज्ञेनेश्वरेणेयत्तया परिच्छिन्नाश्चेदन्तवन्तस्स्युः, ततश्च शून्यवादप्रसङ्गः ; सर्वेषां संसारिणां क्रमेण मोक्षादन्तवत्त्वे पुरुषभोगार्थं प्रधानस्येश्वराधिष्ठेयत्वाभावादीश्वरस्य सार्वज्ञ्यमैश्वर्यं च निर्विषयतयाऽनुपपन्ने स्याताम्। यदि नेश्वरज्ञानेन प्रधानादयः परिच्छिन्नास्तदा तस्य सार्वज्ञ्यहानिरिति । एवं च विकल्पार्थकवाकारस्यापि स्वारस्यम्" इति ॥

अत्रोच्यते–जीवत्वावच्छिन्नसामान्यं कालविशेषावच्छेदेन सृष्ट्यादिकर्मत्वाभाववत्, क्रमेण सृष्ट्यादिकर्मत्वाभाववदेकैकजीवघटितत्वे सति सङ्ख्यावत्त्वात्, यद्धर्मावच्छिन्नक्रियासामान्ये क्रमेण यादृशक्रियाकर्मत्वाभाववदेकैकघटितत्वे सति सङ्ख्यावत्त्वं तद्धर्मावच्छिन्नसामान्ये कालविशेषावच्छेदेन तादृशक्रियाकर्मत्वाभाव इति सामान्यव्याप्तौ क्रमेण बोधनक्रियाकर्मत्वाभाववदेकैकशिष्यघटितं दशत्वादिसङ्ख्याश्रयीभूतं कालविशेषावच्छेदेन बोधनक्रियाकर्मत्वाभाववत्, चैत्रशिष्यसामान्यं दृष्टान्तः–इत्यनुमानेन सर्वमुक्तिसमर्थनमन्तवत्त्वमिति सूत्रखण्डार्थः–इति **भवतामभिमतम्** ॥ **तदयुक्तम्** । मोक्षदशायां जीवत्वावच्छिन्नस्यैव भवतामभावेनाश्रयासिद्धेः, मुक्तौ कालानभ्युपगमेन साध्याप्रसिद्धेश्च ॥

न च–द्वैतवादिमतसिद्धव्याप्तिमभ्युपगम्य द्वैतमते सर्वमोक्षापादनान्न दोषः, अत एव सङ्ख्यावत्त्वनिवेशनमपि हेतुकोटौ सार्थकं, अन्यथोत्पादनक्रियाकर्मत्वाभाववदेकैकक्षणादिघटितेषु कालगतक्षणादिरूपविकारसमुदायेषु सततविकारलक्षणप्रकृतिगतविकारे च कदाचिदुत्पादनक्रियाकर्मत्वाभावविरहेण व्यभिचारात्–इतिवाच्यम् ॥ तथा

सति द्वैतवादिमते जीवानां सङ्ख्यादिविरहेणासिद्धेर्दुर्वारत्वात् ;

"अतीतानागताश्चैव यावन्तस्सहिताः क्षणाः ।
ततोऽप्यनन्तगुणिता जीवानां राशयः पृथक् ॥"

इत्यादिस्मृत्या जीवानां सङ्ख्याशून्यत्वबोधनात् ।

"जलजा नव लक्षन्तु स्थावरा लक्षविंशतिः ।
क्रिमिकीटा रुद्रसङ्ख्याः पक्षिणो दशलक्षकं ॥
त्रिंशल्लक्षं तु पश्वादिश्चतुर्लक्षं तु मानुषाः ।"

इति वचनं तु तत्तज्जातिसङ्ख्यापरम्, न तु जीवव्यक्तिसङ्ख्यापरमिति न विरोधः । तदिदमभिप्रेत्योक्त**मारम्भणाधिकरणश्रीभाष्ये**—

"यत्तु भेदपक्षेऽप्यतीतकल्पानामानन्त्यात् सर्वेषामात्मनां मुक्तत्वे बन्धासम्भवाद्बद्धमुक्तव्यवस्था न सम्भवतीति--तदात्माऽनन्त्येन परिहृतं" इति ।

आत्माऽनन्त्येन--आत्मसु सङ्ख्याविरहेणेत्यर्थः ॥

न च--सिद्धान्ते अपेक्षाबुद्धिविशेषविषयत्वातिरिक्तसङ्ख्याविरहादात्मसु सङ्ख्याशून्यत्वं न सम्भवति. अस्माकं जीवेषु प्रत्येकमेकत्वप्रकारकबुद्धिरूपापेक्षाबुद्धिविरहेऽपि भगवतस्तादृशबुद्ध्यावश्यकत्वात्; अन्यथा सर्वज्ञत्वानुपपत्तेरिति वाच्यम् । अतिरिक्तसङ्ख्यावादिपक्षेऽपि भगवदपेक्षाबुद्ध्या जीवेषु सङ्ख्योत्पत्तेरावश्यकतया सङ्ख्याशून्यत्वानुपपत्तितादवस्थ्यात् ॥

यदि च--द्वित्वादिसङ्ख्योत्पत्तौ अनेकविशेष्यकैकत्वप्रकारकज्ञानत्वेन न कारणत्वं, तथासत्यपेक्षाबुद्धिरूपकारणस्यैकजातीयत्वेन-इह द्वित्वमेवोत्पद्यते न त्रित्वमिति--व्यवस्थाया अनुपपत्तेः ॥ न च--द्वित्वाद्युत्पत्तावपेक्षाबुद्धिर्निमित्तं प्रत्येकगतैकत्वमसमवायिकारणमिति द्वाभ्यामेकत्वाभ्यां द्वित्वं जायते त्रिभिरेकत्वैस्त्रित्वमित्य-

१. (पा) लक्ष. २. (पा) लक्षकाः.

समवायिकारणविशेषाद्व्यवस्थोपपत्तिरिति वाच्यम् । एकत्वसङ्ख्याया द्वित्वत्रित्वाद्याश्रयाश्रयत्वाभावात् ॥ न च द्वयोर्द्रव्ययोर्द्वित्वमुत्पद्यते त्रिषु त्रित्वमिति समवायिकारणविशेषाद्व्यवस्थोपपत्तिरिति वाच्यम । द्वित्वत्रित्वोत्पत्तेः पूर्वं द्वयोस्त्रिष्विति व्यवहारविषयस्याप्यभावात् । अतो द्वित्वत्रित्वादिहेतुभूतापेक्षाबुद्धिषु वैजात्यं कल्पयित्वा विजातीयबुद्धित्वेन द्वित्वत्रित्वादिकं प्रति कारणत्वं कल्पनीयम् । एवं चोक्तभगवदपेक्षाबुद्धौ तादृशवैजात्याकल्पनान्न जीवेषु सङ्ख्योत्पत्तिरिति अतिरिक्तसङ्ख्यावादिमते जीवानां सङ्ख्याशून्यत्वमुपपन्नम् इति **विभाव्यते** ॥ **तदा**ऽस्माकमपि नानुपपत्तिः । त्वन्मते सङ्ख्योत्पादकत्वेनाभिमतबुद्धीनामेव सिद्धान्ते सङ्ख्याव्यवहारविषयत्वाङ्गीकाराज्जीवविशेष्यकभगवद्बुद्धेः सङ्ख्यारूपत्वाभावाज्जातिविशेषरूपस्य वैजात्यस्य सिद्धान्ते अनभ्युपगमेऽपि शक्तिविशेषविशिष्टबुद्धिविषयत्वानामेव द्वित्वादिव्यवहारविषयत्वस्वीकारे विरोधाभावात्. तादृशबुद्धेः स्वप्रकाशतया ज्ञानान्तरमनपेक्ष्यैव द्वित्वादिव्यवहारहेतुत्वस्य बुद्धिरूपत्वादेवैकपुरुषीयद्वित्वस्य पुरुषान्तरीयज्ञानाविषयत्वस्य चोपपत्तेः । तथा च-सङ्ख्यावत्त्वघटनहेतुर्जीवेष्वसिद्धः । अतो जीवेषु सङ्ख्याविरहादेव तज्ज्ञानाभावे भगवतो न सार्वज्ञ्यहानिः. विद्यमानसर्वविषयकज्ञानस्यैव सार्वज्ञ्यरूपत्वात् । एवं सर्वमोक्षाभ्युपगमे तदनन्तरमीश्वरसार्वज्ञ्यमैश्वर्यं च निर्विषयं स्यादित्यनुपपन्नम् । प्रधानस्य सततविकारलक्षणस्य नित्यानां मुक्तानां नित्यविभूतिगतानन्तपदार्थानां च सर्वमुक्तिदशायामपि सत्त्वेन सार्वज्ञ्यस्य सर्वनियमनरूपसर्वैश्वर्यस्य चोपपत्तेः । तस्मात्पराभिमतयोजनाया अयुक्तत्वादस्मदुक्तयोजनैव युक्तेत्यलं प्रासङ्गिकेन ॥

इत्थं च— ईश्वरस्यानुमानगम्यत्वासम्भवाद्वेदान्तानां तत्र तात्पर्यसम्भवात् तद्विचारोपपत्तिरिति ॥

शास्त्रयोनित्वसूत्रार्थश्च । **शास्त्रं**—वेदाख्यं, यस्य, **योनिः**—कारणं प्रमाणं, तच्छास्त्रयोनि, तस्य भावः शास्त्रयोनित्वं; तस्माद्ब्रह्मजिज्ञासा कर्तव्येत्यन्वयः ॥ अत्र योनिशब्दस्योपादानवाचकत्वेन **योनिश्च हि गीयते** इति सूत्रे निश्चितस्यापि ज्ञापकहेतौ लक्षणा। तच्च ज्ञापकत्वं न लिङ्गविधया, किन्तु शक्त्यैव । तथा च ब्रह्मप्रमाजनकत्वं पर्यवस्यति । ब्रह्मप्रमाजनकत्वं च प्रमाणान्तरजन्यतानवच्छेदकब्रह्मप्रमात्वावच्छिन्नजनकतावत्त्वमेव, शास्त्रप्रामाण्यस्याप्राप्तार्थघटितत्वात् । तथा च ब्रह्मप्रमात्वस्य प्रमाणान्तरजन्यतानवच्छेदकत्वे सति श्रुतिरूपशास्त्रजन्यतावच्छेदकत्वसिद्ध्या ब्रह्मणः प्रमाणान्तराधीनप्रमाविषयत्वव्यावृत्त्याऽनुमानाधीनसिद्धिकत्वाधीनशास्त्रतात्पर्याभावज्ञानरूपशास्त्रप्रवृत्तिप्रतिबन्धकज्ञाननिरासकत्वमुक्तसूत्रस्योपपन्नम् ॥

महाचार्यास्तु—

"**शास्त्रं, योनिः**—कारणं, यस्येति बहुव्रीहिः; जिज्ञासासूत्रे ब्रह्मज्ञाननिर्देशाज्जानातेर्विचारात्मकज्ञानविशेषपर्यवसानेऽपि तस्य प्रमितिरूपज्ञानवाचकत्वस्याप्यक्षतत्वात् । अत्र धर्मिनिर्देशकपदाकांक्षायां बुद्धिस्थस्य ब्रह्मज्ञानपदस्यैव सुखेनाध्याहारो भविष्यतीत्यभिप्रेत्य सूत्रलाघवार्थमिह धर्मिनिर्देशो न कृतः। एतदर्थमेव विचारपदे प्रयोक्तव्येऽपि जानातेः प्रयोगः। एवं च--भाष्यादौ 'योनिः—कारणं, प्रमाणम्'—इति निर्देशः सिद्धार्थकथनपरः" **इत्याहुः** ॥ * *

अत्र मीमांसकाः—

'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं' 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिस्वरूपोपदेशपरवेदान्तवाक्यानि स्वप्रतिपाद्यार्थविषयकप्रमाजनकत्वाभाववन्ति, प्रवृत्तिनिवृत्त्यन्यतरविषयाविषयकत्वाभावात्, कर्मकाण्डगतार्थवादवाक्यवत्—इत्यनुमानेन वेदान्तानां ब्रह्मप्रमाजनकत्वा-

भावे सिद्धे तादृशप्रमारूपेष्टसाधनत्वाभावात्तत्र प्रेक्षावतां प्रवृत्तिर्न सम्भवति, अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात् उपासनपरवाक्येषु भागासिद्धिवारणाय स्वरूपोपदेशपरेति पक्षविशेषणम् ॥

अथ—प्रमाजनकत्वव्यापकं प्रवृत्तिनिवृत्त्यन्यतरसमानविषयकत्वमिति व्यापकाभावाद्व्याप्याभावसिद्धिरित्युच्यते ? किं वा प्रमाजनकत्वव्यापकं प्रयोजनवत्त्वं तद्व्यापकं च प्रवृत्तिनिवृत्तिसमानविषयकत्वमिति तदभावात्प्रयोजनाभावसिद्ध्या प्रमाजनकत्वाभावसिद्धिरिति ? नाद्यः—सिद्धेव्युत्पत्तिसमर्थनेन प्रथमव्याप्तेर्वेदोऽस्तीत्यादिसिद्धपरवाक्येषु व्यभिचारात् । न द्वितीयः—लोष्टप्रमाजनकचक्षुर्वृत्तौ व्यभिचारेण प्रयोजनवत्त्वस्य प्रमाजनकत्वाव्यापकत्वात् ॥

उक्तं च टीकायां—

"न हि लोष्टं पश्यतस्तद्दर्शनं निष्प्रयोजनमिति सुवर्णदर्शनता कल्प्यते" इति ।

तथा स्वरूपपरेष्वपि 'पुत्रस्ते जातः' 'नायं सर्पः' इत्यादिषु हर्षभयनिवृत्तिरूपप्रयोजनदर्शनेनोक्तान्यतरसमानविषयकत्वस्य प्रयोजनवत्त्वव्यापकत्वाभावात्—**इति चेन्न** । शास्त्रत्वविशिष्टप्रमाजनकत्वव्यापकं प्रवृत्तिनिवृत्त्यन्यतरसमानविषयकत्वमित्यङ्गीकारेऽपि प्रथमकल्पे दोषाभावात् । शाब्दप्रमाजनकत्वव्यापकं प्रयोजनवत्त्वमित्यङ्गीकारे उक्तचक्षुर्वृत्तौ व्यभिचाराभावात् ॥

यत्तु—पुत्रस्ते जात इत्यादौ प्रयोजनवत्त्वसत्त्वात् तत्रोक्तान्यतरसमानविषयकत्वाभावादुक्तान्यतरसमानविषयकत्वस्य प्रयोजनवत्त्वव्यापकत्वं न सम्भवति—**इत्युक्तम्** ॥ **तदयुक्तम्** । प्रयोजनवत्त्वं यत्र तत्र प्रवृत्तिनिवृत्त्यन्यतरसमानविषयकत्वज्ञानपरत्वान्यतरदिति व्याप्तिस्वीकारे व्यभिचाराप्रसक्तेः । पुत्रजन्मादेरज्ञातस्य हर्षहेतुत्वाभावेन तज्ज्ञानस्यैव प्रयोजनहेतुतया तद्वाक्यस्य ज्ञानपरत्वेनोक्तान्यतरस्य प्रयोजनवत्त्वव्यापकत्वाविघातात् ॥

उक्तं च श्रीभाष्ये—

"तस्मात्सर्वत्र प्रवृत्तिपरत्वेन ज्ञानपरत्वेन वा प्रयोजनपर्यवसानम।" इति ।

ब्रह्मस्वरूपोपदेशपरं वाक्यं स्वप्रतिपाद्यार्थप्रमाजनकत्वाभाववत्, प्रयोजनशून्यत्वात्, कर्मार्थवादवत् । न च हेतोरसिद्धिः । तद्वाक्यं प्रयोजनशून्यं, ज्ञानपरत्वाभावे सति प्रवृत्तिनिवृत्त्यन्यतरविषयविषयकत्वाभावात्- इत्यनुमानेन तत्सिद्धेरित्युदाहृतभाष्याभिप्रायः ॥

न च--प्रयोजनाद्यभावेऽपि चक्षुरादेः प्रमाजनकत्ववच्छब्दस्यापि तथात्वं युक्तं, सामग्रीसत्त्वे कार्यावश्यंभावात् प्रयोजनस्य शाब्दप्रमोत्पादकसामग्रीघटकत्वाभावादिति--वाच्यम् । प्रयोजनस्य शाब्दसामग्रीघटकत्वाभावेऽपि जिज्ञासायास्तद्घटकतया प्रयोजनविरहस्थले तदभावेन सामग्र्या एवासिद्धेः । शाब्दबोधे समभिव्याहाररूपाकांक्षाया ज्ञायमानतया जिज्ञासारूपाकांक्षायाश्च स्वरूपसत्या जनकत्वात्; अन्यथा जनितान्वयबोधाद्वाक्यात्पुनर्बोधापत्तेः ॥ न चाजिज्ञासितस्वनिन्दापरवाक्येन बोधस्यानुभाविकत्वात् जिज्ञासाया आकांक्षात्वमयुक्तमिति वाच्यम्।स्पष्टतरखण्डवाक्यार्थबोधस्येच्छां विना सम्भवेऽपि दुरूहनानावाक्यघटितमहावाक्यार्थबोधे विषयान्तरसञ्चारराहित्यरूपावधानद्वारा जिज्ञासायाः कारणत्वावश्यकत्वात् ॥

अत एव शिष्यावधानार्थं तत्र तत्र प्रतिज्ञा क्रियते। श्रुतिपुराणादिष्वप्युपदिश्यमानार्थस्येष्टसाधनत्वमभिधाय जिज्ञासामुत्पाद्यैवोपदेशः क्रियते । जिज्ञासाया आकांक्षात्वमभिप्रेत्यैव 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्' इत्यत्र वैश्वदेवयागे आमिक्षारूपद्रव्यस्योत्पत्तिवाक्यावगतत्वेन द्रव्यान्तराकांक्षाविरहात्तस्मिन् यागे वाजिनरूपद्रव्यस्यान्वयासम्भवात् वाजिभ्योवाजिनमिति वाक्यं वाजिनद्रव्यकयागान्तरविधायकमिति **बलाबलाधिकरणे** निर्णीतम् ।

न च—मीमांसकमते जिज्ञासाया आकांक्षात्वाङ्गीकारेऽपि वेदान्तिभिस्तदनङ्गीकारात्तान्प्रति प्रयोजनाभावेन प्रमाजनकत्वाभावसाधनं न सम्भवतीति—वाच्यम् । उत्तरतन्त्रेऽपि **सम्बन्धादेवमन्यत्रापी**त्यधिकरणे 'य एष एतस्मिन्मण्डले पुरुषोयश्चायं दक्षिणेऽक्षिन्' इत्यादिवाक्योक्तादित्यपुरुषाक्षिपुरुषोपासनयोर्व्याहृतिविद्यात्वेनैक्यमाशङ्क्य—आदित्यरूपस्थानविशिष्टोपासने स्थानान्तराकांक्षाविरहाद्विद्याभेद इति व्यवस्थापितत्वेन वेदान्तिभिरपि जिज्ञासाया आकांक्षात्वस्वीकारात् ॥

उक्तं च **समन्वयसूत्रावतरणटीकायां**—

"यथा मृत्तिकाया घटादिनिष्पादनशक्तित्वेऽपि कुलालस्य तन्निर्माणशक्तौ सत्यामपि दण्डचक्रादिपरिकरापेक्षाऽस्त्येव, तथा शब्दस्य परिनिष्पन्नब्रह्मप्रतिपादनशक्तत्वेऽपि ब्रह्मणश्शब्देन प्रतिपत्तुं शक्यत्वेऽपि बुभुत्साख्यपरिकरापेक्षा प्रमित्युत्पादने विद्यते । यत्नसापेक्षत्वाद्बुभुत्साऽपेक्षिता" इति ।

यत्नसापेक्षत्वात्—विरुद्धनानावाक्यानामेकवाक्यत्वादिप्रयत्नसापेक्षत्वात् तथा च नानावाक्यघटितमहावाक्यार्थबोधे जिज्ञासायाः कारणत्वमिति भावः ॥

एवञ्च—घटः कर्मत्वमानयनं कृतिरिति वाक्यस्य समभिव्याहाररूपाकांक्षाविरहादप्रामाण्यवत् वेदान्तानां जिज्ञासारूपाकांक्षाविरहादप्रामाण्यमेव ॥

अत एव—वाणिज्योपदेशादिपरं वाक्यं विरक्तं प्रत्यप्रमाणं रक्तं प्रति तु प्रमाणम्, प्रामाण्यस्य पुरुषभेदेन व्यवस्थितत्वात् । एकपुरुषं प्रति दशाभेदेनापि प्रामाण्यं व्यवस्थितम्, एतद्वाक्यमिदानीमेतत्पुरुषं प्रति प्रमाणं न तदेति सर्वसिद्धव्यवहारात् ॥ न चैकस्मिन् वाक्ये प्रमाणत्वाप्रमाणत्वरूपविरुद्धधर्मसमावेशानुपपत्तिरिति वाच्यम्, तत्पुरुषीयेच्छाविषयीभूतयथार्थज्ञानोपधायकत्वरूपप्रा-

माण्यस्य तादृशबोधोपधायकत्वाभावरूपाप्रामाण्यस्य तयोरुपपत्तेः। प्रामाण्याप्रामाण्ययोः कालभेदेन व्यवस्था च वेदान्तिनामप्यनुमता ॥ प्रथममृत्रटीकायां—

"विकल्पस्याष्टदोषप्रतिपादनावसरे व्रीह्यनुष्ठानकाले व्रीहिशास्त्रस्य प्रामाण्यं यवानुष्ठानकाले चाप्रामाण्यम्"—इत्युक्तेः ॥

न च-उक्तटीकाग्रन्थो नेच्छाघटितनिरुक्तप्रामाण्याप्रामाण्याभिप्रायकः, किन्त्वनुष्ठापकत्वाननुष्ठापकत्वलक्षणप्रामाण्याप्रामाण्याभिप्रायक इति वाच्यम्। प्रवृत्तिहेतुभूतकृतिसाध्यत्वादिविषयकबोधजनकत्वस्यैवानुष्ठापकत्वरूपतया यवानुष्ठानकालेऽपि व्रीहिशास्त्रस्य बोधकत्वस्वीकारेऽननुष्ठापकत्वलक्षणाप्रामाण्यायोगात् ॥

तदिदमभिप्रेत्योक्तं **श्रीभाष्ये**—

"पुरुषप्रवृत्तिनिवृत्तिविरहादनवबोधकत्वमेव" इति।

अत्र विरहादित्यनन्तरं ब्रह्मज्ञानेच्छाया असम्भवादिति पूरणीयम्। अनवबोधकत्वं- निरुक्तेच्छाघटितप्रामाण्याभाव इत्यर्थः ॥ अतो वेदान्तानां प्रवृत्तिनिवृत्त्यन्यतरपरत्वाभावेन जिज्ञासारूपाकांक्षाविरहात्प्रमाजनकत्वरूपप्रामाण्यस्य चासम्भवात् तत्प्रमाणकत्वरूपं शास्त्रयोनित्वं ब्रह्मणो न सम्भवति। तथा च **वार्त्तिकं**—

"प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा।
पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते ॥
यावत्खलु प्रमातॄणां प्रवर्तननिवर्तने।
शब्दा नकुर्वते तावन्न निराकांक्षबोधनम्"॥

—इति वदन्ति ॥

अत्र सिद्धान्तविदः—

वेदान्तवाक्यानि ब्रह्मप्रमाजनकत्वाभाववन्ति, प्रयोजनशून्यत्वात्—इत्ययुक्तम्; हेतोरसिद्धेः। आनन्दानुभवस्यैव मुख्यप्रयोजनत्वेन ब्रह्म-

णश्चानन्दरूपत्वेन तदनुभवजनके शास्त्रे प्रयोजनशून्यत्वासम्भवात् । ज्योतिष्टोमादिवाक्यस्य स्वर्गात्मकानन्दानुभवजनकापूर्वजनकयागप्रवृत्तिहेतुभूतयागस्वरूपबोधजनकत्वेन, परम्परयाऽऽनन्दानुभवप्रयोजकस्य प्रयोजनवत्त्वं साक्षादानन्दानुभवजनकस्य वेदान्तवाक्यस्य प्रयोजनशून्यत्वमित्यस्योपहासास्पदत्वात् । उक्तं च **श्रीभाष्ये** -

"निरस्तनिखिलदोषनिरतिशयानन्दस्वरूपतया परमप्राप्यं ब्रह्म-बोधयन् वेदान्तवाक्यगणः प्रवृत्तिनिवृत्तिपरताविरहान्न प्रयोजनपर्यवसायीति ब्रुवाणो राजकुलवासिनः पुरुषस्य कौलेयककुलाननुप्रवेशेन प्रयोजनशून्यतां ब्रूते" इति ॥

राजकुलवासिनः—राजकुलप्रसूतस्य, युवराजताप्रयुक्तनिरवधिकसम्पच्छालिनः पुरुषस्येत्यर्थः । **कौलेयकाः** - श्वानः, 'कौलेयकस्सारमेयः कुक्कुरो मृगदंशकः' इति कोशात्, राजकीयश्वोपजीव्यत्वेन लक्ष्यन्ते । तथा च—युवराजस्य साक्षान्निरवधिकसम्पदाश्रयस्य राजोपजीव्येच्छादिद्वारकात्यल्पधनादिलाभविरहेण सम्पच्छून्यतावचनमिव, निरवधिकानन्दरूपब्रह्मानुभवं प्रति साक्षाज्जनकस्य वेदान्तवाक्यस्यात्यल्पस्वर्गानन्दानुभवे उक्तपरम्पराघटितजनकत्वाभावेन प्रयोजनशून्यतावचनमपहास्यमित्यर्थः ॥

ननु - आनन्दानुभवः प्रयोजनमित्यत्रानुभवशब्देन ज्ञानमात्रविवक्षायां सुखादिस्मरणस्यापि पुरुषार्थत्वापत्तिः । स्मरणान्यज्ञानविवक्षायां 'यन्न दुःखेन सम्भिन्नम्' इत्यादिवाक्यजन्यज्ञानस्यापि तथात्वापत्तिः । अतस्साक्षात्कार एवानुभवपदेन विवक्षणीयः । तथा च वेदान्तानामानन्दरूपब्रह्मसाक्षात्कारजनकत्वाभावान्न प्रयोजनवत्त्वम् । ज्योतिष्टोमादिवाक्यस्य तु परम्परया स्वर्गसाक्षात्कारप्रयोजकत्वात्प्रयोजनवत्त्वम्—इति चेत् ॥ **उच्यते** । आनन्दानुभवपदेन स्वसम्बन्धिवर्तमानेष्टविषयकज्ञानमात्रं विवक्षितम् । तत्र वर्तमानत्वनिवेशात्, सुखस्मरणस्य

'यन्न दुःखेन सम्भिन्नम्' इत्यादिवाक्यजन्यज्ञानस्य च व्यावृत्तिः । स्वसम्बन्धित्वनिवेशाच्चान्यदीयवर्तमानसुखविषयकस्य मुखविकासादि-लिङ्गकानुमित्यात्मकज्ञानस्य व्यावृत्तिः ॥

न च--स्वसम्बन्धित्वं स्वानुयोगिकापृथक्सिद्धिसम्बन्धप्रतियोगित्वं, तच्च ब्रह्मात्मकसुखे बाधितं, ब्रह्मणस्सर्वाधारत्वेऽपि सर्वाधेयत्वाभावेन स्वानुयोगिकापृथक्सिद्धिप्रतियोगित्वाभावात्; स्वानुयोगिकापृथक्सिद्धि-प्रतियोगित्व--स्वप्रतियोगिकापृथक्सिद्ध्यनुयोगित्वान्यतरसम्बन्धेन स-म्बन्धित्वविवक्षणमपि न युक्तम्, लोके प्रथमसम्बन्धेन स्वसम्बन्धिसुखा-नुभवस्य पुरुषार्थत्वदर्शनेऽपि द्वितीयसम्बन्धेन स्वसम्बन्धिसुखानुभवस्य तथात्वादर्शनेन लोकविरुद्धकल्पनापत्तेरिति--**वाच्यम्** ॥ अपृथक्सिद्धि-सम्बन्धेन स्वसम्बन्धित्वनिवेशे मनोहरपुत्रकान्तादिदर्शनस्य पुरुषार्थ-त्वेन लोकसिद्धस्यासङ्ग्रहापत्त्या तत्सङ्ग्रहाय स्वत्वं मनोहरपित्रादि-दर्शनस्य सङ्ग्रहाय स्वामित्वं चान्तर्भाव्यापृथक्सिद्धिस्वत्वस्वामित्वान्य-तरसम्बन्धेन स्वसम्बन्धित्वस्य निवेश्यतया ब्रह्मणस्स्वामित्वेनोक्तान्य-तरसम्बन्धेन सम्बन्धित्वसत्त्वात्तदनुभवस्य पुरुषार्थत्वोपपत्तेः ॥

न च--इष्टविषयकसाक्षात्कारस्य पुरुषार्थताया लोकसिद्धत्वेऽपि तद्विषयकपरोक्षज्ञानस्य तथात्वमसिद्धमिति--वाच्यम् । 'स्ववेश्मनि निधिरस्ति' इति वाक्यजन्यज्ञानस्य, अज्ञातस्वपितृकराजपुत्रं प्रति 'पिता ते सार्वभौमस्त्वामेव नष्टं पुत्रं दिदृक्षन् वर्तते' इति वाक्यजन्य-ज्ञानस्य, परोक्षस्यापि, पुरुषार्थत्वस्य लोकसिद्धत्वादिष्टविषयकपरो-क्षज्ञानस्यापि पुरुषार्थतां स्वसम्बन्धित्वमध्ये स्वत्वस्वामित्वयोर्निवे-शावश्यकतां च स्फोरयितुमेव **श्रीभाष्ये** निधिराजकुमारयोर्दृष्टान्तो-पादानात् । तत्र निधिदृष्टान्तेन स्वत्वनिवेशावश्यकतायाः राजकु-मारदृष्टान्तेन स्वामित्वनिवेशावश्यकतायाश्च सूचनात् ॥

अथ—इष्टविषयकपरोक्षज्ञानस्यापि पुरुषार्थत्वे चन्दनसंयोगादिजन्यसुखमनुभवन्तं चैत्रं प्रति 'त्वयि सुखं वर्तते' इति मैत्रादिवाक्यजन्यपरोक्षज्ञानस्यापि पुरुषार्थत्वापत्तिः, न चेष्टापत्तिः, तादृशवाक्यप्रयोक्तरि मैत्रे 'ममेष्टसम्पादकोऽयम्' इति व्यवहारापत्तेः—**इति चेन्न** ॥ इष्टविषयकापरोक्षानुभवकालीनस्य परोक्षानुभवस्य वारणाय स्वसम्बन्धिवर्तमानकालीनेष्टानुभवे तद्विषयकसाक्षात्कारसमानकालीनत्वपरोक्षत्वोभयाभावस्य निवेशनीयत्वात् ॥

न च--ब्रह्मविषयकपरोक्षज्ञानस्यापि पुरुषार्थत्वे ध्यानविध्यानर्थक्यं, वाक्यादेव परोक्षज्ञानरूपपुरुषार्थसम्भवात्--इति वाच्यम् । परोक्षापरोक्षज्ञानयोर्मध्येऽपरोक्षज्ञानस्यातिशयितपुरुषार्थत्वेन देशविशेषावच्छेदेन निखिलगुणविग्रहविभूतिविशिष्टब्रह्मसाक्षात्काररूपब्रह्मानन्दानुभवार्थं ध्यानविधिसार्थक्यात् । यथा--'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' 'ज्योतिष्टोमेन स्वर्गकामो यजेत' 'अग्निहोत्रं जुहुयात्स्वर्गकामः'--इत्यादिषु दर्शपूर्णमासादीनामेकैकस्य स्वर्गसाधनत्वेऽपि फलविशेषापेक्षया कर्मान्तरारम्भ एकैकस्यैव कर्मण आवृत्तिवदुपपद्यते । यथा वा पुत्रजन्मश्रवणाज्जातहर्षस्यापि पश्चात्तन्मुखापरोक्षसुखाशया प्रवृत्तिः, तथाऽत्रापीति **व्यासाचार्यै**रुक्तत्वात् ॥

ननु—यादृशवाक्यानां प्रयोजनवत्त्वं प्रतिपाद्यार्थस्य तादृशप्रयोजनकत्वमन्तरा नोपपद्यते तादृशवाक्यात्तादृशवाक्यार्थविषयकप्रमाजनकत्वमावश्यकं; तादृशार्थस्यासत्यत्वे प्रयोजनवत्त्वानुपपत्तेः । यथा ज्योतिष्टोमादिवाक्यानां यागादेस्स्वर्गजनकत्वमन्तरा प्रवृत्त्यादिद्वारकप्रयोजनवत्त्वानुपपत्त्या यागविषयकप्रमाजनकत्वावश्यकता । इष्टविषयकप्रत्यक्षज्ञानस्य पुरुषार्थत्वे प्रत्यक्षे विषयस्य कारणतया विषयसत्यत्वावश्यकत्वेऽपि परोक्षज्ञानस्य तथात्वेन विषयासत्यत्वेऽपि

१. (पा) विशेषार्थतया.

तादृशप्रयोजनवत्त्वनिर्वाहादिष्टविषयकप्रमाजनकत्वमनावश्यकम् । न च—स्वर्भोगे पञ्च फलानि सन्ति, इत्यादिबालाद्युपच्छन्दनवाक्यस्येष्टविषयकपरोक्षानुभवरूपप्रयोजनवत्त्वेऽपि प्रमाजनकत्वादर्शनेन परोक्षज्ञानरूपप्रयोजनवत्त्वस्य प्रमाजनकत्वाव्याप्यत्वात् ॥ न च—परोक्षज्ञानरूपप्रयोजनवत्त्वेऽपि नित्यनिर्दोषवेदवाक्यत्वादेव प्रमाजनकत्वमावश्यकमिति वाच्यम् । तथा सति नित्यनिर्दोषत्वादेव प्रयोजनाभावेऽपि प्रमाजनकत्वोपपत्त्या प्रयोजनप्रतिपादनपरस्य समन्वयसूत्रस्य वैयर्थ्यापत्तेः ॥ यदि च—निर्दोषस्यापि वेदवाक्यस्य यादृशार्थपरत्वे प्रयोजनवत्त्वं सम्भवति तादृशार्थपरत्वं वक्तव्यम्, कर्मकर्तृजीवातिरिक्तपरत्वे प्रयोजनवत्त्वानिर्वाहात् तादृशजीवपरत्वमेव वेदान्तानां युक्तमित्याशङ्कानिरासाय जीवातिरिक्तब्रह्मपरत्वेऽपि प्रयोजनोपपादनाय तत्सूत्रसार्थक्यमिति—विभव्यते । तदा वेदान्तानां यादृशार्थपरत्वे विषयसत्यत्वोपपादकं प्रवृत्त्यादिद्वारकं प्रयोजनवत्त्वं निर्वहति, तादृशार्थपरत्वमेव वक्तव्यमिति कर्मकर्तृजीवपरत्वमेव युक्तमित्याशङ्का तत्सूत्रकरणेऽपि पुनरुत्थितैव—**इति चेत्** ॥ **मैवम्** । पुत्रजन्मादिश्रवणकाले तद्वाक्यजन्यज्ञाने अप्रामाण्यज्ञाने तादृशवाक्यजन्यज्ञानस्य पुरुषार्थत्वाभावेनाप्रामाण्यज्ञानानास्कन्दितत्वस्य स्वसम्बन्धिवर्तमानेष्टानुभवनिवेशे गौरवेण प्रमात्वेन निश्चीयमानत्वस्यैव लाघवेन निवेशौचित्यात् ॥ प्रमात्वेन निश्चीयमानेष्टविषयकपरोक्षज्ञानरूपप्रयोजनवत्त्वस्य प्रमाजनकत्वव्याप्यत्वात् वेदान्तानां प्रमाजनकत्वावश्यकत्वात् ॥

न चैवं -बालाद्युपच्छन्दनवाक्यजन्यज्ञानस्य भ्रमात्मकस्य प्रयोजनत्वानुपपत्तिरिति -वाच्यम् । बालानां तादृशज्ञाने प्रमात्वभ्रान्त्यैवेच्छोत्पत्तेः ॥ न च--वेदान्तवाक्यजन्यज्ञानेऽपि प्रमात्वभ्रान्त्यैवेच्छाविषयत्वरूपपुरुषार्थत्वापत्त्या प्रमात्वानावश्यकतेति—वाच्यम् । अभ्रा-

न्तानेकपुरुषीयेच्छाविषयत्वस्य वेदान्तजन्यज्ञाननिष्ठस्य प्रमात्वभ्रान्त्या निर्वाहासम्भवेन प्रमात्वावश्यकत्वात्; अभ्रान्तानेकपुरुषीयेच्छाविषयीभूतपरोक्षज्ञानरूपप्रयोजनवत्त्वस्य प्रमाजनकत्वव्याप्यत्वात् ॥

तदिदमभिप्रेत्योक्तं श्रीभाष्ये—

"यत्पुनःपरिनिष्पन्नवस्तुगोचरस्य वाक्यस्य तज्ज्ञानमात्रेणापि पुरुषार्थपर्यवसानात् बालातुराद्युपच्छन्दनवाक्यवन्नार्थसद्भावे प्रामाण्यमिति, तदसत् । अर्थसद्भावाभावे निश्चिते ज्ञातोऽप्यर्थः पुरुषार्थाय न भवति । बालातुरादीनामप्यर्थसद्भावभ्रान्त्या हर्षाद्युत्पत्तिः, तेषामेव तस्मिन्नपि ज्ञाने विद्यमाने यद्यर्थाभावनिश्चयो जायेत, ततस्तदानीमेव हर्षादयोनिवर्तेरन् । औपनिषदेष्वपि वाक्येषु ब्रह्मास्तित्वतात्पर्याभावनिश्चये ब्रह्मज्ञाने सत्यपि पुरुषार्थपर्यवसानं न स्यात्" इति ॥

एवं च—वेदान्तवाक्यानां प्रयोजनवत्त्वेन जिज्ञासारूपाकांक्षावत्त्वेन प्रमाजनकत्त्वोपपत्त्या ब्रह्मणश्शास्त्रयोनित्वमुपपन्नम् । शास्त्रत्वमपि न तावत्प्रवृत्तिनिवृत्त्यन्यतरपरवाक्यत्वं, व्याकरणरत्नपरीक्षाशास्त्रादिष्वव्याप्तेः; किन्तु प्रयोजनवदर्थावबोधित्वमिति वेदान्तानां शास्त्रत्वमुपपन्नमिति वेदान्तवाक्येषु जिज्ञासारूपाकांक्षोपपादनपरं **समन्वयसूत्रमुपपन्नम्** ॥

तत्सूत्रार्थस्तु—**तुशब्दः** प्रसक्ताशङ्कानिवृत्त्यर्थः. **तत्** शास्त्रयोनित्वं, ब्रह्मणस्सम्भवत्येव; कुतः, **समन्वयात्** पुरुषार्थतयान्वयस्समन्वयः, परमपुरुषार्थभूतस्य ब्रह्मणोऽभिधेयतयाऽन्वयात् ॥

ननु—अत्रान्वयशब्दो **वाक्यान्वयादि**त्यादाविव न विशिष्टैकार्थप्रतिपत्तिप्रयोजकसमभिव्याहाररूपपदसंसर्गपरः, तादृशान्वयस्य वा-

---

१. (पा) प्रयोजनवत्त्वोपपत्त्या.

क्यनिष्ठत्वेन ब्रह्मनिष्ठत्वाभावात् । जिज्ञासारूपाकांक्षाविरहाद्वेदान्तानां ब्रह्मण्यप्रामाण्यमिति शङ्कायां समभिव्याहाररूपाकांक्षोपपादनस्यायुक्तत्वाच्च ॥ नापि—**अन्वयादिति चेत् स्यादवधारणादित्यादाविव** पदार्थसंसर्गपरः, तादृशसंसर्गस्य ब्रह्मनिष्ठतासम्भवेऽपि तत्कथनस्य प्रकृताशङ्कानिरासकत्वासम्भवेनानुपयोगात् ॥ न च—**अत्रान्वयशब्दो** बोध्यत्वरूपवैशिष्ट्यपरः, शास्त्रेणेत्यध्याहार्यम्, संशब्दार्थश्चानुकूलत्वप्रकारकत्वं बोध्यत्वैकदेशबोधेऽन्वेति ; शास्त्रजन्यानुकूलत्वप्रकारकबोधविषयत्वादित्यर्थः, शास्त्रबोध्यतावच्छेदकानुकूलत्ववत्त्वादिति यावत् ; ब्रह्मणोऽनुकूलत्ववत्त्वरूपपुरुषार्थत्ववत्त्वात् जिज्ञासारूपाकांक्षासम्भवेन तदुपपादनपरं समन्वयसूत्रमिति--वाच्यम् । जिज्ञासारूपाकांक्षाविरहेण शास्त्रेण ब्रह्मबोधो न सम्भवतीति वदन्तं प्रति ब्रह्मणश्शास्त्रेण पुरुषार्थतया बोध्यत्वादित्यस्यासिद्धिग्रस्तत्वेन तादृशहेतुकथनासङ्गतेः—**इति चेत्** ॥ **उच्यते**—दुरूहनानावाक्यघटितमहावाक्यार्थबोधे जिज्ञासायाः कारणत्वेन तादृशमहावाक्यानां ब्रह्मबोधकत्वासम्भवपूर्वपक्षिणोऽपि 'अनन्दो ब्रह्मेति' खण्डवाक्येन ब्रह्मबोधस्यानुमतत्वेन हेत्वसिद्धिविरहात् ॥ न च--जीवस्वरूपस्यानन्दरूपत्वेऽपि इतरान्प्रति पुरुषार्थत्वाभाववत् ब्रह्मणोऽपि स्वं प्रत्यनुकूलत्वमात्रेणानन्दत्वनिर्वाहात् पुरुषार्थत्वासिद्ध्या जिज्ञासारूपाकांक्षा न सिद्ध्यतीति--**वाच्यम्** ।

"तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादुत्तरतरं यदयमात्मा"

इति **बृहदारण्यकश्रुत्या**—

"प्रियोहि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः"

इति **स्मृत्या च** ज्ञानिनः प्रति परमप्रियत्वरूपानुकूलत्वबोधनेन जिज्ञासानिर्वाहात् ॥　　　　**—इतिवदन्ति** ॥

महाचार्यास्तु—

"स्वप्रतिपाद्योपासनप्रवृत्तिजन्यफलप्रयोजकत्वाद्वेदान्तवाक्यानां सफलत्वोक्तावुपासनविधिशून्यानां सद्विद्यादीनां फलवत्त्वानुपपत्त्या तत्साधारण्याय जपादिद्वारकमेव सफलत्वं वाच्यमिति तत्प्रतिपाद्यब्रह्मविचारस्य निष्फलत्वाद्ब्रह्मविचारशास्त्रमनारम्भणीयम्—इति **पूर्वपक्षं कृत्वा** ; सद्विद्याया अप्युपासनविधौ तात्पर्यमस्त्येव पुत्रस्य ब्रह्मज्ञानोत्पिपादयिषया 'स्तब्धोऽसि' इत्यारम्भात्, श्रवणमात्ररूपब्रह्मज्ञानोत्पादनस्य विफलत्वेनोपासनपर्यन्तब्रह्मज्ञानोत्पादनेऽपि तात्पर्यावगमात्, अविज्ञातं विज्ञातमित्युपासनपरविज्ञानशब्दप्रयोगात् "तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये" इत्यत्र तस्येत्युपासकनिर्देशाच्चोपासनतात्पर्यावगमात्, 'तद्धास्य विजज्ञौ' इति सद्विद्यासमाप्तिगतस्य विपूर्वकजानातेरुपक्रमस्थविज्ञानपदानुसारेणोपासनपरत्वात् । सप्तमखण्डान्तर्गतविजज्ञावित्यस्य नोपासनपरत्वम्, अनन्तरमप्युपदेशात् ॥ तस्मात्सद्विद्याया अपि उपासनप्रवृत्तिजन्यफलसम्पादकत्वेन फलवत्त्वात् प्रतिपाद्ये ब्रह्मण्यपि शास्त्रतात्पर्यात्तद्विचाररूपं शास्त्रमारम्भणीयम् । अतस्सद्विद्याया उपासनतात्पर्यकत्वमेव समन्वयसूत्राभिप्रेतम्—

—इत्याहुः ॥*

* एतावानेव ग्रन्थो बहुषु कोशेषु दृश्यते । परन्त्वस्मदुपलब्धप्रामाणिकत्रिचतुरकोशेषु उपरितनोऽपि ग्रन्थभागस्समुपलब्धः, स च विद्वदभ्यनुज्ञयाऽत्र सम्मुद्रितः ॥

न च– अत्र सद्विद्यायां उपासनविधिकल्पनं व्यर्थं, स्ववाक्ये विध्यभावेऽपि प्रकरणान्तरस्थेन **कारणन्तु ध्येय** इति वाक्येनाकाङ्क्षाबलात् कारणवाक्यानामेकवाक्यतामङ्गीकृत्य उपासनतात्पर्यकत्वस्य व्यवस्थापनसम्भवात् ; **हानौतूपायनशब्दशेषत्वादित्यधिकरणे** शाखान्तरगतवाक्यस्यापि शाखान्तरीयवाक्येनाकाङ्क्षाबलादेकवाक्यताया व्यवस्थापितत्वादिति– वाच्यम् ॥ तथा सति सद्विद्यायां सद्विद्यामात्रप्रतिपन्नगुणोपासनस्यासिद्धिप्रसङ्गात् , विनिगमनाविरहेण कारणवाक्यान्तराणामपि तदेकवाक्यतापत्त्या वाक्यान्तरप्रतिपन्नगुणानामपि तत्रान्वयस्य दुर्वारत्वात् ॥

न च– उक्तरीत्या नियतगुणविषयकोपासनसिद्ध्यर्थं तत्तत्कारणवाक्येषु विधिकल्पनस्यावश्यकत्वे 'कारणन्तु ध्येयः' इतिवाक्यस्य वैयर्थ्यमिति–वाच्यम् । तद्वाक्यस्य कारणवाक्येषु प्रत्येकं विधिकल्पनमावश्यकमित्येतत्तात्पर्यग्राहकत्वात् ॥

तदेतदभिप्रेत्यैव **'तन्निष्ठस्य मोक्षोपदेशात्'** इति सूत्रितम् । तन्निष्ठस्य सदुपासकस्येत्यर्थः ॥ उक्तञ्च **श्रीभाष्ये**–

> "मुमुक्षोः श्वेतकेतोः तत्त्वमसीति सदात्मकत्वानुसन्धानमुपदिश्य" —इति ॥

ननु– सर्वेषु वेदान्तेषूपासनविधिं कल्पयित्वा प्रामाण्योपपादने प्रथमसूत्रे सिद्धेव्युत्पत्तिसमर्थनं समन्वयसूत्रे ब्रह्मविषयकपरोक्षज्ञानस्य पुरुषार्थत्वमङ्गीकृत्य वेदान्तवाक्येषु जिज्ञासारूपाकाङ्क्षोपपादनञ्च व्यर्थं ; सर्वेषां वेदान्तवाक्यानामुपासनरूपकार्यान्वितत्वेनैव प्रामाण्यसम्भवेन मीमांसकमताविशेषात्– **इति चेत् । उच्यते ।** मीमांसकमते ह्यर्थवादवाक्यानां विधिवाक्येन सह पदैकवाक्यता स्वीक्रियते. सिद्धान्ते च वाक्यैकवाक्यतेति विशेषात् । तत्र पदैकवाक्यता नाम– प्रत्येकमुपस्थितिजनकानां पदानां पदार्थसंसर्गा-

षगाह्येकमुख्यविशेष्यकबोधजनकत्वं. यथा दण्डेन गामानयेति प-
दानां । वाक्यैकवाक्यता नाम--प्रत्येकं पदार्थसंसर्गावगाहिबोधजनका-
नामेव वाक्यानां वाक्यार्थसंसर्गावगाह्येकमुख्यविशेष्यकबोधजनकत्वं.
यथा दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादिवाक्यानां समिधो
यजतीत्यादिवाक्यानाञ्च । स्वघटकपदार्थसंसर्गावगाहिबोधजनकाना-
मेव पुनराकाङ्क्षावशेन समिदादियागाङ्गकदर्शपूर्णमासादियागविषयक-
बोधजनकत्वम् ॥

तदुक्तं भाट्टैः—

"स्वार्थबोधे समर्थानामङ्गाङ्गित्वाद्यपेक्षया ।
वाक्यानामेकवाक्यत्वं पुनस्संहत्य जायते ॥" इति ॥

तत्र मीमांसकमते अर्थवादवाक्यानां प्रशंसारूपाणां स्वार्थबोधकाना-
मेव बलवदनिष्टाननुबन्धित्वरूपप्राशस्त्ये लक्षणा । सोऽरोदीदित्यादि-
निन्दार्थवादवाक्यानां बलवदिष्टाननुबन्धित्वरूपनिन्दितत्वे लक्षणा ।
अर्थवादगतपदानां प्राशस्त्यादौ लक्षणाभ्युपगमे एकेन पदेन लक्षणया
तदुपस्थितिसम्भवे पदान्तरवैयर्थ्यापत्तिः । अतो विध्यपेक्षितप्राश-
स्त्यरूपपदार्थप्रत्यायकतया अर्थवादपदसमुदायस्य पदस्थानीयतया
अर्थवादवाक्यानां विधिना सह पदैकवाक्यतेति स्वीक्रियते ॥
वेदान्तिभिस्तु सदेव सोम्येदमग्र आसीदित्यादिरूपाणामर्थवादानां स्वार्थ
बोधनसमर्थानामेव उपासनविधिना वाक्यैकवाक्यत्वमङ्गीक्रियते ।
तत्र सिद्धे व्युत्पत्तेर्जिज्ञासारूपाकाङ्क्षायाश्चाभावे स्वार्थबोधासम्भवात्
तदुपपत्तये तयोस्समर्थनमावश्यकमेव ॥

ननु वेदान्तवाक्यानामुपासनविधिवाक्येन वाक्यैकवाक्यत्वाङ्गी-
कारे विधिना त्वेकवाक्यत्वादिति पूर्वतन्त्रगतसूत्रस्य वाक्यैक-
वाक्यतापरत्वसम्भवेन तत्सूत्रविरोधाप्रसक्त्या तद्विरोधमाशङ्क्य
उत्सर्गापवर्गन्यायेन परिहाराभिधानं सिद्धान्ते विरुध्यते ॥

तथा च प्रथमसूत्रटीका—

"नन्वेवं कथमभिधीयते, आम्नायस्य क्रियार्थत्वात् सिद्धप-रवाक्यानां तच्छेषत्वं सूत्रकारेण कण्ठोक्तम्, तच्च विरुद्धचत एव, अनरशास्त्रभेदः—इति ॥ मैवं । पदे जुहोति, आहवनीये जुहोति, न हिंस्यात्, पशुमालभेत इतिवत्—शास्त्रान्तरे **'कर्मण्यण् आतोऽनुपसर्गे कः'** इतिवच्च उत्सर्गापवादन्यायेन शास्त्रैक्याविरोधात् सामान्येन सिद्धपरवाक्यानां क्रियाशेषि-त्वेऽभिहिते सिद्धपरवाक्यविशेषस्य विधिशेषत्वं न वेति वि-चार्य स्वयंपुरुषार्थविरहिणामेव सिद्धपरवाक्यानां क्रियाशे-षत्वं, स्वयंपुरुषार्थपर्यवसायिनान्तु सिद्धपरवाक्यानामतच्छे-षत्वमिति हि निर्णेतुं युक्तम्"—इति ॥

अधिकरणसारावल्यामपि—

"आक्षिप्य स्थापनीयाः कतिचिदिह नयाः पूर्वकाण्डप्रणीताः,
केचिद्युत्पादनीयाः क्वचिदपवदनं व्याप्यमौत्सर्गिकस्य ॥" इति ।

अतो वेदान्तानामुपासनविध्येकवाक्यत्वं नास्तीति टीकाद्याशयः प्रती-यते । एवं यस्सर्वज्ञ इत्यादिपूपासनविधिरहितवाक्येषु स्वरूपवद्गु-णानां प्रतिपन्नत्वान्निरुपाधिकत्वमिति टीकावाक्यादपि तथा प्रतीयते । तस्माद्वेदान्तानामुपासनविध्येकवाक्यत्वाभिधानं सिद्धान्तविरुद्धम्—

—इति चेन्न ॥

श्रीभाष्ये

"कार्यार्थत्वेऽपि वेदस्य ब्रह्मविचारः कर्तव्य एव । कथम् ? 'आत्मावा अरे द्रष्टव्यश्श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यादिश्रुतिभिः प्रतिपन्नोपासनाविषयकार्याधिकृतफलत्वेन ब्रह्मविदाप्नोति परमित्यादिभिः ब्रह्मप्राप्तिश्श्रूयत इति ब्रह्मस्व-

रूपतद्विशेषणानां दुःखासम्भिन्नदेशविशेषरूपस्वर्गादिवत् रात्रिसत्रप्रतिष्ठादिवत् अपगोरणशतयातनासाध्यसाधनभाववच्च कार्योपयोगितयैव सिद्धेः"—

इति प्रथमसूत्रे प्रतिपादितत्वेन वेदान्तानामुपासनविध्येकवाक्यत्वेन प्रामाण्यस्य सिद्धान्तसिद्धत्वात् ॥

अयमर्थः। समस्तचिदचिद्रूपविभूतिज्ञानानन्दादिरूपगुणैतदुभयविधविशेषणविशिष्टं ब्रह्मैव हि प्राप्यभूतं सकलवेदवेदान्तवेद्यं: 'सर्वे वेदा यत्पदमामनन्ति, तपांसि सर्वाणि च यद्वदन्ति, यदिच्छन्तो ब्रह्मचर्यं चरन्ति, तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये ; ओमित्येतत्' इति **कठवल्लीश्रुत्या** प्राप्यस्वरूपस्य सर्ववेदवेदान्तवेद्यत्वप्रतिपादनात् । **तपांसी**त्यस्य तपःप्रधाना वेदान्तभागा इत्यर्थ इति टीकायां व्याख्यानात्। विभूतिगुणाश्रयब्रह्मात्मकविशिष्टत्वं हि विशेषणविशेष्यभावेन त्रितयावगाहिज्ञानविशेषविषयत्वं, समुदायत्वञ्च ज्ञानविशेषविषयत्वमेव; परन्तु विशिष्टत्वं विशेषणविशेष्यभावेनानेकावगाहिज्ञानविशेषविषयत्वं, समुदायत्वन्तु समूहालम्बनात्मकानेकविषयकज्ञानविशेषविषयत्वमिति भेदः । तत्र पर्याप्तिसम्बन्धेनोभयमपि व्यासज्यवृत्ति स्वरूपसम्बन्धेन च प्रत्येकवृत्ति, तत्र पर्याप्तिसम्बन्धावच्छिन्नविशिष्टत्वनिष्ठावच्छेदकताकभेदः प्रत्येकं विशेषणेषु वर्तते, स्वरूपसम्बन्धावच्छिन्नावच्छेदकताकभेदस्तु विशेषणे नास्ति, समुदायत्वस्थलेऽपि स्वरूपसम्बन्धावच्छिन्नसमुदायत्वनिष्ठावच्छेदकताकभेदस्य प्रत्येकमभावात् स्वरूपसम्बन्धेन विशिष्टत्वं विशेषणसाधारणं । तथा च वेदजन्यबोधत्वव्यापकस्वविषयताकत्वरूपं सर्ववेदप्रतिपाद्यत्वं विशिष्टे अक्षतं, स्वपदेन स्वरूपसम्बन्धेन विशिष्टस्याश्रयस्य ग्रहणात्। स्वर्गकामो यजेतेत्यादौ स्वर्गकामादिपदस्य तच्छरीरकपरत्वाभावेऽपि न क्षतिः, तस्यापि स्वरूपसम्बन्धेन विशिष्टत्वाश्रयत्वात् । स्वरूपस-

स्वन्यावच्छिन्नविशिष्टत्वनिष्ठावच्छेदकताकभेदवद्वस्तुनोऽभावादेव 'यत्र नान्यत्पश्यति' इत्यादिकमुपपन्नम् ॥

तदेतदभिप्रेत्योक्तं **श्रीभाष्ये भूमाधिकरणे** —

"विभूतिगुणविशिष्टनिरतिशयसुखरूपं ब्रह्मानुभवन् तद्व्यतिरिक्तस्य वस्तुनोऽभावादेव किमप्यन्यन्न पश्यति।" इति ॥

अत्र विचारणीयं बह्वस्ति, तत्सर्वं वादान्तरे प्रपञ्चितमिति नेह प्रतन्यते ॥ अतो निखिलगुणविभूतिविग्रहविशिष्टब्रह्मणोऽनुभाव्यस्य उपासनफलत्वात् तस्य विधिवाक्यादेव सिद्धिः ॥

न च तथापि 'एषोऽणुरात्मा चेतसा वेदितव्यः' इत्यादिजीवस्वरूपप्रतिपादकानां 'अजामेकां लोहितशुक्लकृष्णाम्' इत्यचेतनस्वरूपप्रतिपादकानाञ्च श्रुतीनां प्रामाण्यानुपपत्तिः, एवं फलतया साक्षात्कारप्रतिपादकानां 'आत्मा वाऽरे द्रष्टव्यश्श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इत्यादिवाक्यानामपि ब्रह्मणि प्रामाण्यानुपपत्तिः ; तथा 'अन्यथाऽतो ये विदुरन्यराजानस्ते क्षय्यलोका भवन्ति' इत्यादीनां ब्रह्मज्ञानशून्यस्य संसारप्रतिपादकश्रुतीनामपि प्रामाण्यानुपपत्तिः, विध्यन्वितार्थकत्वाभावात् इति वाच्यम् ॥ 'यन्न दुःखेन संभिन्नं यस्मिन्नोष्णं न शीतं नारतिः' इत्याद्यर्थवादानां विधिवाक्योक्तस्वर्गरूपफलगतविशेषणप्रतिपादकानां तादृशविशेषणांशे प्रामाण्यवत् ब्रह्मरूपफलगतविशेषणप्रतिपादकतया जीवादिप्रतिपादकवाक्यानां प्रामाण्यनिर्वाहात्, 'रात्रीरुपेयात्' इति विधिवाक्ये प्रतिष्ठारूपफलानिर्देशेऽपि 'प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति' इत्यर्थवादानां विध्यपेक्षितफले तात्पर्यवत् 'आत्मा वाऽरे द्रष्टव्य' इत्यादौ फलानिर्देशेऽपि ब्रह्मस्वरूपप्रतिपादकांशानामुपासनविध्यपेक्षितफलरूपे ब्रह्मणि प्रामाण्यसम्भवात्; 'तस्माद्ब्राह्मणाय नापगुरेत' इत्यत्र ब्राह्मणविषयकापगोरणाभावे विधिप्रत्ययेन शतयातनाप्रयोजकी-

भूताभावप्रतियोगित्वं बोध्यते. 'योऽपगुरेत तं शतेन यातयात्' इत्यर्थवादेन अपगोरणाभावाभावरूपापगोरणायां शतयातनाप्रयोजकत्वबोधनादिति--मीमांसकैरङ्गीक्रियते । तद्वदुपासनपरवाक्येऽपि विधिप्रत्ययेन संसारप्रयोजकीभूताभावप्रतियोगित्वं ब्रह्मज्ञाने प्रतीयते । 'अन्यथाऽतो ये विदुरन्यराजानस्ते' इति श्रुत्या तथा बोधनादिति मोक्षविरोधिफलेऽपि वेदान्तानां प्रामाण्यमुपपन्नम् ॥

उक्तशङ्कात्रयस्योक्तरीत्या परिहारसूचनायैव **श्रीभाष्ये**--

"दृष्टान्तत्रयोपादानात्" -- इति ॥

अत्रेदमवधेयम् ॥ वेदान्तानां विध्येकवाक्यत्वेन प्रामाण्येऽपि ब्रह्मणस्त्रिधा सिद्धिरभिमता ॥ तत्र-विभूतिगुणविग्रहविशिष्टस्य ब्रह्मणोऽनुभाव्यस्य उपासनफलत्वात् **फलतया सिद्धिरित्येकः प्रकारः** । यागादेः कालान्तरभाविस्वर्गजनकत्वासम्भवात् द्वारतया कस्य चित्कल्पने कर्तव्ये अपूर्वस्य द्वारतया कल्पने अत्यन्तादृष्टकल्पनापत्तेः प्रसादविशिष्टभगवत एव सर्वफलप्रदत्वेन शास्त्रसिद्धतया तस्यैव द्वारत्वं युक्तमिति ज्योतिष्टोमादिवाक्येऽपि यागादिविषयककृतिसाध्यत्व स्वर्गादिसाधनत्वाभ्यां अपूर्वस्थानीयतया **प्रसादविशिष्टभगवतस्सिद्धिरिति द्वितीयः प्रकारः** । वेदान्तानां कर्मकर्तृस्तावकत्वाभ्युपगमेऽपि कर्मकर्तृविशेष्यकजगत्कारणत्व-मोक्षप्रदत्व-सर्वज्ञत्व-सत्यकामत्व-निस्समाभ्यधिकत्वादिप्रकारकबोधजनकत्वस्यैव कर्मकर्तृस्तावकत्वरूपतया तादृशगुणानां सर्वजीवेष्वसम्भवेन क्वचिज्जीवे तेषां वास्तविकत्वे यत्र निस्समाभ्यधिकत्वघटितोक्तगुणानां सत्त्वं तस्यैव ब्रह्मत्वमावश्यकं. कुत्रापि जीवे तेषां गुणानामवास्तविकत्वे अन्यत्र क्वचित्तेषां सत्त्वमावश्यकं, शशशृङ्गादिवत् तुच्छैर्गुणैः स्तुत्यसम्भवात् । यत्रान्यत्र सत्त्वं तस्यैव ब्रह्मत्वमित्युभयथाऽपि **वेदान्तैर्ब्रह्मसिद्धिरनिवार्येति तृतीयः प्रकारः** ॥

तत्र प्रथमसूत्रे उपासनादिफलत्वेन **फलमत उपपत्तेः, पुरुषार्थोऽतश्शब्दादिति बादरायणः**—इत्यादिषु फलसाधनतया देवताधिकरणे स्नापकत्वसिद्धिहेतुत्वेन ब्रह्मणस्सिद्धेरुक्तत्वात् प्रथमसूत्रे ब्रह्मजिज्ञासेत्यत्र कर्मणिषष्ठ्यङ्गीकारात् कर्मत्वस्य कर्तुः क्रियया आप्तुमिष्टतमत्वरूपत्वात् उपासनद्वारा विचारात्मकज्ञानेन प्राप्तुमिष्टतमत्वे पर्यवसानेन ब्रह्मणि प्राप्यत्वरूपफलत्वलाभात् ॥

न च—मतिविषयकधातुसमभिव्याहारे विषयत्वमेव कर्मत्वं, न तु क्रियाजन्यफलशालित्वेनेच्छाविषयत्वमिति नोक्तरीत्या ब्रह्मजिज्ञासापदेन ब्रह्मणि पुरुषार्थत्वलाभ इति- वाच्यम्। 'कर्तुरीप्सिततमं कर्म' इत्यनेन क्रियाजन्यफलशालित्वेन इच्छाविषयस्यैव कर्मसंज्ञाविधानेन तत्रैव द्वितीयायाश्शक्तत्वात्, विषयत्वे च शक्तिग्राहकानुशासनविरहेण तत्र लक्षणाया एव वाच्यत्वात् ब्रह्मजिज्ञासेत्यत्र लक्ष्यार्थविषयत्व इव शक्यार्थेऽपि क्रियाजन्यफलशालित्वेनेच्छाविषयत्वे तात्पर्यसत्त्वेनोभयत्रापि तत्राङ्गीकारात्। तथा च ब्रह्मणो जिज्ञासेत्यत्र षष्ठ्या विषयित्वं प्राप्तिश्चार्थः, ब्रह्मपदार्थान्वितविषयत्वस्य आश्रयतया ब्रह्मप्राप्तेश्च स्वजनकत्वप्रकारकेच्छाविषयत्वसम्बन्धेन ब्रह्मजिज्ञासायामन्वयात् ब्रह्मविषयको ब्रह्मप्राप्तिजनकत्वेनेच्छाविषयश्च विचारः कर्तव्य इति बोधः ॥ ब्रह्मजिज्ञासेति समासेऽपि ब्रह्मपदस्य ब्रह्मविषयकत्वविशिष्टब्रह्मप्राप्तिजनकत्वप्रकारकेच्छाविषये लक्षणाङ्गीकारात् तथा बोध इति बोध्यम् ॥

तदेतदभिप्रेत्योक्तं **प्रथमसूत्रटीकायां**—

"सप्तमीति योगविभागात् ब्रह्मणि जिज्ञासेति समासेऽपि ब्रह्मणो विषयत्वमात्रं स्यात्, न तु प्रयोजनत्वमिति सप्तम्यपरिग्रहः; कर्मणिषष्ठीस्वीकारे ब्रह्मणो विषयत्वप्रयोजनत्वे सिध्येताम्।"

—इति ॥

उक्तरीत्या ब्रह्मप्राप्तेः फलत्वेन बोधमभिप्रेत्यैव प्रथमसूत्रश्रीभाष्येऽप्युक्तम्—

"उपासनविषयकार्याधिकृतफलत्वेन 'ब्रह्मविदाप्नोति परम्' इत्यादिभिः ब्रह्मप्राप्तिः श्रूयते" —इति ।

तत्र टीका—'कार्यार्थत्वाभ्युपगमेऽपि स्तावकत्वसिद्धिहेतुत्वेन फलसाधनत्वेन च प्रकारद्वयेन सिद्धवस्तुनि तात्पर्यमुत्तरत्रोपपादयिष्यते', 'फलतया सिद्धिस्तत्रोच्यते' —इति ॥

ननु—प्रथमसूत्र एव ब्रह्मविचारं प्रति ब्रह्मणः फलतया सिद्धेर्विवक्षितत्वे समन्वयसूत्रमफलं, ब्रह्मविचारे निष्फलत्वशङ्काया अनुदयात् तच्छङ्कानिरासकस्य सूत्रस्यानुपयोगात् ॥ न च प्रथमसूत्राभिमतं ब्रह्मणः फलत्वमयुक्तं, तस्य नित्यत्वेन विचारफलत्वायोगादिति शङ्कानिरासकमेव समन्वयसूत्रमिति वाच्यम्; तथा सति तत्सूत्रे ब्रह्मणः फलत्वाभावपूर्वपक्षस्य ब्रह्मानुभवरूपमोक्षस्य फलत्वोपपादनेन सिद्धान्तस्य च करणापत्तेः । किञ्च यदि ब्रह्मविचारस्य मोक्ष एव फलं तर्हि विचारनिष्पत्त्यनन्तरमेव उपासनानुष्ठानापत्तिः । न चेष्टापत्तिः, ब्रह्मसूत्रजन्यविचारात्मकज्ञानं विनैव श्वेतकेतुप्रभृतीनां 'तद्धास्य विजज्ञौ' इति उपासनोत्पत्त्यवगमेन उपासने विचारात्मकज्ञानस्य हेतुत्वाभावात्, उपासनस्य स्मृतिरूपतया स्वसमानविषयकानुभवस्य कारणत्वेन तत्तद्विद्यानिष्ठस्य तत्तद्विद्याप्रतिपन्नगुणविशिष्टब्रह्मज्ञानस्य कारणत्वेऽपि विद्यान्तरविचारस्यानुपयोगात् । एवं निष्पन्नब्रह्मविचारस्यैव पुरुषस्य उपासनाधिकारित्वे तुल्यन्यायान्निष्पन्नकर्मविचारस्यैव स्वशाखोक्तकर्मानुष्ठानाधिकारापत्त्या बालानां नित्यनैमित्तिकानुष्ठानानुपपत्तिश्च— इति चेत् ॥

मैवम् । कर्मफलाल्पास्थिरत्वनिश्चयसहितानन्तस्थिरफलब्रह्मज्ञानापातप्रतीतिमत एव ब्रह्मविचारे अधिकारोक्त्या ब्रह्मविचारस्य मो-

क्षफलकत्वं सिद्धान्तसिद्धमेव। तथाऽपि प्रायशः पुरुषाणामैहिकफले रागोत्कर्षदर्शनेन ब्रह्मज्ञानस्यैहिकफलाभावे तेषां ब्रह्मविचारे प्रवृत्तिर्न स्यादिति तथाविधपुरुषाणामपि प्रवृत्तिसम्पादनाय ऐहिकफलविरक्तानामपि स्वानुष्ठेयविद्याव्यतिरिक्तविद्यान्तरविचारसाधारण्येन प्रवृत्तिनिर्वाहाय समन्वयसूत्रे ब्रह्मविषयकपरोक्षज्ञानस्यापि फलत्वमुपपादितम्। 'विचार्य च ज्ञातुमिच्छेन्मुमुक्षुः'—इत्यादिश्रुत्या विचारात्मकज्ञानस्योपासनहेतुत्वावगमेन श्वेतकेतुप्रभृतीनामपि कार्यानुरोधेन विचारात्मकज्ञानं कल्प्यते। उपासने कर्मानुष्ठाने च विचारजन्यार्थज्ञानवानेवाधिकारी, अन्यथा उपदेष्टृवचनादिना शूद्रस्यापि स्वर्गादिकामनया क्रत्वनुष्ठानोपासनयोस्सम्भवेन अपशूद्राधिकरणविरोधापत्तेः ॥

न च अर्थज्ञानवतोऽधिकारित्वेऽपि तदधिकरणविरोधो दुर्वारः, पदज्ञानपदार्थोपस्थित्यादिसाध्यस्य अर्थज्ञानस्य शूद्रेऽपि सम्भवात् — इति वाच्यम् । उपनयनेनोपाकर्माद्यङ्गकेन गुरुमुखोच्चारणानूच्चारणरूपाध्ययनेन जनितयोग्यताविशेषविशिष्टो यो वेदः तज्जन्यार्थज्ञानस्यैव क्रत्वाद्यङ्गत्वेन उक्तयोग्यताशून्यवेदजन्यार्थज्ञानस्य क्रत्वाद्यङ्गत्वाभावात् ॥ उक्तं चापशूद्राधिकरणश्रीभाष्ये—

> "उपासनशास्त्रं च उपनयनादिसंस्कृतस्वाध्यायजनितं ज्ञानं विवेकविमोकादिसाधनानुगृहीतमेव स्वोपायतया स्वीकरोति"
>
> —इति ॥

अत्र उपासनशास्त्रमिति क्रतुशास्त्रस्याप्युपलक्षणम् । एवं च — उक्तज्ञानशून्यानां बालानां कर्मादावधिकारो गौण इति द्रष्टव्यम् । तस्माद्वेदान्तानां ब्रह्मपरत्वेऽपि प्रयोजनवत्त्वात्प्रामाण्यमुपपन्नम्, प्रामाण्यस्य प्रयोजनवत्त्वस्य वा प्रवृत्तिनिवृत्त्यन्यतरव्याप्यत्वाभावात्--इति॥

निष्प्रपञ्चीकरणनियोगवादिनस्तु—— प्रयोजनवत्त्वस्य प्रामाण्यस्य च प्रवृत्तिनिवृत्त्यन्यतरव्याप्यत्वमभ्युपगम्यैव ब्रह्मणि वेदान्तानां प्रामाण्यमुपपादयन्ति । यथा--सोमेन यजेतेत्यादौ सोमपदस्य सोमवति लक्षणां स्वीकृत्य सोमपदार्थस्य यागेऽभेदान्वयमभ्युपगम्य सोमवदभिन्नयागविषयककृतिसाध्यमपूर्वमिति बोधः ; लिङः कृतिसाध्यत्वेन रूपेणापूर्वार्थकत्वात् कृतिसाध्यापूर्वस्यैव नियोगशब्दार्थत्वात् तद्धटककृतौ यागस्य विषयतासम्बन्धेनान्वयात् तत्र सोमविशिष्टयागविषयकप्रवृत्तिरूपकृतौ सोमस्य विशेषणविधया विषयत्वात् सोमपरशास्त्रस्य यथा प्रवृत्तिनिवृत्त्यन्यतरपरत्वेन प्रामाण्यं प्रयोजनवत्त्वं च, तथा 'न दृष्टेर्द्रष्टारं पश्येः' इत्यादौ दृष्टिरूपब्रह्मव्यतिरिक्ताविषयकब्रह्मविषयकज्ञानविषयककृतिसाध्यमपूर्वमिति बोधात् ब्रह्मविषयकत्वविशिष्टवेदनविषयककृतौ विशेषणतया ब्रह्मणो विषयत्वात् वेदान्तानां ब्रह्मपरत्वेऽपि प्रवृत्तिनिवृत्त्यन्यतरपरत्वेनैव प्रामाण्यमुपपन्नम् । उक्तश्रुतावतिरिक्तमिति पदाध्याहारात् दृष्टिपदस्य ब्रह्मपरत्वात् द्रष्टृपदस्य छत्रिन्यायेन लक्षणया द्रष्टृदृश्योभयपरत्वात् अतिरिक्तपदार्थान्वितद्वितीयान्तद्रष्टृपदार्थस्य ब्रह्मातिरिक्तद्रष्टृदृश्यविषयकत्वस्य नञर्थाभावेऽन्वयात् नञर्थस्य दृशिधातुलक्ष्यार्थे ब्रह्मज्ञानेऽन्वयेनोक्तार्थलाभात् 'तमेवैकं जानथात्मानम्' इति श्रुत्या ब्रह्मान्याविषयकब्रह्मविषयककृतिसाध्यापूर्वस्य स्पष्टं प्रतीतेश्च ॥

न च—स्मृतिसन्ततिरूपध्यानस्य कृतिसाध्यतासम्भवेऽपि तद्भिन्नस्य वाक्यजन्यज्ञानस्य कथं कृतिसाध्यत्वमिति--वाच्यम् । भेदवासनाबाहुल्येन सर्वेषां पुरुषाणां ब्रह्मातिरिक्ताविषयकत्वस्य ज्ञाने प्रयत्नमन्तरेणानुपपत्त्या ब्रह्मान्याविषयकत्वविशिष्टज्ञानस्य कृतिसाध्यत्वोपपत्तेः ॥

उक्तं च श्रीभाष्ये—

"कोऽसौ द्रष्टृदृश्यरूपप्रपञ्चविलयद्वारेण साध्यज्ञानैकरसब्रह्मविषयो विधिः ? 'न दृष्टेर्द्रष्टारं पश्येर्न मतेर्मन्तारं मन्वीथाः' इत्येवमादिः। द्रष्टृदृश्यभेदशून्यं दृशिमात्रं ब्रह्म कुर्यादित्यर्थः। स्वतस्सिद्धस्यापि ब्रह्मणो निष्प्रपञ्चतारूपेण साध्यत्वमविरुद्धम्" —इति ॥

ब्रह्म कुर्यादिति दृशिधातुलक्ष्यार्थप्रदर्शनं। भेदशून्यमिति क्रियाविशेषणं, भेदाविषयकमित्यर्थः। ब्रह्मणः—ब्रह्मज्ञानस्य। निष्प्रपञ्चतारूपेण—भेदाविषयत्वाकारेणेत्यर्थः। तथा च प्रथमतो निर्विशेषब्रह्मविषयकं परोक्षज्ञानं कृतिसाध्यं जायते, तेन चापूर्वं, ततस्साक्षात्कारः, तेन चाविद्यातत्कार्यात्मकप्रपञ्चनिवृत्तिरूपो मोक्ष इति—**तन्मतनिष्कर्षः** ॥

ननु—मालां करोतीत्यादौ पुष्पाणां सिद्धत्वेऽपि संयोगविशेषविशिष्टपुष्पाणां कृतिसाध्यत्वभानवत् न दृष्टेर्द्रष्टारमित्यत्र प्रपञ्चाभावविशिष्टब्रह्मणः कृतिसाध्यत्वं प्रतीयते। तादृशविशिष्टविषयककृत्या अपूर्वं, तेन निर्विशेषब्रह्मसाक्षात्कारः, ततो मोक्ष इत्येव श्रीभाष्ये तन्मतमुपपादितं, न तु पूर्वोक्तरीत्या—**इति चेत्** ॥ **सत्यम्**। इष्टसाधनताधीप्रयोज्यः कृतिनिरूपितविषयताविशेषः कृतिसाध्यत्वं; यथा यागादौ स्वर्गादिसाधने घटादौ जलाहरणादिसाधने च तादृशविषयताविशेष एव कृञ्धातुसमभिव्याहारे द्वितीयार्थ इति 'यागं करोति' 'घटं करोति' इत्यादिव्यवहारः। तत्र विषयतामात्रस्य द्वितीयार्थत्वे स्वर्गं करोतीत्यादेरपि व्यवहारस्य दुर्वारत्वात् तादृशकृतिसाध्यत्वं प्रपञ्चाभावविशिष्टब्रह्मणि दुर्घटम्। प्रपञ्चाभावविशिष्टब्रह्मातिरिक्तस्य मोक्षस्य दुर्वचतया प्रपञ्चाभावविशिष्टे ब्रह्मणि स्वात्मकमोक्षसाधनत्वायोगात् प्रपञ्चाभावविशिष्टब्रह्मसाध्यककृत्या अपूर्वं, तेन साक्षात्कारः,

ततो मोक्ष इत्यस्यात्यन्तासम्भवदुक्तिकत्वापत्तेः निर्विशेषब्रह्मज्ञानमेव ब्रह्मणो निष्प्रपञ्चीकरणमिति तन्मतनिष्कर्षस्य व[illegible]त्वात् सर्वथाऽप्यसम्भाविनेऽर्थे ग्रन्थकृतां तात्पर्यायोगात् ॥

आविष्कृतश्चेत्थमेव तन्मतनिष्कर्षश्शतदूषण्याम् ॥

"नियोगवाक्यार्थस्थले नियोज्यस्याधिकारिपुरुषस्य विशेषणं दृश्यते, निमित्तं फलं चेति । तत्र साक्षाद्विशेषणं निमित्तं, कामनासम्बन्धेन विशेषणं फलम् ; यथा 'यावज्जीवमग्निहोत्रं जुहुयात्' इत्यादौ साक्षादधिकारिविशेषणं जीवनं निमित्तं ; स्वर्गकामो यजेतेत्यादौ कामनासम्बन्धेन विशेषणं स्वर्गश्चेति । प्रकृते किमधिकारिविशेषणं ? निर्विशेषब्रह्मज्ञानस्य निमित्ततया अधिकारिविशेषणत्वं न सम्भवति, तस्य निष्प्रपञ्चब्रह्मविषयकृतिसाध्यापूर्वजन्यत्वाभ्युपगमेन पूर्वसिद्धत्वाभावात् ॥ न च—परोक्षज्ञानं सिद्धत्वादधिकारिविशेषणं, अपरोक्षज्ञानं च नियोगसाध्यमित्यङ्गीकारान्न दोष इति—वाच्यम् । श्रवणादिजन्यनिर्विशेषब्रह्मविषयकपरोक्षज्ञानजननातिरिक्तस्य निष्प्रपञ्चीकरणशब्दार्थस्य दुर्वचतया तादृशपरोक्षज्ञानस्यापूर्वजनककृतिविषयत्वेन यागादिवत् करणतया अधिकारिविशेषणत्वासम्भवात्" —इत्युक्तम् ॥

ननु—उक्तरीत्या तन्मतनिष्कर्षे 'नियोगवाक्यार्थवादिना हि नियोगो नियोज्यविशेषणं विषयः करणमितिकर्तव्यता प्रयोक्ता च वक्तव्याः' इत्यादिना तन्मते नियोज्यविशेषणादीनां दुर्वचत्वाभिधानं श्रीभाष्येऽनुपपन्नम् । कामनासम्बन्धेनाधिकारिविशेषणस्य निर्विशेषब्रह्मसाक्षात्काररूपस्य मोक्षरूपस्य वा फलस्य नियोज्यविशेषणस्य सुवचत्वात् ; निर्विशेषब्रह्मविषयकपरोक्षज्ञानस्य नियोगजनककृतिविषयीभूतस्य मोक्षकरणस्य, श्रवणादिरूपाणामितिकर्तव्यतानां,

निर्विशेषब्रह्म
चेत् ॥ साक्षात्कर्तुर्नियोगाश्रयरूपप्रयोक्तुश्च सुवचत्वात्–इति

उच्यते–निर्विशेषब्रह्मसाक्षात्कारो नियोज्यविशेषणमित्ययुक्तम् । किं शब्दजन्यः, नियोगरूपादृष्टजन्यः, स्वप्रकाशात्मकब्रह्मस्वरूपसाक्षात्कारो वा? नाद्यः, शब्दस्य साक्षात्कारजनकत्वासम्भवस्यान्यत्र प्रपञ्चितत्वात् । न द्वितीयः, योगजन्यादृष्टस्य साक्षात्कारजनकत्वसम्भवेऽपि वाक्यार्थज्ञानजन्यादृष्टस्य साक्षात्कारजनकताया अप्रामाणिकत्वात् । न तृतीयः, स्वप्रकाशसाक्षात्कारस्य नित्यत्वेनेच्छाविषयत्वायोगे कामनासम्बन्धेन विशेषणस्वरूपस्य फलविधया विशेषणत्वस्यासम्भवात् । तस्य निमित्तविधया विशेषणत्वे अपवर्गोत्तरकालमपि सत्त्वेन तदानीमपि निर्विशेषब्रह्मज्ञानरूपशास्त्रार्थानुष्ठानप्रसङ्गः, जीवननिमित्ताग्निहोत्रस्य यावज्जीवमनुष्ठानदर्शनेन निमित्तसत्त्वे तत्प्रयुक्तशास्त्रार्थानुष्ठानस्यावर्जनीयत्वात् । मोक्षस्य फलविधया विशेषणत्वमपि न युक्तम्, नियोगफलस्य स्वर्गादिवदनित्यत्वनियमेन मोक्षस्यानित्यताप्रसङ्गात् ॥

उक्तं च श्रीभाष्ये—

"अत्र किं नियोज्यविशेषणम्? तच्च किं, निमित्तं फलं वा? इति विवेचनीयम् । ब्रह्मस्वरूपयाथात्म्यानुभवश्चेन्नियोज्यविशेषणं, तर्हि न तन्निमित्तं; जीवनादिवत्तस्यासिद्धत्वात् । निमित्तत्वे च तस्य नित्यत्वेनापवर्गोत्तरकालमपि जीवननिमित्ताग्निहोत्रादिवत् नित्यतद्विषयानुष्ठानप्रसङ्गः" —इति ॥

तस्यासिद्धत्वात्–जन्यनिर्विशेषब्रह्मसाक्षात्कारस्यासिद्धत्वात् । तस्य नित्यत्वेन–स्वरूपात्मकब्रह्मसाक्षात्कारस्य नित्यत्वेनेत्यर्थः ॥

न च–स्वरूपात्मकसाक्षात्कारस्यापवर्गे सत्त्वेऽपि करणकलेबराभावात् नानुष्ठानापत्तिः, करणकलेबरादिमन्तं प्रत्येव शास्त्रस्य

प्रवृत्तेः—इति वाच्यम् । अपवर्गात्पूर्वं जीवब्रह्मणोर्व्यावहारिकभेदसत्त्वे ब्रह्मस्वरूपात्मकसाक्षात्कारस्य जीवनिष्ठत्वासम्भवात् तदुत्तरमेव जीवनिष्ठतया निमित्तत्वमभ्युपेयम्, तद्दशायां विषयानुष्ठानस्याशक्यत्वे निमित्तत्वानुपपत्त्या विषयानुष्ठानं शक्यमित्यङ्गीकरणीयम् ; तथा च—अपवर्गोत्तरकालमनुष्ठानप्रसङ्ग इत्यत्र श्रीभाष्यतात्पर्यात् ॥

स्पष्टं चेदं टीकायां—

"निर्विशेषब्रह्मविषयकं शब्दजन्यं वृत्त्यात्मकपरोक्षज्ञानमेव करणभूतो विषय इत्यपि न युक्तम्। निर्विशेषस्य वृत्तिविषयत्वाङ्गीकारे विषयरूपधर्ममादाय सविशेषत्वापत्त्या तद्विषयकपरोक्षज्ञानाङ्गीकारस्यायुक्तत्वात् तद्विशेषणतया ब्रह्मणः प्रवृत्तिविषयत्वायोगात्, धात्वर्थयागादेरेव साक्षात्कृतौ विषयतयाऽन्वयदर्शनेन ब्रह्मणो धात्वर्थत्वाभावेन तस्य कृतावन्वयासम्भवात् नित्यस्य ब्रह्मणः कृतिसाध्यत्वरूपविषयत्वासम्भवाच्च ॥

न च—संयोगविशेषविशिष्टपुष्पाणामिव प्रपञ्चनिवृत्तिविशिष्टब्रह्मणः कृतिसाध्यत्वं सम्भवतीति—वाच्यम् । प्राप्ताप्राप्तविवेकेन प्रपञ्चनिवृत्तेरेव कृतिसाध्यत्वे पर्यवसानात् तस्याश्च मोक्षरूपत्वेन कृत्युद्देश्यतया कृतिसाध्यत्वायोगात् ॥

न च—ब्रह्मगताविद्यानिवृत्तित्वेन कृतिसाध्यत्वं स्वगताविद्यानिवृत्तित्वेन कृत्युद्देश्यत्वमिति रूपभेदादुभयोपपत्तिरिति—वाच्यम् । ब्रह्मनिष्ठप्रपञ्चनिवृत्तेः कृतिविषयत्वे हि तादृशविषयानुष्ठानेनैव ब्रह्मस्वरूपव्यतिरिक्तस्य कृत्स्नस्य निवृत्तत्वान्न नियोगनिष्पाद्यं मोक्षाख्यं फलमवशिष्यते ; तादृशविषयाऽनुष्ठानेनैव प्रयोक्तुरपि नाशादाश्रयाभावेन नियोगासिद्धिश्च ॥

यत्तु—कश्चात्र नियोगविषयः? ब्रह्मैवेति चेन्न, तस्य नित्यत्वेनाभव्यरूपत्वादभावार्थत्वाच्च—इत्यादिभाष्यम् ; तत्तु ब्रह्मणो निर्विशेषस्य

वृत्ति विषयत्वायोगेन वृत्तिविशेषणतया कृतिविषयत्वायोगात् साक्षादेव कृतिविषयत्वं वाच्यमित्यभिप्रायेण साक्षात्कृतिविषयत्वखण्डनपरम् । अतो निर्विशेषब्रह्मज्ञानस्य निष्प्रपञ्चीकरणरूपत्वेऽपि न विरोधः । एवमेवोत्तरभाष्यादिकमप्यविरोधेन योजनीयम् ॥

यद्वा—प्रातिभासिकी या प्रपञ्चनिवृत्तिः तद्विशिष्टब्रह्मविषयककृत्याऽपूर्वं, तेन निर्विशेषब्रह्मसाक्षात्कारः, तदनन्तरं च प्रातिभासिकभिन्नप्रपञ्चनिवृत्तिरूपो मोक्ष इत्येव निष्प्रपञ्चीकरणनियोगवादनिष्कर्षः ॥ एवं च प्रपञ्चनिवृत्तिविशिष्टब्रह्मणो विषयत्वप्रतिपादनपरं भाष्यं स्वरसनस्सङ्गच्छते । प्रपञ्चनिवृत्तिविशिष्टब्रह्मविषयककृतिश्च तादृशविशिष्टसत्तानिर्वाहको व्यापारः । स च तद्विषयकज्ञानरूप एव, प्रातिभासिकविषयकज्ञानस्य प्रातिभासिकसत्ताप्रयोजकत्वात् ॥ अत एव—

'यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते' ----इति

तैत्तिरीयश्रुतौ प्रातिभासिकभेदविषयकज्ञानस्य भेदप्रयोजकत्वमभिहितम् ॥

"स यत्र प्रस्वपित्यस्य लोकस्य सर्वावतो मात्रामुपादाय स्वयं निहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा स्वपिति" —इति

बृहदारण्यकश्रुतावपि स्वाप्नार्थज्ञानस्य स्वाप्नार्थनिर्माणरूपत्वमुक्तम् । सिद्धान्ते तु धर्मभूतज्ञानावस्थाविशेषस्यैव कृतिरूपत्वात् ज्ञानत्वावस्थासामान्ये कृतित्वानङ्गीकारेऽपि भ्रमात्मकज्ञाने स्वाप्नार्थज्ञाने उपासनात्मकज्ञाने च कृतित्वमङ्गीक्रियते । ततश्च भेदं कुरुते स्वयं निर्मायेत्यस्योपपत्तिः । एतदभिप्रेत्यैव **वैश्वानराधिकरणे श्रीभाष्ये**—

"'हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः' इति वैश्वानरस्य हृदयस्थस्याग्नित्रयकल्पनमाश्रीयते" इत्युक्तम् ।

अग्नित्रयकल्पनं--अग्नित्रयनिष्ठप्रकारतानिरूपितविशेष्यता क्रियत इत्यर्थः । तादृशविशेष्यताप्रयोजकस्य भ्रमात्मकज्ञानस्य कृतित्वात् ॥

प्रथमसूत्रश्रीभाष्येऽपि–

"यद्यहमित्येवात्मनस्स्वरूपं, कथं तर्हि अहङ्कारस्य क्षेत्रान्तर्भावो भगवतैवोपदिश्यते 'महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च' इति ?॥ उच्यते । स्वरूपोपदेशेषु सर्वेष्वहमित्येवोपदेशात्तथैव स्वरूपप्रतिपत्तेश्च अहमित्येव प्रत्यगात्मनः स्वरूपं, अव्यक्तपरिणामभेदस्य अहङ्कारस्य क्षेत्रान्तर्भावो भगवतैवोपदिश्यते; स त्वनात्मनि देहे अहम्भावकरणहेतुत्वेनाहङ्कार इत्युच्यते। अस्य त्वहङ्कारशब्दस्य अभूततद्भावार्थे च्विप्रत्ययमुत्पाद्य व्युत्पत्तिर्द्रष्टव्या । अयमेव त्वहङ्कार उत्कृष्टजनावमानहेतुर्गर्वापरनामा शास्त्रेषु बहुशो हेयतया प्रतिपाद्यते"–

—**इत्युक्तम्** ॥

अयमर्थः ॥ अहङ्कारशब्दो हि—प्रकृतेर्महान् , महतोऽहङ्कारः, इति परिगणिते अन्तःकरणनामके अव्यक्तपरिणामे 'गर्वोऽभिमानोऽहङ्कारः' इति कोशप्रसिद्धे अन्तःकरणवृत्तिविशेषे च शास्त्रे प्रयुज्यते। अव्यक्तपरिणामे तावत्-- 'महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च'–इति ॥ अन्तःकरणवृत्तौ च–

'अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममश्शान्तो ब्रह्मभूयाय कल्पते ॥' —इति,

'निर्ममो निरहङ्कारः', 'अहङ्कारविमूढात्मा', इत्यादि च ॥

तथा च--अन्तःकरणतद्वृत्त्योरेव **अहङ्कारशब्दप्रयोगात्** तद्घटकाहंशब्दस्याप्यन्तःकरणपरत्वं युक्तम्–इति **शङ्काग्रन्थार्थः** ॥

अहङ्कारशब्दो हि–अनहमहं क्रियते अनेनेति करणेव्युत्पन्नः च्विप्रत्ययगर्भ एकः; भावे व्युत्पन्नस्तु च्विप्रत्ययगर्भः, तदगर्भश्च–इति द्विविधः । तत्र प्रथमः अव्यक्तपरिणामपरः, द्वितीयो गर्वपरः,

तृतीयस्त्वहंग्रहणोपासनपरः 'अथातोऽहङ्कारादेशः' इत्यत्र प्रसिद्धः । तत्र प्रथमद्वितीययोः कृञ्धातुः कृतिजन्यत्वावस्थापन्नभ्रमात्मकज्ञानपरः, तृतीये तु तादृशोपासनापर इति भेदः । तत्र प्रथमाहङ्कारशब्दघटकाहम्पदेन तादात्म्यसम्बन्धावच्छिन्नाहमर्थनिष्ठप्रकारतानिरूपितविशेष्यताश्रयो देहो लक्ष्यते । तदुत्तरच्विप्रत्ययार्थश्च तादृशविशेष्यतारूपो धर्मः । तादृशधर्मे चाधेयत्वस्वनिष्ठपूर्वकालावच्छिन्नाभावप्रतियोगित्वोभयसम्बन्धेन प्रकृत्यर्थस्यान्वयः; तादृशविशेष्यतायाश्च कृधात्वर्थभ्रमे प्रयोजकतयाऽन्वयात् अहमर्थप्रकारतानिरूपितविशेष्यताशून्ये देहे तादृशविशेष्यताप्रयोजको भ्रम इत्युच्यते । भ्रमं प्रति तमोगुणाभिव्यक्तिविशिष्टाहङ्कारस्य दोषविधया हेतुत्वात् अहङ्कारपदेन तादृशतामसाहङ्कारस्य बोधोपपत्तिः, अहङ्कारगततमोगुणाभिव्यक्तेः पूर्वं देहे तादृशविशेष्यत्वाभावसत्त्वात् ॥ न च—च्विप्रत्ययस्य स्वप्रकृत्यर्थतावच्छेदकधर्मेषु शक्त्यङ्गीकारे शक्त्यानन्त्यापत्त्या धर्मसामान्ये शक्तिरङ्गीकरणीया, तथा च च्विप्रत्ययेन प्रकृत्यर्थतावच्छेदकीभूततादृशविशेष्यत्वस्य विशिष्य बोधानुपपत्तिरिति—वाच्यम् । स्वप्रकृत्यर्थतावच्छेदकधर्मेषु च्विप्रत्ययस्य शक्त्यङ्गीकारेऽपि तदादिन्यायेन शक्त्यैक्यसम्भवात् धर्मसामान्ये शक्तत्वेऽपि प्रकृत्यर्थतावच्छेदकतत्तद्धर्मनिष्ठाधेयताविशेषाणामेव सम्बन्धतया भानोपगमेन प्रकृत्यर्थतावच्छेदकधर्माणामेव धर्मत्वरूपसामान्याकारेण भाननिर्वाहात् । 'कषायेण रक्तीकृतः पटः' इत्यादौ रक्तपदस्य रक्तत्वप्रकारकारोपविषये लक्षणादर्शनेन प्रकृतेऽपि च्विप्रत्ययप्रकृत्यहम्पदस्य लक्षणाङ्गीकारो न दोषाय, व्युत्पत्तिवादे 'तेन रक्तं रागात्' इति सूत्रे तत्सम्बन्धाधीनतदीयरूपारोपविषयत्वं तेन रक्तत्वमित्युक्त्या कषायेण रक्तीकृत इति च्विप्रत्ययस्थलेऽपि लक्षणासूचनात्—**इति परिहारग्रन्थाभिप्रेतम्** ॥

तत्र–'अयमेव त्वहङ्कारः' इत्ययंशब्देनाहम्भावकरणहेतुत्वेने-
त्येतद्घटकीभूतोऽहम्भावः परामृश्यते, न त्वहम्भावकरणहेतु-
भूतः प्रकृतिपरिणामविशेषः, तस्य गर्वनामकत्वासम्भवात्—
—इति **व्यासार्याः** ॥

वेदान्ताचार्यास्तु—

"भाष्यस्थायंपदेन प्रकृतिपरिणामस्याहम्भावकरणहेतुभूतस्यैव ग्रहणम्। न च–तादृशप्रकृतिपरिणामस्योत्कृष्टजनावमानहेतुत्वगर्वनामकत्वयोरन्वयानुपपत्तिरिति – वाच्यम् ; तद्भाप्यस्याहमर्थहेयत्वनिरासपरत्वेनान्यार्थतयाऽन्वारुह्याप्युपपत्तेः, स्वार्थे तात्पर्याभावात्; यद्वा परम्परयोत्कृष्टजनावमानहेतुत्वादिकं विवक्षितमित्यविरोधः"—इति **सर्वार्थसिद्धौ** प्रतिपादयन्ति ॥

तथा च–कृञ्धातोर्भ्रमात्मकज्ञानपरतया प्रयोगात् ब्रह्मविशेष्यकप्रातिभासिकप्रपञ्चनिवृत्तिविषयकज्ञानस्य निष्प्रपञ्चीकरणशब्दार्थत्वमुपपन्नम् ॥

ननु–तादृशज्ञानस्य निष्प्रपञ्चीकरणशब्दार्थत्वेऽपि श्रीभाष्यविरोधो दुर्वारः, तत्र प्रपञ्चनिवृत्तेः मोक्षरूपत्वेन फलतया कृत्युद्देश्यत्वेन कृतिसाध्यत्वाभावप्रतिपादनात्, उक्तार्थे प्रातिभासिकपारमार्थिकरूपयोर्निवृत्त्योर्भेदेन विषयत्वोपपत्तिसम्भवात्–इति चेन्न ॥ प्रातिभासिकपदार्थस्याप्रामाणिकतया पारमार्थिकनिवृत्तेरेव विषयत्वं वाच्यम्, तच्च नोपपद्यते, तस्याः कृत्युद्देश्यत्वात्–इत्यभिप्रायकतया भाष्यस्य प्रवृत्तत्वेन विरोधाभावात् ॥

वस्तुतस्तु–एकस्या एवाविद्यादिरूपप्रपञ्चनिवृत्तेः ब्रह्मनिष्ठत्वस्वनिष्ठत्वाभ्यां कृतिसाध्यत्वकृत्युद्देश्यत्वयोरुपपत्तिः ॥ न च–प्रपञ्चनिवृत्तिविशिष्टब्रह्मरूपविषयानुष्ठानेनैव ब्रह्मस्वरूपव्यतिरिक्तस्य कृत्स्न-

स्य निवृत्तत्वान्न नियोगनिष्पाद्यमवशिष्यते—इति वाच्यम् । प्रथमतः प्रपञ्चनिवृत्तिविशिष्टब्रह्मानुपधायिका तादृशविशिष्टब्रह्मविषयिणी कृतिर्जायते, तया चापूर्वं, ततस्साक्षात्कारद्वारा प्रपञ्चनिवृत्त्युपधानमिति तन्मतनिष्कर्षात्—वृष्टिगुरुतरभारोत्तोलनादिक्रियाविषयकयत्नसत्त्वेऽपि तत्क्रियाया अनिष्पत्तिदर्शनेन तद्गोचरकृतेस्तदुपधायकत्वमिति नियमाभावात् 'न दृष्टेर्द्रष्टारं पश्येः' इत्यादिश्रुतौ द्रष्टृदृश्यशून्यब्रह्मगोचरकृतिर्विवक्षिता न तु तदुपधायिकाऽपीति तदनुपधायककृत्याऽपि नियोगरूपादृष्टोपपत्तिरिति ॥

ननु च—उक्तरीत्या तन्मतनिष्कर्षे प्रपञ्चनिवृत्त्या नियोगो नियोगात्प्रपञ्चनिवृत्तिरित्यन्योन्याश्रयाभिधानं नियोगस्य कृत्स्नप्रपञ्चनिवृत्तिरूपविषयानुष्ठानसाध्यत्वेन नियोगाश्रयस्य प्रयोक्तुरपि तेन नाशात् नियोगासिद्धिरित्यादि दूषणं च श्रीभाष्योक्तं नोपपद्यते, प्रपञ्चनिवृत्त्यनुपधायकतद्विषयककृत्या नियोगाभ्युपगमेऽन्योन्याश्रयस्याश्रयनाशस्य चाप्रसक्तेः । एवमितिकर्तव्यताविरहाभिधानमपि न युज्यते, प्रपञ्चनिवृत्तिविषयककृतौ तद्विषयकज्ञानेच्छयोरेव इतिकर्तव्यतात्वसम्भवात्—इति चेत् ॥ उच्यते । पाकविषयककृतिमात्रसत्त्वे पाकाद्यनिष्पत्तिदशायामपि पाकं करोतीत्यादिव्यवहारवारणाय विषयत्वस्य द्वितीयार्थत्वे स्वाश्रयोपधायकत्वनिरूपकत्वोभयसम्बन्धेन, विषयित्वस्य तदर्थत्वे स्वनिरूपकोपधायकत्वाश्रयत्वोभयसम्बन्धेन, कृञ्धात्वर्थेऽन्वय इत्यङ्गीकरणीयम् ॥

अत एव व्युत्पत्तिवादे—

"चैत्रः पचतीत्यादावाख्यातार्थकृतावुपधायकत्वविषयित्वोभयसम्बन्धेन पाकाद्यन्वयात् न पाकाद्यनिष्पत्तिदशायां पचतीति प्रयोगः । एवं चैत्रेण पच्यत इत्यादौ कृतेस्तृतीयार्थत्वे जन्यत्वविषयत्वोभयसम्बन्धेन तस्याः पाकेऽन्वयः । कृतिजन्यत्वस्य

तृतीयार्थत्वेऽपि स्वनिरूपकविषयत्वं सम्बन्धमध्ये निवेशनीयम् । कृतिविषयत्वमेव वा तृतीयार्थः । स्वनिरूपकजन्यत्वं–विषयतायास्सम्बन्धमध्ये अन्तर्भावनीयम्" —इत्युक्तम् ॥

एवं च–तदनुपधायकतद्विषयककृतिबोधस्याप्रामाणिकतया प्रपञ्चाभावविशिष्टब्रह्मविषयकविशिष्टोपधायककृतेरेव 'न दृष्टेर्द्रष्टारं पश्येः' इत्यादिवाक्यात् बोध इत्यङ्गीकार्यम् । ततश्च 'यजेत स्वर्गकामः' इत्यादौ यागकृत्या निष्पन्नेन यागेनापूर्वं, ततस्स्वर्ग इतिवत्–प्रपञ्चनिवृत्तिविषयकृत्या प्रपञ्चनिवृत्तिः, तया चापूर्वं, तेन च साक्षात्कारद्वारा प्रपञ्चनिवृत्तिरूपो मोक्षः–इत्येव तैस्स्वीकार्यमित्यभिप्रायेण **श्रीभाष्ये** अन्योन्याश्रयाद्यभिधानम् ॥

न च–तदनुपधायकतद्विषयककृतिबोधोऽपि क्वचिदनुभवसिद्धः–

'निध्यञ्जनौषधीमूलं खनता साधितो निधिः',

'विनायकं प्रकुर्वाणो रचयामास वानरम्'—

इत्यादावन्यविषयककृत्याऽन्योपाधानस्य उक्तत्वादिति–वाच्यम् । तदनुपधायकतद्विषयककृतिबोधस्य प्रामाणिकत्वेऽपि नियोगवाक्यार्थस्थले कृतिविषयीभूतयागादेरेवापूर्वद्वारा फलजनकत्वदर्शनेन कृतिजन्यप्रपञ्चनिवृत्तेरेवापूर्वजनकत्वरूपकरणत्वस्य वाच्यतयाऽन्योन्याश्रयादेर्दुर्वारत्वात् ॥ अत एव **श्रीभाष्ये**—नियोगो नियोज्यविशेषणं करणमितिकर्तव्यता प्रयोक्ता च वक्तव्याः–इत्यनुक्त्वा 'विषयः करणम्' इति करणे विषय इति विशेषणमुपात्तम् । नियोगादौ विशेषणमनुपादाय करणे विषय इति विशेषणोपादानं–कृतेः करणत्वमयुक्तम्, यागादिस्थल इव कृतिविषयस्य करणत्वं वक्तव्यम्–इत्यभिप्रायगर्भम् । तेन च तैः कृतेरेव करणत्वमुच्यत इति सूच्यते ॥

व्यञ्जितं चेदं **टीकायाम्**—

"विशिंषन्निति विषय इति व्युत्पत्त्या विषयो यागादिः कृतिसाध्या

पूर्वप्रतिपत्तिवेलायां कृत्यवच्छेदकत्वेन विषयः, स एव कार्यनिष्पत्तौ करणम्" इति ॥

अत्र–एवकारेण कृतेः करणत्वव्यवच्छेदः । इत्थं च कृतेः करणत्वायोगात् करणजनकतदनुग्राहकयोरेव इतिकर्तव्यतात्वात् कृतिजनकज्ञानेच्छयोरितिकर्तव्यतात्वासम्भवात् प्रपञ्चनिवृत्तिजनकतदनुग्राहकयोरेव तथात्वं वक्तव्यमित्यभिप्रायेण श्रीभाष्ये इतिकर्तव्यताखण्डनं कृतम् ॥

तथा हि—

इतिकर्तव्यता तावद्द्विविधा; करणस्वरूपोत्पादिका, तज्जन्यापूर्वरूपकार्योत्पादिका चेति । आद्या द्विविधा–दृष्टद्वारा करणोत्पादिका अदृष्टद्वारा च ; यथा व्रीहीनवहन्तीति विहितावघातादिकं तण्डुलपुरोडाशादिरूपदृष्टद्वारा यागजनकम्, व्रीहीन् प्रोक्षतीति विहितप्रोक्षणं च अदृष्टद्वारा यागादिरूपकरणनिष्पादकम् । द्वितीया च दक्षिणादानाद्युत्तराङ्गं यागजन्ये परमापूर्वे स्वजन्यकालिकापूर्वद्वारा कारणं। दृष्टद्वारा करणोत्पादिकारूपेतिकर्तव्यता प्रकृते न सम्भवति, घटादिनिवृत्तिहेतुभूतस्य मुद्गरादिघातादेरिव कृत्स्नप्रपञ्चनिवृत्तिहेतुभूतस्य कस्याप्यदर्शनात् ॥

न च–अद्वितीयत्वोपलक्षितब्रह्मज्ञानं प्रपञ्चनिवृत्तिरूपकरणजनकत्वात् भावरूपेतिकर्तव्यता–इति वाच्यम् । तस्य साक्षादेव प्रपंचनिवृत्तिरूपमोक्षहेतुत्वस्य युक्तत्वेन मोक्षकारणजनकत्वायोगात् ॥ न च – अन्तरिन्द्रियबहिरिन्द्रियाद्यप्रवृत्तिरूपशमदमयोरभावरूपेतिकर्तव्यतात्वं सम्भवतीति–वाच्यम् । शमादीनां ज्ञानजनकत्वेन प्रपंचनिवृत्तिरूपकरणनिष्पादकत्वायोगात्, अदृष्टद्वारा भावस्याभावस्य वा प्रपंचनिवृत्तिजनकत्वाङ्गीकारे प्रपंचस्य ज्ञाननिवर्त्यत्वाभावेन मिथ्यात्वानुपपत्तेः ॥

तथा च—दृष्टादृष्टद्वारभेदभिन्ना करणस्वरूपोत्पादिका भावरूपाऽभावरूपा वा इतिकर्तव्यता न सम्भवति । नापि करणजन्यकार्योत्पादिकेतिकर्तव्यता प्रकृते सम्भवति तादृशेतिकर्तव्यतायाः दक्षिणादानादेरिव करणस्वरूपनिष्पत्त्यनन्तरकालवृत्तित्वावश्यकतया कृत्स्नप्रपञ्चनिवृत्तिरूपकरणनिष्पत्त्यनन्तरं तादृशेतिकर्तव्यताया अपि प्रपञ्चान्तर्गतत्वेन सद्भावानुपपत्तेः ॥

न च—भावरूपेतिकर्तव्यतायाः प्रपञ्चनिवृत्त्यनन्तरकालवृत्तित्वासम्भवेऽपि अभावरूपायास्तस्याः सम्भव इति—वाच्यम् । तथाविधेतिकर्तव्यताया अदर्शनेनाप्रामाणिकत्वात् तादृशेतिकर्तव्यताया अपि कृत्स्नप्रपञ्चनिवृत्त्यन्तर्गतत्वेन करणे इतिकर्तव्यताया भेदासिद्धेश्च ॥

तदेतदभिप्रेत्योक्तं **श्रीभाष्ये**—

> "अभावरूपत्वे चाभावादेव न करणशरीरं निष्पादयति, नाप्यनुग्रहम्"— इति ॥

अत्र टीका—'अभावादेव--अभावरूपेतिकर्तव्यतायाः अप्रामाणिकत्वादेवेत्यर्थः' इति ॥

शतदूषण्यां तु—

> "अभावात्—कृत्स्नप्रपञ्चनिवृत्त्यनन्तर्गतत्वेन करणात्, पृथगभावादित्यर्थः । केचित्तु अस्य भाष्यस्यैवमर्थमाहुः—अभावत्वादेव न हेतुत्वमुच्यत इति । तत्र शब्दास्वारस्यमर्थानौचित्यादिकं च द्रष्टव्यम्" —इत्युक्तम् ॥

परे तु—

"प्रपञ्चस्याविद्योपादानकत्वात् अविद्यानिवृत्त्या प्रपञ्चस्य निवृत्तिः, उपादाननाशस्य उपादेयनाशजनकताया लोकसिद्धत्वात् । तथा च प्रपञ्चनिवृत्तावविद्यानिवृत्तिरेवेतिकर्तव्यतेत्याशङ्कानिरासपरं **अभावरूपत्वे चेत्यादिभाष्यम्** ॥ अभावादेव—अविद्यानिवृत्तेरभाव-

त्वादेव असत्त्वादेव, न हेतुत्वमित्यर्थः ॥ तन्मते तावत्--अविद्यानिवृत्तिर्न सती, ब्रह्मव्यतिरिक्तत्वात्; नापि सदसदात्मिका, सत्त्वासत्त्वयोरेकत्र विरोधेन व्याघातात्; नापि सदसद्विलक्षणा, सदसद्विलक्षणभूताया अविद्यानिवृत्तेर्मिथ्यात्वेन तस्या अपि निवृत्त्यापत्त्या अविद्योन्मज्जनप्रसङ्गात् । अतः परिशेषात् असती वा, तामपि कोटीमतीत्य पञ्चमप्रकारा वा, अविद्यानिवृत्तिरित्यभ्युपगम्यते ॥ एवञ्च--अविद्यानिवृत्तेरसत्त्वे पञ्चमप्रकारत्वे वा कालसम्बन्धित्वासम्भवात् कालसम्बन्धित्वघटितहेतुत्वं तस्या नोपपद्यत इति भावः"--

—इत्याहुः ॥

तस्मान्निष्प्रपञ्चीकरणनियोगवादस्यायुक्तत्वात् तादृशकार्यान्विततया वेदान्तानां ब्रह्मणि प्रामाण्यमिति न युक्तमित्यादिकमन्यत्र प्रपञ्चितमिति दिक् ॥

शेषार्य[illegible]न यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

इति

श्रीशेषार्यवंशमुक्ताफलस्य श्रीयादवाद्रिनिवासरसिकस्य

श्रीमदनन्तार्यवर्यस्य कृतिषु

शास्त्रारम्भसमर्थनवादः

समाप्तः ॥

॥ श्रीः ॥

॥ श्रीः ॥

शास्त्रारम्भसमर्थन-

तात्पर्यदीपिका.[1]

श्रीशं श्रीयादवाद्रीशं श्रीलक्ष्मणमुनिं मुदा ।
प्रणम्य विदुषां प्रीत्यै कुर्वे तात्पर्यदीपिकाम् ॥

पु. प.

१. १. **हेतव इति** ॥ ग्रन्थारम्भे स्वेष्टदेवतां ग्रन्थकृत्प्रणमति हेतवे सर्वजगतामित्यादिना ॥ हेतव इति–त्रिविधकारणायेत्यर्थः । यादवगिराविति–अर्चारूपेणावतीर्णाय; नारायणायेति शेषः । अत्र जगत्कारणत्वहेयप्रत्यनीकत्वाभ्यां परत्वं, यादवगिरावित्यादिना सौलभ्यं, श्रियःकान्तत्वेन आश्रितसंरक्षणोपयोगि कल्याणगुणजातं च प्रतिपाद्यते ॥ अनेन प्रेक्षावत्प्रवृत्तये शास्त्रार्थसंक्षेपश्चार्थतः कृतो भवति ॥

१. ७. **श्रीमद्रामानुजार्यमिति** ॥ ईश्वरनमस्कारानन्तरमाचार्यं नमस्करोति श्रीमद्रामानुजार्यमित्यादिना ॥ आचार्योपदिष्टार्थस्य सर्वस्यापि मनसि सुप्रतिष्ठितत्वं भगवत्कटाक्षविशेषप्रवर्तितसत्त्वोद्रेकनिष्ठस्यैव भवतीति द्योतनायेश्वरनमस्कारस्य प्राथम्यमिति बोध्यम् । अत्र वीचीतृणशब्दाभ्यां श्रीमाष्याध्येतृभिरनायासेनैव प्रतिपक्षनिरसनं कर्तुं शक्यमिति व्यज्यते ॥

१३. **शास्त्रारम्भार्थेति** ॥ श्रोतृबुद्धिसमाधानार्थं स्वसिद्धान्तमादौ प्रदर्शयति शास्त्रारम्भार्थेत्यादिना ॥

---

१. श्रीयादवाद्रिनिवासिभिः श्री॥ उ॥ ति. ऐ. स्या. कुप्पनैयङ्गार्यैव-रचिता.

पु. प.

२. ६. **नन्विति** ॥ शास्त्रारम्भार्थत्वं चतुस्सूत्र्या न सम्भवति, आप्तोपदेशादिनाऽपि तत्सम्भवादित्याशङ्कते नन्विति ॥

२. ८. **चेन्नेति** । समाधत्ते नेति ॥ **अल्पायाससाध्यचतुस्सूत्रीमवृत्ताविति** । अयं भावः—इष्टसाधनताज्ञानजन्यप्रवृत्तेर्निष्फलत्वे प्रवर्तमानस्य दुःखानुभवदर्शनात्प्रवृत्तित्वेनेष्टसाधनताज्ञानत्वेन कार्यकारणभावनिर्णयादेव तत्तत्कार्येषु प्रवर्तते पुरुष इत्यङ्गीकरणीयम् । अल्पायाससाध्यप्रवृत्तेः कदाचिन्निष्फलत्वसम्भवेऽपि बलवत्तरदुःखानुभवादर्शनात् अप्रामाण्यज्ञानास्कन्दितेष्टसाधनताज्ञानादपि क्वचित्प्रवृत्तिरुपेयते । बह्वायाससाध्यप्रवृत्तेर्निष्फलत्वे बलवत्तरदुःखानुभवदर्शनेन अप्रामाण्यज्ञानानास्कन्दितेष्टसाधनताज्ञानस्यैव प्रवृत्तिहेतुत्वाङ्गीकार उचित इति ॥ तथा चोक्तं **मणिकृता**—'बहुवित्तव्ययायाससाध्ये प्रवृत्तिश्चावश्यकार्थनिश्चयादेव' इति ॥

२. १३. **नन्विति** ॥ यद्धर्मावच्छिन्ने प्रवृत्तिः, तद्धर्मावच्छिन्नविषयकेष्टसाधनताज्ञानं कारणं, चतुस्सूत्र्या तु न तथाविधं ज्ञानं जन्यते—इति कथं तस्याश्शास्त्रारम्भार्थत्वमिति शङ्कते नन्वित्यादिना ॥

३. ११. **मैवमिति** ॥ अत्र शास्त्रारम्भार्थत्वं न तावत् शास्त्रविषयकप्रेक्षावत्प्रवृत्तिहेतुभूतज्ञानसम्पादकत्वं, किन्तु शास्त्रप्रवृत्तिहेतुभूतेष्टसाधनताज्ञानप्रतिबन्धकज्ञानविघटकत्वम् । तच्च चतुस्सूत्र्या जन्यत इति समाधत्ते मैवमित्यादिना ॥

४. २०. **नन्विति** ॥ ननु शब्दसामान्यस्य सिद्धार्थविषयकतात्पर्याभावप्रयोजकीभूताभावप्रतियोगिसिद्धार्थकत्वं न सम्भवति, तत्तदर्थगोचरशक्तितात्पर्ययोर्व्याप्यव्यापकभावाभावात्—इत्याशङ्कते नन्विति ॥

पु. प.

५. १. चेन्नेति ॥ समाधत्ते नेति । अयं भावः—प्राभाकरमते शक्तितात्पर्ययोरत्यन्तभेदाभावेन व्याप्यव्यापकभावस्य सूपपादतया पदानां सिद्धार्थबोधकत्वरूपव्यापकाभावे तद्व्याप्यतत्तात्पर्यकत्वरूपव्याप्याभावश्च सम्भवतीति तन्निरसनाय सिद्ध-व्युत्पत्तिसमर्थनं प्रथमसूत्रे आवश्यकमिति ॥

६. १६. शब्दार्थयोस्सम्बन्धान्तरादर्शनादित्यादि ॥ शब्दप्रयोगसमनन्तरमर्थस्मृतिर्जायत इत्यनुभवसिद्धम्। तत्र शब्दार्थयोः कस्सम्बन्ध इत्याकाङ्क्षायां, अनुमानादिवज्जन्यजनकभावादिसम्बन्धादर्शनात् बोध्यबोधकभाव एवेति निर्णयो भवति। तत्प्रकारश्च—शब्दश्रवणसमनन्तरभाव्यर्थस्मृतिः सम्बन्धज्ञानजन्या, सम्बन्धिज्ञानजन्यत्वात्, व्याप्तिस्मृतिवत् । स च सम्बन्धः कार्यकारणभावात्मको न भवति, तेन रूपेणाज्ञायमानत्वात्; यन्नैवं तन्नैवं, यथा संयोगः ॥

६. १७. सङ्केतयितृपुरुषाज्ञानाच्चेति ॥ गवादिशब्दाः किमस्मन्मातापित्रादिभिस्सङ्केतिताः, उत तत्पूर्वमेव कैश्चित्सङ्केतिता इति विकल्पे—न तावत्प्रथमः पक्षः, अनेकैः पुरुषैस्तेषु तेष्वर्थेष्वेकरूपशब्दप्रयोगदर्शनात् ; नापि द्वितीयः, अयं शब्दोऽनेन पूर्वं सङ्केतित इति सङ्केतयितृपुरुषज्ञापकप्रमाणाभावादिति ॥

७. ९. वृद्धव्यवहारेण शक्तिग्रहकाल इति ॥प्रवृत्त्यनुमितेति ॥ इयं क्रिया प्रयत्नपूर्विका, विलक्षणक्रियात्वात्, स्वीयक्रियावत्। अयं प्रयत्नः कृतिसाध्यताज्ञानजन्यः, जीवीयप्रयत्नत्वात्, अस्मदीयप्रयत्नवत् ॥ तादृशज्ञानं घटमानयेत्यादिवाक्यजन्यं, तादृशवाक्यान्वयव्यतिरेकानुविधायित्वात् । यत् यदन्वयव्य-

पृ. प.

तिरेकानुविधायि, तत् तज्जन्यं ; यथा दण्डचक्राद्यन्वयव्यतिरेकानुविधायी घटः ॥

११.१२. **सिद्धेव्युत्पत्तिसमर्थनपरं प्रथमसूत्रमावश्यकमिति** ॥

ननु—विंशतिलक्षणमेकं शास्त्रमित्यङ्गीकुर्वतां मते कर्मविचारात्मकद्वादशलक्षण्या उत्तरं ब्रह्मविचारात्पूर्वं सिद्धरूपदेवताविचारात्मककाशकृत्स्नीयदेवताकाण्डस्यापि शास्त्रान्तर्गतत्वात् तत्र च सिद्धे व्युत्पत्तेरवश्यम्भावेन पुनरपि जिज्ञासासूत्रे सिद्धे व्युत्पत्तिसमर्थनं विफलम्—इति चेन्न । "संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति शास्त्रैकत्वसिद्धिः" इति वृत्तिग्रन्थानुसारेण जैमिनिप्रणीतषोडशलक्षणात्मककर्मविचारेण सहैव ब्रह्ममीमांसाया ऐकशास्त्र्याङ्गीकारात् काशकृत्स्नीयदेवताकाण्डविशेषस्य तत्राप्रवेशात्, जैमिनिप्रणीतकर्मविचारे च प्राधान्येन सिद्धे व्युत्पत्तिसमर्थनस्यानपेक्षितत्वाच्च, स्वातन्त्र्येण सिद्धेव्युत्पत्तिसमर्थनं जिज्ञासासूत्रे आवश्यकमेवेति ॥ एतत्तत्त्वमस्मदीयैकशास्त्र्यमीमांसायां विस्तरेण प्रपञ्चितमिति नेह प्रतन्यते ॥

१२.१२. **यत्तु सिद्धपरवाक्येष्वपि शाब्दबोधसम्भव इत्यादि**॥

अनुमायेति । पुत्रस्ते जात इति वाक्यश्रवणानन्तरभाविमुखविकासः पुत्रोत्पत्तिरूपप्रियवस्तुविषयकबोधजन्यः, विजातीयमुखविकासत्वात्; यन्नैवं तन्नेवं, यथा गेहे निधिरस्तीति वाक्यश्रवणजन्यमुखविकासः ; तादृशबोधस्तद्वाक्यजन्यः, तद्वाक्यान्वयव्यतिरेकानुविधायित्वात्—इति ॥ लिङ्गपदस्यानुमित्युपयोग्यर्थकतया प्रकृते पक्षपरत्वमपि सम्भवतीति बोध्यम् ॥

१९.२२. **अत्र टीकेत्यादि** ॥ बुद्धिपूर्वव्युत्पत्तिः, यादृच्छिकव्यु-

पु. प.

त्पत्तिरिति—द्वेधा व्युत्पत्तिर्दृश्यते । कार्यार्थ एव बालानां प्रथमतो यादृच्छिकी व्युत्पत्तिरिति पक्षे अम्बातातमातुलादिसप्रतियोगिकशब्दानां व्युत्पत्तिर्दुरुपपादा । गामानयेत्यादिव्यवहारेण यथा गवादिशब्दानां व्युत्पत्तिः, न तथाऽम्बामानयेत्यादिव्यवहारेण व्युत्पत्तिस्सम्भवति । प्रयोज्यवृद्धेन अम्बामानयेति शब्दश्रवणसमनन्तरं स्वमातुरानयनमेव कार्यमिति ज्ञायते, न पार्श्वस्थबालस्य मातुरानयनं। आनयनान्वितप्रयोज्यवृद्धमातरि गृहीतशक्तिकस्याम्बापदस्य स्वमातृबोधकत्वं कथं बालः प्रत्येति । अतो बालस्य प्रथमतो व्यवहाराच्छक्तिग्रहो न सम्भवतीति बुद्धिपूर्वकव्युत्पत्तिरेव प्राथमिकीत्यकामेनापि स्वीकरणीयेति भावः ॥

१६.११. **नन्विति** ॥ नन्वङ्गुलिनिर्देशपूर्वकमियमम्बेत्यादिपदानां शक्तिग्रहोपपादनं न सम्भवति, तद्वाक्यजन्यज्ञानस्य प्रत्यक्षाद्यन्यतमत्वासम्भवात्—इत्याशङ्कते नन्वित्यादिना ॥

१६.१७. **अत्र वदन्तीति** ॥ प्रकृते इयमम्बेत्यादिवाक्याज्जायमानं शक्तिज्ञानं भट्टमतरीत्या शाब्दबोधात्मकमेवेति समाधत्ते अत्र वदन्तीत्यादिना ॥

१६.२१. **पश्यतश्श्वैतिमं रूपमिति** ॥ पश्यतश्श्वैतिमा रूपमिति[1] बहुषु दृश्यते । श्वैतिमानं चेत्यपि क्वचित्पाठो दृश्यते ॥

१७.१९. **श्रीभाष्येऽपीति** ॥ एतत्पक्षस्य श्रीभाष्याद्यभिमतत्वसूचनाय श्रीभाष्येऽपीत्यादि ॥

१८. ४. **वेदान्ताचार्यास्त्विति** ॥ भट्टमतरीत्या शक्तिज्ञानस्य शाब्दबोधरूपत्वाङ्गीकारापेक्षया प्रकारान्तरेणापि शक्तिज्ञा-

---

१. रूपं श्वैतिमेति पश्यत इत्यर्थः ॥

पु. प.

ननिर्वाहस्सम्भवतीत्याह वेदान्ताचार्यास्त्विति ॥ एतत्प-
क्षस्य अत्यन्तप्रसिद्धत्वाभावेन श्रुतप्रकाशिकादिष्वनुक्तिरिति
ध्येयम् ॥

१८.२२. **तैस्तैश्शब्दैरित्यादि** ॥ तैस्तैश्शब्दैस्तेषु तेष्वर्थेषु
स्वात्मनां बुद्ध्युत्पत्तिं दृष्ट्वेत्यादि । प्राभाकरमतोक्तानुभाविकश-
क्तेराकांक्षास्थानीयतया अम्बादिपदघटितवाक्येऽपि तादृशश-
क्तिरूपाकांक्षाज्ञानं सम्भवतीति भावः ॥

१८.२४. **नन्वित्यादि** ॥ ननु शब्देनान्वयपर्यन्ताभिधानं ह्यन्वि-
ताभिधानमिति ॥ श्रुतप्रकाशिकायामनुगृहीतत्वेनाम्बादिपदानां
पुरोवर्तिव्यक्तिविशेषे शक्त्युपपादनेऽपि अन्विताभिधानभङ्गो
दुर्वार इत्याशङ्कते ननूक्तरीत्येत्यादिना ॥

१९.२२. **अत्र केचिदित्यादि** ॥ सुप्रसिद्धाभिहितान्वयपक्ष-
मवलम्ब्यैव शक्तिग्रहोपपादनं कृतमिति न काप्यनुपपत्ति-
रिति केषांचित्समाधानमाह—अत्र केचिदित्यादिना ॥

२०.२६. **वदन्तीति** ॥ अत्र वदन्तीत्यनेनास्वरसस्सूचितः ।
न च केवलघटादिविषयकशाब्दत्वावच्छिन्नं प्रति स्वजन्योप-
स्थितिद्वारा घटादिपदज्ञानस्यैका कारणता, आकाङ्क्षाज्ञान-
स्य साक्षाच्छाब्दबोधे अपरा कारणता, सांसर्गिकविषयताभि-
न्नविषयताया उपस्थितिजन्यतावच्छेदकता चेति--त्रयं कल्पनी-
यमभिहितान्वयपक्षे ; अन्विताभिधानपक्षे न तथा कल्पने-
ति । न चोदाहृतभाष्यस्यान्विताभिधानपक्षे विरोधो दुर्वार
इति वाच्यम्, तद्भाष्यस्य शब्दानां निर्विशेषवस्तुबोधकत्व-
निराकरणे तात्पर्यात् । अत एव 'शब्दस्य तु विशेषेण
सविशेष एव वस्तुन्यभिधानसामर्थ्यम्' इति भाष्येऽनुगृहीत-

पृ. प.

मिति नानुपपत्तिरिति । सूचितश्चायमस्वरसो ग्रन्थकृतैव वस्तुतस्त्वित्यादिना ॥

२१. १. **वस्तुतस्त्वित्यादि** ॥ ननु—अन्विताभिधानपक्षाङ्गीकारो न युक्तः, अन्विताभिधानं नाम—इतरपदार्थान्वितस्वार्थबोधनमेव ; तथा सति, इतरपदार्थानामनेकत्वेन तत्तत्पदसमभिव्याहारकाले तत्तत्पदार्थान्वितस्वार्थबोधकत्वं घटादिपदानामङ्गीकरणीयमिति • सर्वेषां पदानां नानाधर्मावच्छिन्नबोधकत्वेन नानार्थत्वप्रसङ्गः, पदान्तरसमभिव्याहारानवच्छिन्ननानाधर्मावच्छिन्नबोधकत्वमेव नानार्थत्वमित्यङ्गीकृत्य तादृशातिप्रसङ्गवारणे तदपेक्षया लाघवात् पदानां स्वार्थमात्रावबोधनमेव शक्तिरित्यङ्गीकार उचितः--इति चेत्। तत्राह—वस्तुतस्त्वित्यादिना ॥

२१. ४. **न चेत्यादि** ॥ संसर्गस्य समभिव्याहारलभ्यतया तदंशेऽपि शक्त्यङ्गीकारो निरर्थक इति शङ्कते—न चेति ॥

२१. ७. **समभिव्याहारेत्यादि** ॥ समभिव्याहारजन्यतावच्छेदकस्य सांसर्गिकविषयत्वस्य पदजन्यतावच्छेदकत्वमावश्यकम्, अन्यथा घटादिपदस्य घटादावपि शक्तिर्न सिध्यतीति समाधत्ते—समभिव्याहारेत्यादिना ॥

२१.१९. **वस्तुत इत्यादि** ॥ अन्वयव्यतिरेकबलाद्घटादिपदत्वेन केवलघटादिविषयकशाब्दत्वेन कार्यकारणभावाङ्गीकारे अभिहितान्वयपक्षे गौरवं. अन्विताभिधानपक्षे लाघवं चोपपादयति—वस्तुत इत्यादिना ॥

२८. ७. **एवञ्चेत्यादि** ॥ सिद्धार्थेऽपि प्राथमिकव्युत्पत्तिसम्भवप्रकारं निगमयति—एवञ्चेति ॥

पृ. प.

२८. ९. किञ्चेत्यादि ॥ अपूर्वात्मककार्यस्यैवाप्रामाणिकत्वेन तत्र व्युत्पत्तिर्न सम्भवतीत्युपपादयति–किञ्चापूर्वस्येत्यादिना ॥

२८. २३. अत्र प्राभाकरा इति ॥ अथापूर्वत्वेनापूर्वस्य लिङा-दिपदवाच्यत्वाभावेऽपि कृतिसाध्यत्वरूपकार्यत्वेन तद्वाच्यत्व-मवश्यमङ्गीकरणीयम्, अन्यथा यजेत स्वर्गकाम इत्यादौ आशुतरविनाशिनो यागादेः स्वर्गसाधनत्वासम्भवात् । इष्टसाधनत्वस्य लिङर्थत्वे तद्वाक्यजन्यबोधानन्तरं नियो-ज्यस्य प्रवृत्तिरेव न सम्भवतीति यागनिष्ठस्वर्गसाधनतानि-र्वाहकमपूर्वात्मकं कार्यमवश्यमङ्गीकरणीयमिति वदतां प्राभा-कराणां मतमुपन्यस्यति–अत्र प्राभाकरा इति ॥

३१. ९. तन्नेत्यादि ॥ यजदेवपूजायामित्यनुशासनाद्देवताप्री-त्यवच्छिन्नव्यापाररूपदेवताराधनस्य स्वर्गसाधनत्वे प्रतिपा-दिते तद्घटकदेवताप्रीतेरेव द्वारत्वलाभेन यागकारणतानि-र्वाहसम्भवात् अपूर्वस्य लिङादिवाच्यत्वानङ्गीकारेऽपि न किञ्चिद्बाधकमित्यभिप्रेत्य तन्मतं दूषयति– तन्नेत्यादिना ॥ अत्र देवताप्रीत्यवच्छिन्नव्यापारस्य देवताराधनरूपत्वमङ्गीकृ-त्य यागादीनां देवताप्रीतिद्वारा स्वर्गादिकारणत्वनिर्वाहप्र-कारकथनमभ्युपगमवादमात्रम्, सिद्धान्ते यागादीनां स्वर्गसा-धनत्वानङ्गीकारेऽपि क्षतिविरहात् । तथाहि यजेत स्वर्गकाम इत्यादौ लिङादयो हि देवताराधनभूतयागादेः प्रकृत्यर्थस्य कर्तृव्यापारसाध्यतामात्रं प्रतिपादयन्ति, नेष्टसाधनत्वादिकम् । तथा च– यागाद्याराध्यदेवताया एव फलसाधनत्वात् या-गादिकं देवताराधनरूपमेव । आराधनं च–स्वयं प्रयो-जनप्रीतिहेतुव्यापारविशेषः । गामाराधयति, ब्राह्मणमारा-

पु. प.

धयतीत्यादौ तथा प्रतीतेः ॥ आराधितो देवताविशेष एव फलसाधनं भवतीति पूर्वाचार्यपरिशीलितः पन्थाः ॥

तथा चानुगृहीतं **भगवद्भिर्भाष्यकारैः फलाधिकरणे**—

"यजदेवपूजायामिति देवताराधनभूतयागाद्याराध्यभूताग्निवाय्वादिदेवतानामेव तत्तत्फलहेतुतया तस्मिन् तस्मिन्नपि वाक्ये व्यपदेशात् । 'वायव्यं श्वेतमालभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति' इत्यादिषु कामिनस्सिषाधयिषितफलसाधनत्वप्रकारोपदेशोऽपि विध्यपेक्षित एवेति नातत्परत्वशङ्का युक्ता ॥ एवमपेक्षितेऽपि फलसाधनत्वप्रकारे शब्दादेवावगते सति तत्परित्यागमश्रुतापूर्वादिपरिकल्पनं च प्रामाणिका न सहन्ते । लिङादयोऽपि देवताराधनभूतयागादेः प्रकृत्यर्थस्य कर्तृव्यापारसाध्यतां व्युत्पत्तिसिद्धां शब्दानुशासनानुमतामभिदधति, नान्यदलौकिकमिति प्रागेवोक्तम् ॥" —इति ॥

अतो यागादेः स्वर्गादिसाधनत्वनिर्वाहार्थं प्रकारान्तरानुसरणमभ्युपगमवादमात्रमित्यवधेयम् ॥

३२. २१. **नियोगस्यापीति** ॥ नियोगो नाम—अपूर्वात्मकं कार्यमेव, स च नियोगो यजेतेत्यादौ प्रधानतया प्रतिपाद्यते । सुखरूपत्वेन स्वत इष्टत्वं च तस्याभ्युपगम्यते । स्वप्राधान्यनिर्वहणाय स्वं साधयतः पुंसः स एव स्वर्गं ददाति ; यथा स्वप्राधान्यानिर्वहणाय अनुजीविनामभिमतं प्रभुर्ददाति तद्वत् ॥ तथा च राजकीयाः पुरुषाः राज्ञोऽतिशयाय यथा तत्सेवादिकं कुर्वन्ति तथा नियोगसुखसिद्ध्यर्थं यागादिकं

पु. ५.

कार्यमिति नियोगमुखवादिनां मतम् ॥ तदुक्तं पञ्चिकायां—

"आत्मसिद्ध्यनुकूलस्य नियोज्यस्य प्रसिद्धये ।
कुर्वत्स्वर्गादिकमपि प्रधानं कार्यमेव नः ॥" —इति ॥

तन्मतं दूषयितुमुपन्यस्यति— नियोगस्यापीत्यादिना ॥

३४. ९. **किञ्चेति** । कृतिभावभाविकृत्युद्देश्यं हि भवतः कार्यमिति वाक्यावगतस्येत्यर्थः ॥ **यागस्वर्गोभयव्यावृत्तत्वादिति** । कृतिसाध्यत्वमात्रोपादाने यागे कृत्युद्देश्यत्वमात्रोपादाने स्वर्गे चातिप्रसक्तत्वेन विशिष्टस्योभयव्यावृत्तत्वमिति भावः ॥

३९. ८. **अत्रेदं बोध्यमित्यादि** ॥ ननु वेदान्तवाक्यानां सिद्धार्थपरत्वसाधनेऽपि ब्रह्मविचारस्य मीमांसकान्प्रति कर्तव्यतासाधनं न सम्भवति, विचारविषयीभूतस्य ब्रह्मपदार्थस्य जीवातिरिक्तत्वेन तैरनङ्गीकारात् पक्षस्यैवाप्रसिद्धेः ; कथञ्चित्पक्षप्रसिद्धिसम्पादनेऽपि तस्य यागादिविचारवत् कर्मविचारान्तर्गतत्वात् कर्मविचारानन्तरकर्तव्यतासाधनं सुतरां न सम्भवतीत्याशङ्कायामाह—अत्रेदं बोध्यमित्यादिना ॥

४०. २९. **कर्मब्रह्ममीमांसयोरेकशास्त्रत्वेनेति** ॥ अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्—इति न्यायेन विशिष्टैकार्थप्रतिपादकत्वादैकशास्त्र्यमिति भावः ॥

४१. १७. **एतेनेत्यादि** ॥ निर्विशेषब्रह्मवादिभिः अथातो ब्रह्मजिज्ञासेत्यत्र अथशब्दस्य साधनचतुष्टयानन्तर्यपरत्वमङ्गीक्रियते । तच्च—नित्यानित्यवस्तुविवेकः, इहामुत्र फलभोगविरागः, शमदमादिसाधनसम्पत्, मुमुक्षुत्वं चेति ॥ "शमदमादयश्च—लौकिकव्यापारान्मनस उपरमः शमः, बाह्यकरणानामुपरमो दमः, ज्ञानार्थं विहितनित्यादिकर्मसंन्यास उपरतिः, शीतोष्णा-

पु. प.

दिद्वन्द्वसहनं तितिक्षा, निद्रालस्यप्रमादत्यागेन मनसः स्थितिः समाधानं, सर्वत्रास्तिकता श्रद्धा—एतत्षट्कप्राप्तिः शमादिसम्पत्"—इति **रत्नप्रभायां** व्यक्तम् ॥

४३. ३. **कर्मविचारेत्यादि** ॥ इयं **श्रुतप्रकाशिकासूक्तिः**—"ननु यद्येकशास्त्र्यं कर्मब्रह्मविचारयोः, तर्हि उपक्रमे साधारणार्थः प्रतिज्ञायेत--अथातो वेदार्थजिज्ञासेति । न चैवं प्रतिज्ञातं, किंतु पूर्वभागासाधारण एव प्रतिज्ञातः--अथातो धर्मजिज्ञासेति"॥ तत्रैव—"तत्र धर्मशब्दस्य साध्यधर्मविषयतया प्रसिद्धिप्राचुर्येण बुद्धिस्थत्वात् पूर्वभागप्रतिपन्नत्वेन प्राथम्यात् धर्मजिज्ञासापदेनैव तन्त्रेण वा अर्थतो वा प्रतिज्ञातत्वोपपत्तेश्च"—इति॥

४३. ७. **उल्लसितेत्यादि** ॥ उल्लासिता अर्जुनस्य दीप्तिः, तादृशी अर्जुना—धवला दीप्तिश्च, यस्य । कुवलयस्य--भूमण्डलस्य, इन्दीवरस्य च । संमोदकः—सन्तोषजनकः । हरिः—श्रीकृष्णः, चन्द्रश्च ॥ ——इत्यर्थः ॥

४३. २०. **नन्वित्यादि** ॥ ननु--कर्मविचारस्य ब्रह्मविचारं प्रति साक्षाद्धेतुत्वं न सम्भवति ; कर्मविचारो हि कर्मविशेष्यकाल्पास्थिरफलत्वप्रकारकनिर्णयविशेषः ; तेन च 'अक्षय्यं ह वै चातुर्मास्ययाजिनस्सुकृतं भवति, नास्येष्टापूर्ते क्षीयेते' इत्यादिश्रुत्या आपातप्रतीतिसिद्धानन्तास्थिरफलत्वप्रकारककर्मविशेष्यकज्ञानप्रतिबन्ध एव साक्षाद्भवति ; तस्य ब्रह्मविचारहेतुत्वं कथं सङ्गच्छते—इति चेत् तत्प्रकारमेवोपपादयति ॥

४९. १८. **न चेत्यादि** ॥ नन्विदं सर्वं तदा शोभते यदि ब्रह्मजिज्ञासापदस्य ब्रह्मविचारेच्छापरत्वं स्यात् ; तदेव न सम्भवति, किन्तु चिकित्सादिपदवत् परार्थानुमितित्वावच्छिन्ने रूढत्वात्—इत्याशङ्कते न चेति ॥

पृ. प.

४९. २३. **जिज्ञासापदस्येत्यादि** ॥ जिज्ञासापदस्य रूढत्वाभावेऽपि प्रकारान्तरेण परार्थानुमितिलाभसम्भवेन रूढ्यङ्गीकारो निष्प्रामाणिक इति समाधत्ते—जिज्ञासापदस्येत्यादिना ॥

४६. ११. **नन्वित्यादि** ॥ अथ विषसंपृक्तान्नभोजनकर्तरि विषं बुभुक्षत इत्यादिप्रयोगवारणाय सनन्तस्थले कारकविभक्त्यर्थस्य सनर्थेच्छायामेवान्वयस्यावश्यकतया ब्रह्मण इति षष्ठ्यर्थस्य ज्ञानेऽन्वयासम्भवात् कथमुक्तार्थलाभ इति शङ्कते--नन्वित्यादिना ॥

४७. ३. **मैवमित्यादि** ॥ सनन्तसमभिव्याहारस्थले कारकविभक्त्यर्थस्य धात्वर्थे सनर्थे चान्वयाङ्गीकारान्नोक्तदोषावकाश इति समाधत्ते—मैवमित्यादिना ॥

५३. १८. **तस्माद्ब्रह्मजिज्ञासेत्यादि** ॥ प्रथमसूत्रस्य शास्त्रारम्भार्थत्वं निगमयति—तस्माद्ब्रह्मजिज्ञासेत्यादिना ॥

इति प्रथमसूत्रविचारः ॥

अथ जन्माद्यधिकरणविचारः—

५३. २४. **स्वेतरेत्यादि** ॥ स्वेतरसमस्तवस्तुनिरूपितोत्कर्षवत्त्वमिति, उत्कर्षवत्त्वव्याप्यमित्यर्थः । यथाश्रुते तादृशबृहत्त्वस्य परममहत्परिमाणादिरूपतायाः **ब्रह्मपदशक्तिवादे** ग्रन्थकृतैव प्रतिपादितत्वेन तद्विरोधः प्रसज्येत ॥

५४. २. **नकिरिन्द्र इति** । हे इन्द्र ! त्वत्, उत्तरः—उत्कृष्टः, न कोऽपीत्यर्थः ॥ **न वा ओजीय इत्यादि** । हे रुद्र ! त्वत्, ओजीयः--ओजस्वी, उत्कृष्ट इति यावत्, नास्तीत्यर्थः ॥

पु. प.

९४. २३. तादृशेत्यादि ॥ अत्र सत्यन्तानिवेशे स्थित्यादावतिव्याप्तिरिति तन्निवेशः ॥

इति जन्माद्यधिकरणविचारः ॥

अथ शास्त्रयोनित्वाधिकरणविचारः –

९५. ३. न तत्रेत्यादि ॥

'असन्निकृष्टवाचा च द्वयमत्र जिहासितम् ।
ताद्रूप्येण परिच्छित्तिस्तद्विपर्ययतोऽपि वा ॥'——

इति कारिकार्थं हृदि निधाय तथोक्तिः ॥ कारिकार्थश्च असन्निकृष्टवाचा, अत्यन्तातीन्द्रियवस्तुबोधकशब्देन ; द्वयं, वक्ष्यमाणद्वयं ; ताद्रूप्येण परिच्छित्तिः, येन रूपेण यद्वस्तु शास्त्रेण प्रतिपाद्यते तेनैव रूपेण प्रमाणान्तरेण प्राप्तिः ; तद्विपर्ययतोऽपि वा, येन रूपेण यद्वस्तु शास्त्रतोऽवगन्तव्यं तदन्यरूपेण प्रत्यक्षादिना प्रतिपादनम्—इति ॥ तथा च—साधकान्तरसिद्धे बाधकान्तरबाधिते च शास्त्रस्य तात्पर्यं नास्तीत्यर्थः ॥

९५. ७. कार्यमित्यादि ॥ अत्र विशेष्यतासम्बन्धावच्छिन्नत्वनिवेशात् अदृष्टद्वारा अस्मदीयकृतिजन्यत्वस्य पक्षे सत्त्वेऽपि न सिद्धसाधनावकाशः । कृतित्वावच्छिन्नत्वोपादानं तु सविषयकत्वेन कारणत्वे ज्ञानेच्छयोर्नान्यथासिद्धिस्सम्भवति । तयोरपि सविषयकत्वेन कारणत्वात्, स्वेन तयोरन्यथासिद्धत्वस्याङ्गीकरणीयत्वादित्यभिप्रायेण । समवायसम्बन्धावच्छिन्नत्वस्य कार्यत्वे निवेशस्तु—यदुपादानिका प्रवृत्तिः तत्रैव समवायेन कार्यमिति नियमस्य तन्त्वादौ घटापत्तिवारकस्य निर्वाहायेति।

पृ. प.

ध्वंसे बाधव्यभिचारवारणाय पक्षे हेतौ च सत्त्ववैशिष्ट्यं निवेशनीयमिति ॥

कृत्यादावेकत्वं च—स्वाधिकरणावृत्तिस्वभिन्नकृतिकत्वादि-रूपं, स्वभिन्नकृतित्वव्यापकस्वाधिकरणावृत्तित्वकत्वपर्यवसितं बोध्यम् ॥

९९. १०. **ज्ञानचिकीर्षेत्यादि** ॥ विशेष्यतासम्बन्धावच्छिन्नज्ञान-त्वावच्छिन्नकारणतानिरूपितसमवायसम्बन्धावच्छिन्नकार्यता-वत् ; विशेष्यतासम्बन्धावच्छिन्नेच्छात्वावच्छिन्नकारणतानि-रूपितसमवायसम्बन्धावच्छिन्नकार्यतावत्—इति ॥

९९. १२. **ईश्वरसिध्यतीति** ॥ तादृशज्ञानादिकं द्रव्याश्रितं, गुणत्वात्—इत्यनुमानेन द्रव्याश्रितत्वसिद्धौ द्रव्यान्तरस्य बाधादीश्वरसिद्धिः । बाधप्रकारश्च—तादृशज्ञानादिकं न पृथि-व्याद्यष्टद्रव्यवृत्ति, चेतनगुणत्वात् ; नापि जीववृत्ति, नित्य-ज्ञानादित्वात्—इत्यादिना बोध्यः ॥

९९. १८. **साध्याप्रसिद्धेरित्यादि** ॥

कार्यं कृतिजन्यमित्यनुमाने घटादावेव साध्यप्रसिद्धेस्सम्पादनी-यतया कार्यसमानाधिकरणभेदप्रतियोगिताऽनवच्छेदकत्ववि-शिष्टकृतिजन्यत्वसाधने पटादिरूपकार्याधिकरणवृत्तिकुला-लादिकृतिमद्भेदप्रतियोगितावच्छेदककुलालादिकृतिजन्यत्वस्यैव घटादौ सत्त्वादुक्तसाध्याप्रसिद्धिस्सम्भवतीति भावः ॥

१८. १२. **आत्मानन्त्येन परिहृतमिति** ॥

अत्र यद्यपि द्वित्वादिसङ्ख्योत्पत्तिं प्रति विजातीयापेक्षाबुद्धि-त्वेन कारणत्वात् तादृशवैजात्यस्येश्वरीयापेक्षाबुद्धावस्वीका-रेण न तद्बुद्ध्या सङ्ख्योत्पत्तिरिति प्रतीयते । सा च नोप-

पु. प.

पद्यते । ईश्वरीयापेक्षाबुद्धेः द्वित्वजनकत्वानङ्गीकारे द्व्यणुकपरिमाणजनकद्वित्वादीनामनुत्पादप्रसङ्गः । तत्तेश्वरीयापेक्षाबुद्धेरेवावश्यं द्वित्वाजनकत्वस्याङ्गीकरणीयत्वात् ॥ न च—ईश्वरीयापेक्षाबुद्धेः द्वित्वजनकत्वाङ्गीकारे तस्याः नित्यत्वेन तज्जन्यद्वित्वस्यापि नित्यत्वापत्तिरिति--वाच्यम्; क्षणविशेषविशिष्टापेक्षाबुद्धेरेव तज्जनकत्वाङ्गीकारात् । तत्र सहकारिक्षणनाशादेव द्वित्वनाशस्सम्भवतीति चेत्-- तथाऽपि द्वित्वनाशं प्रति कुत्र चिदपेक्षाबुद्धिनाशस्य कुत्र चित् सहकारिक्षणनाशस्य च कारणत्वकल्पनापत्त्या तदपेक्षया जीवीयापेक्षाबुद्धेरेव द्वित्वोत्पादकत्वाभ्युपगमो वरम् ।

अत एवोक्तं **विश्वनाथपञ्चाननभट्टाचार्यादिभिर्नैयायिकैः**—"सर्गाद्यकालीनपरमाण्वादौ ईश्वरीयापेक्षाबुद्धिः ब्रह्माण्डान्तरवर्तियोगिनामपेक्षाबुद्धिर्वा द्वित्वादिकारणम्" इति ॥ तस्माज्जीवीयापेक्षाबुद्धेरेव द्वित्वोत्पादकत्वाङ्गीकारमतमवलम्ब्यैतदुक्तिरिति बोध्यम् ॥

७०. २०. **आहुरिति** ॥ अत्र--यद्यपि योनिशब्दस्य ब्रह्मज्ञानकारणपरतया योजनाविशेषमङ्गीकृत्य ब्रह्मज्ञानस्य शास्त्रव्यतिरिक्तप्रमाणाजन्यत्वस्य प्रतिपादने ब्रह्मणोऽपि प्रमाणान्तराप्राप्तत्वं सिद्धं भवतीति भाष्यादौ 'योनिः-कारणं प्रमाणम्' इत्युक्तिः—इति तात्पर्यवर्णनं दृश्यते ॥ तथापि श्रुतप्रकाशिकादौ एतादृशयोजनाया अप्रतिपादनेन ब्रह्मणस्साक्षात्प्रमाणान्तराप्राप्तत्वाङ्गीकार एव भाष्याभिमत इति प्रतीयते। तदुक्तं **शास्त्रयोनित्वाधिकरणभाष्ये**—'ननु शास्त्रयोनित्वं ब्रह्मणो न सम्भवति प्रमाणान्तरवेद्यत्वाद्ब्रह्मणः' इत्यारभ्य,

पु. प.

'ब्रह्मणः अभिधेयतया अन्वयात्, तत्-शास्त्रप्रमाणकत्वं सम्भवत्येव' इत्यन्तेन ॥

इति शास्त्रयोनित्वाधिकरणविचारः ॥

अथ समन्वयाधिकरणविचारः—

७०. २१. **अत्र मीमांसका इति** ॥ चतुस्सूत्र्याः पेटिकाद्वयगर्भत्वमस्ति । तत्र प्रथमपेटिकया वेदान्तवाक्यानां ब्रह्मणि प्रमितिजननसामर्थ्यं स्थापितं ; तत्र प्रथमाधिकरणे अप्रतिपत्तिः, द्वितीयाधिकरणे विप्रतिपत्तिश्च परिहृता । द्वितीयपेटिकया तु ब्रह्मणः अप्राप्तसफलत्वरूपतात्पर्यलिङ्गद्वयं समर्थ्यते ; तत्र शास्त्रयोनित्वाधिकरणे अप्राप्तत्वं स्थापितम्, अत्र तु सफलत्वं स्थाप्यते, उभयोरपि तात्पर्यग्राहकत्वात्—इति बोध्यम् ॥ अत्र वेदान्तवाक्यानां प्रवृत्तिनिवृत्त्यन्यतरपरत्वाभावेन निष्प्रयोजनत्वात्तदर्थविचाररूपब्रह्ममीमांसा अनारम्भणीयेति मीमांसकानां मतमुपन्यस्यति—अत्र मीमांसका इत्यादिना ॥

७२. २१. **तप्ते पयसीत्यादि** ॥ इयं श्रुतिः मीमांसादर्शने द्वितीयाध्याये द्वितीयपादे 'गुणाश्च पूर्वसंयोगे वाक्ययोस्समत्वात्' इति सूत्रे उदाहृता । तत्र आमिक्षाकरणकयागे वाजिनगुणविधिर्युक्ता, अग्निहोत्रं जुहोतीत्युक्ते दध्ना जुहोति पयसा जुहोतीतिवत्—इति पूर्वपक्षं कृत्वा; "अत्र वैश्वदेवी" इति श्रुत्या "वाजिभ्यो वाजिनम्" इति वाक्येन च देवतात्वं प्रतीयते । यत्र श्रुत्या देवतात्वं तत्रामिक्षया सहैकवाक्यत्वं, यत्र चतुर्थी तत्र वाजिनेन । तदिह देवतात्वं प्रति श्रुति-

पृ. प.

वाक्ययोर्विरोधे च श्रुतिर्बलीयसीति आमिक्षाकरणकयागे उत्पत्तिवाक्य एव वैश्वदेवीति तद्धितश्रुत्या देवताविशिष्टद्रव्यवाचिन्या द्रव्यविशेषसम्बन्धप्रतिपादनाद्गुणान्तराकाङ्क्षाविरहेण वाजिनरूपगुणान्तरान्वयो न सम्भवतीति शबरभाष्यादौ निर्णीतम् ॥

७४. २४. **आनन्दानुभवस्येत्यादि**॥ अत्र प्रयोजनत्वं प्रवृत्त्युद्देश्यत्वं । मुख्यत्वं च स्वत इष्टत्वलक्षणानुकूलत्वविशिष्टब्रह्मसम्बन्धित्वनिबन्धनमिति बोध्यम् ॥

७६. ९ **ब्रह्मणस्सर्वाधारत्वेऽपीत्यादि** ॥ यद्यपि 'यः पृथिव्यां तिष्ठन्' 'य आत्मनि तिष्ठन्' 'सर्वत्रासौ समस्तं च' इत्यादिप्रमाणैः घटत्वादिजातीनां घटादिव्यक्तिष्विव ब्रह्मणस्सर्वत्र वृत्तित्वं प्रतीयते । तथाऽपि तादृशवृत्तित्वं लोकसिद्धप्रकारेणाधेयत्वरूपं न भवतीति ग्रन्थकृदाशय इति बोध्यम् ॥

८०. १९. **तदेतत्प्रेय इत्यादि** ॥ इयं श्रुतिः बृहदारण्यके तृतीयाध्याये पठ्यते ॥ अत्र पुत्रादिदृष्टान्तत्रयोपादानस्यायं भावः । यथा लोके पुत्रस्य दुःखनिवर्तकत्वेन पुरुषार्थत्वं, वित्तस्य सुखहेतुत्वेन तत्त्वं, तदन्यस्य विषयस्य स्वयंप्राप्यत्वञ्चानुभवसिद्धम् ; तथा परमात्मनः सर्वप्रकारेणापि निरतिशयभोग्यत्वातिशयोऽस्तीति प्रतिपादनाय तथोक्तिरिति ॥

८१. ४. **जपादिद्वारकमेवेति** ॥ धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयतत्साधनावबोधित्वाज्जपादिना स्वरूपेणापि तत्साधनत्वाच्चेति श्रीभाष्यसूक्तिं हृदि निधायाह -जपादीति॥ अस्यार्थः **श्रुतप्रकाशिकायामनुगृहीतः**—'अर्थावबोधकत्वस्य होमादावव्याप्तत्वा-

पृ. प.

दाह–जपादिनेति ; स्वरूपेणापीति--अर्थज्ञानानुष्ठानाभ्यामृते जप्यमानेनाक्षरमात्रेणापीत्यर्थः''—इति ॥

८१. १२. तद्धास्य विजज्ञाविति ॥ तत् --सच्छब्दितं परं ब्रह्म, अस्य–गुरोः वचनात्, विजज्ञौ–ज्ञातवान्, श्वेतकेतुरित्यर्थः । अत्र यद्यपि विजज्ञाविति पदं ज्ञानसामान्यपरमेव, नोपासनपरं; पूर्वत्राष्टकृत्वोऽभ्यस्तेन 'भूय एव मा भगवान्विज्ञापयतु' इति वाक्येन 'तन्मे विजानीहि' इति वाक्येन च प्रस्तुतविज्ञानविषयत्वादस्य विजज्ञाविति पदस्य तत्र च वाक्ये उपासनप्रसक्तेरभावात् । न हि विज्ञापयत्वित्यत्र उपासनं कारयत्वित्यर्थो युक्तः ; तथाऽप्युपक्रमे 'अविज्ञातं विज्ञातं भवति' इति श्रुतविज्ञातशब्दसमानार्थकत्वं उपसंहारगतविजज्ञाविति पदस्य न्याय्यमिति तत्पदस्योपासनार्थकत्वमेव युक्तम् । अत एवानुगृहीतं श्रुतप्रकाशिकायां– "तद्धास्य विजज्ञावित्यत्र विजज्ञाविति पदं अविज्ञातं विज्ञातमिति प्रक्रमश्रुतविज्ञातशब्दसमानार्थकम्'' – इति ॥ इत्थं च–मध्ये विज्ञानशब्दस्य अतथात्वेऽपि उपक्रमोपसंहारयोरैकरूप्यार्थमुपासनार्थकत्वमेव उचितमित्यभिप्रायेण उपासनतात्पर्यावगमादित्युक्तम् ॥

८२. ४. हानौ तूपायनशब्दशेषत्वादित्यादि ॥ एवं हि तत्र निर्णीतं। छन्दोगा आमनन्ति–'अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य, धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवानि'–इति । आथर्वणिकाश्च– 'तथा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति'–इति ॥ शाट्यायनिनस्तु--'तस्य पुत्रा दायमुपयन्ति सुहृदस्साधुकृत्यां

पु. प.

८२. ४. द्विषन्तः पापकृत्याम्'–इत्यादि ॥ **कौषीतकिनस्तु**–'तत्सुकृतदुष्कृते धूनुते तस्य प्रिया ज्ञातयस्सुकृतमुपयन्ति, अप्रिया दुष्कृतम्'–इति ॥ अत्र उपायनवाक्यं शाखान्तराधीतमपि हानिवाक्यशेषं, उत स्वतन्त्रम्? इति विचार्य परस्पराकाङ्क्षावशात् शेषशेषिभावस्समर्थितः ॥

सूत्रार्थस्तु–तुशब्दः पक्षं व्यावर्तयति, हानाविति प्रदर्शनार्थम् । केवलायां हानौ केवले चोपायने श्रूयमाणे तयोरितरेतरसमुच्चयोऽवश्यम्भावी; कुतः, उपायनशब्दशेषत्वात्, उपायनशब्दस्य हानिवाक्यशेषत्वात् । उपायनवाक्यस्य हि हानिवाक्यशेषत्वमेवोचितम् । विदुषा त्यक्तयोः पुण्यपापयोः प्रवेशस्थानवाचित्वात् उपायनवाक्यस्य ॥ प्रदेशान्तराम्नातस्य प्रदेशान्तराम्नातवाक्यशेषत्वे दृष्टान्ता उपन्यस्यन्ते कुशाच्छन्दस्स्तुत्युपगानवदिति ॥ कालापिनः— 'कुशा वानस्पत्याः' इत्यामनन्ति । शाट्यायनिनां तु 'औदुम्बर्यः कुशाः' इति वाक्यं सामान्येन वानस्पत्यत्वेन अवगताः कुशाः औदुम्बर्य इति विशिंषत् तद्वाक्यशेषतामापद्यते ॥ तथा देवासुराणां छन्दोभिरित्यादिना अविशेषेण देवासुराणां छन्दसां प्रसङ्गे 'देवच्छन्दांसि पूर्वम्' इति वचनं क्रमविशेषं प्रतिपादयत्तद्वाक्यशेषतां गच्छति ॥ तथा हिरण्येन षोडशिनस्तोत्रमुपाकरोतीत्यविशेषेण प्राप्ते समयाविषिते सूर्ये षोडशिनस्तोत्रमुपाकरोतीति विशेषविषयं वाक्यं तद्वाक्यशेषतां भजते । तथा ऋत्विज उपगायन्तीत्यविशेषप्राप्तस्य नाध्वर्युरुपगायेत् इति वाक्यमनध्वर्युविषयतामवगमयत्तद्वाक्यशेषत्वमृच्छति'–इत्यादि ॥

पृ. पं.

८२. ७. **साद्विद्यामात्रेति** ॥ उक्तरीत्या कारणवाक्यान्तरप्रतिपन्नगुणानामप्युपास्यत्वप्रसङ्गेन एकैकविद्यानिष्ठस्यापि सर्वविद्यावेद्यगुणप्राप्तिरवर्जनीया, न चेष्टापत्तिः यथाक्रतुन्यायादिविरोधात्—इति भावः ॥

८२. १९. **समन्वयसूत्र इति** ॥ इदञ्च तदधिकरणभाष्यम्—"एतदुक्तं भवति—अनादिकर्मरूपाविद्यावेष्टनतिरोहितपरावरतत्वयाथात्म्यस्वस्वरूपावबोधानां देवासुरगन्धर्वसिद्धविद्याधरकिन्नरकिम्पुरुषयक्षराक्षसपिशाचमनुज-पशुशकुनिसरीसृपवृक्षलतागुल्मदूर्वादीनां स्त्रीपुन्नपुंसकभेदभिन्नानां क्षेत्रज्ञानां व्यवस्थितधारकपोषकभोग्यविशेषाणां मुक्तानां स्वस्य चाविशेषेणानुभवसम्भवे स्वरूपरूपगुणविभवचेष्टितैरनवधिकातिशयानन्दजननं परब्रह्मास्तीति बोधयदेव वाक्यं प्रयोजनपर्यवसायि"—इत्यादि ॥

८३. १३. **बलवदनिष्टेत्यादि** ॥ तदुक्तं **भाट्टदीपिकायां**—"स च लिङाद्यर्थो विधिवाक्ये प्रवर्तनाप्रेरणाविध्यपरपर्यायः, निषेधवाक्ये च निवर्तनानिवारणानिषेधापरपर्यायः । इयं च द्विविधाऽपि शाब्दी भावना, तस्याश्च भाव्ये यथायोगं प्रवृत्तिनिवृत्ती, शब्दभावनाज्ञानं करणं, करणत्वं चात्र भावनाभाव्यनिष्पादकत्वम् । इतिकर्तव्यता च यथायोगं स्तुतिनिन्दे, स्तुतिनिन्दाज्ञानस्य हि प्रवृत्तिनिवृत्तिप्रयोजकसहकारित्वं रुच्यरुच्युत्पादनद्वारा लोकसिद्धम् । स्तुतिनिन्दापदवाच्ये प्राशस्त्याप्राशस्त्यापरपर्याये बलवदनिष्टाननुबन्धित्वानुबन्धित्वयोग्यत्वरूपे । ते च यथायोगं विधिनिषेधापेक्षितत्वात्तत्तत्समभिव्याहृतार्थवादैर्लक्षणया प्रतिपाद्येते"—इति ॥

पृ. प.

८४. ७. **सामान्येन सिद्धपरवाक्यानामिति** ॥ विधिशेषत्वं - विधिशेषतया प्रयोजनपर्यवसायित्वमिति भावः ॥

८४. १३. **आक्षिप्य स्थापनीया इति** ॥ एवं तर्हि पूर्वकाण्डोक्तार्थस्य प्रधानभूतस्य प्रतिक्षेप एव उत्तरकाण्डे प्राधान्येन क्रियते । अर्थवादाधिकरणार्थ एव हि कर्ममीमांसासारार्थः । एवं समन्वयाधिकरणार्थ एव हि ब्रह्ममीमांसासारार्थः । तयोः परस्परविरोधे सति कथमिव युष्माभिर्विरोधो नास्तीति भण्यते? इत्याशङ्क्याह क्वचिदपवदनं स्यादस्यमौत्सर्गिकस्येति ॥ उत्सर्गापवादन्यायेनापि शास्त्रे प्रायेण विरोधं परिहरन्ति तान्त्रिकाः । तत्रापि 'अर्थवादसामान्यस्य विधिशेषतया पुरुषार्थपर्यवसायित्वमुत्सर्गः; निरतिशयानन्दरूपब्रह्मविषयार्थवादादीनां स्वतः पुरुषार्थरूपफलप्रतिपादकत्वाद्विधिवाक्यैकवाक्यत्वमन्तरेणापि पुरुषार्थपर्यवसायित्वमित्यपवादः'—इति व्याख्यानम् ॥

८५. ६. **अयमर्थ इति** ॥ गुणविग्रहविभूतिविशिष्टब्रह्मणः प्राप्यत्वात् यथाक्रतुन्यायेन प्राप्यस्यैवोपास्यत्वात् उपासनस्य च वेदान्तवाक्यजन्यज्ञानपूर्वकत्वात् तथाविधब्रह्मज्ञानं च अर्थवादवाक्यसहितविधिवाक्यादेव सिध्यतीति प्रतिपादनाय भूमिकामारचयति—अयमर्थ इत्यादिना ॥

८६. ६. **अत्र विचारणीयं बहुस्तीति** ॥ विशिष्टत्वस्य विशेषणसाधारण्यमङ्गीकृत्य विशेषणवाचकपदानां ब्रह्मशरीरकपरत्वानङ्गीकारेऽपि उक्तयुक्त्या सर्ववेदान्तैक्यत्वसम्भवान्न काऽपि क्षतिरित्युपपादने विशेषणवाचिनां पदानां तत्तच्छरीरकपरमात्मपरत्वस्थापनाय श्रीभाष्यादावुदाहृतानां-'सर्वे वेदा यत्रैकं

पृ. प.

भवन्ति', 'सर्वे वेदा यत्पदमामनन्ति', 'एको देवो बहुधा सन्निविष्टः', 'सहैव सन्तं न विजानन्ति देवाः' 'मतास्म सर्ववचसां प्रतिष्ठा यत्र शाश्वती', 'वचसां वाच्यमुत्तमं', 'वेदैश्च सर्वैरहमेव वेद्यः' इत्यादिश्रुतिस्मृतीनां निर्वाहाय प्रकारान्तरानुसरणमावश्यकम् । अत एव 'यत्र नान्यत्पश्यति' इति श्रुतिव्याख्यानावसरे रङ्गरामानुजमुनिभिर्भूमशब्दस्य विशिष्टपरत्वमुपपाद्य यद्वेत्यादिकल्पान्तरमनुसृतम् । इयं च तत्सूक्तिः—"यद्वा समाने पूर्ववत्त्वादिति सामसिकाधिकरणे इतरादिसर्वनामशब्दानां पूर्वनिर्दिष्टसदृशवाचित्वस्य व्यवस्थापिततया नान्योऽतोऽस्ति द्रष्टेत्यादिवाक्येष्विव यत्र नान्यत्पश्यतीति वाक्येऽपि समानान्यनिषेधपरत्वाश्रयणात् नानुपपत्तिः" इति—इत्यालोच्यैव बह्वस्तीत्युक्तमिति ध्येयम् ॥

८७. १४. **प्रसादविशिष्टभगवत एवेति** ॥ तस्यैव द्वारत्वं युक्तमिति॥ अयं चाभ्युपगमवादः, सिद्धान्ते--'फलमत उपपत्तेः' 'द्युभ्वाद्यायतनं स्वशब्दात्' 'एष ह्येवानन्दयाति' 'नायमात्मा प्रवचनेन लभ्यः' इत्यादिप्रमाणेन भगवत एव व्यापारसम्बन्धावच्छिन्नकारणत्वावगमात् न्यासोपासनादीनां भगवदाराधनरूपत्वाच्च—इत्यन्यत्र विस्तरः ॥

८८. १. **तत्र प्रथमसूत्र इति** ॥ तत्प्रकारश्च 'आत्मा वाऽरे द्रष्टव्यश्श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' 'सोऽन्वेष्टव्यः' 'स विजिज्ञासितव्यः' इत्यादिवाक्यैः प्रतिपन्नोपासनाविषयकार्याधिकृतफलत्वेन 'ब्रह्मविदाप्नोतिपरम्' इत्यादिना ब्रह्मप्राप्तिः श्रूयत इति ब्रह्मस्वरूपतद्विशेषणानां कार्योपयोगित्वेन सिद्धिरावश्यकी ॥

पु. प.

दुःखासम्भिन्नत्वरूपस्वर्गादिवदिति फलमत उपपत्तेरिति ॥ अत्र च शास्त्रविहितयागदानहोमादीनां फलासाधारणकारणत्वं, उत सर्वज्ञस्य सर्वशक्तेर्महोदारस्य सर्वेश्वरस्यैव फलासाधारणकारणत्वम्—इति विचार्य 'इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः' 'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च' इत्यादिप्रमाणपर्यालोचनया सर्वेश्वर एव सर्वफलासाधारणकारणम्—इति निर्णीतम् ॥

९१. १. निष्प्रपञ्चीकरणेति ॥ क्वचिदपवदनं व्याप्यमौत्सर्गिकस्येत्याद्यनुगृहीतरीत्या उत्सर्गापवादन्यायेन निरतिशयपुरुषार्थरूपब्रह्मप्रतिपादकानां केषां चिद्वेदान्तवाक्यानां परिनिष्पन्नवस्तुपरत्वेनैव प्रामाण्यं प्रयोजनपर्यवसायित्वं च यदुक्तं तदनुपपन्नं, प्रयोजनवत्त्वस्य प्रामाण्यस्य च प्रवृत्तिनिवृत्त्यन्यतरव्याप्यत्वभङ्गापत्तेः । 'न हिंस्यात्सर्वा भूतानि' इत्यत्रेवात्राप्युत्सर्गापवादन्यायाङ्गीकारहेतुर्न दृश्यते । अतो वेदान्तानां कार्यपरतयैव प्रामाण्यमङ्गीकर्तुं युक्तमित्याशङ्कमानानां निष्प्रपञ्चीकरणनियोगवादिनां मतमुपन्यस्य दूषयति—निष्प्रपञ्चीकरणनियोगवादिनस्त्वित्यादिना ॥

९२. ११. तन्मतनिष्कर्ष इति ॥ ज्ञानविशेषस्यैव कृतिस्वरूपताङ्गीकारस्यावश्यकतया ब्रह्मणि कृतिविषयत्वाङ्गीकारापेक्षया ज्ञानविषयत्वाङ्गीकरणमेव स्वरसमित्यभिप्रायेणैवं निष्कर्षः प्रतिपादितः, आशयस्तु ग्रन्थकृतैवोत्तरत्र प्रकटीकरिष्यते—इति ॥

९४. ६. अन्यत्र प्रपञ्चितत्वादित्यादि ॥ अन्यत्र—श्रीभाष्यादौ । इयं च तत्सूक्तिः—"न च शब्द एव प्रत्यक्षज्ञानं जनयतीति

पृ. प.

वक्तुं युक्तं, तस्यानिन्द्रियत्वात्। ज्ञानसामग्रीषु इन्द्रियाण्येः ह्यपरोक्षसाधनानि। न चास्यानभिसंहितफलकर्मानुष्ठानमृदित कषायस्य श्रवण-मनन-निदिध्यासन-विमुखीकृतबाह्यविषयस्य पुरुषस्य वाक्यमेवापरोक्षज्ञानं जनयति । निवृत्तप्रतिबन्धे तत्परेऽपि पुरुषे ज्ञानसामग्रीविशेषाणामिन्द्रियादीनां स्ववि-षयनियमातिक्रमादर्शनेन तदयोगात्'' इति ॥ विस्तरस्तु **शतदूषण्यादौ** द्रष्टव्यः ॥

९९. ६. **स्पष्टं चेदं टीकायामिति**॥ इयं च तत्सूक्तिः—"अपवर्गो-त्तरकालमपि नानुष्ठानप्रसङ्गः, यावन्निमित्तमनुष्ठाननियमाभा-वात्, परिकरशून्येषु तन्नियमाभावो दृष्टः, तस्मात्करणकलेबर-विरहेण न तदानीमनुष्ठानमिति चेत्; हन्त स्वदूषणमेव स्वय-माविष्करोषि। तथा हि—सप्रपञ्चतयाऽनुभवस्य यथार्थानुभव-रूपत्वाभावात् अपवर्गोत्तरभाव्येव यथार्थानुभवः। तदानीं कर-णकलेबराभावेऽपि विषयानुष्ठानं शक्यं न वा ? अशक्यत्वे विधेयत्वमेव न स्यात्। अतश्शक्यमिति वक्तव्यं। अतो निमि-त्तस्य शक्यत्वान्नैमित्तिकस्य नित्यं शक्यत्वाच्च नित्यं तद-नुष्ठानप्रसङ्ग इति भावः''—इति ॥

९६. ५. **यद्वेति**॥ ननु 'आत्मकृतेः' 'तदात्मानं स्वयमकुरुत' इति श्रुतिसूत्राभ्यां ब्रह्मणि रूपभेदेन कृतिसाध्यत्वस्य प्रतिपाद-नात् तत्राप्युक्तयुक्त्या निर्वाहाश्रयणे गौरवमिति उदाहृत-भाष्यस्य यथाश्रुतरीत्या निर्वाहप्रकारं प्रतिपादयति— यद्वेत्यादिना ॥

१०४.११. **दिगिति**॥ दिगित्यनेन ध्याननियोगवादिमतमप्ययुक्त-मिति सूचितम्॥ तथा हि **ध्याननियोगवादिनस्तु**—"वेदान्त-

पु पं.

१०४.११. वाक्यानां न परिनिष्पन्नब्रह्मपरतया प्रामाण्यं, किं तु 'आत्मा वा अरे द्रष्टव्यः' 'निदिध्यासितव्यः' इत्यादिध्यानविधिशेषतयैव, ब्रह्मणि तात्पर्यावगमात्। ध्यानविषयो हि नियोगस्स्वविषयीभूतं ध्यानं ध्येयैकनिरूपणीयमिति ध्येयमाक्षिपति। स च ध्येयः स्ववाक्यनिर्दिष्ट आत्मा। स किंरूप इत्यपेक्षायां तत्स्वरूपविशेषसमर्पणद्वारेण 'सत्यं ज्ञानमनन्तं ब्रह्म' 'सदेव सोम्येदमग्र आसीत्' इत्येवमादीनां वाक्यानां ध्यानविधिशेषतया प्रामाण्यमिति विधिविषयीभूतध्यानशरीरानुप्रविष्टब्रह्मस्वरूपेऽपि तात्पर्यमस्त्येव। तथा च प्रथमतो ब्रह्मविषयकं ध्यानं, ततस्तज्जन्यो नियोगः, ततो ब्रह्मसाक्षात्कारः, ततश्च बन्धनिवृत्तिरूपमोक्षः"--इत्याहुः॥ तदयुक्तं। रज्जुसर्पवद्बन्धस्यापरमार्थत्वेन तत्त्वमसीत्यादिवाक्यजन्यज्ञानेनैव निवृत्तेस्सम्भवात्तदर्थं न नियोगापेक्षा, न हि रज्जुसर्पभ्रमे नायं सर्पो रज्जुरेषेत्यधिष्ठानयाथात्म्यज्ञानातिरिक्तनियोगाद्यपेक्षा दृश्यते। किं च बन्धनिवृत्तेर्नियोगसाध्यत्वे स्वर्गादिवदनित्यत्वप्रसङ्गश्चेत्याद्यनेकयुक्तिपरम्परया अद्वैतिभिरेव दूषितत्वात्—**इत्यालोच्य दिगित्युक्तमिति ध्येयम्॥**

अत्र वक्तव्यास्सर्वेऽप्यंशाः **श्रीभाष्यादौ** विस्तरेण प्रतिपादितास्तत्रैव द्रष्टव्याः॥

इति

श्रीयादवाद्रिनिवासिना, श्रीभाष्यकारकृपालब्धश्रीयादवाद्रीश्वरपादसेवासम्पदा, श्रीमद्वेङ्कटलक्ष्मणमुनीन्द्रपादसेवासमधिगतात्मयाथात्म्यसंविदा, कुप्पनैयङ्गार्यापरनामधेयेन, श्रीवेङ्कटनृसिंहार्येण विदुषा विरचिता

शास्त्रारम्भसमर्थन-तात्पर्यदीपिका

सम्पूर्णा॥

॥ श्रीः ॥

समासवादः

श्रीमन्महीशूरमहाराजाधिराजमहास्थानसभाभूषणैः
शेषार्यवंशमुक्ताफलैः श्रीयादवाद्रिनिवासरसिकैः
पण्डितमण्डलीसार्वभौमैः

श्री ॥ उ ॥ म. अ. अनन्तार्यवर्यैः

विरचितः ।

विद्वद्भिः परिशोध्य

श्रीयादवाद्रिनिवासि-
पण्डितवर्य-श्रीकुप्पनैय्यङ्गार्यविरचितया
तात्पर्यदीपिकाख्यया टिप्पण्या
समेतः ।

म. अ. अनन्तार्येण
प्र. भ. तो. नरसिंहार्येण च
कल्याणपुर-विचारदर्पण-मुद्राक्षरशालायामङ्कयित्वा
प्राकाश्यं नीतः ॥

१८०८.

मूल्य रु. ० — ४ — ०

॥ श्रीः ॥

समासवादः

मुररिपुचरणसरोजे नत्वा स्तुत्वा च लक्ष्मणमुनीन्द्रम् ।
तनुते समासवादं विशदं[1] कुतुकादनन्तार्यः ॥

इह तावदाद्यसूत्रघटकीभूतस्य **ब्रह्मजिज्ञासेति** समासस्य प्रतिपाद्यार्थो विशदीक्रियते ॥ तत्र ब्रह्मजिज्ञासेति समासस्थले ब्रह्मपदस्य ब्रह्मविषयके लक्षणामभ्युपगम्य निर्वाहपक्ष एकः ; लक्षणाया अभावेऽपि लुप्तषष्ठीविभक्तिस्मरणमभ्युपगम्य, विषयविषयिभावस्य संसर्गतया भानमभ्युपगम्य, समासे शक्तिमभ्युपेत्य वा, निर्वाहपक्षास्त्रयः ॥ एतत्पक्षचतुष्टयमपि श्रुतप्रकाशिकायां स्थितम् । अत्र कस्मिन् पक्षे भाष्यादिस्वारस्यं, कस्मिंश्च नेत्ययमंशो विचार्यते ॥

तथा हि ॥ तत्रैवं **जिज्ञासाधिकरणभाष्यम्**—

"ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा । ब्रह्मण इति कर्मणि षष्ठी, कर्तृकर्मणोः कृतीति विशेषविधानात् । यद्यपि सम्बन्धसामा-[2]न्यपरिग्रहेऽपि जिज्ञासायाः कर्मापेक्षत्वेन कर्मार्थत्वसिद्धिः । तथाप्याक्षेपतःप्रासादाभिधानिकस्यैव ग्राह्यत्वात् कर्मणि षष्ठी गृह्यते" इति ॥

---

१. (टिप्पणी—) अज्ञानसंशयविपर्ययरहितं यथा तथा.

२. (टि.) सम्बन्धसामान्यपरिग्रहेऽपि--सम्बन्धत्वावच्छिन्नसम्बन्धोपस्थितिजनकत्वेऽपि । जिज्ञासायाः कर्मापेक्षत्वेन--विषयत्वरूपकर्मत्वसापेक्षत्वेन । कर्मार्थत्वसिद्धिः--जिज्ञासापदपर्यालोचनया कर्मत्वरूपसम्बन्धविशेषपरत्वसिद्धिः ॥ तथाप्याक्षेपतः प्रासादित्यादि--अयं भावः, जिज्ञासापदसामर्थ्यात् ब्रह्मतदनुबन्ध्युभयनिरूपितकर्मत्वस्य लाभेऽपि प्रधानतया जिज्ञास्यस्य ब्रह्मणः कर्मत्वस्य अभिधानिकत्वे तदितरेषां कर्मत्वस्य अर्थाल्लाभेऽपि न क्षतिरिति ॥

ननु—

अत्र भाष्ये विग्रहप्रदर्शनपुरस्सरं तद्घटकषष्ठ्यर्थवर्णनमयुक्तम्, समासघटकपदप्रतिपाद्यार्थस्यैव वक्तव्यत्वात्, विग्रहप्रदर्शनस्य तदर्थवर्णनस्य वा सूत्रार्थे उपयोगाभावात्। व्याख्यानं हि शाब्दबोधहेतुभूतपदजन्यपदार्थोपस्थितिजनकवृत्तिग्रहसम्पादकतयोपयुज्यते, वृत्तिश्च शक्तिलक्षणान्यतरसम्बन्धः॥

तथा च व्याख्यानं तादृशोपस्थितिहेतुभूतवृत्तिग्रहजनकं, शक्तिग्राहकं लक्षणाग्राहकञ्चेति—द्विविधम्।

तत्राद्यं यथा—

अत्रायमथशब्द आनन्तर्ये भवतीति। अत्रानन्तर्य इति सप्तम्याश्शक्तिनिरूपकत्वरूपवाचकत्वार्थकतया तस्य भूधात्वर्थे धर्मे अभेदेनान्वयात्तस्याख्यातार्थाश्रयत्वे तस्य च प्रथमान्तार्थे **अथशब्दे** स्वरूपसम्बन्धेनान्वयात् एतत्सूत्रघटकीभूतातश्शब्दशिरस्काभिन्नः अथशब्द आनन्तर्यवाचकत्वाभिन्नधर्मवानिति बोधः॥**अत्र**--इतीदंपदस्याऽऽद्यसूत्रपरतया सप्तम्या घटकत्वार्थकत्वादयंशब्दस्यातश्शब्दशिरस्क इत्यर्थात्॥ न च—'इदमः प्रत्यक्षगतम्' इत्युक्तरीत्या प्रत्यक्षविषयत्वावच्छिन्नवाचकत्वेऽपीदंशब्दस्य नातश्शब्दशिरस्कत्वावच्छिन्नवाचकत्वमिति तत्प्रतिपादकश्रुतप्रकाशिकाविरोध इति—वाच्यम्। प्रत्यक्षविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने इदमश्शक्त्यङ्गीकारेण प्रकृते **अतश्शब्दशिरस्कत्वस्यैव** तादृशधर्मत्वात्। अतश्शब्दशिरस्कत्वञ्च—तदव्यवहितपूर्वकालवृत्तित्वं, सिद्धान्ते कालस्य सर्वेन्द्रियजन्यप्र-

१. (टि.) सिद्धान्ते कालस्य सर्वेन्द्रियजन्यप्रत्यक्षविषयत्वाङ्गीकारादिति--घटस्सन्पटस्सन्निति चाक्षुषादिप्रतीतेः सर्वसिद्धत्वात् कालष्षडिन्द्रियवेद्यः। तत्र सत्त्वं सत्ताजातिविलक्षण सामान्याधिगत कालसम्बन्धित्वमेव, सामान्य सदिति प्रतीतेः उद्भूतरूपावच्छिन्नचक्षुस्संयोगस्य कालभिन्नचाक्षुषादौ कारणत्वाङ्गीकारान्न तत्प्रत्यक्षत्वानुपपत्तिः॥

त्यक्षविषयत्वाङ्गीकारात्तस्य श्रोत्रेन्द्रियजन्यप्रत्यक्षविषयतावच्छेदकत्व-सम्भवान्न विरोधः ॥ एवञ्च- '**अस्य**- अचिन्त्यविविधविचित्ररचनस्य नियतदेशकालफलभोगब्रह्मादिस्तम्बपर्यन्तक्षेत्रज्ञमिश्रस्य जगतः' इति **जन्माद्यधिकरणभाष्यं** सङ्गच्छते । प्रत्यक्षविषयतावच्छेदकीभूतविविधविचित्ररचनाद्यवच्छिन्ने इदंशब्दस्य शक्तेरुक्तत्वात् ॥ **अथ** उक्तरीत्याऽऽनन्तर्यमात्रस्याथशब्दार्थत्वे कर्मविचारानन्तर्यस्य कथं लाभः । न च- प्रक्रान्तक्रियानन्तर्यमथशब्दार्थः, चैत्रेण पच्यते अथ भुज्यते इत्यादौ पाकानन्तर्यस्य भोजने प्रतीतेः ; तथा च सिद्धान्ते कर्मब्रह्ममीमांसयोरैकशास्त्र्याङ्गीकारेणैकग्रन्थत्वात् **अथातो धर्मजिज्ञासेति** कर्मविचारस्य प्रक्रान्तत्वान्नानुपपत्तिरिति--वाच्यम् । तथा सति प्रक्रान्तक्रियाणामनुगमकरूपाभावेनाथशब्दस्य शक्त्यानन्त्यापत्तेः ॥ न च--स्वसमाधिकरणकालवृत्तित्वं तादृशकालो वाऽथशब्दार्थः, पूर्वग्रन्थादिसूत्रस्थधर्मजिज्ञासापदानुषङ्गात् तदुपस्थापितस्य धर्मविचारस्याथपदार्थैकदेशस्वंसे प्रतियोगितासम्बन्धेनान्वयाङ्गीकाराद्विशिष्टलाभ इति -वाच्यम् ॥ तथाऽपि चैत्रेण पच्यतेऽथ भुज्यत इत्याद्युक्तस्थले पाकानन्तर्यस्यालाभापत्तेः, पाकस्याऽन्यान्तार्थे विशेषणतयाऽन्वितत्वेनैकत्र विशेषणतयाऽन्वितस्यान्यत्र विशेषणतयाऽन्वयायोगात् इति **चेन्न** ॥ स्वपूर्ववाक्यस्थधात्वर्थतात्पर्यविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नक्रियानन्तर्ये **अथशब्दस्य** शक्तिस्वीकारेणानुपपत्त्यभावात् , बुद्धिविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नवाचकतदादिपदानामिव शक्त्यैक्यसम्भवात् । स्वपदमथशब्दपरम् ॥

वस्तुतस्तु--मीमांसकमतानुरोधेन सिद्धान्ते पदजन्यपदार्थोपस्थितिविषयस्यैव पदान्तराप्रयुक्तार्थापत्तिविषयस्यापि शाब्दबोधे भानमुपेयते, घटेन जलमाहरेत्यादौ जलाहरणान्यथानुपपत्त्याऽऽक्षिप्तस्य छिद्रेतरत्वस्य घटादौ शाब्दबोधविषयत्वाङ्गीकारात् । अत एव स्वर्गकामो

यजेतेत्यादौ स्वर्गकामकृतिसाध्यत्वं यागस्य स्वर्गसाधनत्वं विनाऽनुपपन्नमित्यर्थापत्तिविषयस्यापि स्वर्गसाधनत्वस्य यागादौ शाब्दबोधे भानमुपेयते विधेःकृतिसाध्यत्वमात्रार्थतावादिभिर्मीमांसकैः। अतस्तदनुयायिभिरस्माभिरपि तथैवाभ्युपगम्यते। अत एवोक्तं **सर्वार्थसिद्धौ**—

"यागादिगतं कार्यत्वमेव लिङ्वाच्यम्; तच्चेष्टस्य कृत्यधीनात्मलाभत्वम्" इति।

कृत्यधीनात्मलाभत्वं--कृतिसाध्यत्वमित्यर्थः। अयञ्च विषयो **विधिवादे** स्पष्टः। प्रकृते ब्रह्मविचारस्य कर्मविचारं विनाऽनुपपन्नत्वात् कर्मविचारस्यार्थापत्तिसिद्धस्य ध्वंसाधिकरणकालवृत्तित्वरूपानन्तर्यघटकध्वंसे प्रतियोगितयाऽन्वयाभ्युपगमात्कर्मविचारानन्तर्यलाभः। अत एव **भाष्ये** आनन्तर्यमात्रे शक्तिरुक्ता, न तु कर्मविचारानन्तर्ये। तत्र श्रुतप्रकाशिका च—'ब्रह्मजिज्ञासापदसामर्थ्यात्पूर्वभागविचाररूपवृत्तविशेष आक्षिप्तः' इति॥

लक्षणाग्राहकं व्याख्यानं यथा—

"यस्मिन् शब्द एव प्रमाणं न भवति तदशब्दम्, आनुमानिकं प्रधानमित्यर्थः" इतीक्षत्यधिकरणभाष्यम्। तत्र बहुव्रीहिसमासोत्तरपदलक्ष्ये प्रधाने शक्यसम्बन्धरूपलक्षणायाः प्रतिपादनात्, तत्र स्वसमानविषयकत्वसम्बन्धेनानुमितिविशिष्टान्यो यः स्वजन्यबोधः, तद्विषयत्वसम्बन्धावच्छिन्नशब्दनिष्ठप्रतियोगिताकाभाववत्त्वेन प्रधानमशब्दमिति समुदायार्थः॥ न च—सर्वेषां शब्दजन्यज्ञानानां स्वसमानविषयकत्वसम्बन्धेन यत्किञ्चिदनुमितिविशिष्टत्वात्तद्विशिष्टान्यबोध एवाप्रसिद्ध इति—वाच्यम्। आगमानुपजीव्यनुमितेरेवानुमितिपदेन विवक्षणात्।

१. (टि.) कर्मविचारं विनाऽनुपपन्नत्वादिति--चेतनानां त्रिवर्गे प्रथमं प्रावण्यरूपप्रतिबन्धकस्य कर्मविचारसाध्यकर्मविशेष्यकाल्पास्थिरफलकत्वनिर्णयेन निवृत्तौ सत्यामनन्तास्थिरफलब्रह्मज्ञानेच्छा जायते इति॥

तादृशानुमितिविशिष्टान्यबोधश्च यस्सर्वज्ञस्सर्वविदित्याद्यागमजन्य एव प्रसिद्धः ॥ न च-ईश्वरस्सर्वज्ञः सर्वकार्यकर्तृत्वात्, ईश्वरस्सर्वज्ञः शास्त्रकर्तृत्वादित्यादिस्थलीयानुमितिविशिष्ट एव तादृशबोध इति वाच्यम् । उक्तानुमानयोरीश्वरस्य सर्वकर्तृत्वादिप्रतिपादकागममूलकत्वेनागमानुसारित्वाभावात् ॥ न चैवमपि--ईश्वरस्सर्वज्ञत्वव्याप्यमेयत्ववानित्याकारकशाब्दपरामर्शजन्यानुमितिमादायोक्तदोषतादवस्थ्यमिति वाच्यम् । भ्रमात्मकपरामर्शाजन्यत्वस्याप्यनुमितौ विशेषणीयत्वात् । तादृशबोधीयमुख्यविशेष्यतासम्बन्धावच्छिन्नशाब्दाभाववानशब्दपदार्थ इति सर्वस्य ज्ञानविशेषणतया उक्तश्रुतिजन्यबोधविषयत्वेऽपि न क्षतिः निरुक्तसम्बन्धेन शास्त्रविशिष्टत्वरूपशास्त्रैकप्रमाणकत्वमेव शास्त्रयोनित्वमिति--वादान्तरे व्यक्तम् ॥

वस्तुतस्तु--वेदस्य परमतात्पर्यमवान्तरतात्पर्यञ्चेति तात्पर्यं द्विविधम्, कृत्स्नस्यापि वेदस्य ब्रह्मणि परमतात्पर्यम्, पूर्वभागस्यापि आराध्यब्रह्मतात्पर्यकत्वात्, ब्रह्मभिन्ने सर्वत्रावान्तरतात्पर्यमिति आकरादौ व्यक्तम् । स्वीयपरमतात्पर्यविषयतासम्बन्धावच्छिन्नवेदाभाववत्त्वमेवाशब्दमित्यस्यार्थः, शब्दपदस्य वेदपरत्वात्, शास्त्रयोनित्वमप्युक्तसम्बन्धेन वेदविशिष्टत्वमेव ॥ न चैवमुक्तरूपस्य शास्त्रयोनित्वस्य ब्रह्मण्यनुमानादिविषयत्वसत्त्वेऽप्यविरोधादीश्वरानुमानखण्डनं तदधिकरणभाष्ये विरुद्धवचन इति वाच्यम्, अप्राप्ते हि शास्त्रमर्थवदिति न्यायेन अनुमानप्राप्ते शास्त्रतात्पर्यासम्भवात् । स्वीयपरमतात्पर्यविषयत्वसम्बन्धावच्छिन्नवेदाभाववत्त्वं च प्रधानत्वावच्छिन्नानुयोगितासम्बन्धेन बोध्यमिति न जीवादेरशब्दमित्यनेन बोधः ॥ उक्तसम्बन्धसूचनायैव भाष्ये--'आनुमानिकं प्रधानमित्यर्थः' इति प्रधानत्वेनोपादानम् ॥

यदि च--अशब्दमिति योगरूढं पदं, स्वीयपरमतात्पर्यविषयत्वसम्बन्धेन वेदाभाववत्त्वं योगार्थतावच्छेदकं, प्रधानत्वं च रूढ्यर्थताव-

च्छेदकं ; यस्मिन् शब्द एवेति भाष्यं तु यौगिकार्थप्रतिपादनपूर्वकं रूढ्यर्थप्रतिपादकम्-इति विभाव्येत, तदा वेदाभाववत्त्वरूपोक्त-योगार्थस्यातिप्रसक्तावपि न क्षतिरिति ध्येयम् । तथा चेदं भाष्यम् शक्यस्य वेदस्य स्वाभाववत्त्वरूपसम्बन्धप्रतिपादकत्वाल्लक्षणाग्राहकम् । एवञ्च ब्रह्मणो जिज्ञासेति विग्रहगतषष्ठ्यादिव्याख्यानस्य न कथ-ञ्चिदपि सूत्रजन्यबोधोपयोगिता, सूत्रघटकपदानामेव तदुपयोगितया विग्रहगतषष्ठ्याम्सूत्रगतत्वाभावेन तदर्थव्याख्यानमफलम्, सूत्राक्षराणि व्याख्यास्यन्त इति प्रतिज्ञानुरोधेन सूत्रघटकपदानामेव व्याख्ये-यत्वात् ॥ ---इति चेत् ॥

अत्र ब्रह्मपदलक्षणावादिनः—

यद्यपि--अथातश्शब्दव्याख्यानानन्तरं ब्रह्मपदस्य ब्रह्मविषयके लक्षणेत्येव व्याख्यातुमुचितम्, तथापि ब्रह्मपदस्य ब्रह्मविषयके लक्षणायां प्रतिपादितायां तन्नियामकाकाङ्क्षापरिहाराय ब्रह्मण इत्यादि-विग्रहादिप्रतिपादकभाष्यसङ्गतिः । एतदुक्तं भवति ; लक्षणा हि द्वि-विधा प्रातिपदिकस्य प्रातिपदिकान्तरार्थे लक्षणा, प्रातिपदिकस्य विभक्त्यर्थविशिष्टे लक्षणा चेति । तत्राद्या यथा---गङ्गायां घोष इत्यादौ गङ्गापदस्य तीरे ; द्वितीया तु---राजपुरुष इत्यादौ राजपदस्य राजसम्बन्धिनि, ब्रह्मजिज्ञासेत्यादौ ब्रह्मपदस्य ब्रह्मविष-यके च लक्षणा । तत्राद्यस्थले योग्यतातात्पर्याद्यनुरोधेन लक्षणा ; समासस्थले चानुशासनानुरोधेन । तत्र षष्ठीतत्पुरुषस्थले विग्रहघट-कीभूतविभक्त्यर्थविशिष्टे पूर्वपदस्य लक्षणा, यथा राजपुरुष इत्यादौ राजपदस्य राजसम्बन्धिनि ; तथा च ब्रह्मणो जिज्ञासेत्यादिविग्र-हतद्घटकषष्ठ्यर्थवर्णनपरभाष्यस्यापि ब्रह्मपदलक्ष्यार्थनिर्धारणपरत्वा-त्रासङ्गतिः. षष्ठ्यर्थनिश्चयेन लक्ष्यार्थस्य निर्धारितत्वादेव तदंश-मपहाय "ब्रह्मशब्देन च स्वभावतो निरस्तनिखिलदोषोऽनवधिका-

तिशयासंख्येयकल्याणगुणगणः पुरुषोत्तमोऽभिधीयते" इति **भाष्येण** शक्यार्थ एव व्याख्यातः ॥

न च—अत्र भाष्ये अभिधीयत इति शक्तिप्रदर्शनमफलम्, शक्तेः सूत्रजन्यबोधानुपयोगित्वादिति वाच्यम् । इयं लक्षणा न जहल्लक्षणा, वाच्यार्थस्य ब्रह्मणोऽपि शाब्दबोधविषयत्वादित्यभिप्रायकतया तत्सङ्गतेः ॥

एवञ्च षष्ठ्यर्थादिप्रतिपादकभाष्यानन्तरं **ब्रह्मशब्देन चेत्यादि**भाष्यात्पूर्वं 'ब्रह्मपदस्य ब्रह्मविषयके लक्षणा' इति पदत्रयमध्याहार्यम् । तत्र पूर्वभाष्यस्य लक्ष्यार्थनिर्धारणपरत्वादुत्तरभाष्यस्याजहल्लक्षणत्वोपपादकत्वान्न पूर्वोत्तरयोरसङ्गतिः, न वा उपपाद्यार्थानुक्त्या न्यूनता ॥

ब्रह्मण इत्यादिभाष्यस्यायमर्थः । ब्रह्मणो जिज्ञासेत्यनन्तरं 'इति वाक्यं' इति ब्रह्मजिज्ञासेत्यनन्तरं 'इत्यस्य विग्रहः' इति पूरणीयम् । ब्रह्मणो जिज्ञासेति वाक्यं ब्रह्मजिज्ञासेति सूत्रघटकांशस्य विग्रह इत्यर्थः । इतिशब्दसमभिव्याहारस्थले तत्पूर्ववाक्यस्य श्रोत्रग्राह्यतावच्छेदकानुपूर्व्यवच्छिन्नपरतायाः नीलो घट इत्याहेत्यादौ क्लृप्तत्वात्, इतिशब्दस्याभेदार्थकत्वाच्च, ब्रह्मणोजिज्ञासेत्यानुपूर्व्यवच्छिन्नाभिन्नं वाक्यं ब्रह्मजिज्ञासेतिसमासप्रतिपाद्यार्थप्रतिपादकत्वे सति तत्प्रयुक्तलोपप्रतियोगिविभक्तिघटिताभिन्नमिति बोधः ॥ विग्रहवाक्यं हि समासप्रतिपाद्यार्थप्रतिपादकत्वे सति तत्प्रयुक्तलोपप्रतियोगिविभक्तिघटितम् । स्वस्य स्वसजातीयसमासव्यक्त्यन्तरस्य च वारणाय विशेष्यदलं, घटस्य रूपमिति वाक्यं ब्रह्मजिज्ञासेत्यस्य विग्रह इति प्रयोगवारणाय सत्यन्तम् ॥

ब्रह्मण इति कर्मणि षष्ठीति प्रतिज्ञा, विधानादित्यन्तं हेतुः, ब्रह्मण इति षष्ठी कर्मणीति प्रतिज्ञावाक्ये योजना । अत्रेतरान्यस्य नाभ-

दोऽर्थः, षष्ठ्यां ब्रह्मण इति समुदायाभेदस्य बाधात् ; किन्तु घटकत्वम् । ब्रह्मण इति समुदायघटकषष्ठी पक्षः, कर्मपदस्य कर्मत्वपरतया सप्तम्या वाचकत्वार्थकतया कर्मत्ववाचकत्वं साध्यम्, प्रतिपाद्यतासम्बन्धेन कर्तृकर्मणोःकृतीतिसूत्रव्यक्तेर्हेतुत्वम् ॥ तथा च ब्रह्मण इति समुदायघटकषष्ठी कर्मत्ववाचकत्ववती, स्वजन्यबोधीयकर्मत्ववाचकत्वनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेनानुशासनवत्त्वात् । यत्र स्वजन्यबोधीययादृशार्थवाचकत्वनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेनानुशासनवत्त्वं तत्र तादृशार्थवाचकत्वमिति सामान्यव्याप्तौ--लः कर्मणीत्यादिर्दृष्टान्तः । अत्रानुशासनत्वं पाणिन्युच्चरितवाक्यत्वम्, घटपदं पटप्रतिपादकमिति भ्रान्तवाक्ये व्यभिचारवारणाय पाणिन्युच्चरितत्वनिवेशः ॥

यद्यपीत्यादिभाष्यस्य श्रुतप्रकाशिकोक्तव्याख्याविचारस्य वादान्तरे स्पष्टत्वादिहान्यथा व्याख्या क्रियते । न चैवं श्रुतप्रकाशिकाविरोधः, तस्या उपलक्षणपरत्वात् । कृद्योगविहितषष्ठ्या अपि सम्बन्धत्वेनैव कर्मत्वादिकं वाच्यम्, न तु कर्मत्वत्वादिनेति **नैयायिकमतं** दूषयितुमुपन्यस्यति—यद्यपीति ॥

अत्र ताव**न्नैयायिकाः**—कृद्योगषष्ठ्या अपि सम्बन्धत्वेनैव कर्तृत्वादिकमर्थो न तु कर्तृत्वत्वादिना, षष्ठीसामान्यस्य सम्बन्धत्वावच्छिन्न एव शक्त्यङ्गीकारात् । संयोगादिसम्बन्धसत्त्वेऽपि नेदं चैत्रस्य वास इत्यादौ स्वत्वादिसम्बन्धविशेषबोधतात्पर्येण यत्र नञ् प्रयुज्यते तत्र विशेषरूपेणैव षष्ठ्या लक्षणैव, सुब्विभक्तौ न लक्षणेति प्रवादस्यानुशासनासत्त्वे एकविभक्तेरपरविभक्त्यर्थे न लक्षणेत्येतत्परत्वात् । अनुशासनसत्त्वे तु लक्षणा दृश्यते, यथा—कृद्योगषष्ठ्याः कर्तृत्वत्वकर्मत्वत्वाद्यवच्छिन्ने । ग्रामस्य गन्ता, चैत्रस्य पाक इत्यादौ ग्रामकर्मकगमनचैत्रकर्तृकपाकादिबोधस्यानुभा-

विकत्वात् । उक्तस्थलेऽपि कर्मत्वत्वप्रकारकबोधानङ्गीकारे सम्बन्धत्वेन कर्मत्वबोधस्य 'षष्ठी शेषे' इत्यनेनैवोपपत्तेः 'कर्तृकर्मणोः कृति' इत्यस्य वैयर्थ्यं दुर्वारम् ॥ न च–भारतस्य श्रवणमित्यत्र 'कर्मणि द्वितीया' इत्यनेन भारतं श्रवणमिति प्राप्तमिति तन्निषिध्यते। कर्तृकर्मणोः कृतीत्यनेन कर्तृत्वकर्मत्वबोधार्था षष्ठ्येव साधुः न तु द्वितीयेति द्वितीयाया असाधुत्वप्रतिपादकतयैव तत्सार्थकम्; षष्ठी तु शेषे षष्ठीत्यनेनैवेति–वाच्यम् । न लोकेत्यादिना निष्ठादियोगे षष्ठ्या निषेधवैफल्यापत्तेः, कर्तृकर्मणोः कृतीत्यनेन यदि कर्तृकर्मकृद्योगे कर्मत्वादिबोधार्थं षष्ठी विहिता स्यात्, तदा निष्ठादियोगे तस्याः प्रसक्तौ न लोकेत्यादिना निष्ठादियोगे षष्ठ्या निषेधो युक्तः ॥

न च कर्तृकर्मकृद्योगे द्वितीया न साधुः, किन्तु षष्ठ्येवेति कर्तृकर्मणोः कृतीत्यनेन विहितम्; तत्र निष्ठादियोगेऽपि द्वितीयाया असाधुत्वप्राप्तौ अन्नं पक्कमित्यादावन्नस्य पक्कमिति प्रसज्येतेति न लोकेत्यादिना निष्ठादिवर्जनम्; तथा च निष्ठादियोगे द्वितीयैव साधुः, न तु षष्ठीति द्वितीयायास्साधुत्वज्ञापकतया निष्ठादिवर्जनसाफल्यमिति–वाच्यम् । साधुत्वासाधुत्वयोरनुशासनजन्यबोधाविषयत्वेनानुशासनानां लाक्षणिकत्वापत्तेः ॥ तस्मात्कृद्योगे षष्ठीतः कर्मत्वत्वादिप्रकारकबोध एवोपेयः, कर्मत्वत्वाद्यवच्छिन्ने च न शक्तिः, अनन्यलभ्यस्यैव शब्दार्थत्वात्; किन्तु लक्षणैव ॥ –इति वदन्ति ॥

अपरे तु-कृद्योगषष्ठीस्थलेऽपि सम्बन्धत्वेनैव कर्मत्वादिबोधः, न तु कर्मत्वत्वादिना— –**इत्याहुः** ॥

एतत्पक्षद्वयमपि यद्यपीत्यादिना सङ्गृहीतम् । सम्बन्धसामान्यपरिग्रहेऽपि षष्ठीसामान्यस्य सम्बन्धत्वावच्छिन्ने शक्त्यङ्गीकारेऽपि तेज्ञासायाः कर्मापेक्षत्वेन कर्मत्वत्वावच्छिन्नसाकाङ्क्षत्वेन कर्मत्वसिद्धिः, लक्षणया कर्मत्वत्वप्रकारकबोधजनकत्वसम्भवः ॥ तथा

च विग्रहवाक्यस्थषष्ठ्या लक्षणयैव कर्मत्वत्वप्रकारकबोध इति—**आद्यः पक्ष उपन्यस्तः** ॥ सम्बन्धसामान्यपरिग्रहेऽपि सम्बन्धत्वावच्छिन्न-विषयताकशाब्दबोधाभ्युपगमेऽपि कर्मार्थत्वसिद्धिः, कर्मत्वत्वप्रकारक उदीच्यमानसबोधः । तथा च ब्रह्मजिज्ञासेत्यादौ सम्बन्धत्वप्रकारक-एव बोधः ॥ जिज्ञासा ब्रह्मकर्मिका न वेति संशयनिवृत्तिस्तु तन्मूल-कोदीच्यबोधादिति भाव इति—**द्वितीयः पक्ष उपन्यस्तः** ॥

एतत्पक्षद्वयमपि दूषयति **तथाऽपीत्यादिना** ॥ आक्षेपतः—अन्वयानुपपत्त्यादितः । प्राप्तात्—अङ्गीकरणीयात्, लक्षणारूपवृत्त्यन्तरात् । आभिधानिकस्यैव—अभिधारूपवृत्त्यन्तरस्यैव । ग्राह्यत्वात्—कर्तृकर्मणोरित्यनुशासनबोध्यत्वात् । कर्मणि षष्ठी गृह्यते—विग्रहवाक्यगत-षष्ठी कर्मत्वत्वावच्छिन्नवाचिकेत्यभ्युपगम्यते ॥ तथा चानुशासनस्थ-सप्तम्या वाचकत्वपरतया उक्तानुशासनानुरोधेन कर्मत्वत्वाद्यवच्छिन्ने शक्तिरेवोपेया । उक्तानुशासनस्य लक्षणाग्राहकत्वे कर्मणि द्वितीया शेषे षष्ठीत्यादेरपि लक्षणाग्राहकत्वमेव स्यात्, एकत्वादौ शक्तेः क्लृप्ततया शक्यसम्बन्धरूपलक्षणासम्भवात् ॥

न च—एकत्वादौ लक्षणा कर्मत्वे च शक्तिरिति विनिगमनाविरहा-दुभयत्रापि शक्तिसिद्धिरिति—वाच्यम् । एकत्वे शक्त्यभ्युपगमे एक-त्वत्वस्य जातित्वेन शक्यतावच्छेदकलाघवस्यैव विनिगमकत्वात् ॥ तथा च षष्ठ्यास्सम्बन्धसामान्येऽपि शक्तिविलयप्रसङ्गः ॥

एतेन—कर्मत्वत्वावच्छिन्ने कृद्योगषष्ठ्या न शक्तिः, अनन्यलभ्य-स्यैव शब्दार्थत्वादिति—**निरस्तम्** ॥

द्वितीयपक्षदूषणपरत्वे च ॥ आक्षेपतः प्राप्तात्--लक्षणागम्यात् द्वितीयाया असाधुत्वात्, आभिधानिकस्यैव—शक्तिगम्यस्य वाचकत्व-स्यैव, ग्राह्यत्वात्--कर्तृकर्मणोः कृतीत्यनुशासनतात्पर्यविषयत्वात्,

१. (पा) वृत्तेरेव. २. (पा) कर्मत्वादौ लक्षणा, एकत्वे च शक्तिरिति.

कर्मणि षष्ठी गृह्यते--कर्मत्वत्वावच्छिन्नबोधिका षष्ठीति स्वीक्रियते। तथा चोक्तानुशासनानुरोधात्कर्मत्वत्वावच्छिन्ने शक्तेरावश्यकतया तादृशरूपेण बोध आवश्यक इति भावः ॥

एतत्सर्वमभिप्रेत्योक्तं **श्रुतप्रकाशिकायां**-

"कर्मणि द्वितीयेतिवत् कर्तृकर्मणोः कृतीति सप्तम्यन्तनिर्दिष्टयोः कर्तृकर्मणोरभिधेयत्वमनुशासनस्वारस्यानुगुणमिति **भाष्यकाराभिमतः परिहार इति सम्प्रदायः**" इति ॥

तथा च--ब्रह्मण इत्यादिभाष्यस्य ब्रह्मपदस्य ब्रह्मविषयकत्वरूपतत्कर्मकत्वावच्छिन्ने लक्षणाबोधकत्वान्न काऽप्यसङ्गतिः ॥

न च--अत्र कल्पे द्वितीयसूत्रे यत इत्यनेन ब्रह्मपरामर्शो न सम्भवति, प्रक्रान्तवाचिनोऽपि यच्छब्दस्य पूर्वपदजन्योपस्थितिविशेष्यवाचकत्वेऽपि पूर्वपदार्थैकदेशवाचित्वाभावाच्चैत्रस्सामागतो यः पूर्वं दृष्ट इत्यादौ तथा दर्शनादिति- वाच्यम् । कर्मविचारानन्तर्यस्य अथशब्दवाच्यत्वे तदेकदेशकर्मविचारस्य अतइत्येतच्छब्देन परामर्शदर्शनेन पूर्वनिर्दिष्टपदार्थैकदेशस्यापि यच्छब्देन परामर्शनोपपत्तेः ॥

न च--आद्यसूत्रघटकब्रह्मपदस्य ब्रह्मविषयकलाक्षणिकत्वे तस्योत्तरसूत्रादावनुवृत्तस्य ब्रह्ममात्रबोधकत्वानुपपत्तिरिति वाच्यम् । "स्याच्चैकस्य ब्रह्मशब्दवत्" इति न्यायेनोपपत्तेः । तत्र हि "तस्माद्वा एतस्मादात्मन आकाशस्सम्भूतः, आकाशाद्वायुः" इत्यत्र आकाशे गौणतया प्रयुक्तस्य वायोरित्यत्रानुवृत्तस्य सम्भूतशब्दस्य मुख्यत्वमित्युक्तं, तद्वदेव प्रकृतेऽप्युपपत्तिसम्भवान्न काऽप्यनुपपत्तिः ॥

इत्याहुः ॥

लुप्तविभक्तिस्मरणवादिनस्तु

ब्रह्मजिज्ञासेति समासेन कस्या विभक्तेर्लोपः, कुत्रायं च तस्याः कोऽर्थ इत्याशङ्कायामाह--ब्रह्मणइत्यादि । ब्रह्मणो जिज्ञासेति विग्रहानुरोधात्

ब्रह्मजिज्ञासेत्यत्र षष्ठी लुप्तेत्यर्थः । अर्थवशादध्याहारे उक्तार्थसम्भवात् अध्याहारं विना कस्मिन्नपि पक्षे उपपत्त्यसम्भवात् ब्रह्मण इति कर्मणि षष्ठीत्यादिना लुप्तविभक्तेरेवार्थव्यवस्थापनम् । वाक्यार्थस्तु पूर्ववदेव ॥

तथा च--अथातश्शब्दव्याख्यानानन्तरं लुप्तषष्ठीव्याख्यानं, तदनन्तरञ्च ब्रह्मपदस्य व्याख्यानं, ततश्च जिज्ञासापदस्येति**भाष्ये** न किञ्चिदपि व्याख्यानासाङ्गत्यम् ॥

न च--सूत्रक्रमानुरोधात् ब्रह्मशब्दव्याख्यानानन्तरं षष्ठीव्याख्यानं, ततश्च जिज्ञासापदव्याख्यानमुचितमिति—वाच्यम् । राज्ञः पुरुष इत्यादौ स्वामित्वं षष्ठ्यर्थः, तस्य राज्ञि प्रातिपदिकार्थे विशेषणतयाऽन्वयः, तस्य स्वत्वसम्बन्धेन पुरुषादावन्वयः, प्रकृत्यर्थस्य विभक्त्यर्थविशेष्यता यत्र तत्र नामार्थयोस्साक्षादपि भेदान्वयबोधस्याभ्युपगमात् नामार्थयोर्भेदान्वयबोधे प्रकारीभूतविभक्त्यर्थोपस्थितेस्तन्त्रत्वादिति **प्राचीननैयायिकमते** ब्रह्मजिज्ञासेत्यादौ लुप्तषष्ठ्यर्थस्य ब्रह्मणि प्रकारतयाऽन्वयइत्यन्वयानुरोधेन ब्रह्मपदव्याख्यानात्पूर्वं षष्ठीव्याख्यानसङ्गतेः । (एतन्मताभिप्रायेणैव **शास्त्रदीपिकायां** दध्ना जुहोतीत्यत्र करणत्वविशिष्टं दधि विधीयत इत्युक्तम्)॥ अत्र कल्पे उत्तरसूत्रस्थयत्पदेन ब्रह्मणः परामर्शः. उत्तरसूत्रानुषक्तब्रह्मपदस्य ब्रह्मार्थकत्वञ्च स्वरसत एवोपपद्यते ॥

ब्रह्मपदलक्षणाकल्पं प्रतिपाद्य अयमेव कल्पः **श्रुतप्रकाशिकायां** यद्वेत्यादिना प्रतिपादितः । तत्रत्या पङ्क्तिरियम्—

"यद्वा लुप्तविभक्तिकशब्देन विभक्त्यर्थबोधनं मुख्यं स्यात्, सम्बन्धिनो हि लक्षणा दृष्टा न सम्बन्धमात्रस्य, विभक्त्यर्थश्च स्वयं सम्बन्धरूपः । न च--सम्बन्धस्य सम्बन्धान्तरानपेक्षत्वेन स्वस्मिन् सम्बन्धकार्यकरत्वाल्लक्षणा सम्भवतीति—वाच्यम् । सम्बन्धस्य स्वपरनिर्वाहकत्वानभिज्ञानामपि वि-

भक्त्यर्थप्रतीतेः ॥ न हि सम्बन्धसत्तया लक्षणाहेतु, किन्तु ज्ञायमानतयैव. न चेदतिप्रसङ्गात् । एवं लक्षणाऽनुपपत्त्या प्रयोगस्यानन्यथासिद्धत्वात् समस्तशब्देन विभक्त्यर्थबोधनं मुख्यम् " -- इति ॥

अयमर्थः ॥ लुप्तविभक्तिकशब्देन- लुप्तविभक्तिविशिष्टब्रह्मपदेन, ब्रह्मपदोत्तरलुप्तविभक्त्येति यावत् । विभक्त्यर्थबोधनं मुख्यं स्यात् विभक्तिशक्यकर्मत्वत्वावच्छिन्नबोधशक्तिप्रयोज्य इत्यर्थः ॥ तथा च लुप्तविभक्त्यैव कर्मत्वबोधोपपत्तेरलं तत्र पूर्वपदलक्षणयेति भावः । समस्तशब्देन--समासप्रयुक्तलोपप्रतियोगिविभक्तिघटितशब्देन, लुप्त विभक्त्येति यावत् ॥

एवञ्च—उक्तश्रुतप्रकाशिकानुरोधात भाष्यस्याभिमतेव कल्पे तात्पर्यम् ; अत एव सामानाधिकरण्यविचारे श्रुतप्रकाशिकायां 'समानविभक्तिर्विशेष्यैक्यपरा, समानविभक्त्या [illegible] वृत्ति शब्देन विवक्षितम्' इत्युक्तम् । विशेष्यवाचकपदप्रकृतिकविभक्तिसजातीयविभक्त्युपस्थितिद्वारा अभेदप्रकारकशाब्दबोधजनकत्व सामानाधिकरण्यमित्यर्थः । तथा च नीलोत्पलमित्यादौ लुप्तविभक्तिस्मरणमभ्युपगम्य सामानाधिकरण्यलक्षणसमन्वयः कार्य इति भावः ॥

न च--लुप्तविभक्तिस्मरणेनैव चेदन्वयबोध, तदा विभक्तिलोपम जानतः शाब्दबोधानुपपत्तिरिति--वाच्यम् । दधि पश्यतीत्यादाविव लुप्तविभक्तिस्मरणस्य नियमेन कल्पनात् ॥ न चैवं ऋद्धस्य राजपुरुष इति प्रयोगापत्तिः, ऋद्धराजपदयोष्षष्ठ्यन्तत्वोपस्थितेस्समानविभक्तिकत्वज्ञानेनाभेदान्वयबोधसम्भवादिति--वाच्यम् । ऋद्धराजपदयोरभेदान्वयबोधसम्भवेऽपि वृत्त्यघटकपदानपेक्षत्वरूपसामर्थ्यानुपपत्त्या समासासाधुत्वात् तादृशप्रयोगविरहात् ॥

इत्याहुः ॥

संसर्गतावादिनस्तु—

राजपुरुष इत्यादौ राजपदार्थस्य पुरुषे स्वत्वसम्बन्धेनान्वयः, नामार्थयोरपि भेदेनान्वयबोधाभ्युपगमात्॥ न च—राजपुरुष इत्यादिसमासस्थलीयसामग्रीसत्त्वात् राजा पुरुष इत्यादावपि तादृशबोधापत्तिरिति—वाच्यम्। उक्तसमासस्थलीयसामग्र्याः राजपदाव्यवहितोत्तरपुरुषपदत्वरूपाया राजा पुरुष इत्यादावभावात्, सुपा व्यवधानेन राजपदपुरुषपदयोरव्यवधानविरहात्॥ न चैवं—समासव्यासयोस्समानार्थकत्वानुरोधेन राज्ञः पुरुष इत्यादावपि राजपदार्थस्य पुरुषपदार्थे स्वत्वसम्बन्धेनान्वयसम्भवात् विभक्तेर्निरर्थकत्वमिति—वाच्यम्। षष्ठ्यन्तराजपदसमभिव्याहृतपुरुषपदत्वरूपोक्तस्थलीयाकाङ्क्षानिर्वाहकतया विभक्तेरुपयोगात्, शेषे षष्ठीत्याद्यनुशासनस्याकाङ्क्षाघटकतया स्वत्वादिसम्बन्धभाननियामिका षष्ठीत्यर्थात्॥ एवञ्च ब्रह्मजिज्ञासेत्यत्र ब्रह्मपदार्थस्य जिज्ञासापदार्थे विषयतासम्बन्धेनान्वयात् ब्रह्मविषयकजिज्ञासालाभः। ब्रह्मणो जिज्ञासेत्यादिविग्रहस्थले कर्तृकर्मणोः कृतीत्यनुशासनानुरोधेन विषयिविषयभावस्य संसर्गत्वावश्यकत्वात् ब्रह्मजिज्ञासेति समासस्थलेऽपि विषयितायास्संसर्गत्वमावश्यकम्। समासव्यासयोस्समानार्थकत्वादित्येवम्परत्वात् ब्रह्मणो जिज्ञासेत्यादिभाष्यस्येति नासङ्गतिः॥ न च—ब्रह्मपदजिज्ञासापदयोर्व्याख्यानानन्तरं तत्र संसर्गतया विषयिताभानव्यवस्थापनं युक्तम्, पूर्वमेव तद्व्यवस्थायां किं नियामकमिति—वाच्यम्। स्वतन्त्रेच्छस्येति न्यायेनेच्छाया एव नियामकत्वात्॥ ब्रह्मण इति कर्मणि षष्ठीति भाष्यस्य विग्रहवाक्यजन्यबोधे षष्ठ्यन्तब्रह्मपदसमभिव्याहृतजिज्ञासापदत्वरूपाकाङ्क्षाघटकतया विषयतारूपकर्मत्वस्य संसर्गतया भाननियामिका षष्ठीत्यर्थः॥

नन्वेवं—चैत्रः पचतीत्यादौ कर्तरि लकाराङ्गीकारोऽसङ्गतः, कर्तृतासम्बन्धेनैव पाकस्य चैत्रादावन्वयसम्भवात्, लः कर्मणीत्याद्यनुशासनस्यापि आख्यातान्तर्घटितधातुसमभिव्याहृतचैत्रपदत्वरूपाकाङ्क्षाघटकतया कर्तृत्वादेस्संसर्गतया भाननियामका लकारा इत्यर्थसम्भवात् । तथा च--लकारस्य कर्त्रर्थताप्रतिपादक**वेदान्तदीपादि**ग्रन्थविरोधः । तथा च **कर्त्रधिकरणदीपे** "यजेत उपासीतेति कर्तरि लकारः, अतः कर्तारमेव बोधयति शास्त्रम्" इत्युक्तम् । **वेदार्थसङ्ग्रहे च** "स्वर्गकामो यजेतेत्यादिषु लकारवाच्यकर्तृविशेषसमर्पकाणां स्वर्गकामादिपदानां नियोज्यविषयसमर्पकत्वं शब्दानुशासनविरुद्धम्" इत्युक्तम् । तथा च कर्तर्याख्यातस्य शक्त्यङ्गीकारात्तदनुरोधेनेहापि कर्मवाचकत्वं षष्ठ्याः स्वीकर्तव्यम् इति **चेत्** ॥ **सत्यम्** । वैयाकरणरीत्या तत्र कर्तरि शक्तिप्रतिपादनम्, न तु स्वमताभिप्रायेण; अत एव तत्र शब्दानुशासनविरुद्धमित्युक्तम् । 'ब्रह्मशब्देन च' इत्यादिभाष्येण ब्रह्मपदस्य शक्तिप्रतिपादनेन ब्रह्मपदलक्षणाविरहसूचनात्, लुप्तविभक्तिस्मरण कल्पनस्य च 'अप्रयुक्ताऽपि स्मृता विभक्तिर्बोधिकेति सा व्याख्येयेति चेन्न, तत्स्मरणेन विनाऽप्यर्थप्रतिपत्तेः' इति प्रकृतभाष्यव्याख्यानपरश्रुतप्रकाशिकाविरोधाच्च, संसर्गतया कर्मत्वादिभानमेव भाष्याभिमतम् ॥ यद्वा--लुप्तविभक्तिकशब्देन विभक्त्यर्थबोधनं मुख्यं स्यादिति श्रुतप्रकाशिकाया अपि संसर्गतापक्ष एव तात्पर्यम्, विभक्त्यर्थबोधनमित्यस्य संसर्गतया विभक्त्यर्थबोधनमित्यर्थाद्य कोऽपि विरोधः इति प्रतिपादयन्ति ॥

समासशक्तिवादिमतम्

पङ्कजादिपदानां पङ्कजनिकर्तृत्वावच्छिन्ने पद्मत्वावच्छिन्ने च यथा शक्तिद्वयम्, एवमेव राजपुरुष इत्यादावप्यवयवशक्त्येव समुदायशक्तिरपि कल्प्यते । न च--पङ्कजादिपदं पद्मत्वेन रूपेणोपस्थितेर

शक्त्यन्तरकल्पनमिति—वाच्यम्, चित्रग्वादिपदेऽपि स्वामित्वेनोपस्थितये तत्कल्पनस्यावश्यकत्वात्। तथा च ब्रह्मजिज्ञासेत्यत्रापि समुदायशक्त्यैव ब्रह्मविषयकजिज्ञासालाभः। ब्रह्मणो जिज्ञासेत्यादिभाष्यन्तु योगार्थप्रदर्शनपरम्॥ यद्वा--लुप्तविभक्तिशब्देनेत्यादिश्रुतप्रकाशिका समासशक्तितात्पर्येणैव प्रवृत्ता, लक्षणाऽनुपपत्त्या प्रयोगस्यानन्यथासिद्धत्वात् समस्तशब्देन विभक्त्यर्थबोधनं मुख्यमित्युपसंहारानुसारात्। तस्माद्व्याकरणरीत्या समासशक्तिरेव भाष्याभिप्रेता॥

—**इति वदन्ति**॥

एवं **पक्षचतुष्टयं** सोपपत्तिकं प्रदर्शितम्। तत्रान्यतमपक्षे भाष्यादिग्रन्थनिर्भरस्तु श्रीभाष्यश्रुतप्रकाशिकादिग्रन्थकुशलैरेव ग्राह्यः॥ परन्तु तत्पुरुषे पूर्वपदलक्षणाऽनङ्गीकारे निषादस्थपत्यधिकरणविरोधः। तत्र हि तत्पुरुषे लक्षणापत्त्या कर्मधारय आश्रितः। तदधिकरणसिद्धान्तानुरोधश्च **भाष्यकाराभिमतः**। तथा च--"**परं** जैमिनिर्मुख्यत्वात्" इत्यत्र **भाष्यम्**—

"निषादस्थपतिन्यायेन ब्रह्मैव लोको ब्रह्मलोक इति कर्मधारयस्यैव युक्तत्वात्" इति॥

---

१. (टि.) श्रीभाष्यश्रुतप्रकाशिकादिग्रन्थकुशलैरेव ग्राह्य इति॥ कर्तृकर्मणोः कृतीत्यनुशासनस्य कर्मत्वादौ षष्ठ्यादिशक्तिग्राहकत्वमेव, कर्मणि द्वितीयेत्यनुशासनवत्--इति श्रुतप्रकाशिकायामनुगृहीतत्वेन तत्पक्ष एव भाष्यकृतां निर्भर इति सम्प्रदायः॥

२ (टि) निषादस्थपतिन्यायेनेत्यादि॥ स्थपतिर्निषादस्स्याच्छब्दसामर्थ्यादिति सूत्र पूर्वमीमांसाषष्ठाध्यायगतं। 'एतया निषादस्थपतिं याजयेत्' इति श्रुतिः तस्य विषयः। तत्र निषादानां स्थपतिरिति विग्रहेण निषादसम्बन्धिस्थपतिः प्रतीयते वा, निषादश्चासौ स्थपतिश्चेति विग्रहेण निषादाभिन्नस्थपतिः प्रतीयते वा? इति संशयः। षष्ठीतत्पुरुषाश्रयणे स्थपतेस्समर्थत्वात् विद्वत्त्वात् अग्निमत्त्वाच्च यज्ञाद्यनुष्ठानं युज्यत इति पूर्वः पक्षः। तथा सति श्रुतिगतनिषादपदस्य लक्षणापत्त्या कर्मधारयपक्ष एव आश्रयणीय इति तादृशन्यायार्थः॥

शब्दप्रकाशिकायामपि लक्षणापक्ष एव बहुधा प्रपञ्चितः, ततश्च यद्वेत्यादिना लक्षणाभावपक्षं प्रतिपाद्यामुख्यत्वे वा का नः क्षतिरिति पूर्वकल्प एव पुनस्स्मारित इति तत्रैव भाष्यनिर्भर इत्यस्मद्गुरुचरणा इत्यलम् ॥

प्रसङ्गादत्र जिज्ञासापदार्थशोधनाय सनर्थो विचार्यते। बुभुक्षापिपासेत्यादौ सन्प्रत्ययार्थ इच्छा । तत्र धात्वर्थस्य भोजनादेः स्वसमानकर्तृकत्वस्वविशेष्यकत्वोभयसम्बन्धेनान्वयादुक्तोभयसम्बन्धेन भोजनादिविशिष्टेच्छैव प्रतीयते. न तु केवलस्वविशेष्यकत्वसम्बन्धेन भोजनादिविशिष्टेच्छा. तथा सति परकर्तृकभोजनेच्छायामपि अयं बुभुक्षत इति प्रयोगप्रसङ्गात् । भोजनोत्तरकालीनगमनकृतिर्भवत्वितीच्छादशायां बुभुक्षत इति प्रयोगवारणाय स्वविशेष्यकत्वनिवेशः । ओदनं बुभुक्षते, ओदनस्य बुभुक्षेत्यादौ धात्वर्थकर्मतयेच्छाविषयत्वरूपसनन्तार्थकर्मत्वमेव द्वितीयाद्यर्थः, न तु भुजिधात्वर्थकर्मत्वमेव तथा। अत एव च यदोदनादिकर्मकभोजनादिकमप्रसिद्धम्, अथ च भोजनकर्मतया तदिष्टम्. तत्र तदोदनं बुभुक्षत इत्यादेः दर्शनादिविषयत्वेन गगनादिगोचरेच्छास्थले च गगनं दिदृक्षत इत्यादिप्रयोगस्य नानुपपत्तिः; न वा ओदनादिरूपकर्मसमारोपरागेण यत्र भोजनादीच्छा दैववशेन तद्भोजनादिकं विषादिकर्मकमपि, तत्र विषं बुभुक्षत इत्यादयः प्रयोगाः ॥

१. (टि.) अत्र समानकर्तृकत्वादेस्सन्नर्थत्वोपगमे धातोः कर्मणस्समानकर्तृका-दिच्छायां वेतिसूत्रे समानकर्तृकत्वादेरपि शक्यत्वप्रतीत्या तद्विरोध इति भाष्यं दुर्नयम् । तत्सूत्रं हि सनस्समानकर्तृकत्वाद्यर्थकत्वं न प्रतिपादयति, किं तु इच्छाकर्मत्वेन तत्समानकर्तृकत्वेन च स्वार्थपरधातुसमभिव्याहृतसन्प्रत्ययस्य इच्छारूपार्थकत्वमेव प्रतिपादयतीति न विरोध इति ॥

न च—यत्रोदनभोजनं भवत्वितीच्छा तत्र विषं बुभुक्षत इत्यादिप्रयोगो न सम्भवति, विषकर्मकत्वविशिष्टभोजनादिनिरूपितविषयितायाः नियमत इच्छायां संसर्गतया भानेन तद्बाधात्; तथा च धात्वर्थकर्मत्वस्य उक्तस्थले द्वितीयार्थत्वेऽपि न क्षतिरिति—वाच्यम् ॥ एवमपि गगनं दिदृक्षत इत्यादिप्रयोगोपपत्तये धात्वर्थकर्मतयेच्छाविषयत्वरूपसनन्तार्थकर्मत्वस्यैव भानावश्यकत्वात् एवमेव कर्मप्रत्ययस्थलेऽप्युक्तोभयसम्बन्धेन धात्वर्थविशेषितैवेच्छा सनन्तार्थः, न त्विच्छाविषयीभूतभोजनादिः ॥ तथा सति ओदनो बुभुक्ष्यत इत्यादौ धात्वर्थकर्मत्वस्यैव कर्माख्यातार्थत्वप्रसङ्गेन यदोदनादिकर्मकभोजनादिकमप्रसिद्धं, अथ च भोजनकर्मतया तदिष्टं ; तत्र ओदनो बुभुक्ष्यते, गगनं दिदृक्ष्यत इत्यादिप्रयोगस्य बाधापत्तेः ॥ एतेन सोऽन्वेष्टव्यस्सविजिज्ञासितव्य इत्यादौ प्रथमानुपपत्तिः। कर्मणि विहितेन तव्येन ब्रह्मगतकर्मत्वाभिधानात्प्रथमा निर्वोढव्या ; तत्र नेच्छाकर्मत्वस्याभिधानेन तन्निर्वाहः, तस्य ज्ञानगतत्वेन ब्रह्मगतत्वस्य त्वयाऽनङ्गीकारात्। ज्ञानक्रियानिरूपितकर्मत्वस्य तु न तेनाभिधानम्। देवदत्तेन यज्ञदत्तः पाचयतीत्यत्र णिजुत्तरकर्तृप्रत्ययेन तत्प्रकृत्यर्थपचिक्रियानिरूपितकर्तृत्वस्यैव सनन्तोत्तरकर्मप्रत्ययेनापि सन्प्रकृत्यर्थनिरूपितकर्मत्वस्याभिधानासम्भवात्—इति दूषणस्यात्र कल्पे नावकाशः। धात्वर्थप्राधान्यकल्पे हि तद्दूषणं, अस्माभिस्तु इच्छाकर्मत्वमेव ब्रह्मणस्स्वीक्रियत इति ॥

एवञ्च कर्तृप्रत्ययस्थले कर्मप्रत्ययस्थले चाख्यातार्थवर्तमानत्वादेरिच्छायामन्वयस्य नानुपपत्तिः। एवञ्च कृत्यसत्त्वेऽपीच्छायां सत्यां पाकं चिकीर्षति पाकश्चिकीर्ष्यत इत्याद्युभयविधप्रयोग उपपन्नः । एतेन कर्तृप्रत्ययस्थले इच्छाया विशेष्यत्वेऽपि कर्मप्रत्ययस्थले धात्वर्थस्यैव विशेष्यत्वात् तत्राख्यातार्थवर्तमानत्वादेरिच्छायामन्वयासम्भवमाशङ्क्य

प्रकृत्यर्थैकदेशेऽपि नीलतरो घट इत्यादिस्थले नीलरूपादौ तरबर्था तिशयान्वयदर्शनेन प्रकृतेऽपि प्रकृत्यर्थैकदेशेच्छायां प्रत्ययार्थवर्तमानत्वादेरन्वय इति केषां चिदाशयामोऽनुपादेयः ; कर्तृप्रत्ययस्थल इव कर्मप्रत्ययस्थलेऽपीच्छाया एव विशेष्यत्वेन अनुपपत्तेरेवाभावात् ॥

न च कर्तृप्रत्ययस्थलेऽपि सनन्तार्थेच्छाकर्मत्वस्यैव द्वितीयार्थत्वे गृहस्थित्यादिगोचरेच्छादशायां गृहं तिष्ठासतीति प्रयोगप्रसङ्गः, स्थाधातोरकर्मकत्वेऽपि सनन्तार्थस्य सकर्मकत्वादिति--वाच्यम् ॥ गृहस्थित्यादीच्छादशायां गृहादेस्स्थित्याधारत्वादिनेच्छाविषयत्वेऽपि धात्वर्थस्थित्यादिकर्मतयेच्छाविषयत्वविरहेणोक्तप्रयोगवारणात् । एवं च ब्रह्मजिज्ञासेत्यादावपि जिज्ञासापदं स्वसमानकर्तृकत्वस्वविशेष्यकत्वोभयसम्बन्धेन ज्ञानविशिष्टेच्छापरं, ब्रह्मपदं च तत्पुरुषलक्षणया ज्ञानकर्मताविशिष्टब्रह्मविषयकपरम् । उक्तब्रह्मपदार्थस्य च जिज्ञासापदार्थे अभेदान्वयाद्विशिष्टलाभः । ब्रह्मज्ञानं भवत्वित्याकारिकायां ब्रह्मकर्मकत्वप्रकारकज्ञानविशेष्यकेच्छायां ज्ञानकर्मकत्वनिष्ठविषयतानिरूपित ब्रह्मनिष्ठविषयतानिरूपकत्वरूपज्ञानकर्मताविशिष्टब्रह्मविषयकत्वस्याबाधेन तादृशेच्छाया ब्रह्मजिज्ञासापदेन लाभो न विरुद्धः । उक्तरीत्यैव पक्षान्तरेऽप्यर्थो ऊह्यः । अयमेवार्थो भाष्यादिषु प्रतिपादितः ॥ तथा च भाष्यम् "ज्ञातुमिच्छा जिज्ञासा, इच्छाया इष्यमाणप्रधानत्वादिष्यमाणं ज्ञानमिह विधीयते" इति ॥ ज्ञातुमिति तुमर्थो विशेष्यता, तस्याश्च स्वाश्रयसमानकर्तृकत्वविशिष्टनिरूपकत्वसम्बन्धेन इच्छायामन्वयात् स्वसमानकर्तृकत्वस्वविशेष्यकत्वोभयसम्बन्धेन ज्ञानविशिष्टेच्छालाभः । जिज्ञासा जिज्ञासापदार्थ ॥

१. (टि) समस्तावादिपक्षे विषयतासम्बन्धेन ब्रह्मप्रकारकजिज्ञासापदार्थ विशेष्यस्य बोधः लुप्तविभक्तिस्मरणपक्षेऽपीच्छाविशेष्यक एव बोधः ॥

ननूक्तोभयसम्बन्धेन ज्ञानविशिष्टेच्छाया एव जिज्ञासापदार्थत्वे तादृशेच्छायां कथमध्याह्रियमाणकर्तव्यपदार्थकृतिसाध्यत्वस्यान्वयः. इच्छाया विषयसौन्दर्याधीनत्वेन पुरुषेच्छाधीनकृतिसाध्यत्वाभावादित्यत्राह—इच्छया इति । इष्यमाणप्रधानत्वादित्यनन्तरं अविधेयत्वेऽपीति पूरणीयम् । इष्यमाणप्रधानत्वात्--इष्यमाणवस्त्वधीनत्वात्. वस्तुसौन्दर्यायत्तत्वादिति यावत्। अविधेयत्वेऽपि—पुरुषेच्छाधीनकृति साध्यत्वाभावेऽपि ॥ तथा चोक्तस्थले इच्छाया विशेष्यत्वात्तत्र कर्तव्यपदार्थान्वयात्कृतिसाध्यत्वं प्रतीयते । अथापि विशेष्ये तस्य बाधात् विशेषणे ज्ञाने तदन्वयः, विशिष्टे विधिनिषेधाविति न्यायादिति भावः ॥

अथ—ब्रह्मजिज्ञासेत्यादौ सनर्थेच्छायामेव धात्वर्थस्य ज्ञानस्य ब्रह्मपदार्थस्य वाऽन्वयाङ्गीकारे विशेषणे कर्तव्यत्वान्वयेऽपि केवलज्ञानस्य कर्तव्यत्वं प्रतीयते, न तु ब्रह्मज्ञानस्य, धात्वर्थज्ञाने ब्रह्मणोऽनन्वयात् ; तथा च ब्रह्मविचारः कर्तव्य इति ब्रह्मज्ञानस्य कर्तव्यताप्रतिपादकभाष्यविरोधः—**इति चेत्** ॥ **सत्यम्** । ज्ञानकर्मत्वेन ब्रह्मविषयकत्वमिच्छायां ज्ञानस्य ब्रह्मविषयकत्वरूपतत्कर्मकत्वं विनाऽनुपपन्नमित्यर्थापत्तिविषयस्य ब्रह्मविषयकत्वस्य ज्ञाने भानेन ब्रह्मज्ञानस्य कर्तव्यताप्रतीतेरविरोधात्, सिद्धान्ते पदजन्यपदार्थोपस्थितिविषयस्येवार्थापत्तिविषयस्यापि शाब्दबोधे भानाङ्गीकारात् । अत एव च अश्वेन जिगमिषति, असिना जिघांसतीत्यादौ गमने अश्वादिकरणकत्वं प्रतीयत इति भाष्यादिकमुपपद्यते । तथा च "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्" इत्यत्र **भाष्यम्**—

"'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति, यज्ञेन दानेन तपसाऽनाशकेन' इत्यादिना यज्ञादयो हि विद्याङ्गतया श्रूयन्ते। यज्ञादिना विविदिषन्ति--वेत्तुमिच्छन्ति, यज्ञादिभिर्वेदनं

प्राप्तुमिच्छन्तीत्यर्थः । यज्ञादीनां ज्ञानसाधनत्वे सत्येव यज्ञादिभिर्ज्ञानं प्राप्तुमिच्छन्तीति व्यपदेश उपपद्यते । यथा अग्नेर्हननसाधनत्वे सत्येव असिना जिघांसतीति व्यपदेशः" इति ॥

अत्र असिनेति तृतीयान्तार्थासिकरणकत्वस्य प्रकारतयेच्छायामन्वयेऽपि असिकरणकत्वप्रकारकत्वं हननविशेष्यकेच्छायां हनने तत्करणकत्वं विनाऽनुपपन्नमित्यर्थापत्तिवशेन असिकरणकत्वस्य हनने लाभ इति **भाष्याशयः** ॥

न च--असिना जिघांसतीत्यादौ तृतीयान्तार्थासिकरणकत्वस्य हनन एवान्वयोऽस्तु, नत्विच्छायामिति वाच्यम् ॥ यादृशासिव्यक्तेर्हननकरणत्वमप्रसिद्धं, अथ च तत्करणकत्वं हननस्येच्छाविषयः; तत्र तदसिना जिघांसतीति विशेषदर्शिनः प्रयोगानुपपत्तेः, हनने तदसिकरणकत्वस्य बाधात् ॥

न च-- सिद्धान्तेऽपि तत्रानुपपत्तिस्समाना, अर्थापत्तिविषयस्य तदसिकरणकत्वस्य हनने बाधादिति वाच्यम् ॥ बाधितस्थले अर्थापत्तेरकल्पनात् । एतदसेश्च हननसाधनत्वमसम्भावितमथाप्ययं भ्रान्त्या एतदसिना हन्तुमिच्छतीति मत्वा हि विशेषदर्शी एतदसिना जिघांसतीति प्रयुङ्क्ते । तत्र वक्तुर्हननेऽसिकरणकत्वान्वयस्य तात्पर्याविषयत्वात् इच्छायामेव तदन्वयस्य तथात्वात ॥ अत एव च-"दोर्भ्यां तितीर्षत्यम्भोधिं कुटपस्तद्गुणार्णवम्" इत्यादिकमुपपन्नम् ॥ ब्रह्मजिज्ञासेत्यादौ ब्रह्मपदार्थस्य कृदन्तार्थज्ञानेच्छायामेवान्वयः, न तु ज्ञाने धात्वर्थे–इत्ययं प्रकारः 'कृद्योगा च षष्ठी समस्यत इति प्रतिप्रसवसद्भावात्' इति भाष्येणाप्यवगम्यते। कृदन्तप्रतिपाद्यार्थान्वितस्वार्थबोधकत्वं हि षष्ठ्यां कृद्युक्तत्वं ; ज्ञानमात्रं च न कृदन्तार्थः, अपि तु ज्ञानेच्छैवेति ब्रह्मणो जिज्ञासेत्यादिविग्रहस्थले

षष्ठ्यर्थस्य इच्छायामन्वयावश्यकत्वात्, तत्समानार्थकत्वानुरोधेन समासस्थलेऽपि ब्रह्मणो जिज्ञासायामेवान्वयो वाच्य इति न कश्चिद्विरोधः ॥

नन्वेवं–ब्रह्मजिज्ञासेत्यादौ सनर्थप्रकारकधात्वर्थविशेष्यकबोधव्यवस्थापनं इच्छाया इष्यमाणप्रधानत्वादिति भाष्यस्य इष्यमाणधात्वर्थप्रधानत्वाद्धात्वर्थविशेष्यकत्वादित्यर्थकथनं च **दर्पणकृतां** विरुध्यते –इति **चेन्न**। पूर्वं सनर्थविशेष्यतापक्षं प्रतिपाद्य तदनन्तरं धात्वर्थविशेष्यतापक्षस्य प्रतिपादनेन प्रथमकल्प एव तेषां निर्भराङ्गीकारात् –इति सर्वमवदातम् ॥

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

इति
श्रीशेषार्यवंशमुक्ताफलस्य श्रीयादवाद्रिनिवासरसिकस्य
श्रीमदनन्तार्यवर्यस्य कृतिषु
समासवादः
समाप्तः ॥

॥ श्रीः ॥

॥ श्रीः ॥

विषयतावादः.

श्रीमन्महीशूरमहाराजाधिराजमहास्थानसभाभूषणैः
शेषार्यवंशमुक्ताफलैः श्रीयादवाद्रिनिवासरसिकैः
पण्डितमण्डलीसार्वभौमैः

श्री ॥ उ ॥ म. अ. अनन्तार्यवर्यैः

विरचितः ।

श्रीकाञ्चीपुरनिवासिभिः
विद्वद्धुरण्यैः श्री ॥ उ ॥ ति. अ. कृ. श्रीनिवासार्यवर्यैः
सम्यक् परिशोध्य ।

म. अ. अनन्तार्येण
प्र. भ. तो. नरसिंहार्येण च
कल्याणपुर-विचारदर्पण-मुद्राक्षरशालायामङ्कयित्वा
प्राकाश्यं नीतः ॥

१८९९.

मूल्य रू. ०—५—०

॥ श्रीः ॥

विषयतावादः.

जननावनलयहेतुं जगतश्श्रीशं समाराध्य ।
नत्वा गुरुचरणाब्जेऽनन्तार्यो वक्ति विषयतावादम् ॥

इह खलु ब्रह्मविषयकज्ञानस्य मोक्षहेतुत्वेन ब्रह्मण इव विषयताया अपि अवच्छेदकत्वात् अवश्यं ज्ञातव्येति सा विचार्यते ॥

विषयता नाम — ज्ञानविषययोः सम्बन्धविशेषः, ज्ञानविषयो घटः, ज्ञातो घटः-इत्यादिप्रतीतिसाक्षिको दुरपह्नवः । सा किं-रूपेति चेत् ।

अत्र **ब्रह्मानन्दः** —

"विषयता हि विषयेषु ज्ञानस्य तादात्म्यम् । ज्ञानञ्च वृत्त्यवच्छिन्नचैतन्यम् । असत्त्वापादकाज्ञानाविषयत्वप्रयोजकत्वविशिष्टं वा चैतन्यम् । अज्ञानं तावद्द्विविधम् । एकमसत्त्वापादकमन्तःकरणावच्छिन्नसाक्षिचैतन्यनिष्ठम् । अन्यदभानापादकं विषयावच्छिन्नब्रह्मचैतन्यनिष्ठम् । घटमहं जानामीति उभयावच्छेदेन अनुभवात् । तत्र घटमिति विषयावच्छेदः; अहमिति साक्ष्यवच्छेदः । तत्र आद्यं परोक्षापरोक्षप्रमामात्रेण निवर्तते. अनुमितेऽपि वह्न्यादौ 'नास्ति' इति प्रतीत्यनुदयात्; द्वितीयं तु साक्षात्कारेणैव निवर्तते । अत एव अनुमितिस्थले 'जानाम्यहं पर्वते वह्निरस्तीति, स तु कीदृगिति मे न भाति' इति अभानापादकाज्ञानानुभवः ॥

तदुक्तम्—

"परोक्षज्ञानतो नश्येदसत्त्वापत्तिहेतुता ।
अपरोक्षधिया नश्येदभानापत्तिहेतुता ॥" —इति ॥

तथा च—उक्तवृत्त्यवच्छिन्नचैतन्यमसत्त्वापादकाज्ञानाविषयत्वप्रयोजकं चैतन्यमेव वा ज्ञाधात्वाच्यम्, न तु चैतन्यविशिष्टवृत्त्यादिरूपम्; विशेष्यत्वेनैव चितो ज्ञानपदात् प्रतीतेः । अत एव "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिश्रुतौ ज्ञानपदात् शक्त्यैव केवलचिद्बोध इत्युक्तं अद्वैतसिद्धौ । न हि वाच्यविशेषणस्य शक्त्या विशेष्यतया बोधो व्युत्पत्तिसिद्धः; पशुरपशुरित्यादितः पश्वादिभिन्नत्वेन पशुत्वादेर्बोधापत्तेः । तत्र वृत्तेश्चिदुपरागार्थत्वपक्षे चित्प्रतिबिम्बविशिष्टवृत्तिविषयत्वरूपं ज्ञानक्रियायाः फलमादाय घटादेः कर्मत्वम् । वृत्तेरावरणभङ्गार्थत्वपक्षे तु असत्त्वापादकाज्ञानाविषयत्वमादाय घटादेः कर्मता ॥ न च—अज्ञानविषयत्वसामान्याभावस्य ज्ञाधातुवाच्यत्वे उक्तविशेषाभावबोधानुपपत्तिरिति—वाच्यम्; अज्ञानविषयत्वे अभावादौ च खण्डशक्त्यङ्गीकारात् ॥ तथा च 'चैत्रो घटं जानाति' इत्यादौ—

प्रथमपक्षे विषयितारूपविभक्त्यर्थे घटादेर्निरूपितत्वसम्बन्धेनान्वयः, विषयिताया आश्रयतासम्बन्धेन धात्वर्थैकदेशे वृत्तौ; धात्वर्थस्य आख्यातार्थे तादात्म्येऽन्वयात् घटविषयकवृत्त्यवच्छिन्नचैतन्यतादात्म्यवांश्चैत्र इति बोधः ॥

द्वितीयपक्षे—असत्त्वापादकाज्ञानाविषयत्वान्विताधेयत्वरूपविभक्त्यर्थे घटादेः स्वावच्छिन्नचिन्निरूपितत्वस्वनिरूपितत्वैतदन्यतरसम्बन्धेनान्वयः । स्वावच्छिन्नचिन्निरूपितत्वमात्रनिवेशे 'ब्रह्म जानाति' इत्याद्यनुपपत्तिः । ब्रह्मणश्चित्स्वरूपत्वेन तदवच्छिन्नचिदप्रसिद्धेः ॥ स्वनिरूपितत्वमात्रनिवेशे घटं जानातीत्यादावनुपपत्तिः । घटादेर्जडत्वेनावरणकृत्याभावात् । तद्विषयकत्वस्याज्ञानेऽनङ्गीकारादित्यन्यतरोपादानम् ॥

सा च विषयता त्रिविधा—विशेष्यता, प्रकारता, संसर्गता चेति। 'इदं रजतं' इत्यादिभ्रमस्थले 'इदं रजतं जानामि' इति अनुभवात् इदंविषयतावच्छिन्नं रजततादात्म्यविषयत्वं निद्रूपानुभवनिष्ठं भातीति स्वीक्रियते । तत्र रजततादात्म्यविषयताया इदंविषयत्वावच्छेद्यत्वे रजतविषयताऽपि इदंविषयत्वावच्छिन्नेति कल्प्यते, अवच्छेद्यविशेषणत्वात् । विषयता हि यया विषयतया विशिष्टायां यस्यां विषयितायां अवच्छेदिका—सा विशेषणीभूता प्रकारता, विशेष्यभूता सांसर्गिकविषयता, तदवच्छेदकविषयता तु विशेष्यता ॥ तथा च विषयतानिष्ठं विषयतावच्छेदकत्वं विशेष्यतात्वं, तादृशावच्छेदकत्वं यां विषयतां प्रति तत्त्वं तादृशावच्छेदकतानिरूपकविषयतात्वरूपं सांसर्गिकविषयतात्वम्, विषयतानिष्ठायां तादृशावच्छेदकत्वनिरूपकतायां अवच्छेदकविषयतात्वं प्रकारतात्वम् ॥

न च—तादात्म्यादिविषयतानिष्ठायां उक्तनिरूपकतायां रजतादिनिष्ठविषयता यथाऽवच्छेदिका, तथा तादात्म्यत्वादिविषयताऽपीति तस्यामपि निरुक्तप्रकारतात्वं स्यादिति वाच्यम् । तादृशनिरूपकतायास्समानाधिकरणं यत् तदवच्छेदकत्वं; तस्यैव प्रकारतात्वरूपत्वात्, तादात्म्यत्वादिनिष्ठविषयतायां तदभावात् । 'रजततादात्म्येन इदं जानामि' इत्यनुभवो हि रजतविषयताविशिष्टस्य तादात्म्यविषयत्वस्य उक्तनिरूपकतां गृह्णन् रजतविषयतायामपि तां गृह्णाति; न तु तदवच्छेदकत्वमात्रम् । न हि रजतविषयत्वस्य इदंविषयत्वावच्छिन्नत्वे कस्यापि विप्रतिपत्तिः । तस्य तादात्म्यादिसंसर्गीयविषयत्वाग्राहकेणापि 'इदं रजतं जानामि' 'इदं रजतत्वेन जानामि' इत्याद्यनुभवेन ग्रहणात्, तादात्म्यत्वविषयत्वस्य शुक्तिविषयत्वनिष्ठावच्छेदकतानिरूपकत्वानुभवेन तदवच्छेदकत्वमात्रग्रहणात् ॥

न च—एवमपि सांसर्गिकविषयतात्वस्य उक्तनिरूपकतामात्ररूपत्वे रजतादिविषयतायामपि तत्स्यात्—इति वाच्यम्; उक्तनिरूपकताऽनवच्छेदकविषयतानिष्ठस्यैव उक्तनिरूपकत्वस्य सांसर्गिकविषयतात्वरूपत्वात्, तादृशनिरूपकत्वाश्रयविषयत्वावच्छिन्नस्यैव तादृशनिरूपकत्वस्य तद्रूपत्वाद्वा। तादात्म्यविषयतानिष्ठैव हि तादृशनिरूपकता; तदाश्रयेण रजतविषयत्वेन अवच्छिन्ना न रजतविषयतानिष्ठेति न कश्चिद्दोषः। ज्ञानविषययोस्तादात्म्येष्वेव विषयतात्वस्य क्लृप्ततया ज्ञानीयतादात्म्यमेव इच्छादेर्विषयेषु सम्बन्धः ॥

यद्यपि स्वजनकज्ञानीयतादात्म्यत्वेन नेच्छाया विषयसम्बन्धता, समूहालम्बनज्ञानविषये सर्वत्र इच्छाया विषयत्वप्रसङ्गात्। तथाऽपि स्वजनकतावच्छेदकज्ञानीयविषयत्वमेव इच्छायास्सम्बन्धः। घटत्वप्रकारकघटविशेष्यकज्ञानत्वेन तादृशज्ञानस्य विशिष्य इच्छां प्रति हेतुत्वस्वीकारात् ॥" —इति ॥

अत्रेदं चिन्त्यम्—

वृत्तेर्विषयत्वमाकारः, ज्ञानस्य तु तादात्म्यम्, इच्छादेस्तु स्वजनकज्ञानतादात्म्यमित्यङ्गीकारे तत्र सर्वत्र विषयाकारानुगतप्रतीत्यनुपपत्तिः। न च—आकारादिषु विषयतात्वस्य ऐक्यादनुगतप्रतीत्युपपत्तिरिति—वाच्यम्। 'चितस्तादात्म्ये वृत्तेराकारे च विषयतात्वस्यैकस्य अभावेन' इति दृश्यत्वोपपत्तौ त्वयैवोक्तत्वेन तद्विरोधापत्तेः। किञ्च—ज्ञानविषयत्वं चित्तादात्म्यं चेत् चितः स्वयंप्रकाशत्वानुपपत्तिः, तस्य स्वनिरूपितविषयतारूपत्वात्; अन्यादृशत्वे पारिभाषिकत्वापत्तेः। ज्ञाधात्वर्थवर्णनमपि न सत्। वृत्त्यवच्छिन्नचैतन्यं ज्ञाधात्वर्थ इति पक्षे—'ह्रीर्धीः' इत्यादिश्रुत्याऽनूद्यमानधीत्वरूपजातिविशेषेण वृत्तेर्निवेशे तस्याविद्यावृत्तिसाधारण्ये मानाभावात् ॥ शुक्तिरूप्यं जानातीत्यादावनुपपत्तिः,

शुक्तिरूप्यस्याविद्यावृत्तिविषयत्वात् । सुखं जानातीत्यादावनुपपत्तिश्च, तत्र वृत्त्यस्वीकारात् ॥

ज्ञाधातुना वृत्तेर्विशेष्यतया बोधो नेत्यप्ययुक्तम्, 'घटो ज्ञायते' इत्यादौ तथा बोधात् । किञ्च वृत्त्यवच्छिन्नचैतन्यस्य ज्ञाधात्वर्थत्वे अज्ञानेन तिरोधानकल्पनं व्यर्थम् । घटादिप्रकाशस्य कादाचित्कत्वसिद्धये हि तिरोधानकल्पनम्, वृत्तेः कादाचित्कत्वादेव तदवच्छिन्नचैतन्यतादात्म्यरूपप्रकाशस्य कादाचित्कत्वोपपत्तेरिति तिरोधानभङ्गः स्पष्टम् । नीरूपायां वृत्तौ नीरूपायाः चितः प्रतिफलनं चायुक्तम् ॥ द्वितीयपक्षे च घटचाक्षुषदशायां रसं जानातीत्यादिव्यवहारापत्तिः । घटावच्छिन्नचैतन्यस्यैव रसावच्छिन्नतया आवृतानावृतविभागानुपपत्तेः ॥

ननु–घटावच्छिन्नाज्ञानं निवृत्तं, रसावच्छिन्नाज्ञानं न निवृत्तं इति एकत्रैव आवरणानावरणयोरुपपत्तिः इति चेन्न । समानदेशावच्छेदकभेदस्य एकत्रैव भावाभावयोर्वृत्त्युपपादकत्वासिद्धेः ॥ किञ्च अत्र कल्पे 'सुखं जानाति' इत्यादिव्यवहारानुपपत्तिः । सुखाद्यवच्छिन्नचिन्निष्ठाज्ञानविषयत्वाभावस्य स्वतःसिद्धत्वेन तत्प्रयोजकचित्प्रसिद्धेः ॥

यत्तु–असत्त्वापादकाज्ञानविषयतानवच्छेदकविषयतादात्म्यवच्चैतन्यं ज्ञाधात्वर्थ इत्यभ्युपगमाद्विद्यमानसुखादेश्च अभानापादकाज्ञानविषयतानवच्छेदत्वं यथा स्वत एव, तथा असत्त्वापादकाज्ञानविषयतानवच्छेदकत्वमपि स्वत एवेति नानुपपत्तिः–इति । तन्न । तथा सति "पर्वतो वह्निमान्" इति परोक्षप्रत्ययस्य प्रमातृसत्त्वापादकमज्ञानं निवृत्तम्, तस्य तादृशपरोक्षवृत्तिविगमदशायामपि 'अयं इदानीं वह्निं जानाति' इति व्यवहारापत्तेः ॥ न च तदानीं तस्यामसत्त्वापादकमज्ञानमस्ति, तत्सत्त्वे तदानीं वह्निं न जानाति इति प्रत्ययापत्तेः । किं च शुक्तौ रजताभेदावगाहिपरोक्षभ्रमस्थले त्वयाऽपि नासत्त्वापादकावरणतन्नाशौ स्वीक्रियेते, उत्सर्गतः प्रातिभासिके आवरणानभ्युपगमात् ॥

तथा च—रजताकारवृत्तितत्सामग्र्यादिविगमेऽपि 'अयमिदानीं शुक्ति-रजतं जानाति' इतिप्रत्ययापत्तिः ॥

यत्तु—रजतं जानाति' इत्यादौ रजतावच्छिन्नचित्तादात्म्यं प्रमातरि भासते; तथा च- विषयान्तःकरणयोरुक्तस्थले मेलनाभावेन तदव-च्छिन्नयोः परस्परतादात्म्यविरहान्नोक्तातिप्रसङ्गः—**इति । तदसत्**— प्रायशः परोक्षस्थले विषयान्तःकरणयोर्मेलनाभावेन वह्न्यनुमित्याद्यन-न्तरं वह्निं जानातीत्यादिव्यवहारानुपपत्तेः । उक्तरीत्या विषयघटित-रूपे ज्ञाधातुशक्तिर्स्वीकारे विषयानन्त्याच्छक्त्यानन्त्यापत्तिः । विषया-न्तःकरणयोर्मेलनाभावेन 'अयं रजतं जानाति' इत्यादिव्यवहारवारणेऽपि तज्ज्ञानव्यक्तितात्पर्येण इदानीं रजतज्ञानमिति व्यवहारापत्तेर्दुर्वार-त्वाच्च ॥

एतेन—जानातेरसत्त्वापादकाज्ञानविषयत्वानवच्छेदकविषयतादा-त्म्यावच्छिन्नायां चिति वृत्तौ च शक्तिद्वयं स्वीक्रियते । तथा च जानातिर्यत्र चित्परः, तत्र विषयावच्छिन्नचित एव प्रमातरि तादात्म्यं भासत इति नातिप्रसङ्गः ; यत्र जानातिर्वृत्तिपरः तत्र विषयाकारवृत्तेस्तादात्म्यमाधारता वा प्रमातरि भासत इति नोक्तदशा-यां 'वह्निं जानाति' इति, 'शुक्तिं रजतं जानाति' इति प्रसङ्गः ; न वा वह्न्याद्यनुमितिस्थले वह्निं जानातीति व्यवहारानुपपत्तिः—इति **परास्तम्** । ज्ञाधातोश्शक्तिद्वयकल्पने गौरवात् । ज्ञानावच्छेदकत्वा-द्वृत्तौ ज्ञानत्वोपचार इति विवरणादिविरोधाच्च ॥ —इति दिक् ॥

विषयतानिष्ठं विषयतावच्छेदकत्वं विशेष्यतात्वमित्यादिकमप्य-सत् । विषयतयोः परस्परं निरूप्यनिरूपकभावातिरिक्तस्यावच्छेद्या-वच्छेदकभावस्याप्रामाणिकत्वात् ॥

यत्तूक्तं—एकवृक्षादिनिष्ठयोः संयोगतदभावयोः अग्रमूलावच्छेदे-नेव एकस्यां सर्वदृश्यतादात्म्यापन्नचिद्व्यक्तौ शुक्त्यादिघटादितादा-

त्म्यावच्छेदेन रजतादिनातादात्म्यतदभावयोरुपपादनार्थमवच्छेद्यावच्छेदकभावस्वीकारः --इति ॥ तन्न । एकाधिकरणे एकावच्छेदेनैव भावाभावयोर्वृत्तिमभ्युपगच्छतां भवतामुक्तरीत्यसम्भवात् । अग्रमूलादेरप्यवच्छेदकत्वस्य भवतामनिष्टत्वात् ॥

अत एवोक्तं त्वयैव चतुर्थमिथ्यात्वे –

"सर्वदृश्यानां व्यतिरेकित्वेन कालेऽत्यन्ताभावस्तावदवश्यं वाच्यः, तस्य च किञ्चिद्देशावच्छेदेन काले किञ्चित्कालावच्छेदेन देशे वृत्तिरिति स्वीकारे देशकालनिष्ठात्यन्तावच्छेदकताव्यक्तीनां कल्पने महागौरवात् ॥" --इति ॥

"वृक्षे मूले न संयोगः- इत्यादिधीरपि वृक्षादिनिष्ठसंयोगाद्यवच्छेदकत्वाभावं मूलादाववगाहते"- इति च ॥

न च--समानसत्ताकयोर्भावाभावयोर्विरोधाङ्गीकर्तृमताभिप्रायकोऽयमवच्छेदकत्वाभ्युपगम इति–वाच्यम् । तथाऽपि विशेष्यतात्वस्यातिप्रसक्तेर्दुर्वारत्वात् ॥ तथा हि --

इदं रजतमित्यादिस्थले रजतादिविषयतानिरूपितविषयतावच्छिन्नमिदमवच्छिन्नं चेति भवतामभ्युपगमः । तथा च विषयतावच्छेदकत्वमिदंपदार्थस्यापीति तल्लक्षणाय विषयतानिष्ठमित्युक्तम् । प्रकारतादेरेव विशेष्यत्वं प्रकारताज्ञानानिरूपितेत्यादौ तदतिप्रसक्तिर्दुर्वारा ॥

यदि च –विषयतावच्छेदकताऽनवच्छेदकविशिष्टविषयताऽवच्छेदकत्वं विशेष्यतात्वं. तथा च- विशेष्यस्य विशेष्यतानिष्ठावच्छेदकतायामवच्छेदकत्वान्नातिप्रसक्तिः–इत्युच्यते । तदा विषयतानिष्ठमिति व्यर्थम् ॥

किञ्च–उक्तावच्छेदकताऽनवच्छेदकत्वं किमुक्तावच्छेदकतात्यन्ताभावः, तादृशावच्छेदकताभेदो वा ? आद्ये–भवतां मते सर्वत्र तदधि-

करणे तदत्यन्ताभावसत्त्वादुक्तदोषतादवस्थ्यम् । द्वितीये—सर्वत्र समानाधिकरणप्रतीतिस्थले भेदाभेदाङ्गीकारात् प्रकारता विषयतावच्छेदिकयोः समानाधिकरणप्रतीतिबलात् प्रकारतायामप्युक्तावच्छेदकताऽनवच्छेदकत्वमक्षतमिति उक्तदोषस्तदवस्थः ॥

न च—'द्रव्यं घटः' इत्यादाविव प्रकृते समानाधिकरणप्रतीतेरौपाधिकभेदविषयकत्वान्नानुपपत्तिः, अनौपाधिकभेदस्यैव निवेशादिति—वाच्यम् । अनौपाधिकत्वं हि तद्धर्मयोर्यो भेदस्तदन्यो यस्तदुपहितयोर्भेदः तद्वत्त्वमिति त्वयैव निरुक्तम् । तथा च—अयं तद्धर्मभेद इति समानाधिकरणप्रतीत्या तत्रापि तादृशभेदसत्त्वात्, तत्राप्यनौपाधिकत्वनिवेशे अनवस्थानात् ॥

एतेन-विषयतानिष्ठावच्छेदकतानिरूपकतानवच्छेदकविषयतानिष्ठं उक्तनिरूपकत्वं सांसर्गिकविषयतात्वं—**इत्यपि प्रत्युक्तम्** । इत्यन्यत्र विस्तरः ॥

यदपि—न हि रजतविषयत्वस्य इदंविषयत्वावच्छिन्नत्वे कस्यापि विप्रतिपत्तिः, तस्य तादात्म्यादिसंसर्गीयविषयतात्वाग्राहकेणापि इदं रजतं जानामीत्यनुभवेन ग्रहणात्—इति ; **तन्नु**—परस्पराध्यासविवेचनगतेन स्ववचनेनैव विरुध्यते । तत्रत्या पङ्क्तिरियम्—

> "न च—रजतमिदं जानामीति प्रत्यये रजतादिविषयत्वावच्छिन्नत्वं इदंविषयताविशेषिततादात्म्यादिविषयत्वे न भाति, किन्तु केवले—इति वाच्यम् । तथा सति विशेषणविषयत्वे विशेष्यविषयत्वावच्छिन्नत्वस्य असिद्ध्यापातात् । न हि तदनुभवः पृथगस्ति ॥" —इति ॥

तथा च-ब्रह्मानन्दोक्तमसङ्गतम् ॥

—**इति** ॥

माध्वास्तु—

ज्ञानजनकसन्निकर्षादिमत्त्वमेव ज्ञानविषयत्वम्। भ्रमस्थले च आकारत्वमेव। तथा ईश्वरज्ञाने च अगत्या विषयतान्तरं स्वीक्रियते, अन्यत्र तत्कल्पन एव गौरवात्। साक्षात्करोमीति प्रतीतिनियामकलौकिकसन्निकर्षाधीनविषयत्वान्तरकल्पनापेक्षया सन्निकर्षस्यैव तथात्वे लाघवात्॥

अथ सन्निकर्षस्यैव विषयतात्वे यत्रैकेनैव सन्निकर्षेण 'घटवद्भूतलम्' 'भूतले घटः' इति ज्ञानद्वयोत्पत्तिः, तत्र विशेषणविशेष्यभाववैपरीत्यप्रसङ्गः। घटभूतलसन्निकर्षयोरन्त्यज्ञानानुरोधेन विशेष्यत्वविशेषणत्वरूपतायाः पूर्वज्ञानानुरोधेन विशेषणत्वविशेष्यत्वरूपतायाश्च आवश्यकत्वात् — **इति चेन्न॥**

घटवद्भूतलमिति ज्ञाने घटभूतलविषयतयोः, भूतले घट इति ज्ञाने भूतलघटविषयतयोः, प्रकारतात्वविशेष्यतात्वाभ्यामिव विशेष्यतात्वप्रकारतात्वाभ्यां निरूप्यनिरूपकभावानभ्युपगमेन विशेषणविशेष्यभावव्यवस्थोपपत्तेः॥

एवं च घटवद्भूतलं, घटो रूपवान्, भूतले पट इत्यादिसमूहालम्बनज्ञाने घटांशे भूतलविशेषणकत्वापत्तिः; घटसन्निकर्षस्य विशेष्यतारूपतायाः, भूतलसन्निकर्षस्य विशेषणतारूपतायाः, तयोर्निरूप्यनिरूपकभावस्य चावश्यकत्वात् — **इत्यपास्तम्।** तादृशज्ञाने घटविषयताया विशेष्यतात्वेन भूतलविषयत्वानिरूप्यत्वात्॥ न च 'घटो भूतलवान्' इति ज्ञानानुरोधेन विशेष्यतात्वेनापि तन्निरूपितत्वमावश्यकमिति— वाच्यम्। घटवद्भूतलमिति ज्ञानावच्छेदेन तदनभ्युपगमात्॥

यत्तु — निरूप्यत्वादेरतिरिक्तत्वं विषयत्वमेव तथास्त्विति॥ **तन्न।** निरूप्यत्वादेरपि आश्रयानतिरिक्तत्वात्, विषयतातिरेकेऽपि निरूप्यनिरूपकभाववैचित्र्यस्य आवश्यकत्वात्॥ स यथा घटवद्भूतलवानयं

देशः—इति ज्ञाने घटांशे भूतलस्य विशेषणत्वापत्तेः। घटनिष्ठप्रकारताया घटत्वांशे विशेष्यतारूपत्वात्। भूतलनिष्ठविशेष्यताया देशांशे प्रकारतारूपत्वात्। तत्र तत्र विभिन्नानन्तविषयतास्वीकारे महागौरवात्॥ —इत्याहुः॥

तच्चिन्त्यम्॥

चाक्षुषप्रत्यक्षजनकचक्षुःसंयोगस्य चक्षुष्यपि सत्त्वेन चक्षुषोऽपि तद्विषयत्वापत्तेः, यत्र चक्षुर्वृत्तिशालिनि देशे घटादिकमानीतं तादृशघटादेर्विषयत्वानुपपत्त्या अनुयोगितया तद्वृत्त्वस्य वक्तुमशक्यत्वात्। देहोपरि दण्डादिपतने दण्डादावनुयोगितया त्वक्सन्निकर्षस्य अभावेन त्वाचप्रत्यक्षविषयत्वानुपपत्तेश्च; विनश्यदवस्थात्संयोगाद्यत्र ज्ञानोत्पत्तिः तत्र ज्ञानविषयो घट इति व्यवहारानुपपत्तेश्च॥ अनुमित्यादिस्थले तज्जनकपरामर्शादिविषयत्वमनुमितिविषयत्वमित्यङ्गीकारे परामर्शस्य शाब्दादिरूपत्वे तज्जनकसन्निकर्षाप्रसिद्ध्या वह्निमत्पर्वतादावनुमितिविषयत्वं दुर्लभम्। तज्जनकेश्वरीयपरामर्शमादाय 'सर्वमनुमिनोमि' इत्यादिव्यवहारापत्तिश्च। तत्र अतिरिक्तविषयत्वस्वीकारे ईश्वरज्ञानातिरिक्तस्थले तत्कल्पनं गौरवाय—इति भवद्वचनविरोधः। स्मरणादिस्थले तज्जनकानुभवजनकसन्निकर्षादिरूपत्वे आंशिकोपेक्षात्मकप्रात्यक्षिकानुभवजनकसन्निकर्षादिकमादाय उदासीनतृणादेरपि स्मृतिविषयत्वापत्तेरित्यलं पल्लवितेन॥

सिद्धान्तविदस्तु—

"ज्ञानं तावन्मणिद्युमण्यादेः प्रभेव आत्मनः अपृथक्सिद्धं द्रव्यम्। ज्ञानस्य द्रव्यत्वं च—ज्ञानं द्रव्यं प्रसरणवत्त्वात्, संप्रतिपन्नद्रव्यवत्—इत्यनुमानेन सिद्ध्यति" इत्युक्तं **न्यायसिद्धाञ्जने**। अत्र यद्यप्युत्तरदेशसंयोगावच्छिन्नक्रियारूपप्रसरणस्य न ताद्रूप्येण हेतुत्वं, वैयर्थ्यात्; क्रियात्वेनैव हेतुत्वसम्भवात्। तथाऽपि क्रियावत्त्वरूपहेतोरसिद्धि-

शङ्कापरिहाराय. '**प्रज्ञा च तस्मात्प्रसृता पुराणी**' इत्युत्तरदेशसंयो-
गावच्छिन्नक्रियाबोधकप्रमाणसूचनाय तथोक्तिः ॥

न च – अत्र 'ग्रामाद्वनं गच्छति' इत्यादाविव प्रकृतक्रियाजन्यविभागा-
श्रयत्वरूपमपादानत्वं तच्छब्दार्थस्यात्मनो न सम्भवतीति **तस्मात्**
इति पञ्चम्यनुपपत्तिः, ज्ञानात्मनोरपृथक्सिद्धिसम्बन्धसत्त्वेन विभागा-
सम्भवादिति – वाच्यम्। प्रदेशविशेषावच्छेदेन विभागमादाय 'बिलाद्-
र्ध्वं निस्सृतस्सर्पः' इत्यादाविव तदुपपत्तेः। संयोगरूपफलावच्छिन्न-
व्यापारबोधकत्वेऽपि 'प्रसृता' इतिधातोर्न सकर्मकत्वं। अधस्संयोगाव-
च्छिन्नव्यापारबोधकस्य 'पतति' इत्यस्य सकर्मकत्ववारणाय आश्रया-
नवच्छिन्नफलावच्छिन्नव्यापारबोधकत्वं सकर्मकत्वं इति वक्तव्यत्वात्॥
तथा च प्रकृते कर्माकाङ्क्षाविरहात् न कर्मवाचकपदप्रयोगः।
पुराणत्वं च प्रकृतशब्दप्रयोगाधिकरणकल्पपूर्वकालवृत्तित्वं यद्यपि
ज्ञाने सम्भवति। तथाऽपि तावन्मात्रस्य नित्यानित्यसाधारणत्वेन अव्या-
वर्तकतया प्रागभावाप्रतियोगित्वरूपत्वाभिप्रायकार्थे तात्पर्यमवसीयते ॥

अत एव च प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वरूपं
नित्यत्वं; तस्य 'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते, अविनाशित्वात्'
इत्यादिना ध्वंसाप्रतियोगित्वावगमात्। व्याख्यातश्चैतद**ात्मसिद्धौ** -

"ज्ञातुरविनाशित्वादेवास्य ज्ञानस्याविनाशित्वमुपपादयन्तीयं
श्रुतिः ज्ञातुः स्वरूपप्रयुक्तं ज्ञानमिति दर्शयति" इति ॥

अत्र ज्ञानप्रतियोगिकनाशात्यन्ताभावे वर्तमानकालसम्बन्धित्वं यथा-
श्रुतश्रुतिवाक्यात् प्रतीयते ; तच्चानुपपन्नं, ज्ञानप्रतियोगिकनाशा-
प्रसिद्धेः ; परं तु प्रतियोगितासम्बन्धेन नाशाभाववत्त्वं ज्ञानस्य प्रती-
यत इत्यभिप्रायेण ज्ञानस्याविनाशित्वमिति व्याख्यानम्। देवदत्तो न

(१.) प्रकोष्ठकदेशगतयोरित्यर्थ ॥

पचतीत्यादौ व्यभिचारेण अत्यन्ताभावबोधे सप्तम्यन्तानुयोगिवाचक-पदसमभिव्याहारस्य अहेतुत्वात्। नामार्थप्रतियोगिकाभावबोधे तस्य कारणत्वमित्यपि न, 'यमस्य करुणा नास्ति' इत्यादौ व्यभिचारादिति भावः। श्रुतावविनाशित्वादिति पञ्चमी न कार्यकारणभावे, बाधात्; किन्तु ज्ञाप्यज्ञापकभावे, स च व्याप्यव्यापकभावं विना अनुपपन्न इति व्याप्यव्यापकभावो वक्तव्यः। तत्र आत्मगताविनाशित्वस्य व्याप्यत्वं कर्माप्रयोज्यत्वविशिष्टस्वाश्रयापृथक्सिद्धत्वसम्बन्धेन वक्तव्यम्, साक्षात्सम्बन्धेन ज्ञानगताविनाशित्वव्यधिकरणत्वात्। तत्र स्वाश्रयापृथक्सिद्धिसम्बन्धेनेत्युक्तौ आत्मगतवायुसंयोगादौ व्यभिचारः। स्वाश्रयापृथक्सिद्धद्रव्यत्वनिवेशेऽपि शरीरादौ व्यभिचार इति कर्माप्रयोज्यत्वनिवेशः। तदिदमभिप्रेत्योक्तं— "ज्ञातृस्वरूपप्रयुक्तं ज्ञानमिति दर्शयति ॥" —इति ॥

एतत्तात्पर्यकमेव 'अविनाशी वाऽरेऽयमात्माऽनुच्छित्तिधर्मा' इति श्रुत्यन्तरम्; अयमात्मा यतोऽविनाशी ततोऽनुच्छित्तिधर्मेत्यर्थात्, ज्ञानस्वरूपधर्मस्याविनाशित्वे आत्माविनाशित्वस्य हेतुत्वे तात्पर्यात्। अनुच्छित्तिः ध्वंसाप्रतियोगित्वं धर्मो यस्येति नार्थः, 'अविनाशी' इत्यनेन पौनरुक्त्यात्। तदुक्तं—ज्ञोऽतएवेत्यत्र **श्रुतप्रकाशिकायाम्**—

> "तत्र नानुच्छित्तिरेव धर्मतया विवक्षिता; 'अविनाशी' इत्यनेन पुनरुक्तिप्रसङ्गात्। अत उच्छेदरहितज्ञानधर्मकत्वं विवक्षितम् ॥" —इति ॥

ननु—उक्तरीत्या ज्ञानस्य नित्यत्वे 'घटज्ञानमुत्पन्नं, पटज्ञानं नष्टम्' इति व्यवहारः कथम्—**इति चेन्न**। अवस्थागतस्यैव प्रागभावप्रतियोगित्वस्य ज्ञाने उपचारात् ॥ यथोक्तं **श्रीमति भाष्ये**—

> "तमिममिन्द्रियद्वारा ज्ञानप्रसरमपेक्ष्य उदयास्तमयव्यपदेशः ॥" —इति ॥

अथवा—अवस्थाविशिष्टे प्रागभावप्रतियोगित्वादिकं पर्याप्तम्; ज्ञानस्य तादृशप्रतियोगित्वपर्याप्त्यनधिकरणत्वं घटपटोभयपर्याप्तद्वित्वानधिकरणत्वं घटस्येवोपपादनीयम् ॥

एतेन—ज्ञानोत्पत्तिवादिनां लौकिकव्यवहाराणां 'स ईक्षाञ्चक्रे' 'स ऐक्षत' इति भगवत्सङ्कल्पोत्पत्तिप्रतिपादकश्रुतीनाञ्च लक्षणाप्रसङ्गः इति **निरस्तम्**; उक्तरीत्या विशिष्टबुद्धिविषयभेदेन ध्वंसप्रतियोगित्व-नित्यत्वादिव्यवहारोपपत्तेः । इत्थं च ज्ञानस्य द्रव्यत्वात् घटादौ संयोगादिरेव विषयता । यथोक्तं **श्रीभाष्ये**

"सम्बन्धश्च संयोगलक्षणः ॥" इति ॥

इन्द्रियद्वारा प्रसृतस्य ज्ञानस्य घटादौ संयोगो विषयतेत्यर्थः ॥

परोक्षस्थलेऽपि प्रसरणमभ्युपगम्यत इति तत्रापि संयोगात्मकविषयता सिद्धा ॥ तदुक्तमद्वैतविद्याविजये

"न च परोक्षे प्रसरणाभावः, तत्राप्यान्तरस्य प्रसरणस्य सत्त्वात् ॥"

इति ॥

तथा च 'घटो रूपवान्' इति ज्ञाने जाते रूपावच्छिन्नघटे ज्ञानसंयोगरूपविषयता जायते । 'रूपवन्तं घटं जानामि' इत्यनुभवेन ज्ञाने रूपविशिष्टघटानुयोगिकत्वविशिष्टसंयोगस्य विषयीकरणात् । तत्र तादृशज्ञानसंयोगानुयोगित्वं ज्ञाने घटस्य विशेष्यता, तादृशानुयोगितावच्छेदकत्वं रूपस्य प्रकारता, तादृशावच्छेदकतानिरूपितसम्बन्धानवच्छिन्नावच्छेदकत्वरूपं तादृशावच्छेदकतायां संसर्गविधयाऽवच्छेदकत्वं अपृथक्सिद्धिसम्बन्धस्य संसर्गता । तादृशावच्छेदकतानिरूपितकिञ्चित्सम्बन्धावच्छिन्नावच्छेदकत्वं च प्रकारतावच्छेदकत्वं रूपत्वादेरिति विवेकः ॥

न च—ज्ञानसंयोगानुयोगितावच्छेदकत्वं रूपस्येव घटत्वस्यापि अक्षतमिति तस्यापि प्रकारत्वापत्तिरिति—वाच्यम्; इष्टत्वात् ॥ न चैवं-

घटो रूपवानिति घटत्वधर्मितावच्छेदककज्ञानात् 'रूपवान् घटः' इति रूपधर्मितावच्छेदककज्ञानस्य वैलक्षण्यानुपपत्तिः, विषयतावैलक्षण्यविरहात्–इति वाच्यम्। यतो घटत्वादिरूपधर्मितावच्छेदकस्य ज्ञानसंयोगानुयोगितायामवच्छेदकत्वमिव रूपनिष्ठतदनुयोगितावच्छेदकतायामपि सामानाधिकरण्यसम्बन्धेन अवच्छेदकत्वं स्वीक्रियते। एकविशिष्टे अपरवैशिष्ट्यावगाहिबुद्धौ धर्मितावच्छेदकसामानाधिकरण्यं विधेये भासत इति नैयायिकैरभ्युपगमात्॥ तथा च–ज्ञानसंयोगानुयोगितावच्छेदकतानिरूपितसामानाधिकरण्यसम्बन्धावच्छिन्नावच्छेदकता विशिष्टतदनुयोगितावच्छेदकत्वं धर्मितावच्छेदकत्वम्; तादृशसामानाधिकरण्यसम्बन्धावच्छिन्नावच्छेदकताशून्यत्वे सति संयोगानुयोगितावच्छेदकत्वं प्रकारतेति भेदः। अत्र सामानाधिकरण्यसम्बन्धेन 'वह्निविशिष्टधूमवान् पर्वतः' इति ज्ञाने वह्नेर्धर्मितावच्छेदकतावारणाय ज्ञानसंयोगानुयोगितावच्छेदकत्वस्य धर्मितावच्छेदकताशरीरे निवेशः॥

अथैवमपि–सामानाधिकरण्येन वह्निविशिष्टधूमवान् पर्वत इति ज्ञाने वह्नेर्धर्मितावच्छेदकत्वं दुर्वारम्। विशेष्ये विशेषणमिति ज्ञानात् विशिष्टस्य वैशिष्ट्यं इति ज्ञानस्य वैलक्षण्यनिर्वाहाय विशेषणतावच्छेदकस्य विशेष्ये भानावश्यकत्वेन वह्नेर्ज्ञानसंयोगानुयोगितावच्छेदकत्वस्यापि सत्त्वात्–इति चेन्न॥ विशेषणतावच्छेदकावच्छिन्नप्रतियोगिकत्वविशिष्टसंयोग शुद्धसंयोगयोः प्रकारतावच्छेदकसम्बन्धयोः वैलक्षण्यादेव तादृशज्ञानयोर्वैलक्षण्यनिर्वाहे विशेषणतावच्छेदकस्य विशेष्ये भानानावश्यकत्वात्। 'अयं गन्धः सुरभिः', 'अयं रसो मधुरः' इत्यादिज्ञाने गन्धरसयोर्विशेष्यत्वं न ज्ञानसंयोगानुयोगित्वरूपं, गुणे संयोगासम्भवात्; किन्तु संयुक्तानुयोगिकत्वविशिष्टापृथक्सिद्धिप्रतियोगित्वमिति–तदनुसारेणैव प्रकारत्वादयः पूर्ववन्निर्वक्तव्याः॥

तदिदमभिप्रेत्योक्तं-षडर्थसङ्ग्रहे श्रीराममिश्रैः—

"संयोगतदर्हेषु विषयत्वाकारः, अनर्हेषु ततस्तदन्वयिषु ॥"

इति ॥

विवृतमेतत् न्यायसिद्धाञ्जने—

"संयोगार्हवस्तुषु वर्तमानत्वादिविशिष्टद्रव्येषु प्रकाशनं संयोगः, संयोगानर्हाणान्तु रूपादीनां अतीतानामनागतानां च प्रकाशनं, तदन्वयित्वाश्रयेषु कारणेषु कार्येषु च यथासम्भवं संयोग ॥"

--इति ॥

अत्र तदन्वयिष्विति मूलस्य तदवच्छिन्नेष्वित्यर्थः। तदवच्छिन्नेषु संयोगः प्रकाशनं-इत्यस्य रूपादिषु संयोगानुयोगितावच्छेदकत्वं रूपवान् घट इति ज्ञानीयप्रकारत्वमित्यर्थः. न नु ज्ञानसंयुक्तापृथक्सिद्धत्वम्; घटो रूपवानिति ज्ञाने रसादेः प्रकाशत्वापत्तेः, रसस्यापि ज्ञानसंयुक्तघटापृथक्सिद्धत्वात्। तत्संयोगानुयोगितावच्छेदकत्वं तु रूपस्यैव, न रसादेः; रूपिनाशपदशायां रूपवन्तं घटं जानामीति रूपादेरनुयोगितावच्छेदकत्वभानात् ॥

अथवा—तदन्वयिषु- तत्प्रतियोगिकापृथक्सिद्ध्यनुयोगिषु। तथा च-संयुक्तानुयोगिकत्वविशिष्टापृथक्सिद्धिप्रतियोगित्वं 'रूपं गुणः' इति ज्ञानीयविशेष्यतेत्यर्थः ॥

अत्र—अतीतादिस्थले अतीतान्वितेषु कार्येषु कारणेषु च ज्ञानसंयोगकथनं विभिन्नकालीनयोरप्यवच्छेद्यावच्छेदकभावाङ्गीकाराभिप्रायेण अतीतादिस्थले तदन्वयिषु कार्यादिषु ज्ञाततोत्पत्तिमङ्गीकुर्वतां प्राचीनभाट्टानां मतमनुसृत्य ॥

अन्यथा पुनरतीतादिस्थले अतिरिक्तैव विषयतेति केचिदाचार्याः ॥

(१.) तदन्वयिषु ततः-इति योजना। ततः-तत्सत्त्वात्-इत्यर्थः ॥

तदुक्तं प्रज्ञापरित्राणे—स्वयंसिद्धिप्रकरणे—

"अतीतानागता अर्था अपि भान्ति च धीबलात्।
संयोगमनपेक्ष्यैव सर्वत्राप्यर्थकृत्यकृत्॥
तस्माद्विषयिविषयभावः सम्बन्ध एव हि।
ज्ञानार्थयोस्तु सम्बन्धः सोऽखिलैरपि संविदः॥" —इति॥

यतस्संयोगादिरूपा विषयता, अत एव घटं जानातीत्यादिक्रियाजन्यफलशालित्वरूपं कर्मत्वं घटादेरुपपद्यते। अन्यथा तु विषयतारूपं गौणं कर्मत्वम्। घटं जानातीत्यादौ अनुयोगितानिरूपकसंयोगरूपविषयत्वं द्वितीयार्थः। तद्घटकानुयोगितायां घटादेराधेयतया घटत्वादेश्चावच्छिन्नत्वसम्बन्धेनान्वयः। अपृथक्सिद्धत्वमाख्यातार्थः—इति घटत्वावच्छिन्नघटनिष्ठानुयोगिताकसंयोगवज्ज्ञानापृथक्सिद्धश्चैत्रादिरिति बोधः॥

एवमेव—"जानात्येवायं पुरुषः" इति श्रुतेरर्थ ऊह्यः। ज्ञातेत्यादौ तृन्प्रत्ययार्थोऽपि अपृथक्सिद्धत्वरूपमेव कर्तृत्वं, न तु पक्तेत्यादाविव तदनुकूलकृतिमत्त्वरूपं; ज्ञाने कृतिसाध्यत्वस्य निषेधात्॥

तथा च शौनकः—

"यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणेः।
दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथा॥
यथोदपानखननात्क्रियते न जलाम्बरं।
सदेव नीयते व्यक्तिमसतस्सम्भवः कुतः॥
तथा हेयगुणध्वंसादवबोधादयो गुणाः।
प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते॥"—इति॥

अत्र यद्यपि—मलप्रक्षालनात्, दोषप्रहाणात्, उदपानखननात्—इति पञ्चमीत्रयं मृत्पिण्डाद्घटं करोतीत्यादाविव तदुपादानकत्वपरम्। उपादानता—प्रयत्ननिरूपितविषयताविशेषः। 'मृत्पिण्डाज्जलाहरणार्थं घटं करोति' इत्यादौ—मृत्पिण्डादावुपादानता, घटे साध्यता, जलाहरणे वोद्देश्यता—इति कृतेर्विषयतात्रयं प्रतीयते॥

एवं च—श्रम्या उपादानार्थकतया मणिसम्बन्धिमलप्रक्षालनोपादानककृतिसाध्यत्वाभावो ज्योत्स्नायां, आत्मसम्बन्धिदोषप्रहाणोपादानककृतिसाध्यत्वाभावश्च ज्ञाने, उदपानखननोपादानककृतिसाध्यत्वाभावश्च जलाम्बरयोः प्रतीयते । मणेरित्यस्य मले आत्मन इत्यस्य दोषे अन्वयात् ॥

एवं च—ज्ञाने अन्योपादानककृतिसाध्यत्वाभाव-कृतिसाध्यत्वसामान्याभावयोरलाभान्न प्रकृतोपयोगः । अन्यथा कृतिसाध्यत्वसामान्याभावतात्पर्यकत्वे ज्योत्स्नायामपि तथात्वापत्त्या वाक्यार्थबाधापत्तेः ॥ एवं—सम्पद्याविर्भाव—इत्यधिकरणभाष्ये कृतिसाध्यत्वसामान्याभावपरतयैतद्वचनोदाहरणमप्यसङ्गतम् । तथाऽपि—नित्यत्वोपपादकतया उपादानस्वारस्यानुरोधेन नित्यत्वव्याप्यस्यैव कृतिसाध्यत्वाभावस्य बोधनीयतया तथाभूतकृतिसाध्यत्वाभावस्यैव विवक्षितत्वान्नानुपपत्तिः, दोषप्रहाणादित्यस्य व्यापारसामान्योपलक्षणत्वात्, व्यापारसामान्यविषयककृतिसाध्यत्वाभावस्य कृतिसाध्यत्वसामान्याभावे पर्यवसानात् ॥

ज्ञानस्य प्रयत्नसाध्यत्वानुपगमे मोक्षार्थं प्रयत्नो विफलः स्यात्, मोक्षस्य सर्वविषयकज्ञानादिरूपत्वादित्याशङ्क्य मोक्षस्य दोषप्रहाणोपादानकप्रयत्ननिष्पाद्यत्वमस्तीति समाधास्यन् तदंशे दृष्टान्तमाह—**यथा न क्रियत इति** ॥ मलप्रक्षालनोपादानककृतिसाध्यत्वं यथा ज्योत्स्नायां एवं दोषप्रहाणोपादानकप्रयत्ननिष्पाद्यत्वं ज्ञानस्येत्यर्थः ॥

तथा च—मोक्षोद्देश्यक एव प्रयत्नो न तु तत्साध्यक इति ज्ञानसाध्यकप्रयत्नानुपगमेऽपि न क्षतिरित्यत्र तात्पर्यान्न प्रकृतानुपयोगः ; न वा दृष्टान्तवैषम्यम्, नापि भाष्यासङ्गतिरिति ध्येयम् ॥

'देहं प्रक्षालयति' इत्यादाविव प्रक्षालनपदेनैव मलध्वंसप्रयोजकव्यापारस्य लाभेऽपि मलपदोपादानानुरोधात् 'विशिष्टवाचकानां' इति

न्यायेन प्रक्षालनपदस्य ध्वंसप्रयोजकव्यापारपरता बोध्या ॥ ततश्च—"विज्ञातारमरे केन विजानीयात्" इति श्रुतावपि विज्ञानापृथक्सिद्ध एव विज्ञातृपदार्थः । एवं 'ज्ञ' इत्यादावपि ज्ञानापृथक्सिद्ध एवार्थः; ज्ञः, ज्ञाता—इत्यनयोस्समानार्थकत्वात् ॥

तथा च—"ज्ञोऽत एव" इत्यधिकरणभाष्यम्—

"ज्ञ एव—अयमात्मा ज्ञातृस्वरूप एव, न ज्ञानमात्रम्, नापि जडस्वरूपः ॥" —इति ॥

एवं च—ज्ञश्चिद्रूप इति परेषां व्याख्यानं सूत्राक्षराननुगुणम्; ज्ञशब्दस्य ज्ञानापृथक्सिद्धवाचित्वेऽपि ज्ञानस्वरूपवाचित्वाभावात्, "धीरो मनीषी ज्ञः प्राज्ञः" इति कोशाच्च ॥

ननु—ज्ञशब्दस्य ज्ञानस्वरूपवाचकत्वं श्रीभाष्य एवाङ्गीकृतम् । तथा हि—ज्ञोऽत एवेत्यस्यायमर्थः । "नात्मा श्रुतेः" इति सूत्रात् आत्मेत्यनुषज्यते । अत इत्युत्तरं वर्तमान एवकारः ज्ञ इत्यनन्तरं योज्यः । अतइत्येतच्छब्देन "नात्मा श्रुतेः" इति प्रकृता श्रुतिः परामृश्यते । तथा च—आत्मा ज्ञ एव, श्रुतेः—इति फलति ॥

अत्रत्य एवकारः 'शङ्खः पाण्डुर एव' इतिवत् विशेषणसङ्गतत्वादयोगव्यवच्छेदार्थकः । अयोगव्यवच्छेदश्च—उद्देश्यतावच्छेदकसमानाधिकरणाभावाप्रतियोगित्वम् । अयोगस्य—उद्देश्यतावच्छेदकावच्छिन्ने विशेषणायोगस्य उद्देश्यतावच्छेदकसमानाधिकरणाभावप्रतियोगित्वपर्यवसितस्य, व्यवच्छेदः—अभावः—इति तदर्थात् ॥

तथा च—ज्ञ इत्यस्य ज्ञातृत्वमात्रार्थकत्वे शङ्खः पाण्डुर एवेत्यादौ शङ्खत्वसमानाधिकरणाभावाप्रतियोगित्वं पाण्डुरत्व इव आत्मत्वसमानाधिकरणाभावाप्रतियोगित्वं ज्ञातृत्वे प्रतीयते । ततश्च ज्ञातृत्वाभावव्यावृत्तावपि ज्ञानत्वाभावाव्यावर्तनात् 'नापि जडस्वरूपः'

इति व्याख्यानमयुक्तम् । न हि—शङ्खः पाण्डुर एवेत्युक्ते पाण्डुररूपानाश्रयत्वव्यवच्छेदवत् तद्रूपत्वाभावव्यवच्छेदोऽपि लभ्यते ॥

एवमपरस्त्वित्यादिना नैयायिकस्य पूर्वपक्षित्वोत्कीर्तनं चायुक्तं स्यात् । अतो ज्ञ इत्यस्य चिद्रूपार्थकत्वे च तदुभयं सङ्गच्छत इति ज्ञ इत्यस्य ज्ञाता चिद्रूपश्चार्थ इति भाष्याभिप्रायः—इति चेन्न ॥

तथा सति तदधिकरणश्रुतप्रकाशिका विरुध्यते ॥

तत्रत्या चेयं पङ्क्तिः—

"परेषां सूत्राक्षरास्वारस्यम् । द्रष्टृशब्दस्येव ज्ञशब्दस्य ज्ञप्तिवाचित्वाभावात्" —इति ॥

अतो 'नापि जडस्वरूपः' इति श्रीभाष्यस्य न नैयायिकाभिमतात्मवत्कदाचिदपि ज्ञानशून्यस्वरूपक इत्यर्थः । आत्मा ज्ञ एवेत्युक्ते आत्मनि ज्ञानाभावस्य कादाचित्कस्यापि व्यावृत्तेः नैयायिकमतखण्डनसङ्गतेः । न हि कदाचिदपि ज्ञानाभावे अभ्युपगम्यमाने आत्मत्वसमानाधिकरणाभावाप्रतियोगित्वं ज्ञातृत्वे सम्भवति ॥

ननु—अनेनाधिकरणेन जीवस्य ज्ञानस्वरूपत्वं न सिध्यतीति चेत्, काक्षतिः । प्रमाणान्तरेण तत्सिद्धेः ॥

अत एव ज्ञप्तिमात्रस्वरूपतानिराकरणपरमेवेदमधिकरणमित्युक्तमात्मसिद्धौ—

"नात्मा श्रुतेरित्यारभ्य सूत्रकारोऽपि वक्ष्यति ।
ज्ञोऽत एवेत्यतो नात्मा ज्ञप्तिमात्रमिति स्थितम् ॥"—इति ॥

तथा च—आत्मा ज्ञ एवेति प्रतिज्ञावाक्यादात्मत्वसमानाधिकरणाभावाप्रतियोगिज्ञानापृथक्सिद्ध आत्मेति बोधात् आत्मनि तादृशज्ञानापृथक्सिद्धत्वमात्मत्वे वा स्वाभाववदवृत्तित्वस्वापृथक्सिद्धवृत्तित्वोभयसम्बन्धेन ज्ञानं साध्यमिति प्रतीयते । हेतुश्च न प्रतिपाद्यतासम्बन्धेन श्रुतिसामान्यम्, अचेतने व्यभिचारात् ॥

नापि—'नात्माश्रुतेः' इति प्रकृता श्रुतिः अत इत्येतच्छब्देन परामृश्यते–इति **भाष्यम्** । तत्र **श्रुतप्रकाशिका**—

"श्रुतिव्यक्तिभेदेऽपि एतच्छब्दोऽर्थवशादपेक्षितं वाक्यविशेषमुपस्थापयति । एतच्छब्दोऽयं प्रकृतजातीयपरामर्शीत्यर्थः"–इति ॥

तथा च–'योऽयं विज्ञानमय एष हि द्रष्टा' इत्यादिभाष्योदाहृतश्रुतिष्वन्यतमस्य तद्व्यक्तित्वेन प्रतिपाद्यतासम्बन्धेन हेतुत्वान्न दोषः—**इति युक्तम्** ॥ तथाऽपि ज्ञान-ज्ञानत्वात्मत्वादौ व्यभिचारात् तत्र ज्ञानापृथक्सिद्धत्वरूपसाध्याभावात्, उक्तश्रुतेः प्रतिपाद्यतासम्बन्धेन तत्रापि सत्त्वाच्च ॥

यदि च–स्वजन्यबोधीयमुख्यविशेष्यतासम्बन्धेन उक्तश्रुतेर्हेतुत्वान्न दोषः–इत्युच्यते । **तदापि** तादृशश्रुतेस्तद्व्यक्तित्वेनैतच्छब्देन परामर्शो न सम्भवति, पूर्वं येन रूपेण निर्देशस्तेनरूपेणैव एतच्छब्देन बोधनात् । न हि–'भूतले द्रव्यमस्ति एनमानय' इत्युक्ते एतच्छब्देन घटत्वेन बोधो भवति। अत एतच्छब्देन श्रुतेस्तद्व्यक्तित्वेन परामर्शासम्भव इति। किन्तु स्वजन्यबोधीयात्मत्वसमानाधिकरणाभावाप्रतियोगिज्ञातृत्वनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन श्रुतिसामान्यस्य हेतुत्वान्न व्यभिचारः; न वा प्रकृतपरामर्शासङ्गतिः ॥

अत्र स्वजन्यबोधीययद्धर्मनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन श्रुतिर्यत्र तत्र तद्धर्मवत्त्वम्–इति व्याप्तौ, प्रसिद्धश्रुतिसम्प्रतिपन्नोऽर्थो दृष्टान्तः । श्रुतित्वं च–अपौरुषेयवाक्यत्वम्। अत्र हेतावपौरुषेयत्वनिवेशात् घटो ज्ञातेति भ्रान्तप्रयुक्तवाक्यमादाय न घटादौ व्यभिचारः। उक्तसम्बन्धेनात्मनि विद्यमाना श्रुतिश्च 'जानात्येवायं पुरुषः', 'विज्ञानघन एव प्रज्ञानघनः'–इत्यादिरेवकारघटितैव ग्राह्या । तादृशश्रुते-

रेवात्मत्वसमानाधिकरणाभावाप्रतियोगिज्ञातृत्वबोधकत्वात् । भाष्ये एवकाराघटितानां 'अथ यो वेदेदं जिघ्राणीति स आत्मा, योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः', 'विज्ञातारमरे केन विजानीयात्', 'एष हि द्रष्टा श्रोता' इत्यादिश्रुतीनामुक्तार्थपरतया उदाहरणम् । 'सर्वं वाक्यं', इति न्यायेन एवकारोऽध्याहर्तव्यः— इत्यभिप्रायेणेति न कोऽपि दोषः—इत्यवधेयम् ॥

एवमेव—'सर्वज्ञः' इत्यस्यापि सर्वविषयकज्ञानाश्रयः इत्येवार्थः। सर्वज्ञत्वं च, संशयनिवर्तकतावच्छेदकविषयतासामान्यवज्ज्ञानवत्त्वम् । संशयनिरूपितप्रतिबन्धकतावच्छेदकविषयतात्वव्यापकस्वनिरूपिता - धेयताकज्ञानवत्त्वपर्यवसितम् । इदं च - जागतीयप्रमात्मकज्ञाने या या विषयता, घटत्वावच्छिन्नप्रकारतानिरूपितभूतलत्वावच्छिन्नविषयता- रूपा सा सर्वा ईश्वरज्ञाने वर्तते इति पक्षे ॥

यदि च—प्रत्येकं सर्वविषयताऽभ्युपगमेनैव सर्वविषयकत्वोपपत्तौ निरूप्यनिरूपकभावापन्नविषयताङ्गीकारे मानाभावः- इत्युच्यते । तदा—सकलतद्व्यक्तित्वानि उभयावृत्तिधर्मत्वेन अनुगमय्य उभयावृत्ति- धर्मत्वव्यापकनिरवच्छिन्नविषयताकज्ञानवत्त्वं सर्वज्ञत्वं- इति निर्व- क्तव्यम् । ईश्वरस्तु सर्वपदार्थान् तत्तद्व्यक्तित्वेन जानातीति निरुक्त- सर्वज्ञत्वोपपत्तिः । मुक्तानामपि तादृशं सर्वज्ञत्वमिष्टमेव । 'सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः'— इति श्रुतेः ॥

अत्र ज्ञानद्वारकव्याप्तेस्सर्वज्ञत्वोपपादकतयोपात्तत्वात् संयोगादि- रूपप्राप्तिरेव विषयतेति श्रुतेस्तात्पर्यमुन्नीयते ॥

एतेन—सर्वज्ञत्वस्य सर्वविषयकज्ञानवत्त्वरूपत्वे सर्वपदजन्य- बोधवति बद्धपुरुषेऽतिप्रसक्तिः । प्रमेयत्वव्याप्यतत्तद्व्यक्तित्वावच्छिन्न-

विषयताकज्ञानवत्त्वरूपत्वे प्रमेयत्वव्याप्यतत्तद्व्यक्तिताऽवच्छिन्नेत्याद्यु-क्तवाक्यजन्यबोधवति अतिप्रसङ्ग इति— **परास्तम्** ॥

—इति प्राहुः ॥ —इति निरवद्यम् ॥

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

इति

श्रीशेषार्यवंशमुक्ताफलस्य श्रीयादवाद्रिनिवासरसिकस्य

श्रीमदनन्तार्यवर्यस्य कृतिषु

विषयतावादः

समाप्तः ।

॥ श्रीः ॥

॥ श्रीः ॥

ब्रह्मपदशक्तिवादः

श्रीमन्महीशूरमहाराजाधिराजमहास्थानसभाभूषणैः
शेषार्यवंशमुक्ताफलैः श्रीयादवाद्रिनिवासरसिकैः
पण्डितमण्डलीसार्वभौमैः
श्री ॥ उ ॥ म. अ. अनन्तार्यवर्यैः
विरचितः ।

श्रीकाञ्चीपुरनिवासिभिः
विद्वद्वरेण्यैः श्री ॥ उ ॥ ति. अ. कु. श्रीनिवासार्यवर्यैः
सम्यक् परिशोध्य ।

म. अ. अनन्तार्येण
प्र. म. तो. नरसिंहार्येण च
कल्याणपुर-विचारदर्पण-मुद्राक्षरशालायामङ्कयित्वा
प्राकाश्यं नीतः ॥

१८९८.

मूल्यं रू. ०—४—०

॥ श्रीः ॥

ब्रह्मपदशक्तिवादः

मुरहरचरणाब्जध्यानधारां विधाय
प्रथितयतिपतिश्रीपादपद्मं प्रणम्य ।
विशदतममनन्ताचार्यवर्यः प्रसिद्धां
प्रकटयति विविक्तां ब्रह्मशब्दस्य शक्तिम् ॥

इह तावद्ब्रह्मशब्दस्य प्रवृत्तिनिमित्तं विचार्यते ॥ स्वावच्छिन्नाश्रयत्व–स्वावच्छिन्नाश्रयाश्रयत्व-स्वावच्छिन्नज्ञानजनकसङ्कल्पवत्त्वै तत्त्रितयसंबन्धेन **परममहत्परिमाणत्वस्वरूपं बृहत्त्वमेव ब्रह्मपद-प्रवृत्तिनिमित्तम्**। ब्रह्मणश्च विभुत्वेन परममहत्परिमाणाश्रयत्वात्सर्वज्ञत्वेन परममहत्परिमाणविशिष्टज्ञानाश्रयत्वान्मुक्तानां सार्वज्ञ्य-सम्पादकत्वेन तज्ज्ञाननिष्ठपरममहत्परिमाणहेतुभूतसङ्कल्पाश्रयत्वाच्च ब्रह्मपदवाच्यतोपपत्तिः । परममहत्त्वत्वञ्च–परिमाणत्वव्याप्यो धर्मविशेषः, परिमाणतद्भेदानां सिद्धान्ते स्वीकारात् । उक्तं च **न्याय-सिद्धाञ्जने**–"परिमाणप्रत्ययविषयः परिमाणं, तच्चतुर्धा अणुमहद्दीर्घह्रस्वभेदात्"—इत्यादिना ॥

यदि च–संयोगविशेष एव परिमाणं, न तु गुणान्तरं। उक्तं च तत्रैव–
"एकदिगवच्छेदेन संयोगाधिक्यं दैर्घ्यं, तेनैव न्यूनभावो ह्रस्वत्वं; बहुदिगवच्छेदेन संयोगाधिक्यं महत्त्वं, तेनैव न्यूनभावोऽणुत्वम् ॥" —इति ॥

तथा च विभुत्वं सर्वद्रव्यसंयुक्तत्वं, द्रव्यत्वनिरूपितसंयोगसंबन्धघटित-व्यापकतापर्यवसितं; विभुद्रव्याणामपि परस्परं संयोगाङ्गीकारेण विभु-द्रव्येषु द्रव्यत्वव्यापकत्वस्याबाधात्–इत्युच्यते ॥ **तदा**–स्वाश्रयत्व-स्वाश्रयज्ञानाश्रयत्व–स्वप्रयोजकसङ्कल्पवत्त्वैतत्त्रितयसम्बन्धेन द्रव्य-त्वव्यापकतावत्त्वरूपमेव बृहत्त्वं ब्रह्मपदप्रवृत्तिनिमित्तम् ॥

तथा च जिज्ञासाधिकरणभाष्यम्–"बृहत्त्वं च स्वरूपेण गुणैश्च यत्रानवधिकातिशयं सोऽस्य मुख्यार्थः"–इति ॥ अनवधिकातिशयं बृहत्त्वं–परममहत्परिमाणं, द्रव्यत्वानिरूपितसंयोगसबन्धघटितव्याप-कत्वं वा। स्वरूपेण–आश्रतासम्बन्धेन; गुणैश्च–गुणघटितपरम्परासम्ब-न्धेन; स च सम्बन्धः स्वाश्रयाश्रयत्वरूपः, स्वप्रयोजकसङ्कल्पवत्तारूप-श्चेत्युक्तसम्बन्धत्रयलाभः। मुख्यार्थः–शक्यार्थः ॥

यद्यपि–उदाहृतभाष्यात्स्वाश्रयत्वस्वाश्रयाश्रयत्वादिसम्बन्धत्रयेण परममहत्परिमाणमेव प्रवृत्तिनिमित्तं प्रतीयते, न तूक्तसम्बन्धत्रयेण परममहत्परिमाणत्ववत्त्वम् ॥ **तथाऽपि** स्वाश्रयत्व-स्वाश्रयाश्रयत्व-स्वजनकसङ्कल्पवत्त्वरूपसम्बन्धत्रयेण कस्यापि परिमाणस्य ब्रह्मण्यभा-वेन यथाश्रुतार्थबाधादुक्तसम्बन्धत्रयेण परममहत्त्वत्वरूपपरिमाणत्व-व्याप्यधर्मवत्त्वरूपपूर्वोक्तार्थ एव तात्पर्यमवसीयत इति न दोषः। द्विती-यकल्पे च यथाश्रुतभाष्यार्थेऽपि नानुपपत्तिः। द्रव्यत्वसमानाधिकरण-भेदप्रतियोगितानिरूपितसंयोगसम्बन्धावच्छिन्नावच्छेदकताशून्यत्वरू-पद्रव्यत्वव्यापकत्वस्यैकस्यैव ब्रह्मतज्ज्ञानमुक्तज्ञानसाधारण्येनोक्तसम्ब-न्धत्रयेण तद्वत्त्वस्य ब्रह्मण्यबाधात् ॥ अधिकरणभेदेनाभावभेदाभावेन ब्रह्मनिष्ठोक्तावच्छेदकत्वाभावस्य ब्रह्मज्ञानादिवृत्तावविरोधात् ॥

यदि च–सिद्धान्ते अभावस्तत्तदधिकरणवृत्तिधर्मस्वरूपः, न तु नैयायिकादिमतवदतिरिक्तः–इत्युच्यते ॥ **तदाऽपि**–नानुपपत्तिः। उक्तावच्छेदकत्वाभावस्य ब्रह्मतज्ज्ञानमुक्तज्ञानैतात्त्रितयवृत्त्यनुगतधर्म-

स्वरूपत्वसम्भवात् ॥ न च—तत्त्रितयानुगतधर्मे प्रमाणाभावः ; त्रित्व-स्यैव तादृशधर्मस्य प्रसिद्धेः ॥

यद्यपि—अपेक्षाबुद्धिविशेषविषयत्वमेव त्रित्वादिकं न त्वतिरिक्तम्, अपसिद्धान्तात् । तथा च संयोगरूपविषयताया विषयभेदेन भिन्नत्वान्न त्रितयानुगतत्वं । **तथाऽपि** विषयतासम्बन्धेन तत्त्रितयसम्बद्धा अपेक्षाबुद्धिरेवानुगतेति तद्रूपत्वमेवोक्तावच्छेदकत्वाभावस्येति बोध्यम् ॥

वस्तुतस्तु—ब्रह्मत्वस्योक्तावच्छेदकत्वाभावरूपत्वकल्पेऽपि स्वावच्छिन्नाधिकरणत्व-स्वावच्छिन्नाधिकरणाश्रयत्व—स्वावच्छिन्नाधिकरणताप्रयोजकसंकल्पवत्त्वैतत्त्रितयसंबन्धेनोक्तावच्छेदकत्वाभावत्ववत्त्वमेव ब्रह्मपदप्रवृत्तिनिमित्तं युक्तम्; बन्धनिवृत्त्युत्तरकालीनमुक्तज्ञाननिष्ठोक्तावच्छेदकत्वाभावत्वावच्छिन्नाधिकरणताप्रयोजकसंकल्पवत्त्वस्यैव—बृंहणत्वरूपत्वात् । मुक्तज्ञाने तादृशावच्छेदकत्वाभावत्वावच्छिन्नाधिकरणतैव हि बृहत्त्वं, न तु तादृशाभावमात्रं; तादृशाभावस्य तद्वृत्तिधर्मरूपस्य मुक्तेः पूर्वमपि सत्त्वात् ॥

एतेन—परिमाणाभावविशिष्टद्रव्यत्वमेवानवधिकातिशयबृहत्त्वं, तदेव च—ब्रह्मपदप्रवृत्तिनिमित्तं; विभुद्रव्येषु सर्वत्र परिमाणानङ्गीकारात्तेषामपरिमितप्रत्ययविषयत्वात् ॥ न चापरिमितव्यवहारस्संकुचितपरिमाणाभावविषयः, परिमाणसामान्याभावविषयत्वे बाधकविरहात्, द्रव्यत्वस्य परिमाणव्याप्यत्वानङ्गीकारात्, अस्थूलमनण्वह्रस्वमदीर्घमिति ब्रह्मणि चतुर्विधपरिमाणनिषेधाच्च; विभुद्रव्येषु सर्वत्र परिमाणं नास्त्येव ॥ उक्तं **चागमप्रामाण्ये**—"परिमाणं हि नाम देशावच्छेदः, इयत्ता, परितोभाव इति यावत् । न च नभसि तदस्ति ॥"—इति ॥ तथा च—स्वरूपतो गुणतश्च परिमाणाभावविशिष्टद्रव्यत्ववत्त्वमेव ब्रह्मपदप्रवृत्तिनिमित्तम्—**इत्येतत्कल्पोऽपि व्याख्यातः** । स्वावच्छि-

श्राधिकरणत्व–स्वावच्छिन्नाधिकरणताश्रयत्व–स्वावच्छिन्नाधिकरणता प्रयोजकसंकल्पवत्त्वैतत्त्रितयसंबन्धेन परिमाणाभावत्ववत्त्वं ब्रह्मपदप्र वृत्तिनिमित्तमित्येतत्कल्पाभिप्रायात् परिमाणाभावत्वावच्छिन्नाधिकर- णताया एव मुक्तज्ञाने बृहत्त्वरूपत्वात् तादृशबृहत्त्वस्यैव भगवं- त्संकल्पप्रयोज्यत्वात् ॥

ननु–उदाहृतभाष्यानुसारात्स्वाश्रयत्वस्वाश्रयाश्रयत्वोभयसंबन्धेन बृहत्त्ववत्त्वमेव ब्रह्मपदप्रवृत्तिनिमित्तं युक्तं; स्वाश्रयाश्रयत्वसम्बन्धेन ज्ञानगतबृहत्त्ववत्सु मुक्तेषु ब्रह्मपदप्रयोगवारणाय प्रथमसम्बन्धनिवेशः; मुक्तज्ञानेषु ब्रह्मपदप्रयोगवारणाय द्वितीयसम्बन्धनिवेशः। न तूक्त- त्रितयसम्बन्धेन बृहत्त्ववत्त्वं तथा, तृतीयसम्बन्धनिवेशस्य वैयर्थ्यात्। ब्रह्माभिन्ने सर्वत्र निरुक्तोभयसम्बन्धेन बृहत्त्वविरहात् ॥ तथा च– ब्रह्मपदशक्यतावच्छेदककोटौ स्वप्रयोजकसंकल्पवत्त्वरूपतृतीयसम्ब- न्धनिवेशो विफलः—इति चेत् ॥

अत्र टीकाकृतः–"ब्रह्मशब्दादुक्तोभयसम्बन्धेन बृहत्त्ववत्त्वस्येव स्वप्रयोजकसङ्कल्पवत्तासम्बन्धेन तद्बृहत्त्वरूपबृंहणत्वस्यापि बोधस्यानु- भाविकतया तस्यापि तत्पदशक्यतावच्छेदककोटिनिवेश आवश्यकः; यथा–पद्मत्वमात्रस्य अनतिप्रसक्तत्वेऽपि पङ्कजनिकर्तृत्वस्यापि पङ्कज- पदाद्बोधस्यानुभवसिद्धतया तस्यापि तत्पदशक्यतावच्छेदककोटौ निवेशस्सर्वसिद्धः। अत एव 'बृहति-बृंहयति, तस्मादुच्यते परं ब्रह्म' इत्यथर्वशिरश्श्रुत्या 'बृहत्त्वाद्बृंहणत्वाच्च तद्ब्रह्मेत्यभिधीयते' इति विष्णुपुराणोपबृंहितया बृहत्त्वबृंहणत्वे प्रवृत्तिनिमित्ततयाऽवगते ॥ न च बृहत्त्वं च स्वरूपेणेत्यादिभाष्ये निरुक्तबृंहणत्वस्य प्रवृत्तिनिमित्तत्वं नोक्तमिति–वाच्यम्। उक्तश्रुतिस्मृतिभ्यां बृंहणत्वस्यापि तत्पदप्रवृत्ति- निमित्तत्वे सिद्धे भाष्ये न्यूनतापरिहाराय गुणतो बृहत्त्वे बृंहणत्व-

स्यान्तर्भावनीयत्वात्। तथा च—बृहत्त्वबृंहणत्वोभयरूपं उक्तत्रितय-सम्बन्धेन बृहत्त्ववत्त्वमेव ब्रह्मपदप्रवृत्तिनिमित्तम् ॥"

—इति वदन्ति ॥

परे तु—

स्वाश्रयत्व-स्वाश्रयाश्रयत्वोभयसम्बन्धेन बृहत्त्ववत्त्वमेव ब्रह्मपदप्रवृत्तिनिमित्तं, न तु निरुक्तबृंहणत्वमपि ॥ न चैवं—बृहति बृंहयतीत्यादिश्रुतिविरोधः, तादृशश्रुत्या निरुक्तबृंहणत्वस्यापि ब्रह्मपदप्रवृत्तिनिमित्ततावोधनात्—इति वाच्यं; तादृशश्रुतौ बृंहयतीत्यस्य स्वगुणान् बृंहयतीत्यर्थाङ्गीकारेण स्वाश्रयाश्रयत्वसम्बन्धेन बृहत्त्ववत्त्वस्य प्रवृत्तिनिमित्तत्वबोधेनाविरोधात्। बृहत्त्वं च स्वरूपेणेत्यादिभाष्य-फक्किकयाऽपि बृंहयतीत्यस्योक्त एवार्थोऽवगम्यते ; तत्र बृहत्त्वं च स्वरूपेणेत्यनेनोक्तश्रुतिघटकं बृहतीत्यंशं व्याख्याय गुणैश्चेत्यनेन बृंहयतीत्यंशव्याख्यानात्। गुणैर्बृहत्त्वं हि गुणद्वारकबृहत्त्वं, स्वाश्रयाश्रयत्वसम्बन्धेन बृहत्त्वपर्यवसितं ; बृंहयतीत्यस्य गुणान् बृंहयतीत्यस्मिन्नेवार्थे जन्माद्यधिकरणभाष्यस्वारस्यम् ॥

तथा च **तदधिकरणभाष्यं**—"ये तु निर्विशेषं वस्तु जिज्ञास्यमिति वदन्ति तन्मते—ब्रह्मजिज्ञासा, जन्माद्यस्य यतः—इत्यसङ्गतं स्यात्। निरतिशयबृहद्बृंहणं च ब्रह्मेति निर्वचनात् ॥" —इति ॥

अत्र टीका— "आद्यसूत्रासङ्गतिमुपपादयति—निरतिशयेति। अथर्वशिरसि श्रीविष्णपुराणे चोक्तनिर्वचनमभिप्रेतं, न निर्विशेषं ब्रह्मेति निरुक्तमिति भावः ॥" —इति ॥

अत्र बृंहयतीत्यस्य गुणतो बृहत्त्वरूपत्वे हि निर्गुणब्रह्मवाद-निराकरणत्वोपपत्तिः ॥ न च—बृंहयतीत्यस्य मुक्तान् बृंहयतीत्यर्थाङ्गीकारेऽपि मोक्षप्रदत्वौपयिकनिरवधिकक्षान्तिकारुण्यादिगुणानामर्थापत्त्या लाभसम्भव इति—वाच्यम्। "आक्षेपतः प्राप्तात् आभिधानिकस्यैव ग्राह्यत्वात्" इतिभाष्यानुरोधेन शब्दशक्त्या गुणलाभसम्भवे अर्था-

पत्त्या गुणलाभाङ्गीकारस्यायुक्तत्वात् ॥ उक्तार्थसूचकमेव जन्माद्यधिकरणे भाष्यान्तरमपि—"उपलक्ष्यं ह्यनवधिकातिशयबृहद्बृंहणं च ; बृहतेर्धातोस्तदर्थत्वात्" इति ॥ इत्थं च—अद्वारकबृहत्त्वगुणद्वारकबृहत्त्वबृंहणत्वानां प्रवृत्तिनिमित्तत्वं चेद्भाष्याभिप्रेतं तदा जिज्ञासाधिकरणभाष्ये बृंहणत्वानुक्त्या जन्माद्यधिकरणभाष्ययोर्गुणद्वारकबृहत्त्वानुक्त्या च न्यूनता स्यात् । तत्रोक्तयोरेवानुक्तस्यान्तर्भावकल्पने च प्रयासाधिक्यम् । गुणतो बृहत्वस्यैव बृंहणत्वरूपत्वे च न कश्चित् क्लेशः । उदाहृतभाष्यत्रयस्यैककंठ्यवशादुक्तोभयसम्बन्धेन बृहत्त्ववत्त्वस्य ब्रह्मपदप्रवृत्तिनिमित्तत्वावगमादुक्तक्लेशं सोढा गुणद्वारकबृहत्त्वापेक्षया बृंहणत्वस्य पार्थक्यमङ्गीकृत्य निरुक्तसम्बन्धत्रयेण बृहत्त्ववत्त्वस्य ब्रह्मपदप्रवृत्तिनिमित्ततास्वीकारे सम्बन्धत्रयघटकान्यतमवैयर्थ्यपरिहारोऽपि क्लेशसाध्यो न ललितोपायसाध्यः ॥

अथ—परिमाणसामान्याभाव एव विभुत्वं, तदेव चानवधिकातिशयं बृहत्त्वमिति तृतीयकल्पे स्वाश्रयत्व-स्वाश्रयीभूतगुणत्वरूपत्वाद्याश्रयत्वोभयसम्बन्धेन बृहत्त्वस्य रूपादावपि सत्त्वात्तत्रापि ब्रह्मपदप्रयोगापत्तिः । रूपे तद्गतगुणत्वादिधर्मे च परिमाणाभावसत्त्वादित्यतः स्वप्रयोजकसङ्कल्पवत्त्वनिवेशस्सफलः । स्वाश्रयाश्रयत्वस्वप्रयोजकसङ्कल्पवत्त्वोभयसम्बन्धेन बृहत्त्ववत्त्वस्य मुक्तादौ सत्त्वात्तत्रापि ब्रह्मपदप्रयोगापत्तिः । मुक्तज्ञानगतबृहत्त्वे ब्रह्मसङ्कल्पस्यैव मुक्तसङ्कल्पस्यापि प्रयोजकतास्वीकारात्, प्रजापतिवाक्ये मुक्तस्यापि सत्यसङ्कल्पत्वश्रवणात् । अतः स्वाश्रयत्वनिवेशः—इति चेत् एवमपि स्वाश्रयत्वस्वप्रयोजकसङ्कल्पवत्त्वोभयसम्बन्धेन बृहत्त्वस्यैव अनतिप्रसक्ततया स्वाश्रयाश्रयत्वस्य वैयर्थ्यं दुष्परिहरं ; अतस्सम्बन्धत्रयानिवेशो न भाष्याभिप्रेतः ॥

—इत्याहुः ॥

इदं तु टीकातात्पर्य–परममहत्परिमाणं, द्रव्यत्वनिरूपितसंयोगसम्बन्धघटितव्यापकत्वं वा, परिमाणाभावो वा, निरतिशयबृहत्त्वमस्तु। पक्षत्रयेऽप्यपृथक्सिद्धिसम्बन्धेन तादृशबृहत्त्ववत्त्वे सति अनन्तगुणवत्त्वे सत्यचेतनस्य यत्स्थूलपरिमाणं यच्च चेतनानां 'स चानन्त्याय कल्पते' इत्युक्तज्ञानबृहत्त्वं तदुभयहेतुभूतसंकल्पवत्त्वमेव ब्रह्मपदप्रवृत्तिनिमित्तं; न तूक्तोभयसम्बन्धेनानवधिकातिशयबृहत्त्ववत्त्वं तत्, स्वरूपे बृहत्त्वस्यपरममहत्परिमाणादिरूपत्वेन गुणेषु च तस्यानंत्यरूपत्वेन तयोरेकरूपेण शक्यतावच्छेदकगर्भे निवेशासंभवात्, परममहत्परिमाणानन्त्ययोरनुगमकरूपाभावात् ॥ न चान्यतरत्वं तदुभयविषयकज्ञानविषयत्वं वा तयोरनुगमकं सम्भवतीति वाच्यं, तथा सत्यन्यतरत्वादिघटकभेदादीनां विशेषणविशेष्यभावे विनिगमनाविरहेण शक्यतावच्छेदकभेदापत्त्या शक्तिभेदापत्तेः। एवं स्वरूपगतबृहत्त्वमुक्तज्ञानगतबृहत्त्वयोः परममहत्परिमाणत्वाद्यनुगतरूपेण निवेशसम्भवेऽप्यचेतनगतस्थौल्यस्य तेन सङ्ग्रहो न सम्भवति, अचेतनस्य प्रकृत्यादेर्नित्यविभूतो व्याप्यभावेन तद्गतपरिमाणस्य परिच्छिन्नत्वेन परममहत्त्वरूपत्वासम्भवात्। अभिमतश्चाचेतनगतस्थौल्यस्यापि बृंहणत्वशरीरे प्रवेशः ॥

उक्तं च जन्माद्यधिकरणटीकायां–"बृंहणत्वमपि ब्रह्मशब्दार्थः। तच्च स्वसङ्कल्पेनाचेतनस्य स्थूलपरिमाणहेतुत्वं चेतनानां 'स चानन्त्याय कल्पते' इत्युक्तज्ञानबृहत्त्वहेतुत्वं च" —इति ॥

किं च–परममहत्त्वत्वादिना स्वरूपगतबृहत्त्वमुक्तज्ञानगतबृहत्त्वेऽनुगमय्य तयोराश्रयत्वस्वप्रयोजकसङ्कल्पवत्त्वैतदुभयस्य सम्बन्धतया निवेशे सत्यं ज्ञानमिति श्रुत्यर्थवर्णनपरजन्माद्यधिकरणभाष्यविरोधः। तत्र हि–"ज्ञानपदं नित्यासङ्कुचितज्ञानैकाकारमाह, तेन कदाचित्सङ्कुचितज्ञानत्वेन मुक्ता व्यावृत्ताः" इत्युक्तम् ॥ तत्र हि–ज्ञानत्वावच्छिन्न-

वाचिना ज्ञानशब्देन ज्ञानवतो लाभो. ब्रह्मपदार्थतावच्छेदकघटव सङ्कल्पे ज्ञानपदार्थस्य धर्मिपारतन्त्र्येणान्वयमङ्गीकृत्यैव समर्थनीयः समर्थितं चैवमेव टीकायां—"ततश्च सत्यसङ्कल्पादिविशिष्टार्थोपस्थापकब्रह्मशब्दप्रतिपन्नविशिष्टवस्तुविशेषकत्वात्—ज्ञानपदमसङ्कुचितशक्तितया विशेष्यांशे विशेषणांशे च स्वप्रवृत्तिनिमित्तभूतज्ञानत्वान्वयं प्रतिपादयति ॥" —इति। विवेचितं चेदं लक्षणवादे ॥ तथा च ब्रह्मपदार्थतावच्छेदकगर्भे सङ्कल्पस्य संसर्गतया निवेशे ज्ञानपदार्थस्य तत्रान्वयासम्भवेन ज्ञानपदस्य ज्ञानवत्परत्वकथनमसङ्गतं स्यादिति तस्य विशेषणविधयैव निवेश आवश्यकः। इत्थं च—बृहत्त्ववत्त्वे सत्यनन्तगुणवत्त्वे सत्यचेतनगतस्थौल्यचेतनगतज्ञानानन्त्योभयहेतुभूतसङ्कल्पवत्त्वमेव ब्रह्मपदप्रवृत्तिनिमित्तं स्वीकरणीयम्। अनन्तगुणवत्त्वं च—स्वनिरूपितगुणनिष्ठ आधेयताव्यापकतानवच्छेदकसङ्ख्यानिष्ठोभयावृत्तिधर्मसामान्यकत्वं; भगवन्निष्ठगुणसामान्ये कस्याश्चिदेकस्या अपि संख्याया अभावेन संख्यानिष्ठतद्व्यक्तित्वसामान्यस्य भगवद्गुणत्वव्यापकतानवच्छेदकत्वात्। स्वपदेन ब्रह्मोपादानसंभवेनानंतगुणवत्त्वं ब्रह्मण उपपन्नं; परिमितगुणानां जीवादीनां च न स्वपदेनोपादानसंभवः; जीवादिगुणसामान्येपि कस्याश्चित्सङ्ख्याव्यक्तेस्सत्त्वेन जीवनिरूपितगुणनिष्ठाधेयताव्यापकतावच्छेदकत्वस्यैव संख्यानिष्ठतद्व्यक्तित्वे सत्त्वात्। अत्राद्वारकबृहत्त्वगुणद्वारकबृहत्त्वबृंहणत्वानां त्रयाणां ब्रह्मपदप्रवृत्तिनिमित्ततामनंगीकृत्य गुणद्वारकबृहत्वस्यैव बृंहणत्वरूपत्वेन सद्वारकाद्वारकबृहत्त्वयोरेव ब्रह्मपदप्रवृत्तिनिमित्तत्वे ब्रह्मपदेन मोक्षप्रदत्वालाभात् अथातो ब्रह्मजिज्ञासेत्यनेन शास्त्रस्य प्रयोजनवत्ता न सिध्यति। अथातो धर्मजिज्ञासेत्यत्र धर्मपदस्यालौकिकश्रेयस्साधनत्वावच्छिन्नबोधकतया मीमांसकैश्शास्त्रस्य सप्रयोजनकत्वमुक्तम्। अतो मोक्षरूपप्रयोजनलाभाय ब्रह्मपदशक्यतावच्छेदककोटौ निरुक्त-

बृंहणत्वस्यापि निवेश आवश्यकः। किं च–ब्रह्मपदार्थतावच्छेदककोटौ निरुक्तबृंहणत्वस्यानिवेशे नवियदश्रुतेरित्यादिना वक्ष्यमाणस्याचेतनविचारस्य आवृत्तिरसकृदुपदेशादित्यादिना क्रियमाणोपासनरूपोपायविचारस्य, नात्माश्रुतेरित्यादिना वक्ष्यमाणस्य चेतनविचारस्य, सम्पद्याविर्भाव इत्यादिना वक्ष्यमाणस्य मोक्षविचारस्य चाप्रतिज्ञातार्थनिरूपणपरतया असाङ्गत्यापत्तिः। अचेतनगतस्थूलावस्थाचेतनगतमोक्षोभयघटितनिरुक्तबृंहणत्वस्य ब्रह्मपदार्थतावच्छेदककोटिघटकत्वे च तत्तद्विचाराणां ब्रह्मपदार्थविशेषणविचाररूपतया शास्त्रसङ्गत्युपपत्तिः। अत एव द्रव्यविचारपरेन्द्रियकामाद्यधिकरणस्य शास्त्रसङ्गत्युपपत्त्यर्थं द्रव्यसाधारणमेव धर्मत्वं निरुक्तं मीमांसकैः ॥

उक्तञ्च भाट्टरहस्ये खण्डदेवेन—

"न तावद्विहितक्रियात्वं निषिद्धक्रियात्वं वा तत्, विहितनिषिद्धद्रव्यादौ तदनापत्तेः। न हि फलार्थगुणानुष्ठातॄणां यज्ञे रजताद्यनुष्ठातॄणां च धार्मिकोऽधार्मिक इति व्यवहाराभावः; तथात्वे इन्द्रियकामाद्यधिकरणादौ शास्त्रसङ्गत्यनापत्तेः। किन्तु वेदबोधितश्रेयस्साधनताकत्वं धर्मत्वम्, तद्बोधितानिष्टसाधनताकत्वमधर्मत्वम् ॥" —इति ॥

तथा च–तद्रीत्या निरुक्तबृंहणत्वस्य ब्रह्मपदार्थतावच्छेदके निवेशे च जिज्ञासापदार्थविचारे ब्रह्मपदार्थतावच्छेदकघटकाचेतनादीनामपि धर्मिपारतन्त्र्येणान्वयाङ्गीकारेण तद्विचाराणामपि प्रतिज्ञातत्वात् नवियदश्रुतेरित्यादीनां शास्त्रसङ्गत्युपपत्तिः ॥

उक्तञ्च जिज्ञासाधिकरणटीकायां—

"प्रधानस्य ब्रह्मणोऽप्रधानानामन्येषाञ्च कर्मत्वस्याक्षेपसिद्धत्वादपि प्रधानकर्मत्वस्याभिधानिकत्वमितरेषां प्रधानसम्बन्धादाकाङ्क्षावशाच्च कर्मत्वस्यार्थसामर्थ्यसिद्धत्वं च स्वीकर्तुं युक्तम् ॥"

—इति ॥

अयमर्थः ॥ प्रधानस्य—ब्रह्मपदजन्योपस्थितिविशेष्यस्य ब्रह्मणः। अप्रधानानामन्येषां— ब्रह्मपदजन्योपस्थितिप्रकाराणामुपायोपासकप्रतिबन्धादीनां । ब्रह्मपदार्थतावच्छेदकघटकं बृंहणत्वं हि—अचेतनगतस्थूलावस्थोपासकगतसकलबन्धनिवृत्तिपूर्वकज्ञानानन्त्योभयहेतुभूत - सङ्कल्पवत्त्वम् ॥ अत उपासनरूपमोक्षोपायस्य तदाश्रयरूपोपासकस्य कर्मरूपप्रतिबन्धस्य च ब्रह्मपदजन्योपस्थितिप्रकारतेति भावः। कर्मत्वस्याक्षेपसिद्धत्वादपि—सम्बन्धसामान्यषष्ठीपक्षेऽङ्गीकरणीयत्वात् कर्मत्वस्यार्थापत्त्या भानादपि-प्रधानकर्मत्वस्याभिधानिकत्वं। ब्रह्मनिष्ठविषयतारूपकर्मत्वस्य षष्ठीनिरूपितशक्तिप्रयोज्यशाब्दबोधविषयत्वम्। इदं च ब्रह्मजिज्ञासेत्यत्र लुप्तविभक्तिस्मरणमभ्युपेत्य। अन्यथा ब्रह्मपदस्य ब्रह्मविषयके लक्षणायां निषादस्थपत्यधिकरणन्यायेनाङ्गीकरणीयतया ब्रह्मनिष्ठविषयताया निरुक्ताभिधानिकत्वानुपपत्तेः। इतरेषां—उपायोपासकप्रतिबन्धादीनां, प्रधानसम्बन्धात्—ब्रह्मविशेषणतापन्नत्वात्, आकाङ्क्षावशाच्च—घटस्य ज्ञानमित्यादौ घटान्वितषष्ठ्यर्थविषयत्वे धर्मिपारतन्त्र्येण घटत्वस्यान्वयनिर्वाहाय कल्पनीयात् षष्ठ्यन्तघटादिपदसमभिव्याहृतसविषयकवाचकपदसमभिव्याहाररूपाकाङ्क्षाबलादित्यर्थः । कर्मत्वस्यार्थसामर्थ्यसिद्धत्वं—अर्थस्य विशेषणस्य, यत्सामर्थ्यं पारतन्त्र्यरूपं, तन्निर्वाह्यत्वम्॥ तथा च—ब्रह्मजिज्ञासेत्यत्र लुप्तषष्ठ्यर्थविषयत्वे ब्रह्मविशेषणतापन्नानामुपायादीनामाधेयतासम्बन्धेन धर्मिपारतन्त्र्येणान्वयाङ्गीकारेण उपायादिविषयकविचारस्य कर्तव्यत्वेन प्रतिज्ञोपपत्तिरिति भावः । एवञ्च वियदधिकरणादीनां शास्त्रसङ्गत्युपपत्तये ब्रह्मपदार्थतावच्छेदके बृंहणत्वस्य घटकत्वमावश्यकम् ॥

यदुक्तं—अद्वारकबृहत्त्वगुणद्वारकबृहत्त्वबृंहणत्वानां त्रयाणां प्रवृत्तिनिमित्तत्वेऽन्यतमवैयर्थ्यं दुष्परिहरम्— इति॥ **तन्न** । त्रयाणामपि बोध-

स्यानुभवसिद्धत्वान्निर्वचनानुरोधाद्युक्त्यन्तरानुरोधाच्च त्रयाणां प्रवृत्ति-निमित्तत्वे सिद्धे वैयर्थ्यस्याकिञ्चित्करत्वात् ॥

यदि प्रामाणिकेषु प्रवृत्तिनिमित्तेषु वैयर्थ्यं दोषस्तदा निरतिशयज्ञाना-दीनां षण्णां भगवच्छब्दप्रवृत्तिनिमित्तत्वेऽपि वैयर्थ्यं दुर्वारं, ज्ञाने निरतिशयत्वस्य जगद्व्यापारानुकूलत्वरूपतया तद्विशिष्टज्ञानस्य ब्रह्म-भिन्ने कुत्राप्यसत्त्वेन तन्मात्रस्य भगवच्छब्दप्रवृत्तिनिमित्तत्वसम्भवात्। न च–तत्र ज्ञानादिष्वेकैकस्यैव प्रवृत्तिनिमित्तत्वं, न समुदायस्येति-वाच्यम् ॥

"ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः ।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥"

इत्यत्र अशेषतइत्यस्य वैयर्थ्यप्रसङ्गात् ॥

उक्तं च जिज्ञासाधिकरणटीकायां—

"न च–ज्ञानशक्त्यादिष्वेकैकस्य प्रवृत्तिनिमित्तत्वं, किं तु ज्ञानादिसमुदायस्यैव; अन्यथा–अशेषत इति पदवैयर्थ्यात्, ऐश्वर्यस्य समग्रस्येत्युक्तत्वात्, गवादिष्वतिप्रसङ्गभयाच्च प्रकर्षविशेषवतां ज्ञानादीनां समुदायस्य प्रवृत्तिनिमित्तत्वम-भ्युपेत्यम् ॥" —इति ॥

इदं च वाक्येऽपि शक्तिं स्वीकुर्वतां वैयाकरणानां मतमनुसृत्य । वेन भगशब्दस्य ज्ञानादिसमुदाये मतुपश्च सम्बन्धिनि शक्तेः क्लृप्ततया तयैव षट्काश्रयलाभसम्भवेन मतुबन्तसमुदायस्य ज्ञानादिसमुदायावच्छिन्ने शक्तेरकल्पनेऽपि न क्षतिः । एवं चोक्तभगवच्छब्दप्रवृत्तिनिमित्त इव ब्रह्मशब्दप्रवृत्तिनिमित्तेऽपि वैयर्थ्यस्यादुष्टत्वादद्वारकबृहत्त्वगुणद्वारक-बृहत्त्वबृंहणत्वानां त्रयाणां प्रवृत्तिनिमित्तत्वं युक्तमेव ॥

उक्तं च **जिज्ञासाधिकरणभाष्ये**—

"ब्रह्मशब्देन च स्वभावतो निरस्तनिखिलदोषोऽनवधिकातिशया-सङ्ख्येयकल्याणगुणगणः पुरुषोत्तमोऽभिधीयते ॥" —इति ॥

अत्र–इयत्ताया दोषत्वेन तदभावस्य, निरतिशयबृहत्त्वपर्यवसानेन प्रथमविशेषणेनाद्वारकबृहत्त्वस्य, द्वितीयविशेषणेन गुणद्वारकस्य तस्य, पुरुषोत्तमपदेन चोक्तबृंहणत्वस्य लाभः। 'यदि वा बहुदानाद्वै विष्णुः पुरुष उच्यते' इति पाद्मवचनानुरोधेन मोक्षप्रदत्वपर्यवसितबहुप्रदत्वस्य पुरुषपदार्थत्वेन तद्घटितनिरुक्तबृंहणत्वस्य पुरुषोत्तमपदार्थत्वसम्भवात्। अथवा–स्वभावतो निरस्तनिखिलदोष इत्यस्य स्वव्यधिकरणसङ्कल्पाप्रयोज्यदोषसामान्याभावनिरूपिताधिकरणतावानित्यर्थः । स्वपदमधिकरणतापरम् । मुक्तनित्यादिनिष्ठदोषाभावाधिकरणतायाः स्वव्यधिकरणभगवत्सङ्कल्पप्रयोज्यत्वात्तद्व्यावृत्तिः ॥ उक्तञ्च टीकायां—

"निरस्तनिखिलदोषत्वं च केषाञ्चिद्बद्धानां मुक्तानां नित्यानामप्यस्तीति तद्व्यावृत्त्यर्थं स्वभावत इत्युक्तम्। नित्यसिद्धानामपि भगवन्नित्यसङ्कल्पाधीनं हि नित्यनिर्दोषत्वम् ॥"

—इति ॥

स्वभावत इत्यस्य स्वव्यधिकरणसङ्कल्पाप्रयोज्यत्वमर्थ इति पूर्वोक्तार्थलाभ इत्युदाहृतटीकाशयः ॥

यद्वा–स्वरूपप्रयुक्तदोषसामान्यानुत्पादकत्वं अपृथक्सिद्धिसम्बन्धावच्छिन्नदोषत्वावच्छिन्नप्रतिबध्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्न-प्रतिबन्धकताश्रयत्वपर्यवसितं स्वभावतो निरस्तनिखिलदोषत्वम् । कार्यानुत्पादप्रयोजकत्वस्य प्रतिबन्धकतारूपत्वात्, स्वभावत इत्यस्य स्वरूपप्रयुक्तेत्यर्थात्, मरणोद्देश्यकमरणानुकूलव्यापारात्मकहिंसानुकूलकृतेः पापकारणत्वेन रावणादिनिहन्तुः श्रीरामादेः पापवारणायापृथक्सिद्धिसम्बन्धेन दोषं प्रति तादात्म्येन ब्रह्मस्वरूपस्य प्रतिबन्धकत्वावश्यकत्वात्॥ न च नित्येष्वपि पापोत्पत्तिवारणाय तत्स्वरूपस्यापि प्रतिबन्धकत्वमावश्यकमिति वाच्यम्। तत्र नित्या निर्दोषास्स्युरित्याकारकभगवत्सङ्कल्पस्य विषयतया प्रतिबन्धकत्वेनैव तेषु पापो-

R Krishnaswami Sastri.

त्पत्तिवारणे नित्यस्वरूपस्य प्रतिबन्धकत्वाकल्पनात्। अहं निर्दोषस्स्या-मिति सङ्कल्पस्य ब्रह्मण्यस्वीकारेण न तत्र तस्य प्रतिबन्धकतासम्भव इति। नित्यसिद्धानामपि भगवन्नित्यसङ्कल्पाधीनं हि नित्यनिर्दोषत्व-मिति टीकावाक्यस्यापि भगवत्सङ्कल्पस्य प्रतिबन्धकतयैवोपपत्तौ नित्य-स्वरूपस्य प्रतिबन्धकता न स्वीकरणीयेत्यर्थः। गुणमध्येऽनवधिकातिशय बृहत्त्वरूपविभुत्वस्यापि निविष्टत्वात् द्वितीयपदेनैवाद्वारकबृहत्त्वलाभः॥

यद्यप्यद्वारकबृहत्त्वगुणद्वारकबृहत्त्वबृंहणत्वानां त्रयाणां ब्रह्मपदप्रवृ-त्तिनिमित्ततालाभाय पूर्वकल्पे पदत्रयसार्थक्येऽप्यत्र कल्पे प्रथमपदमनर्थ-कं, द्वितीयेनैवाद्वारकगुणद्वारकबृहत्त्वयोर्लाभात्; ब्रह्मपदप्रयोज्यशाब्द-बोधीयविषयताश्रयनिर्धारणद्वारा ब्रह्मपदप्रवृत्तिनिमित्तनिश्चयाय प्रवृत्ते स्वभावत इत्यादिभाष्ये तत्पदप्रयोज्यबोधविषयताशून्यस्य तत्पद-प्रवृत्तिनिमित्तघटकस्य स्वभावतो निरस्तनिखिलदोषत्वस्य प्रतिपादन-मनवसरग्रस्तं च। तथाऽपि ब्रह्मपदप्रयोज्यलक्षणावृत्त्यप्रयोज्यबोधविष-यताश्रयनिर्धारणपरमिदं भाष्यं; ब्रह्मपदशक्यतावच्छेदकनिर्धारणपरं बृहत्त्वं चेत्यादिभाष्यमिति टीकाकृदाशयः॥

एतदुक्तं भवति। ब्रह्मपदप्रयोज्यविषयता द्विविधा–अर्थापत्तिप्रयोज्या शक्तिप्रयोज्या चेति। तत्राद्या निरुक्तनिरस्तदोषत्वादौ, द्वितीया चा-द्वारकबृहत्त्वादौ। तदुभयविधविषयतां लक्षणावृत्त्यप्रयोज्यत्वेनानुगमय्य तादृशविषयताश्रयसामान्यनिश्चायकं ब्रह्मशब्देन चेत्यादिभाष्यमिति नासङ्गतिः। न चैवमर्थापत्तिप्रयोज्यब्रह्मपदजन्यबोधविषयताश्रयस्य सर्वशरीरकत्वादेरनुक्त्या न्यूनतेति वाच्यम्; तस्यापि कल्याणगुणा-न्तर्गतत्वात्। तथा चोक्तभाष्ये अभिधीयत इत्यस्य लक्षणाभिन्नवृत्ति-प्रयोज्यबोधविषयताश्रय इत्यर्थः॥ उक्तञ्च **टीकायां**—

"अभिधीयते–मुख्यवृत्त्या बोध्यते॥" —इति॥

पदजन्यपदार्थोपस्थितिजनकज्ञानविषयो वृत्तिपदार्थः; तेनार्थापत्तेरपि

वृत्तित्वोपपत्तिः । मुख्यत्वं च लक्षणान्यत्वमिति शक्त्यर्थापत्त्युभयसङ्ग्रहः । अत एव निरस्तनिखिलदोषत्वकल्याणगुणाश्रयत्वरूपविशेषणद्वयमधिकृत्य टीकायामुक्तं—

"इदं च विशेषणद्वयं शब्दशक्तेरर्थसामर्थ्याच्च ब्रह्मशब्दस्य पुरुषोत्तमपरत्वप्रतिपादनोपयोगितयोक्तम् ॥" —इति ॥

अर्थसामर्थ्यमर्थापत्तिः । तथा च ब्रह्मशब्देनेत्यादिभाष्येणापि निरुक्तधर्मत्रयस्य ब्रह्मपदप्रवृत्तिनिमित्तत्वलाभः ॥

इदन्तु तत्त्वम् ॥ परिमाणविशिष्टसङ्कल्प एव ब्रह्मपदप्रवृत्तिनिमित्तम् ; तथा हि—बृहतिधातोर्मनिन्प्रत्ययान्तत्वेन निष्पन्नो ब्रह्मशब्दो ब्रह्मणि यौगिकः ; तत्र बृहतिधातोर्महत्त्वरूपपरिमाणमर्थः ; बृहबृहि वृद्धावित्यनुशासनात्, बृहन्महच्छब्दयोः पर्यायत्वाच्च, वृद्धिश्च महत्त्वरूपं परिमाणं ; न चैवं बृहतिधातोर्निरतिशयबृहत्त्वपरताप्रतिपादकस्य 'उपलक्ष्यं ह्यनवधिकातिशयबृहद्बृंहणं च, बृहतेर्धातोस्तदर्थत्वात्' इति जन्माद्यधिकरणभाष्यस्यासङ्गतिरिति वाच्यं ; उपलक्ष्यं ह्यनवधिकातिशयबृहद्बृंहणं चेत्यनन्तरं बृहत्त्वमात्रं पूर्वप्रतिपन्नमित्यध्याहारेण तदर्थत्वादिति तच्छब्दस्य बृहत्त्वपरतायाः टीकायामुक्तत्वात्; बृहत्त्वमात्रस्यापि पूर्वमुपस्थितत्वात् । मनिन् प्रत्ययार्थस्तु सङ्कल्पाश्रयः, तदेकदेशसङ्कल्पे अनन्तगुणसामानाधिकरण्यविशिष्टस्वसामानाधिकरण्याचेतनगतस्थूलावस्थाजनकत्वविशिष्टमुक्तज्ञानगतस्वसजातीयपरिमाणजनकत्वोभयसम्बन्धेन परिमाणस्यान्वयः । साजात्यञ्च परममहत्त्वत्वेन । सामानाधिकरण्ये सामानाधिकरण्यवैशिष्ट्यं जनकत्वे जनकत्ववैशिष्ट्यञ्च सामानाधिकरण्यसम्बन्धेन । एवं चोक्तोभयसम्बन्धेन परिमाणविशिष्टसङ्कल्पाश्रयलाभेन ब्रह्मणि निरुक्तधर्मत्रयलाभः ॥

न चैवं ब्रह्मशब्दस्य केवलबृहत्त्वाश्रये योगशक्तिः, निरतिशयबृहत्त्वाश्रये रूढिरित्यर्थपरस्य मनिन्प्रत्ययान्तस्य रूढिसहकृतस्य

बृहतिधातोस्तदर्थत्वादिति टीकावाक्यस्यासङ्गतिरिति वाच्यम्; उक्त-संसर्गांशे रूढिसहकृतस्येति तादृशटीकावाक्यार्थत्वात्; सिद्धान्ते अन्विताभिधानाङ्गीकारेणान्वयांशेऽपि शक्तिस्वीकारात्। अन्यथा—मुक्तज्ञानगतनिरतिशयबृहत्त्वेऽपि रूढ्यापत्त्या बृंहयतीति निर्वचन-विरोधप्रसङ्गात्। 'ब्रह्मशब्दस्य योगरूढत्वे तस्मादन्यत्र तद्गुणलेशयोगादौपचारिकः' इति भाष्यस्य,

"यस्मिन्प्रयुज्यमाने तु गुणयोगस्सुपुष्कलः।
तत्रैव मुख्यवृत्तोऽयमन्यत्र ह्युपचारतः॥"

इति गरुडपुराणवचनस्य च विरोधापत्तेः। योगरूढपदानां केवल-योगार्थतात्पर्येणान्यत्र प्रयोगस्यौपचारिकत्वाभावात्; अन्यथा—आका-शादिपदस्यापि ब्रह्मण्यौपचारिकत्वापत्तेः। पङ्कजादिशब्दस्य केवल-योगेन कुमुदेऽपि प्रयोगस्य मुख्यत्वात्। तस्माद्ब्रह्मपदं केवलयौगिकमेव। उक्तटीकावाक्यन्तु संसर्गांशे रूढिपरमिति बोध्यम्॥ न चैवं-ब्रह्म-जिज्ञासेत्यत्र ब्रह्मपदार्थतावच्छेदके अचेतनादीनां संसर्गतया घटकत्वेऽपि प्रकारतया घटकताविरहात्तेषां लुप्तषष्ठ्यर्थविषयत्वेऽन्वयासम्भवेन वियदधिकरणादीनां शास्त्रासङ्गतिर्दुर्वारेति—वाच्यम्। विचारस्यो-क्तोभयसम्बन्धेन परिमाणविशिष्टसङ्कल्पाश्रयब्रह्मविषयकत्वं तद्घटका-चेतनादिविषयकत्वं विनाऽनुपपन्नमित्यर्थापत्तिवशादेव विचारे अचेत-नादिविषयकत्वलाभसम्भवेन वियदधिकरणादीनां शास्त्रसङ्गत्युपपत्तेः॥

अत एवोक्तं **टीकायां**—

"प्रधानकर्मत्वस्याभिधानिकत्वमितरेषां प्रधानसम्बन्धादाकाङ्क्षा-वशाच्च कर्मत्वस्यार्थसामर्थ्यसिद्धत्वं च स्वीकर्तुं युक्तम्॥"
—इति॥

प्रधानकर्मत्वस्य—विचारे ब्रह्मविषयकत्वस्य, आभिधानिकत्वं—ब्रह्मपदो-च्चरलुप्तषष्ठीप्रयोज्यबोधविषयत्वं, इतरेषां—उपायोपासकप्रतिबन्धा-

दीनां, प्रधानसम्बन्धात्–ब्रह्मपदार्थघटकत्वात्, कर्मत्वस्य–विचारे विषयतानिरूपकत्वस्य, अर्थसामर्थ्यसिद्धत्वं–निरुक्तार्थापत्तिप्रयोज्यत्वम्––इत्यर्थः। एवं चोक्तब्रह्मपदार्थतावच्छेदककोटावचेतनादीनां संसर्गतया घटकत्वेऽपि न क्षतिरिति भावः। अत्र सङ्कल्पस्य विशेषणविधयैव ब्रह्मपदार्थतावच्छेदकघटकत्वात्तत्र सत्यंज्ञानमिति श्रुतिघटकज्ञानपदार्थाभेदान्वयप्रतिपादनपरजन्माद्यधिकरणटीकाया अपि न विरोधः ॥

एतेन–परममहत्परिमाणरूपाद्वारकबृहत्त्वस्य ब्रह्मपदशक्यतावच्छेदकत्वे देशापरिच्छेदस्यापि तद्रूपतया निरुक्तबृहत्त्वावच्छिन्ने ब्रह्मण्युक्तदेशापरिच्छेदाश्रयबोधकानन्तपदार्थस्यान्वयो न सम्भवति। जात्यवच्छिन्ने जात्यवच्छिन्नाभेदपरस्य जात्यवच्छिन्नपरसर्वनामघटितस्य स स इत्यादि वाक्यस्य बोधकतावारणाय तद्धर्मावच्छिन्नावच्छेदकताकाभेदसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतावच्छेदकत्वप्रत्यासत्त्या शाब्दबोधं प्रति तद्धर्मभेदस्य कारणत्वावश्यकत्वात्। एवमनन्तगुणवत्त्वस्यापि ब्रह्मपदशक्यतावच्छेदकत्वे तदवच्छिन्ने वस्त्वपरिच्छेदरूपानन्तगुणाश्रयस्यानन्तपदार्थस्यान्वयोऽपि न युक्तः –– इति निरस्तम् ॥ उक्तरीत्या परिमाणविशिष्टसङ्कल्पावच्छिन्नेऽनन्तपदार्थान्वयाङ्गीकारेऽपि परिमाणावच्छिन्नेऽनन्तगुणावच्छिन्ने च तत्तदवच्छिन्नस्याभेदान्वयबोधानभ्युपगमात् ॥

वस्तुतः–सत्यं ज्ञानमित्यत्र ब्रह्मपदं ब्रह्मपदवाच्यपरं, विधेयवाचि, न तु बृहत्त्वबृंहणत्वोभयविशिष्टपरमिति नानुपपत्तिगन्धोऽपि। यद्यपि–बृंहणत्वरूपसङ्कल्पविशेषविशिष्टे ब्रह्मपदार्थे ज्ञानपदार्थस्याभेदान्वयप्रतिपादनपरजन्माद्यधिकरणटीकानुरोधाद्ब्रह्मपदस्य बृहत्त्वबृंहणत्वोभयावच्छिन्नपरता उद्देश्यवाचिता च प्रतीयते; तथाऽपि सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिप्रसिद्धार्थकपदान्तरसमभिव्याहारादलौकिकपरमात्मविषयत्व-

व्युत्पत्तिर्ब्रह्मशब्दस्योपपद्यत इति जिज्ञासाधिकरणटीकानुरोधाद्ब्रह्मपदस्य ब्रह्मपदवाच्यपरता विधेयवाचिता च प्रतीयत इति न दोषः ॥

अथ—सत्यत्वादिधर्मत्रयविशिष्टं ब्रह्मपदवाच्यमित्यर्थाङ्गीकार एव तादृशश्रुतेः प्रसिद्धपदसान्निध्यरूपतया ब्रह्मपदशक्तिग्राहकत्वमुपपद्यते, तादृशार्थश्च न सम्भवति—अद्वारकबृहत्त्वादिधर्मत्रयावच्छिन्ने ब्रह्मपदवाच्यतासत्त्वेऽपि सत्यत्वाद्यवच्छिन्ने तदसम्भवात्—इति चेन्न। सत्यादिपदत्रयेणापि पूर्वोक्तधर्मत्रयस्यैव शक्यतावच्छेदकत्वलाभेनाविरोधात्। तत्र सत्यशब्दस्य "सत् ति यम्—इत्येतानि वा व तानि त्रीण्यक्षराणि, यत्सत्तदमृतमथ यत्ति तन्मर्त्यमथ यद्यं तेनोभयं यच्छति"—इति दहरविद्यागतनिर्वचनानुरोधान्मुक्तामुक्तनियन्तृवाचिना सत्यशब्देन निरुक्तबृंहणत्वस्यानन्तशब्देन वस्त्वपरिच्छेदरूपानन्तगुणवत्त्वदेशापरिच्छेदरूपपरममहत्परिमाणयोरपि लाभात् ॥

ननु—उक्तरीत्या निरुक्तधर्मत्रयस्य उक्तोभयसम्बन्धेन परिमाणविशिष्टसङ्कल्पस्य वा ब्रह्मपदशक्यतावच्छेदकत्वे तच्छून्येषु वेदादिषु वेदस्तत्त्वं तपो ब्रह्मेति कोशेन ब्रह्मपदप्रतिपाद्यतया परिगृहीतेषु कथं ब्रह्मशब्दप्रयोगः—इति चेत्। अत्र जिज्ञासाधिकरणे भाष्यकृतः—

> "सर्वत्र बृहत्त्वगुणयोगेन हि ब्रह्मशब्दः । बृहत्त्वं च स्वरूपेण गुणैश्च यत्रानवधिकातिशयं, सोऽस्य मुख्यार्थः ; स च सर्वेश्वर एव। अतो ब्रह्मशब्दस्तत्रैव मुख्यवृत्तः, तस्मादन्यत्र तद्गुणलेशयोगादौपचारिकः, अनेकार्थकल्पनायोगात्, भगवच्छब्दवत् । तापत्रयातुरैः अमृतत्वाय स एव जिज्ञास्यः। अतस्सर्वेश्वर एव जिज्ञासाकर्मभूतं ब्रह्म ॥" —इति ॥

अयमर्थः—ब्रह्मशब्दस्य निरुक्तधर्मावच्छिन्न एव शक्तिः । वेदादौ निरूढलक्षणा ; तयैव वेदादौ ब्रह्मशब्दप्रयोगोपपत्तौ न तत्र शक्तिः कल्प्यते, अनन्यथासिद्धप्रयोगस्यैव शक्तिकल्पकत्वात् ।

न च–वेदत्वावच्छिन्न एव ब्रह्मशब्दस्य शक्तिः, ब्रह्मणि च लक्षणे-त्येवास्त्विति–वाच्यम्। ब्रह्मशब्दयोगार्थतावच्छेदकस्य वेदादौ बाधेन तत्र शक्त्यसम्भवात्—

"वेदे भूरिप्रयोगाच्च गुणयोगाच्च शार्ङ्गिणि।
तस्मिन्नेव ब्रह्मशब्दो मुख्यवृत्तो महामुने॥
यस्मिन्प्रयुज्यमाने तु गुणयोगस्सुपुष्कलः।
तत्रैव मुख्यवृत्तोऽयमन्यत्र ह्युपचारतः॥"

इति **गारुडपुराणेन** ब्रह्मणि शक्तेरन्यत्र लक्षणायाश्च प्रतिपादनात्॥

अत्र प्रथमश्लोकेन ब्रह्मशब्दस्य ब्रह्मणि शक्तिः, द्वितीयेन च व्यतिरेकमुखेनान्यत्र लक्षणा। लक्ष्यतावच्छेदकं च ब्रह्मनिष्ठयत्किञ्चिद्गुणसजातीयगुणवत्त्वमिति प्रतिपादितम्। अन्यत्र ह्युपचारत इत्यस्य सुपुष्कलगुणशून्ये ब्रह्मनिष्ठपुरुषार्थप्रयोजकतासजातीयपुरुषार्थप्रयोजकत्वावच्छिन्ने वेदादौ लक्षणेत्यर्थः। सर्वत्र गुणयोगेनेति भाष्यस्य बृहत्त्वसमानाधिकरणगुणसजातीयपुरुषार्थप्रयोजकत्वादिरूपगुणयोगेनेत्यर्थः॥ न च–वेदत्वाद्यवच्छिन्ने ब्रह्मपदस्य स्वारसिकलक्षणाग्रहदशायां तेन रूपेण बोधस्यानुभवसिद्धतया सर्वत्र बृहत्त्वगुणयोगेन हि ब्रह्मशब्द इति भाष्यासङ्गतिरिति–वाच्यम्। तादृशभाष्यस्य बृहत्त्वसमानाधिकरणगुणावच्छिन्न एव ब्रह्मपदस्य शक्तिनिरूढलक्षणान्यतरप्रतिपादनपरतया तादृशगुणातिरिक्तधर्मावच्छिन्ने ब्रह्मपदस्य स्वारसिकलक्षणायामपि दोषविरहात्॥ न चैवं–वेदस्तत्त्वमित्यादिकोशस्यासङ्गतिः, तेन वेदत्वावच्छिन्ने ब्रह्मशब्दस्य शक्तेर्निरूढलक्षणाया वा प्रतिपादनादिति–वाच्यम्। उदाहृतगारुडपुराणविरोधेन तादृशकोशस्य हेयत्वात्—"परं जैमिनिर्मुख्यत्वात्" "स्याच्चैकस्य ब्रह्मशब्दवत्"–इत्यादिसूत्रेषु ब्रह्मशब्दस्य भगवत्येव मुख्यताया उक्तत्वेनान्यत्र शक्तेरसम्भवात्॥ इत्थं च–निरुक्तधर्मत्रयावच्छिन्ने परिमाणविशिष्ट-

सङ्कल्पावच्छिन्ने वा ब्रह्मशब्दस्य शक्तिः, तद्वृत्तिगुणसजातीयगुणावच्छिन्ने निरूढलक्षणा, वेदत्वाद्यवच्छिन्ने च स्वारसिकलक्षणेति विवेकः ॥

ननु—आद्यसूत्रघटकब्रह्मशब्देन शक्यार्थस्य वा लक्ष्यार्थस्य वा ग्रहणं—तात्पर्यसत्त्वे शक्यार्थस्येव लक्ष्यार्थस्यापि ग्रहणसम्भवात्—**इति शङ्कायामुत्तरं** तापत्रयातुरैरित्यादि भाष्यम् ॥ **अयं भावः**—एतत्सूत्रघटकब्रह्मशब्दतात्पर्यविषयो निरुक्तशक्यार्थ एव, मोक्षजनकतां प्रति विषयितासम्बन्धेन व्यापकत्वात्—इत्यनुमानेनोक्तसूत्रघटकब्रह्मपदतात्पर्यविषये शक्यार्थतादात्म्यसिद्धिः । मोक्षजनकतानिरूपितविषयितासम्बन्धघटितव्यापकतां प्रति तादात्म्येन निरुक्तब्रह्मपदशक्यार्थस्य व्यापकत्वात् । उदाहृतभाष्ये च तापत्रयातुरैरमृतत्वाय जिज्ञास्यस्स एवेति योजनाऽभिमता । तत्र जिज्ञास्य इत्यन्तं उद्देश्यम्, स एवेति विधेयम् । तथा च—शङ्खः पाण्डर एवेत्यादौ उद्देश्यतावच्छेदकीभूतशङ्खत्वव्यापकत्वस्य विधेये पाण्डरत्वे लाभवत् प्रकृते मोक्षजनकजिज्ञासाविषयत्वं प्रति तादात्म्येन ब्रह्मणो व्यापकतालाभेऽपि मोक्षजनकताविशिष्टजिज्ञासात्वं प्रति विषयितासम्बन्धघटितव्यापकत्वेऽपि तात्पर्याभ्युपगमात्पूर्वोक्तहेतोरुक्तभाष्यारूढतेति बोध्यम् ॥

अत्र यथाश्रुतभाष्यानुरोधेन मोक्षप्रयोजकजिज्ञासाविषयत्वस्यैव हेतुत्वे तस्य च ब्रह्मपदशक्यार्थतादात्म्यशून्येषु जीवादिष्वपि सत्त्वात् व्यभिचारः; सर्वशरीरकत्वप्रकारकब्रह्मविशेष्यकोपासनादेर्मोक्षहेतुत्ववत्—स्वात्मविशेष्यकब्रह्मशरीरत्वप्रकारकोपासनस्यापि मोक्षहेतुताया अप्रतीकालम्बनानित्यधिकरणभाष्यसिद्धतया मोक्षजनकतावच्छेदकीभूतोपासनमुख्यविशेष्यत्वरूपहेतोरपि जीवे व्यभिचारो दुर्वार इति तत्परित्यागः । **उक्तं च टीकायां**—"एतत्सूत्रस्थस्य ब्रह्मशब्दस्यार्थस्वभावात्पुरुषोत्तमपरत्वमुच्यते । **तापत्रयातुरैरिति स एवामृतत्वायेति** पदैः 'तमेवं विद्वानमृत इह भवति नान्यः पन्थाः' इत्यादिश्रुत्यर्थो विवक्षितः ॥" —इति ॥

अयमर्थः । अर्थस्वभावात्–विषयितासम्बन्धावच्छिन्नमोक्ष-जनकताव्यापकत्वाद्धेतोर्ब्रह्मशब्दस्य पुरुषोत्तमपरत्वमुच्यत इति । इदं च ब्रह्मपदतात्पर्यविषये पुरुषोत्तमाभेदे साधिते तुल्यवित्ति-वेद्यतया ब्रह्मपदस्य पुरुषोत्तमतात्पर्यकत्वं सिध्यतीत्यभिप्रेत्य । अन्यथा तु ब्रह्मपदतात्पर्यविषयस्य पुरुषोत्तमत्वमुच्यते । तापत्रयातुरैरितीत्येवाव-तारो युक्तः । उक्तभाष्ये अमृतत्वाय जिज्ञास्यस्स एवेति योजनां पूर्वोक्तहेतौ पर्यवसानं चाभिप्रेत्याह–स एवामृतत्वायेति पदैरिति । तमेवं विद्वानित्यनेन ब्रह्मविषयकज्ञाने मुक्तिहेतुत्वस्य, नान्यः पन्था इत्यनेन ब्रह्माविषयकज्ञाने मुक्त्यहेतुत्वस्य च प्रतिपत्त्या मोक्षजनक-ताव्यापकविषयिताकत्वस्य ब्रह्मणि लाभेनोक्तश्रुत्यनुरोधात् भाष्यस्या-प्युक्तार्थ एव पर्यवसानं न्याय्यमिति भावः ॥

ननु–उक्तानुमाने हेतूकृतस्य मोक्षजनकताव्यापकविषयिताकत्वस्य ब्रह्मस्वरूपनिरूपकेषु आनन्दादिष्वक्षरत्वादिषु च गुणेषु व्यभिचारः, तत्र ब्रह्मपदशक्यार्थतादात्म्याभावात् । ब्रह्मविषयकोपासनसामान्ये आनन्दा-दिविषयतानैयत्यस्याक्षरत्वादिविषयतानैयत्यस्य च 'आनन्दादयः प्रधा-नस्य' 'अक्षरधियां त्ववरोधः' इत्यधिकरणद्वयसिद्धतया मोक्षजनक-ताव्यापकविषयिताकत्वस्योक्तगुणेष्वक्षतेः–इति **चेन्न** ॥ शक्तिनिरूढ-लक्षणान्यतरप्रयोज्यब्रह्मपदजन्योपस्थितिनिरूपितमुख्यविशेष्यत्वस्या-पि हेतुकोटौ निवेशेनोक्तगुणेषु तादृशमुख्यविशेष्यताविरहेण तद्विशिष्ट-मोक्षजनकताव्यापकविषयितानिरूपकत्वस्य तत्राभावात् ॥

अयमत्र विवेकः–ब्रह्मविशेष्यकाचेतनत्वाद्यवच्छिन्नभेदकूटविधेय-कानुमितिजनकतावच्छेदकप्रकारताश्रयाणां गुणानां सर्वोपासन-विषयत्वमतादृशानां च नेति । तादृशप्रकारताश्रयाश्च गुणाः सत्यं ज्ञानमिति लक्षणवाक्यप्रतिपन्नास्सत्यत्वादयः ॥ न च–एवमानन्दादयः प्रधानस्येति सूत्रे आनन्दग्रहणमयुक्तमिति–वाच्यम् । अनुकूलत्व-

प्रकारकज्ञानस्यैवानन्दत्वेन तल्लक्षणघटकज्ञानस्यानन्दपदेनोपादानात्॥ न चैवं–सत्यत्वादयः प्रधानस्येत्येव सूत्रयितुमुचितमिति–वाच्यम् । तथा सति ज्ञानानन्दयोरैक्याप्रतीतेः, तत्प्रतीत्यर्थमानन्दादय इति निर्देशात् ॥ न चैवं–इतरे त्वर्थसामान्यादिति सूत्रभाष्ये ते च गुणास्सत्यज्ञानानन्दामलत्वानन्तत्वानीति ज्ञानानन्दयोः पार्थक्येनो· पादानमयुक्तमिति–वाच्यम्। तादृशभाष्यस्य ज्ञानाभिन्नानन्दो ज्ञानान्द इत्येतत्परत्वेनाविरोधात्। ज्ञानानन्दयोरभेदस्य सूत्रसूचितस्य स्पष्टीकरणार्थमेवं विधनिर्देशोपपत्तेः॥ न चैवं–एतल्लक्षणाघटकस्यामलत्वस्योदाहृतभाष्ये तथात्वकथनमनुचितमिति–वाच्यम् । स्वाश्रयत्व-स्वाश्रयज्ञानापृथक्सिद्धत्वैतदन्यतरसम्बन्धावच्छिन्नकर्मप्रयोज्यधर्मत्वावच्छिन्नप्रतियोगिताकाभाववत्त्वस्यैवोक्तलक्षणघटकसत्यशब्दार्थतया अमलत्वस्यापि तद्रूपत्वेनोक्तलक्षणघटकत्वोपपत्तेः । सत्यपदतात्पर्यविषयीभूतं निरुक्तामलत्वमेवेति सूचयितुं तयोः पृथङ्निर्देशोऽपि ॥ अत एवोक्तं जन्माद्यधिकरणभाष्ये—

"सत्यपदं निरुपाधिकसत्तायोगि ब्रह्माह। तेन विकारास्पदमचेतनं तत्संसृष्टश्चेतनश्च व्यावृत्तः॥" —इति ॥

निरुपाधिकसत्तायोगित्वं--निर्विकारस्वरूपयुक्तत्वं, उक्तान्यतरसम्बन्धावच्छिन्नविकाराभावपर्यवसितम् । विकारश्च–कर्मप्रयोज्यो धर्म इति **लक्षणवादे** स्पष्टम् । अमलत्वं च–स्थूलत्वादिरूपविकाराभाववत्त्वमिति अक्षरधियां त्ववरोध इत्यधिकरणटीकायामुक्तम्। अत एवाक्षरधियामित्यधिकरणोक्ताक्षरत्वादिगुणानामपि निरुक्तसत्यत्व एवान्तर्भावान्नोक्तलक्षणाघटकत्वं, क्षरत्वस्थूलत्वाद्यभावस्यापि विकाराभावरूपत्वात् ॥

यद्यपि—विकारसामान्याभाव एव सत्यत्वं, अक्षरत्वादिकं तु विशेषाभाव इति भेदः। तथाऽपि–विशेषाभावकूटस्यैव सामान्याभावरूप-

त्वाङ्गीकारान्न दोषः ॥ तथा च—सत्यज्ञानादिवाक्योक्तगुणानामेव **इतरे** **त्वर्थसामान्यादिति** सूत्रे विवक्षितत्वान्न कश्चिद्विरोधः ॥ तत्सूत्रार्थस्तु ॥ **इतरे**—सत्यज्ञानादिलक्षणोक्ता गुणाः; सर्वत्रानुवर्तन्ते—मोक्षजनकेषु सर्वेषूपासनेषु विषयितया सम्बध्यन्ते, मोक्षजनकताव्यापकविषयितानिरूपका इति यावत् । **अर्थसामान्यात्**—अर्थस्वरूपनिरूपणधर्मत्वात्, ब्रह्मविशेष्यकाचेतनत्वाद्यवच्छिन्नभेदकूटविधेयकानुमितिजनकतावच्छेदकप्रकारताश्रयत्वादिति ॥ उक्तं च **भाष्ये**—

"ये त्वर्थसमानाः अर्थस्वरूपनिरूपणधर्मत्वेनार्थप्रतीत्यनुबन्धिनः, ते स्वरूपवत् सर्वत्रानुवर्तन्ते । ते च गुणास्सत्यज्ञानानन्दामलत्वानन्तत्वानि ॥" —इति ॥

अर्थस्वरूपनिरूपणधर्मत्वेन—ब्रह्मव्यावर्तकधर्मत्वेन । अर्थप्रतीत्यनुबन्धिनः—ब्रह्मविशेष्यकेतरभेदविधेयकानुमित्यनुकूलाः, अनुकूलत्वंप्रकारतासम्बन्धावच्छिन्नकारणतावच्छेदकत्वं। अत एव—अक्षरधियामित्यधिकरणपूर्वपक्षे तेषामानन्दादिवत् स्वरूपावगमोपायत्वाभावाच्च—इत्युक्तम्; स्वरूपावगमोपायत्वरूपं यदर्थसामान्यं तस्याक्षरत्वादिष्वभावादिति—तदर्थः । स्वरूपावगमः—ब्रह्मविशेष्यकाचेतनत्वाद्यवच्छिन्नभेदकूटविधेयकानुमितिः । उपायत्वं—जनकतावच्छेदकत्वम् ॥ उक्तं च **तदधिकरणटीकायां**—

"अत्र विवक्षिता प्रतीतिर्न येन केन चिदाकारेण, अपि तु व्यावृत्ताकारेण प्रतीतिर्विवक्षिता ॥" —इति ॥

तथा च—ब्रह्मस्वरूपं यथा सर्वत्रानुवर्तते मोक्षजनकताव्यापकविषयितानिरूपकं, तथा सत्यज्ञानादिगुणा अपि ब्रह्मविशेष्यकाचेतनत्वाद्यवच्छिन्नभेदकूटविधेयताकानुमितिजनकतावच्छेदकप्रकारताश्रयत्वान्मोक्षजनकताव्यापकविषयितानिरूपकाः—**इत्यर्थः** ॥

ननु–जगत्कारणत्वस्यापि ब्रह्मलक्षणत्वेन ब्रह्मोद्देश्यकेतरत्वाद्यवच्छिन्नभेदविधेयकानुमितिजनकतावच्छेदकप्रकारताश्रयत्वात्तस्य सर्वोपासनेष्वनुवृत्तत्वाभावाद्व्यभिचारः–इति चेत्॥ **मैवं**। ब्रह्मोद्देश्यकब्रह्मेतरत्वावच्छिन्नप्रतियोगिताकभेदविधेयकानुमितिजनकत्वं जगत्कारणत्वरूपलक्षणस्य, सत्यज्ञानादिलक्षणस्य तु ब्रह्मविशेष्यकाचेतनत्वाद्यवच्छिन्नभेदकूटविधेयकानुमितिजनकत्वमिति–तयोर्विशेषस्य जन्माद्यधिकरणटीकासिद्धतया प्रकृतेऽर्थसामान्यपदेन ब्रह्मोद्देश्यकाचेतनत्वाद्यवच्छिन्नभेदकूटविधेयकानुमितिजनकतावच्छेदकप्रकारताश्रयत्वस्यैव विवक्षणेन जगत्कारणत्वे तदभावेन व्यभिचाराभावात्। तादृशजन्माद्यधिकरणटीकावाक्यं च सोपपत्तिकं व्याख्यातं **लक्षणवाद** इत्यलमतिविस्तरेण॥

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम्॥

इति

श्रीशेषार्यवंशमुक्ताफलस्य श्रीयादवाद्रिनिवासरसिकस्य

श्रीमदनन्तार्यवर्यस्य कृतिषु

ब्रह्मपदशक्तिवादः

समाप्तः।

॥ श्रीः ॥

पाठान्तरम्।

पु.	प.	मुद्रितम्.	पाठान्तरम्।
१	९	बृहत्त्वमेव	ब्रह्मत्त्वमेव
२	५	बृहत्त्वं	ब्रह्मत्वं
४	२०	बृहत्त्व	'बृहत्त्व
५	२२	बृहत्त्वरूपत्वे	बृहद्रूप इत्यर्थकत्वे हि
७	९	रूपाभावात्	रूपाभावादिति
८	१	अवच्छेदकघटक	अवच्छेद
८	२१	निमित्तत्वे	निमित्तत्वे स्वीकृते
१०	७	पक्षेऽङ्गीकरणीयत्वात्	पक्षाङ्गीकारात्
१०	९	रूपकर्मत्वस्य	निरूपकत्वस्य
१४	१५	प्रतिपन्नामिति	प्रतिपन्नाकार इति
१५	४	बृंहयतीति	बृहति बृंहयतीति

॥ श्रीः ॥

शास्त्रैक्यवादः

श्रीमन्महीशूरमहाराजाधिराजमहास्थानसभाभूषणैः
शेषार्यवंशमुक्ताफलैः श्रीयादवाद्रिनिवासरसिकैः
पण्डितमण्डलीसार्वभौमैः
श्री ॥ उ ॥ म. अ. अनन्तार्यवर्यैः
विरचितः ।

श्रीयादवाद्रिनिवासि-
पण्डितवर्य-श्री ॥ उ ॥ स्था. कुप्पनैयङ्गार्यविरचितया
श्रीकाञ्चीपुरवासि-
विद्वद्वरेण्य—श्री ॥ उ ॥ ति. अ. कु. श्रीनिवासार्यसंशोधितया
तात्पर्यदीपिकाख्यया टिप्पण्या
समेतः ।

म. अ. अनन्तार्येण
प्र. भ. तो. नरसिंहार्येण च
कल्याणपुर-विचारदर्पण-मुद्राक्षरशालायामङ्कयित्वा
प्राकाश्यं नीतः ॥

१८९८.

मूल्यं रू. ०—५—०

॥ श्रीः ॥

शास्त्रैक्यवादः.

निखिलभुवनहेतुं नित्यसेतुं भवाब्धे-
र्मुररिपुमभिवन्द्य श्रीयतीन्द्रञ्च नत्वा ।
परिचितगुरुधारागीरनन्तार्यवर्यः
प्रथितविमलयुक्ति वक्ति शास्त्रैक्यवादम् ॥

पूर्वोत्तरमीमांसयोरैकशास्त्र्यमिति तावत्सम्प्रदायः । ऐकशास्त्र्यञ्च एकग्रन्थत्वं, एकवाक्यतापर्यवसितम् । तच्च साकाङ्क्षत्वे सति एकार्थप्रतिपत्तिपरत्वम् ॥

तथा च **जैमिनिसूत्रम्**—"अर्थैकत्वादेकं वाक्यं साकाङ्क्षञ्चेद्विभागे स्यात्" इति । तदुत्थाप्याकाङ्क्षानिवर्तकत्वतन्निवर्तनीयाकाङ्क्षोत्थापकत्वान्यतररूपवत्त्वमेव तत्साकाङ्क्षत्वम् । प्रकृते च मीमांसापूर्वभागोत्थाप्यायाः 'कर्माराध्यः कः' इत्याकारिकायाः 'कर्माङ्गकं किं' इत्याकारिकाया वा ब्रह्मविषयिण्यास्तज्ज्ञानविषयिण्या वा आकाङ्क्षाया विषयसिद्धिसम्पादनेन निवर्तकत्वमुत्तरभागस्येति निरुक्ततत्साकाङ्क्षतानिर्वाहः ॥ एकार्थप्रतिपादकयोः 'घटोऽस्ति', 'कलशोऽस्ति'—इतिवाक्ययोरेकवाक्यतावारणाय साकाङ्क्षत्वनिवेशः ॥ 'भूतलं घटवत्'—इत्युक्ते कोऽयं घट इत्याकाङ्क्षया प्रयुक्तस्य कम्बुग्रीवादिमानित्युत्तरस्य तदेकवाक्यतावारणायार्थैक्यनिवेशः । प्रकृते च मीमांसापूर्वोत्तरभागयोः कर्माराध्यत्वविशिष्टब्रह्मतात्पर्यकत्वरूपं कर्माङ्गकत्वविशिष्टब्रह्मज्ञानतात्पर्यकत्वरूपं वाऽर्थैक्यं निराबाधमेव ॥

केचित्तु—मोक्षरूपैकफलप्रयोजनकप्रतिपत्तिविषयार्थकत्वमैकशास्त्र्यम्। मोक्षस्य साक्षात्कर्मफलत्वाभावेऽपि परम्परया तत्फलत्वमक्षतमेव। अत एवोक्तं प्रथमविजये महाचार्यैः—"प्रयोजनवदर्थपरत्वेन एकत्वस्य प्रतीयमानत्वात्" इति ॥ अत्र अर्थपरत्वेनेत्यभेदे तृतीया; एकत्वस्य—एकवाक्यतारूपशास्त्रैक्यस्य। तथा च उक्तार्थे एव तात्पर्यम् ॥ —**इत्याहुः** ॥

ननु—पूर्वोत्तरभागयोर्निरुक्तैकशास्त्र्यं न तावत्प्रत्यक्षप्रमाणेन सिध्यति। प्रत्यक्षं हि द्विविधं—बाह्यमान्तरञ्चेति। न तावद्बाह्यप्रत्यक्षं तत्साधकं, निरुक्तशास्त्रैक्यस्य बाह्यप्रत्यक्षायोग्यजिज्ञासादिघटितत्वात्। नाप्यान्तरं तत्साधकं, वक्तृतात्पर्यघटितस्य निरुक्तरूपस्यास्मदादिप्रत्यक्षागम्यत्वात्। न ह्यन्यदीयतात्पर्यादिकमन्यदीयमानसप्रत्यक्षगम्यम्। नाप्यनुमानम्; अप्रयोजकत्वात्। नापि शब्दोऽसिद्धेः—**इति चेन्न** ॥ मीमांसोत्तरभागो मीमांसापूर्वभागनिरूपितनिरुक्तैकवाक्यतावान्, पूर्वभागप्रतिपाद्यार्थसङ्गतार्थप्रतिपादकत्वात्—इत्यनुमानेन तत्सिद्धेः। अत्र—यत् यत्प्रतिपाद्यार्थसङ्गतार्थकं भवति तत्तेनैकवाक्यमिति—सामान्यव्याप्तौ जिज्ञासाधिकरणप्रतिपाद्यार्थसङ्गतार्थकं तदेकवाक्यतापन्नं जन्माद्यधिकरणं दृष्टान्तः। जिज्ञासाद्यधिकरणचतुष्टयस्य शास्त्रारम्भसमर्थनार्थत्वेनैककार्यकारित्वरूपसङ्गतिमदर्थप्रतिपादकत्वात् दृष्टान्ते हेतूपपत्तिः; जिज्ञास्यं ब्रह्म कीदृशमिति तदुत्थाप्याकाङ्क्षानिवर्तकत्वाज्जगत्कारणताविशिष्टब्रह्मरूपैकार्थतात्पर्यकत्वाच्च साध्योपपत्तिः ॥

सूचितं चेदमनुमानं **वृत्तिकृता**—

"संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति शास्त्रैकत्वसिद्धिः" —इति ॥

अयमर्थः ॥ एतच्छारीरकं षोडशलक्षणेन जैमिनीयेन संहितमिति शास्त्रैकत्वसिद्धिः— इति योजना। जैमिनिप्रोक्तं शास्त्रं **जैमिनीयम्**, प्रतिपाद्यार्थनिरूपितत्वं तृतीयार्थः, तस्य च सङ्गतार्थप्रतिपादकत्वरूप-संहितपदार्थैकदेशसङ्गतावन्वयात् षोडशाध्यायविशिष्टाभिन्नजैमिनि-प्रोक्तशास्त्रप्रतिपाद्यार्थनिरूपितसङ्गतिविशिष्टार्थप्रतिपादकत्वलाभः ॥ **इतिशब्दार्थः**—इत्याकारकं ज्ञानं, तस्य शास्त्रैकत्वविधेयकानु-मितिरूपसिद्धिपदार्थे जन्यतासम्बन्धेनान्वयः । यद्वा—शारीरक-विशेष्यककर्मकाण्डनिरूपितसङ्गतिप्रकारकज्ञानजन्या शारीरकोद्दे-श्यकशास्त्रैक्यविधेयकानुमितिः—इति विशिष्टार्थः; इतिशब्दार्थज्ञाने शारीरकस्य विशेष्यतासम्बन्धेन भावप्रधानसंहितपदार्थसङ्गतेश्च प्रकारतयाऽन्वयात् इतेर्निपातत्वेन तदर्थे भेदसम्बन्धेन नामार्थान्वये-ऽपि विरोधाभावात् शास्त्रैकत्वसिद्धिरिति ; अत्र शारीरक इति सप्तम्यन्तं पदमध्याहार्यम्, तदर्थशारीरकोद्देश्यकत्वस्य सिद्धिपदार्था-नुमितावन्वयात् ; यद्वा—सिद्धिपदमेव लक्षणया शारीरकोद्देश्यका-नुमितिपरम् । अथवा—प्रयोकत्वरूपं हेतुत्वमितिशब्दार्थः ; तच्च कारणतावच्छेदकसाधारणमिति सङ्गतिविशिष्टशारीरकज्ञानस्य हेतुत्वेन तद्विशिष्टशारीरकस्य हेतुतावच्छेदकत्वानपायात्, इतिशब्दार्थप्रयो-जकतायां सङ्गतिविशिष्टशारीरकस्याधेयतासम्बन्धेन प्रयोजकतायाश्च निरूपकतासम्बन्धेनानुमितावन्वयात् ; सङ्गतिविशिष्टशारीरकनिष्ठ-प्रयोजकताका शास्त्रैक्यानुमिरिति—**वाक्यार्थः** ॥

न च—सङ्गतिविशिष्टशारीरकज्ञानस्य पक्षधर्मताज्ञानविधया शास्त्रैक्यानुमितिहेतुत्वेऽपि सङ्गतिविशिष्टशारीरकस्य न तदवच्छेद-कत्वसम्भवः ; भ्रमप्रमासाधारण्येन हेतुत्वानुरोधेन सङ्गतिनिष्ठप्रकारता-निरूपितशारीरकनिष्ठविशेष्यताकज्ञानत्वेनैव हेतुत्वस्यावश्यकत्वा-दिति—वाच्यम् । तथा सत्युक्तप्रकारताविशेष्यतयोः परस्परविशेषण-

विशेष्यभावे विनिगमनाविरहेण कारणताबाहुल्यप्रसङ्गात् सिद्धान्ते यथार्थख्यातेरङ्गीकारेण विषयितासम्बन्धेन विशिष्टविषयस्यैवावच्छेदकत्वेनानुपपत्तिविरहात्—इति वादान्तरे स्पष्टम् ॥

ननु—निरुक्तानुमाने हेतूकृतस्य पूर्वभागप्रतिपाद्यार्थसङ्गतार्थप्रतिपादकत्वस्य सूत्रसमानार्थकाधुनिकपुरुषकल्पितकारिकादावपि सत्त्वाद्व्यभिचारः। न च तत्र पूर्वभागनिरूपितनिरुक्तैकवाक्यत्वरूपसाध्यस्यापि सत्त्वान्न व्यभिचार इति वाच्यम्; तथा सति निरुक्तैकवाक्यत्वस्य भिन्नप्रबन्धसाधारण्येनैकप्रबन्धत्वरूपत्वासम्भवेनोद्देश्यासिद्धेः। एकप्रबन्धत्वरूपमैकशास्त्र्यं हि पूर्वोत्तरभागयोरुद्देश्यम् ॥ उक्तं च शतदूषण्यां—

"तथाऽपि भिन्नकर्तृकयोः कथमेकप्रबन्धत्वमिति चेन्न"

इत्यादिना। अतस्तदनुकूलकृत्युद्देश्यसमाप्त्युद्देश्यककृतिसाध्यत्वरूपतदेकप्रबन्धत्वस्य साध्यस्य कर्तव्यत्वेन तस्योक्तकारिकादावसत्त्वेन व्यभिचारस्य दुर्वारत्वात्; पूर्वकाण्डानुकूलकृत्युद्देश्यीभूता या समाप्तिः अनावृत्तिश्शब्दादितिसूत्रघटकचरमवर्णध्वंसरूपा, तदुद्देश्यककृतिसाध्यत्वस्योक्तकारिकादावभावात्; एकार्थप्रतिपत्तिपरत्वस्य च तज्जन्यनिश्चयजनकत्वप्रकारकतात्पर्यविषयत्वरूपत्वेन निरुक्तैकवाक्यत्वस्याप्युक्तकारिकादावभावात्; पूर्वभागजन्यानिश्चयजनकत्वप्रकारकतात्पर्यविषयत्वस्योत्तरभागमात्रे सत्त्वात् ॥ —इति चेन्न ॥

पूर्वभागप्रतिपाद्यार्थसङ्गतार्थप्रतिपादकत्वं हि पूर्वभागविषयकप्रवृत्त्युद्देश्यफलोद्देश्यकप्रवृत्तिविषयत्वम्। तादृशश्च फलं विशिष्टवेदार्थप्रतिपत्तिरूपम्। उक्तकारिकायां च न व्यभिचारः, तत्र ब्रह्मज्ञानोद्देश्यकप्रवृत्तिविषयत्वसत्त्वेऽपि पूर्वभागविषयकप्रवृत्त्युद्देश्यफलोद्देश्यकप्रवृत्तिविषयत्वाभावात् ॥

तथा च—ब्रह्मकाण्डः कर्मकाण्डानुकूलकृत्युद्देश्यसमाप्त्युद्देश्यककृतिसाध्यतावान् तत्साकाङ्क्षत्वविशिष्टतदेकार्थप्रतिपत्तिपरो वा, पूर्वकाण्डविषयकप्रवृत्त्युद्देश्यफलोद्देश्यकप्रवृत्तिविषयत्वात्, पूर्वकाण्डघटकाद्वितीयाध्यायवत्—इति विशेषतो व्याप्तिर्बोध्या । तेन—यत्र यद्विषयकप्रवृत्त्युद्देश्यफलोद्देश्यकप्रवृत्तिविषयत्वं, तत्र—निरुक्ततदेकग्रन्थत्वम्—इति सामान्यमुखव्याप्तेः तदेकग्रन्थत्वाभाववति तत्फलोद्देश्यकविसंवादिप्रवृत्तिविषये ग्रन्थान्तरे व्यभिचारेऽपि न क्षतिः ॥

ऐकशास्त्र्यव्याप्यं सङ्गतिमत्त्वमुक्तरूपमित्यभिप्रायेणैव संहितमित्यादिवृत्तिग्रन्थघटकसंहितपदार्थविवेचनपरं भाष्यम्—

"गृहीतात्स्वाध्यादवगम्यमानान् प्रयोजनवतोऽर्थानापाततो दृष्ट्वा तत्स्वरूपप्रकारविशेषानिर्णयफलवेदवाक्यविचाररूपमीमांसा - श्रवणेऽधीतवेदः पुरुषः स्वयमेव प्रवर्तते । तत्र कर्मविधिस्वरूपे निरूपिते कर्मणामल्पास्थिरफलत्वं दृष्ट्वाऽध्ययनगृहीतस्वाध्यायैकदेशोपनिषद्वाक्येषु चामृतत्वरूपानन्तस्थिरफलापातप्रतीतेस्तन्निर्णयफलवेदान्तवाक्याविचाररूपमीमांसायामधिकरोति"—

—इति ॥

अयमर्थः ॥ **गृहीतात्**—आनुपूर्वीप्रकारकज्ञानविषयात् । **स्वाध्यायादवगम्यमानान्**—स्वाध्यायजन्यखण्डवाक्यार्थबोधविपयान् । **आपाततो दृष्ट्वा**—अप्रामाण्यज्ञानास्कन्दितमहावाक्यार्थबोधानन्तरम् । **निर्णयफलेति**—अप्रामाण्यज्ञानानास्कन्दितनिश्चयफलेत्यर्थः । फलं स्वर्गादि । **कर्मफले अल्पत्वं च**—स्वसमानाधिकरणदुःखप्रागभावसमानकालीनत्वम्; अस्मदीयदुःखप्रागभावसमानकालीनत्वस्य मोक्षकालीनसुखेऽपि सत्त्वेन तस्याल्पत्ववारणाय स्वसमानाधिकरणेति दुःखप्रागभावविशेषणम्; इदमेव चाल्पत्वं—"तद्यथेह कर्मचितो लोकः क्षीयते, एवमेवामुत्र पुण्यचितो लोकः क्षीयते"—इतिश्रुतिघटकक्षिञ्धातुतात्पर्यविषयः ;

यथा चन्दनसंयोगादिजन्यं सुखं स्वसमानाधिकरणदुःखप्रागभावसमान-कालीनं, तथा पुण्यजन्यं स्वर्गात्मकसुखमपि स्वसमानाधिकरणदुःख-प्रागभावसमानकालीनमित्यर्थात्, लोकपदस्य सुखपरत्वात्, क्षीयत इत्यस्य ध्वंसप्रतियोगीत्यर्थाङ्गीकारे च मोक्षात्मकसुखस्यापि ध्वंसप्रति-योगित्वेन ततो विशेषानुपपत्तेः । **अस्थिरत्वं च**—स्वसमानाधिकरण-सुखात्यन्ताभावसमानकालीनध्वंसप्रतियोगित्वं ; स्वर्गात्मकसुखध्वंस-काले सुखात्यन्ताभावसम्भवेन तत्कालीनध्वंसप्रतियोगित्वं स्वर्गसुख-स्याक्षतम् ; मोक्षात्मकसुखनाशकाले सुखान्तरोत्पत्तेर्नियतत्वात्तध्वंसस्य सुखात्यन्ताभावसमानकालीनत्वविरहात्, न मोक्षसुखस्य निरुक्तम-स्थिरत्वम् ॥ **अनन्तस्थिरफलेति** ॥ मोक्षसुखे **आनन्त्यम्**—स्वसमा-नाधिकरणदुःखप्रागभावासमानकालीनत्वम् ; **स्थिरत्वं च**—स्वसमाना-धिकरणसुखात्यन्ताभावसमानकालीनध्वंसाप्रतियोगित्वम् ; निरुक्त-मानन्त्यमेव—'अनावृत्तिश्शब्दात्' इतिसूत्रघटकानावृत्तिपदार्थः, न तु वैकुण्ठलोकादधोलोकं प्रति गत्यभावः, 'तेषां सर्वेषु लोकेषु कामचारो भवति' इतिश्रुतिविरोधात् ; "स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभि-सम्पद्यते, न च पुनरावर्तते" इत्यस्य ब्रह्मानुभवात्मकसुखं प्राप्नोति तदुत्तरकालीनदुःखप्रागभाववान्न भवतीत्यर्थः ॥ तथा च—उक्तभाष्ये तद्विषयकप्रवृत्त्युद्देशफलोद्देश्यकप्रवृत्तिविषयत्वमेव संहितत्वमित्युक्तं भवति । एवं ब्रह्मकाण्डः कर्मकाण्डनिरूपितैकग्रन्थत्ववान्, तद्व्याख्येय-व्याख्यानरूपत्वात्, द्वितीयाध्यायवत्—इत्यनुमानेनापि तत्सिद्धिः ॥

न च—तद्व्याख्येयव्याख्यानत्वं वेदभाष्यादावुक्तसाध्यं व्यभिचर-तीति—वाच्यम् । तद्व्याख्येयव्याख्यानत्वं हि तद्घटकप्रतिज्ञाविषय-निरूपणपरत्वम्, **अथातो धर्मजिज्ञासेति** कर्मकाण्डस्थप्रतिज्ञाघटक-धर्मशब्दस्य वेदबोधितश्रेयस्साधनताकत्वावच्छिन्ने शक्त्यङ्गीकारेऽपि निरुक्तशक्यतावच्छेदकस्य उपासनसाधारण्येन तस्यापि धर्मशब्दार्थ-

त्वानपायात्, यजेतेति विधिप्रत्ययबोध्यश्रेयस्साधनताकत्वस्य यागादाविव उपासीतेत्यादिविधिप्रत्ययबोध्यश्रेयस्साधनताकत्वस्य उपासनेऽपि सत्त्वात्। तथा च–उपासननिरूपणस्यापि सामान्यप्रतिज्ञाविषयत्वात् तद्घटकप्रतिज्ञाविषयनिरूपणपरत्वमुत्तरभागस्याक्षुण्णम्॥

यत्तु—वेदबोधितश्रेयस्साधनताकत्वं धर्मत्वं, विहितक्रियातज्जन्यादृष्टादिसाधारणं, "धर्मस्स्वनुष्ठितः पुंसाम्", "धर्मः क्षरति कीर्तनात्" इत्युभयत्र धर्मशब्दप्रयोगात्। वेदबोधितत्वं च–वेदातिरिक्तप्रमाणेन स्वातन्त्र्येणाबोध्यत्वे सति वेदबोध्यत्वम्। तेन तत्त्वसाक्षात्काररूपब्रह्मज्ञानस्य ब्रह्मविषयकसविलासाज्ञाननिवृत्तिरूपमोक्षजनकत्वस्य प्रमाणान्तरसिद्धस्य उपनिषद्बोध्यत्वेऽपि न तस्य धर्मत्वापत्तिः। वस्तुतः— "अयन्तु परमो धर्मो यद्योगेनात्मदर्शनम्" —इति ज्ञानेऽपि धर्मशब्दप्रयोगात्तस्यापि धर्मत्वमिष्टम्। ज्ञानस्य धर्मत्वेऽपि ब्रह्मणो वेदबोधितश्रेयस्त्वावच्छिन्नसाधनताकत्वाभावात् धर्ममीमांसातो ब्रह्ममीमांसाया भेदोपपत्तिः। अस्तु वा ब्रह्मणि धर्मलक्षणस्यातिव्याप्तिवारणाय कृतिव्याप्यत्वं वेदबोधितश्रेयस्साधनताकत्वविशेषणम्। गुणस्यापि चाश्रयाविशिष्टस्य कृतिव्याप्यत्वान्नाव्याप्तिः। असाधारणी वा कारणता तत्र प्रवेश्या। तत्तल्लक्षणमेव च धर्माधर्मपदशक्यतावच्छेदकम्। तस्य च क्रियातज्जन्यादृष्टसाधारण्येन एकयैव शक्त्या धर्माधर्मशब्दौ क्रियातज्जन्यादृष्टपराविति—**भाट्टरहस्ये खण्डदेवेनोक्तम्** ॥ **तन्न**। ब्रह्मण्यपि–"रामो विग्रहवान्धर्मः" "कृष्णं धर्मं सनातनम्"—इत्यादौ धर्मशब्दप्रयोगेन धर्मपदशक्यतावच्छेदकस्य तत्साधारण्येऽपि क्षतिविरहात् तद्व्यावर्तकविशेषणदानस्यानुचितत्वात्। धर्ममीमांसातो ब्रह्ममीमांसाया भेदोपपत्त्यर्थं ब्रह्मव्यावर्तकं विशेषणं देयमित्यपि न, तद्भेदस्यैवासिद्धत्वात्; भेदासिद्धौ तद्विशेषणसार्थक्यं, तस्मिन् सति भेदसिद्धिः–इत्यन्योन्याश्रयाच्चेति॥

यद्वा—तद्व्याख्येयव्याख्यानत्वं पूर्वोत्तरभागद्वयमात्रवृत्तिमीमांसात्वम् । तच्च विषयतासम्बन्धेन तदुभयसम्बद्धं तदुभयविषयज्ञानमेव । तच्च नोक्तसाध्यव्यभिचारि । तदिदमभिप्रेत्योक्तं **शतदूषण्याम्**—

"एकव्याख्येयव्याख्यानात्मना विंशतिलक्षणमेकं शास्त्रम्"—इति । एवं—ब्रह्मकाण्डः कर्मकाण्डनिरूपितनिरुक्तैकग्रन्थतावान्, तदर्थतात्पर्यकतदुक्तमित्यादिशैलीघटितत्वात्, "उक्तं समाम्नायैदमर्थ्यं तस्मात्सर्वं तदर्थं स्यात्" इत्यादिवत्; अथवा—कर्मकाण्डो ब्रह्मकाण्डनिरूपितनिरुक्तैग्रन्थतावान्, तद्घटकीभूततदुक्तमित्यादितात्पर्यविषयीभूतार्थप्रतिपादकत्वात्, 'अल्पश्रुतेरिति चेत्तदुक्तम्' इत्यादितात्पर्यविषयीभूतार्थप्रतिपादकब्रह्मकाण्डघटकसूत्रान्तरवत् — इत्याद्यनुमानेनैकशास्त्रत्वसिद्धिः ॥

यत्तु—ब्रह्मकाण्डो न कर्मकाण्डनिरूपितैकग्रन्थतावान्; तत्कर्तृभिन्नकर्तृकत्वात्, तत्तात्पर्यविषयार्थविरुद्धार्थप्रतिपादकत्वात्, तत्कर्तृमतखण्डनपरत्वाद्वा; ग्रन्थान्तरवत्—इत्यनुमानैः **सत्प्रतिपक्ष इति** ॥ **तत्र चिन्त्यते** । तत्राद्यानुमाने—यत्र यत्कर्तृभिन्नकर्तृकत्वं तत्र तदेकग्रन्थत्वाभाव इति सामान्यव्याप्त्यङ्गीकारे कादम्बर्यादौ व्यभिचारः; कर्मकाण्डकर्तृभिन्नकर्तृकत्वं यत्र, तत्र तत्काण्डनिरूपितैकग्रन्थत्वाभाव इति विशेषव्याप्त्यङ्गीकारे चाप्रयोजनकत्वम्; कादम्बर्यादाविव तत्कर्तृभिन्नकर्तृकत्वेऽपि तदेकग्रन्थत्वसम्भवात् । द्वितीयानुमाने च—हेतुरसिद्धः ॥

ननु—तद्विरुद्धार्थप्रतिपादकत्वं हि तज्जन्यबोधप्रतिबन्धकबोधजनकत्वम्, तच्च नासिद्धम् । तथा हि । "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" इति पूर्वपक्षसूत्रम्; वेदस्य कार्यतानिष्ठविषयतानिरूपितविषयताकबोधजनकत्वात् कार्यताविषयकबोधं प्रति कार्यतावाचकलिङादिपदसमभिव्याहारस्य कारणत्वात् लिङा-

घटितानामर्थवादानामप्रामाण्यमिति तदर्थः । "विधिना त्वेकवाक्यत्वात्" इति सिद्धान्तसूत्रम्; अर्थवादानां बलवदनिष्टाननुबन्धित्वरूपप्राशस्त्ये लक्षणाङ्गीकारेण तादृशप्राशस्त्यस्य च यागादिरूपक्रियायामन्वयाङ्गीकारेण कार्यत्वविषयतानिरूपितविषयताकबोधजनकत्वाप्रामाण्यं सम्भवतीति तदर्थः ॥ एवं च—पूर्वकाण्डे अर्थवादानां कार्यत्वनिष्ठविषयतानिरूपितविषयताकबोधजनकत्वमुक्तं भवति। इह च समन्वयसूत्रे अर्थवादानां कार्यत्वाविषयकबोधजनकत्वमुक्तम् । कार्यत्वाविषयकबोधजनकत्वस्य तद्विषयकबोधजनकत्वाभावव्याप्यतया पूर्वकाण्डजन्यबोधप्रतिबन्धकबोधजनकत्वमुत्तरकाण्डस्याक्षतम्—

—इति चेन्न ॥

अर्थवादत्वसामानाधिकरण्येन कार्यत्वविषयकबोधजनकत्वस्य पूर्वकाण्डेन बोधनात्, ब्रह्मकाण्डेन च तत्सामानाधिकरण्येनैव कार्यत्वाविषयकबोधजनकत्वबोधेन, तद्बोधयोः परस्परप्रातिबध्यप्रतिबन्धकभावाभावात् ॥ तदिदमभिप्रेत्योक्तं श्रुतप्रकाशिकायाम्—

> "सामान्येन सिद्धपरवाक्यानां क्रियाविशेषत्वेऽभिहिते सिद्धपरवाक्यविशेषस्य किं विधिशेषत्वं न वेति विचार्य स्वयंपुरुषार्थविराहिणामेव सिद्धपरवाक्यानां क्रियाशेषत्वम्, स्वयंपुरुषार्थपर्यवसायिनान्तु सिद्धपरवाक्यानां न तच्छेषत्वमिति हि निर्णेतुं युक्तम्" —इति ॥

एवमन्येऽपि विरोधपरिहाराः प्राचां ग्रन्थेषु स्पष्टाः ॥ तत्कर्तृमतखण्डनपरत्वं चासिद्धमेव, परन्तु हयशिरउपाख्यानादिषु जैमिनेः भगवद्बादरायणोपदिष्टब्रह्मविद्यावत्त्वावगमात् श्रवणवेलायां जैमिनिना कृतानि चोद्यानि शिष्यानुग्रहातिरेकात् तद्बुद्धिप्रचिख्यापयिषया तदुक्ततयोपन्यासः कृत इति ॥ किञ्च—कर्मकाण्डो ब्रह्मकाण्डानिरूपितनिरुक्तशास्त्रैक्यवान्, तत्प्रतिपाद्यप्रधानार्थाङ्गप्रतिपादकत्वात्, यो यत्प्रति-

पाद्यप्रधानार्थाङ्गप्रतिपादकः स तन्निरूपितशास्त्रैक्यवान्, यथा प्रयाजादिरूपाङ्गप्रतिपादकशास्त्रं तदङ्गिप्रतिपादकेनैकशास्त्रतापन्नमिति ॥

न च—ज्ञानकर्मणोः अङ्गाङ्गिभाव एवासिद्धः—इति वाच्यम्; "यज्ञेन दानेन तपसा नाशकेन ब्राह्मणा विविदिषन्ति" इति श्रुत्या तदङ्गताबोधनात् ॥

यद्यपि—गगनं दिदृक्षत इत्यादौ गगनविषयकत्वप्रकारकदर्शनविशेष्यकेच्छाया इव उक्तश्रुत्याऽपि यज्ञादिकरणकत्वप्रकारकवेदनविशेष्यकेच्छैव प्रतीयते, न तु धात्वर्थज्ञाने यज्ञादिकरणकत्वं; तथा सति उक्तरीत्या गगनं दिदृक्षत इत्यादावपि दर्शन एव गगनविषयकत्वान्वयस्य वाच्यत्वेन बाधापत्तेः ॥ **तथाऽपि**—सिद्धान्ते पदजन्यपदार्थोपस्थितिविषयस्येव अर्थापत्तिविषयस्यापि शाब्दबोधे भानाङ्गीकाराद्वेदनस्य तत्करणकत्वं विना तदंशे इच्छायास्तत्प्रकारकत्वमनुपपन्नमित्यर्थापत्तिविषयस्य यज्ञादिकरणकत्वस्य वेदने भानान्नानुपपत्तिरिति—**समासवादे** विवेचितम् ॥

ननु—ज्ञानकर्मणोरङ्गाङ्गिभाव एव न सम्भवति; अध्यस्तनिवृत्तिं प्रति अधिष्ठानसाक्षात्कारत्वेन हेतुतायाश्शुक्तिरजतादिस्थले दृष्टत्वेन यथा शुक्त्यादिसाक्षात्कारे कर्मणो नोपयोगः एवं जगतो ब्रह्मण्यध्यस्तत्वेन तन्निवृत्तिरूपमोक्षे अधिष्ठानभूतब्रह्मसाक्षात्कारस्य हेतुत्वात्तत्र कर्मणां नोपयोगः—**इति चेन्न** ॥

जगन्मिथ्यात्वस्यान्यत्र निरासात्, ब्रह्मसाक्षात्कारस्यैव मोक्षहेतुत्वे तस्य तत्त्वमसीत्यादिवाक्यश्रवणानन्तरमेव शाब्दापरोक्षवादिनां मते निष्पन्नत्वेन तदर्थं विचारसम्भवाच्च ॥

अत्र वदन्ति—

यद्यपि प्रथमं निर्विशेषब्रह्मसाक्षात्कारः शब्दान्निष्पन्नः; तथाऽपि स न निश्चयात्मा, अग्रे संशयदर्शनात् ॥ नन्वेककोटिकज्ञान-

मात्रं निश्चय एवेति चेत्, न तावन्निश्चयत्वं जातिः, चाक्षुषत्वादिना साङ्कर्यात् । त्वन्मते जातेर्व्याप्यवृत्तित्वाभावेन धर्मिज्ञाने तदभावप्रसङ्गाच्च । धर्मिज्ञाने तदभावप्रसङ्गादेव न संशयान्यज्ञानत्वम् । अत एव न संशयत्वाभाववत् ज्ञानत्वं, धर्मिज्ञानस्य संशयाभिन्नत्वेन तदभावासम्भवात् । नापि धर्म्यंशे तदभावः, ज्ञाने अंशाभावात् ॥ न च धर्मिविषयत्वावच्छेदेन तदस्तिता, ज्ञानस्वरूपविषयित्वस्य ज्ञानमात्रतया विरुद्धधर्मद्वयासम्भवात्, ज्ञाने अंशसत्त्वे च संशयेऽपि एककोट्यंशे परस्परविरुद्धोभयप्रकारकत्वलक्षणसंशयत्वाभावेन निश्चयत्वापत्तेः ॥

न च—स्वप्रकारीभवद्धर्मविरुद्धप्रकारज्ञानाभिन्नत्वं संशयत्वं तच्च तत्राप्यस्तीति—वाच्यम् । संशयाभिन्नधर्म्यंशज्ञानेऽपि तत्सत्त्वात् ॥ न च—तद्विरुद्धप्रकारकत्वे सतीति विशेषणात् नातिप्रसङ्ग इति—वाच्यम् । समूहालम्बनव्यावृत्त्यर्थमेकविशेष्यकत्वस्यावश्यकत्वात् सप्रकारीभवद्धर्मविरुद्धप्रकारकज्ञानाभेदे सति तज्ज्ञानप्रकार विरुद्धप्रकारकत्वापेक्षया लाघवेन स्वविषये स्वाकारतद्विरुद्धद्वयवैशिष्ट्यावगाहिज्ञानाविरोधिज्ञानत्वस्यैव संशयशब्दार्थत्वात् ॥ तस्मात्—यज्ज्ञानं यत्संशयनिवृत्त्यनुकूलस्वरूपविशेषवत्, तत्तन्निश्चयः, इतरत्तु न तथा—इत्येककोटिकमपि किञ्चित्पुरुषदोषादनवधारणं किञ्चित्तर्कादिकारणमहिम्ना तदनतिरिक्तविषयमपि निश्चय इत्यनवद्यम् ॥

नन्वेवमपि—न निर्विशेषब्रह्मजिज्ञासा भवितुमर्हति । संशयविरोधि ज्ञानं हीष्यते । तच्च संशयसमानप्रकारकं निर्विकल्पकातिरिक्तमिति निर्विकल्पकादिदमिति ज्ञानाच्च संशया-

निवृत्तेः निर्विशेषब्रह्मणि तदभावात् ॥ न च कल्पित-
प्रकारोऽस्तीति वाच्यम्, तत्त्वावबोधकश्रुतिजन्यज्ञानस्य
तदविषयत्वात् ॥ —इति ॥

मैवम् ॥ ज्ञानं हि समानविषयतयाऽवधारणात्मकं संशयं निवर्त-
यति न तु समानप्रकारतया, अन्यविषयात् तददर्शनात् । समानविषय-
त्वमप्यपेक्षितमिति चेत् संशयादपि प्रसङ्गः, निश्चयत्वमप्यपेक्षित-
मिति चेत् तर्हि समानविषयनिश्चयो निवर्तकः, लाघवात् । निर्विक-
ल्पकं तु नास्त्येव । अवधारणत्वादपि न । तन्निवर्तकमिदमिति ज्ञानं
तु घटत्वादिवैशिष्ट्याविषयकत्वात् न तत्संशयं निवर्तयति । अन्यथाऽयं
घट इति ज्ञानात् तद्गोचरे घटत्वे इदं घटत्वं न वेति संशयो
न निवर्तेत; तस्मिन् घटत्वस्य प्रकारत्वाभावात् । किञ्चैवं
प्रमेयवानिति ज्ञानादभिमतनिश्चयात् घटत्वप्रकारकात् संशयनिवृ-
त्त्यापत्तिः । तत्र सामान्यधर्मप्रकारकत्वं प्रतिबन्धकं चेत् इदमिति-
ज्ञाने तथा भविष्यति ॥ —इति ॥

अत्र ब्रूमः —

स्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकत्वस्वसामा-
नाधिकरण्योभयसम्बन्धेन विषयिताविशिष्टविषयताकज्ञानत्वावच्छिन्ने
संशयपदस्य शक्तिः । भूतलं घटवन्न वेति संशयदशायामेव घटस्य
संशय इति व्यवहारः । घटपदोत्तरषष्ठ्यर्थो निरूपितत्वम्, तस्य
संशयपदार्थतावच्छेदकविषयितायामन्वयः । पर्वतो वह्निमान्न वा, भूतलं
घटवत्—इत्यादिसमूहालम्बनदशायाञ्च न घटस्य संशय इति व्यवहारः ।
निरुक्तोभयसम्बन्धेन विषयिताविशिष्टविषयितायां घटनिरूपितत्वस्य
विरहात् । निरुक्तोभयसम्बन्धेन विषयिताविशिष्टान्यविषयिताकज्ञान-
त्वावच्छिन्ने च निश्चयपदस्य शक्तिः । अत एव पर्वतो वह्निमान्न
वेति संशयदशायामपि पर्वतस्य निश्चय इति व्यवहारोपपत्तिः ।

निरुक्तोभयसम्बन्धेन विषयिताविशिष्टत्वस्य वह्नितदभावविषयितयोरेव सत्त्वात् तादृशान्यत्वस्य निरुक्तसंशयीयपर्वतविषयितायामक्षतेः ॥

एतेन—तत्त्वमस्यादिवाक्यात् प्रथमं संशयात्मकसाक्षात्कार एव जायते, विचारानन्तरं च निश्चयात्मक इति विचारसार्थक्योपपादानं—**निरस्तम्** ॥ तत्त्वमस्यादिवाक्याज्जायमानबोधस्य भवतां मते निर्विकल्पकत्वेन निर्विकल्पके संशयत्वाभावात् तद्धर्मावच्छिन्नविशेष्यतानिरूपिततद्धर्मावच्छिन्नप्रकारताशालिबुद्धिं प्रति तद्धर्मावच्छिन्नविशेष्यतानिरूपिततदभावप्रकारताशालिनिश्चयत्वेनैव प्रतिबध्यप्रातिबन्धकभावस्य सिद्धत्वेन प्रकारताशून्यस्य निर्विकल्पकस्य प्रतिबन्धकत्वाद्यसम्भवेन तदीयविषयतायाः तदवच्छेदकत्वासम्भवेन निरुक्तोभयसम्बन्धेन विषयिताविशिष्टत्वाभावात् निष्प्रकारकज्ञानस्यैव भवतां मते निर्विकल्पकत्वात् ॥

सिद्धान्ते तु—सप्रकारकज्ञानविशेष एव निर्विकल्पकः; संस्कारा जन्यत्वे सति इन्द्रियजन्यज्ञानत्वं निर्विकल्पकत्वम्, संस्कारजन्यत्वे सति इन्द्रियजन्यज्ञानत्वं सविकल्पकत्वमिति निर्विकल्पकादिलक्षणात्। अयं घट इति ज्ञानं निर्विकल्पकं; सोऽयं घट इति ज्ञानं तु सविकसविल्पकं, प्रत्यभिज्ञानमिति संज्ञाभेदः ॥

यत्तु—"निर्विकल्पकज्ञानमेकजातीयद्रव्येषु प्रथमपिण्डग्रहणं, द्वितीयादिपिण्डग्रहणं सविकल्पकम्"—इति **जिज्ञासाधिकरणभाष्यम्** ॥ **तदप्युक्तार्थपरमेव** ; जन्यतासम्बन्धेन संस्कारविशिष्टान्यत्वस्य प्रथमपदेन विवक्षणात् उक्तसम्बन्धेन संस्कारविशिष्टत्वस्य द्वितीयादिपदेन विवक्षणात्। **अथवा**—उदाहृतभाष्यं सम्भवल्लक्षणव्यक्तिविषयोदाहरणपरम्, न तु लक्षणपरम् ॥

एतेन—प्रथमपिण्डग्रहणेऽपि सविकल्पकत्वं सम्भवति, यथा—प्रथमपिण्डस्यैव द्वितीयादिग्रहणे सेयं गौरिति; द्वितीयादिपिण्ड-

ग्रहणेष्वपि निर्विकल्पकत्वम्, यथा विस्मृतप्रथमपिण्डस्य परामर्शा-भावात् द्वितीयादिपिण्डेष्वपि इयं गौरिति ॥ अतो–भवदुक्तलक्षणे विवक्षिते भाष्यप्रदर्शितोदाहरणमसमञ्जसमिति–निरस्तम् ॥ यस्य प्रथमपिण्डग्रहणस्य निर्विकल्पकत्वं द्वितीयादिपिण्डग्रहणस्य सविकल्प-कत्वं सम्भवति तादृशव्यक्तिविषयकोदाहरणपरत्वाद्भाष्यस्येति,— स्फुटं निर्विकल्पकवादे ॥

उक्तं च शतदूषण्याम्—

"संस्कारसहकृतेन्द्रियजन्यतया सप्रत्यवमर्शं ज्ञानं सविकल्पकम्, संस्कारानिरपेक्षेन्द्रियजन्यं ज्ञानं निर्विकल्पकम्"—इत्यादिना।

तथा च–सिद्धान्ते निर्विकल्पकस्य संशयत्वसम्भवेऽपि परेषां तदसम्भव एव ॥

यत्तु–निर्विकल्पकस्यापि संशयत्वसम्पादनायोक्तं स्वविषयस्वा-कारतद्विरुद्धद्वयवैशिष्ट्यावगाहिज्ञानाविरोधिज्ञानत्वं संशयपदप्रवृत्ति-निमित्तम्–इति। तदसङ्गतम्–स्वविषयेत्यादेः स्वनिष्ठविषयताघटित-धर्मावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यताशालिज्ञानाविरोधिज्ञान-त्वे वा स्वनिरूपितविशेष्यतानिरूपितत्वस्वाश्रयविरुद्धवृत्तित्वोभय-सम्बन्धेन विषयताविशिष्टविषयताशालिज्ञानाविरोधिज्ञानत्वे वा तात्पर्यम्। उभयत्रापि वैयर्थ्यं दुर्वारम्; निरुक्तप्रतिबध्यताशालिज्ञान-त्वस्य उक्तोभयसम्बन्धेन विषयताविशिष्टविषयताशालिज्ञानत्वस्यैव वा संशयपदप्रवृत्तिनिमित्तत्वसम्भवात् ॥ किञ्च–तादृशाविरोधिज्ञानत्व-स्यैव संशयपदप्रवृत्तिनिमित्तत्वे अप्रामाण्यज्ञानास्कन्दितनिश्चये आहार्यनिश्चये निर्धर्मितावच्छेदककनिश्चये चातिव्याप्तिः। पर्वतो वह्निमान्न वा भूतलं घटवदित्यादिसमूहालम्बनात्मकसंशयेऽव्याप्तिः। तत्र भूतलं घटवन्न वेत्यादिसंशयविरोधित्वस्यैव सत्त्वेन तादृशा-विरोधित्वविरहात् पर्वतो वह्निमान्न वेति संशयदशायामिदं ज्ञानं

महेस्संशयः न तु पर्वतस्येति व्यवहारोपपादनमपि दुर्घटम् । अत एककोटिकसंशये मानाभावात् तत्साधारण्याय निरुक्तलक्षणकथनमसङ्गतमेव ॥

यच्च—एककोटिकज्ञानस्यापि संशयत्वसमर्थनार्थमुक्तम्, अनभ्यासदशापन्नजलज्ञानानन्तरमिदं जलं न वेति संशयदर्शनात् तत्संशयकोटिनिक्षिप्तमिति—तन्न । प्रामाण्यसन्देहादेवार्थसंशयोपपत्तौ पूर्वज्ञानस्य संशयत्वाकल्पनात् ॥ यद्वा अप्रामाण्यज्ञानस्यैव तत्सामग्रया अप्युत्तेजकत्वात् अनभ्यासदशापन्नज्ञानकाले च तत्सामग्र्यास्सत्त्वेन प्रतिबन्धकविरहादेव संशयोपपत्तिः । अत एव स्वयं युक्त्या निश्चितेऽप्यर्थे बहुज्ञवादिद्वयविवाददर्शनात् संशयो जायते ॥ यदपि—संशयनिवृत्त्यनुकूलस्वरूपविशेषवत्त्वं निश्चयत्वमिति—तन्न । संशयप्रतिबन्धकत्वस्यैव निश्चयत्वरूपत्वे तस्यैव प्रतिबन्धकतावच्छेदकत्वेनात्माश्रयात् अप्रामाण्यज्ञानास्कन्दिते आहार्ये निर्धर्मितावच्छेदकके च निश्चये अव्याप्तेश्च । पर्वतो वह्निमान्न वेति संशयदशायामिदं ज्ञानं पर्वतस्य निश्चय इति व्यवहारानुपपत्तेश्चेति ध्येयम् ॥

यदप्युक्तं ब्रह्मानन्देन—"निर्विकल्पकेऽपि संशयत्वं सुलभं,

> पश्यामि अनुमिनोमीत्यादिधीसिद्धलौकिकविषयत्वविधेयत्वादिवत्, सन्देह्मीत्यादिधीसिद्धविषयताविशेषनिरूपकत्वस्यैव संशयत्वरूपत्वात् । तन्नियामकाश्चाननुगताः शक्तिविशेषविशिष्टत्वेनानुगता वा दोषाः । विशेषणीभूतकोट्योरन्यतरस्य विशेष्यतावच्छेदकव्यापकत्वविशिष्टसम्बन्धेन विशेषणता यत्र ज्ञाने तत्त्वं तु न संशयत्वम् । अनन्तवस्तुघटितत्वेन संदेह्मीति सर्वजनसिद्धानुभवानुपपत्तेः भावमात्रकोटिकसंशयसाधारण्याभावाच्च ॥ तथा च—विचारात्पूर्वं सत्यादिवाक्यादेककोटिकसंशयात्मकनिर्विकल्पकब्रह्मविषयसाक्षात्कारस्य इदानीमुत्प-

त्तावपि तन्निश्चयत्वानिष्पत्तेः तदर्थं विचार आवश्यकः ।
अथवा विचारोत्तरमेव तज्ज्ञानमविद्यां निवर्तयति, यौक्तिक
सूक्ष्मार्थजन्यज्ञाने तथैवानुभवात्—

"वेदान्तविज्ञानसुनिश्चितार्थाः
सन्यासयोगाद्यतयश्शुद्धसत्वाः ।
ते ब्रह्मलोके तु परान्तकाले
परामृतात्परिमुच्यन्ति सर्वे ॥"—

इति श्रुतेश्च, वेदान्तवाक्याद्विशेषाविषयकमाद्वितीयाद्युपलक्षित
धिष्ठानमात्रविषयकं यज्ज्ञानं तेन सुनिश्चितः तदभिन्नस्य
परोक्षस्याप्रामाण्यज्ञानानास्कन्दितस्य विषयीकृतो वेदान्त
वाक्यार्थः अखण्डब्रह्मात्मैक्यरूपो यैस्तथेति तदर्थात्
निवर्तकतावच्छेदकन्तु—विचारनिवर्त्यस्य तात्पर्यसंशयस्य तद
हिताप्रामाण्यसंशयस्य वा विरहेण .विशिष्टसाक्षात्कार
शक्तिविशेषो वा । आद्ये—अप्रामाण्यज्ञाननिवर्तकत्वे
द्वितीये—शक्तिविशेषसम्पादकत्वेन, विचारस्योपयोगः
—इति

तन्न ॥ स्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदक
स्वसामानाधिकरण्योभयसम्बन्धेन विषयिताविशिष्टविषयितायाः कॢप्ता
एव संशयत्वरूपत्वस्य सन्देह्मीत्यनुव्यवसायविषयत्वस्य च सम्
अतिरिक्तविषयिताकल्पनस्यायुक्तत्वात्, अनुव्यवसायसामान्यस्य
प्रकारकज्ञानविषयताया नैयायिकादिभिः व्यवस्थापितत्वेन निर्विकल
कविषयकस्य सन्देह्मीत्यनुव्यवसायस्याप्रामाणिकत्वेन निर्विकल
संशयत्वाभावाच्च ॥ अथवेत्यादिकमपि न सत् । यस्य विचारग
शून्यस्यैव कदाचित् कोट्याद्यनुपस्थित्या अप्रामाण्यज्ञानं नैव ज
सत्यादिवाक्यान्निर्विकल्पकसाक्षात्कारश्च जातः, तस्य तदानीमेवावि

निवृत्त्यापत्तेः । न हि विचारशून्यानां सर्वेषां सर्वदा अप्रामाण्यज्ञाना-स्कन्दितमेव बोधं सत्यादिवाक्यं जनयतीत्यत्र मानमस्ति, ब्रह्मविषय-साक्षात्कारसामान्यं प्रमेत्याप्तवाक्यादिजन्यज्ञानवतो विचारशून्यस्यापि सत्यादिवाक्यादप्रामाण्यज्ञानानास्कन्दितमेव ज्ञानं जायत इति तस्य तदानीमेवाविद्यानिवृत्तिर्दुर्वारा। शक्तिविशेषाविशिष्टत्वेन कारणत्वं च—

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे॥"

इतिश्रुत्यादिविरुद्धमप्रामाणिकं च ; 'पार्थसि पीते तृष्णा शाम्यति' इत्यादौ पयःपानेन तृष्णानिवृत्तिहेतुताया इव ब्रह्मसाक्षात्कार-त्वेन मोक्षहेतुतायाः श्रुत्या बोधात् हेतुहेतुमद्भावस्य सतिसप्तम्य-र्थत्वात् ॥ वेदान्तविज्ञानेतिश्रुत्यर्थवर्णनमपि हेयम्, वेदान्ताद्विज्ञा-नमिति पञ्चमीतत्पुरुषे अनुशासनविरहात्, योगविभागादिकल्पने मानाभावात्, मन्मते कर्मणि षष्ठ्यन्तत्वेन तत्समासस्य प्रत्यक्षानु-शासनसिद्धत्वात्।तदभिन्नस्येत्यपि न युक्तम्, अभेदार्थकतृतीयान्तस्य समासविध्यभावात्, अपरोक्षत्वस्य सुशब्दार्थत्वमपि न युक्तम्, तात्पर्यग्राहकमानान्तराभावात्, शब्दवृत्त्या च तदभावात् ॥

एतेन—निश्चितपदेनैवाप्रामाण्यशङ्काविरहादिलाभात् सुपदमपरोक्ष-परमेवेति—**निरस्तम्** । निश्चितपदेन निश्चयविषयतालाभेऽपि अप्रा-माण्यज्ञानाभावालाभात् ॥ अत एव निर्णयत्वेन प्रतिबन्धकतायामपि अप्रामाण्यज्ञानाभावं निवेशयन्ति ॥

तदुक्तं **शतदूषण्याम्**—

"अकम्पनीयव्यवसायविवक्षया सुशब्दप्रयोगात्"—इति।

अकम्पनीयत्वम् —अप्रामाण्यज्ञानानास्कन्दितत्वम् । तस्मात्तत्त्वम-स्यादिवाक्यजन्यापरोक्षस्य अधिष्ठानसाक्षात्कारत्वेनाविद्यानिवृत्तिरूप-मोक्षं प्रति हेतुत्वे विचारवैयर्थ्यं दुर्वारम् ॥

यदपि मतान्तरं—विचारात्पूर्वं तत्त्वमस्यादिवाक्यात् अहंब्रह्मेत्याकारकाभेदबोधो नैव जायते, नाहंब्रह्मेत्यादिभेदप्रत्यक्षस्य तज्जन्यतत्समानाकारसंस्कारस्य वा निरुक्तवाक्यजन्यबोधप्रतिबन्धकस्य सत्त्वादन्योन्याभावप्रत्यक्षे अधिकरणयोग्यतामात्रस्यापेक्षितत्वेन स्तम्भः पिशाचो नेत्यादिप्रत्यक्षस्येव नाहं ब्रह्मेत्यात्मविशेष्यकब्रह्मभेदप्रकारकप्रत्यक्षस्य सम्भवात् । अयोग्यताज्ञानस्य च ज्ञानत्वमनिवेश्य तद्विशेष्यकतदभावप्रकारकत्वेनैव उद्बुद्धसंस्कारसाधारणरूपेण प्रतिबन्धकत्वाभ्युपगमेन उक्तभेदप्रत्यक्षजन्यसंस्कारस्यापि उक्तशाब्दबोधे प्रतिबन्धकत्वसम्भवात्। अतो विचारानन्तरं स्वात्मविशेष्यकब्रह्माभेदप्रकारकनिदिध्यासनेन भेदसंस्कारस्य निवृत्तौ अयोग्यताज्ञानादिरूपप्रतिबन्धकाभावात् तत्त्वमस्यादिवाक्यादभेदबोधो भवतीति मोक्षहेतुभूताभेदबोधप्रतिबन्धकभेदवासनानिरसनार्थं निदिध्यासने प्रवृत्त्युपयोगितया विचारस्सार्थकः—इति ॥ **एतदेव च मतमुपन्यस्तं जिज्ञासाधिकरणभाष्ये**—

> "न च वाच्यं भेदवासनायामनिरस्तायां वाक्यमविद्यानिवर्तकं ज्ञानं न जनयतीति" ।

अपशूद्राधिकरणे च—

> "निदिध्यासनेन द्वैतवासनायां निरस्तायामेव तत्त्वमस्यादिवाक्यमविद्यानिवर्तकं ज्ञानमुत्पादयतीति चेत् " इति ॥

अत्र भाष्ये 'पाथसि पीते तृष्णा शाम्यति' इत्यादौ पयःपाने तृष्णोपशमनप्रयोजकत्ववत् वासनायाः ज्ञानोत्पत्त्यभावप्रयोजकत्वलाभात् कार्यानुत्पादप्रयोजकत्वरूपं प्रतिबन्धकत्वं लब्धम् ॥ इदञ्च मतमसत्। तद्वत्ताबुद्धिं प्रति तदभाववत्ताज्ञानस्य प्रतिबन्धकतावच्छेदककोटाविच्छादिव्यावृत्त्यर्थं ज्ञानत्वनिवेशकस्यावश्यकत्वेन संस्कार-

साधारण्येन प्रतिबन्धकत्वासम्भवात् तदभावविषयकसंस्कारदशायां तद्धत्ताबुद्ध्युत्पादेन संस्कारस्य प्रतिबन्धकत्वे मानाभावाच्च ॥

तथा च **जिज्ञासाधिकरणभाष्यम्**—

"सत्यामपि विपरीतवासनायां आप्तोपदेशलिङ्गादिभिः बाधक-ज्ञानोत्पत्तिदर्शनात्"—इति ॥

विपरीतवासनायां—तद्धर्मावच्छिन्नविशेष्यकाभावविषयकसंस्कारे, बाधकज्ञानोत्पत्तिदर्शनात्; तद्धर्मावच्छिन्नविशेष्यकप्रतियोगिप्रका-रकज्ञानोत्पत्तिदर्शनादित्यर्थः ॥ तस्मादुक्तरीत्या वाक्यजन्यज्ञानस्य हेतुत्वासम्भवात् कर्माङ्गकस्योपासनस्यैव मोक्षहेतुत्वेन ब्रह्मकाण्ड-प्रतिपाद्योपासनाङ्गभूतकर्मप्रतिपादकत्वात् कर्मकाण्डस्य ब्रह्मकाण्डेन एकशास्त्र्यं सिद्धमिति दिक् ॥

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

इति

श्रीशेषार्यवंशमुक्ताफलस्य श्रीयादवाद्रिनिवासरसिकस्य
श्रीमदनन्तार्यवर्यस्य कृतिषु

शास्त्रैक्यवादः

समाप्तः ।

॥ श्रीः ॥

शास्त्रैक्यवाददिप्पणी.

प्रणम्य यादवाद्रीशं नारायणमनामयम् ।
शास्त्रैक्यवादविवृतिं करोमि विदुषां मुदे ॥

पु. प.
१. १. **निखिलेत्यादि** ॥ हेतुं—त्रिविधकारणं। निखिलशब्दार्थस्य हेतुशब्दार्थे विशेषणत्वेनायमर्थो लभ्यते । तेन निमित्तोपादानयोर्भेदवादनिरासः ॥

नित्यसेतुमिति ॥ नित्यं—कालापरिच्छिन्नं, सिद्धमिति यावत् । सेतुं—उपायभूतं। भवाब्धेरित्यस्य लक्षणया भवाब्धिनिस्तरणस्येत्यर्थः, मशकार्थो धूम इत्यादिवत् । अमृतस्यैषसेतुरित्यादिश्रुत्यर्थानुसन्धानेन, सेतुत्वोक्तिरिति ध्येयम् ॥ यद्वा—नित्यसेतुमित्यत्र नित्यत्वं नित्यप्रिय इत्यादाविव सेतुत्वेऽन्वेति ; सेतुत्वं तु लौकिकसेतौ कूलात्कूलान्तरप्रापकत्वरूपं प्रसिद्धम्, इह च संसारपारप्रापकत्वरूपं, संसारस्य च भवाब्धिशब्देन प्रतिपादनात् । तच्च भगवतो नित्यं, संसारपारप्राप्तेर्मुक्तस्य नित्यत्वात् । तेन भगवतः स्वतन्त्रत्वात् स्वसङ्कल्पेन मुक्ते पुनरावृत्तिहेतुत्वशङ्काव्युदासः ॥

१. ३. स्वग्रन्थस्य सम्प्रदायसिद्धत्वसूचनाय **परिचितेत्यादि** ॥

१. ८. **तथा च जैमिनिसूत्रमिति** ॥ इदं च सूत्रं पूर्वमीमांसायां द्वितीयाध्याये प्रथमपादे पठ्यते । अस्य च भाष्यम् —“अथ प्रश्लिष्टपठितेषु यजुष्षु कथमवगम्यते—इयदेकं यजुरिति । यावता पदसमूहेनोच्यते, तावान्पदसमूहः एकं यजुः । कियताचोच्यते, यावता

क्रियाया उपकारः प्रकाश्यते, तावद्वक्तव्यत्वात् वाक्यमित्युच्यते । तेनाभिधीयते—अर्थैकत्वादेकं वाक्यमिति । एतस्माच्चेत्कारणात् एकवाक्यता भवति तस्मादेकार्थः पदसमूहो वाक्यं। यदि च विभज्य-मानं साकाङ्क्षं पदं भवति ; किमुदाहरणं, 'देवस्य त्वा सवितुः प्रसवे' इति"—इत्यादि ॥ एतत्सूत्रभाष्यपर्यालोचनयैव एक-वाक्यतापरिष्कारः कृत इति मन्तव्यम् ॥

१. ११. 'इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः', 'फलमतउपपत्तेः', 'फलसम्भिभत्सया कर्मभिरात्मानं पिप्रीषन्ति, सप्रीतोऽलं फलाय' इत्यादिश्रुतिसूत्रद्रमिडभाष्यादिकं हृदि निधाय **कर्माराध्यः कः** इत्युक्तम् ॥

'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति । यज्ञेन दानेन तपसा ऽनाशकेन' इत्यादिश्रुतिमभिसन्धायाह—**कर्माङ्गकं किमित्याका-रिकाया** इति ॥

१. १८. **मीमांसापूर्वोत्तरभागयोरित्यादि** ॥ 'चतुर्होतारो यत्र सम्पदं गच्छन्ति देवैः', 'भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरं', इत्यादि-प्रमाणपर्यालोचनायां ब्रह्मणि तात्पर्यं सिध्यतीति भावः ॥

२. ७. पूर्वोत्तरमीमांसयोर्निरुक्तैकशास्त्र्ये प्रमाणाभावमाशङ्कते—**नन्वित्यादिना** ॥

२. १३. अनुमानप्रमाणेन तत्सिध्यतीति समाधत्ते—**नेत्यादिना** ॥

२. २२. निरुक्तानुमानं भगवद्बोधायनानुमतमित्याह—**सूचितं चेदमित्यादिना** ॥ तत्सूचकं वृत्तिग्रन्थमुदाहरति—**संहितमेत-च्छारीरकमित्यादिना** ॥

३. १. **शारीरकं**—ब्रह्ममीमांसा, "जगच्छरीरः परमात्मा शारीरः, 'तस्यैष एव शारीर आत्मा' इतिश्रुतेः ; तद्विषयं शास्त्रं शारीरक-

मित्युच्यते"—इति श्रुतप्रकाशिकोक्तेः ॥ **जैमिनीयेन**—जैमिनिप्रोक्तेन कर्मदेवताकाण्डद्वयघटितेन षोडशाध्यायात्मकेन शास्त्रेण ॥

ननु—जैमिनिप्रोक्तं षोडशलक्षणात्मकं शास्त्रमेवाप्रसिद्धं ; द्वादशाध्यायात्मकाध्वरमीमांसाशास्त्रस्यैव तत्प्रणीतत्वेन प्रसिद्धेः तदुपरितनभागस्य देवताकाण्डस्य काशकृत्स्नप्रणीतत्वात्। अनुगृहीतं चाचार्यैः—"सङ्कर्षः काशकृत्स्नप्रभव इति कथं तत्त्वरत्नाकरोक्तिः"—इति। अतः षोडशलक्षणात्मकपूर्वभागस्य जैमिनिप्रणीतत्ववर्णनमाचार्यग्रन्थविरुद्धम् —**इति चेन्न** ॥ षोडशाध्यायात्मकं पूर्वमीमांसाशास्त्रं साकल्येन जैमिनिनैव प्रणीतम् । सङ्कर्षकाण्डस्य काशकृत्स्नः प्रवर्तकः ॥ तथा चानुगृहीतं **सारे**—

"कर्मणां च प्रकृतिविकृतिरूपाणां धर्मार्थकामरूपपुरुषार्थसाधनतानिश्चयः प्रभुत्वादार्त्विज्यमित्यन्तेन सूत्रकलापेन ससङ्कर्षेण कृतः"—इति ॥

वेदान्ताचार्यैरपि—

"वृत्तिग्रन्थे तु जैमिन्युपरचिततया षोडशाध्याय्युपात्ता
सङ्कर्षः काशकृत्स्नप्रभव इति कथं तत्त्वरत्नाकरोक्तिः ।
अत्र ब्रूमस्सदुक्तौ न वयमिह मुधा बाधितुं किं च नार्हाः
निर्वाहस्तूपचारात् क्वचिदिह घटते ह्येकतात्पर्ययोगः ॥"

—इति ॥

तस्मात् षोडशलक्षणस्य जैमिनिप्रणीतत्वोक्तिराचार्यानुमतैवेति न कोऽपि विरोधः—इत्यन्यत्र विस्तरः ॥

४. २०. **पूर्वभागप्रतिपाद्यार्थसङ्गतेत्यादि** ॥ सङ्गतिपदार्थश्चा-

चार्यैः श्रुतप्रकाशिकायामित्थमनुगृहीतः—

> "अत्रामी सङ्गतिविशेषा अभिप्रेताः—पाठक्रमः, चेतनानां त्रिवर्गे प्रथमप्रावण्यसम्भवरूपोर्थस्वभावः, औपनिषदेष्वङ्गाङ्गि-भावप्रतिपादकवाक्येषु यज्ञादिकर्मणः पदार्थत्वेन सम्बन्धः, कासु चिद्विद्यासु यज्ञतदुपकरणादीनां दृष्टिविशेषणत्वोक्तिः, कर्मब्रह्मविद्ययोः दृष्टान्तदार्ष्टान्तिकभावः, विद्याकर्मणोरुत्पाद्यो-त्पादकभावात्तच्छेषभूतविचारयोस्तत्क्रमभाक्त्वोपपत्तिः, व्या-ख्यानभूतमीमांसायां चोत्तरभागस्य पूर्वभागोक्तन्यायसा-पेक्षत्वं च॥" —इति ॥

९. १९. **अप्रामाण्यज्ञानास्कन्दितेति** ॥ मीमांसाख्यपरिकरं विना वेदान्तवाक्यश्रवणे कृते महावाक्यतात्पर्यनिर्णयाभावेन वेदान्तवाक्य-जन्यशाब्दबोधेऽप्रामाण्यशङ्का उदेतीति भावः । अनुगृहीतं च श्रुतप्रकाशिकायामाचार्यैः—

> "न हि वेदस्यापातप्रतीतिजनकत्वं स्वभावः, प्रमितिजनकत्वस्व-भावत्वात् ; मीमांसाख्यपरिकरशून्यस्य तदभावो न श्रुतेः प्रमितिजनकत्वस्वभावविरोधी ; यथा आलोकादिसहकारिविरहे रूपाद्यनुपलम्भः चक्षुरादीनां रूपादिसाक्षात्कारजनकत्वस्य स्वाभाविकत्वं न विहन्ति, तद्वत् ॥" —इति ॥

७. १. **यजेतेति विधिप्रत्ययेति** ॥ इदं च विधिप्रत्ययस्य श्रेयस्साधनत्वार्थकत्वमङ्गीकर्तॄणां मतमनुसृत्य ; सिद्धान्ते कृतिसाध्यता-मात्रस्य विध्यर्थत्वात् । तथा चानुगृहीतं श्रीभाष्ये—

> "अतो विधिवाक्येष्वपि धात्वर्थस्य कर्तृव्यापारसाध्यतामात्रं शब्दानुशासनसिद्धमेव लिङादेर्वाच्यमित्यध्यवसीयते" —
>
> —इति ॥

अत एव "श्रेयस्साधनताकत्वावच्छिन्ने शक्त्यङ्गीकारेऽपि" इति अपिनाऽभ्युपगमवादस्सूचितः ॥

८. ६. **उक्तं समाम्नायेति** ॥ इदं च सूत्रं पूर्वमीमांसायां प्रथमाध्याये चतुर्थपादे पठ्यते ॥

८. ९. **अल्पश्रुतेरित्यादि** ॥ इदं च सूत्रं ब्रह्ममीमांसायां प्रथमाध्याये तृतीयपादे पठ्यते ॥

८. १२. पूर्वोत्तरमीमांसयोर्विभिन्नकर्तृकत्वात् परस्परविरुद्धार्थप्रतिपादकत्वाच्च उक्तहेतुना ऐकशास्त्र्यं न सिध्यतीति शङ्कते—**यत्त्विति** ॥

८. १९. यत्र कर्तृभेदः तत्र एकग्रन्थत्वाभाव इति नियमस्य कादम्बर्यादौ व्यभिचारान्नोक्तदोषप्रसक्तिरिति समाधत्ते—**तत्र चिन्त्यत इत्यादिना** ॥

९. २०. **प्राचां ग्रन्थेष्विति** ॥ श्रुतप्रकाशिकाशतदूषण्यादावित्यर्थः। तत्र कथं विरोधपरिहारः कृत इति चेत्तत्प्रकारश्चेत्थं **श्रुतप्रकाशिकायामन्वग्राहि**—"देवतानिराकरणे न तात्पर्यं, अश्रुतवेदान्तानां कर्मण्यश्रद्धानिवारणाय कर्मप्राधान्यपरत्वात्तस्य। न हि निन्दा निन्द्यं निन्दितुं प्रवर्तते, अपि तु निन्दितादितरत्प्रशंसितुमिति हि न्यायविदः॥" —इति ॥

> **शतदूषण्यामपि**—"देवताकाण्डश्च कर्मकाण्डशेषतया भाष्यकारैः परिगृहीतः। तदुक्तं सङ्कर्ष इति तत्रत्यसूत्राणि चोदाहरन्ति—तस्य च काण्डस्योपसंहारे अन्ते 'हरौ तद्दर्शनात्' इति देवताकाष्ठां प्रदर्श्य, 'स विष्णुराह हि' इति सर्वदेवताराधनानां तत्पर्यवसानाय तस्य सर्वात्मत्वेन व्याप्तिं प्रतिपाद्य, 'तं ब्रह्मेत्याचक्षते तं ब्रह्मेत्याचक्षते' इति तस्यैव वेदान्तवेद्य-

परब्रह्मत्वोपक्षेपणोपसंहारात् सामान्यतो विशेषतश्चेश्वरः प्रस्तुत इति तत्त्वविदां सम्प्रदायः ॥" —इति ॥

विस्तरस्तु तत्रैव द्रष्टव्यः ॥

९. २४. अथ 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः', 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति', 'विद्यां चाविद्यां च यस्तद्वेदोभयं सः, अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते', 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्', 'सहकारित्वेन च',

'इयाज सोऽपि सुबहून् यज्ञान् ज्ञानव्यपाश्रयः ।'
'वर्णाश्रमाचारवता पुरुषेण परः पुमान् ।
विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः ॥'

'उभयपरिकर्मितस्वान्तस्यैकान्तिकात्यन्तिकभक्तियोगैकलभ्यः'--इत्यादि प्रमाणैः विद्यायाः कर्माङ्गकत्वप्रतिपादनात् अङ्गप्रतिपादकशास्त्रस्याङ्गिबोधकशास्त्रेणैकवाक्यत्वं स्वरससिद्धमित्यभिप्रायेण पुनरपि कर्मब्रह्ममीमांसयोरैकशास्त्र्यं प्रतिपादयति—**किञ्चेत्यादिना** ॥

१०. ६. **ननु**–'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इति श्रुत्या यज्ञादिकर्मणां न वेदनसाधनत्वं प्रतीयते, किन्तु विविदिषासाधनत्वमेव । विविदिषासाधनत्वं च—अन्तःकरणनैर्मल्यद्वारेण । अनुगृहीतं च जिज्ञासाधिकरणभाष्ये—

"श्रुत्यक्षरपर्यालोचनया चान्तःकरणनैर्मल्यद्वारेण विविदिषोत्पत्तावुपयुज्यते" —इति ।

तथा च–यज्ञादीनां वेदनसाधनत्वं दुरुपपादम् । किञ्च यज्ञेनेत्यादितृतीयार्थकरणत्वस्य गगनं दिदृक्षत इत्यादौ द्वितीयार्थकर्मत्वादेरिव इच्छायामेवान्वयाङ्गीकारेण यज्ञादिकरणकत्वप्रकारकेच्छाया एव

प्रतीत्या विद्याकर्मणोरङ्गाङ्गिभावेनेयं श्रुतिः प्रमाणं भवितुमर्हति– **इत्यभिप्रायेण शङ्कते—यद्यपीति** ॥

१०. १०. 'असिना जिघांसति', 'अश्वेन जिगमिषति' इत्यादाविव धात्वर्थे तृतीयार्थकरणत्वान्वयसम्भवेन 'सर्वापेक्षाच यज्ञादिश्रुतेरश्ववत्' सहकारित्वेन च–'एवं रूपाया ध्रुवानुस्मृतेस्साधनानि यज्ञादीनि कर्माणि' इति सूत्रभाष्यस्वारस्येन च विद्याकर्मणोरङ्गाङ्गिभावस्स·म्भवतीति समाधत्ते—**तथाऽपीत्यादिना** ॥

ननु–विविदिषासिद्ध्यर्थमेव कर्मानुष्ठानमस्तु, जातायां विविदिषायां शमादिभिरेव वेदनोत्पत्तिसम्भवात् ; तथा च कर्मणामिच्छासाधनत्वाङ्गीकारे न काऽप्यनुपपत्तिः–इति चेत् ॥ **अत्र श्रुतप्रकाशिकाकृतः**–

"तथा हि–सर्वेषां पुरुषाणां अवान्तरसाध्योपाये प्रवृत्तिः परमसाध्येच्छया विना नोपपद्यते । यथा यागाद्युपायभूतद्रव्यार्जनादो प्रवृत्तिर्यागादिसाध्यापूर्वादिविषयेच्छया विना नोपपद्यते, तथा इच्छासिद्ध्यर्थमनुष्ठानमिच्छासम्पाद्यवेदनेच्छया विना नोपपद्यते । अतो वेदनेच्छायां जातायां वेदनोपायभूतेच्छासिद्ध्यर्थमनुष्ठानं ; तस्यां जातायां च तदर्थमनुष्ठानमनपेक्षितमिति तदनुष्ठानविधिवैयर्थ्यं स्यात् । किं च स्वसिद्धिसापेक्षा स्वसिद्धिरिति आत्माश्रयः ; वेदनेच्छया इच्छासिद्ध्यर्थकर्मानुष्ठानं, इच्छासिद्ध्यर्थकर्मानुष्ठानाद्वेदनेच्छासिद्धिरिति अन्योन्याश्रयणं वा । अतो विविदिषासाधनत्वं कर्मणां न युक्तम्"— **इति समादधिरे** ॥

विस्तरस्तु शतदूषणीप्रभृतिषु द्रष्टव्यः ॥

१०.१९. ननु—विद्याकर्मणोरङ्गाङ्गिभावाङ्गीकारप्रयासो विफलः, प्रपञ्चस्य ब्रह्मण्यध्यस्तत्वेनाध्यस्तनिवृत्तिं प्रति अधिष्ठानसाक्षात्कारत्वेन हेतुतायाश्शुक्तिरूप्यादिस्थले सम्प्रतिपन्नत्वेन तन्न्यायेन अत्रा-

प्यधिष्ठानभूतब्रह्मसाक्षात्कारेणैव प्रपञ्चनिवृत्तिसम्भवात् तत्र कर्म
मुपयोगे मानाभाव इति शङ्कते—**नन्विति** ॥

१०. १९. जगन्मिथ्यात्ववादस्य **न्यायभास्करादिग्रन्थेषु** बहु
दूषितत्वेन तदसिद्ध्या ब्रह्मसाक्षात्कारमात्रेण न तन्निवृत्तिस्सम्भवत
समाधत्ते—**नेत्यादिना** ॥

१०. २३. शाब्दापरोक्षवादिनां मतेऽपि विचारानुपपत्ति
स्तीत्याह—**अत्र वदन्तीत्यादिना** ॥

१३. १३. **सिद्धान्ते त्वित्यादि** ॥ निर्विकल्पकसविकल्पक
निष्कृष्टं लक्षणमाह—संस्काराजन्यत्वे सतीत्यादिना । तथा चानुगृह
जिज्ञासाधिकरणभाष्ये—"निर्विकल्पकं नाम—केन चिद्विशेषेण वि
क्तस्य ग्रहणं, न सर्वविशेषरहितस्य ; तथाभूतस्य कदाचिदपि ग्रह
दर्शनात्, अनुपपत्तेश्च। केनचिद्विशेषेणेदमित्थमिति हि सर्वा प्रतीतिर
जायते" —इति ॥

अत्र श्रुतप्रकाशिका— "अनेन संस्कारसचिवग्रहणं सविकल्प
इतरत् निर्विकल्पकमिति सिद्धम् ।" —इति ॥

एतद्भाष्यश्रुतप्रकाशिकापर्यालोचनालब्धमेतल्लक्षणमिति मन्तव्य

१९. १६. ननु—ब्रह्मविचारात्पूर्वं सत्यज्ञानादिवाक्य
निर्विकल्पकं संशयात्मकं ज्ञानं जायते। तच्च ज्ञानं नाविद्यानिवर्तक
विचारानन्तरं जायमानन्तु ज्ञानं निश्चयात्मकं, तदेवाविद्यानिवर्त
तथाविधज्ञानार्थमेव विचार आवश्यक इति वदतो ब्रह्मानन्दस्य म
मुपन्यस्यति—**यदप्युक्तं ब्रह्मानन्देनेत्यादिना** ॥

१८. १. अथ विचारात्पूर्वं तत्त्वमस्यादिवाक्यस्य अहं ब्र
त्याकारकब्रह्माभेदबोधजनकत्वं न सम्भवति ; तज्ज्ञानप्रतिबन्धक
नाहं ब्रह्मेति ज्ञानस्य तज्जन्यसंस्कारस्य वा सत्त्वात् संस्कारसाधार

रूपेण प्रतिबन्धकत्वाङ्गीकारे तादृशाभेदज्ञानानुदयात् । इत्थं च निदिध्यासनेन भेदवासनानिरासे तत्त्वमस्यादिवाक्यमभेदबुद्धिं जनयतीति निदिध्यासनप्रवृत्त्युपयोगितया विचारस्य सार्थक्यं वदतां मतमाह—**यदपि मतान्तरमित्यादिना** ॥

१८. २२. संस्कारसाधारण्येन प्रतिबन्धकत्वमङ्गीकर्तुं न शक्यते, इच्छादिव्यावृत्तये प्रतिबन्धकतावच्छेदककोटौ ज्ञानत्वनिवेशावश्यकत्वात्—इत्यादिना तन्मतं दूषयति—**इदञ्च मतमसदित्यादिना** ॥

१९. ८. केवलवाक्यजन्यज्ञानस्याविद्यानिवर्तकत्वासम्भवेन कर्माङ्गकोपासनात्मकज्ञानस्यैव मोक्षहेतुतायाः स्वीकरणीयतया कर्मब्रह्मभागयोरैकशास्त्र्यं सिध्यत्येवेति स्वसिद्धान्तं निगमयति—**तस्मादुक्तरीत्येत्यादिना** ॥

इदमैकशास्त्र्यं सूत्रकारानुमतमेव; धर्मजिज्ञासासूत्रस्य पूर्वोत्तरभागसाधारणप्रतिज्ञारूपत्वात् । तथा चानुगृहीतं **श्रुतप्रकाशिकायां**—

“अथवा अथातो धर्मजिज्ञासेत्येव साधारणी प्रतिज्ञा ; अलौकिकश्रेयस्साधनं हि धर्मः, तदनुयायि प्रतिपाद्यम् । धर्मश्च साध्यसिद्धभेदेन द्विविधः । सिद्धरूपे वस्तुनि धर्मशब्दप्रयोगो **महाभारते** दृष्टः ; यथा—

‘ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः ।
ते वदन्ति महात्मानं कृष्णं धर्मं सनातनम् ॥’ —इति ॥

तथा--अभियुक्तैश्च अलौकिकत्वे सति श्रेयस्साधनत्वं धर्मशब्दप्रवृत्तिनिमित्तं मन्वानैः सिद्धरूपेऽर्थे धर्मशब्दः प्रयुक्तः—

‘द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते ।
तेषामैन्द्रियकत्वेऽपि न ताद्रूप्येण धर्मता ॥’—इत्यादौ ॥

तत्र द्रव्यादिसद्भावेऽपि क्रियाप्राधान्यात् साध्यधर्मपरः पूर्वभागः। उपासनतदङ्गसद्भावेऽपि ब्रह्मप्रधानत्वात् सिद्धधर्मपरः ऊर्ध्वभागः ॥ अत उभयभागविचारसाधारणी प्रथमप्रतिज्ञा । तत्र धर्मशब्दस्य साध्यधर्मविषयतया प्रसिद्धिप्राचुर्येण बुद्धिस्थत्वात् पूर्वभागप्रतिपन्नत्वेन प्राथम्यात् धर्मजिज्ञासापदेनैव तन्त्रेण वाऽर्थतो वा प्रतिज्ञातत्वोपपत्तेश्च तल्लक्षणमुक्तं चोदनासूत्रे । सिद्धरूपधर्मविशेषस्य च साधारणप्रतिज्ञयैवार्थतः प्रतिज्ञातत्वेऽपि तस्य बहुग्रन्थव्यवधानाच्छब्दाबोध्यत्वशङ्कापरिजिहीर्षया च पुनः प्रतिज्ञा कृता । तस्य लक्षणमुक्तं जन्मादिसूत्र इति युक्तमैकशास्त्र्यम् "—इति ॥

१९. ११. अतः पूर्वोत्तरभागयोरैकशास्त्र्ये न किञ्चिद्बाधकमित्यभिप्रायेणाह--दिगिति ॥

॥ श्रीः ॥

॥ श्रीः ॥

मोक्षकारणतावादः

श्रीमन्महीशूरमहाराजाधिराजमहास्थानसभाभूषणैः
शेषार्यवंशमुक्ताफलैः श्रीयादवाद्रिनिवासरसिकैः
पण्डितमण्डलीसार्वभौमैः
विरचितः ।

विद्वद्वरैः परिशोध्य

म. अ. अनन्तार्येण
प्र. भ. तो. नरसिंहार्येण च
कल्याणपुर–विचारदर्पण–मुद्राक्षरशालायामङ्कयित्वा
प्राकाश्यं नीतः

१८९९.

मूल्यं रू. ०—२—६

॥ श्रीः ॥

श्रीमते रामानुजाय नमः ॥

मुक्तिप्रदं मुररिपुं मुनिबृन्दवन्द्यम्
मोहच्छिदं यतिपतिं च मुदाऽभिवन्द्य ।
श्रीमाननन्तगुरुरुज्वलयुक्तियुक्तं
मोक्षैकहेतुविषयं तनुते विचारम् ॥

इह तावन्मोक्षस्य मुख्यसाधनं विचार्यते ॥ मोक्षो नाम—स्वसामानाधिकरण्यस्वसमानकालीनत्वोभयसम्बन्धेन कर्मप्रागभावविशिष्टान्यः उक्तोभयसम्बन्धेन कर्मविशिष्टान्यो वा यः कर्मध्वंसः स्वसामानाधिकरण्यस्वोत्तरत्वोभयसम्बन्धेन तद्विशिष्टानन्दः । केवलानन्दस्योक्तसम्बन्धेन केवलकर्मध्वंसविशिष्टानन्दस्य च बद्धदशायामपि सत्त्वात्तदानीं मोक्षव्यवहारवारणाय कर्मप्रागभावविशिष्टान्यत्वं ध्वंसविशेषणम् ॥

उक्तं च—'अत्ता चराचरग्रहणात्' इत्यधिकरणभाष्ये—

"अत्यन्तनिष्णातास्तु—निखिलजगदेककारणस्याशेषहेयप्रत्यनीकानन्तज्ञानानन्दैकस्वरूपस्य स्वाभाविकानवधिकातिशयासङ्ख्येयकल्याणगुणाकरस्य सकलेतरविलक्षणस्य सर्वात्मभूतस्य परस्य ब्रह्मणश्शरीरतया प्रकारभूतस्यानुकूलापरिच्छिन्नज्ञानस्वरूपस्य परमात्मानुभवैकरसस्य जीवस्यानादिकर्मरूपाविद्यातिरोहितस्वरूपस्याविद्योच्छेदपूर्वकस्वाभाविकपरमात्मानुभवमेव मोक्षमाचक्षते ॥" —इति ॥

अयमर्थः—

निखिलजगदेककारणस्य—कार्यत्वावच्छिन्नकार्यतानिरूपितकारणताश्रयस्य; एकत्वं च—मुख्यत्वं, स्वसत्ताकालीनकारणान्तरविरहप्रयुक्ताभावप्रतियोगिकार्यकभिन्नत्वं, स्वसत्ता च— स्वनिरूपितकारणतावच्छेदकसम्बन्धावच्छिन्नाधिकरणतारूपा ग्राह्या, तेनेश्वरसत्ताकाले कारणान्तराविरहेण घटाद्यनुत्पत्तावपि न क्षतिः; ईश्वरस्य कालिकसम्बन्धेन कार्यं प्रति तत्तत्कार्यविषयकस्वीयसङ्कल्पसम्बन्धेन कारणत्वात्तेन सम्बन्धेनेश्वरसत्तादशायां तत्कार्यविरहस्यासिद्धेः। अशेषेति—हेयगुणत्वावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदवत्त्वे सति ध्वंसप्रागभावाप्रतियोगित्वे सति ज्ञानानन्दाभिन्नस्येत्यर्थः। हेयत्वं च—पापफलानुभवोद्देश्यकसृष्टिविषयत्वं कटुरसादिरूपाचेतनधर्मदुःखादिरूपचेतनधर्मोभयसाधारणम्। स्वाभाविकेति; स्वाभाविकाः अनवधिकातिशयाः असङ्ख्येयाश्च ये कल्याणगुणाः तेषामाकरस्य, अपृथक्सिद्धिसम्बन्धेनाधारस्येत्यर्थः; स्वाभाविकत्वं च—स्वाश्रयाधिकरणकालत्वव्यापकस्वनिरूपिताधिकरणताकत्वं, ध्वंसप्रागभावाप्रतियोगित्वपर्यवसितम्। अनवधिकातिशयत्वं च ज्ञानस्य—स्वाविषयीकृतपदार्थविषयकस्वाभिन्नज्ञानकं यत्स्वं तदन्यत्वम्। एवमिच्छादेरपि वाच्यम्; सामान्यतो निर्वक्तव्यत्वे तु स्वाप्रयोज्यस्वासाधारणकार्यप्रयोजकस्वभिन्नगुणकं यत्स्वं तदन्यत्वम्। स्वप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धावच्छिन्नसङ्ख्यासामान्याभाववदाधेयतावच्छेदकधर्मावच्छिन्नत्वमसङ्ख्येयत्वं; स्वपदं सङ्ख्यापरं, प्रमेयत्वावच्छेदेन कस्याश्चिदपि सङ्ख्याप्रतियोगिकपर्याप्तेरभावेन तादृशप्रमेयत्वादिकमादाय परिमितगुणानामसङ्ख्येयत्ववारणाय आधेयतावच्छेदकत्वं धर्मविशेषणं, किञ्चिन्निरूपिताधेयत्वानतिरिक्तवृत्तित्वं तदर्थः; पुरुषार्थप्रयो-

(१) स्वाप्रयोज्येति गुणविशेषणम्।

जकत्वं, कल्याणगुणत्वम्। अपरिच्छिन्नेति; सर्वमूर्तद्रव्यसंयुक्त-
ज्ञानापृथक्सिद्धस्येत्यर्थः; अपरिच्छिन्नत्वं, च-सर्वमूर्तद्रव्यसंयुक्तताव-
च्छेदकोभयावृत्तिधर्मवत्त्वं; तेन बद्धदशायामपि न दोषः। अना-
दीत्यादि; अनादिकर्माभिन्नं यदविद्यापदवाच्यं तत्तिरोहितस्वरूप-
स्येत्यर्थः; कर्मण्यनादित्वं च-प्रागभावाप्रतियोगित्वं, केषां चित् कर्मणां
प्रागभावाप्रतियोगित्वानङ्गीकारेऽपि परमात्मसाक्षात्कारत्वरूपावस्था-
प्रतिबन्धककर्मण एवात्र कर्मपदेन विवक्षितत्वात्तस्य प्रागभावप्रति-
योगित्वानङ्गीकारात्। यदि च-ध्वंसप्रतियोगित्वव्यापकं प्रागभाव-
प्रतियोगित्वमिति तादृशकर्मणः प्रागभावप्रतियोगित्वं दुर्वारम्-इत्यु-
च्यते; तदा स्वसामानाधिकरण्यस्वसमानकालीनत्वोभयसम्बन्धेन कर्मा-
त्यन्ताभावविशिष्टप्रागभावाप्रतियोगित्वरूपं प्रवाहतोऽनादित्वमेवानादि-
पदेन विवक्षितं, कर्मप्रागभावाधिकरणात्मनि तत्कालावच्छेदेन कर्मान्त-
रसत्त्वेन तदत्यन्ताभावविशिष्टप्रागभावो घटादिप्रागभाव एव; तदप्रति-
योगित्वं च कर्मण्यक्षतम्। सर्वसाधारणं प्रवाहतोऽनादित्वं च-
स्वाश्रयप्रतियोगिकध्वंसव्यापकस्वाश्रयप्रतियोगिकप्रागभावकधर्मकत्वं;
रामत्वाश्रयतत्तत्कल्पगतव्यक्तिप्रतियोगिकप्रागभावस्य पूर्वपूर्वकल्प-
गतरामत्वाश्रयव्यक्तिप्रतियोगिकध्वंससहचरत्वाद्रामत्वेन रूपेण रामा-
वताराणां प्रवाहतोऽनादित्वोपपत्तिः। प्रमेयत्वद्रव्यत्वादिना सर्वेषां
प्रवाहतोऽनादित्वमिष्टमेव; तादृशकर्मणा तिरोहितस्वरूपत्वं च-
तत्प्रयुक्तानुत्पादप्रतियोगिपरमात्मसाक्षात्कारवत्त्वं; अविद्यायाः-
कर्मणः, उच्छेदः-उत्कृष्टध्वंसः, ध्वंसे उत्कर्षश्च-निरुक्तोभयसम्ब-
न्धेन कर्मप्रागभावविशिष्टान्यत्वं कर्मविशिष्टान्यत्वमेव वा। तादृश-
ध्वंसपूर्वकत्वं च-स्वसामानाधिकरण्यस्वोत्तरत्वोभयसम्बन्धेन तादृश-
ध्वंसविशिष्टत्वम्। परमात्मानुभवरूपानन्दे स्वाभाविकत्वं च-न
तावन्नित्यत्वं, बाधात्; किं तु-प्रतिबन्धकाभावातिरिक्तकारणनिर-

पेक्षत्वं, मेघापगमे स्वाभाविकस्सूर्यप्रकाशप्रसर इत्यादौ स्वाभाविक-पदेन प्रतिबन्धकाभावातिरिक्तकारणनिरपेक्षत्वबोधनात्; तच्च प्रति-बन्धकाभावाधिकरणात्मनि तत्कालावच्छेदेन विद्यमानाभावाप्रति-योगित्वं, तेन तादृशानन्दे उपासनादेः प्रतिबन्धकाभावातिरिक्तस्य हेतुत्वेऽपि न क्षतिः। परमात्मानुभवपदेन आनन्दो विवक्षितः, तादृ-शकर्मध्वंसविशिष्टपरमात्मानुभवस्यैव मोक्षत्वे 'स यदि पितृलोककामो भवति'[1] इत्यादिश्रुतिसिद्धपित्राद्यनुभवस्य मोक्षत्वानुपपत्तिरिति तादृश-कर्मध्वंसविशिष्टानन्द एव तथाऽभ्युपगतः। मोक्षमाचक्षते—मोक्षपद-वाच्यं वदन्ति ॥ —इत्यर्थः ॥

यत्तु—अविद्यानिवृत्तिरेव मोक्ष इत्यभ्युपगम्यते—इति जिज्ञासाधि-करणभाष्यम्, तदपि विशेषणतया अविद्यानिवृत्तेर्मोक्षपदवाच्यतापरं; न तु विशेष्यतया तत्पदवाच्यतापरमिति न विरोधः। तथा च—तादृशकर्मध्वंसविशिष्टानन्दवानेव मुक्तपदार्थः ॥

यद्यपि—गत इत्यादौ गमनस्येव मुक्त इत्यादौ मोक्षस्यातीतत्वं प्रतीयते; तथाऽपि—अविद्याध्वंसविशिष्टानन्दस्य मुक्तिपदार्थतया तद्घटकोत्पत्तिमदभावरूपध्वंसपदार्थैकदेशोत्पत्तौ तस्यान्वयसम्भवान्न दोषः ॥ यदि च—कदाचिदप्यविद्यासम्बन्धशून्ये परब्रह्मणि लक्ष्म्यादौ च नित्यमुक्तत्वव्यवहारः प्रामाणिकः, तदा—शुद्धसत्त्वदेशानवच्छिन्न-त्वावच्छिन्नत्वोभयाभाववदानन्द एव मुक्तिपदार्थः; मुक्तस्यान्यत्र सञ्चारकालेऽपि जायमान आनन्दश्शुद्धसत्त्वमयदेहरूपदेशावच्छिन्न एव। मुक्तादिगतानवच्छिन्नसुखस्यापि सङ्ग्रहायोभयाभावनिवेशः। अथ कल्पे मुक्त इत्यादौ क्तप्रत्ययार्थातीतत्वस्य अन्वयायोग्यत्वाद-विवक्षैवेति ध्येयम्। निरुक्तमोक्षं प्रति कारणं च ध्यानरूपो ज्ञान-विशेषः; '[2]ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः

(१) छा. उ. —८. २. १. (२) कैवल्य. उ.

परस्तात्' इत्यादिश्रुत्या देशविशेषावच्छिन्नभगवदनुभवरूपानन्दं प्रति ध्यानस्य कारणताबोधनात्। अत्र—यद्यपि ध्यानमुक्त्योः पूर्वोत्तरकालीनत्वमात्रं प्रतीयते, न तु हेतुहेतुमद्भावः; तथाऽपि सिद्धसाध्यसमभिव्याहारस्थले यस्य यदपेक्षया प्राक्कालीनत्वरूपसिद्धत्वं प्रतीयते, असति बाधके तस्य तद्धेतुत्वं; यस्य यदपेक्षयोत्तरकालोत्पत्तिकत्वं यत्समानकालीनप्रागभावप्रतियोगित्वरूपं साध्यत्वं प्रतीयते, तस्य तद्धेतुकत्वं प्रतीयत इति व्युत्पत्तेः; पक्त्वा भुङ्क्ते, पास्यसि पीत्वा तृष्णा शाम्यति—इत्यादितः पाकभोजनपाथःपानतृष्णाशान्त्याद्योः पौर्वापर्यवन्मिथो हेतुहेतुमद्भावस्यापि लाभात्। उत्तरकालीनत्वमात्रशक्तस्यापि त्वाप्रत्ययस्य जन्यत्वे लक्षणाङ्गीकाराच्च ध्यानहेतुकत्वस्य मुक्तौ लाभः। वस्तुतस्सिद्धान्ते पदजन्यपदार्थोपस्थितिविषयस्येव अर्थापत्तिविषयस्यापि शाब्दबोधे भानाङ्गीकारादसति बाधके सिद्धसाध्यसमभिव्याहारेणाभिधानं हेतुहेतुमद्भावपरत्वं विनाऽनुपपन्नमित्यर्थापत्तिवशादेव कार्यकारणभावलाभः। एवमेव भूतयोनिपदसमभिव्याहृतगमिधात्वर्थभगवत्साक्षात्काररूपानन्दे तमसः परस्तादित्यनेन देशविशेषावच्छिन्नत्वमात्रबोधेऽपि देशविशेषावच्छिन्नत्वस्य देशविशेषानवच्छिन्नत्वावच्छिन्नत्वोभयाभावव्याप्यतया अर्थापत्तिवशादेव निरुक्तोभयाभाववदानन्दस्वरूपमुक्तित्वलाभः। उक्तरीत्यैव च—

"ज्ञात्वा देवं मुच्यते सर्वपाशैः"

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥"—

इत्यादौ कार्यकारणभावबोधनिर्वाहः। परावरे तस्मिन् दृष्टे अस्य कर्माणि क्षीयन्त इति योजनावशादनेन दर्शनविषयाभिन्नस्वभिन्नत्व-

(१) श्वेताश्वतर १. ८. (२) मु उ—२. २. ८.

व्यापकापकर्षावच्छिन्नभगवद्दर्शनोत्तरकालीनत्वस्य कर्मक्षये प्रतीतेः। परेऽवरा यस्मादिति व्युत्पत्तिलभ्यस्य स्वभिन्नत्वव्यापकापकर्षावधित्व-विशिष्टस्य परावरपदार्थस्याभेदेन तत्पदार्थे तत्पदार्थस्य सप्तम्यर्थे दर्शने दर्शनस्योत्तरकालीनत्वसम्बन्धेन कर्मक्षयेऽन्वयेनोक्तार्थलाभात्। 'ब्रह्मविदाप्नोति परं' 'ज्ञात्वा देवं' इत्यादिश्रुतिघटकयोर्ज्ञानत्वरूप-सामान्यधर्मावच्छिन्नवाचकयोरपि पदयोर्ध्यानत्वरूपविशेषधर्मावच्छिन्न-बोधकत्वं लक्षणया ज्ञानस्य मोक्षकारणत्वं ध्यानत्वं विनाऽनुपपन्न-मित्यर्थापत्त्या वा सम्भवति। यथा—'अग्नीषोमीयं पशुमालभेत'—इति श्रुतिघटकस्य सामान्यवाचिनः पशुशब्दस्य छागस्य वपायामेदस इति मन्त्रवर्णश्रुतच्छागत्वरूपविशेषधर्मावच्छिन्नबोधकत्वं लक्षणयाऽर्था-पत्त्या वा भवतीति छागो वा मन्त्रवर्णादिति न्यायसिद्धम्। ब्रह्मवि-दाप्नोति परमित्यादावुद्देश्यतावच्छेदकविधेययोस्संसर्गतया कार्यकारण-भावभानस्य धनवान् सुखीत्यादाविव क्लृप्तत्वात् तादृशश्रुतेरपि मोक्ष-कारणताबोधकत्वमव्याहतम्। अत्र यद्यपि ब्रह्मप्राप्तिरूपानन्द एव प्रतीयते, न तु कर्मप्रागभावविशिष्टान्यकर्मध्वंसविशिष्टत्वं निरुक्तो-भयाभाववत्त्वं वा; तथाऽपि प्राप्नोतीत्यस्य उक्तध्वंसादिविशिष्टानन्दे लक्षणास्वीकारान्मोक्षबोधोपपत्तिः। एतदभिप्रेत्यैव जिज्ञासाधिकरण-भाष्ये 'इदं वाक्यं ब्रह्मज्ञानस्याक्षयफलत्वं दर्शयति'—इत्युक्तम्। ध्यानत्वं च स्वसमानविषयकत्वस्वाव्यवहितोत्तरत्वस्वसामानाधिकरण्यै-तत्त्रितयसम्बन्धेन स्मृतिविशिष्टस्मृतिविशिष्टस्मृतित्वं, समानाकारस्मृति-व्यक्तित्रितयसद्भावे ध्यायतीति व्यवहारात्। मोक्षजनकतावच्छे-दककोटौ च दर्शनसमानाकारत्वमपि निवेश्यं; तस्मिन् दृष्टे परावरे, आत्मा वाऽरे द्रष्टव्यश्श्रोतव्यो मन्तव्यो निदिध्यासितव्यः—इत्यादिभि-र्दर्शनसमानाकारध्यानस्य मोक्षकारणताबोधनात्। दर्शनसमाना-कारत्वं च साक्षात्करोमीत्यादिप्रतीतिनियामकलौकिकविषयतावत्त्वं,

अनवरतभावनायां हि ध्यानस्यापि लौकिकविषयतादृत्त्वं सम्भवति। 'वृक्षे वृक्षे च पश्यामि चीरकृष्णाजिनाम्बरम्' इत्यादौ तद्दर्शनात्॥

न च—ईश्वरस्य रूपरहितत्वेन चाक्षुषलौकिकप्रत्यक्षविषयत्वासम्भवेऽपि मानसप्रत्यक्षं भवति ज्ञानप्रत्यासत्तेस्सत्त्वादिति तदेवात्र मोक्षकारणत्वेन विवक्षितमिति—वाच्यम्; ज्ञानप्रत्यासत्तिघटितप्रत्यक्षसामग्र्यपेक्षया तदघटितज्ञानसामग्रीमात्रस्य प्रबलत्वेन निदिध्यासनकाले स्मृतिसामग्रीसत्त्वनैयत्येन निदिध्यासनानन्तरमुपनीतप्रत्यक्षासम्भवात्, अन्यथा स्मृतिसन्तानात्मकध्यानस्यैवानुपपत्ते.; द्वितीयादिज्ञानानामुपनीतसाक्षात्कारत्वापातात्; अनुमितिशाब्दज्ञानादिस्थलेऽपि तत्प्रसङ्गश्च। प्रत्यभिज्ञायां तु समानविशेष्यकलौकिकप्रत्यक्षसामग्र्या प्रतिबन्धात् स्मृतिसामग्री नेति ज्ञानप्रत्यासत्तिघटितसामग्र्या तत्ताप्रत्यक्षमुपपद्यते॥

ननु—ध्यानं च तैलधारावदविच्छिन्नस्मृतिसन्तानरूपमिति जिज्ञासाधिकरणभाष्यानुरोधाद्दर्शनसमानाकारस्मृतेरेव मोक्षकारणत्वध्यानोपासनादिशब्दवाच्यत्वाङ्गीकारे परमात्मप्रकारकस्वात्मविशेष्यकानुसन्धानस्य स्वात्मांशे लौकिकप्रत्यक्षात्मकस्य ध्यानोपासनादिपदवाच्यत्वमोक्षकारणत्वाद्यनुपपत्तिः; ओमित्येतदक्षरमुद्गीथमुपासीतेत्यादिश्रुतिप्रतिपादितोद्गीथाद्युपासनानुपपत्तिश्च। न च—स्वात्मांशे उद्गीथाद्यंशे च संस्कारादिरूपस्मृतिसामग्रीसत्त्वात्स्मृतिस्सम्भवतीति नानुपपत्तिरिति—वाच्यम्; स्मृतिं प्रति लौकिकप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वेन स्मृतिसामग्रीसत्तादशायां स्वात्मादौ लौकिकप्रत्यक्षसामग्रीसत्त्वनियमेन स्मृत्यसम्भवात्; लौकिकप्रत्यक्षसामग्र्याः स्मृतिप्रतिबन्धकत्वानङ्गीकारे च प्रत्यभिज्ञाया अपि लोपापत्तिः, तस्याः पूर्वं स्मृतिसामग्रीसत्त्वानियमेन स्मृतेरेव सम्भवात्। न च—लौकिकप्रत्यक्षसामग्र्याः

(१) छा. उ—१. १. १.

प्रतिबन्धकत्वेऽपि स्मृतिर्मे जायतामितीच्छाया उत्तेजकत्वात्तादृशे- च्छावशात्स्वात्मादौ ध्यानोपपत्तिरिति—वाच्यम्; उक्तरीत्या प्रथम- द्वितीयस्मृत्युपपादनेऽपि तृतीयचतुर्थस्मृत्युपपादनासम्भवात्, इच्छा- योग्यताया उत्तेजकत्वेऽपि च षष्ठसप्तमस्मृत्युपपादनासम्भवात्। मध्ये इच्छान्तरस्वीकारे चाविच्छिन्नस्मृतिसन्तानत्वानुपपत्तिः, इच्छया व्यवधानात्—इति चेन्न॥ ज्ञानेच्छयोर्यौगपद्यस्वीकारेण स्मृत्युत्पत्ति- दशायामेवेच्छाया अप्युत्पत्त्या तृतीयादिस्मृतीनामव्यवधानरूपधारा- त्वस्य चोपपत्तेः॥

यद्वा—धारावाहिकप्रत्यक्षज्ञानस्थले तावत्पर्यन्तस्थायिन्येकैव प्रत्य- क्षव्यक्तिरितिवच्चिरकालस्थाय्येकैकस्मृतिव्यक्तेरेव ध्यानत्वाङ्गीकारान्ना- नुपपत्तिः; स्मृतिलौकिकप्रत्यक्षसाभग्र्योस्संवलनदशायामेकयैवेच्छया विरोधिज्ञानोत्पत्तिपर्यन्तस्थायिन्या एकस्या एव स्मृतिव्यक्तेर्धारात्मि- काया उत्पत्तिसम्भवात्। तथा चापृथक्सिद्धिसम्बन्धेन निरुक्तानन्द- रूपमोक्षं प्रति तत्तद्विद्याप्रतिपादितगुणनिष्ठविषयतानिरूपितब्रह्मनिष्ठ- साक्षात्कारत्वव्यञ्जकविषयताकध्यानस्यापृथक्सिद्धिसम्बन्धेन कारणत्वं ग्राह्यम्। अत्र यद्यपि मोक्षे वैजात्याभावेन सद्विद्यादहरविद्यादीनां परस्परव्यभिचारः, सद्विद्यां विनाऽपि दहरविद्यया तां विनाऽपि सद्विद्यया मोक्षस्य जायमानत्वात्; तथाऽपि तत्तदव्यवहितोत्तरमोक्षं प्रति तत्तद्विद्यानां कारणत्वान्न व्यभिचारः॥

ननु—सद्विद्यादहरविद्यादिरूपध्यानव्यक्तिष्वेकां शक्तिं स्वीकृत्य तादृशशक्तिमत्त्वेन मोक्षं प्रति कारणत्वमेकमेव कल्पयितुं युक्तं, प्रत्येककारणतापक्षेऽपि सद्विद्यादिष्वेकैकां शक्तिं स्वीकृत्य तस्या एव कारणतावच्छेदकत्वकल्पनस्यावश्यकत्वात्; अन्यथा तत्तद्विद्याप्रति- पन्नगुणनिष्ठविषयतानिरूपितब्रह्मनिष्ठविषयताशालिध्यानत्वेन कारणत्वं ब्रह्मनिष्ठविषयतानिरूपितगुणनिष्ठविषयतामादाय विनिगमनाविरहेण

कारणताबाहुल्यप्रसङ्गात् । एवं निरूप्यनिरूपकभावापन्नविषयताशालिध्यानत्वेन कारणत्वे तादृशध्यानाव्यवहितोत्तरमेव मोक्षापत्त्या शरीरपातपर्यन्तविलम्बानुपपत्तिः; शक्तिमत्त्वेन कारणत्वे च मोक्षजनकतावच्छेदिकायाश्शक्तेर्गत्यनन्तरकालीनामानवकरस्पर्शसमानकालीनध्यानव्यक्तिष्वेव स्वीकारान्न ततःपूर्वं मोक्षापत्तिः। सूचितं चेदं परं जैमिनिर्मुख्यत्वादित्यत्र श्रीभाष्ये—

> "यथा हि विद्योत्पत्तिर्वर्णाश्रमधर्मशौचाचारदेशकालाद्यपेक्षा तमेतंवेदानुवचनेनेति शास्त्रादवगम्यते; तथा निश्शेषाविद्यानिवर्तनरूपविद्यानिष्पत्तिरपि विशिष्टदेशगतिसापेक्षेति गतिशास्त्रादवगम्यते ॥" —इति ॥

अयमर्थः॥ स्वसामानाधिकरण्यस्वसमानकालीनत्वोभयसम्बन्धेन कर्मप्रागभावविशिष्टान्यकर्मध्वंस एव च निश्शेषाविद्यानिवृत्तिर्मोक्षघटकः, तज्जनकतावच्छेदकीभूतध्यानगतशक्तिर्देशविशेषसंयोगजन्येति गतिशास्त्रादवगम्यत इति। तथा चामानवकरस्पर्शाधिकरणकाले मोक्षजनकतावच्छेदकीभूतशक्तिविशेषविशिष्टध्यानादिघटितसामग्रीसम्पत्त्या तदुत्तरं मोक्षो जायते। तथा च न्यायसिद्धाञ्जने—

> "अमानवकरस्पर्शादारभ्य ह्यसौ मुक्तस्ततः पूर्वस्सर्वोऽप्युपायव्यापारः ॥" —इति ॥

जिज्ञासाधिकरणभाष्येऽपि—

> "तस्यैव वेदनस्य ध्यानरूपस्याहरहरनुष्ठीयमानस्याभ्यासाधेयातिशयस्याप्रयाणादनुवर्तमानस्य ब्रह्मप्राप्तिसाधनत्वात् ॥"—इति ॥

अभ्यासाधेयातिशयस्य—पूर्वपूर्वस्मृतिपरम्पराप्रयोज्यशक्तिविशेषविशिष्टस्येत्यर्थः। तथा च विद्याभेदेन शक्तिभेदस्य तदवच्छिन्नकारण-

ताभेदस्य च कल्पनापेक्षया सर्वविद्यास्वेकस्या एव शक्तेस्तदवच्छेदकैककारणताया एव च कल्पनमुचितम् ॥

—इति चेत् ॥

मैवं; विद्याभेदेन कारणताभेदानुपगमे विकल्पोऽविशिष्टफलत्वादित्यधिकरणविरोधः, सद्विद्यादहरविद्यादीनां मोक्षं प्रति दण्डचक्रादिन्यायेन तृणारणिमणिन्यायेन वा कारणत्वमिति विशये तासां तृणारणिमणिन्यायेनामिलितानामेव कार्योत्पादकत्वमिति सिद्धान्तस्य तदधिकरणसिद्धत्वात् ॥

सूत्रार्थस्तु । विद्यानां विकल्पः—एकविद्यावृत्तिमोक्षोत्पादप्रयोजकतावच्छेदकसमुदायत्वशून्यत्वे सति मोक्षोत्पादप्रयोजकतावच्छेदकसमुदायत्ववत्त्वमन्यविद्यानाम् । अत्र मोक्षप्रयोजकैकसामग्रीशरीरे विद्याद्वयस्यानिवेशेन निरुक्तविकल्प उपपद्यते । अविशिष्टफलत्वं च—एकविद्याविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकमोक्षकत्वम् । तथा च—दहरविद्या सद्विद्यावृत्तिमोक्षोत्पादप्रयोजकतावच्छेदकसमुदायत्वशून्यत्वे सति मोक्षोत्पादप्रयोजकतावच्छेदकसमुदायत्ववती, सद्विद्याविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकमोक्षकत्वात्; यत्र यद्धर्मावच्छिन्नविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकयद्धर्मावच्छिन्नकत्वं, तत्र तद्धर्मावच्छिन्ननिष्ठतद्धर्मावच्छिन्नोत्पादप्रयोजकतावच्छेदकसमुदायत्वशून्यत्वे सति तद्धर्मावच्छिन्नोत्पादप्रयोजकतावच्छेदकसमुदायत्ववत्त्वमिति सामान्यमुखव्याप्तौ तृणारण्यादिकं दृष्टान्तः; अरण्यादौ तृणत्वावच्छिन्नविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकवह्नित्वावच्छिन्नकत्वस्य तृणनिष्ठवह्नित्वावच्छिन्नोत्पादकतावच्छेदकसमुदायत्वशून्यत्वे सति वह्नित्वावच्छिन्नोत्पादकतावच्छेदकसमुदायत्वस्य च सत्त्वात् । तथा च सर्वविद्यानामनुगतरूपेण मोक्षं प्रत्येकहेतुतास्वीकारे मोक्षसामग्रीशरीरेऽप्यनुगतरूपेणैव विद्यानां

निवेश्यतया एकविद्यावृत्तिताद्दशसमुदायत्वशून्यत्वमितरविद्यानां दुर्घटमिति निरुक्तविकल्पानुपपत्तिः ॥

यदि च—एकयैव विद्यया मोक्षनिर्वाहादेकविद्यानिष्ठस्य विद्यान्तरेण प्रयोजनं नास्तीत्येव तदधिकरणतात्पर्यम् ॥ सूत्रार्थस्तु—स्वानिष्पाद्यफलनिष्पादकत्वस्वसामानाधिकरण्योभयसम्बन्धेन सद्विद्याविशिष्टान्यत्वमेव दहरादिविद्यानां सद्विद्यया सह विकल्पः। अविशिष्टफलत्वं विजातीयफलजनकत्वाभावः। तथा च–दहरादिविद्या उक्तोभयसम्बन्धावच्छिन्नसद्विद्यानिष्ठावच्छेदकताकप्रतियोगिताकभेदवती, तज्जन्यफलविजातीयफलाजनकत्वात् , यो यज्जन्यफलविजातीयफलाजनकः स तन्निष्ठनिरुक्तसम्बन्धावच्छिन्नावच्छेदकताकभेदवानिति—सामान्यतो व्याप्तिर्बोध्या। स्वजन्यफलविजातीयत्वं च–स्वगोचरप्रवृत्तिहेतुभूतेच्छाजनकेच्छाविषयतावच्छेदकीभूतधर्मशून्यत्वं, स्वसाध्यकप्रवृत्त्युद्देश्यतावच्छेदकधर्मशून्यत्वपर्यवसितम्। विद्यासामान्यगोचरप्रवृत्तेर्मोक्षेच्छाधीनत्वादुक्तहेतूपपत्तिः। अयमेवार्थो भाष्यारूढः; तथा च तदधिकरणभाष्यम्—

> "विद्यानां विकल्प एव, न समुच्चयस्सम्भवति; कुतः, अविशिष्टफलत्वात्। सर्वासां हि ब्रह्मविद्यानामनवधिकातिशयानन्दब्रह्मानुभवः फलमविशिष्टं श्रूयते ब्रह्मविदाप्नोतिपरमित्यादिभिः। ब्रह्म हि स्वस्य परस्य चानुभूयमानमनवधिकातिशयानन्दं भवति। स च तादृशानुभव एकया विद्यया प्राप्यते चेत्किमन्ययेति न समुच्चयसम्भवः॥" —इति ॥

अस्मिन्नेवार्थे उत्तरसूत्रस्वारस्यम्। "काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात्"—इत्युत्तरसूत्रम्। अयमर्थः—ब्रह्मप्राप्तिव्यतिरिक्तफलास्तु विद्याः फलभूयस्त्वापेक्षायां समुच्चीयेरन्, तद्विरहे

तु विकल्पेरन्, तासां परिमितफलत्वात्। तथा च–काम्यविद्यासु भूयःफलेच्छावत्पुरुषनिष्ठा काचिदुक्तोभयसम्बन्धेनापरविद्याविशिष्टा, तज्जन्यफलविजातीयफलजनकत्वात्। भूयः फलेच्छाशून्यपुरुषनिष्ठा च काचित्सामानाधिकरण्यसम्बन्धावच्छिन्नापरविद्यानिष्ठावच्छेदकता-कप्रतियोगिताकभेदवती, अपरविद्याजन्यफलेच्छारहितपुरुषनिष्ठ-त्वात्–इति पर्यवसितम्। इत्थं चानुगतरूपेण विद्यानां मोक्षं प्रत्ये-कहेतुतास्वीकारेऽपि नोक्ताधिकरणविरोधः—इति विभाव्यते॥

तदाऽपि–नानाशब्दादिभेदादिति पूर्वाधिकरणविरोधो दुष्परि-हरः। तत्र हि साध्यतया विवक्षितं सर्वविद्यानां नानात्वं न ताव-त्स्वप्रतियोगिवृत्तित्वस्यानुयोगिवृत्तित्वोभयसम्बन्धेन भेदविशिष्टवि-द्यात्वव्याप्यधर्मवत्त्वं; तथा सति ध्यानव्यक्तिरूपाणां विद्यानां परस्परभेदमात्रसिद्ध्या उद्देश्यासिद्धेः। तथा हि–गुणोपसंहारपादो-पक्रमे हि सर्ववेदान्तप्रत्ययमित्यादिना छान्दोग्यवाजसनेयकयोः श्रुताया वैश्वानरविद्याया ऐक्यं व्यवस्थापितम्। तत्र हि न तावत् स्वप्रतियोगिवृत्तित्वस्वानुयोगिवृत्तित्वोभयसम्बन्धेन भेदविशिष्टान्य-वैश्वानरविद्यात्ववत्त्वमैक्यं व्यवस्थापयितुं युक्तं, पुरुषभेदभिन्नध्यान-रूपाणां वैश्वानरविद्याव्यक्तीनां निरुक्तैक्यस्य बाधात्, यागव्यक्ति-भेदसत्त्वेऽपि यजेतेत्यादिचोदनैक्यसत्त्वेन चोदनाद्यविशेषादित्युक्त-हेतोर्व्यभिचारापत्तेश्च; किं तु मोक्षनिरूपितैककारणतावत्त्वम्। तथा च सर्ववेदान्तप्रत्ययमेकमुपासनमितिभाष्यस्यापि छान्दोग्यवाजसने-यकयोः प्रतीयमानं वैश्वानरोपासनमेककारणतावदित्यर्थः। ततश्च छान्दोग्यप्रतिपन्नवैश्वानरविद्या वाजसनेयकप्रतिपन्नवैश्वानरविद्यानिष्ठ-कारणतावतीति फलितम्। एवं च–अस्मिन् पादे चिन्त्यमानस्यै-क्यस्यैककारणतारूपत्वात् नानात्वस्य च कारणताभेदरूपत्वात्प्रकृते

नानाकारणतावत्त्वं स्वनिरूपितकार्यतावच्छेदकावच्छिन्नकार्यतानिरूपितत्वस्वासामानाधिकरण्योभयसम्बन्धेन विद्यानिष्ठकारणताविशिष्टकारणतावत्त्वपर्यवसितं नानात्वमेव सिसाधयिषितम्। तत्तदव्यवहितोत्तरमोक्षत्वस्य तत्तद्विद्याजन्यतावच्छेदकत्वेऽपि सर्वविद्याजन्यतावच्छेदककोटौ मोक्षत्वस्य निवेशादुक्तोभयसम्बन्धेनैकविद्यानिष्ठकारणताविशिष्टकारणतावत्त्वमपरविद्यानामव्याहतं; तस्मादनुगतरूपेण विद्यानां कारणत्वं सिद्धान्तविरुद्धम्। एवं प्रत्येकं विद्यानामपि भिन्नभिन्नशक्तिमत्त्वेन कारणताङ्गीकारे विद्यैक्यस्थले गुणोपसंहारस्वीकारो निष्फलः; तत्तद्विद्योदितगुणविषयतानां तत्तद्विद्यानिष्ठकारणतावच्छेदकत्वे च कारणतैक्यरूपविद्यैक्यसम्पादकतया गुणोपसंहारस्य सार्थकता, कारणतैक्यरूपविद्यैक्यवत्तया विवक्षितयोरपि ध्यानयोः परस्परविलक्षणगुणविषयतावत्त्वे कारणतावच्छेदकभेदेन कारणतैक्यानुपपत्तेः। गुणोपसंहारो हि—एकविद्यात्वेनाभिमतासु ध्यानव्यक्तिष्वेकरूपगुणविषयतावत्त्वम्। अतो दहरादिविद्यानां निरूप्यनिरूपकभावापन्नविषयतावत्त्वेनैव मोक्षं प्रति कारणत्वमुचितम्। न चैवं विनिगमनाविरहेण कारणताबाहुल्यापत्तिः, विलक्षणविषयतासम्बन्धेन तत्तद्गुणावच्छिन्नब्रह्मविशिष्टध्यानत्वेनैव कारणतास्वीकारेण निरूप्यनिरूपकभावापन्नविषयतायाः कारणतानवच्छेदकत्वात्। न चैवं भ्रमप्रमासाधारण्येन कारणत्वानुपपत्तिः; इष्टत्वात्, मोक्षं प्रति भ्रमस्य कारणत्वाभावाच्च। अनुमित्यादिस्थलीयकारणतायामपि विलक्षणविषयतासम्बन्धेन व्याप्त्यादिविशिष्टविषयस्यैवावच्छेदकत्वम्; सिद्धान्ते भ्रमानङ्गीकारेण सर्वत्र विशिष्टविषयस्यैवावच्छेदकत्वे बाधकविरहाद्विषयस्य कारणतावच्छेदकत्वासम्भवस्थल एव विषयतायाः कारण-

तावच्छेदकत्वस्य कल्पयितुमुचितत्वात्, विषयस्य कारणतावच्छेदकत्वसम्भवेऽपि विषयतायास्तथात्वे विनिगमनाविरहेण कारणताबाहुल्यप्रसङ्गात्। अत एव—यत्र व्याप्त्यादिज्ञानं प्रमात्मकमेव तत्र विशिष्टविषयस्यैव तत्स्थलीयानुमितिकारणतावच्छेदकत्वं नैयायिकैरपि स्वीकृतं; प्रपञ्चितं चेदं वादान्तरे॥

न च—विशिष्टविषयकध्यानत्वेनैव हेतुत्वे शरीरपातपर्यन्तविलम्बानुपपत्तिरिति—वाच्यम्; अमानवकरस्पर्शस्यापि मुक्तिं प्रति कारणतास्वीकारेण तदभावादेव शरीरसत्तादशायां मोक्षानुपपत्तेः; अमानवकरस्पर्शस्य मोक्षकारणत्वं च गतिशास्त्रादेवावगम्यते। न च—विद्यानां शक्तिमत्त्वेन कारणत्वास्वीकारे निश्शेषाविद्यानिवर्तनरूपविद्यानिष्पत्तिरपि विशिष्टदेशगतिसापेक्षेति परं जैमिनिरिति सूत्रभाष्यविरोध इति—वाच्यम्; तत्र निष्पत्तिशब्देन शक्तेरनभिधानात्, पाकनिष्पत्तिरित्यादौ निष्पत्तिशब्दस्यातीतकृतिविषयत्वपरत्वेन शक्तिपरतायाः क्वाप्यदर्शनात्। कृतावतीतत्वं च—स्वोत्पत्त्यधिकरणक्षणवृत्तिकृतिजन्यक्रियाजन्यफलानुकूलव्यापाराननुकूलत्वप्रतियोगित्वोभयसम्बन्धेन वर्तमानध्वंसविशिष्टत्वम्। द्वितीयादिदिवसीयकार्यस्याद्यनिष्पन्नत्वव्यवहारवारणाय प्रतियोगित्वनिवेशः, अनेककृतिसाध्यकार्यस्य कतिपयकृतिक्षणे सिद्धत्वव्यवहारवारणाय प्रथमसम्बन्धनिवेशः। तथा च निश्शेषेत्यादिभाष्यस्य—निश्शेषाविद्यानिवर्तनरूपा निश्शेषाविद्यानिवृत्तिहेतुभूता या विद्या, तन्निष्पत्तिरपि तन्निष्ठनिरुक्तातीतकृतिविषयताऽपि, विशिष्टदेशगतिप्रयोज्या——इत्यर्थः। यद्वा—निश्शेषाविद्यानिवर्तनरूपेत्यस्य निश्शेषाविद्यानिवृत्त्यभिन्नेत्यर्थः। तस्य च निष्पत्तिपदार्थघटकस्वोत्पत्त्यधिकरणक्षणवृत्तिकृतिजन्यक्रियाजन्यफलेऽन्वय इति बोध्यम्॥

एवं—अभ्यासाधेयातिशयस्येति जिज्ञासाधिकरणभाष्यस्यापि स्मृति-परम्पराप्रयोज्यलौकिकविषयताकस्येत्यर्थः। अनवरतभावनावशात् ध्यामव्यक्तिषु लौकिकविषयता सम्भवतीति पूर्वमेवोक्तम्। तथा च विशिष्टविषयकध्यानत्वेन हेतुत्वे न काप्यनुपपत्तिरीत्यन्यत्र विस्तरः॥

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम्॥

इति
श्रीशेषार्यवंशमुक्ताफलस्य श्रीयादवाद्रिनिवासरसिकस्य
श्रीमदनन्तार्यवर्यस्य कृतिषु
मोक्षकारणतावादः
समाप्तः॥

॥ श्रीः ॥

॥ श्रीः ॥

निर्विशेषप्रमाणव्युदासः

श्रीमन्महीशूरमहाराजाधिराजमहास्थानसभाभूषणैः
शेषार्यवंशमुक्ताफलैः श्रीयादवाद्रिनिवासरसिकैः
पण्डितमण्डलीसार्वभौमैः
श्री ॥ उ ॥ म. अ. अनन्तार्यवर्यैः
विरचितः ।

विद्वद्भिः परिशोध्य

म. अ. अनन्तार्येण
प्र. भ. तो. नरसिंहार्येण च
कल्याणपुर-विचारदर्पण-मुद्राक्षरशालायामङ्कयित्वा
प्राकाश्यं नीतः ॥

१८९९.

मूल्यं रू. ०—२—०

॥ श्रीः ॥

निर्विशेषप्रमाणव्युदासः

समाराध्य श्रीशं निखिलगुणवाराशिममलं
यतीनां सम्राजः पदयुगलमानम्य बहुधा।
विधत्ते वादार्थं कमपि विशदं कौतुकवशात्
अनन्तार्यश्श्रीमत्फणिपगुरुवंशाम्बुधिशशी ॥

यत्तावदुक्तं महासिद्धान्तारम्भे—"निर्विशेषवस्तुवादिभिर्निर्विशेषे वस्तुनि इदं प्रमाणमिति न शक्यते वक्तुं सविशेषविषयत्वात्सर्वप्रमाणानाम्"—इति, तद्वाक्यार्थविशोधनायेदमारभ्यते ॥

निर्विशेषे वस्तुनि प्रमाणं नास्तीति वचने सिद्ध्यसिद्धिभ्यां व्याघातो भवतीत्यभिप्रेत्य प्रमात्वव्यापकं सविशेषविषयकत्वमिति व्याप्तिमङ्गीकृत्य निर्विशेषविषयकं प्रमाणं निराकृतम्। सर्वप्रमाणानामित्यत्र सर्वशब्दस्य व्यापकत्वतात्पर्यग्राहकत्वेनोक्तव्याप्तिबोधनात्, तत्र प्रमाणपदस्य भावे व्युत्पत्त्या प्रमापरत्वात् ॥

ननु—उक्तव्याप्त्या न निर्विशेषवस्तुसाधकप्रमाणनिरासस्सम्भवति, निर्विशेषसविशेषोभयविषयकस्य समूहालम्बनरूपप्रात्यक्षिकज्ञानस्य सत्त्वेऽपि सविशेषविषयकत्वे प्रमात्वव्यापकताया अक्षतेः। न च—प्रमात्वव्यापको निर्विशेषविषयकत्वाभाव इति व्याप्तौ तात्पर्यादुक्तसमूहालम्बनव्यावृत्तिः, सविशेषविषयकत्वात्सर्वप्रमाणानामिति श्रीभाष्ये

सविशेषविषयकत्वादित्यस्य निर्विशेषविषयकत्वाभावादित्यर्थादिति-वाच्यम्; सिद्धान्ते निर्विशेषविषयकत्वस्याप्रसिद्धत्वेन तदभावाप्रसिद्धेः ॥ न च-प्रतियोगितासम्बन्धावच्छिन्नविशेषत्वावच्छिन्नविषयतानिरूपिताभावविषयतानिरूपिताधिकरणविषयतैव निर्विशेषविषयता; सा च निर्विशेषं वस्त्विति वाक्यजन्यबोधे प्रसिद्धा; तादृशबोधस्य परैः प्रमात्वेनाभ्युपगतस्य सिद्धान्ते भ्रमत्वेन स्वीकारात् तद्वाक्याद्बोध एव न सम्भवतीत्यपलापस्य दुश्शकत्वात्; उक्तं च टीकायां—

"निर्विशेषशब्दजनिता मिथोऽन्वयानर्हार्थगोचरा भ्रान्तिः ॥"

—इति ॥

एवं च तादृशविषयत्वाभावः प्रमात्वव्यापक इति व्याप्तौ तात्पर्यान्नाप्रसिद्धिः; अत एव प्रमाणानामिति प्रमात्वनिवेशनं सार्थकं; केवलज्ञानत्वव्यापकत्वस्योक्ताभावेऽभावादिति-वाच्यम्; उक्तशब्दजन्यभ्रमस्यापि धर्म्याद्यंशे प्रमात्वेनोक्ताभावे प्रमात्वव्यापकताया अप्यसम्भवात्। स्वव्यधिकरणप्रकारावच्छिन्ना या या विशेष्यता, तत्तदनिरूपकत्वरूपं सर्वांशे प्रमात्वं निरुच्य तथाविधप्रमात्वव्यापक उक्ताभाव इत्यपि न सम्भवति। सर्वांशे प्रमात्मकस्य निर्विशेषसाधकप्रमाणस्योक्तव्याप्त्या निराकरणेऽपि किञ्चिदंशे भ्रमात्मकस्य तथाविधप्रमाणस्यानिराकरणेनासङ्गतेः ॥ न च-उक्तविषयिता भ्रमत्वव्याप्येति व्याप्तौ तात्पर्यान्निर्विशेषसाधकप्रमाणनिरासासिद्धिः, तद्विषयकज्ञानसामान्ये भ्रमत्वस्योक्तव्याप्त्या सिद्धेरिति-वाच्यम्; अन्यांशे भ्रमात्मकस्य निर्विशेषसाधकप्रमाणस्य सत्त्वेऽप्युक्तव्याप्तेरविघातेनासङ्गतेः ॥ न च-विशेषाभावविषयतानिरूपिताधिकरणविषयता प्रमाणप्रयोज्यत्वाभाववती, विशेषवन्निष्ठा वेति व्याप्तौ तात्पर्यान्नासङ्गतिरिति-वाच्यम्; निर्विशेषसाधकं प्रमाणं हि परेषां द्विविधमिष्टं-विशेषसामान्याभावप्रकारकब्रह्मविशेष्यकं ब्रह्मनिष्ठनिरवच्छिन्नविषयताशालि

निर्विकल्पकं चेति. तत्रोक्तव्याप्त्या आद्यप्रमाणनिरासेऽपि द्वितीयस्या-निरासात्. उक्तनिर्विकल्पकसत्त्वेऽप्युक्तव्याप्त्यविघातेन श्रीमति भाष्ये उक्तव्याप्त्युपपादनाय पराभिमतनिर्विकल्पकनिराकरणानुपपत्तेः ॥

—इति ॥

अत्र ब्रूमः—

विशेषसामान्याभावप्रकारतानिरूपितविशेष्यतात्वव्यापकः प्रमाण-प्रयोज्यत्वाभावो विशेषवत्त्विष्टत्वं वा—इति व्याप्ताविव विषयतात्व-व्यापकं किञ्चिदवच्छिन्नत्वमिति व्याप्तावपि सविशेषविषयत्वात्सर्व-प्रमाणानामिति भाष्यस्य तात्पर्याङ्गीकारात्प्रथमव्याप्त्या विशेषसा-मान्याभावप्रकारकस्य द्वितीयव्याप्त्या निरवच्छिन्नविषयताशालि-पराभिमतनिर्विकल्पकात्मकस्य प्रमाणस्य च निरासस्सिध्यति ॥

न च—सांसर्गिकविषयतासामान्यस्य निरवच्छिन्नत्वेन तत्र व्यभि-चारात् द्वितीयव्याप्तिर्न सम्भवति, संसर्गताभिन्नविषयतात्वव्यापकं किञ्चिदवच्छिन्नत्वमिति व्याप्तिस्वीकारे च संसर्गतया निर्विशेषसिद्धेर-निराकरणादसङ्गतिरिति—वाच्यम्; घटवद्भूतलमित्यादिप्रत्यक्षादिज्ञा-नेषु संयोगादिरूपसंसर्गस्य संयोगत्वादिरूपसंसर्गतावच्छेदकपुरस्का-रेणैव भानाङ्गीकारेण सिद्धान्ते संसर्गताया निरवच्छिन्नत्वाभावात्। घटत्वादिरूपधर्मसामान्याविषयकं घटादिरूपधर्मिमात्रविषयकं ज्ञानं निर्विकल्पकमिति परेषां मते घटत्वादेरप्यैन्द्रियकत्वाविशेषेण निर्वि-कल्पके तस्याभाने बीजाभावः। विषयितासम्बन्धेन निर्विकल्पकं प्रति तादात्म्येन धर्मस्य प्रतिबन्धकत्वं तु न सम्भवति; निर्विकल्पकस्य धर्मा-विषयकत्वसिद्धावुक्तप्रतिबन्धकत्वसिद्धिस्तत्सिद्धौ च धर्माविषयकत्व-सिद्धिरित्यन्योन्याश्रयादित्यभिप्रायेण श्रीभाष्ये 'संस्थानरूपजात्यादेर प्यैन्द्रियकत्वाविशेषात्' इत्यनेन दूषणाभिधानेन तन्न्यायस्य संयोग-त्वादिरूपसंसर्गतावच्छेदकेऽपि समानत्वेन प्रत्यक्षादौ संसर्गतावच्छेदक-

मानस्य श्रीभाष्यानुमतत्वात् ॥

न चैवमपि—अयं घट इत्यादिज्ञानीयायां घटत्वादिनिष्ठनि- वच्छिन्नप्रकारतायामुक्तव्याप्तेर्व्यभिचारः—इति वाच्यम्; उक्तज्ञा घटत्वादिविषयताया आधेयतासम्बन्धेन घटावच्छिन्नतया निरवच्छि न्नत्वाभावात्। संस्कारसहकृतेन्द्रियजन्यज्ञानं सविकल्पकं, तदसहकृ तेन्द्रियजन्यं ज्ञानं निर्विकल्पकम्; तत्र प्रथमपिण्डग्रहणात्मके अ घट इत्याकारके निर्विकल्पके घटविशेषणतापन्ने घटत्वे घटः आधे यतासम्बन्धेन भासते, द्वितीयादिपिण्डग्रहणात्मके अयमपि घट इत्या कारके सविकल्पके घटविशेषणतापन्नघटत्वे निर्विकल्पकानुभवजन्य संस्कारबलात् पूर्वघटस्सान्निकर्षादेतद्घटश्चाधेयतासम्बन्धेन भासत इति संस्कारसहकृतेन्द्रियजन्यत्वं सविकल्पकस्येति—सिद्धान्ते स्वीकारेण घटत्वादिविषयताया घटावच्छिन्नत्वस्य सिद्धान्तसिद्धत्वात् ॥ उक्तञ्च **श्रीभाष्ये**—

> "निर्विकल्पकमेकजातीयद्रव्येषु प्रथमपिण्डग्रहणं, द्वितीयादि- पिण्डग्रहणं सविकल्पकमित्युच्यते । प्रथमपिण्डग्रहणे गोत्वादेरनुवृत्ताकारता न प्रतीयते । द्वितीयादिपिण्डग्रहणेष्वे- वानुवृत्तिप्रतीतिः । प्रथमप्रतीत्यनुसंहितवस्तुसंस्थानरूपगो- त्वादेरनुवृत्तिधर्मविशिष्टत्वं द्वितीयादिपिण्डग्रहणावसेयमिति द्वितीयादिग्रहणस्य सविकल्पकत्वम् ॥" —इति ॥

अनुवृत्ताकारता—आधेयतासम्बन्धेनानेकव्यक्तिवैशिष्ट्यम् । उक्तं च टीकायां—

> "अनेकव्यक्त्यन्वयरूपाऽनुवृत्तिः" —इति ॥

एवं च—अयं घट इत्यादिज्ञानीयघटत्वादिविषयताया घटावच्छिन्नत्वा- न्न व्यभिचारः। स्पष्टञ्चेदमुक्तं टीकायां—

"ननु विशेषो हि निर्विशेषः। तत्कथं निर्विशेषवस्तुनोऽप्रामाणि-

कत्वं ? उच्यते—धर्मेण धर्मी सविशेषः, धर्मिणा च धर्मस्सविशेषः ॥" —इति ॥

न चैवमपि—गन्धादिप्रत्यक्षे आश्रयस्याभानात् गन्धादिविषयतायास्तदवच्छिन्नत्वासम्भवात् संस्थानरूपजात्यभावेन तदवच्छिन्नत्वासम्भवाच्च निरवच्छिन्नत्वात्तत्र व्यभिचार इति—वाच्यम्; अयं गन्धोऽनुभूयत इति प्रतीत्या गन्धादिविषयतायाः कालावच्छिन्नत्वात्, संविदवच्छिन्नत्वाच्च। अयमिति वर्तमानकालस्यानुभूयत इति संविदश्च गन्धविशेषणतया प्रतीतेः।

उक्तञ्च टीकायां—

"संविदोऽपि सर्वविशेषणतया सर्वार्थवैशिष्ट्यं ह्युपपद्यते। अयं गन्धोऽनुभूयत इति कालादिविशेषावच्छिन्नतयैव गन्धादिप्रतीतेः॥" — इति ॥

न च—आत्मनस्स्वप्रकाशत्वेन स्वनिरूपितविषयताया आत्मनिष्ठाया निरवच्छिन्नतया तत्र व्यभिचार इति—वाच्यम्; तद्विषयतायाः प्रत्यक्त्वैकत्वानुकूलत्वावच्छिन्नत्वेन निरवच्छिन्नत्वाभावात् ॥

न च—नित्यविभूतेः स्वप्रकाशतया तद्विषयतायाः स्वनिष्ठाया निरवच्छिन्नत्वात् तत्र व्यभिचार इति—वाच्यम्। तस्या अप्येकत्वावच्छिन्नत्वात् स्वप्रकाशात्मकाहमित्याकारकानुभवविषयतायाः प्रत्यक्त्वैकत्वानुकूलत्वावच्छिन्नत्वस्य टीकायामुक्तत्वेन तत्तुल्यन्यायेन नित्यविभूतिविषयताया एकत्वावच्छिन्नत्वावश्यकत्वात् ॥

ननु—उक्तभाष्यस्य द्विविधव्याप्तिपरत्वं न सम्भवति, 'यस्तु स्वानुभवसिद्धमिति स्वगोष्ठीनिष्ठस्समयः' इत्युत्तरभाष्यासङ्गतेः। स्वानुभवात्मकप्रमाणेन निर्विशेषसिद्ध्यङ्गीकारेऽप्युक्तव्याप्तिद्वयाविघातात् ॥ न च—स्वानुभवसिद्धत्वं नाम स्वनिरूपितनिरवच्छिन्नविषयतावत्त्वं, अनुभूतेस्स्वप्रकाशत्वाभ्युपगमात्; तथा च तादृशविषयतायां

द्वितीयव्याप्तेर्व्यभिचारपरिहाराय यस्त्वित्यादिभाष्यमिति नासङ्गतिरिति- वाच्यम्। परमते हि स्वस्य स्वविषयत्वरूपं स्वप्रकाशत्वं न स्वीक्रियते, अभेदे विषयिविषयभावस्य तैरनङ्गीकारात्; किन्तु ज्ञानविषयतां विनैव व्यवहारविषयत्वं, 'अवेद्यत्वे सत्यपरोक्षव्यवहारविषयत्वं स्वप्रकाशत्वम्' इत्यद्वैतसिद्धावुक्तत्वात्॥ यथा हि—घटादेश्चाक्षुषविषयत्वे आलोकसंयोगो नियामकः, आलोकस्य तथात्वे चालोकत्वमेव नियामकं; न तु तत्संयोगः। तथा—घटादेर्व्यवहारविषयत्वे ज्ञानविषयत्वं नियामकम्। ज्ञानस्य तथात्वे तु ज्ञानत्वमेव नियामकं, न तु तद्विषयत्वं; घटज्ञानविषयकव्यवहारे घटज्ञानज्ञानत्वेन हेतुत्वापेक्षया घटज्ञानत्वेन हेतुत्वे लाघवात्। अत एवानुभूतिस्स्वविषयेत्यनुक्त्वा—अनुभूतिरनन्याधीनस्वव्यवहारा, स्वसम्बन्धादर्थान्तरे तद्व्यवहारहेतुत्वात्—इति स्वप्रकाशत्वसाधकमनुमानं परैः प्रयुक्तम्। स्वस्य स्वविषयत्वाङ्गीकारे स्वविषयेत्येव प्रयोक्तुमुचितत्वात्। उक्तं च महापूर्वपक्षे—

"सतोऽनुभूतिविषयभावोऽपि न प्रमाणपदवीमनुसरति॥"

—इति॥

टीकायामपि पूर्वपक्षतया तन्मतमुपपादितम्—

"ननु—घटादिषु व्यवहारार्हत्वं स्वव्यतिरिक्तज्ञानहेतुकं दृष्टं; ज्ञाने व्याप्तिर्भज्यते चेद्व्यवहारस्य ज्ञानपूर्वकत्वव्याप्त्यभङ्गेनाज्ञातस्यैव ज्ञानस्य व्यवहारास्पदत्वं स्यात्॥" —इति॥

न च—परमते एकदेशिना **चित्सुखाचार्येण** स्वस्य स्वविषयत्वं स्वीक्रियते; तत्स्वभावस्यापि स्फुरणस्य तद्विषयत्वमिति तेनोक्तत्वात्; तथा च तन्मते व्यभिचारप्रसक्त्या तन्निराकरणाय यस्त्वितिभाष्यमिति नासङ्गतिः—इति वाच्यम्; तन्मतेऽपि तदनङ्गीकारात्, तदीयवाक्ये तद्विषयत्वमित्यस्य तत्प्रयुक्तव्यवहारविषयत्वमित्यर्थ इति

गौणार्थपरतया अद्वैतसिद्धौ व्याख्यातत्वात् ॥ न च—स्वस्य स्वविषयत्वाभावेऽनुभूतिस्स्वतस्सिद्धेत्यस्य अपार्थकतेति—वाच्यम्; स्वतस्सिद्धेत्यस्य स्वजन्यव्यवहारविषयेत्यर्थात्। उक्तं च **अद्वैतसिद्धौ**—

"ननु—स्वत इत्यस्य स्वेनैवेत्यर्थे स्वविषयत्वापत्तिः; प्रमाणं विनेत्यर्थे उपायान्तरानुपन्यासेनासिद्ध्यापत्तिः; अन्यथा शशशृङ्गादेरपि सिद्ध्यापातः—इति चेन्न। मानानपेक्षसिद्धेरेव स्वतस्सिद्धशब्दार्थत्वात् ॥ न च शशशृङ्गादावतिप्रसङ्गः; तदसत्त्वव्यावृत्तिफलकप्रमाणाभावात्। प्रकृते च वेदान्तजन्यवृत्तिविषयतामात्रेण तत्सत्त्वातिसिद्धिरूपे आत्मनि सिद्धव्यवहारस्य सिद्धिप्रयुक्तव्यवहारविषयत्वपरतया गौणत्वात् ॥"—इति ॥

एवं च यस्त्वित्यादिभाष्यस्य व्यभिचारपरिहारपरत्वासम्भवादसङ्गतिर्दुर्वारा ॥ —इति चेत् ॥

अत्रोच्यते—परमते स्वस्य स्वविषयत्वानङ्गीकारेऽपि 'घटोऽनुभूयते' 'घटस्सन्' इत्यादिव्यवहारविषयताया निरवच्छिन्नाया अनुभूतौ स्वीकारात्तथाविधव्यवहारविषयतायां व्यभिचारपरिहाराय यस्त्वित्यादिभाष्यं प्रवृत्तम्। आत्मसाक्षिकसविशेषानुभवादेव तथाविधात्मसाक्षिकानुभवप्रयोज्यव्यवहारादेव 'इदमहमदर्शम्' इति केनचिद्विशेषेण विशिष्टविषयत्वात्, सर्वेषामनुभवानां तदधीनव्यवहाराणां च आश्रयविषयोभयावच्छिन्नविषयताकत्वेन निरवच्छिन्नविषयताकत्वाभावात्; घटोऽनुभूयत इत्यादिव्यवहारविषयतायाश्चाधेयतासम्बन्धेन घटावच्छिन्नत्वाच्च न तत्रोक्तव्याप्तेर्व्यभिचार इत्यर्थः ॥

नन्वेवमपि—अनुभूतिर्विशेषसामान्याभाववती, अनुभूतित्वात्—इत्याद्यनुमाननिरूपितविशेषसामान्याभावनिष्ठप्रकारतानिरूपितविशेष्यतायां प्रथमव्याप्तेर्व्यभिचारो दुर्वारः। तद्विषयताया अनुमानरूपप्रमाणप्रयोज्यत्वेन तदप्रयोज्यत्वाभावाद्विशेषवन्निष्ठत्वाभावाच्चेत्याशङ्कायां

सविशेषोऽप्यनुभूयमान इत्यादिभाष्यं प्रवृत्तम्। स्वासाधारणैस्स्वभाव-विशेषैस्सविशेष एवावतिष्ठते—इति। उक्तानुमितिविषयतायां विशेष-वन्निष्ठत्वसत्त्वात्, उक्तानुमितेर्विशेषवति विशेषाभावप्रकारकत्वेन प्रमा-णत्वाभावेन तथाविधविषयतायां प्रमाणप्रयोज्यत्वाभावस्यापि सत्त्वाच्च। न प्रथमव्याप्तेरपि व्यभिचार इति भावः। किं च—अनुभूतिनिष्ठा स्वानुभवविषयता ज्ञातृज्ञेयान्यतरावच्छिन्नैव भवताऽपि वाच्या; तद-न्यतरानवच्छिन्नत्वे घटादेरिव ज्ञानत्वस्वप्रकाशत्वयोरनुपपत्तेः। यत्र ज्ञातृज्ञेयान्यतरानवच्छिन्नविषयतावत्त्वं तत्र ज्ञानत्वाभावः, स्वप्र-काशत्वाभावश्चेति व्याप्तेः। उक्तं च **विवरणे**—

"ज्ञातुरर्थप्रकाशस्य ज्ञानत्वात् ॥" —इति ॥

अत्र प्रकाशस्य ज्ञानत्वादित्यनभिधाय ज्ञातुरर्थेत्युक्तिर्न तावज्ज्ञान-पदार्थे तयोर्घटकतालाभाय, वृत्त्यवच्छिन्नचैतन्यस्यासत्त्वापादकाज्ञान-विषयत्वाभावविशिष्टचैतन्यस्य वा तन्मते ज्ञानपदार्थत्वेन तत्र ज्ञातृ-ज्ञेययोर्घटकत्वाभावात्; किन्तु—ज्ञाननिष्ठविषयताऽन्यतरावच्छिन्नेति नियमसूचनाय ॥

एवं च—अनुभूतावुक्तान्यतरानवच्छिन्नविषयतास्वीकारे ज्ञानत्वा-नुपपत्तिः, ततश्च स्वप्रकाशत्वानुपपत्तिः—इत्यभिप्रेत्य, 'धियो हि धीत्वं स्वप्रकाशता च ज्ञातुर्विषयप्रकाशनस्वभावतयोपलब्धेः' —इति भाष्यं प्रवृत्तम् ॥

ननु—'स्वापमदमूर्छासु च सविशेष एवानुभव इति स्वावसरे निपुणतरमुपपादयिष्यामः' इति भाष्यं किमर्थं प्रवृत्तम्? न तावत्प्रथ-मव्याप्तौ व्यभिचारपरिहाराय; स्वापकाले विशेषसामान्याभावप्रकार-कानुभवस्य परैरनङ्गीकारात्। नापि द्वितीयव्याप्तौ 'सुखमहमस्वाप्सं, न किञ्चिदहमवेदिषम्' इति प्रबोधकालीनस्मरणेन स्वापाज्ञानोभया-वच्छिन्नानुभूतिनिष्ठविषयताकेन ज्ञानस्य तैस्समर्थितत्वेन तथाविध-

स्मरणहेतुभूतस्य सुषुप्तिकालीनानुभवस्याप्युभयावच्छिन्नानुभूतिनिष्ठ-विषयताकत्वावश्यकतया निरवच्छिन्नविषयताकत्वाभावात् तत्र व्यभिचाराप्रसक्तेः—इति चेन्न ॥ वार्त्तिककारमते स्वापाज्ञानोभयाव-च्छिन्नसाक्षिनिष्ठविषयताकः सुषुप्तिकालीनानुभव इति स्वीकारेऽपि विवरणकारमते साक्ष्यज्ञानसुखाकारास्तिस्रो निर्विकल्पकरूपा अविद्या-वृत्तयस्सुषुप्तावभ्युपगम्यन्ते । तत्र अहमाकारवृत्तिविषयतायाः प्रबोध-कालीनाया अन्तःकरणावच्छिन्नत्वेऽपि सुषुप्तिकालीनाहमाकाराविद्या-वृत्तिविषयता निरवच्छिन्नैव । सुषुप्तावन्तःकरणस्य लीनत्वेन तद्दशा-यां तस्याभानात् ॥ तथा च—अहमाकाराविद्यावृत्तिविषयतायां निर-वच्छिन्नायां व्यभिचारपरिहाराय स्वापमदमूर्छास्वित्यादि भाष्यं प्रवृत्तम् । तत्र स्वावसर इत्यस्य—अहमर्थात्मत्वसमर्थनावसर इत्यर्थः । तत्र भाष्ये सुखमहमस्वाप्समित्यनुभवस्य सुखित्वप्रत्यक्त्वोभयावच्छि-न्नविषयताकत्वसमर्थनात् ॥

तथा च श्रीभाष्यम्—

"एवं हि सुप्तोत्थितस्य परामर्शः सुखमहमस्वाप्समिति । अनेन प्रत्यवमर्शेन तदानीमहमर्थस्यैवात्मनस्सुखित्वं ज्ञातृत्वं च ज्ञायते ॥" —इति ॥

ननु—सुषुप्तिकालीनात्मस्वरूपानुभवे सुखित्वज्ञातृत्वयोः कथं भानम्? तस्यात्मस्वरूपविषयकत्वेऽपि धर्मभूतज्ञानपरिणामविशेषरूप-सुखधर्मभूतज्ञानाश्रयत्वरूपज्ञातृत्वोभयविषयकत्वायोगात् । न च—धर्म-भूतज्ञानस्य स्वप्रकाशत्वेन तेनैव स्वपरिणामविशेषरूपसुखस्याश्रयत्व-रूपज्ञातृत्वयोर्भानमुपपद्यते—इति वाच्यम्; धर्मभूतज्ञानस्य विषय-प्रकाशनवेलायामेव स्वप्रकाशत्वेन सुषुप्तौ विषयप्रकाशाभावेन स्वप्र-काशत्वायोगात् ।

उक्तं च श्रीभाष्ये—

"यत्तु—अनुभूतेस्स्वप्रकाशत्वमुक्तं, तद्विषयप्रकाशनवेलायां ज्ञातुरात्मनस्तथैव ; न तु सर्वेषां सर्वदा तथैवेति नियमोऽस्ति॥"

—इति ॥

न च–उदाहृतभाष्यं विषयप्रकाशनवेलायामेव ज्ञानस्य स्वप्रकाशत्वं नान्यथेति बोधयितुं न प्रवृत्तम्; किन्तु स्वभिन्नज्ञानाप्रयोज्यस्वव्यवहारसामान्यकत्वं स्वप्रकाशत्वमिति परेषां लक्षणे परानुभवस्य हानोपादानादिलिङ्गकानुमानाधीनव्यवहारविषयत्वात् स्वानुभवस्याप्यतीतस्य अज्ञासिषमिति स्मरणजन्यव्यवहारविषयत्वाच्च स्वव्यवहारसामान्यस्य स्वभिन्नज्ञानाप्रयोज्यत्वविरहादसम्भवमभिधाय स्वभिन्नज्ञानाप्रयोज्यस्वसमानकालीनस्वाश्रयकर्तृकव्यवहारसामान्यकत्वं स्वप्रकाशत्वं वक्तव्यमिति स्वप्रकाशत्वशिक्षार्थं प्रवृत्तम् ; तत्र च विषयप्रकाशनवेलायामित्यस्य स्वसद्भावदशायामित्यर्थात्; तथा च सुषुप्तौ धर्मभूतज्ञानस्य स्वप्रकाशत्वाङ्गीकारेऽपि न तद्भाष्यविरोधः—इति वाच्यम् । एवमपि 'पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात्' इति सूत्रविरोधापत्तेः, तत्सूत्रे सुषुप्तावनभिव्यक्तस्यैव धर्मभूतज्ञानस्य जागरेऽभिव्यक्तिबोधनात् ॥ —इति चेत् ॥

अत्र व्यासार्याः—

"सुखित्वमित्यनेन धर्मभूतज्ञानपरिणामविशेषरूपसुखाश्रयत्वं, ज्ञातृत्वमित्यनेन धर्मभूतज्ञानाश्रयत्वं च न विवक्षितम् । उदाहृतभाष्यसूत्रयोर्विरोधापत्तेः । किन्तु स्वस्मै स्वयमनुकूलमित्यात्मस्वरूपगतानुकूल्यप्रतियोगित्वं स्वस्मै भासत इति भानप्रतिसम्बन्धित्वरूपं प्रत्यक्त्वं च विवक्षितम् ; तयोरात्मस्वरूपानुभवे भानसम्भवात् ॥"

—इति वदन्ति ॥

एवं च—सुषुप्तिकालीनानुभवविषयताया अनुकूलत्वप्रत्यक्त्वोभयावच्छिन्नत्वेन निरवच्छिन्नत्वाभावान्न तत्र व्यभिचार इति स्वापमदमूर्छास्वित्यादिभाष्यस्याभिप्रायः ॥

ननु—अनुभूतिस्स्वभिन्नविशेषशून्या, अनुभूतित्वात्—इत्यनुमानमेव निर्विशेषसाधकं प्रमाणम् । न हि उक्तानुमानस्य द्विविधव्याप्त्या निरासस्सम्भवति । उक्तानुमितेर्भ्रमत्वाभावेऽपि विशेषसामान्याभावप्रकारकानुमितेर्भ्रमत्वमात्रेण प्रथमव्याप्तिनिर्वाहात्, स्वभिन्नविशेषशून्यत्वस्यैव निर्विशेषत्वरूपत्वात् ॥ न च—स्वभिन्नविशेषाभावप्रकारतानिरूपितविशेष्यता स्वभिन्नविशेषवन्निष्ठेति व्याप्तिरङ्गीक्रियत इति—वाच्यम् । अनुभूतौ निर्विशेषत्वसाधकहेत्वादीनामनुभूतिरूपताया अपि सम्भवेन तद्भिन्नत्वानावश्यकत्वात् उक्तव्याप्त्यसिद्धेः ॥

उक्तं च **पञ्चपादिकायाम्**—

"आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्मा अपृथक्त्वेऽपि पृथगिवावभासन्ते ॥" —इति ॥

—**इत्याशङ्क्य**; स्वभिन्नविशेषवन्निष्ठत्वघटितव्याप्तिं समर्थयितुं अनुभूतौ पराभ्युपगतानां नित्यत्वादिधर्माणामनुभूतिस्वरूपात् भेदं साधयति । स्वाभ्युपगताश्च नित्यत्वादयो ह्यनेकविशेषास्सन्त्येव, ते च न वस्तुमात्रमिति शक्योपपादनाः, वस्तुमात्राभ्युपगमे सत्यपि विधा भेदे विवाददर्शनात्स्वाभिमततत्तद्विधाभेदैश्च स्वमतोपपादनादिति ॥

ननु—उदाहृतभाष्ये नित्यत्वादयोऽनुभूतिस्वरूपाद्भिन्नाः, तद्विषयकनिश्चयोत्तरकालीनसंशयविषयत्वात्; यो यद्विषयकनिश्चयोत्तरकालीनसंशयविषयः स तद्भिन्नः, यथा घटनिश्चयोत्तरकालीनसंशयविषयः पटः—इत्यनुमानं विवक्षितम् । तच्चायुक्तम् । धर्मनिश्चयोत्तरकालीनसंशयविषये धर्मिणि व्यभिचारात् ॥ न च—तन्निश्चयोत्तरकालीनसंशयकोटित्वं यत्र, तत्र तद्भिन्नत्वमिति व्याप्त्यङ्गीकारान्न

धर्मिणि व्यभिचार इति–वाच्यम्; एवमपि घटादिविषयकाहार्यादि-निश्चयानन्तरकालीनसंशयकोटिभूते घटादौ व्यभिचारात्। निश्चय-पदेनानाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयविवक्षणेऽपि घट इति निश्चयानन्तरकालीनस्य भूतलं घटवन्न वेति संशयस्य विषये घटे व्यभिचारात् ॥ न च–नित्यत्वादयोऽनुभूतिस्वरूपाद्भिन्नाः, ब्रह्म-धर्मिकसंशयप्रकारत्वात्; यो यद्धर्मिकसंशयप्रकारस्स तद्भिन्नः; यथा भूतलं घटवन्न वेति संशयप्रकारो भूतलभिन्नो घटादिः ब्रह्मधर्मिक-संशयप्रकाराश्च नित्यत्वादय इत्यनुमाने तात्पर्यमिति–वाच्यम्। घटस्तद्घटवान्न वेति संशयविषये तद्घटे व्यभिचारात्॥—इति चेत्॥

अत्रोच्यते॥ नित्यत्वादयोऽनुभूतिस्वरूपाद्भिन्नाः; तदभ्युपगम-समानकर्तृकानभ्युपगमविषयत्वात्। यो यदभ्युपगमसमानकर्तृका-नभ्युपगमविषयस्स तद्भिन्नः, यथा–अवयवाभ्युपगमसमानकर्तृका-नभ्युपगमविषयोऽवयवी तद्भिन्नः। अनुभूतिस्वरूपाभ्युपगमसमानकर्तृ-कानभ्युपगमविषयाश्च नित्यत्वादयः। बौद्धैरनुभूतिस्वरूपाभ्युपगमेऽपि तस्याः क्षणिकत्वाङ्गीकारेण नित्यत्वानभ्युपगमात्, वैशेषिकादि-भिर्जडत्वबहुत्वाङ्गीकारेण स्वप्रकाशत्वैकत्वयोरनभ्युपगमात्। अभ्युप-गमनाभ्युपगमौ च प्रामाणिकत्वाप्रमाणिकत्वप्रकारनिश्चयावित्यनुमाने तात्पर्यान्नानुपपत्तिः। एवमनुमानमभिप्रेत्यैवोक्तं **टीकायां**—

> "बौद्धैरनुभूतेः क्षणिकत्वमुक्तम्; अनेन तु नित्यत्वम्। वैशेषि-कादिभिश्च जडत्वबहुत्वे; अनेन तु स्वप्रकाशत्वैकत्वे। स्वरू-पन्तु तैस्सर्वैरभ्युपेतम्। अतो विप्रतिपत्तिविषयस्सम्प्रतिपत्ति-विषयश्च एक एवेति वक्तुमयुक्तमित्यर्थः॥" —इति॥

विप्रतिपत्तिविषयः–अनभ्युपगमविषयः, सम्प्रतिपत्तिविषयः–अभ्यु-पगमविषयः—इत्यर्थः। किं च–नित्यत्वादयोऽनुभूतिस्वरूपाद्भिन्नाः, तद्विषयकप्रमाणोपन्यासानिवर्त्यजिज्ञासाविषयप्रमाणकत्वात्। यो य-

द्विषयकप्रमाणोपन्यासानिवर्त्यजिज्ञासाविषयप्रमाणकः स तद्भिन्नः; यथा–द्रव्यविषयकप्रमाणोपन्यासानिवर्त्यजिज्ञासाविषयप्रमाणकमद्रव्यं द्रव्यभिन्नम्; अनुभूतिविषयकप्रमाणानिवर्त्यजिज्ञासाविषयप्रमाणकाश्च नित्यत्वादयः। परैरनुभूतौ प्रमाणमुपन्यस्य नित्यत्वस्वप्रकाशत्वादौ प्रमाणान्तरोपन्यासादित्यनुमानान्तरमभिप्रेत्योक्तम्–'स्वाभिमततत्तद्विधाभेदैश्च स्वमतोपपादनात्' इति। स्वमतोपपादनात् न वस्तुमात्रमिति शक्योपपादना इत्यन्वयः। नित्यत्वादिरूपतत्तद्धर्मप्रकारकप्रमाणोपन्यासात्–इति तद्भाष्यार्थः। विधाभेदैरिति तृतीयायाः प्रकारत्वार्थकत्वात्, तस्योपपादनपदार्थप्रमाणोपन्यासैकदेशे प्रमाणेऽन्वयादिति॥

ननु–'शब्दस्य तु विशेषेण सविशेष एव वस्तुन्यभिधानसामर्थ्यम्' इत्यादि भाष्यं किमर्थं प्रवृत्तम्? न च–'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिसमानाधिकरणवाक्यात् निर्विशेषनिष्ठनिरवच्छिन्नविषयताशालिबोधोऽखण्डार्थवादिभिः परैरभ्युपगम्यत इति तथाविधबोधीयविषयतायां व्यभिचारवारणाय तद्भाष्यं प्रवृत्तम्–इति वाच्यम्॥ तथाविधनिर्विकल्पकशाब्दबोधे पदजन्यनिर्विकल्पकस्मरणस्य कारणत्वेन, स्मरणे च समानाकारानुभवस्य कारणत्वेन तथाविधानुभवनिरासादेव शाब्दबोधस्यापि निरस्तप्रायत्वात्, पूर्वं स्वानुभवरूपस्य सुषुप्तिकालीनस्य च निर्विशेषानुभवस्य निरस्तत्वात्, तद्विषयकप्रत्यक्षस्य च निराकरिष्यमाणत्वात्; शाब्दबोधस्य समानाकारानुभवमूलकस्मरणाधीनतया तथाविधानुभवं विनाऽसम्भवात्—इति चेन्न॥ परमते हि–विशिष्टविषयकानुभवजन्यसंस्कारस्यापि शुद्धविषयकस्मृतिहेतुत्वं सम्भवति; शुद्धब्रह्मतात्पर्यविषयकपदज्ञानरूपोद्बोधकस्य विशेषणांशे संस्कारानुद्बोधकत्वात्, विशेष्यांश एव संस्कारोद्बोधकत्वात्–इति कल्प्यते। तथैव सिद्धान्तबिन्दुव्याख्यायां ब्रह्मानन्देनोक्तत्वात्॥

एवं च–निर्विशेषविषयकप्रत्यक्षादिरूपस्यानुभवस्याभावेऽपि तद्विषयकस्मरणशाब्दबोधयोरुत्पत्त्या तथाविधबोधविषयतायां व्यभिचारपरिहाराय शब्दस्य त्वित्यादिभाष्यं प्रवृत्तम् ॥

ननु–सिद्धान्तेऽपि शाब्दबोधस्य स्वसमानविषयकशाब्दान्यानुभवाधीनस्मरणमूलकत्वमिति नियमो न सम्भवति; तथा सति वेदान्तवाक्याद्ब्रह्मविषयकबोधानुपपत्तेः, तन्मूलभूतस्य ब्रह्मविषयकशाब्दान्यानुभवस्याभावात्; शाब्दानुभवस्यैव पदार्थस्मरणहेतुत्वेऽनवस्थापत्तेः–इति चेन्न। 'ब्रह्मविदाप्नोति परं' इत्यादिवाक्यजन्यब्रह्मविषयकशाब्दबोधो हि बृहत्त्वबृंहणत्वोभयविशिष्टविषयकपदजन्यस्मरणाधीनः। तादृशस्मरणं च 'बृहति बृंहयति, तस्मादुच्यते परं ब्रह्म' इत्यादिश्रुतिजन्यशाब्दबोधजन्यम्। तथाविधश्रुतिजन्यबोधश्च बृहधात्वादिजन्यब्रह्मपदार्थघटकप्रत्येकपदार्थानुभवमूलक इति नोक्तनियमानुपपत्तिः, न वाऽनवस्थेति ॥

उक्तं हि टीकायां—

"**ननु**–ब्रह्मशब्दो व्युत्पन्नोऽव्युत्पन्नो वा भगवति मुख्यः? अव्युत्पन्नत्वे बोधकत्वविरहिणस्तस्य न क्वचिदपि मुख्यत्वम्। नापि व्युत्पन्नस्स मुख्यः, अलौकिकेऽर्थे व्युत्पत्त्यसम्भवात्। कथमप्रतीते व्यवहाराविषये बुद्धिपूर्विका यादृच्छिकी च व्युत्पत्तिस्सम्भवति ॥ **उच्यते**। यथा–कामिनीचन्दनभवनादिषु प्रयोगेण सुखविषयतया व्युत्पन्नस्य स्वर्गशब्दस्य 'यस्मिन्नोष्णम्' इत्याद्यर्थवादपदसमभिव्याहारेण अलौकिकसुखविशेषविषयतया व्युत्पत्तिः; यथा लौकिके क्वचिदप्यव्युत्पन्नत्वेऽपि यूपाहवनीयस्फ्यकपालचषालचात्वालादिशब्दानां वाक्यान्तरपदान्तरसमभिव्याहारात्तत्तदर्थविषयतया व्युत्पत्तिः, एवं ब्रह्मात्मेश्वरादिशब्दानां च लोके केषु चिदर्थेषु प्रयोग-

व्युत्पत्तौ सत्यामसत्यामपि 'यतो वा इमानि भूतानि जायन्ते' 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिप्रसिद्धार्थवाक्यान्तरपदान्तर-समभिव्याहारादलौकिकपरमात्मविषयव्युत्पत्तिरुपपद्यते ॥"

—इति ॥

अप्रतीते–प्रत्यक्षाविषये । व्यवहाराविषये–प्रयोजकवृद्धवाक्यार्थान-प्रयोज्यवृद्धकर्तृकानयनाद्यविषये ॥

तथा च–ब्रह्मणः प्रत्यक्षाविषयत्वात् अम्बातातमातुलादिपदाना-मिव बुद्धिपूर्विका व्युत्पत्तिरानयनादिरूपवृद्धव्यवहाराविषयत्वाद्यादृ-च्छिकी च व्युत्पत्तिर्ब्रह्मपदस्य न सम्भवतीति–**शङ्काग्रन्थार्थः** ॥ अनुकूलविषयस्यैव सुखत्वेन मनोहरभवनादिरूपाल्पसुखविषयतया व्युत्पन्नस्य स्वर्गशब्दस्य शीतोष्णादिरहितसुन्दरतमलोकविशेषात्मक-महासुखेऽर्थवादवाक्याद्यथा शक्तिग्रहो भवति, तथा लोके जीवात्म-नरपालबृहद्वस्तुविषयतया व्युत्पन्नानामात्मेश्वरब्रह्मशब्दानां सर्व-व्यापकसर्वेश्वरनिरतिशयबृहद्वस्तुरूपालौकिकार्थविषयतयाऽर्थवादवाक्यै श्शक्तिग्रहस्सम्भवति । लोके क्वचिदपि व्युत्पत्त्यभावेऽपि, यूपा-हवनीयादिपदानामिव ब्रह्मपदस्यार्थवादवाक्ये न शक्तिग्रहस्सम्भ-वतीति–**समाधानग्रन्थार्थः** ॥ इत्यलं प्रासङ्गिकेन ॥

एवं च–शब्दस्य त्वित्यादिभाष्यमुक्तरीत्या विशिष्टानुभवजन्य-निर्विकल्पकस्मरणमूलकस्य निरवच्छिन्नविषयताकबोधस्य निराकरण-परमिति न तद्भाष्यासङ्गतिः ॥ अयमर्थः । शाब्दबोधो हि द्विविधः–खण्डवाक्यार्थबोधः अखण्डवाक्यार्थबोधश्चेति । तत्राद्यः–प्रकृतिप्रत्ययोभयात्मकसुप्तिङन्तरूपपदजन्यः; 'घटमानय', 'सत्यं ज्ञानमनन्तं ब्रह्म', 'यो वेद' इत्यादौ द्वितीयान्तघटपदब्रह्मपदादिभि-र्घटीया कर्मता ब्रह्मसम्बन्धिनी कर्मतेति बोधोत्पत्तेः । तथाविधबोध-विषयतायाश्च न निरवच्छिन्नत्वं, घटब्रह्मनिष्ठविषयताया घटत्वब्रह्म-

त्वावच्छिन्नत्वात्; कर्मत्वविषयतायाश्च घटब्रह्मावच्छिन्नत्वात्; त
लक्षणाखण्डबोधविषयतायाश्च सुतरां न निरवच्छिन्नत्वमिति—प्र
प्रकृतिप्रत्यययोरर्थभेदेन पदस्यैव विशिष्टार्थप्रतिपादनमवर्जनीयमित्य
खण्डबोधविषयतायां निरवच्छिन्नत्वं निराकृतम् ॥ पदसङ्घातरू
वाक्यस्येत्यादिना चाखण्डबोधविषयतायां तन्निराकृतमिति बोध्यम्

न चैवमपि—निर्विकल्पकात्मकोपस्थितेः परैस्स्वीकारात्तद्विषयता
निरवच्छिन्नत्वानिराकरणात् न्यूनतेति—वाच्यम्; शब्दस्य ति
तुशब्दस्य सविशेषगोचरप्रत्यक्षादिपूर्वकत्वरूपविशेषपरत्वस्य टीक
यामुक्तत्वेन सविकल्पकात्मकानुभवबलान्निर्विकल्पकस्मरणं न सम्
वति; अनुभवस्य समानाकारस्मृतिं प्रत्येव हेतुत्वमिति सूचनात
निर्विकल्पकोपस्थितेरपि निराकृतत्वात्। पदार्थानुभवजन्यसंस्कारेणै
पदज्ञानरूपोद्बोधकोपहितेन शाब्दबोधो जायते; न तु मध्ये स्मर
कल्प्यते, गौरवात्। एवं पक्षधर्मताज्ञानसहकृतेन व्याप्तिविषयव
संस्कारेणैवानुमितिः, न तु व्याप्तिस्मरणमपि तत्र कल्प्यत इति—परेष
मेकदेशिमते निर्विकल्पकस्मरणानभ्युपगमेन तद्विषयतायां व्यभिचा
राप्रसक्तेश्च भाष्ये तदनिराकरणेऽपि न्यूनताविरहादिति ॥ ए
प्रत्यक्षानुमित्यादेरपि निरवच्छिन्नविषयताकत्वनिराकरणपरमुत्तरभाष्य
योजनीयम् ॥

ननु—

'निर्विशेषवस्तुनिदंप्रमाणमिति न शक्यते वक्तुम्' इत्यादिभाष्य-
स्य ब्रह्मनिष्ठनिरवच्छिन्नविषयताकज्ञानरूपनिर्विशेषवस्तुसाधकप्रमाण-
निरासपरत्वं न युज्यते। यदप्याहुरिति महापूर्वपक्षे—अशेष-
विशेषप्रत्यनीकचिन्मात्रं ब्रह्मैव परमार्थ इति सजातीयविजातीय-
स्वगतभेदरूपविशेषसामान्याभावविशिष्टब्रह्मणस्सत्यत्वं प्रतिज्ञाय,
'सदेव सोम्येदमग्र आसीत्' इत्यादिना विशेषाभावप्रकारक-

दुर्वारत्वात्, अवान्तरबोधाभ्युपगमे च सत्यादिपदानामनृतजडादि-व्यावृत्तपरत्वेन पर्यायत्वाभावाद्ब्रह्मानृतं जडमित्यादिशङ्कानिरासक-तया पदत्रयसार्थक्यात्। अवान्तरबोधनाशानन्तरं च तज्जन्योद्बुद्ध-संस्कारसत्त्वेन शङ्कानुदयात्, तद्वत्ताबुद्धौ तदभाववत्ताज्ञानस्येवो-द्बुद्धसंस्कारस्यापि प्रतिबन्धकत्वादुद्बोधकविशिष्टसंस्कारस्य प्रतिबन्ध-कत्वे विनिगमनाविरहेण संस्कारोद्बोधकस्यापि प्रतिबन्धकतया निर्वि-कल्पकबोधस्य चोद्बोधकत्वेन तस्यापि तादृशशङ्कानिरासकत्वात् पर्यायतावैयर्थ्ययोरभावात् ॥

उक्तं चानन्दबोधाचार्येण—

"लक्ष्यार्थभेदाभावेऽपि व्यवच्छेद्यविभेदतः।
विज्ञानानन्दपदयोः पर्यायव्यर्थता न हि ॥" —इति ॥

अद्वैतसिद्धावप्युक्तम्—

"सत्यादिशब्दाः व्यावृत्तिद्वारा स्वरूपबोधे पर्यवस्यन्ति ॥"
—इति ॥

श्रीभाष्येऽपि—"सत्यज्ञानादिपदानामतद्व्यावृत्तिविशिष्टबोधजनक-त्वम्"—इत्यभिधाय, 'अतश्चैतल्लक्षणवाक्यमखण्डैकरसमेव प्रतिपाद-यति'—इत्यनेन निर्विकल्पकबोधजनकत्वमभिहितम्। एवं सन्मात्र-विषयकस्य सुषुप्तिकालीनानुभवस्य निरवच्छिन्नविषयताकस्य महा-पूर्वपक्षे उक्तत्वाच्छब्दादीनां निरवच्छिन्नविषयताकबोधजनकत्वनिरा-करणं सिद्धान्ते उपपन्नमेव ॥

ननु—पूर्वपक्षिणा निर्विशेषब्रह्मसाधकतया प्रथमं वेदान्तवाक्यवि-शेषानुदाहृत्य तत्र निरूपणीयं सर्वं निरूप्य पश्चात्तद्व्यतिरिक्तप्रमाण-तर्काः प्रदर्शिताः। अतस्सिद्धान्ते तेनैव क्रमेण तत्प्रतिक्षेपो युक्तः। तादृशक्रमं विहाय प्रथमं निर्विशेषस्य सकलप्रमाणाविषयत्वनिरूपणं,

तदनन्तरं च प्रत्यक्षादिनिर्विशेषविषयत्वनिरासपूर्वकं वेदान्तवाक्य
योजना च कथं सङ्गच्छते ? —इति चेत् ॥

अत्र व्यासार्याः—

"प्रत्यक्षविरोधे शास्त्रप्राबल्याभ्युपगमात्परेण वेदान्तवाक्यानि
प्रथममुदाहृत्य पश्चादन्यद्वक्तव्यं सर्वमुक्तम्, प्रबलतयाऽभि
मतप्रमाणपुरस्कारस्योचिततत्वात्। सिद्धान्तिना तु प्रत्यक्षवि
रोधे शास्त्रप्राबल्यस्यानभिमतत्वात्प्रत्यक्षादिनिर्विशेषविषयत्व
व्युदासपूर्वकं तदविरोधेन वेदान्तवाक्यानि स्वरसतो व्याख्या
यन्त इति सिद्धान्तस्य पूर्वपक्षक्रमाननुरोधित्वेऽपि न
क्षतिः ॥" —इति।

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

इति
श्रीशेषार्यवंशमुक्ताफलस्य श्रीयादवाद्रिनिवासरसिकस्य
श्रीमदनन्तार्यवर्यस्य कृतिषु
निर्विशेषप्रमाणव्युदासः
समाप्तः।

॥ श्रीः ॥

ब्रह्मविशेष्यकबोधजनकप्रमाणानामुपन्यासेन तन्निरासानावश्यकत्वात्, पूर्वपक्षोक्तार्थस्यैव सिद्धान्ते निरसनीयत्वात्। न च—अशेषविशेषप्रत्यनीकेत्यादिभाष्यस्य सजातीयादिभेदाभावविशिष्टं तदुपलक्षितं च ब्रह्म सत्यमित्यर्थः; सदेवेत्यादिश्रुतिरपि प्रथमतस्सजातीयादिभेदाभावप्रकारकबोधं जनयित्वा तदुपलक्षितब्रह्मनिष्ठनिरवच्छिन्नविषयताकबोधं जनयतीत्यभिप्रायेणोभयविधप्रमाणतयोदाहृता; अखण्डार्थवादिभिस्समानाधिकरणवाक्यस्थले प्रथमं सप्रकारकबोधः, तदनन्तरं च निष्प्रकारकबोधः स्वीक्रियते; तदुपलक्षितबोधे तद्विशिष्टबोधस्य कारणत्वाङ्गीकारात्; एवं च निरवच्छिन्नविषयताकबोधजनकप्रमाणस्य पूर्वपक्षोक्तत्वात् सिद्धान्ते तन्निरासो युज्यते—इति वाच्यम्। शुक्तिरूप्यादिनिवृत्तौ शुक्त्यादिसाक्षात्कारातिरिक्तस्य कर्मणः कारणत्वाभाववत् मिथ्याभिमतबन्धनिवृत्तावधिष्ठानभूतब्रह्मसाक्षात्कारातिरिक्तस्य कर्मणः कारणत्वासम्भवात्, ब्रह्मसाक्षात्कारेऽप्यैक्यविषयके भेदावलम्बिनः कर्मणो हेतुत्वासम्भवाच्च, 'अथशब्दस्य कर्मविचारानन्तर्यार्थकत्वं न सम्भवति' इति पूर्वपक्षनिरासार्थं 'यदप्याहुः' इत्यादिभाष्यं प्रवृत्तमिति व्यासार्यैरुक्तत्वात्; तथाविधपूर्वपक्षे जगन्मिथ्यात्वोपपादकप्रमाणोपन्यासस्यावश्यकत्वेऽपि ब्रह्मनिष्ठनिरवच्छिन्नविषयताशालिज्ञानजनकप्रमाणोपन्यासानावश्यकत्वेन सदेवेत्यादिवाक्यानामुभयविधप्रमाणोपन्यासपरत्वासम्भवात्; प्रपञ्चाधिष्ठानभूते ब्रह्मणि प्रपञ्चाभावबोधकप्रमाणस्य च स्वसमानाधिकरणाभावप्रतियोगित्वरूपमिथ्यात्वग्राहकतया सन्मात्रोपन्यासस्यावश्यकत्वात्॥

यदि च—यदप्याहुरित्यादिभाष्यं जिज्ञासासूत्रस्य पराभिमतपूर्वपक्षसिद्धान्तनिरासार्थमेव प्रवृत्तं; परेण हि प्रपञ्चस्य सत्यत्वेन ज्ञाननिवर्त्यत्वाभावात् ज्ञानाय ब्रह्मविचारोऽनारम्भणीय इति पूर्वपक्षं कृत्वा प्रपञ्चस्य मिथ्यात्वेन ज्ञाननिवर्त्यत्वात् ज्ञानाय स आरम्भणीय इति

सिद्धान्तितत्वात् महापूर्वपक्षनिगमने । तस्मात्परमार्थतो निरस्तसमस्तभेदविकल्पनिर्विशेषचिन्मात्रैकरसकूटस्थनित्यसंविदेव भ्रान्त्या ज्ञातृज्ञेयज्ञानस्वरूपविविधविचित्रभेदा विवर्तत इति तन्मूलभूताविद्यानिबर्हणाय नित्यशुद्धबुद्धमुक्तस्वभावब्रह्मात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते—इति भाष्यस्वारस्येन महापूर्वपक्षसिद्धान्तयोः परयोजनानिरासार्थत्वस्यैव प्रतीतेः ॥ यद्यपि—कर्मविचारानन्तर्यस्य अथशब्दार्थत्वनिराकरणायैव यदप्याहुरित्यादिभाष्यं प्रवृत्तमिति टीकायां अवतारितम् । तथाऽपि—परेषां पूर्वपक्षसिद्धान्तवर्णनं तु पूर्वमेव निरस्तमिति—जिज्ञासासूत्रान्ते टीकायामुक्तत्वात् परयोजनानिरासार्थत्वमपि तद्भाष्यस्य टीकानुमतमेव—इत्युच्यते । तथाऽपि प्रपञ्चमिथ्यात्वबोधकप्रमाणोपन्यासावश्यकत्वेऽपि निरवच्छिन्नविषयताकज्ञानजनकप्रमाणोपन्यासानावश्यकतैव ॥ —इति चेत् ॥

अत्रोच्यते—महापूर्वपक्षो यद्यपि जगन्मिथ्यात्वप्रतिपादनार्थमेव प्रवृत्तः । तथाऽपि मिथ्यात्वं प्रतीयमानत्वपूर्वकयथावस्थितवस्तुज्ञाननिवर्त्यत्वरूपं प्रपञ्चे निर्विशेषब्रह्मनिष्ठनिरवच्छिन्नविषयताशालिज्ञाननिवर्त्यत्वमादायैव उपपादनीयम् । तथाविधं च ज्ञानं 'सत्यं ज्ञानमनन्तं ब्रह्म', 'तत्त्वमसि' इत्यादिवाक्यजन्यमित्यभ्युपगम्यते । अतस्सत्यज्ञानादिवाक्योदाहरणं निरवच्छिन्नविषयताशालिबोधाभिप्रायेणैवेति सिद्धान्ते तन्निरासो युज्यत एव ॥

न च—तद्वाक्योदाहरणस्य निरवच्छिन्नविषयताशालिबोधाभिप्रायकत्वे अनृतजडपरिच्छिन्नव्यावृत्तब्रह्मपरतया तद्वाक्यव्याख्यानं महापूर्वपक्षे न युज्यत इति—वाच्यम् । परमते हि सत्यादिवाक्यस्यानृतादिव्यावृत्तिविशिष्टबोधेऽवान्तरतात्पर्यं निरवच्छिन्नविषयताशालिबोधे परमतात्पर्यं च स्वीक्रियते । अवान्तरबोधानङ्गीकारे सत्यादिपदानां पर्यायतया एकेनैव पदेन ब्रह्मबोधोपपत्तौ पदान्तरवैयर्थ्यस्य

॥ श्रीः ॥

संविन्नानात्वसमर्थनम्.

श्रीमन्महीशूरमहाराजाधिराजमहास्थानसभाभूषणैः
शेषार्यवंशमुक्ताफलैः श्रीयादवाद्रिनिवासरसिकैः
पण्डितमण्डलीसार्वभौमैः

श्री ॥ उ ॥ म. अ. अनन्तार्यवर्यैः

विरचितः ।

श्रीकाञ्चीपुरनिवासिभिः
विद्वद्वरेण्यैः श्री ॥ उ ॥ ति. अ. कु. श्रीनिवासार्यवर्यैः
सम्यक् परिशोध्य ।

म. अ. अनन्तार्येण
प्र. भ. तो. नरसिंहार्येण च
कल्याणपुर-विचारदर्पण-मुद्राक्षरशालायामङ्कयित्वा
प्राकाश्यं नीतः ॥

१८९९.

मूल्यं रू. ०—२—६

R. Krishnaswami Sastri

॥ श्रीः ॥

संविन्नानात्वसमर्थनम्.

श्रीमद्यादवशैलशृङ्गनिलयं नारायणं श्रीपतिं
श्रीमन्तं यतिभूपतिं च निखिलश्रुत्यन्तमन्थाचलम् ।
वन्दित्वा विशदीकरोति कुतुकाच्छ्रीभाष्यलेशाशयं
श्रुत्वाऽनन्तसुधीर्गुरोर्वदनतः शेषार्यवंशोद्भवः ॥१॥

महासिद्धान्ते तावत् संविन्नानात्वनिरासकानुमानस्य प्रतिक्षेपकाणि श्रीभाष्याक्षराणि दृश्यन्ते । तद्व्याख्यानाय इदमारभ्यते ॥

अत्र अद्वैतवादिनो वदन्ति—

पदार्थो द्विविधः दृक् दृश्यं चेति । दृगपि—चिद्रूपा, उपहितानुपहितभेदेन द्विविधा ; उपहिता जीवेश्वरभेदेन द्विविधा । अत्र ईश्वरोऽविद्योपाधौ बिम्बीभूतः, जीवस्तु प्रतिबिम्बीभूतः । अनुपहिता तु—निर्वाणदशायां केवलैव भाति, संसारदशायां तु भासमानसर्वानुस्यूतरूपेणापि ॥ तथा च **श्रुतिः**—

"तमेव भान्तमनुभाति सर्वं, तस्य भासा सर्वमिदं विभाति"
—इति ॥

अनुमानमपि—घटादयो भानविषयाः, आनयनादिविशिष्टतया प्रवृत्तिविषयत्वात्—इति । घटादिसर्वभासमानपक्षकानुमितौ लाघवादेकभानव्यक्तिर्विषयः । न च—ज्ञानस्य एकत्वे इदं घटज्ञानं न पटज्ञानमिति प्रतीतिः कथमुपपद्यतामिति—वाच्यम् । प्राची न प्रतीचीत्यादिप्रत्ययवदौपाधिकभेदविषयकत्वेनोपपत्तेः । चैत्रीयज्ञानं

मैत्रे नास्तीत्यादिप्रत्ययस्यापि घटाकाशः पटे नास्तीतिवदुपपत्तेः ॥

एवं—अनुपहितचिद्रूपा अनुभूतिः नानात्वाभाववती, अनुत्पन्नत्वात्; यन्नानात्ववत् तदुत्पत्तिमत्; यथा घटः—इति व्यतिरेक्यनुमानेनापि भेदनिषेधस्सिध्यति —इति ॥

तन्न ॥ घटादयः इच्छाविषयाः, आनयनादिविशिष्टतया प्रवृत्तिविषयत्वात्—इत्यनुमाने लाघवादेकेच्छासिद्धिप्रसङ्गात् । इयं घटेच्छा न पटेच्छेत्यादिप्रतीतेरौपाधिकभेदविषयकत्वसम्भवात् ॥ एवमित्याद्यनुमानान्तरञ्च श्रीभाष्य एव निरस्तम् । तथा च **श्रीभाष्यम्**—

"यदप्यनुभूतिरजत्वात् स्वस्मिन्नपि विभागं न सहत इति, तदपि नोपपद्यते । अजस्यैवात्मनः देहेन्द्रियादिभ्यो विभक्तत्वात्, अनादित्वेन चाभ्युपगताया अविद्याया आत्मनो व्यतिरेकस्यावश्याश्रयणीयत्वात् ॥ स विभागो मिथ्यारूप इति चेत्; जन्मप्रतिबद्धः परमार्थविभागः किं क्वचिद्दृष्टस्त्वया? अविद्याया आत्मनः परमार्थतो विभागाभावे हि वस्तुतोऽविद्यैव स्यादात्मा । अबाधितप्रतीतिसिद्धदृश्यभेदसमर्थनेन दर्शनभेदोऽपि समर्थित एव—छेद्यभेदाच्छेदनभेदवदिति ॥" —इति ॥

ननु—अत्र भाष्ये देहेन्द्रियादिभेदमादाय जीवे, आत्मभेदमादाय अविद्यायाञ्च, व्यभिचारप्रदर्शनमयुक्तम् । सजातीयभेदनिषेधार्थमनुमानस्य प्रवृत्तत्वेन तथाविधभेदमादायैव व्यभिचारस्य वक्तव्यत्वात् ॥ न च—इदमनुमानं भेदसामान्यनिषेधपरं, उत सजातीयभेदनिषेधपरमिति विकल्प्य; आद्ये व्यभिचारप्रदर्शनम्, अन्त्ये अबाधितप्रतीतिसिद्धेत्यादिदूषणान्तरमभिहितमिति न दोषः; टीकाशतदूषण्योरेतद्भाष्यस्य तथैव योजितत्वात्—इति वाच्यम् । गगने घटादिभेदसत्त्वेऽपि गगनं नानेत्यादिव्यवहारविरहेण नानाशब्दस्य

समभिव्याहृतपदार्थतावच्छेदकव्याप्यधर्मावच्छिन्नप्रतियोगिताकभेद - बोधकतया अनुभूतिर्नानेत्यनेन अनुभूतित्वव्याप्यधर्मावच्छिन्नभेद-निषेधरूपसजातीयभेदनिषेधस्यैव प्रतीत्या भेदसामान्यानिषेधविकल्प-स्यैवानुपपत्तेः ॥ —इति चेन्न ॥

'नानाविष्णुर्मोक्षदो नास्ति देवः' इत्यादौ नानाशब्दस्य भेद-सामान्यपरतया प्रयोगात्, 'नेह नानाऽस्ति किञ्चन' इति श्रुतौ नानाशब्दस्य परैरेव भेदसामान्यपरतया व्याख्यानाच्च, तथा विकल्पस्य युक्तत्वात् व्यभिचारसङ्गतेः ॥

न चैवमपि—भेदस्य केवलान्वयित्वेन भेदसामान्याभावरूप-कोट्यप्रसिद्ध्या अनुभूतिर्भिन्ना न वेति संशयासम्भवेन पक्षताविरहात् भेदसामान्याभावसाध्यकानुमानमेव न सम्भवतीति तत्परतया विकल्पो न युक्तः—इति वाच्यम् । प्रमेयत्वं घटनिष्ठाभावप्रतियोगि न वेति संशयवत्, भेदः अनुभूतिनिष्ठाभावप्रतियोगी न वेति संशय-सम्भवात्; सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्य पक्षतात्वेऽनुपपत्ति-विरहाच्च ॥

यद्यपि—सिद्धान्ते सिषाधयिषैव पक्षता, सिषाधयिषितधर्मविशि-ष्टो धर्मी पक्ष इति—न्यायपरिशुद्धावुक्तेः ॥

न चैवं—घनगर्जितेन मेघानुमानस्थले अनुमित्यनुपपत्तिरिति-वाच्यम् । तत्रापि ईश्वरीयसिषाधयिषासत्त्वेनानुमितिनिर्वाहात्, तस्या ईश्वरीयधर्मभूतज्ञानरूपतया सर्वापृथक्सिद्धत्वेन चैत्रादावपृथक्सिद्धि-सम्बन्धेन सत्त्वात्, तेन सम्बन्धेन हेतुत्वोपपत्तेः ॥

न चैवमपि—यत्र चैत्रस्य सिद्धिसिषाधयिषे मैत्रस्य तु केवलं सिद्धिः, तत्र चैत्रीयानुमित्यनुरोधेन भगवत्सङ्कल्पात्मकसिषाधयिषाया आवश्य-कतया तत्र मैत्रस्यापि अनुमितिप्रसङ्ग इति—वाच्यम् । वायौ रूपसम-वायसत्त्वेऽपि रूपप्रतियोगिकत्वविशिष्टसमवायाभाववत् मैत्रे भगव-

त्सङ्कल्पापृथक्सिद्धिसत्त्वेऽपि सिषाधयिषात्वविशिष्टापृथक्सिद्धेरकल्पनात् । सिषाधयिषायास्तत्साध्यविशिष्टतत्पक्षविषयकत्वप्रकारकानुमितिगोचरेच्छात्वेनानुगतरूपेणैव हेतुत्वं ; अनुमितिर्जायतामित्यादिविषयानवगाहिनी यत्र चैत्रादेरिच्छा, तत्रापि विषयावगाहिभगवदिच्छामादाय निर्वाहात् । अनुगताननुगतसहस्रेच्छाविरहकूटविशिष्टसिद्ध्यभावहेतुतावादिनां नैयायिकानां मते महागौरवात् , निरुक्तसिषाधयिषायाः पक्षतात्वादेव केवलव्यतिरेक्यनुमानं न स्वीक्रियते ; साध्यस्य प्रसिद्धत्वेन जीवीयसिषाधयिषाया असम्भवात् अनुमितेरुभयवादिसिद्धताविरहेण ईश्वरीयाया अकल्पनात् ॥ एवं च—उक्तपक्षताविरहेण भेदसामान्याभावसाध्यकानुमानासम्भवात् विकल्पो न युज्यते ॥

तथाऽपि—परैः सिषाधयिषायाः पक्षतात्वानङ्गीकारात् केवलव्यतिरेक्यनुमानाङ्गीकाराच्च तन्मतानुसारेण विकल्पोपपत्तिः ॥

न च—साध्यरूपविशेषणज्ञानाभावात् परेषामपि अनुभूतिः भेदसामान्याभाववतीत्यनुमितिर्न सम्भवतीति—वाच्यम् । अनुभूतौ भेदसामान्याभाव इति साध्यविशेष्यकानुमितौ बाधकाभावात् ॥

एतत्सूचनायैव श्रीभाष्ये स्वस्मिन्नानात्वमिति पक्षस्य प्रकारताबोधकः सप्तम्यन्तनिर्देशः कृतः ॥

न च—साध्याप्रसिद्धिस्थले साध्याभाववद्वृत्तित्वरूपव्यभिचारज्ञानासम्भवात् व्यभिचारप्रदर्शनं न युज्यत इति— वाच्यम् । साध्याभाववद्वृत्तित्वस्येव तत्समानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्यापि व्यभिचारशब्दार्थतया उत्पत्तित्वे भेदसमानाधिकरणाभावप्रतियोगिताऽनवच्छेदकत्वज्ञानविरोधिनः तादृशप्रतियोगितावच्छेदकत्वरूपव्यभिचारस्यैवोद्घाटनात् ॥

ननु—अनुपहितचितः पक्षत्वे उक्तरीत्या जीवे व्यभिचारसम्भवेऽपि उपहितानुपहितसाधारणचिन्मात्रस्य पक्षत्वे तु न जीवे तत्सम्भवः,

तस्या विपक्षत्वात्–**इत्याशङ्क्य** ; अविद्यायां व्यभिचारोऽभिहितः॥

ननु–अनुभूतिः पारमार्थिकभेदाभाववतीत्येव साध्यते। न च–पारमार्थिकभेदस्याप्रसिद्ध्या तदभावरूपसाध्याप्रसिद्धिरिति–वाच्यम्; घटत्वेन पटाभाववत् पारमार्थिकत्वेन भेदाभावरूपस्य व्यधिकरणधर्मावच्छिन्नाभावस्य साध्यत्वेन साध्याप्रसिद्धिविरहात्। एवं च–नाविद्यायां व्यभिचारः, पारमार्थिकत्वविशिष्टभेदस्यैव साध्याभावत्वेन तस्याविद्यायामभावेन तत्र हेत्वभावरूपोत्पत्त्यसत्त्वेऽपि क्षतिविरहात्–**इत्याशङ्कते**—'स विभागो मिथ्यारूप इति चेत्'– इति॥

उक्तव्यधिकरणधर्मावच्छिन्नाभावस्य साध्यत्वं न सम्भवति, तथा सति पारमार्थिकत्वविशिष्टभेदस्यैव साध्याभावत्वेन तस्य चाप्रसिद्ध्या तद्घटितव्यतिरेकव्याप्त्यसम्भवात्। अतो भेदसामान्याभावस्यैव साध्यीकार्यतया अविद्यायामुक्तव्यभिचारो दुर्वार इत्यभिप्रायेण **समाधत्ते**–

'जन्मप्रतिबद्धः परमार्थविभागः किं कचिद्दृष्टस्त्वया'– इति॥

जन्मप्रतिबद्धः–उत्पत्तिव्याप्यः॥

ननु–उक्तव्यधिकरणधर्मावच्छिन्नाभाव एव साध्यते, व्यतिरेकव्याप्त्यसम्भवेऽपि अन्वयव्याप्तिसद्भावात्; अनुपहितचितः पक्षत्वे जीवस्य, चिन्मात्रस्य पक्षत्वे चाविद्यायाः, दृष्टान्तत्वसम्भवात्–**इत्याशङ्कायां**; पारमार्थिकत्वावच्छिन्नभेदाभावसाध्यकेऽप्यविद्यायां व्यभिचारमभिप्रेत्याह–'अविद्याया आत्मनः'—इति॥

अत्र परमार्थविभागाभाव इत्यनुक्त्वा परमार्थतो विभागाभाव इति कथनं पारमार्थिकत्वेन विभागाभावरूपव्यधिकरणधर्मावच्छिन्नाभावस्फोरणाय। प्रतियोगितदभावरूपयोर्द्वयोर्यत्र एकं मिथ्या, तदपेक्षया अपरमधिकसत्ताकमिति नियमः। शुक्तौ रूप्यतदभावयोर्मध्ये रूप्यस्य प्रातिभासिकस्य मिथ्यात्वेन तदपेक्षया तदभावस्य व्यावहारिकस्याधिकसत्ताकत्वात्॥ एवं च–आत्मभेदाभेदयोर्मध्ये अविद्यायां

आत्मभेदस्य व्यावहारिकस्य मिथ्यात्वे आत्माभेदस्य तदपेक्षया अधिकसत्ताकत्वरूपं पारमार्थिकत्वं दुर्वारम् ॥ एतेन—जगन्मिथ्यात्ववादिमते मिथ्यात्वस्य सत्यत्वे अद्वैतहान्यापत्त्या मिथ्यात्वमभ्युपगन्तव्यम्, तथा च जगतः सत्यत्वापत्तिः, भावाभावरूपयोस्सत्यत्वमिथ्यात्वयोर्मध्ये मिथ्यात्वस्य मिथ्यात्वे सत्यत्वस्य तदपेक्षया अधिकसत्ताकत्वापत्त्या पारमार्थिकत्वापत्तेरित्यपि—सूचितम् ॥ प्रपञ्चित चेदं **न्यायभास्करे** ॥

एवं च—अविद्यायाः पारमार्थिकात्मैक्यवारणाय पारमार्थिकभेदस्यावश्यकतया पारमार्थिकत्वावच्छिन्नभेदाभावसाध्यकान्वय्यनुमानेऽप्यविद्यायां व्यभिचारः—इति भावः ॥

ननु—अनुभूतौ स्वसजातीयभेदाभाव एव साध्यते । न चैवमपि—जीवाविद्ययोर्व्यभिचारो दुर्वारः, देहेन्द्रियादेरपि प्रमेयत्वादिना जीवसजातीयत्वात्; अनुभूतित्वेन साजात्यविवक्षणे च घटादेर्व्यतिरेकदृष्टान्तत्वानुपपत्तिः, अनुभूतित्वेन घटादिसजातीयाप्रसिद्धेरिति—वाच्यम् । अनुभूतित्वघटत्वान्यतररूपेण साजात्यस्य विवक्षितत्वात् ॥ न च—उक्तान्यतररूपेण सजातीयं यत् तन्निष्ठप्रतियोगिताकभेदाभावसाधने बाधः; उभयत्वादिनाऽनुभूतिभेदस्यानुभूतौ सत्त्वात् अन्यतररूपावच्छिन्नप्रतियोगिताकभेदाभावसाधने च सिद्धसाधनम्; अनुभूतिनानात्ववादिनाऽपि तत्रानुभूतित्वावच्छिन्नभेदानभ्युपगमादिति—वाच्यम् । सजातीयनिष्ठोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदाभावस्य साध्यत्वाभ्युपगमेन दोषाभावात् । उभयावृत्तित्वञ्च—स्वप्रतियोगिवृत्तित्वस्वसामानाधिकरण्योभयसम्बन्धेन भेदविशिष्टान्यत्वं, तदाश्रयधर्मश्च—तद्व्यक्तित्वमेव ॥

वस्तुतस्तु—अनुभूतित्वं उक्तोभयसम्बन्धावच्छिन्नभेदाभाववत्, सामानाधिकरण्यसम्बन्धावच्छिन्नोत्पत्त्यभाववत्त्वात्, यदुक्तोभयसम्ब-

न्धेन भेदवत् तत् सामानाधिकरण्यसम्बन्धेनोत्पत्तिमत्, यथा घटत्वादिकम्—इत्यनुमाने तात्पर्यान्नानुपपत्तिः । भेदे च प्रतियोग्यवृत्तित्वं विशेषणं देयम् । तेन उभयादिभेदमादाय न बाधः । भाववृत्तित्वे सतीति हेतौ विशेषणं देयम् । तेन प्रागभावत्वे न व्यभिचारः—**इत्याशङ्कायां ;** अनुभूतिः अनुभूतिनिष्ठोभयावृत्तिधर्मावच्छिन्नभेदवती, चाक्षुषादिभेदवत्त्वात्, घटवदिति—प्रथमानुमानस्य प्रत्यनुमानं; अनुभूतित्वं उक्तोभयसम्बन्धेन भेदविशिष्टं, चाक्षुषादिवृत्तित्वे सति चाक्षुषादिभिन्नरासनादिवृत्तित्वात् ; यत्र तद्वृत्तित्वे सति तद्भिन्नवृत्तित्वं तत्रोक्तोभयसम्बन्धेन भेदवत्त्वं, यथा घटत्वादाविति—द्वितीयानुमानस्य च प्रत्यनुमानमभिप्रेत्य अनुभूतौ चाक्षुषादिभेदाभावे उक्तानुमानद्वयेऽपि हेतोरसिद्धिरिति तत्परिहारार्थमनुभूतौ चाक्षुषादिभेदं साधयति—**अबाधितप्रतीतिसिद्धेति** ॥

अत्र—दृश्यपदं तत्तदिन्द्रियजन्यप्रत्यक्षविषयरूपादिपञ्चकपरं ; तथा च- रासनं चाक्षुषाद्भिन्नं, चाक्षुषाविषयविषयकत्वात्, यद्यदविषयविषयकं तत्तद्भिन्नं, यथा नखच्छेदनाविषयविषयकं कुठारच्छेदनमित्यनुमानेन चाक्षुषरासनादीनां भेदस्सिध्यतीत्यर्थः । "प्रज्ञया घ्राणं समारुह्य घ्राणेन सर्वान् गन्धानाप्नोति, प्रज्ञया चक्षुस्समारुह्य चक्षुषा सर्वाणि रूपाण्याप्नोति, प्रज्ञया श्रोत्रं समारुह्य श्रोत्रेण सर्वान् शब्दानाप्नोति, प्रज्ञया जिह्वां समारुह्य जिह्वया सर्वान् रसानाप्नोति"—इत्यादिश्रुतिरत्रानुसन्धेया ॥

न च—उदाहृतभाष्ये दृश्यपदस्य रूपादिपञ्चकपरतया सङ्कोचे, छेद्यच्छेदनपदयोर्नखकुठारच्छेद्यादिपरतया सङ्कोचे च, स्वारस्यहानिरिति—वाच्यम् । घटपटाविति समूहालम्बने घटादिरूपदृश्यभेदेऽपि दर्शनभेदाभावेन एकप्रहारच्छेद्यानेकेक्षुकाण्डस्थले छेद्यभेदेऽपि छेदनभेदाभावेन यथाश्रुतार्थासम्भवेन सङ्कोचावश्यकत्वात् ॥

वेदान्ताचार्यास्तु—

उक्तरीत्या यथाश्रुते अनुपपत्तिमाशङ्कच—"दृश्यभेद इति न दृश्यानां स्वरूपभेदमात्रं विवक्षितम्, अपि तु कर्मकारकत्वविशेषणभेदः। अनेकेषामपि एकसामग्रीविशेषमध्यपतितानामेकं कर्मत्वं, एवं कारकान्तरेष्वप्यनेकेषां एकं तत्कारकत्वं दृश्यते। यथा दर्शपूर्णमासयोः कारणत्वमेकमेव, तथाऽत्राप्यनेकेषामेकं कर्मत्वमिति न विरोधः। एवं छेद्यभेदेऽपि द्रष्टव्यम्। ततश्चायमर्थः। यदि सर्वासां संविदामैक्यं स्यात् एकस्यां घटादिनियतविषयायां संविदि संविदन्तरविषयाणामपि प्रकाशप्रसङ्गः; न च तथोपलभ्यते, द्रष्टृदृश्यव्यवस्थादर्शनात्। अतोऽवगम्यते--मिथोऽनाघ्रातविषयाः संविदः स्वरूपतो भिन्ना इति; तत्रेदं निदृश्यते—यथा छेदनक्रियाः परस्परास्पृष्टविषयाः परस्परं भिद्यन्ते, तद्वदिति॥" —इति वदन्ति॥

टीकाकारास्तु---

"अबाधितप्रतीतिसिद्धेत्यादिभाष्यं नोक्तरीत्या प्रत्यनुमानप्रदर्शनपरं, किन्तु अनुभूतौ सजातीयभेदाभावसाधकानुमानस्य प्रत्यक्षबाधप्रदर्शनपरम्। पूर्वं प्रमाणप्रमेयानुपपत्ति -मिथ्यात्वानुमाननिरासमुखेन प्रत्यक्षादिप्रमाणसिद्धो भेदः पारमार्थिक इति समर्थितः। तत्तुल्यन्यायेन घटज्ञानं पटज्ञानाद्भिन्नमिति प्रत्यक्षादिसिद्धो दर्शनभेदोऽपि पारमार्थिकोऽभ्युपगन्तव्य इति पूर्वोक्तानुमाने प्रत्यक्षबाधो दुर्वार इति तद्भाष्यार्थः॥ ननु—अनुभूतिः स्वसजातीयनिष्ठप्रतियोगिताकानौपाधिकभेदाभाववतीति—साध्यते। अनौपाधिकत्वञ्च—उपाधिभेदातिरिक्तत्वं। उपाधिभेदात्मकोपधेयभेदस्य औपाधिकभेदत्वेन तदतिरिक्तभेदस्यानौपाधिकत्वात् घटकरकाद्यवच्छिन्नाकाशयोः भेदस्य

घटकरकादिभेदरूपत्वात्। तथा च न प्रत्यक्षबाधः। घटज्ञानं पटज्ञानभिन्नमिति प्रत्यक्षस्य प्राची न प्रतीचीत्यादिप्रतीतिवत् औपाधिकभेदविषयकत्वात्–**इत्याशङ्कायां**; भेदविषयकप्रमाणानामसति बाधके अनौपाधिकभेदविषयकत्वमौत्सर्गिकमिति प्रकृते बाधकाभावात् उक्तप्रत्यक्षमनौपाधिकभेदविषयकमेव॥ न च–उक्तप्रत्यक्षविषयीभूतो भेद औपाधिकः, घटविषयकत्वपटविषयकत्वादिरूपोपाध्याविषयकप्रतीत्याविषयत्वात्, प्राच्यादिभेदवत्— इत्यनुमानमेव उक्तप्रत्यक्षस्यानौपाधिकभेदविषयकत्वे बाधकमिति–वाच्यम्। धवच्छेदनं खदिरच्छेदनाद्भिन्नमिति धवादिरूपोपाध्यविषयकप्रतीत्यविषये अनौपाधिके धवादिच्छेदनभेदे व्यभिचारेण उक्तानुमानस्य बाधकत्वासम्भवात्, उक्तानुमाने सम्बन्ध्यजन्यप्रतियोगिकत्वस्योपाधित्वाच्च; प्राच्यादिभेदे उदयाचलादिरूपसम्बन्ध्यजन्यदिक्प्रतिकत्वस्य सत्त्वेन साध्यव्यापकत्वात्, धवादिच्छेदनस्य धवादियोगिरूपसम्बन्धिजन्यत्वेन तद्भेदे उक्तोपाध्यभावेन साधनाव्यापकत्वात्। सम्बन्धी हि द्विविधः–उत्पत्तिहेतुरभिव्यक्तिहेतुश्च। धवादिरूपसम्बन्धी छेदनादेरुत्पत्तिहेतुः, उदयाचलघटादिरूपसम्बन्धी प्राच्यादेर्घटकरकाकाशादेश्चाभिव्यक्तिहेतुः। तत्राद्यस्थले भेदः स्वाभाविकः, अन्त्ये त्वौपाधिकः; प्रत्यक्षज्ञानानां छेदनादिवत् ज्ञातृज्ञेयसम्बन्धिजन्यत्वेन उत्पत्तिहेतुसम्बन्धिकत्वात् स्वाभाविको भेद आवश्यकः–**इति परिहारमभिप्रेत्य छेद्यभेदात् छेदनभेदवदित्युक्तम्** ॥

तथा चोक्तं **संवित्सिद्धौ**—

"प्रतिप्रमातृविषयं परस्परविलक्षणाः ।
अपरोक्षं प्रकाशन्ते सुखदुःखादिवद्धियः ॥
सम्बन्धिव्यङ्ग्यभेदस्य संयोगेच्छादिकस्य तु ।
न हि भेदः स्वतो नास्ति नाप्रत्यक्षश्च सम्मतः ॥"—इति ॥

प्रतिप्रमातृ प्रतिविषयञ्च ज्ञानभेदोऽपरोक्षः ; मम ज्ञानं चैत्रज्ञानं, घटज्ञानं न पटज्ञानमिति प्रत्यक्षानुभवादिति—**प्रथमग्रन्थार्थः** ॥

सर्वगतमेकं ज्ञानं ज्ञातृज्ञेयरूपोपाधिभेदात् भेदेन प्रतीयते सम्बन्ध्यविषयकप्रतीत्यविषयभेदस्यौपाधिकत्वनियमात्—इत्य आह—**सम्बन्धिव्यङ्ग्यभेदस्येति** ॥ घटसंयोगः पटसंयोगा द्भिन्नः, घटेच्छा पटेच्छातो भिन्नेत्यादिप्रत्यक्षविषयीभूतभेदस्य सम्बन्ध्यविषयकप्रतीत्यविषयत्वेऽपि स्वाभाविकत्वदर्शनात नोक्तनियम इत्यर्थः—

—**इति वदन्ति** ॥

अत्र **प्राङ्मते**—अबाधितप्रतीतिसिद्धेत्यादिभाष्यं प्रत्यनुमानप्रदर्शन-परं, दृश्यपदच्छेद्यच्छेदनपदानि सङ्कुचितार्थकानि ; **टीकाकारमतेतु** प्रत्यक्षबाधप्रदर्शनपरं, दृश्यादिपदानि असङ्कुचितार्थकानीति—विशेष इति बोध्यम् ॥

ननु—सिद्धान्ते एकैकस्यैव धर्मभूतज्ञानस्य पुरुषभेदाभिन्नस्य घटपटाद्यनेकविषयकत्वस्वीकारात् घटपटादिज्ञानानामौपाधिकभेद-

निराकरणं न युज्यते—इति चेन्न ॥ एकस्या एव प्रकृतेरवस्थाभेदेन महदहङ्कारादिभेदस्य स्वाभाविकतावत् धर्मभूतज्ञानस्यापि अवस्थाभेदेन घटपटज्ञानादिभेदस्य स्वाभाविकत्वोपपत्तेरिति ॥

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

इति
श्रीशेषार्यवंशमुक्ताफलस्य श्रीयादवाद्रिनिवासरसिकस्य
श्रीमदनन्तार्यवर्यस्य कृतिषु
संविन्नानात्वसमर्थनं
समाप्तम् ।

॥ श्रीः ॥

॥ श्रीः ॥

ज्ञानयाथार्थ्यवादः

श्रीमन्महीशूरमहाराजाधिराजमहास्थानसभाभूषणैः
शेषार्यवंशमुक्ताफलैः श्रीयादवाद्रिनिवासरसिकैः
पण्डितमण्डलीसार्वभौमैः
श्री ॥ उ ॥ म. अ. अनन्तार्यवर्यैः
विरचितः ।

श्रीकाञ्चीपुरनिवासिभिः
विद्वद्वरेण्यैः श्री ॥ उ ॥ ति. अ. कु. श्रीनिवासार्यवर्यैः
सम्यक् परिशोध्य ।

म. अ. अनन्तार्येण
प्र. म. तो. नरसिंहार्येण च
कल्याणपुर-विचारदर्पण-मुद्राक्षरशालायामङ्कयित्वा
प्राकाश्यं नीतः ॥

१८९८.

मूल्यं रू. ०—६—६

॥ श्रीः ॥

ज्ञानयाथार्थ्यवादः

जगज्जन्मस्थेमप्रविलयमहानन्दलहरी-
निदानं श्रीकान्तं निरुपधिककारुण्यजलधिं ।
समाराध्य श्रीमद्यतिपतिमतं तन्यत इदं
मतीनां याथार्थ्यं यदुगिरिजुषाऽनन्तविदुषा ॥

ज्ञानत्वव्यापकं याथार्थ्यमिति वेदान्तसिद्धान्तः । यद्यपि नैयायिकमतेऽपि 'सर्वं ज्ञानं धर्मिण्यभ्रान्तं, प्रकारे तु विपर्ययः' - इति न्यायेन भ्रमस्यापि धर्म्यंशे प्रमात्वाङ्गीकारात् तद्वति तत्प्रकारकत्वरूपयाथार्थ्ये ज्ञानत्वव्यापकत्वमक्षुण्णम् । तथाऽपि ज्ञानत्वनिरूपितप्रतियोगिवैयधिकरण्याघटितव्यापकत्वस्य सिद्धान्त्यभिमतस्य नैयायिकैरस्वीकारान्न दोषः, धर्मितावच्छेदकांशे प्रमात्वस्य निरुक्तव्यापकतानाश्रयत्वात् ॥

उक्तं च **जिज्ञासाधिकरणश्रीभाष्ये**-"यथार्थं सर्वविज्ञानमिति वेदविदां मतम्"-इति । अत्र सर्वशब्देन प्रतियोगिवैयधिकरण्याघटितज्ञानत्वनिरूपितव्यापकत्वमेव विवक्षितम्, वेदविदामित्यनेन नैयायिकाद्यनभिमतत्वसूचनात् "वेदविदां-**भगवद्बोधायननाथमुनिमिश्रादीनां** इत्यर्थः"-इति टीकायां व्याख्यानात् । वस्तुतस्तु- तत्तद्धर्मप्रकारकज्ञानत्वव्यापकं तत्तद्धर्मवद्विशेष्यकत्वमिति यथार्थं सर्वविज्ञानमिति भाष्यार्थः । तथा च नैयायिकादिनये घटादिविशेष्यकस्य शुक्तिगतेदन्त्वादिप्रकारकस्य भ्रमस्याभ्युपगमेन इदन्त्वप्रकारकज्ञानत्वव्यापकत्वस्य इदन्त्ववन्निष्ठविशेष्यताकत्वे अभावान्नानुपपत्तिः ॥

एतेन—भूतलं घटवदित्यादिज्ञाने भूतलत्ववति भूतलत्वप्रकारकत्वस्य घटावच्छेदेन, घटत्ववति घटत्वप्रकारकत्वस्य भूतलावच्छेदेन, अभावसत्त्वात् प्रामाण्ये ज्ञानत्वव्यापकतानिर्वाहार्थं व्यापकताशरीरे प्रतियोगिवैयधिकरण्यनिवेशावश्यकतया नैयायिकाद्यनभिमतं प्रामाण्ये ज्ञानत्वव्यापकत्वं दुर्वचमिति—**निरस्तम्** । प्रतियोगिवैयधिकरण्यनिवेशेऽपि तत्तद्धर्मप्रकारकज्ञानत्वव्यापकं तत्तद्धर्मवद्विशेष्यकत्वमित्युक्तरीत्या नैयायिकाद्यनभिमतस्य व्यापकत्वस्य सुवचत्वात् ॥ तथा चोक्तश्रीभाष्ये विज्ञानपदं तद्धर्मप्रकारकज्ञानपरं, यथार्थपदं च तद्धर्मवद्विशेष्यकत्वावच्छिन्नपरं, सर्वपदं च प्रतियोगिवैधिकरण्यघटितव्यापकता परमिति बोध्यम् ॥

अथ—अत्र तत्प्रकारकज्ञानत्वावच्छेदेन तद्वद्विशेष्यकत्वसिद्धावपि नान्यथाख्यातिव्यावृत्तिः, रङ्गरजतयोरिमे रजतरङ्गे—इति ज्ञाने रजतत्वप्रकारकत्वरजतत्ववद्विशेष्यकत्वयोस्सत्त्वेऽपि अन्यथाख्यातित्वाविरोधात्, तद्वदेव तत्प्रकारत्वावच्छेदेन तद्वद्विशेष्यकत्वसिद्धिमादायार्थान्तरात् । तत्प्रकारकज्ञानत्वव्यापकं तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताकत्वमिति विवक्षणेऽपि रङ्गरजतयोरिमे रजते इति ज्ञानवदन्यथाख्यात्यव्यावृत्त्या अर्थान्तरावारणात् ॥ न च—स्वनिरूपितत्वस्वव्यधिकरणानिष्ठत्वस्वनिरूपकज्ञाननिरूपितत्वैतत्त्रितयसम्बन्धेन विशेष्यताविशिष्टप्रकारताकत्वाभावरूपयाथार्थ्ये ज्ञानत्वव्यापकत्वस्य विवक्षितत्वादन्यथाख्यातिव्यावृत्तिः ; इदं रजतमिति अन्यथाख्यातिस्थले प्रभाकराणां मते ग्रहणस्मरणात्मकज्ञानद्वयवत् सिद्धान्ते प्रत्यक्षात्मकज्ञानद्वयस्य तादृशज्ञानद्वयीयविषयतयोः निरूप्यनिरूपकभावस्य च वक्ष्यमाणरीत्या स्वीकारेऽपि न निरुक्तयाथार्थ्यानुपपत्तिः ; तत्र स्वनिरूपितत्वस्वव्यधिकरणानिष्ठत्वोभयसम्बन्धेन विशेष्यतावैशिष्ट्यस्य प्रकारतायां

सत्त्वेऽपि तृतीयसम्बन्धेन तत्र तद्वैशिष्ट्यविरहादिति--वाच्यम् । उक्तसम्बन्धत्रयेण विशेष्यताविशिष्टप्रकारताया एव सिद्धान्तिनामप्रसिद्धत्वेन तदभावरूपयाथार्थ्ये ज्ञानत्वव्यापकताया विवक्षासम्भवात् ॥ न च—प्रकारतात्वावच्छेदेनोक्तसम्बन्धत्रयेण विशेष्यतात्वावच्छिन्नाभावो विशेष्यतात्वावच्छेदेन वा स्वनिरूपितत्व-स्वाश्रयाभाववन्निष्ठत्व-स्वनिरूपकज्ञाननिरूपितत्वरूपसम्बन्धत्रयेण प्रकारतात्वावच्छिन्नाभावो विवक्षित इति---वाच्यम् । तथाऽपि संसर्गतावच्छेदकांशेऽन्यथाख्यात्यव्यावर्तनात्, आकाशावित्यादिवाक्यजन्यबोधे उद्देश्यतावच्छेदकीभूताकाशत्वव्याप्यत्वस्यान्यत्र प्रसिद्धस्य आकाशादिनिष्ठघटाकाशद्वित्वपर्याप्तौ भानोपगमेन संसर्गतावच्छेदकांशेऽन्यथाख्यातित्वस्य नैयायिकाभिमतत्वात्—इति चेन्न ॥ स्वनिरूपितत्व-स्वाश्रयाभाववन्निष्ठत्व —स्वनिरूपकज्ञाननिरूपितत्वैतत्त्रितयसम्बन्धावच्छिन्नविषयतात्वावच्छिन्नाभावस्य विषयतात्वावच्छेदेन विवक्षितत्वात् । स्वनिरूपितत्वं च—विशेष्यतात्वसंसर्गतात्वान्यतरावच्छिन्नं प्रकारतात्वानवच्छिन्नं वा ग्राह्यम् । तेन प्रकारतारूपविषयतायामुक्तसम्बन्धत्रयेण विशेष्यतारूपविषयतासत्त्वेऽपि न क्षतिः; आकाशावित्यादिवाक्यजन्यबोधीयपर्याप्तिनिष्ठसांसर्गिकविषयतायां उक्तसम्बन्धत्रयेण तदवच्छेदकतारूपविषयतावत्त्वस्य नैयायिकाभिमतत्वात्तद्व्यावृत्तिः । सिद्धान्ते तु तत्रापि संसर्गतदवच्छेदकयोः ज्ञानभेदस्वीकारान्नानुपपत्तिः । 'यथार्थं सर्वविज्ञानम्' इतिभाष्ये च ज्ञानपदंविषयतापरं, यथार्थपदं च—उक्तसम्बन्धत्रयावच्छिन्नविषयतासामान्याभावावच्छिन्नपरं, सर्वपदं च—व्यापकतापरम्—इति बोध्यम् ॥

---

१. (टि.) विशेष्यतायाः विशेष्यभेदेन भेदानङ्गीकाराभिप्रायेणाह-विशेष्यतात्वावच्छेदेन वेति ॥

अथवा[1]—स्वनिरूपकत्वस्वाश्रयाभाववन्निष्ठस्वनिरूपितविषयतानिरूपकत्वोभयसम्बन्धावच्छिन्नविषयतासामान्याभावरूपयाथार्थ्यं ज्ञानत्वावच्छेदेन विवक्षितमिति नानुपपत्तिः ॥ इदन्तु तत्त्वं—तद्विशेष्यकज्ञानसामान्यं तदवृत्तिधर्मप्रकारकत्वाभाववदिति 'यथार्थं सर्वविज्ञानम्' इति भाष्यार्थः। तज्ज्ञानीयविशेष्यताश्रयावृत्तिधर्मः तज्ज्ञानीयप्रकारत्वाभाववानिति यावत्। तदवृत्तिधर्मः तन्निष्ठविषयतावच्छेदकत्वाभाववानिति तु फलितम् ॥ तेन[2]—रङ्गरजतयोः इमे रजतरङ्गे—इति ज्ञानप्रकारयोः रङ्गत्वरजतत्वयोः तज्ज्ञानीयविशेष्यावृत्तित्वाभावेन तादृशज्ञानस्य भ्रमत्वाव्यावृत्तावपि न क्षतिः। तथा च—रजतत्वं शुक्तिनिष्ठविपतावच्छेदकत्वाभाववत्, शुक्त्यवृत्तित्वात्; यो यदवृत्तिः स तन्निष्ठधर्मनिरूपितावच्छेदकत्वाभाववान्—इति सामान्यव्याप्तौ, दण्डनिष्ठकारणतावच्छेदकत्वाभाववद्दण्डावृत्तिघटत्वादिकं दृष्टान्तः ॥

ननु—शुक्ताविदं रजतमिति भ्रमस्थले रजतत्वेन इदं जानामीति अनुभवेन रजतत्वावच्छिन्नशुक्तिनिष्ठविशेष्यताकज्ञानसिद्ध्या रजतत्वस्य शुक्तिनिष्ठविषयतावच्छेदकत्वसिद्धेरुक्तानुमाने बाधः; एवं तद्विशेष्यकतत्प्रकारकप्रवृत्तिं प्रति तत्प्रकारकतद्विशेष्यकज्ञानस्य हेतुतया प्रकृतेऽनुभवसिद्धशुक्तिविशेष्यकरजतत्वप्रकारकप्रवृत्त्यनुरोधेन तत्कारणतया शुक्तिविशेष्यकरजतत्वप्रकारकज्ञानमवश्यं स्वीकार्यमिति रजतत्वस्य शुक्तिनिष्ठविषयतावच्छेदकत्वमावश्यकम्—**इति चेत्** ॥ **उच्यते**। विशिष्टज्ञानस्य प्रवृत्तिहेतुतामतेऽपि इदं रजतमिति ज्ञानस्य इदन्त्वावच्छिन्ने रजतत्वविशिष्टवैशिष्ट्यावगाहितया तद्धेतुतया रजतत्वप्रकारकनिर्णयधर्मितावच्छेदकेदन्त्वप्रकारकनिर्ण-

१. (टि.) ज्ञानपदस्य मुख्यार्थपरत्वाभिप्रायेणाह--अथवेति ॥

२. (टि.) पर्यवसानाश्रयणस्य प्रयोजनमाह- तेनेति ॥

ययोः प्रवृत्तिपूर्वं सत्त्वमावश्यकम् । एवं च क्लृप्तनियतपूर्ववृत्तिताकेन तादृशज्ञानद्वयेनैव रजतत्वेन इदं जानामीत्यनुभवस्य रजतत्वप्रकारकशुक्तिविशेष्यकप्रवृत्तेश्चोपपत्तौ क्षणविलम्बकल्पनस्य मध्ये विशिष्टवैशिष्ट्यावगाहिज्ञानकल्पनस्य च अयुक्तत्वात् । तथा च रजतत्वस्य शुक्तिनिष्ठविषयतावच्छेदकत्वासिद्धेर्न दोष इत्यग्रे व्यक्तीभविष्यति ॥

ननु—उक्तरीत्या भ्रमस्थले प्राभाकरमतवत् ज्ञानद्वयं भाष्यकाराभिप्रेतश्चेत्तर्हि त्रिवृत्करणप्रतिनिधिन्यायाभ्यां शुक्त्यादौ रजजतादिसद्भावव्यवस्थापनमफलम्, शुक्तौ रजतासत्त्वेऽपि रजतस्मरणपुरोवृत्तिग्रहणाभ्यामेव प्रवृत्त्यादिनिर्वाहात् इति चेत् ॥ उच्यते । रजतस्मरणेदंपदार्थग्रहणरूपज्ञानद्वयकल्पने रजतं स्मरामीति तत्रानुभवप्रसङ्गः, न तु रजतं पश्यामीति साक्षात्कारित्वव्यञ्जकविषयतायाः स्मरणे अभावात् ॥ यद्यपि—सिद्धान्ते आत्मविषयकस्मरणसन्ततिरूपस्य ध्यानस्य निरन्तराभ्यासवशात् लौकिकविषयतावत्त्वरूपवैशद्यं स्वीकृतम् । तथाऽपि—अभ्यासविरहदशायां स्मरणे लौकिकविषयताया अप्रामाणिकत्वात् रजतभ्रमस्थले रजतं साक्षात्करोमीत्यनुभवानुपपत्तिः । अतः प्रत्यक्षात्मकमेव ज्ञानद्वयं स्वीकरणीयम् । रजतचाक्षुषे रजतचक्षुस्संयोगस्य कारणत्वात्, तादृशसंयोगसंपादनाय शुक्तौ रजतसद्भावव्यवस्थापनस्यावश्यकत्वात् ॥

न च[1]—लौकिकविषयतासम्बन्धेनैव चाक्षुषं प्रति चक्षुस्संयोगस्य हेतुत्वादलौकिकचाक्षुषमलौकिकज्ञानलक्षणादिसन्निकर्षेणैव भविष्यतीति तत्र रजतकल्पनं व्यर्थम्—इति वाच्यम् । सुरभि चन्दनमित्यादौ सौरभं पश्यामीति अनुभवाभावेन विषयतासम्बन्धेन चाक्षुषत्वाद्यवच्छिन्नाधिकरणतायास्सौरभादौ सत्त्वे मानाभावेन लौकिकान्यविषयतासम्बन्धेन

---

१. (टि.) नैयायिकाभिमतालौकिकसन्निकर्षखण्डनं नचेत्यादि हेतुत्वस्वीकारादित्यन्तम् ॥

चाक्षुषाद्युत्पत्तये ज्ञानलक्षणादेस्सन्निकर्षत्वस्य कल्पयितुमशक्यत्वात् 'सौरभं स्मरामि' इति प्रत्ययाभ्युपगमेन विषयतासम्बन्धेन स्मृतित्वाद्यवच्छिन्नाधिकरणताया एव तत्र स्वीकारात् युगपत् ज्ञानद्वयं न जायत इति नियमे मानाभावात् लौकिकालौकिकत्वविशेषाभावेन विषयतासम्बन्धेन चाक्षुषमात्रे लाघवेन संयोगत्वेन हेतुत्वस्वीकारात्। इदं रजतं पश्यामीत्याद्यनुभवेन भ्रमस्थलेऽपि लौकिकविषयत्वावश्यकत्वाच्च । अन्यथा–रजतादौ लौकिकप्रत्यक्षं विना रजताद्यानयनादौ प्रवृत्त्यनुपपत्तेः ॥

न च–लौकिकविषयतासम्बन्धेन प्रत्यक्षं प्रति दोषस्यापि हेतुत्वाङ्गीकारात् रजतादौ लौकिकसन्निकर्षविरहेऽपि रजतप्रत्यक्षोपपत्तिरिति–वाच्यम्; संयोगदोषयोरुभयोरेव हेतुत्वे परस्परव्यभिचारवारणायाव्यवहितोत्तरत्वस्य कार्यतावच्छेदके निवेशेन दोषस्य रजतभ्रमं प्रति हेतुत्वकल्पनेन च गौरवात् । सिद्धान्ते शुक्तित्वप्रकारकज्ञानस्य रजतभ्रमप्रतिबन्धकत्वेन तादृशज्ञानप्रतिबन्धकतयैव दोषस्योपयोगात् भ्रमं प्रति दोषस्य हेतुत्वाकल्पनात् ॥

अथ—इयं शुक्तिरिति ज्ञानस्य इदं रजतमिति ज्ञानं प्रति कथं प्रतिबन्धकत्वम्, तदभावतदभावव्याप्यज्ञानरूपत्वाभावात् । न च–तदभावावच्छेदकग्रहरूपतयैव इदं रजतमितिधीविरोधित्वं शुक्तिः रजतं नेति शुक्तित्वावच्छेदेन रजतत्वाभावनिश्चयविशिष्टस्य इयं

---

१ (टि) लौकिकालौकिकत्वरूपविशेषद्वयाङ्गीकारेऽप्याह–इदं रजतमिति ॥

२. (टि.) प्रवृत्त्यनुपपत्तेरिति ॥ विषयतासम्बन्धेन प्रवृत्तिं प्रति विषयतासम्बन्धेन प्रत्यक्षस्य कारणत्वात्। अन्यथाऽतीन्द्रियपरमाण्वाद्यानयनादिप्रवृत्त्यापतिरिति भावः ॥

३. (टि.) रजतलौकिकविषयत्वमनङ्गीकृत्यापि–इदं रजतं पश्यामीत्यनुभवसमर्थनमाशङ्कते --न चेति ॥

४. (टि.) शुक्तित्वज्ञान–इत्यर्थः ॥

शुक्तिरितिनिश्चयस्य सम्भवति ; शुक्तिः रजतं नेत्यादिनिश्चयशून्यता-दशायामपि तादृशोद्बुद्धसंस्कारसमवहितस्य इयं शुक्तिरिति-निश्चयस्य प्रतिबन्धकत्वानुभवेन तदसङ्ग्रहप्रसङ्गात् । न च–निश्चय-विशिष्टनिश्चयस्य प्रतिबन्धकतायामुद्बुद्धसंस्कारसाधारणरूपेणैव[1] निश्च-यस्य निवेशान्नोक्तानुपपत्तिरिति–वाच्यम् ; तावताऽपि इदं रजत-मिति ज्ञानद्वयस्वीकारे रजतज्ञानस्य निर्धर्मितावच्छेदककतया प्रति-बध्यत्वासम्भवात्—इति चेन्न ॥

शुक्तिज्ञानस्य रजतधीविरोधित्वं हि नावच्छेदकधर्मदर्शनविधया, किन्तु मन्दतरशब्दग्रहं प्रति तारतरशब्दग्रहस्य यथाऽभिभावक-ज्ञानविधया प्रतिबन्धकत्वं एवमल्पतरशुक्तिसंसृष्टरजतांशग्रहं प्रति शुक्तिज्ञानस्य प्रतिबन्धकत्वमनुभवबलात्स्वीक्रियते । अत एव निर्ध-र्मितावच्छेदकज्ञानस्यापि प्रतिबध्यतानिर्वाहः । तारशब्दग्रहदशायां निर्धर्मितावच्छेदककस्यापि मन्दशब्दग्रहस्यानुत्पत्तेस्तस्यापि प्रति-बध्यत्वावश्यकत्वात् ॥

उक्तञ्च **श्रीभाष्ये**—

> "बाध्यबाधकभावोऽपि भूयस्त्वेनोपपद्यते ।
> शुक्तिभूयस्त्ववैकल्यसाकल्यग्रहरूपतः ॥" —इति ॥

प्रचुरशुक्तिज्ञानस्य तदन्तर्गताल्पतररजतांशग्रहं प्रति अभिभा-वकज्ञानविधया प्रतिबन्धकत्वमित्यर्थः । तथा च–रजतभ्रमं प्रति शुक्तिज्ञानस्याभिभावकज्ञानविधया प्रतिबन्धकत्वे तद्विघटकतयैव दोषस्य भ्रमे उपयोगः ; भ्रमं प्रति दोषस्य हेतुतावादिनाऽपि शुक्तित्वप्रकारकज्ञानं प्रति दोषस्य प्रतिबन्धकत्वं कल्पनीयम् ।

---

१. (टि.) उद्बुद्धसंस्कारसाधारणरूपेणेति ॥ अनुद्बुद्धसंस्कारान्यतदभाव-प्रकारकत्वेन प्राथमिकनिश्चयस्य प्रतिबन्धकावच्छेदककोटौ निवेशनं कर्तव्यमिति भावः ॥

अन्यथा भ्रमोत्पत्तिकाले शुक्तित्वप्रकारकज्ञानापत्तेः—इति **नोक्त-प्रतिबन्धकत्वं सिद्धान्तिनामधिकम्** ॥

उक्तञ्च **श्रीभाष्ये**—

"कदाचिच्चक्षुरादेस्तु दोषाच्छुक्त्यंशवर्जितः ।
रजतांशो गृहीतोऽतो रजतार्थी प्रवर्तते ॥
दोषहानौ तु शुक्त्यंशे गृहीते तन्निवर्तते ।" —इति ॥

तत्र **टीका** ॥ "दोषः—शुक्त्यंशाग्रहहेतुः । प्रचुरग्रहणाभिभूतत्वाभावात् अदृष्टवशाच्च रजतग्रहणं; अदृष्टवशाच्चाम्बुनो ग्रहणादिति हि वक्ष्यते । उदाहरणान्तरेष्वप्युपजीव्यत्वाय हि तत्र तदुक्तिः ॥ "
—इति ॥

दोषः—शुक्त्यंशाग्रहहेतुः, शुक्त्यंशग्रहप्रागभावे क्षेमसाधारणकारणत्वाश्रयः[1] । तथा च—कार्यानुत्पादप्रयोजकत्वरूपं प्रतिबन्धकत्वमुक्तं भवति । प्रतिबन्धकतास्थले प्रतिबन्धकाभावस्य कार्यमात्रे हेतुतामङ्गीकृत्य कारणीभूताभावप्रतियोगित्वं प्रतिबन्धकत्वमिति—**एकः पक्षः** ॥ प्रतिबन्धकाभावस्य कार्यहेतुत्वं नोपेयते, किन्तु प्रतिबन्धकस्य कार्यप्रागभावे क्षेमसाधारणप्रयोजकत्वम् । न च—कारणकूटाश्रयक्षणोत्तरक्षणत्वस्य कार्योत्पत्तिव्याप्यतया प्रतिबन्धकसत्त्वेऽपि सकलकारणसत्त्वसम्भवात् कार्योत्पत्त्यापत्तिरिति—वाच्यम् । सकलकारणाश्रयत्वस्योक्तप्रतिबन्धकाभावसहितस्यैवोक्तव्याप्यतावच्छेदके प्रवेशादिति—**अपरः पक्षः** ॥ दोषः शुक्त्यंशाग्रहहेतुरिति वदतां टीकाकृतां द्वितीयपक्ष एव निर्भरः प्रतीयते । नचैवं प्रचुरग्रहणाभिभूतत्वाभा-

१, (टि.) क्षेमसाधारणेति ॥ अपूर्वपदार्थोत्पत्तिर्योगः; स्थितपरिपालनं क्षेमः । तथा च योगक्षेमोभयसाधारणकारणत्वं च प्रयोजकतारूपमिह विवक्षितम् । साधारण-इत्यस्य निरूपित-इत्यर्थः ॥

त्वादित्यनेनाभिभावकज्ञानाभावस्य रजतग्रहणहेतुत्वाभिधानं विरुध्यत इति-वाच्यम्, प्रतिबन्धकाभावसहितसामग्र्या एव कार्योत्पत्तिव्याप्यत्वेन एतन्मतेऽपि प्रतिबन्धकाभावस्य कार्यपूर्ववृत्तित्वानपायात् अभिभूतत्वाभावादिति पञ्चम्यास्तन्मात्रपरत्वसम्भवेनाविरोधात्[1]। तस्माल्लौकिकविषयतासम्बन्धेन[2] चाक्षुषं प्रति चक्षुस्संयोगत्वेन हेतुत्वस्यावश्यकत्वात्तादृशसंयोगसम्पादनाय त्रिवृत्करणप्रातिनिधिन्यायाभ्यां शुक्त्यादौ रजतादिव्यवस्थापनं **श्रीभाष्ये** युक्तमेव। तत्र त्रिवृत्करणेन तद्व्यवस्थापनं यथा—

"बहुस्यामिति सङ्कल्पपूर्वसृष्ट्याद्युपक्रमे ।
तासां त्रिवृतमेकैकामिति श्रुत्यैव चोदितम् ॥
त्रिवृत्करणमेवं हि प्रत्यक्षेणोपलभ्यते ।
यदग्नेरोहितं रूपं तेजसस्तदपामपि ॥
शुक्लं कृष्णं पृथिव्याश्चेत्यग्नावेव त्रिरूपता ।
श्रुत्यैव दर्शिता तस्मात्सर्वं सर्वत्र सङ्गताः ॥" —इति ॥

अयमर्थः—अण्डोत्पत्त्यभावप्रयोजकीभूताभावप्रतियोगिभूतानुयोगिकभूतान्तरप्रतियोगिकविलक्षणसंयोगस्त्रिवृत्करणम् । तच्च तासां त्रिवृतं त्रिवृतमिति श्रुत्या ; तेजः जलप्रतियोगिकविलक्षणसंयोगवत्, स्वाश्रयप्रतियोगिकविलक्षणसंयोगसम्बन्धावच्छिन्नशुक्लत्वावच्छिन्नप्रकारताशालिप्रमाविषयत्वात्, एवं तेजः पृथिवीप्रतियोगिकविलक्षण-

---

१. (टि.) पंचम्या इति-पंचम्यन्तशब्दस्येत्यर्थः । तन्मात्रपरत्वसम्भवेनेति-नियतपूर्ववृत्तित्वमात्रपरत्वसम्भवेनेत्यर्थः। मात्रशब्देन कारणत्वघटकानन्यथासिद्धत्वव्यवच्छेदः ॥

२. (टि.) लौकिकविषयतासम्बन्धेनेति-अभ्युपगम्यवादः अलौकिकसन्निकर्षस्य कारणतायाः उक्तरीत्या असम्भवात् लौकिकत्वस्य कार्यतावच्छेदककोटौ प्रवेशस्य सिद्धान्ते अनुपपन्नत्वादनुपयोगाच्च ॥

संयोगवत्, स्वाश्रयप्रतियोगिकविलक्षणसंयोगसम्बन्धावच्छिन्नकृष्ण त्वावच्छिन्नप्रकारताशालिप्रमाविषयत्वात्–इत्यनुमानेन च सिध्यतीति

न च–उक्तश्रुत्यनुमानाभ्यां पृथिव्यां तेजः प्रतियोगिकविलक्षण संयोगसिद्धावपि शुक्तिरूपपृथिव्यां रजतांशरूपतेजस्संयोगसिद्धिः सम्भवतीति—वाच्यम् । शुक्तौ तेजोन्तरसंयोगकल्पने इदं रजत मिति प्रात्यक्षिकभ्रमोपपत्तये तत्र ज्ञानलक्षणायाः प्रत्यासत्तिः कल्पनीयम् । सुरभिश्चन्दनखण्ड इत्युपनीतभानस्थले सौरभं साक्षा त्करोमीति प्रतीत्यभावेन सौरभादौ लौकिकविषयताविरहेपि प्रकृतं रजतं साक्षात्करोमीति प्रतीत्यनुरोधेन रजते लौकिकविषयता सत्त्वात्तन्निर्वाहाय, लौकिकसन्निकर्षस्येव दोषस्यापि तत्प्रयोजकत्वं कल्पनीयमिति गौरवं, रजतांशरूपतेजस्संयोगकल्पने च तदुभया कल्पनेन लाघवमिति लाघवज्ञानसहकारेण रजतांशरूपतेजस्संयोग सिद्धेः ॥

न च–शुक्त्यादौ प्रतीयमानानामवयवानां रजतावयवत्वं न सम्भवति, रजतादिभ्य आनीय निवेशितत्वाभावादिति–वाच्यम् । यतो रजतावयवतावच्छेदकधर्मावच्छिन्नत्वमेव रजतावयवत्वं, तच्च शुक्त्य न्तर्गतावयवानामप्यक्षतं, न ह्यापणस्थरजतावयवा अपि कुतश्चिद्रजता न्तरादेरानीय निवेशिताः ; तथा च–यादृशधर्मावच्छिन्नतेजोंशाद्रज तारम्भस्तादृशधर्मावच्छिन्नाः केचित्सूक्ष्मावयवाः शुक्तौ सन्ति ॥ एतेन– महाभूतानामेव परस्परं त्रिवृत्करणाङ्गीकारेऽपि शुक्तिरजतयोः परस्परं त्रिवृत्करणाभावेन शुक्तौ रजतावयवव्यवस्थापनं न सङ्गच्छत इति–निरस्तम् ॥ यादृशधर्मावच्छिन्नात्तेजोंशाद्रजतारम्भस्तादृशधर्मा वच्छिन्नानामप्यंशानां महाभूतात्मके तेजसि सत्त्वेन, शुक्त्यारम्भकता-

---

१. (टि.) एतेन—रजतावयवतावच्छेदकधर्मावच्छिन्नतेजोंशस्य शुक्त्यव यवान्तर्भावस्वीकारेणेत्यर्थः ॥

वच्छेदकधर्मावच्छिन्नानां पार्थिवभागानामपि महापृथिव्यां सत्त्वेन, तयोर्महाभूतत्रिवृत्करणदशायामेव मेलनसम्भवात् शुक्त्यादौ रजत-सद्भावोपपत्तेः ॥

ननु—उक्तरीत्या भूते भूतान्तरभ्रमस्थले सन्निकर्षोपपादनसम्भवेऽपि स्थाणौ पुरुषभ्रमस्थले सन्निकर्षो न सम्भवति, पार्थिवभागयोः परस्परं त्रिवृत्करणाभावेन स्थाणौ पुरुषावयवासम्भवात् ॥

न च—यादृशधर्मावच्छिन्नात्पार्थिवांशात्पुरुषारम्भः तादृशधर्मा-वच्छिन्नत्वं पुरुषान्तरान्तर्गतावयवेष्विव स्थाण्वन्तर्गतावयवेष्वपि सम्भवति—इति वाच्यम्, पुरुषान्तर्गतावयवेषु पुरुषारम्भकतावच्छेदक-धर्मावच्छिन्नत्वस्य प्रत्यक्षेण सिद्धिवत् स्थाण्ववयवेषु तादृशधर्मा-वच्छिन्नत्वस्य प्रत्यक्षादिप्रमाणेनासिद्धेः ॥

एवं—

"पलाशकुसुमभ्रान्त्या शुकतुण्डे पतत्यलिः ।
सोऽपि जम्बूफलभ्रान्त्या तमलिं हन्तुमिच्छति ॥" इत्या-

लङ्कारिकाङ्गीकृतस्य शुकतुण्डे पलाशकुसुमभ्रमस्य, भ्रमरे जम्बूफलभ्रमस्य च प्रात्यक्षिकस्य नोपपत्तिः । तत्राप्युक्तरीत्या सन्नि-कर्षासिद्धेः इन्द्रियसन्निकर्षाश्रयत्वस्य संसारिपुरुषीयप्रत्यक्षविषयता-व्यापकत्वादित्याक्षेपे स्थाण्वादौ पुरुषाद्यवयवव्यवस्थापनार्थं प्रति-निधिन्यायमुदाजहुर्भाष्यकृतः । तथा च श्रीभाष्यम्—

"सोमाभावे च पूतीकग्रहणं श्रुतिचोदितम् ।
सोमावयवसद्भावादिति न्यायविदो विदुः ॥
व्रीह्यभावे च नीवारग्रहणं व्रीहिभावतः ।
तदेव सदृशं तस्य यत्तद्द्रव्यैकदेशभाक् ॥
रूप्यादिसदृशश्चायं शुक्त्यादिरुपलभ्यते ।
अतस्तस्यात्र सद्भावः प्रतीतेरपि निश्चितः॥" —इति ॥

अत्र—यो यत्सादृश्यप्रकारकबहिरिन्द्रियजन्यप्रत्यक्षविषयः स तदवयव वानिति वक्ष्यमाणसामान्यव्याप्तौ दृष्टान्तसिद्धये प्रथमं पूतीकादै सोमाद्यवयववत्ता साधिता ॥ तथा च—स्थाण्वादिः पुरुषाद्यवयववान् पुरुषादिसादृश्यप्रकारकबहिरिन्द्रियजन्यप्रत्यक्षविषयत्वात्, यो यत्सा दृश्यप्रकारकप्रत्यक्षविषयः स तदवयववान्, यथा सोमसादृश्यप्रकारक बहिरिन्द्रियजन्यप्रत्यक्षविषयः सोमावयववान् पूतीकादिः—इत्यनुमानेन स्थाण्वादौ पुरुषाद्यवयवसिद्ध्या तत्र तत्प्रकारकप्रात्यक्षिकभ्रमोपपत्ति-रिति भावः ॥ यद्यपि—**तदेव सदृशमि**त्यर्थेनोदाहरणस्य, **रूप्यादि-सदृश** इत्यर्थेनोपनयस्य, **अतस्तस्यात्रसद्भाव** इत्यर्थेन निगमनस्य, प्रदर्शनेऽपि प्रतिज्ञाहेत्वोरप्रदर्शनान्न्यूनता । तथाऽपि—प्रतिज्ञाद्यवयव-त्रिकस्येव उदाहरणादित्रिकस्यापि मीमांसकैरिव सिद्धान्तिभिरपि पूर्णत्वाङ्गीकारान्न दोषः ॥

उक्तञ्च **सर्वार्थसिद्धौ बुद्धिसरे**—

> “‘त्रीनुदाहरणान्तान्वा यद्वोदाहरणादिकान्’ इत्युक्तक्रमेण त्र्यवयववत्त्वमेव प्रायेण परिपूर्णत्वम् ॥” —इति ॥

अथैवं—पञ्चावयवप्रयोगो न स्यात् । दृश्यते च तथा प्रयोगः यथा जिज्ञासाधिकरण**श्रीभाष्ये**—

> “स च प्रत्यगात्मा मुक्तावप्यहमित्येव प्रकाशते, स्वस्मै-प्रकाशमानत्वात्, यो यस्स्वस्मै प्रकाशते स सर्वोऽहमित्येव प्रकाशते । यथा—तथाऽवभासमानत्वेनोभयवादिसम्मतस्संसा-र्यात्मा । यः पुनरहमिति न चकास्ति, नासौ स्वस्मै प्रकाशते । यथा—घटादिः । स्वस्मै प्रकाशते चायं मुक्तात्मा तस्मादहमित्येव प्रकाशते ॥” —**इति** ॥

मैवम् ॥

प्रतिवादिनो यावद्भिरवयवैर्बोधस्तावन्तोऽवयवाः प्रयोक्तव्याः—

इत्येव नियमाङ्गीकारात्, पञ्चत्र्यादिसङ्ख्यानियमास्वीकारेण पञ्चाव-यवप्रयोगेऽप्याधिक्यविरहात् ॥

उक्तं च **सर्वार्थसिद्धौ**—

"त्र्यवयवपञ्चावयवयोर्द्वयोरपि सम्मतत्वादस्मत्पक्षवादिना त्र्यव-यवप्रयोगे पञ्चावयवप्रयोगे च न न्यूनाधिकभावप्रसङ्गः ।"

—**इत्यलं प्रासङ्गिकेन** ॥

'रूप्यादिसदृशश्चायं शुक्त्यादिरुपलभ्यते'–इत्युपनयानुरोधात् 'तदेव सदृशम्' इत्युदाहरणेऽपि सदृशपदेन सादृश्यप्रकारकप्रत्यक्षविषय एव विवक्षितः ॥

एतेन–यत्र यत्सादृश्यं तत्र तदवयववत्त्वं–इति व्याप्तिर्न सम्भवति । "अभेकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च"–इति सूत्रोक्तव्योमसादृश्यवति ब्रह्मणि तदवयववत्त्वाभावेन ; "भोगमात्रसाम्यलिङ्गाच्च"–इति सूत्रोक्तब्रह्मसादृश्यवति जीवे तद-वयववत्त्वाभावेन ; "शुनि चैव श्वपाके च पण्डिताम्समदर्शिनः", "निर्दोषं हि समं ब्रह्म"—इत्यादिगीतोक्तपरस्परसादृश्यवत्सु जीवेषु परस्परावयवविरहेण च, व्यभिचारात्- **इति निरस्तम्** ॥ तत्सादृश्य-प्रकारकबहिरिन्द्रियजन्यप्रत्यक्षविषयत्वं यत्र, तत्र तदवयववत्त्वं–इत्युक्तव्याप्तौ व्यभिचार विरहात्; उपनयवाक्ये उपलभ्यत इति पदेन सादृश्यप्रकारकबाह्यप्रत्यक्षाविषयत्वस्यैव हेतुताप्रतीतेः ॥

वस्तुतस्तु–यत्र यत्सादृश्यं तत्र तत्सम्बन्धितावच्छेदकधर्माव-च्छिन्नसम्बन्धित्वमित्येव सामान्यव्याप्तिः । तथा च व्योमसम्ब-न्धितावच्छेदकमहत्त्वत्वावच्छिन्नसम्बन्धस्य ब्रह्मणि, ब्रह्मसम्बन्धिता-वच्छेदकानन्दत्वावच्छिन्नसम्बन्धस्य मुक्ते, एकजीवसम्बन्धिता-वच्छेदकज्ञानस्वरूपतात्वावच्छिन्नसम्बन्धस्य च जीवान्तर–सत्त्वेन न व्यभिचारः ॥ —इति ॥

न चैवं– शुक्तौ रजतावयवो न सिध्यति, धर्मान्तरमादायापि सादृश्योपपादनसम्भवात्—इति वाच्यम् । बाह्यप्रत्यक्षविषयपदार्थे सादृश्यस्यावयवसम्बन्धनिबन्धनत्वस्य सर्वसिद्धत्वात् ॥

अत एव हि **श्रीहर्षेण** मुखे चन्द्रसादृश्योपपादनार्थं चन्द्रावयववत्त्वमुपपादितम् ॥ यथा **नैषधचरिते**—

"हृतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा ।"

इत्यादौ । एवमन्यत्रापि कविप्रबन्धेषु सादृश्योपपादनाय अवयवसम्बन्धप्रतिपादनं द्रष्टव्यम् ॥

न च–उक्तरीत्या शुक्तौ रजतावयवसिद्धावपि रजतत्वाश्रयस्यासिद्धया सन्निकर्षासिद्धितादवस्थ्यमिति—वाच्यम् । सिद्धान्ते अवयवसङ्घातस्यैव अवयविरूपत्वेन रजतावयवस्यैव रजतत्वाश्रयत्वात् ।

अत्रेदमवधेयम् —

त्रिवृत्करणप्रतिनिधिन्यायाभ्यां शुक्त्यादौ रजतादिव्यवस्थापनेन रजतादिसन्निकर्षोपपत्त्या प्रत्यक्षात्मकज्ञानद्वयस्य भ्रमस्थलीयप्रवृत्तौ सत्यरजतस्थलीयप्रवृत्तौ च विशिष्टज्ञानस्य प्रत्येकं हेतुत्वे कारणताद्वयप्रसङ्ग इति विशिष्टज्ञानज्ञानद्वयोभयसाधारणमेकमेव हेतुत्वमभिमतम् । हेतुतावच्छेदकञ्च—रजतत्वप्रकारताशालिज्ञानविशिष्टेदन्त्वप्रकारतानिरूपितधर्मिनिष्ठनिरवच्छिन्नविशेष्यताशालिज्ञानत्वम् । वैशिष्टयञ्च–एककालावच्छिन्नैकात्मवृत्तित्वसम्बन्धेन ॥

न चैवं–नेदं रजतमिति ज्ञानात्प्रवृत्त्यापत्तिः, उक्तकारणसत्त्वादिति–वाच्यम् । रजतभेदरजतत्वात्यन्ताभावतद्व्याप्यावगाहिज्ञानानि इदन्त्वावच्छिन्नविशेष्यकरजतत्वप्रकारकबुद्धिप्रतिबन्धकत्वेनानुगमय्य तादृशानुगतरूपावच्छिन्नाभाववैशिष्टयस्यापि प्रवृत्तिजनकतावच्छेदककोटौ निवेशात् । वैशिष्टयञ्च—एककालावच्छिन्नैकात्मवृत्तित्वरूपमेव ॥

उक्तं च **टीकायां**—

"इष्टरूपरूपिनिरन्तरभानात्प्रवृत्तिः, द्विष्टरूपरूपि निरन्तरभानात् निवृत्तिः। रूपरूपिणोर्धर्म्यन्तरनिष्ठत्वविरोधिधर्मान्तराश्रितत्व-भानविरहेण विशेषितं भानं निरन्तरभानम् ॥" - इति ॥

रूपस्य धर्म्यन्तरानिष्ठत्वभानविरहेण रूपिणो विरोधिधर्मान्तरा-श्रितत्वभानविरहेण च विशेषितं रूपरूपिणोर्भानं निरन्तरभानमिति-योजना बोध्या ; रूपरूपिणोरित्यस्याकाङ्क्षावशेनोभयत्रान्वयात् । रूपस्य रजतत्वादेर्धर्म्यन्तरनिष्ठत्वं धर्म्यन्तरमात्रनिष्ठत्वं एतद्धर्म्यवृत्ति-त्वपर्यवसितम् । तच्च एतद्धर्मिनिष्ठात्यन्ताभावप्रतियोगित्व-एतद्धर्मि-निष्ठभेदप्रतियोगितावच्छेदकत्व – एतद्धर्मिनिरूपिताधेयताशून्यत्वादि-रूपम् । तज्ज्ञानं च रजतत्वमिदंपदार्थनिष्ठात्यन्ताभावप्रतियोगि, इदंपदार्थनिष्ठभेदप्रतियोगितावच्छेदकं, इदंपदार्थावृत्ति, इदं रजतं रजतत्वात्यन्ताभाववदित्यादिरूपम् । रूपिणः—इदमर्थस्य । विरोधि-धर्माश्रितत्वं—रजतत्वाभावतदवच्छिन्नभेदतद्व्याप्यधर्मवत्त्वम् । उक्त-ज्ञानानामनुगतरूपेण एकाभावनिवेशश्च 'भानविरहेण' इत्येकवचनं प्रयुञ्जानैः **टीकाकारैरेव** व्यञ्जितः ॥

वस्तुतस्तु—भ्रमस्थले ज्ञानद्वयीयविशेष्यताप्रकारतयोः परस्परं निरूप्यनिरूपकभावाङ्गीकारात् विशिष्टज्ञानवत् ज्ञानद्वयस्यापि रजतत्वनिष्ठप्रकारतानिरूपितेदन्त्वावच्छिन्नविशेष्यताशालिज्ञानत्वेनैव प्रवृत्तिजनकत्वमिति नानुपपत्तिः ॥

एवं च– नेदं रजतमिति ज्ञानप्रतिबध्यत्वं च भ्रमस्य निर्वहति, रजतत्वनिष्ठप्रकारतानिरूपितेदन्त्वावच्छिन्नविशेष्यताशालिबुद्धित्वरूप तत्प्रतिबध्यतावच्छेदकस्य रजतत्वप्रकारकज्ञानविशिष्टेदन्त्वप्रकारक-ज्ञानरूपभ्रमे सत्त्वात् । अन्यथा विभिन्नज्ञानीयरजतत्वप्रकारतेद-न्त्वावच्छिन्नविशेष्यतयोर्निरूप्यनिरूपकभावानङ्गीकारे निरुक्तप्रति-

बध्यतावच्छेदकस्य भ्रमसाधारण्याप्रसक्तेरुक्तप्रतिबध्यत्वानुपपत्तिः
रूपरूपिणोर्धर्म्यन्तरनिष्ठत्वविरोधिधर्मान्तराश्रितत्वभानविरहेण भा
निरन्तरभानमिति टीकाग्रन्थोऽप्युक्तार्थपर एव। भानविरहेणेति तृत
यार्थः प्रयोज्यत्वं भानपदार्थैकदेशविषयतायामन्वेति। भानं नाम
ज्ञानं, तत्त्वं च सविषयकत्वमेव। तथा च—नेदं रजतमित्यादिविरोधि
ज्ञानाभावप्रयोज्यविषयतावत्त्वं इदं रजतमित्यादिप्रवर्तकज्ञानस्योक्त
भवति। प्रतिबध्यतावच्छेदकविषयतायां हि प्रतिबन्धकीभूतज्ञानाभावस्य
प्रयोजकत्वम् ॥ तथा च—नेदं रजतमिति ज्ञानप्रतिबध्यतानिर्वाहाय
उक्तभ्रमस्थले ज्ञानद्वयीयविषयतयोर्निरूप्यनिरूपकभावस्य स्वीकर
णीयतया तादृशनिरूप्यनिरूपकभावापन्नविषयताया एव प्रवर्तक
तावच्छेदकत्वमिति—भावः ॥

अत एव उक्तनिरन्तरभानं विशेषणविशेष्यभावोपपादकत्वेन **श्रीभाष्ये** अभिधास्यते—

"देशान्तरस्य तद्विशेषणत्वं देशान्तरस्यागृहीतस्वदेशचन्द्रस्य च निरन्तरग्रहणेन भवति॥" —इति ॥

एतद्भाष्यार्थश्च द्विचन्द्रज्ञानविचारावसरे वक्ष्यते॥ एवं **पीतशङ्खादौ** त्विति श्रीभाष्यमपि उक्तनिरूप्यनिरूपकभावगमकम्। अन्यथा पीतत्वावच्छिन्नप्रकारत्वशङ्खत्वावच्छिन्नविशेष्यतयोर्निरूप्यनिरूपकभावाभावे साक्षात्परम्परया वा तत्पदप्रयोज्यविषयतानिरूपितविषयताप्रयोजकत्वरूपसामर्थ्याभावेन समासासाधुतापत्तेः। 'अयमेति पुत्रो राज्ञः, पुरुषोऽपसार्यताम्'—इत्यादौ राजपुरुषादिपदानां समासवारणाय समर्थपदयोरेव समासानुशासनात्, सामर्थ्यस्य निरुक्तैकवाक्यतारूपत्वात्। इदं रजतमिति भ्रमस्थलसिद्धस्य रजतत्वेनेदं जानामीत्यनुभवस्यापि नानुपपत्तिः। 'इमे रजतशुक्ती' इति ज्ञानस्थले रजतत्वेन शुक्ति

१. (टि.) पीतशङ्खेतिसमासासाधुतापत्तेरित्यर्थः॥

ज्ञानामीत्यनुभववारणाय द्वितीयान्तोल्लेख्येदमादिविशेष्यकत्वतृतीयान्तोल्लेख्यरजतत्वादिप्रकारकत्वयोरवच्छेद्यावच्छेदकभावभानस्यावश्यकत्वेन ययोर्विषयितयोरवच्छेद्यावच्छेदकभावस्तन्निरूपितप्रकारताविशेष्यतयोर्निरूप्यनिरूपकभाव इति नियमसिद्धस्य भ्रमीयविशेष्यताप्रकारतयोर्निरूप्यनिरूपकभावस्यापरित्यागात् ॥

एवं[1]—स्वनिरूपकज्ञानानिरूपितत्व-स्वनिरूपितत्वोभयसम्बन्धेन प्रकारताविशिष्टविशेष्यताशालिबुद्धित्वरूपं भ्रमपदशक्यतावच्छेदकमपि सुवचम् ॥

एतेन[2]—रजतत्वप्रकारकज्ञानविशिष्टेदन्त्वप्रकारकज्ञानत्वस्य तथात्वे[3] नेदं रजतमिति ज्ञानस्यापि भ्रमपदवाच्यत्वापत्तिः, इदं रजतमिति ज्ञानविरोधिज्ञानाभावविशिष्टत्वस्यापि तच्छक्यतावच्छेदकगर्भे निवेशे च इदंरजतमिति प्रमाया अपि भ्रमपदवाच्यत्वापत्तिः। स्वभिन्नत्व-एककालावच्छिन्नैकात्मवृत्तित्वोभयसम्बन्धेन रजतत्वप्रकारकज्ञानविशिष्टेदन्त्वप्रकारकज्ञानस्योक्तज्ञानाभावविशिष्टस्य भ्रमपद-

---

१. (टि.) एवमिति ॥ एवं-भ्रमस्थले ज्ञानद्वयविशेष्यताप्रकारतयोर्निरूप्यनिरूपकभावाङ्गीकारेणेत्यर्थः । प्रकारताविशिष्टशरीरे-प्रथमसम्बन्धनिवेशात् रजतं दृष्ट्वा 'इदं रजतम्' इति प्रमायाः भ्रमत्ववारणं ; द्वितीयसम्बन्धनिवेशात् शुक्तिं दृष्ट्वा 'इयं शुक्तिः' इति प्रमायाः ज्ञानान्तरीयरजतत्वनिष्ठप्रकारताविशिष्टविशेष्यतानिरूपकत्वेऽपि न भ्रमत्वापत्तिः ॥

२. (टि.) एतेन-निरुक्तरूपस्य भ्रमपदशक्यतावच्छेदकत्वाङ्गीकारेण ॥

३. (टि.) तथात्वे-भ्रमपदशक्यतावच्छेदकत्वे ॥

४. (टि.) एककालावच्छिन्नत्वनिवेशात्-भिन्नकालीनरजतप्रमावत्पुरुषनिष्ठशुक्तिप्रमाया इदमित्याकारिकायाः भ्रमत्ववारणम् । एकात्मवृत्तित्वनिवेशात्—भिन्नपुरुषीयरजतप्रमासमानकालीनतादृशप्रमाया न भ्रमत्वापत्तिः ॥ स्वभिन्नत्वनिवेशस्य मूलोक्तदूषणवारणमेव प्रयोजनम् ॥

वाच्यत्वे च रजतत्वप्रकारकज्ञानोत्तर[1]कालीनेदन्त्वप्रकारकज्ञानस्य प्रमात्मकस्य तथात्वापत्तिरित्यादिकं—**समाहितम्** ॥

उक्तरीत्या भ्रमस्थल एव विभिन्नज्ञानीयप्रकारताविशेष्यतयो र्निरूप्यनिरूपकभावस्वीकारेण निरुक्तभ्रमपदशक्यतावच्छेदकस्यानतिप्रसङ्गात् । "संशयस्थले—पुरोवृत्तिमात्रमगृहीतविशेषमनुभूयते, स्थाणुपुरुषौ तु स्मर्येते"—इति **सर्वार्थसिद्ध्**युक्तरीत्या कोटिद्वयस्मृतिविशिष्टधर्म्यनुभवस्य स्वीकारात् स्थाणुत्वतदभावनिष्ठयोस्स्मृतिनिरूपितप्रकारतयोरनुभवीयेदन्त्वावच्छिन्नविशेष्यतानिरूपितत्वेन स्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकत्व-स्वसामानाधिकरण्योभयसम्बन्धेन प्रकारताविशिष्टप्रकारतारूपसंशयपदशक्यतावच्छेदकमपि पुरोवृत्त्यनुभवविशिष्टकोटिद्वयस्मरणे निराबाधम् । वह्न्यभावविशिष्टह्रदांशे अनुभवरूपं वह्न्यंशे स्मरणरूपं निर्वह्निर्ह्रदो वह्निमानित्याकारकमाहार्यज्ञानं स्वीक्रियते । तत्रापि स्वनिरूपितत्वस्वावच्छेदक[2]विरोधितावच्छेदकधर्मावच्छिन्नत्वोभयसम्बन्धेन विशेष्यताविशिष्टप्रकारताशालिज्ञानत्वरूपमाहार्यपदशक्यतावच्छेदकमव्याहतम् । अयं च निरूप्यनिरूपकभावः प्राभाकरमतसिद्ध इति **प्रामाण्यवादगादाधर्यां** स्फुटम् ॥

न च—विभिन्नज्ञानीयप्रकारताविशेष्यतयोर्निरूप्यनिरूपकभावस्वीकारे इदं रजतमित्यादिभ्रमे तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशालित्वरूपमन्यथाख्यातित्वमङ्गीकृतमेवेति—वाच्यम् । अन्यथाख्यातित्वं हि—स्वाश्रयाभाववन्निष्ठत्व-स्वनिरूपितत्व-स्वनिरूपकज्ञाननिरूपितत्वैतत्त्रितयसम्बन्धेन प्रकारताविशिष्टविशेष्यता[3]-

---

१. (टि) ज्ञानोत्तरकालीनेति — ज्ञानोत्पत्तिक्षणोत्तरक्षणोत्पत्तिकेत्यर्थः । ज्ञानस्य क्षणद्वयावस्थायित्वमङ्गीकृत्येदम् । अन्यथा एककालावच्छिन्नत्वस्य तयोः पूर्वोत्तरज्ञानयोरसत्त्वेन उक्तानुपपत्तिविरहात् ॥

२. (टि.) स्वावच्छेदकस्य विरोधीत्यर्थः ॥

३. (टि.) विशेष्यतावत्त्वमिति—निरूपकतासम्बन्धेन तद्वत्त्वमित्यर्थः ॥

त्त्वम् । तच्च न सिद्धान्ते स्वीकृतम्; तृतीयसम्बन्धानभ्युपगमात् भ्रमस्थले सर्वत्र ज्ञानभेदाभ्युपगमेन विशेष्यताप्रकारतयोरेकज्ञान-निरूपितत्वासम्भवात् ॥

यत्तु — पुरोवृत्त्यनुभवजनितसंस्कारेण कोटिद्वयस्मृतिहेतु-संस्काराभ्यां च युगपदेकं स्मरणं संशयस्थले स्वीक्रियत इति—**सर्वार्थसिद्धावुक्तं; तदपि**—'भाष्यकृतां अन्यथाख्यातिरभिप्रेता' इति वदतां सयूथ्यानां मतस्य तत्रैव पूर्वमुपन्यस्तत्वात् तन्मताभिप्रायेण ॥

तथा हि—

'शुक्तिशकलमेव मया रजततया गृहीतम्'

इति प्रतीतिस्वारस्यात्,

"योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते ।"

"अयथावत्प्रजानाति बुद्धिस्सा पार्थ राजसी ।"

"अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति या मतिः ।"

इत्याद्याप्तवाक्यस्वारस्याच्च भ्रान्तावन्यथाभानं प्रथममुपन्यस्तं भाष्य-काराभिप्रेतमित्येके वदन्तीति केषांचिन्मतमुपन्यस्य ज्ञानसामान्यस्य याथार्थ्यपक्ष एव भाष्यकाराभिप्रेत इति कल्पान्तरं चोपन्यस्तम् ॥ तत्र द्वितीयकल्पस्य साम्प्रदायिकत्वप्रतिपादनेन तत्रैव स्वनिर्भर-स्सूचितः ॥ तदनन्तरञ्च पुरोवृत्त्यनुभवसहितकोटिद्वयस्मरणं संशयः, अथवा पुरोवृत्त्यनुभवजनितसंस्कारकोटिद्वयस्मृतिहेतुसंस्कारैरेकस्मरणं संशय इति, संशयस्थले पक्षद्वयं प्रतिपादितम् । तत्र पुरोवृत्त्यनुभव-सहितकोटिद्वयस्मरणं संशय इति पक्ष एव **ज्ञानयाथार्थ्यमते** स्वीक्रियते; अथवेत्यादिपक्षस्तु अन्यथाख्यात्यङ्गीकर्तृमताभिप्रायेण—इति विवेकः ॥

अथ—अत्र ज्ञानयाथार्थ्यपक्षे धर्मिस्थाणुत्वरूपैककोट्युभयांशेऽनुभवस्तदभावरूपकोट्यंशे स्मरणमिति ज्ञानद्वयात्मकं संशयात्मक-

ज्ञानमिति कुतो न स्वीकृतम् । एवमन्यथाख्यात्यङ्गीकारपक्षे स्थाणुत्वरूपकोट्यंशे लौकिकसन्निकर्षजन्यत्वाङ्गीकारे एककोटि भासकलौकिकप्रत्यक्षसामग्र्या अपरकोटिभानप्रतिबन्धकत्वेन लौकिक सन्निकर्षजन्यसंशयासम्भवेऽप्युभयकोट्यंशे ज्ञानलक्षणाजन्यमानस प्रत्यक्षात्मकसंशयस्वीकार एवोचितः, स्मरणात्मकत्वपक्षेऽपि स्मर णस्य समानाकारानुभवजन्यत्वनियमेनानुभवात्मकसंशयस्वीकारस्या वश्यकत्वात् —इति चेत् ॥

मैवम् । ज्ञानयाथार्थ्यपक्षे स्थाणुत्वधर्म्युभयांशे अनुभवरूपत्व अभावरूपकोट्यंशे स्मरणरूपत्वमित्यङ्गीकारे कोटिद्वयस्यैकज्ञानविषय त्वाभावेन कोटिद्वयप्रकारतयोस्सामानाधिकरण्याभावेन निरुक्तसंश यपदशक्यतावच्छेदकानुपपत्तेः, सिद्धान्ते ज्ञानलक्षणानङ्गीकारेणा नुभवरूपत्वासम्भवेनान्यथाख्यातिपक्षे स्मरणरूपतास्वीकारात् । स्मृते समानाकारानुभवजन्यत्वानियमस्त्वसिद्ध एव, पदस्मृतौ वाक्यस्मृतौ च व्यभिचारात् पदघटकानां वर्णानां वाक्यघटकानां पदानाञ्च युग पदवस्थानासम्भवेन तावद्गोचरप्रत्यक्षासम्भवात् । तत्र—यथा प्रत्येक वर्णानुभवजन्यसंस्कारैस्तावद्गोचरमेकं स्मरणं, तथा प्रत्येकं स्थाणुत्वा द्यनुभवजन्यसंस्कारैस्तावद्गोचरमेकं स्मरणमिति—नानुपपत्तिः । स्थाणु त्वविरुद्धविशेषणतया स्थाणुत्वाभाववान् इति निर्धर्मितावच्छेदक कानुभवजन्यसंस्कारस्थाणुत्वाभावविरुद्धापृथक्सिद्धिसम्बन्धेन स्थाणु

१. (टि·) ननु—धर्मिस्थाणुत्वतदभावसंस्काराणां प्रत्येकानुभवजन्यान संशयकारणत्वोपगमो न युज्यते । संशयसमुच्चययोर्वैलक्षण्यनिर्वाहाय संशये कोट्योर्विरोधस्य संसर्गतया संसर्गतावच्छेदकतया वा भानस्यावश्यकतया विरोधा नवगाहिकोटिद्वयावगाह्यनुभवजन्यसंस्काराभ्यां विरोधावगाहिकोटिद्वयस्मरणस्या सम्भवादिति स्मरणरूपोऽपि संशयो विरोधावगाहितत्समानाकारकानुभवजन्य संस्कारादेव भवतीत्यभ्युपगन्तव्यमित्याशंकायामाह—स्थाणुत्वविरुद्धविशेषणत येति । स्थाणुत्वविरुद्धा या विशेषणता अभावीयविशेषणतासम्बन्धः तेनेत्यर्थः इदं च विरोधस्य संसर्गतावच्छेदकत्वाभिप्रायेण ॥

त्ववानिति निर्धर्मितावच्छेदककानुभवजन्यसंस्कारधर्म्यनुभवजन्य-संस्कारैर्मिलितैः संशयाभ्युपगमेन संशयसमुच्चययोर्वैलक्षण्यनिर्वाहार्थं संशयकोट्योर्विरोधस्य संसर्गतया भानोपगमेऽपि क्षतिविरहादिति ॥

अथ—उक्तरीत्या भ्रमस्थलसिद्धज्ञानद्वयीयविषयतयोर्निरूप्य-निरूपकभावस्य भाष्यानुमतत्वे 'यथार्थं सर्वविज्ञानम्' इति भाष्याभिप्रेते रजतत्वं शुक्तिनिष्ठविषयतावच्छेदकत्वाभाववदिति पूर्वोक्तानुमाने बाधः ; शुक्तिनिष्ठविशेष्यतानिरूपितप्रकारतात्मकस्य शुक्तिनिष्ठ-विषयतावच्छेदकत्वस्य रजतत्वे सत्त्वात्—इति चेन्न ॥ स्वनिरूपक-ज्ञाननिरूपितत्व–स्वनिरूपितत्वोभयसम्बन्धेन शुक्तिनिष्ठविषयता-विशिष्टा याऽवच्छेदकता तदभावस्यैव साध्यतया विवक्षितत्वात् । अत एव शुक्तिः रजतत्वप्रकारतानिरूपितविशेष्यताश्रयः, रजतोपा-यान्यत्वे सति[1] रजतार्थिप्रवृत्तिविषयत्वात्—इत्यन्यथाख्यातिसाधकानु-माने यथाश्रुते सिद्धसाधनसम्भवेऽपि निरुक्तोभयसम्बन्धेन[2] रजतत्व-प्रकारताविशिष्टविशेष्यत्वस्य साध्यत्वे तदसम्भवात् दूषणान्तरमुक्तं टीकायाम् ॥

तथा च 'अन्यस्यान्यथाभानायोगाच्च' इति भाष्यप्रतीकमुपादाय **टीकाग्रन्थः** ॥

> "शुक्तिशकलस्यैव रजतज्ञानविषयत्वं रजतोपायान्यत्वे सति रजतार्थिप्रवृत्तिविषयत्वात् साधयितुमप्ययुक्तम् । तथा हि—इदमर्थस्य रजतत्वजातिविशिष्टताज्ञानविषयत्वं हि साध्यं, तद-बाधितप्रवृत्तिविषयत्वप्रयुक्तमिति हेतोः सोपाधिकत्वम् । शुक्तिर्न रजततया भाति, शुक्तित्वात्, सम्प्रतिपन्नवत्—इति बाधः" —इति ॥

---

१. (टि.) रजतोपायान्यत्वे सतीति विशेषणं—रजतधर्मनिर्माणोपयिकौष-ध्यादिगोचररजतार्थिप्रवृत्तिविषये ओषध्यादौ व्यभिचारवारणाय ॥

२. (टि.) स्वनिरूपितत्व-स्वनिरूपकज्ञाननिरूपितत्वोभयसम्बन्धेनेत्यर्थः ॥

अयमर्थः ॥ रजतत्वजातिविशिष्टताज्ञानविषयत्वं—रजतत्वनिष्ठनिरवच्छिन्नप्रकारतानिरूपकज्ञाननिरूपितविशेष्यत्वं; जातिपदेन निरवच्छिन्नत्वसूचनात्, विशिष्टतापदस्य प्रकारतापरत्वात्। तथा च रजतत्वनिष्ठप्रकारतानिरूपकत्वविशिष्टज्ञाननिरूपितविशेष्यत्वस्योक्तोभयसम्बन्धेन तादृशप्रकारताविशिष्टविशेष्यत्वपर्यवसितस्य साध्यतास्वीकारान्न रजतशुक्ती इति ज्ञानमादाय न वा ज्ञानद्वयीयविषयतयोः निरूप्यनिरूपकभावमादाय सिद्धसाधनम्, तदबाधितप्रवृत्तिविषयत्वमिति हेतोः सोपाधिकत्वमित्युक्तसाध्यं रजतानयनसाध्यका रजतोपादानिका या प्रवृत्तिः तद्विषयतावच्छेदकीभूतरजतत्ववत्ताप्रयुक्तामिति रजतत्वं प्रकृतानुमाने उपाधिरित्यर्थः। यथाश्रुते तादृशविशिष्टज्ञानोत्तरकालीनस्य तादृशप्रवृत्तिविषयत्वस्य तादृशविशिष्टज्ञानविषयतां प्रति प्रयोजकत्वासम्भवात् पूर्वकालीनस्य समानकालीनस्य वा अप्रयोजकत्वादसङ्गतेः ॥

ननु—उक्तानुमाने रजतत्वमुपाधिरस्तु, तावता को दोष इत्यत आह 'शुक्तिर्न रजततया भाति'—इति ॥

शुक्तिः निरुक्तोभयसम्बन्धेन रजतत्वनिष्ठप्रकारताविशिष्टविशेष्यत्वाभाववतीत्यर्थः, शुक्तित्वात्—रजतत्वाभावात्। तथा च—उपाध्यभावेन साध्याभावसाधनमुपाधेर्दूषकताबीजमिति भावः ॥

यद्यपि—सत्प्रतिपक्ष इत्येव वक्तुमुचितम् । **तथाऽपि** पक्षतावच्छेदकविशिष्टग्रहत्वाव्यापकसाध्यतावच्छेदकविशिष्टग्रहत्वाव्यापक--पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्न - प्रकारताशाल्यनुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदिका यद्रूपावच्छिन्नविषयता तद्रूपावच्छिन्नत्वं बाधत्वम्। तच्च सत्प्रतिपक्षसाधारणम्। बाधसत्प्रतिपक्षयोः पार्थक्ये प्रमाणाभावान्नानुपपत्तिरित्यभिप्रेत्य बाध इत्युक्तमिति ध्येयम् ॥

ननु—इदं रजतमिति भ्रमस्थले रजतं साक्षात्करोमीत्यनुभवनिर्वाहाय प्रत्यक्षात्मकज्ञानद्वयोपपादनसम्भवेऽपि पीतश्शङ्ख इत्यादौ कथं तदुपपादनं, पीतरूपस्यासन्निकृष्टत्वात् ॥ न च—तत्र पीतांशे प्रत्यक्षासम्भवेऽपि स्मरणसम्भव इति—वाच्यम्। तत्रापि पीतं साक्षात्करोमीत्यनुभवस्य तुल्यत्वात् ॥ न च—त्रिवृत्करणप्रतिनिधिन्यायाभ्यां शङ्खादौ पीतरूपाश्रयद्रव्यव्यवस्थापनं सम्भवति; शङ्खपीतरूपाश्रयद्रव्ययोर्द्वयोरपि पार्थिवत्वेन तयोस्त्रिवृत्करणासम्भवात्, शङ्खे पीतरूपाश्रयद्रव्यसादृश्याभावाच्च। तथात्वे पीतरूपस्य सर्वदोपलब्धिप्रसङ्ग इत्यन्यथाख्यातिरेव तत्राङ्गीकरणीया—इति चेत् ॥

अत्र **भाष्यकृतः**—

"नयनान्निष्क्रान्तं पित्तद्रव्यं शङ्खेन सह संयुज्यते। तत्र पित्तद्रव्यगतस्य पीतरूपस्य चक्षुस्सन्निकृष्टत्वात् पीतरूपत्वावच्छिन्नप्रकारतानिरूपितपित्तद्रव्यनिष्ठविशेष्यताशालिचाक्षुषशङ्खत्वप्रकारतानिरूपितशङ्खनिष्ठविशेष्यताशालिचाक्षुषरूपज्ञानद्वयात्मकं पीतश्शङ्ख इति ज्ञानमुपपन्नमिति न तत्रान्यथाख्यातिः; तादृशज्ञानद्वयीयपीतत्वावच्छिन्नप्रकारताशङ्खत्वावच्छिन्नविशेष्यतयोर्निरूप्यनिरूपकभावश्च पूर्वमेवोक्तः ॥ न च—पित्तद्रव्यगतपीतरूपस्येव शङ्खगतशुक्लरूपस्यापि चक्षुस्सन्निकृष्टत्वात् कुतो न प्रत्यक्षमिति—वाच्यम्। तस्य पित्तगतपीतरूपाभिभूतत्वात् ॥ न च—स्वनयननिष्क्रान्तस्य पित्तद्रव्यस्य शङ्खादिसंयुक्तत्वे पार्श्वस्थानामपि तादृशद्रव्यप्रत्यक्षापत्तिरिति—वाच्यम्। स्वाश्रयपित्तद्रव्यानाश्रयचक्षुर्जन्यप्रत्यक्षं प्रति पित्तद्रव्यगतसूक्ष्मत्वस्य प्रतिबन्धकत्वात् ॥"

—इति ॥

---

१. (टि.) पीतरूपत्वावच्छिन्नेत्यर्थः ॥

स्वपदं सूक्ष्मत्वपरं, अत्र विषयतासम्बन्धः प्रतिबध्यतावच्छेदकः, अपृथक्सिद्धिश्च प्रतिबन्धकतावच्छेदकसम्बन्धः—इति बोध्यम् ॥ पित्तोपहतस्य तादृशपित्तद्रव्यचाक्षुषोपपत्तये चक्षुषि स्वाश्रयपित्तद्रव्यानाश्रयत्वनिवेशः । स्वानाश्रय[1]चक्षुर्जन्यप्रत्यक्षं प्रति तादात्म्येन पित्तद्रव्यस्य वा प्रतिबन्धकत्वान्नानुपपत्तिः ॥

एवं—जपाकुसुमप्रभायाः स्फटिके संक्रान्तत्वाल्लौहित्यप्रकारकप्रभाविशेष्यकप्रत्यक्षस्फटिकत्वप्रकारकस्फटिकविशेष्यकप्रत्यक्षात्मकज्ञान - द्वयरूपं लोहितः स्फटिक इति ज्ञानमिति तत्रापि नान्यथाख्यातिः, तद्विषयतयोर्निरूप्यनिरूपकभावश्च पूर्ववत् बोध्यः । जपाकुसुमप्रभाप्रत्यक्षे स्वच्छद्रव्यसंयोगावच्छेदकदेशावच्छिन्नचक्षुस्संयोगस्य हेतुतया स्फटिकावच्छेदेनैव तादृशप्रभाप्रत्यक्षं, न भूतलावच्छेदेन। तादृशप्रभानिष्ठभूतलावच्छिन्नचक्षुस्संयोगस्य स्वच्छद्रव्यसंयोगावच्छेदकदेशानवच्छिन्नत्वात्। स्फटिकगतरूपस्य तादृशप्रभागतरक्तरूपेणाभिभूतत्वात् अग्रहः—**इत्यवधेयम्** ॥

मरीचिकाजलज्ञानस्थलेऽपि नान्यथाख्यातिः, तेजःपृथिव्योरपि त्रिवृत्करणेन जलांशसत्त्वात्तादृशजलस्यैव ग्रहणात् ॥

न चैवं—मरीचिकायां मरीचिकात्वप्रकारकज्ञानवतामपि तत्र जलज्ञानापत्तिरिति—वाच्यम् । मरीचिकात्वप्रकारकज्ञानस्य तदन्तर्गतजलज्ञाने प्रतिबन्धकत्वात् । मरीचिकात्वप्रकारकज्ञानं प्रति दोषस्य प्रतिबन्धकतया दोषसत्तादशायां मरीचिकात्वप्रकारकज्ञानप्रतिबन्धेन तत्र जलज्ञानोत्पादस्य, दोषविरहदशायां च मरीचिकात्वप्रकारकज्ञानरूपप्रतिबन्धकसत्त्वेन जलज्ञानानुत्पादस्य च उपपत्तेः ॥

न च—मरीचिकात्वप्रकारकज्ञानोत्पत्तिदशायां जलज्ञानापत्तिः न तज्ज्ञानप्रतिबन्धकतया वारयितुं शक्यत इति—वाच्यम् ।

१. (टि.) लाघवादाह—स्वानाश्रयेति ॥

अदृष्टस्य कारणतयैव तद्वारणात् ॥ एतदभिप्रेत्योक्तं **श्रीभाष्ये**–

> "मरीचिकाजलज्ञानेऽपि तेजःपृथिव्योरप्यम्बुनो विद्यमानत्वादिन्द्रियदोषेण तेजःपृथिव्योरग्रहणात्, अदृष्टवशाच्चाम्बुनो ग्रहणाद्यथार्थत्वम्" — इति ॥

तेजःपृथिव्योरग्रहणात् — तेजस्त्वपृथिवीत्वयोरग्रहणादित्यर्थः ।

अत्र टीका—"अदृष्टस्य नियामकत्वं सर्वैरपि ख्यात्यन्तरवादिभिरभ्युपेयं, अन्यथा सर्वदा सर्वेषां सर्वत्र सर्वविषयभ्रमप्रसङ्गात्; कदाचिदपि भ्रमाभावप्रसङ्गाच्च" —इति ॥

अलातचक्रभ्रमस्थलेऽपि नान्यथाख्यातिः, तथा हि–तत्प्रदेशापेक्षया चक्रत्वं हि तत्प्रदेशसम्बन्धिसप्तदिक्संयोगविशिष्टाष्टमदिक्संयोगवत्त्वम्। वैशिष्ट्यञ्च स्वसामानाधिकरण्यकालिकविशेषणत्वोभयसम्बन्धेन । यद्यप्यलाते एकदिक्संयोगध्वंसानन्तरमेवापरदिक्संयोग इत्युक्तोभयसम्बन्धेन सप्तदिक्संयोगवैशिष्ट्यमष्टमदिक्संयोगे नास्ति । तथाऽप्युक्तोभयसम्बन्धावच्छिन्नसप्तदिक्संयोगनिष्ठप्रकारतानिरूपितनिरवच्छिन्न - विशेष्यताशालिज्ञानाष्टमदिक्संयोगत्वावच्छिन्नप्रकारतानिरूपितालातत्वावच्छिन्नविशेष्यताशालिज्ञानरूपज्ञानद्वयस्वीकारान्नान्यथाख्यातिः। तादृशज्ञानद्वयीयसप्तदिक्संयोगत्वावच्छिन्नप्रकारत्वाष्टमदिक्संयोगत्वा-

---

१. (टि.) अदृष्टरूपकारणविरहादेव न तद्दशायां जलज्ञानापत्तिरिति भावः। यद्यपि तदुत्तरमपि तादृशकारणविरहादेव जलज्ञानोत्पत्तिवारणे मरीचिकात्वप्रकारकज्ञानस्य तत्र प्रतिबन्धकत्वे विफलम् । तथाऽपि कॢप्तप्रतिबन्धकाभावरूपस्य कारणस्य तत्राभावादेव तद्वारणे [illegible] तत्र कारणत्वान्तरकल्पनमयुक्तमिति भावः॥

१. (टि.) तत्प्रदेशसम्बद्धसप्तदिक्संयोगवान् - इत्याकारकज्ञानीयविशेष्यतेत्यर्थः, संयोगवत्त्वं च निरुक्तसम्बन्धद्वयेन ॥

वच्छिन्नप्रकारतानिरूपितविशेष्यतयोर्निरूप्यनिरूपकभावः पूर्ववद्-वसेयः ॥

अत्र सप्तदिक्संयोगानां क्रमिकाणां मेलनासम्भवेन एकप्रत्यक्ष-विषयत्वासम्भवेऽपि तावत् संयोगानुभवजन्यसंस्कारसप्तकजन्यैकस्मरण-विषयत्वं सम्भवतीति बोध्यम्। आयसचक्रस्थले च युगपदेकप्रदेशसम्ब-न्ध्यष्टदिक्संयोगसत्त्वेन उक्तोभयसम्बन्धेन सप्तदिक्संयोगविशिष्टाष्टम-दिक्संयोगत्वावच्छिन्नप्रकारताशाल्येकमेव प्रत्यक्षात्मकं ज्ञानमिति विशेष इत्यवधेयम् ॥

दर्पणादौ निजमुखादिप्रतीतिस्थलेऽपि नान्यथाख्यातिः। तत्र हि—चाक्षुषतेजसः प्रसरणेन दर्पणसंयोगे सति तादृशतेजसि निज-मुखसंयोगजनिका प्रतिहत्यात्मिका क्रिया जायते, तादृशक्रियां प्रति च दर्पणादिसंयोगत्वेन हेतुता। तेन न पाषाणादिसंयोगात्तादृशक्रिया-पत्तिः। तथा च चक्षुस्संयोगस्य दर्पणनिजमुखयोरुभयोरपि सत्त्वाद्दर्पण-वृत्तित्वप्रकारकज्ञानमुखत्वप्रकारकज्ञानरूपप्रत्यक्षद्वयं तत्रोत्पद्यते। तादृशवृत्तित्वनिष्ठप्रकारतामुखनिष्ठविशेष्यतयोः निरूप्यनिरूपकभावः पूर्ववत्। एवं दर्पणवृत्तित्वावगाहिज्ञाने दर्पणांशे आभिमुख्यं प्रकारतया भासते। तज्ज्ञानीयाभिमुख्यनिष्ठप्रकारतानिरूपितत्वमपि ज्ञानान्तरीयमुखत्वावच्छिन्नविशेष्यतायां स्वीक्रियते। अतश्च दर्पणे ममाभिमुखं मुखमिति प्रतीत्युपपत्तिः। तथा दर्पणांशे भासमान-मलिनत्वाल्पत्वादिनिष्ठप्रकारतानिरूपितत्वमपि तादृशविशेष्यतायां स्वीक्रियत इति मुखं मलिनमल्पमित्यादिप्रतीतिनिर्वाहः ॥

ननु—सव्यदक्षिणभावविपर्यासः कथं? दृश्यते च दर्पणे सव्य-तया धृतं वस्त्रादिकं दक्षिणतया, उपवीततया धृतं यज्ञसूत्रं

प्राचीनावीतत्वेन—इति चेत् ॥ उच्यते। आपेक्षिको हि सव्य-दक्षिणभावः तत्र हि स्वाभिमुखतया विपर्यस्तसव्यदक्षिणभावस्य मुखस्य च भेदाग्रहेण दर्पणदेशांशे भासमानसव्यत्वादिनिष्ठप्रकारता-निरूपितत्वस्य स्वदेशांशे भासमानवस्त्रादिनिष्ठविशेष्यतायां स्वीकारेण सव्यस्य दक्षिणतया दक्षिणस्य सव्यतया च भानोपपत्तिः ॥ इदमत्र कल्पान्तरं—दर्पणादौ मुखादिसन्निधानवशात् मुखसजातीयं प्रतिबिम्बं नाम वस्त्वन्तरं जायते; तस्य च स्पर्शशून्यत्वान्न त्वगिन्द्रियजन्यप्रत्यक्षं, किन्तु उद्भूतरूपवत्त्वाच्चाक्षुपमात्रम् । तत्र तिलकाद्युत्पत्तिं प्रति स्वाश्रयसान्निध्यसम्बन्धेन मुखगततिलकस्य तत्र क्रियाद्युत्पत्तिं प्रति उक्तसम्बन्धेन मुखगतक्रियायाश्च हेतुत्वं तन्नाशस्य तन्नाशहेतुत्वमि-त्यादिकं चानुभवानुरोधादङ्गीक्रियते। दर्पणे मुखप्रतिबिम्बस्य जातत्वा-देव दर्पणे मुखं प्रतिफलति, दर्पणे मुखप्रतिबिम्बो जायत इत्यादि-व्यवहारः । दर्पणे मुखं प्रतिफलतीत्यस्य दर्पणनिष्ठप्रतिबिम्बजनकं मुखमित्यर्थः ॥

न च—दर्पणविशेष्यकचाक्षुपप्रकारीभूतं मुखमित्यर्थाङ्गीकारात्-प्रतिबिम्बानुत्पत्तावपि तादृशव्यवहारोपपत्तिरिति—वाच्यम् । तथा सति भूतलविशेष्यकघटप्रकारकचाक्षुपदशायां भूतले घटः प्रति-फलतीत्यादिव्यवहारापत्तेः ॥

---

१. (टि.) आपेक्षिको हीति ॥ अयमर्थः । स्वस्य यत्सव्यं तदभिमुख-पदार्थस्य दक्षिणं, यत् स्वस्य दक्षिणं तदभिमुखपदार्थस्य सव्य इति हि लोकेऽ-नुभवः । तथा च अभिमुखतया भासमानदर्पणे सव्यदक्षिणभावो विपर्यस्त एव । तथाविधसव्यदक्षिणभावविशिष्टतया मुखस्य भेदाग्रहणेन विपर्यस्तसव्यत्वदक्षिण-त्वयोः स्वदेशस्थवस्त्राद्यंशे भानाङ्गीकारेण विपर्यासेन भानोपपत्तिः । तत्र ज्ञान-द्वयीयसव्यत्वादिनिष्ठप्रकारत्ववस्त्रादिनिष्ठविशेष्यत्वयोः निरूप्यनिरूपकभावाङ्गीकारेण नान्यथाख्यातिप्रसङ्ग इति ॥

न च—स्वच्छद्रव्यविशेष्यकभ्रमप्रकारत्वमेव प्रतिफलतेरर्थः, तेन नोक्तदोषः, न वा दर्पणे दर्पणत्वं प्रतिफलतीति व्यवहारश्चेति—वाच्यम्, प्रतिबिम्बोत्पत्त्यधिकरणत्वादन्यस्य स्वच्छत्वस्य दुर्वचत्वादिति । अयं च पक्षः **अनवस्थितेरसम्भवाच्च नेतरः**—इतिसूत्रभाष्यस्वरससिद्ध इत्यस्मिन् पक्षे नान्यथाख्यातिगन्धः । एवं दिङ्मोहस्थलेऽपि नान्यथाख्यातिः । सिद्धान्ते हि दिक्त्वं नातिरिक्तमभ्युपगम्यते, प्राच्यादिव्यवहारस्य उभयवादिसम्मतैस्तत्तदुपाधिविशिष्टाकाशादिद्रव्यैस्तत्तदुपाधिभिरेव वा उपपन्नत्वात् । 'पद्भ्यां भूमिर्दिशः श्रोत्रात्' इत्यादिश्रुतेश्चाभिमानिदेवतासृष्ट्या उपाधिसृष्ट्या वा निर्वाहात् । एवं चोपाधिविशेषविशिष्टगगनस्यैव दिक्त्वपक्षे प्राच्यां इयं प्रतीचीति भ्रमस्थले इदन्त्वेन प्राचीप्रत्यक्षं सन्निकृष्ट-प्रतीचीत्वरूपोपाधिविशेषप्रकारकप्रत्यक्षं चेति ज्ञानद्वयस्य तादृशज्ञानद्वयीयविषयितयोर्निरूप्यनिरूपकभावस्य च स्वीकारान्नानुपपत्तिः । उपाधेरेव दिक्त्वे तु प्राचीरूपोपाधिविशेष्यकमिदन्त्वेन ज्ञानं, तादात्म्येन प्रतीचीरूपोपाधिविशेषप्रकारकज्ञानं चेति ज्ञानद्वयमिति विशेषः। पक्षद्वयेऽपि पुरोवर्तिनि प्राचीत्वरूपधर्मज्ञाने दोषस्य प्रतिबन्धकत्वमिति बोध्यम् । उक्तपक्षद्वयं च **न्यायसिद्धाञ्जनसिद्धम्** ॥

श्रीभाष्ये च—

> "दिङ्मोहे तु दिगन्तरस्यास्यां दिशि विद्यमानत्वात् दिगन्तर-प्रतीतिर्यथार्था"—इत्युक्तम् ॥

तत्रैकस्यां दिशि दिगन्तरस्य सामीप्यसम्बन्धेन सत्त्वात् प्रत्यक्षात्मकज्ञानद्वयमुपपन्नमित्यर्थः ॥

द्विचन्द्रज्ञानादावपि नान्यथाख्यातिः । तत्र हि चक्षुर्मध्य-देशसंयुक्तेनाङ्गुलिना तिमिरादिना वा मध्ये चक्षुर्वृत्तेः प्रसरणप्रतिबन्धे तदङ्गुलिपार्श्वद्वये चाक्षुषतेजसः प्रसरणात् चक्षुषो वृत्तिद्वयं जायते,

तत्रैकया चन्द्रतद्देशोभयसंयुक्तया आधेयतासम्बन्धेन एकत्व-विशिष्टतद्देशप्रकारकचन्द्रविशेष्यकमेकं तद्देशे चन्द्र इत्याकारकज्ञानं जन्यते । द्वितीयया तु किञ्चिद्वक्रगत्या वृत्त्या एकत्वविशिष्ट-चन्द्रसमीपदेशप्रकारकप्रत्यक्षचन्द्रविशेष्यकप्रत्यक्षरूपज्ञानद्वयं एकत्व-विशिष्टैतद्देशे चन्द्र इत्याकारकं भ्रमात्मकं ज्ञानं जन्यते । तत्र ज्ञानद्वयविषयितयोर्निरूप्यनिरूपकभावः पूर्ववत् ॥ ततश्च देश-द्वयविशेष्यकानेकैकत्वप्रकारकज्ञानद्वयरूपापेक्षाबुद्धिसंपत्त्या तादृ-शापेक्षाबुद्धिविशेषविषयत्वरूपद्वित्वप्रकारकप्रत्यक्षचन्द्रविशेष्यकप्रत्य-क्षात्मकज्ञानद्वयरूपं द्वौ चन्द्रावित्याकारकं भ्रमात्मकं ज्ञानमुदेति । तत्रापि निरूप्यनिरूपकभावः पूर्ववत् ॥

यद्यपि—अनेकविशेष्यकैकत्वप्रकारकसमूहालम्बनबुद्धिरेवापेक्षा-बुद्धिरिति सम्मता नैयायिकादीनाम् । **तथाऽपि**—समूहालम्बनज्ञान-द्वयोभयसाधारण्येन सामानाधिकरण्यकालिकविशेषणत्वोभयसम्बन्धेन तद्व्यक्तिविशेष्यकैकत्वप्रकारकज्ञानविशिष्टतदन्यव्यक्तिविशेष्यकैकत्व-प्रकारकज्ञानमेवापेक्षाबुद्धिरित्यङ्गीकर्तुमुचितम् ॥ तथा च स्वसमानाधि-करणभेदप्रतियोगितावच्छेदकत्वस्वनिरूपितप्रकारतावच्छेदकैकत्वत्वा-वच्छिन्नप्रकारतानिरूपितत्वस्वनिरूपकज्ञानसमानाधिकरणतत्समानका-लीनज्ञाननिरूपितत्वैतत्त्रितयसम्बन्धेन विशेष्यताविशिष्टविशेष्यत्व-मेव द्वित्वमिति युक्तमभ्युपगन्तुम् ; समूहालम्बनज्ञानद्वयोभयस्थल-सङ्ग्रहात्, उक्तापेक्षाबुद्धिविशेषविषयत्वातिरिक्तद्वित्वाभ्युपगमे च गौरवात् । अपेक्षाबुद्धिविशेषविषयत्वमेव द्वित्वमिति च **सर्वार्थ-सिद्ध्यादौ** सुव्यक्तम् ॥ एवं च—अङ्गुल्यवष्टम्भादिजनितचक्षुर्वृत्ति-द्वयजनितज्ञानद्वयात्मकापेक्षाबुद्धिविषयत्वरूपदेशनिष्ठद्वित्वावगाहि द्वौ चन्द्राविति ज्ञानमुत्पन्नमिति तत्रापि नान्यथाख्यातिः ॥

उक्तं च श्रीभाष्ये—

"द्विचन्द्रज्ञानादावङ्गुल्यवष्टम्भतिमिरादिभिर्नायनतेजोगतिभेदेन सामग्रीभेदात्सामग्रीद्वयमन्योन्यनिरपेक्षं चन्द्रग्रहणद्वयहेतुर्भवति । तत्रैका सामग्री स्वदेशविशिष्टं चन्द्रं गृह्णाति । द्वितीया तु किञ्चिद्वक्रगतिश्चन्द्रसमीपदेशग्रहणपूर्वकं चन्द्रं स्वदेशवियुक्तं गृह्णाति । अतस्सामग्रीद्वयेन युगपद्देशद्वयविशिष्टचन्द्रग्रहणे ग्रहणभेदेन ग्राह्याकारभेदादेकत्वग्रहणाभावाच्च द्वौ चन्द्राविति भवति प्रतीतिविशेषः । देशान्तरस्य तद्विशेषणत्वं देशान्तरस्य अगृहीतस्वदेशचन्द्रस्य च निरन्तरग्रहणेन भवति" —इति ॥

अयमर्थः ॥ चन्द्रसमीपदेशेति—चन्द्रसमीपदेशप्रत्यक्षचन्द्रप्रत्यक्षरूपज्ञानद्वयं जनयतीत्यर्थः । देशद्वयविशिष्टचन्द्रग्रहणमिति—प्रयोज्यत्वं सप्तम्यर्थः, तस्य प्रतीतिविशेष इत्यग्रिमेणान्वयः; देशद्वयविशेष्यकैकत्वप्रकारकज्ञानरूपापेक्षाबुद्धिविषयत्वात्मकद्वित्वस्य देशयोरुत्पत्त्या तत्प्रकारकं द्वौ चन्द्राविति प्रत्यक्षं जायत इति भावः ॥

यद्यपि—देशविशेष्यकैकत्वप्रकारकज्ञानरूपापेक्षाबुद्धेरेवापेक्षणीयतया तादृशज्ञानयोश्चन्द्रविशेष्यकत्वकथनं, देशयोः प्रकारतया भानकथनं च विफलम् । **तथाऽपि** तद्देशज्ञानकाले चन्द्रचक्षुस्संयोगादिसत्त्वेन तद्भानस्य दुरपह्नवत्वात् कस्य चित्प्रतिबन्धकल्पने गौरवादनुभवविरोधाच्च तथाऽभिमतमिति ध्येयम् ॥

ननु—किञ्चिद्वक्रगत्या द्वितीयया चक्षुर्वृत्त्या उक्तज्ञानद्वयजनने चन्द्रतत्समीपदेशयोर्विशेषणविशेष्यभावानुभवविरोध इत्याशङ्कां परिहरति **देशान्तरस्येति**। निरन्तरग्रहणेन—प्रकारतानिरूपितविशेष्यताशालिग्रहणेन । देशान्तरस्येति षष्ठ्यन्तार्थदेशान्तरवृत्तित्वस्य प्रकारतायां, चन्द्रस्येति षष्ठ्यन्तार्थचन्द्रनिष्ठत्वस्य च विशेष्यतायामन्वयः ।

R Krishnaswami Sastri

तथा च विभिन्नज्ञानीयविषयतयोरपि निरूप्यनिरूपकभावोपगमा-न्नानुपपत्तिरिति भावः ॥

एवं स्वप्नेऽपि प्राणिनां पुण्यपापानुगुणं भगवतैव तत्तत्पुरुष-मात्रानुभाव्यास्तत्तत्कालावसानास्तथाभूताश्चार्थाः सृज्यन्त इति न तत्राप्यन्यथाख्यातिः । तथा च श्रुतिः—

"न तत्र रथा रथयोगा न पन्थानो भवन्ति, अथ रथान् रथयोगान्पथः सृजते" —इति ॥

न च—स्वप्ने सृष्टिस्वीकारे स्वाप्नघटे व्यभिचारेण दण्डत्वेन घट-त्वेन हेतुता भज्येतेति—वाच्यम् । तत्राव्यवहितोत्तरत्वस्यैव तज्जन्य-तावच्छेदकत्वात् ॥

यत्तु—स्वाप्नभिन्नघटत्वं जन्यतावच्छेदकमिति । तन्न । स्वाप्न-भिन्नत्वेन स्वप्नदृष्टे दण्डं विनाऽपि जाते घटे व्यभिचारस्य दुर्वा-रत्वात् जाग्रत्कालिको यस्स्वाप्नत्वावच्छिन्नभेदः तस्य तद्व्यक्तित्वेन दण्डादिजन्यतावच्छेदके निवेशेऽपि यादृशस्वप्ने दण्डजन्यत्वेन घटो दृष्टस्तादृशघटे दण्डजन्यतावच्छेदकतया कार्यतावच्छेदकस्य तत्सा-धारण्यावश्यंभावेनासङ्गतेः ॥

एवं वह्न्यादिव्याप्यतावच्छेदकमपि न स्वाप्नभिन्नधूमत्वं, वह्नि-व्याप्यत्वेन स्वप्नदृष्टधूमासङ्ग्रहात् ; किन्तु शुद्धधूमत्वमेव । परन्तु वह्निं विनाऽपि यादृशस्वप्ने धूमो दृष्टस्तत्र व्यभिचारवारणाय वह्नि-मदनुयोगिकसंयोगस्य हेतुतावच्छेदकसम्बन्धत्वमुपेयते, प्रभामण्डलादौ धूमस्य वह्निव्यभिचारवारणाय नैयायिकैरपि तादृशसंयोगस्यैव तथात्वोपगमादिति ध्येयम् ॥

न च—स्वाप्नरजतादौ स्वाप्नत्वज्ञाने प्रवृत्त्यनुपपत्त्या तत्र प्रवृ-त्तिनिर्वाहाय तत्र जाग्रत्कालिकरजततादात्म्यभानस्यावश्यकत्वात् अन्यथाख्यातिर्दुर्वारेति—वाच्यम् । तत्रापि ज्ञानद्वयस्य पूर्वोक्त-

निरूप्यनिरूपकभावस्य च कल्पनात् । अत एव स्वाप्नज्ञाने पूर्वोक्तं भ्रमलक्षणमुपपन्नम् ॥

एतेन अथवेत्यादिभाष्योदितकल्पोऽपि व्याख्यातः । यथा यथा पुरुषस्य भ्रमो भवति तथा तथा पदार्थास्तत्तत्कालमात्रावसानांस्तत्तत्पुरुषमात्रानुभाव्यान् भगवान्सृजतीति च तत्कल्पः । तत्रापि प्रवृत्त्यादिनिर्वाहाय रजतादिभ्रमस्थले तत्कालोत्पन्नरजते चिरकालस्थायिसकलानुभाव्यरजतादितादात्म्यभानमावश्यकमिति पूर्ववज्ज्ञानद्वयं तदीयविषयतयोर्निरूप्यनिरूपकभावश्च स्वीकरणीयः। तत्र चोत्तरकालीने नेदंरजतमिति बाधज्ञाने चिरकालस्थायिसकलपुरुषानुभाव्यरजतभेदस्य भानात्तस्य प्रमात्वं पूर्वोत्पन्नरजतज्ञानप्रतिबन्धकत्वश्चोपपन्नम् ॥

न च—अत्र कल्पे भगवतो भ्रान्तत्वापत्तिः; शुक्तिरूप्यस्य सृष्टत्वे तद्विषयकज्ञानस्य सर्वज्ञे भगवत्यावश्यकत्वात्—इति वाच्यम्। निरूप्यनिरूपकभावापन्नविषयताकज्ञानद्वयस्यैव पूर्वोक्तरीत्या भ्रमपदवाच्यत्वेन भगवति तादृशज्ञानद्वयाभावात् ॥

न च—एवमपि भगवतो भ्रान्तत्वं दुर्वारं, भगवान्भ्रान्त इति कस्यचिद्भ्रमे भ्रमविषयपदार्थसृष्टेरावश्यकत्वादिति—वाच्यम् । भ्रमविषयपदार्थसामान्यस्यैव सृष्टिस्वीकारेण तत्र भ्रान्तत्वविशिष्टस्यान्यस्य भगवतः सृष्टिस्वीकारात्, अनाद्यनन्तभूते पुरुषोत्तमे भ्रान्तत्वासम्भवात् ॥

एतेन—हेयास्पदं ब्रह्मेति भ्रमे जाते ब्रह्मणि हेयसृष्टेरावश्यकतया ब्रह्मणो हेयप्रत्यनीकत्वानुपपत्तिरिति — **परास्तम्** ॥ तत्रापि हेयाश्रयस्यान्यस्य ब्रह्मणस्सृष्टत्वेऽपि परब्रह्मणो हेयप्रत्यनीकत्वाविरोधात् ॥

यत्तु—स्वप्रकारकप्रमाविशेष्यत्वसम्बन्धेन भ्रान्तत्वाश्रयत्वमेव भ्रान्त इत्यादिव्यवहारनियामकं ; तथा च भगवान्भ्रान्त इत्यादिभ्रमस्थले परमपुरुषे भ्रान्तत्वसृष्टिस्वीकारेऽपि न क्षतिः ; एवं स्वप्रकारकप्रमाविशेष्यत्वसम्बन्धावच्छिन्नहेयत्वावच्छिन्नाभाववत्त्वमेव हेयप्रत्यनीकत्वम् ; हेयत्वं च इच्छाविषयीभूताभावप्रतियोगित्वम् ; एवं धूमादेरप्युक्तसम्बन्धेन हेतुत्वान्न वह्निशून्ये धूमादिभ्रमेऽपि व्यभिचारः । एवं—जगज्जन्मादिकारणत्वस्य चोक्तसम्बन्धेन ब्रह्मलक्षणत्वान्न प्रधानादौ तद्भ्रमेऽप्यतिव्याप्तिः—**इति** ॥ **तन्न** । स्वप्रकारकप्रमाविशेष्यत्वसम्बन्धेन ब्रह्मादौ भ्रान्तत्वादीनां भ्रमे तत्सम्बन्धेनैव तत्र तत्सृष्टेरावश्यकतयोक्तदोषतादवस्थ्यात् । साध्यवदन्यभ्रमाविषयवृत्तित्वमेव व्यभिचारः ; लक्ष्याभिन्नभ्रमाविषयवृत्तित्वमेव चातिव्याप्तिः । अतो धूमादेर्वह्निशून्ये जगत्कारणत्वस्य च प्रधानादौ भ्रमेऽपि न तत्र व्यभिचारोऽतिव्याप्तिर्वा ; तत्र धूमादिविशिष्टधर्मिण एव सृष्टत्वेन साध्यवदन्यलक्ष्यभिन्नयोस्तयोर्भ्रमाविषयत्वाभावात् । साध्यवदन्यप्रमाविषयवृत्तित्वादिकं तु न व्यभिचारादिः । तत्र सृष्टस्यापि धर्मिणः ईश्वरीयप्रमाविषयत्वेन तद्दोषतादवस्थ्यादिति ध्येयम् ॥

अथ—एवंरीत्या भ्रमविषयस्य सृष्टिस्वीकारे सदसद्विलक्षणत्वादिरूपमिथ्यात्वस्य भ्रमे जाते तद्विशिष्टधर्मिसृष्टेरावश्यकतया दृश्यत्वानुमानस्य सिद्धान्ते दृष्टान्तसौलभ्यम् । तथा च **शतदूषण्यादौ** सदसद्विलक्षणत्वादौ साध्येऽप्रसिद्धविशेषणत्वाभिधानमसङ्गतम् ॥ न च—अथवेत्यादिभाष्यपाठस्य क्वाचित्कतया तत्पाठेऽप्रामाणिकत्वाभिप्रायेण साध्याप्रसिद्ध्युद्भावनमिति—वाच्यम् । तथाऽपि स्वप्ने सदसद्विलक्षणत्वादिभाने तत्र सृष्टेर्विशिष्य श्रुतिसूत्रादिसिद्धत्वेन भाष्यकृदभ्युपगतत्वेन चाप्रसिद्धविशेषणत्वाभिधानस्य सुदूरपराहतत्वात् ॥

न च—तादृशस्वप्नो निष्प्रमाणक इति—वाच्यम्। स्वप्ने केन चित् सदसद्विलक्षणत्वादिसाध्यकानुमानप्रयोगे कृते तदानीं तद्वाक्याद्बोधस्यापि सम्भावितत्वेनापलापासम्भवात्—**इति चेन्न** ॥ भ्रमस्थले अथवेत्यादिभाष्योक्तसृष्टिः स्वाप्निकसृष्टिश्च प्रत्यक्षविषयपदार्थस्यैव, न परोक्षविषयस्येत्यभिप्रायात्; प्रत्यक्षस्थले सन्निकर्षघटनार्थं सृष्टेरावश्यकत्वेऽपि परोक्षे तदनावश्यकत्वात्, तत्र परोक्षात्मकज्ञानद्वयेनैव **ज्ञानयाथार्थ्यनिर्वाहात्** ॥

अत एव—अद्वैतवादिभिरपि प्रत्यक्षस्थले **अनिर्वचनीयख्यातिः** परोक्षे **अन्यथाख्याति**रङ्गीकृतेत्यादिकं वादान्तरे प्रपञ्चितम्—**इति सर्वमवदातम्** ॥

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

इति
श्रीशेषार्यवंशमुक्ताफलस्य श्रीयादवाद्रिनिवासरसिकस्य
श्रीमदनन्तार्यवर्यस्य कृतिषु
ज्ञानयाथार्थ्यवादः
समाप्तः।

॥ श्रीः ॥

॥ श्रीः ॥

ब्रह्मलक्षणवादः

श्रीमन्महीशूरमहाराजाधिराजमहास्थानसभाभूषणैः
शेषार्यवंशमुक्ताफलैः श्रीयादवाद्रिनिवासरसिकैः
पण्डितमण्डलीसार्वभौमैः
श्री ॥ उ ॥ म. अ. अनन्तार्यवर्यैः
विरचितः ।

विद्वद्वरैः परिशोध्य

श्रीयादवाद्रिनिवासि-
पण्डितवर्य-श्रीकुप्पनैयङ्गार्यविरचितया
तात्पर्यदीपिकाख्यया टिप्पण्या
समेतः ।

म. अ. अनन्तार्येण
प्र. भ. तो. नरसिंहार्येण च
कल्याणपुर-विचारदर्पण-मुद्राक्षरशालायामङ्कयित्वा
प्राकाश्यं नीतः ॥

१८९८.

मूल्यं रू. ०—४—०

॥ श्रीः ॥

ब्रह्मलक्षणवादः.

भुवनजननस्थेमध्वंसादिलीलमनाकुलं
यदुगिरितटाधारं नत्वा श्रियःपतिमञ्जसा ।
यतिपतिपदाम्भोजे धृत्वाऽन्तरङ्गमचञ्चलं
कलयति मुदाऽनन्तार्यो ब्रह्मलक्ष्मनिरूपणम् ॥

जगज्जन्मादिकारणत्वं ब्रह्मणो लक्षणमिति वेदान्तोदन्तः । तथा च **सूत्रम्— "जन्माद्यस्य यतः" —इति ॥**

ननु "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिलक्षणस्यापि श्रुतिसिद्धत्वात्तदेव कथं न सूत्रितमिति चेत् ॥

अत्र श्रुतप्रकाशिकानुसारिणः—

यद्धर्मावच्छिन्नविषयतान्तःपातिविषयता मोक्षजनकतावच्छेदकविषयताव्यापिका तादृशधर्मावच्छिन्नमेव लक्षणं सूत्रकृता विवक्षितम् । सत्य-

---

॥ तात्पर्यदीपिका ॥

प्रणम्य यादवाद्रीशं श्रीशं सर्वजगन्मयं ।
टीका लक्षणवादस्य संक्षेपेण विलिख्यते ॥

अयं च ब्रह्मलक्षणवादः । अत्र च जगज्जन्मादिकारणत्वं जिज्ञास्यत्वेन प्रतिज्ञातस्य ब्रह्मणः सकलेतरव्यावर्तकतया निरतिशयबृहत्त्वोपपादकतया देवताविशेषनिर्धारकतया च लक्षणत्वेन सूत्रकृता विवक्षितं सप्रपंचं विचार्यते ॥ एतल्लक्षणवाक्यार्थे सम्यगवधृते सति 'कारणं तु ध्येयः' इति श्रुत्युक्तजगत्कारणवस्तुविशेषोपासनं सुशकं भवतीति अवश्यं सर्वैरपि मुमुक्षुभिरेतद्वाक्यार्थस्वप्रकारमवगन्तव्य इति भावयन् विद्वदग्रणीरनन्तार्यवर्यस्समस्तास्तिकजनोपकारायामुं वाद व्यरचयत्॥

१. (टि.) अत्र यद्धर्मपदेन लक्षणतावच्छेदकं धर्तव्यं, तच्च जन्मादिकारणत्वं; इदं च ब्रह्मण उपलक्षणलक्षणं विशेषणलक्षण च भवति । जगत्कारणत्वस्य

त्वविशिष्टज्ञानत्वविशिष्टानन्तत्ववत्वरूपलक्षणतावच्छेदकधर्मावच्छिन्न
विषयतान्तःपातिविषयता च न मोक्षजनकतावच्छेदकविषयताव्या
पिका, सर्वशरीरिकत्वप्रकारकब्रह्मज्ञानस्यापि मोक्षजनकत्वेन तदवच्छे
दकविषयतायास्सर्वत्र सत्त्वेन तत्र विशिष्टानन्तत्ववत्वावच्छिन्नविषयता
न्तःपातिविषयताविरहात् । जगज्जन्मादिकारणतात्वावच्छिन्नविषयता
न्तःपातिविषयतायाश्च सर्वत्र सत्त्वान्मोक्षजनकतावच्छेदकविषयताव्या
पकतोपपत्तिः ॥ जगज्जन्मादिकारणतेत्यत्र जगच्छब्देन स्थूलचिदचि
द्विशिष्टं ब्रह्म विवक्षितम् । तेन मोक्षजनकतावच्छेदकविषयताया ब्रह्म
साधारण्येऽपि नोक्तधर्मावच्छिन्नविषयतान्तःपातिविषयतायास्तद्व्याप
कताभङ्गः, न वा मोक्षजनकतावच्छेदकविषयताया गुणादिसाधारण्ये
प्युक्तव्यापकताभङ्गः; ब्रह्मपदार्थतावच्छेदकघटकतया गुणानामप्युक्त
लक्षणतावच्छेदकप्रविष्टत्वात्, सूक्ष्मचिदचिद्विशिष्टब्रह्मत्वात्मककारण
तावच्छेदकधर्मवत्त्वरूपकारणताशरीरे गुणानां घटकत्वाच्च ॥

अथ—एवमप्युक्तलक्षणतावच्छेदकावच्छिन्नविषयताया मोक्षजनक
तावच्छेदकविषयताव्यापकत्वं न सम्भवति, मोक्षजनकतावच्छेदक
विषयताया उक्तलक्षणतावच्छेदककोट्यप्रविष्टत्रिपाद्विभूतिसाधारण्यात्

यादृशोपासनेष्वनुसन्धेयत्वं तत्र तस्य विशेषणत्वं, यत्र नानुसंधेयत्वं तत्रोपलक्षणत्वमिति बोध्यम् ॥ सूक्ष्मचिदचिद्विशिष्टं ब्रह्म लक्ष्यं, तथाविधं ब्रह्मत्वं लक्ष्यतावच्छेदकं; इत्थं च लक्षणतावच्छेदकजन्मादिकारणतात्वावच्छिन्नविषयतान्तःपातिविषयता जगन्निष्ठविषयता; तस्या मोक्षजनकीभूतजगत्कारणत्वादिप्रकारकब्रह्मविशेष्यकोपासननिष्ठजनकतावच्छेदकजगदादिनिष्ठविषयताव्यापकत्वाल्लक्षणसमन्वयः। सूक्ष्मचिदचिद्विशिष्टत्वं च—सूक्ष्मचिदचिच्छरीरकत्वरूपं । यद्यपि मोक्षजनकज्ञानस्य प्रमात्वेन विषयाविशेषस्यैव लाघवेन तन्निष्ठजनकतावच्छेदकताया अन्यत्र व्यवस्थापितत्वाद्विषयतायाः कारणतावच्छेदकत्वं न संभवत्येव; तथापि विषयतासम्बन्धेन विषयस्यावच्छेदकत्वे विषयतायास्सम्बन्धविधयाऽवच्छेदकत्वं सम्भवतीत्याभिप्रायेण तथोक्तमिति ध्येयम् ॥

–इति चेन्न ॥ उक्तलक्षणतावच्छेदके [1]मोक्षहेतुत्वस्यापि प्रवेशा-द्देशविशेषावच्छिन्नानन्दरूपमोक्षशरीरे त्रिपाद्विभूतेः प्रविष्टत्वात् ॥ न च– मोक्षहेतुत्वस्याप्युक्तलक्षणशरीरे निवेशस्य आदिपदघटि-तोक्तसूत्रतात्पर्यविषयत्वसम्भवेऽपि यतोवेत्यादिविषयवाक्ये तद-नुक्त्या सूत्रविषयवाक्ययोस्समानार्थकत्वानुपपत्तिः– इति वाच्यम् ॥ यतो वेत्यादिविषयवाक्यघटकस्य 'यत्प्रयन्त्यभिसंविशन्ति' इत्यस्य आवृत्त्या लयहेतुत्वमोक्षहेतुत्वोभयपरत्वात् ॥ इमानि भूतानि, प्रयन्ति सन्ति–प्रलीयमानानि सन्ति, यदभिसंविशन्ति–यत्प्राप्नुवन्ति; स्व-निष्ठप्रलयजनकतासम्बन्धेन ब्रह्मनिष्ठानीत्यर्थः । उक्तसम्बन्धप्रयोजक-रूपवत्त्वमत्र विशधात्वर्थः, यत्पदोत्तरद्वितीयार्थश्चानुयोगित्वम् । तथा च–ध्वंसविशिष्टानि मोक्षविशिष्टानि वा भूतानि स्वनिष्ठप्रलयजनकत्व-रूपब्रह्मानुयोगिकसम्बन्धप्रयोजकरूपाश्रयाः, स्वनिष्ठमोक्षजनकत्वरूप-ब्रह्मानुयोगिकसम्बन्धप्रयोजकरूपाश्रया वा–इति बोधः । धात्वर्थता-वच्छेदकोक्तसम्बन्धशालित्वाच्च ब्रह्मणः कर्मता । एवं चोक्तलक्षणताव-च्छेदकावच्छिन्नविषयताया मोक्षजनकतावच्छेदकविषयताव्यापकत्व-मक्षुण्णम् ॥

---

१. (टि) 'एष ह्येवानन्दयाति', 'तद्धेतुव्यपदेशाच्च' इत्यादिसूक्तमोक्षनि-रूपितव्यापारसम्बन्धावच्छिन्नकारणत्वस्य प्रवेशादिति भावः ॥ अथ यत्प्रयन्तीति लक्षणवाक्यस्थयच्छब्दस्य मुक्तप्राप्यपरतायाः श्रुतप्रकाशिकादौ स्पष्टमनुगृहीततया मुक्तिहेतुत्वं कथं यच्छब्देन प्रतीयते–इति चेत् । इत्थम्––मुक्तप्राप्यत्वं च मुक्तक-र्तृकानुभवगोचरत्वं । तथाविधानुभवं प्रति मुक्तिहेतुत्वेन ब्रह्मोपासनस्य कारण-तया सिद्धान्ते प्राप्यप्रापकयोरभेदाङ्गीकाराच्च प्राप्यत्वकथनेनैवोपायत्वं सिध्यति ॥ किं च–'यत इति पंचम्याः हेतुमात्रविषयत्वात्; हेत्वर्थत्वं च जनिस्थितिलयसाधा-रण्यादवगम्यते' इति श्रुतप्रकाशिकायामयमर्थस्स्पष्टीकृत इत्यालोच्य तथोक्ति-रिति ध्येयम् ॥

एतत्सर्वमभिप्रेत्योक्तं **श्रुतप्रकाशिकायां**—

"ननु—यदीश्वरो लिलक्षयिषितः, तर्हि तदसाधारणसर्वज्ञत्वादिप्रतिपादकसत्यज्ञानादिवाक्यानादरेण जन्मादिकारणत्वं किमर्थं सूत्रितम्? उच्यते—गुणैः स्वरूपस्य लक्ष्यमाणत्वे तदपेक्षया बहिष्ठाया विभूतेरुपास्यानन्तर्भावः प्रतीयेत[२], सर्गादिविषयभूतया तु विभूत्या स्वरूपे लक्ष्यमाणे तन्नियमनधारणाद्यपेक्षितत्वादेव गुणानन्तर्भावो न शक्यशङ्कः। अतो गुणानामिव विभूतेर्जिज्ञास्यान्तर्भावज्ञापनार्थं जन्मादिलक्षणं सूत्रितम्। विभूतेश्च जिज्ञास्यान्तर्भाव उपासात्रैविध्यतत्क्रतुन्यायाभ्यां सेत्स्यति॥ नन्वेवमपि—कृत्स्नविभूतेः जिज्ञास्यान्तर्भावो न सिध्यति, त्रिपाद्विभूतेर्जन्माद्यस्पृष्टत्वात्। मैवम्। तस्या जन्माद्यस्पृष्टत्वेऽपि यत्प्रयन्तीति प्रलयवाक्यस्थयच्छब्दनिर्दिष्टे मुक्तप्राप्ये ब्रह्मण्यन्तर्भावसिद्धेः। तथा हि—प्रयन्तीत्येतदविशेषेणात्यन्तिकलयरूपं मोक्षमपि प्रतिपादयति"

—इति॥

अयमर्थः॥ गुणैः स्वरूपस्य लक्ष्यमाणत्वे—सत्यत्वविशिष्टज्ञानत्वविशिष्टानन्तत्वत्वस्य ब्रह्मलक्षणतावच्छेदकत्वे। तदपेक्षया बहिष्ठायाः—उक्तलक्षणतावच्छेदककोट्यप्रविष्टायाः। उपास्यानन्तर्भावः प्रतीयेतेति—लक्षणतावच्छेदकावच्छिन्नविषयतान्तःपातिविषयताया मोक्षजनकतावच्छेदकविषयताव्यापकत्वेन विवक्षिततया व्यापकाभावे व्याप्याभावावश्यम्भावादिति भावः। सर्गादिविषयभूतया तु विभूत्या स्वरूपे लक्ष्यमाणे—जगज्जन्मादिकारणतात्वस्य लक्षणतावच्छेदकत्वे तु। तन्नियमनधारणाद्यपेक्षितत्वात्—नियमनादिगुणघटितत्वात्; गुणानामुक्तधर्मघटकत्वमनुपदमेवोपपादितम्॥

---

१. (पा.) जिज्ञास्या. २. (पा.) प्रतीयते.

ननु—सत्यज्ञानादिलक्षणे ज्ञानपदस्य सर्वविषयकज्ञानाधिकरणपरतायाः 'ज्ञानपदं नित्यासङ्कुचितज्ञानैकाकारमाह' इति जन्माद्यधिकरणभाष्यसिद्धतया सत्यादिलक्षणतावच्छेदकेऽपि सर्वपदार्थानां घटकताऽस्त्येव । एवं देशकालवस्तुपरिच्छेदत्रयराहित्यरूपानन्तपदार्थघटकवस्त्वपरिच्छेदस्य सर्वशरीरकत्वरूपत्वेन **न्यायसिद्धाञ्जने** प्रतिपादनात् सर्वपदार्थानामुक्तलक्षणतावच्छेदके द्वेधा घटकतेति उक्तधर्मस्यापि मोक्षजनकतावच्छेदकविषयताव्यापकविषयताघटितविषयतावच्छेदकत्वमव्याहतम्—इति चेत् ॥

मैवम् । नित्यासङ्कुचितत्वं नाम ज्ञानस्य—न सर्वविषयकत्वम्, प्रमेयत्वसर्वत्वादिना सर्वविषयकत्वस्य बद्धादिज्ञानसाधारण्येनाव्यावर्तकत्वात्; नापि प्रमेयत्वव्याप्ययावद्धर्मप्रकारकत्वम्, प्रमेयत्वव्याप्ययावद्धर्मवत्प्रमेयमित्यादिशब्दजन्यज्ञानस्यापि बद्धसाधारण्यात्; किन्तु निरवच्छिन्नविषयतासमानाधिकरणस्वनिरूपितविषयतानिरूपितनिरवच्छिन्नावच्छेदकत्वसम्बन्धावच्छिन्नाभावाप्रतियोगित्वम् । स्वरूपतो भानार्हाणां सर्वधर्माणां भगवज्ज्ञाने स्वरूपतः प्रकारत्वात् निरवच्छिन्नविषयत्वाधिकरणे सर्वत्र स्वनिरूपितविषयतानिरूपितनिरव-

१. (टि.) यद्यपि--निर्विशेषवस्तुवादिभिर्निर्विशेषे वस्तुनीदं प्रमाणमिति न शक्यते वक्तुं, सविशेषविषयत्वात्सर्वप्रमाणानाम्-इति श्रीभाष्यादावनुगृहीतरीत्या सिद्धान्ते निरवच्छिन्नविषयता नाङ्गीक्रियत एव । न च-अयं घट इत्यादिज्ञानीयघटत्वादिनिष्ठनिरवच्छिन्नप्रकारतायाः प्रसिद्धत्वात्कथं तादृशविषयतानङ्गीकार इति वाच्यम् । अयं घट इत्यादिज्ञाने घटत्वादिनिष्ठविषयतायाः विशेष्यतासम्बन्धेन घटावच्छिन्नतया निरवच्छिन्नत्वाभावात् ॥ तथा चानुगृहीतं श्रुतप्रकाशिकायां 'धर्मेण धर्मी सविशेषः, धर्मिणा च धर्मस्सविशेषः' इति । तत्त्वमुक्ताकलापेऽपि 'तन्निष्कर्षप्रयोगेष्वपि भवति पुनस्तस्य धर्मी विशेषः' इति । तस्मान्निरवच्छिन्नविषयतेति परिष्कारो नोपपद्यत एव ॥ तथाऽपि-आश्रयातिरिक्तधर्मानवच्छिन्नधर्मनिष्ठविषयतैव निरवच्छिन्नविषयतापदेन विवक्षितेति नोक्तानुपपत्तिरिति ध्येयम् ॥

च्छिन्नावच्छेदकत्वसम्बन्धेन भगवज्ज्ञानसत्त्वात्। विषयतावच्छेदकताया वृत्त्यनियामकतया तत्सम्बन्धावच्छिन्नाभावास्वीकारे तु निरवच्छिन्नविषयतासमानाधिकरणभेदप्रतियोगितानिरूपितनिरुक्तसम्बन्धावच्छिन्नावच्छेदकताशून्यत्वं तत् ॥ तथा च—नित्यासङ्कुचितज्ञानवत्त्वरूपज्ञानपदार्थशरीरे न सर्वस्य प्रवेशः, नापि त्रिविधपरिच्छेदराहित्यरूपानन्तपदार्थशरीरे । तत्र हि—कालपरिच्छेदराहित्यं ध्वंसाप्रतियोगित्वे सति प्रागभावाप्रतियोगित्वम्। देशपरिच्छेदराहित्यं—द्रव्यनिष्ठापृथक्सिद्धिसम्बन्धावच्छिन्नाभावाप्रतियोगित्वम् । ब्रह्मणस्सर्वद्रव्येष्वपृथक्सिद्धिसम्बन्धेन सत्त्वस्य सर्वव्यापकताबोधकप्रमाणप्रतिपन्नत्वेन देशपरिच्छेदराहित्यमुपपद्यते । वस्तुपरिच्छेदराहित्यं च—अनन्तगुणवत्त्वम् ; स्वप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धावच्छिन्नसङ्ख्यासामान्याभाववत्स्वनिरूपिताधेयतानतिरिक्तवृत्तिधर्मावच्छिन्नकल्याणगुणकत्वपर्यवसितम् । भगवन्निरूपिताधेयतानतिरिक्तवृत्तिकल्याणगुणसमुदायत्वावच्छेदेन कस्याश्चिदपि सङ्ख्याया अपर्याप्तेस्तादृशधर्मावच्छिन्नकल्याणगुणकत्वं ब्रह्मण्युपपन्नम् । यद्वा निरतिशयगुणवत्त्वं तत् । निरतिशयत्वं च--स्वासामानाधिकरण्यस्वप्रयोज्यत्वोभयसम्बन्धेन सङ्कल्पविशिष्टान्यत्वं । जीवगुणानामुक्तोभयसम्बन्धेन भगवत्सङ्कल्पविशिष्टत्वात्तदन्यत्वरूपनिरतिशयत्वं भगवद्गुणानामुपपन्नम् । जगद्व्यापारानुकूलत्वं वा निरतिशयत्वम् । 'निरतिशयगुणवत्त्वमेव वस्तुपरिच्छेदराहित्यम्'—इति **जन्माद्यधिकरणभाष्यश्रुतप्रकाशिकयोः** स्फुटम् ॥ इत्थं च—नानन्तपदार्थशरीरे सर्वपदार्थस्य प्रवेशः ॥

ननु—सर्ववस्तुसामानाधिकरण्यार्हत्वं वस्त्वपरिच्छेद इति तदधिकरणश्रुतप्रकाशिकायामुक्तत्वात् सर्वशरीरकत्वमपि वस्त्वपरिच्छेद इति तत्र सर्वपदार्थप्रवेशोऽस्ति—इति चेन्न । सर्वशरीरकत्वस्य सर्वापृ-

थक्सिद्धत्वरूपत्वेनापृथक्सिद्धिसम्बन्धावच्छिन्नाभावाप्रतियोगित्वरूप-देशापरिच्छिन्नत्व एव पर्यवसानं भवतीत्यस्वरसेन तत्कल्पं परित्यज्य -निरतिशयगुणवत्त्वं तदिति-द्वितीयकल्पावलम्बनेन तत्रैव श्रुतप्रकाशिकाकृतां निर्भराङ्गीकारात्[1] ॥

---

१. (टि.) ननु--सर्ववस्तुसामानाधिकरण्यार्हत्वरूपसर्वशरीरकत्वं न देशापरिच्छेदान्तर्गतं; 'नित्यं विभुं सर्वगतं सुसूक्ष्मम्' इति पृथगभिधानात्। न च-तत्रापि निरतिशयगुणवत्त्वादिरूपानन्तत्वमेव पृथगभिहितमिति न दोष इति-वाच्यम्; तथा सति 'सर्वगतं-सर्वत्रान्तःप्रविश्यावस्थितं, तत्र हेतुमाह--सुसूक्ष्मम्' इति तद्भाष्यविरोधात् । किं च-सर्वशरीरकत्वस्य सर्वापृथक्सिद्धत्वरूपदेशापरिच्छेदत्वस्वरूपत्वाङ्गीकारे तस्यैव विभुत्वरूपत्वसंभवात्तस्य सर्ववस्तुसामानाधिकरण्यार्हत्वरूपत्वानुपपत्तिः । न हि घटाकाशसंयोगमात्रस्य घटाकाशयोस्सामानाधिकरण्ये प्रयोजकत्वं दृश्यते । तस्माद्वस्तवपरिच्छेदो नाम--सर्ववस्तुसामानाधिकरण्यार्हत्वलक्षणः कश्चन संबन्धविशेष इत्यकामेनापि स्वीकरणीयमिति, तत्र सर्वपदार्थस्यापि घटकतानिर्वाहः--इति चेत् ॥ अत्रोच्यते। सत्यज्ञानादिलक्षणघटकानन्तत्वं स्वरूपतो गुणतश्च वक्तव्यं, अतः अनन्तगुणवत्त्वमेव तदित्युक्तं; सर्ववस्तुसामानाधिकरण्यार्हत्वलक्षणानन्तत्वस्य स्वरूपमात्रनिष्ठत्वात्, निरतिशयगुणवत्त्वरूपस्य तस्य चोभयनिष्ठत्वात्। अत एवानुगृहीतं जन्माद्यधिकरणभाष्ये -"अनन्तपदं देशकालवस्तुपरिच्छेदरहितस्वरूपमाह; सगुणत्वात्स्वरूपस्य । स्वरूपेण गुणैश्चानन्त्यं, तेन पूर्वपदद्वयव्यावृत्तकोटिद्वयविलक्षणाः सातिशयस्वरूपसगुणाः नित्याः व्यावृत्ताः' इति ॥ श्रुतप्रकाशिकायामपि "समाभ्यधिकराहित्यनिदानभूतो गुणैर्निरतिशयप्रकर्षो वस्त्वपरिच्छेद इत्युक्तं भवति । सर्ववस्तुसामानाधिकरण्यार्हत्वं चास्मिन्नन्तर्गतं, तद्धि सर्वशरीरकत्वं, तच्च नियमनधारणशेषित्वकाष्ठा" इति सुव्यक्तमनुगृहीतम् ॥ अत्र सर्ववस्तुसामानाधिकरण्यार्हत्वरूपानन्तत्वस्य अन्तर्गतत्वेऽपि प्रकृतेऽनन्तपदेन न तथा बोधः; अपि तु निरतिशयगुणवत्त्वेनैवेति हृदि निधाय तथा प्रतिपादितम्। किं च सत्यादिलक्षणस्य अचेतनत्वाद्यवच्छिन्नव्यावर्तकताया वक्तव्यतया अचेतनाद्यसाधारणधर्माभावरूपमेव सत्यत्वादिकमवश्यं विवक्षणीयम । तथा चानुगृहीतं श्रीभाष्ये 'सत्यपदं निरुपाधिकसत्तायोगि ब्रह्माह, तेन विकारास्पदमचेतनं तत्संसृष्टश्चेतनश्च व्यावृत्तः' इत्यादि ॥ इत्थं च--अनन्तपदस्य नित्यव्यावर्तकतया सातिशयगुणवत्त्वरूपतदसाधारणधर्माभावरूपनिरतिशयगुणवत्त्वस्यैव प्रकृतेऽनन्तपदेन विवक्षितत्वान्न काऽप्यनुपपत्तिरिति बोध्यम् ॥

तस्मात्सत्यादिलक्षणतावच्छेदकस्य मोक्षजनकतावच्छेदकविषयता-व्यापकविषयताघटितविषयतावच्छेदकत्वाभावात्तद्धर्मावच्छिन्नस्य सूत्र-कारेणाकथनमिति सिद्धम् ॥

अथ—सत्यज्ञानादिलक्षणवाक्यघटकपदानां कोऽर्थः ? किं वा प्रयोजनम् ? —इति चेत् । अत्र **जन्माद्यधिकरणे भाष्यकृतः**—

"**सत्यपदं** निरुपाधिकसत्तायोगि ब्रह्माह, तेन विकारास्पदम-चेतनं तत्संसृष्टश्चेतनश्च व्यावृत्तः; नामान्तरभजनार्हावस्था-न्तरयोगेन तयोर्निरुपाधिकसत्तायोगरहितत्वात् । **ज्ञानपदं** नित्यासङ्कुचितज्ञानैकाकारमाह, तेन कदाचित्सङ्कुचितज्ञानत्वेन मुक्ता व्यावृत्ताः । **अनन्तपदं** देशकालवस्तुपरिच्छेदरहितं स्वरूपमाह, सगुणत्वात्स्वरूपस्य स्वरूपेण गुणैश्चानन्त्यम् ; तेन पूर्वपदद्वयव्यावृत्तकोटिद्वयविलक्षणास्सातिशयस्वरूपस्व-गुणा नित्या व्यावृत्ताः" —इति ॥

अयमर्थः ॥ निरुपाधिकेति—निरुपाधिकी कर्माप्रयोज्या या सत्ता कालनिष्ठाधिकरणता, निरूपकतासम्बन्धेन तद्युक्तमित्यर्थः । तथा च कर्माप्रयोज्यकालिकसम्बन्धावच्छिन्नाधिकरणतानिरूपकत्वं सत्यत्वम् । चैत्रादिशरीरावच्छिन्नजीवनिरूपितकालिकसम्बन्धा-वच्छिन्नाधिकरणताया आयुर्नामककर्मप्रयोज्यतया घटत्वाद्यवस्था-विशिष्टद्रव्यनिरूपिताधिकरणतायाश्च तज्जन्यफलभोक्तृजीवकर्मप्रयो-ज्यतया तदप्रयोज्याधिकरणतानिरूपकत्वाभावेन निरुक्तसत्यत्वार्थक-सत्यपदेनाचेतनबद्धजीवयोर्व्यावृत्तिः । **अथवा** निरुपाधिकी—परि-माणान्तरासमानाधिकरणा, या सत्ता परिमाणं, तद्युक्तमित्यर्थः । स्वभिन्नत्वस्वसामानाधिकरण्योभयसम्बन्धेन परिमाणविशिष्टान्यपरि-माणवत्त्वं उक्तोभयसम्बन्धेन परिमाणविशिष्टपरिमाणाभावपर्यवसितं सत्यत्वं । परिमाणाभावश्च—अपृथक्सिद्धिस्वाश्रयज्ञानापृथक्सिद्ध्येतद्-

न्यतरसम्बन्धावच्छिन्नप्रतियोगिताको ग्राह्यः। अचेतनसामान्ये स्थूल-सूक्ष्मरूपावस्थाभेदेन परिमाणद्वयसत्त्वनियमात् उक्तोभयसम्बन्धेन परिमाणविशिष्टपरिमाणमव्याहतमिति तद्व्यावृत्तिः। बद्धदशायां जीव-ज्ञाने कर्मकृतसङ्कोचविकासरूपावस्थाभेदनिबन्धनपरिमाणद्वयसत्त्वेन उक्तोभयसम्बन्धेन परिमाणविशिष्टपरिमाणस्यैव स्वाश्रयज्ञानापृथ-क्सिद्धिसम्बन्धेन बद्धजीवे सत्त्वात् तद्व्यावृत्तिः ॥

उक्तञ्च श्रुतप्रकाशिकायां—

"सत्यपदमसङ्कोचात् स्वरूपतो धर्मतश्चैकरूपत्वं ज्ञापयतीत्य-चित्तत्संसृष्टजीवव्यावृत्तिः" — इति ।

स्वरूपतः—अपृथक्सिद्धिसम्बन्धेन । धर्मतः—स्वाश्रयज्ञानापृथक्सिद्धि-सम्बन्धेन। एकरूपत्वं—उक्तोभयसम्बन्धेन परिमाणविशिष्टपरिमाणा-भावं ॥ तथा च उक्तान्यतरसम्बन्धेन परिमाणविशिष्टपरिमाणाभाव एव पर्यवसानमिति बोध्यम् ॥

यद्वा—निरुपाधिकसत्तायोगित्वं—निर्विकारस्वरूपयुक्तत्वं, निर्विकार-त्वपर्यवसितम् । तच्चापृथक्सिद्धिस्वाश्रयज्ञानापृथक्सिद्ध्येतदन्यतर-सम्बन्धावच्छिन्नकर्मप्रयोज्यधर्माभाववत्त्वम्। अस्मिंश्च कल्पे विकारा-स्पदमचेतनमित्यादिभाष्यं स्वरसतस्सङ्गच्छते ॥

नित्यासङ्कुचितेति ॥

ननु—ज्ञानत्वविशिष्टवाचिना ज्ञानपदेन कथं ज्ञानाश्रयस्य बोधः, कथं वा ज्ञानधर्मस्य नित्यासङ्कुचितत्वस्य? न च—पदजन्यपदार्थोपस्थिति-विषयस्येव अर्थापत्तिविषयस्यापि शाब्दबोधे भानाङ्गीकारात् ज्ञानत्वं सविषयकत्वं विनाऽनुपपन्नमित्यर्थापत्तिवशात् सविषयकत्वे भासमाने, घटादिविषयकत्वमादाय विनिगमनाविरहेण सर्वविषयकत्वस्य पूर्वोक्तनिरवच्छिन्नविषयताव्यापकत्वपर्यवसितस्य भानमुपपन्नमिति—वाच्यम्। एवमपि ज्ञानाश्रयबोधानिर्वाहात्—इति चेत् ॥

अत्र व्यासार्याः—

"ज्ञानपदार्थस्य अचेतननिष्ठस्थूलावस्थाचेतननिष्ठसार्वज्ञ्यरूपज्ञानबृहत्त्वैतदुभयहेतुभूतसङ्कल्पवत्त्वरूपबृंहणत्वविशिष्टे ब्रह्मपदार्थे अभेदेनान्वये विशेषणीभूतसङ्कल्पेऽपि तदन्वयात्—ज्ञानाभिन्नसङ्कल्पवत्त्वलाभेन ज्ञानाश्रयत्वस्य बोधविषयत्वोपपत्तेः । यथा सपरिकरो राजा दृष्टः, सपरिच्छदं गृहं क्रीतं, सवत्सा गौः क्रीतेत्यादौ दृष्टक्रीतादिपदार्थानां विशेषणांशे परिकरादौ विशेष्यांशे राजादौ चाभेदान्वयो दृश्यते ; तथा ज्ञानपदार्थस्याप्युभयत्रान्वयः ॥ परन्तूक्तस्थलेषु भिन्नपदोपस्थापितयोर्विशेषणविशेष्ययोर्दृष्टादिपदार्थस्याभेदेनान्वयः । प्रकृते चैकपदोपस्थापितयोरेव विशेषणविशेष्ययोर्ज्ञानपदार्थस्याभेदान्वय इति विशेषः ॥ न च—सपरिकरो राजा दृष्ट इत्यादावर्थापत्तिवशादेव विशेषणांशे दृष्टत्वादेप्रतीतिरिति—वाच्यम् । परिकरस्य दृष्टत्वं विना राज्ञि दृष्टत्वान्वयस्यानुपपत्तेरभावात् ॥ अतश्च लक्षणां विनैवासङ्कुचितज्ञानाश्रयत्वलाभान्मुक्तानां ज्ञानस्य बन्धकालावच्छेदेन निरवच्छिन्नविषयत्वाधिकरणनिष्ठनिरवच्छिन्नविषयतावच्छेदकत्वसम्बन्धावच्छिन्नाभावप्रतियोगित्वात्तिद्प्रातयोगिज्ञानवत्त्वरूपज्ञानपदार्थस्याभावात् ज्ञानपदेन मुक्तव्यावृत्तिः । 'कदाचित्सङ्कुचितज्ञानत्वेन मुक्ता व्यावृत्ताः' इति **भाष्यस्यापि** बन्धदशाकालीननिरवच्छिन्नविषयतासमानाधिकरणाभावप्रतियोगिज्ञानवत्त्वेन तदप्रतियोगिज्ञानाभावान्मुक्तव्यावृत्तिरित्यर्थः"—

—**इत्याहुः** ॥

नंनु[1]—इदमनुपपन्नम्, संयोगावच्छिन्नक्रियारूपगमनपदार्थैकदेश-संयोगे गुणाभेदान्वयतात्पर्येण गमनं गुण इत्यादिप्रयोगवारणाय अभेदसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रति पदजन्यपदार्थोपस्थितेर्विशेष्यतासम्बन्धेन हेतुत्वस्य वाच्यतया ब्रह्मपदार्थतावच्छेदकबृंहणत्वघटकीभूतसङ्कल्पे विशेष्यतासम्बन्धेन ब्रह्मपदजन्योपस्थितेरभावेन तत्र ज्ञानपदार्थस्य अभेदान्वयासम्भवात्। एवं सपरिकरो राजा दृष्ट इत्यादौ परिकरे दृष्टपदार्थाभेदान्वयप्रतिपादनमप्ययुक्तम्, परिकरपदस्य वृत्त्यघटकीभूतपदार्थान्वितस्वार्थकत्वेन सपरिकर इति समासानुपपत्तेः, सामर्थ्याभावात्। सामर्थ्यस्य समासप्रयोजकत्वं च 'समर्थः पदविधिः' इत्यनुशासनसिद्धम्। तत्र हि सामर्थ्यं—वृत्त्यघटकीभूतपदार्थानन्वितार्थत्वम्। यद्यपि 'शरैश्शातितपत्रः' इत्यादौ समासघटकीभूतपदार्थशातने तदघटकीभूतशरकरणकत्वान्वयान्निरुक्तसामर्थ्यं न समासप्रयोजकम्। तथाऽपि वृत्त्यघटकीभूतपदार्थेनाभेदान्वयविरहरूपसामर्थ्यस्य समासप्रयोजकत्वमव्याहतमिति प्रकृते वृत्त्यघटकीभूतदृष्टपदार्थस्य परिकरपदार्थेऽभेदान्वयाङ्गीकारे निरुक्तसामर्थ्याभावात्समासानुपपत्तिर्दुर्वारा—इति चेन् ॥

मैवम्[2] ॥ घटत्वविशिष्टघटादिकं तच्छब्देन निर्दिश्य स प्रमेय इति वाक्यात्तात्पर्यवशाद्घटे स्वातन्त्र्येण घटत्वे धर्मिपारतन्त्र्येण च

१. (टि.) सत्यं ज्ञानमनन्तं ब्रह्मेत्यादौ ब्रह्मणो ज्ञानाश्रयत्वबोधनिर्वाहाय ज्ञानपदार्थस्य ब्रह्मपदार्थैकदेशे संकल्पापरपर्यायबृंहणत्वेऽन्वयमङ्गीकृत्य ज्ञानाभिन्नसंकल्पवद्ब्रह्म ज्ञानाभिन्नमिति बोध उपपादनीयः, स च नोपपद्यते । पदार्थः पदार्थेनान्वेति न त्वेकदेशेनेति व्युत्पत्त्या ब्रह्मपदार्थैकदेशबृंहणत्वे ज्ञानपदार्थान्वयासंभवान्न ब्रह्मणि ज्ञानाश्रयत्वबोधः संभवतीत्याशङ्कते--नन्विति ॥

२. (टि.) तादृशनियमसत्यस्यकार्यकारणभाव प्रयोजनान्तरानुरोधेन परिष्कुर्वन्समाधत्ते —मैवमित्यादिना ॥

प्रमेयाभेदान्वयबोधोदयेन तत्र घटत्वे विशेष्यतासम्बन्धेन पदजन्योपस्थितेरभावेन व्यभिचारवारणाय किञ्चिन्निष्ठविशेष्यतानिरूपितप्रकारत्वानवच्छिन्नाभेदसंसर्गावच्छिन्नप्रकारताशालिबोधं प्रत्येव विशेष्यतया पदजन्योपस्थितेर्हेतुत्वस्य वाच्यतया ब्रह्मपदार्थतावच्छेदकघटकसङ्कल्पे धर्मिपारतन्त्र्येण ज्ञानाभेदान्वयेऽपि बाधकविरहात् । धर्मिपारतन्त्र्येण भानस्थले सर्वत्रान्यनिष्ठविशेष्यतानिरूपितप्रकारताया धर्मिनिष्ठविशेष्यतानिरूपितप्रकारत्वावच्छिन्नत्वेन प्रकृते बृंहणत्वघटकसङ्कल्पनिष्ठविशेष्यतानिरूपितज्ञाननिष्ठप्रकारताया ब्रह्मनिष्ठविशेष्यतानिरूपितप्रकारत्वावच्छिन्नत्वेन तदनवच्छिन्नप्रकारताकबोधस्य विशेष्यतया सङ्कल्पेऽनुत्पत्त्या तत्र विशेष्यतया पदजन्योपस्थितेरसत्त्वेऽपि क्षतेरभावात् । एवं सपरिकरो राजा दृष्टः इत्यादौ परिकरे दृष्टपदार्थस्याभेदान्वयेऽपि न सामर्थ्यानुपपत्तिः ॥

"द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् ।
समवायस्तथाऽभावः पदार्थास्सप्त कीर्तिताः ॥"

इत्यादौ समासघटकपदार्थे विशेषे पदार्थाभेदान्वयदर्शनेन सामर्थ्यानुपपत्तिपरिहाराय वृत्त्यघटकीभूतपदार्थनिष्ठाभेदसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यत्वाप्रयोजकत्वरूपसामर्थ्यघटकाभेदसम्बन्धावच्छिन्नप्रकारतायां धर्मिनिष्ठविशेष्यतानिरूपितप्रकारत्वानवच्छिन्नत्वस्य निवेशनीयत्वात् ॥

---

१. (टि.) सपरिकरो राजा दृष्ट इत्यादावाशंकितं समासासाधुत्वं असामर्थ्यशरीरप्रविष्टप्रकारतायां प्रयोजनान्तरानुरोधेन विशेषणान्तरप्रवेशावश्यकतामभिप्रेत्य परिहरति–एवमित्यादिना ॥

२. (टि.) तादृशविशेषणान्तरप्रवेशे नैयायिकोक्तविभागप्रदर्शनेन तदभिमतत्वं सूचयति—द्रव्यं गुण इत्यादिना ॥

अथ--'सपरिकरो राजा दृष्टः' इत्यादौ परिकरे न दृष्टपदार्थान्वयापेक्षा, तत्र परिकरदर्शनकालीनो राजा दर्शनविषय इत्येव बोधात्परिकरेण सह राजा दृष्ट इत्यादिरूपतद्विग्रहघटितवाक्ये समभिव्याहृतक्रियाकालस्यैव सहशब्दार्थतया परिकरेणेति तृतीयान्तार्थपरिकरविषयकत्वस्य सहशब्दार्थघटकदर्शनरूपक्रियायामन्वयेन तत्कालरूपसहशब्दार्थस्यावच्छिन्नत्वसम्बन्धेन राजपदार्थेऽन्वयात्परिकरविषयकदर्शनकालावच्छिन्नो राजा दर्शनविषय इति बोधस्योत्पत्तेः ॥ तथा च–विशेषणेऽपि पदार्थान्तरान्वयप्रदर्शनोदाहरणपरतया एतत्स्थलप्रदर्शनं व्यासार्याणामसङ्गतम्---इति चेन्न ॥ एतदस्वरसेनैव श्रुतप्रकाशिकायामुदाहरणान्तरप्रदर्शनात् ॥

उक्तं च तत्र---

"विशिष्टे वस्तुन्युपस्थापिते विधित्सिताकारस्य विशेष्यविशेषणोभयान्वयित्वं च दृष्टम् । यथा–'सानुचरो राजा समागतः, मया च स राजा सत्कृतः' इति, 'सवत्सा गौः स्थिता, सा च दत्ता' इति ॥"

अत्र च–सानुचरादिरूपतच्छब्दार्थैकदेशानुचरादौ सत्कृतादिपदार्थान्वयं विना अनुचरविशिष्टराजसत्कारबोधानिर्वाहादेकदेशान्वयावश्य-

---

१. (टि.) अथ सपरिकरो राजा दृष्ट इत्यादौ राजविशेषणीभूतपरिकरे न दृष्टपदार्थान्वयापेक्षा, किं तु राजपदार्थ एव; समभिव्याहृतक्रियाकालस्यैव सहशब्दार्थतया परिकरदर्शनकालावच्छिन्नो राजा दर्शनविषय इत्येव बोधाङ्गीकारेण समभिव्याहृतपदार्थस्य विशेषणविशेष्योभयत्रान्वयप्रयोजकदृष्टान्ततया तद्वाक्यप्रदर्शनमनुचितमिति शंकते–अथेत्यादिना ॥

कता; तच्छब्दार्थैकदेशानुचरादौ सत्कृतादिपदार्थान्वये तु पूर्वोक्त-सामर्थ्यानुपपत्तिरपि नास्तीति—ध्येयम्[1] ॥

अनन्तपदमिति ॥ अनन्तपदार्थश्च पूर्वमेव व्याख्यातः ॥

ननु—अनन्तपदेनैवाचेतनबद्धमुक्तानां व्यावृत्तेरितरपदद्वयं व्यर्थम् —**इति चेत्** ॥ **नैवम्** । सत्यादिलक्षणतावच्छेदककोटौ नानन्तपदार्थस्य सर्वस्यापि प्रवेशः, वैयर्थ्यात्; किन्तु वस्त्वपरिच्छेदात्मकानन्तगुण-वत्त्वघटकीभूतस्य नित्यमात्रव्यावर्तकस्य गुणविशेषस्यैव । स च गुणविशेषः स्वाधिकरणावृत्तित्वस्वप्रयोज्यत्वोभयसम्बन्धेन सङ्कल्प-विशिष्टहेयगुणाभावनिरूपितनिरवच्छिन्नाधिकरणत्वाभावरूपः, अ-नन्तादिनित्येषु विद्यमानाया हेयगुणाभावनिरूपितनिरवच्छिन्नाधिक-रणताया ईश्वरसङ्कल्पप्रयोज्यत्वेन निरुक्तोभयसम्बन्धेन सङ्कल्पवि-शिष्टतया तदभावविरहात् । अनेन नित्यव्यावृत्तिः । सिद्धान्ते अभावस्याधिकरणनिष्ठक्लृप्तधर्मस्वरूपतयाऽभावरूपस्याप्यस्य गुणत्वोप-पत्तिः । उक्तहेयाभावीयनिरवच्छिन्नाधिकरणत्वाभावस्याचेतनबद्धमुक्त-साधारण्यात्तद्व्यावर्तकमितरविशेषणद्वयं सार्थकमेव ॥ निरुक्तानन्तत्व-घटकगुणविशेषस्य सत्यादिलक्षणतावच्छेदकघटकत्वं च **श्रुतप्रकाशि-काकारै**रेव व्यञ्जितम् ॥ यतस्तैर्जन्मादिकारणतारूपलक्षणस्य ब्रह्मो-द्देश्यकब्रह्मेतरत्वावच्छिन्नप्रतियोगिकभेदत्वावच्छिन्नविधेयकानुमिति-जनकत्वं, सत्यादिलक्षणस्य चाचेतनत्वाद्यवच्छिन्नभेदकूटविधेयकानु-मितिजनकत्वमिति विशेषोऽभिहितः । अतो यथा पृथिव्यां जल-त्वाद्यवच्छिन्नभेदविधेयकानुमितौ स्नेहादिरूपजलासाधारणधर्माभाव एव हेतुः, तथा अचित्त्वाद्यवच्छिन्नभेदानुमितौ तत्तदसाधारणविकारादि-

---

१. (टि.) उक्तोदाहरणेषु तच्छब्देनैव समभिव्याहृतपदार्थान्तरान्वययोग्यस्य विशिष्टवस्तुन उपस्थापिततया विशेषणे तदन्वयेऽप्युक्तसामर्थ्यानुपपत्तिर्नास्तीति समाधत्ते—एतदस्वरसेनेत्यादिना ध्येयमित्यन्तेन ॥

रूपधर्माभाव एव हेतुरिति; नित्यत्वावच्छिन्नभेदानुमितिप्रयोजकनित्यासाधारणधर्माभावस्यापि सत्यादिलक्षणघटकत्वमावश्यकमिति–तेषामाशयोऽवगम्यते ॥

न च–अत्र अचेतनाद्यसाधारणधर्माभावस्य घटकतया अचेतनत्वाद्यवच्छिन्नभेदानुमितिप्रयोजकतासम्भवेऽपि मुक्तासाधारणधर्माभावस्य अघटकतया मुक्तत्वावच्छिन्नभेदानुमितिप्रयोजकत्वासम्भवः—इति वाच्यम् । नित्यासङ्कुचितज्ञानरूपज्ञानपदार्थस्य कदाचित्सङ्कुचितज्ञानरूपमुक्तासाधारणधर्माभावत्वेनैव घटकतास्वीकारात् तेन रूपेण ज्ञानस्य पदादनुपस्थितावपि नित्यासङ्कुचितज्ञानत्वं कदाचित्सङ्कुचितज्ञानाभावत्वं विना अनुपपन्नमित्यर्थापत्त्यैव तथा भानसम्भवात्॥ तथा च–अचेतनत्वाद्यवच्छिन्नभेदकूटविधेयकानुमितिप्रयोजकस्य सत्यादिलक्षणस्य अचेतनाद्यसाधारणधर्माभावरूपत्वमावश्यकम् ॥

उक्तञ्च–"ब्रह्मणस्सकलेतरव्यावृत्तं स्वरूपमभिधीयते–सत्यं ज्ञानमनन्तं ब्रह्मेति"–इति **भाष्यप्रतीकमुपादाय श्रुतप्रकाशिकायां**–

"**ननु**–लक्षणभूतेन जन्मादिकारणत्वेन ब्रह्मणस्सजातीयविजातीयव्यावृत्तिस्सिद्धा, अन्यथा तस्य लक्षणत्वायोगात्; तत्कथं सत्यादिवाक्येन सकलेतरव्यावृत्ताभिधानोक्तिः ? ॥ **उच्यते** । व्यावृत्तिर्द्विविधा–व्यक्त्यन्तरेष्वसम्भावितधर्मयोगरूपा, तत्तज्जातीयासाधारणधर्मानन्वयरूपा च । तत्र विलक्षणधर्मयोगे व्यक्त्यन्तरेभ्योऽन्यत्वं सिध्यति, न त्वतज्जातीयत्वं; तज्जातिव्यञ्जकधर्मान्वयाधीनतज्जातीयत्वशङ्कानपगमात् । तदनन्वये तु तज्जातीयताव्यावृत्तिस्सिध्यति; यथा घटस्य संस्थानविशेषेण स्वेतरसमस्तवैलक्षण्ये सिद्धेऽपि पृथिवीत्वव्यवस्थापकगन्धवत्त्वयोगात् पृथिवीजातीयत्वं नापैति; तदयोगाज्जलादिषु तज्जातीयत्वापगमः । एवं जगत्का-

रणत्वरूपविलक्षणधर्मान्वये सत्यपि ब्रह्मणोऽचिज्जातीयत्व-जीवजातीयत्वशङ्काऽवतिष्ठत इति तज्जातीयताव्यावृत्तिः सत्या-दिवाक्येन प्रतिपाद्यत इति तस्य सकलेतरव्यावृत्तस्वरूप-बोधकतोक्तिर्युक्ता ॥" —इति ॥

व्यावृत्तिः—इतरभेदानुमितिः । व्यक्त्यन्तरेष्वसम्भाविन्नधर्मयोगरूपा—इतरव्यावृत्तजगत्कारणत्वादिरूपधर्मज्ञानजन्या। तत्तज्जातीयासाधारण-धर्मानन्वयरूपा च—तत्तदसाधारणधर्माभावज्ञानजन्या ॥

अयमाशयः ॥ गन्धवत्त्वादिलक्षणेन पृथिव्यां पृथिवीतरत्वावच्छिन्न-प्रतियोगिकभेदानुमितिरेव जायते, तादात्म्यसम्बन्धावच्छिन्नेतर-निष्ठव्याप्यतानिरूपितस्वरूपसम्बन्धावच्छिन्नगन्धाभावनिष्ठव्यापकता-ग्रहसहितस्य स्वरूपसम्बन्धावच्छिन्नगन्धाभावत्वावच्छिन्नाभावग्रहस्य पृथिव्यां सत्त्वात्; न तु जलत्वाद्यवच्छिन्नभेदकूटानुमितिः, तादात्म्येन जलं प्रति स्वरूपसम्बन्धेन गन्धाभावस्य व्यापकताया अग्रहात्, गन्धादौ पृथिवीत्वसमनैयत्यरूपपृथिव्यसाधारणधर्मत्वात्मकपृथिवी-लक्षणत्वग्रहदशायां पृथिवीतरव्यावृत्तत्वग्रहेण इतरव्यापकीभूताभाव-प्रतियोगित्वग्रहेऽपि जलत्वादिजातेः पृथिवीव्यावृत्तत्वग्रहासम्भवेन तादात्म्येन जलत्वावच्छिन्नं प्रति गन्धाभावस्य व्यापकताया गृहीतु-मशक्यत्वात् । येन सम्बन्धेन येन रूपेण व्यापकता गृह्यते तत्सम्बन्धावच्छिन्नतद्रूपावच्छिन्नाभाववत्ताज्ञानात् यत्सम्बन्धेन यद्ध-र्मावच्छिन्नं प्रति व्यापकता गृह्यते तत्सम्बन्धावच्छिन्नप्रतियोगिताक-तद्धर्मावच्छिन्नाभावस्य अनुमितिरिति नियमात् । स्नेहाद्यभावरूप-लक्षणेन च जलत्वाद्यवच्छिन्नभेदानुमितिर्जायते, तादात्म्येन जलादिकं प्रत्यपृथक्सिद्धिसम्बन्धेन स्नेहादेर्व्यापकताग्रहस्य पृथिव्यां तत्सम्बन्धा-वच्छिन्नस्नेहाभावग्रहस्य च सत्त्वात् ॥ एवं प्रकृतेऽपि जन्मादिकारण-त्वरूपब्रह्मलक्षणस्य ब्रह्मासाधारणत्वग्रहदशायां तादात्म्येन ब्रह्मेत-

त्प्राति स्वरूपसम्बन्धेनोक्तलक्षणाभावस्य व्यापकताग्रहेऽपि अचेतनत्वादेर्ब्रह्मव्यावृत्तत्वाग्रहेण अचेतनव्यापकत्वस्य उक्तलक्षणाभावेऽग्रहात् तल्लक्षणेन ब्रह्मेतरत्वावच्छिन्नभेदानुमितिरेव जायते । सत्यादिलक्षणेन च अचेतनत्वाद्यवच्छिन्नभेदानुमितिः, तस्य अचेतनव्यापकीभूतविकाराद्यभावघटितत्वात्— इति ॥

एवं च—सत्यादिलक्षणशरीरे नित्यत्वव्यापकीभूतस्य स्वव्यधिकरणसङ्कल्पप्रयोज्यहेयाभावनिरूपितनिरवच्छिन्नाधिकरणत्वाभावस्य नित्यत्वावच्छिन्नभेदानुमितिप्रयोजकस्य घटकत्वमावश्यकमिति पूर्वोक्तश्रुतप्रकाशिकाग्रन्थादेवावगम्यते ॥

ननु—

सिद्धान्ते केवलव्यतिरेकिहेतोरनङ्गीकारात् कथमुक्तलक्षणयोरितरभेदानुमितिजनकत्वम्? उक्तं च—**आत्मसिद्धौ भगवद्यामुनमुनिभिः**—

"केवलव्यतिरेकि तु साधनदशामेव नासादयति, सपक्षान्वयविरहात्, असाधारणवत्" इत्यादिना ॥

न च—इदमयुक्तम्, अन्वयव्याप्तिज्ञानस्येव व्यतिरेकव्याप्तिज्ञानस्याप्यनुमिति कारणताया अनुभवसिद्धत्वादिति—वाच्यम् । केवलव्यतिरेक्यनुमानं हि न तावद्भावसाध्यकं सम्भवति, तत्र साध्याभावव्यापकीभूताभावप्रतियोगिहेतुमानिति व्यतिरेकपरामर्शस्य साध्यविषयकत्वेनानुमितेः पूर्वं साध्यप्रसिद्धेरावश्यकतया तत्र अन्वयव्याप्तेरपि सुग्रहत्वेन तादृशहेतोरन्वयव्यतिरेकित्वात् ॥

---

१. (टि.) ननूक्तलक्षणयोः इतरव्यावर्तकत्वं न संभवति; गन्धवत्त्वस्येव तयोरपि केवलव्यतिरेकित्वमङ्गीकृत्य इतरव्यावर्तकत्वं वक्तव्यं, तच्च न संभवति, सिद्धान्ते केवलव्यतिरेकिहेतोरनङ्गीकारादिति शंकते—ननु सिद्धान्त इत्यादिना ॥

न च—भावसाध्यकस्थले तदसम्भवेऽपि अभावसाध्यकस्थले तादृशानुमानं सम्भवत्येव, पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वादित्यादौ इतरत्वव्यापकीभूताभावप्रतियोगिगन्धवती पृथिवीत्यादिपरामर्शात पृथिव्यामितरभेद इत्याकारकसाध्यविशेष्यकानुमितेर्नैयायिकैरस्वीकारात्तत्रानुमितेः पूर्वं साध्यप्रसिद्ध्यभावेन अन्वयव्याप्तिग्रहासम्भवात्—इति वाच्यम् ॥ इतरभेदाभावव्यापकीभूताभावप्रतियोगिगन्धवतीत्याद्याकारकस्य साध्याभावत्वेन साध्याभावावगाहिपरामर्शस्यानुमितिकारणताया युक्तत्वेऽप्यन्यरूपेण साध्याभावावगाहिपरामर्शस्य कारणताया अयुक्तत्वात् । अन्यथा तद्रूपव्यापकाभावप्रतियोगिघटत्ववत्ताज्ञानाद्घटे रूपाभावानुमित्यापत्तेः तद्रूपस्य वस्तुतो रूपाभावाभावात्मकत्वात् ॥ एवं भावसाध्यकस्थलेऽपि वह्न्यभावस्य तद्व्यक्तित्वेनावगाहिनः तद्व्यक्तिव्यापकीभूताभावप्रतियोगिधूमवत्ताज्ञानात् पर्वते वह्निरित्यनुपस्थितवह्न्यादिमुख्यविशेष्यकानुमित्यापत्तेश्च ॥

न च—साध्याभावत्वेन साध्यीभूताभावप्रतियोगितावच्छेदकरूपेण वा साध्याभावावगाहिनो व्यतिरेकपरामर्शस्य अनुमितिकारणत्वात् नोक्तातिप्रसङ्गः, तद्रूपत्ववह्न्यभावनिष्ठतद्व्यक्तित्वयोः साध्याभावत्वरूपत्वतत्प्रतियोगितावच्छेदकत्वयोरभावात् ; पृथिवीतरभिन्नेत्यत्र इतरत्वस्य साध्यप्रतियोगितावच्छेदकत्वात्तादात्म्येन इतरव्यापकीभूताभावप्रतियोगिगन्धवती पृथिवीत्यादिपरामर्शादनुमित्युपपत्तिः—इति वाच्यम् । तथा सति वह्न्यभावानुमितौ वह्निमदवृत्तिमानित्याकारकस्य साध्यप्रतियोगितावच्छेदकरूपेण साध्याभावावगाहिनोऽन्वयपरामर्शस्यापि कारणताया दुर्वारत्वात् । न चेष्टापत्तिः, नैयायिकैस्तदनङ्गीकारात् ॥

उक्तं च बाधग्रन्थे दीधितिकारादिभिः—

"साध्यासमानाधिकरणधर्मवत्त्वं बाध एव, न तु सत्प्रतिपक्षः; तत्र साध्याभावाभावत्वेन साध्यस्याप्रवेशेन साध्याभावानुमापकत्वायोगात्"—इति ॥

तथा च—अन्वयव्याप्तिज्ञानस्य साध्याभावत्वेन तदवगाहिन एव कारणतावत् व्यतिरेकपरामर्शस्यापि तथैव कारणताया वक्तव्यतया अप्रसिद्धसाध्यकस्थले साध्याभावत्वेन तदवगाहिव्यतिरेकपरामर्शासम्भवात् केवलव्यतिरेक्यनुमानं न सम्भवति ॥ प्रपञ्चितश्चेदं केवलव्यतिरेकिभङ्गवादार्थे—

"तस्माज्जन्मसत्यादिलक्षणयोरितरभेदानुमापकत्वकथनं सिद्धान्तविरुद्धम् ॥"
—इति चेत् ॥

अत्रोच्यते ॥ लक्षणसामान्यस्य सिद्धान्तेऽन्वयव्यतिरेकिरूपत्वादितरभेदानुमापकत्वोपपत्तिः; गन्धवत्त्वादिलक्षणं तावदन्वयव्यतिरेक्येव, घटादावन्वयव्याप्तिग्रहात् ॥

न च—अनेकव्यक्तिवृत्तिलक्षणे तथा सम्भवेऽपि एकमात्रव्यक्तिरूपाकाशादिलक्षणे शब्दगुणकत्वादावन्वयव्यतिरेकित्वं न सम्भवति—इति वाच्यम्। आकाशस्य कल्पभेदेन नानात्वेन एकमात्रव्यक्तित्वासम्भवात् ॥

नचैवमपि ब्रह्मलक्षणेऽन्वयव्यतिरेकित्वं न सम्भवतीति वाच्यम्। ब्रह्मण एकत्वेऽपि नानाधर्माश्रयत्वेन एकधर्मावच्छिन्ने साध्यस्या-

---

१. (टि) सिद्धान्ते लक्षणसामान्यस्यान्वयव्यतिरेकित्वमेवाङ्गीक्रियते। नानाव्यक्तिपक्षकगन्धादिहेतोर्घटादावन्वयव्याप्तिग्रहात् अन्वयव्यतिरेकित्वं स्फुटमेव; एकव्यक्तिपक्षकजगत्कारणत्वादिहेतोस्तु प्रकृतपक्षतावच्छेदकत्वेनाभिमतधर्माभिन्नधर्मावच्छेदेनान्वयव्याप्तिग्रहसंभवात्तस्याप्यन्वयव्यतिरेकित्वं सूपपादं भवतीति समाधत्ते—लक्षणसामान्यस्य सिद्धान्त इत्यादिना ॥

सिद्धिदशायामपि धर्मान्तरावच्छिन्ने व्याप्तिग्रहसम्भवात्, आकाश-स्तल्लिङ्गादित्याद्यधिकरणेषु जन्मादिलक्षणेन ब्रह्मेतरभेदस्य साधन-दशायां प्राणपदतात्पर्यविषयत्वावच्छिन्ने इतरभेदजगत्कारणत्वयोर्व्याप्तिग्रहसम्भवात् प्राणाधिकरणस्य आकाशाधिकरणानन्तरमावित्वेऽपि तत्तदधिकरणार्थानां सिद्धवत्कारेणैव एकैकाधिकरणप्रवृत्तेः पूर्वतन्त्र-सिद्धत्वात् प्राणाधिकरणसिद्धव्याप्तिमुपजीव्य आकाशाधिकरण-प्रवृत्तेरविरोधात् जन्मादिलक्षणस्य अन्वयव्यतिरेकित्वमुपपन्नम् ॥ सत्यादिलक्षणे च विकाराद्यभावस्य प्रत्येकं जडादिभेदसाधकतयाऽन्वयव्यतिरेकित्वं स्पष्टमेव ॥

वेदान्ताचार्यास्तु[1]—

"जन्मादिलक्षणाभावेन चतुर्मुखादिष्वीश्वरत्वाभाव एवं साध्यते । ब्रह्मादयोऽनीश्वराः ; जगत्कारणत्वाभावात्, घटवत् ; कालो न प्रकृतिः, महदादिविकाररहितत्वात्, चेतनवत् ; त्रिगुणं कालातिरिक्तं, कालादिविकाररहितत्वात्, चेतनवदेव—इत्याद्यन्वयव्यतिरेकिभिः ब्रह्मादिष्वीश्वरभेदसिद्धौ तुल्यवित्तिवेद्यतया ईश्वरादौ ब्रह्मादिभेदस्सिध्यतीत्येकमात्रव्यक्तिवृत्तिलक्षणानामन्वयव्यतिरेकित्वमुपपन्नम् ॥" —इति वदन्ति ॥

एवं च—जन्मादिलक्षणस्य ब्रह्मेतरत्वावच्छिन्नभेदविधेयकानुमितिजनकत्वात्सत्यादिलक्षणस्य अचेतनत्वाद्यवच्छिन्नभेदानुमितिजनकत्वात् तद्घटकयोर्ज्ञानानन्तपदार्थयोर्मुक्तनित्यासाधारणधर्माभावत्वेनैव निवेशादुक्तलक्षणशरीरे समस्तपदार्थानां प्रवेशाप्रसक्त्या मोक्षजनकतावच्छेदकविषयताव्यापक-विषयताघटित-विषयतावच्छेदकावच्छिन्नत्वाभावादेतल्लक्षणं परित्यज्य जन्मादिलक्षणमेव सूत्रितमिति सिद्धम् ॥

---

१. (टि) जगत्कारणत्वहेतोः प्रकारान्तरेणान्वयव्यतिरेकित्वमुपपादयतामाचार्याणां मतमाह—वेदान्ताचार्यास्त्विति ॥

तत्सूत्रार्थस्तु ॥ जगज्जन्मादिसमुदायनिरूपितकारणत्वं ब्रह्मलक्षणमिति ॥ जन्म आदिः यस्येति तद्गुणसंविज्ञानो बहुव्रीहिः, अतद्गुणसंविज्ञानत्वे जन्मनो लक्षणकोट्यप्रवेशापत्तेः ॥

तथा हि ॥ बहुव्रीहिर्द्विविधः तद्गुणसंविज्ञानः, अतद्गुणसंविज्ञानश्चेति । तत्र प्रथमस्योदाहरणं 'सर्वादीनि सर्वनामानि' 'लम्बकर्णमानय' इत्यादि; द्वितीयस्योदाहरणम् 'चित्रगुमानय' इति ॥ तच्छब्दार्थो विशेष्यं, गुणशब्दार्थश्च विशेषणं । तद्गुणौ—विशेष्यविशेषणे, सम्यक्—एकधर्मावच्छिन्नान्वयि, ज्ञापयतीति व्युत्पत्त्या; विशेष्यनिष्ठविषयतानिरूपितविषयतावच्छेदकावच्छिन्नविषयतानिरूपितविशेषणनिष्ठविषयताप्रयोजकत्वं—तद्गुणसंविज्ञानत्वं । तदन्यत्वं च—अतद्गुणसंविज्ञानत्वम् ॥

सर्वादीनीत्यत्र सर्व आदिर्येषामिति विग्रहवाक्याद्यत्पदार्थविश्वादिशब्दघटितसमुदायनिरूपितप्रथमघटकताश्रयस्सर्वशब्द इति बोधः ॥ आदिशब्दस्य प्रथमघटकताश्रयपरत्वात् येषामिति षष्ठ्याश्च स्वघटितसमुदायनिरूपितत्वार्थकत्वात् समासवाक्याच्च सर्वशब्दनिष्ठप्रथम घटकतानिरूपितसमुदायघटकास्सर्वनामसंज्ञाश्रया इति बोधः ॥ सर्वशब्दे तादृशसमुदायनिरूपितप्रथमघटकत्वं च तादृशसमुदायत्वाश्रयशब्दविषयकोपस्थितिध्वंसासमानकालीनोपस्थितिविषयत्वं । सर्वादिगणपाठजन्यत्वं च—उपस्थितौ निवेश्यं; तेन पुरुषान्तरीयवाक्ये विश्व-

१. (टि.) तद्गुणसंविज्ञान इति ॥ 'तस्य—अन्यपदार्थस्य, गुणाः—उपलक्षणानि। तेषामपि कार्ये संविज्ञाने' इति तद्गुणसंविज्ञानशब्दार्थस्य कैयटादौ वैयाकरणैरुक्ततया तत्फलितार्थमाह—तच्छब्दार्थो विशेष्यमित्यादिना ॥ तथा च जन्मकारणत्वस्यापि तत्समुदायघटकत्वेन जन्मादिकारणत्वसमुदाय एव ब्रह्मलक्षणमिति निरवद्यम् ॥

शब्दोत्तरं सर्वशब्दनिवेशेऽपि न क्षतिः । तादृशसमुदायघटकत्वं च स्वरूपसम्बन्धेन समुदायत्वाश्रयत्वमेव । सर्वशब्दघटितसमुदायत्वाश्रयत्वस्य सर्वशब्दसाधारण्येन तद्गुणसंविज्ञानत्वे सर्वशब्दस्यापि सर्वनामसंज्ञोपपत्तिः । तादृशसमुदायत्वाश्रयत्वेन सर्वशब्दस्यापि बोधात् विश्वादिशब्दरूपविशेष्यनिष्ठा या तादृशसमुदायत्वावच्छिन्नमुख्यविशेष्यता तन्निरूपिता तादात्म्यसम्बन्धावच्छिन्नप्रकारतावच्छेदकीभूतसर्वनामसंज्ञाश्रयत्वावच्छिन्नविषयतानिरूपिता, सैव विशेषणीभूतसर्वशब्दनिष्ठोक्तसमुदायत्वावच्छिन्नविषयतेति तत्प्रयोजकत्वादेव तद्गुणसंविज्ञानत्वस्योक्तस्थले उपपादनीयत्वात्, तादृशसमुदायत्वेन सर्वशब्दस्याभाने तत्र तद्गुणसंविज्ञानत्वानुपपत्तेः ॥

अतद्गुणसंविज्ञानत्वे च सर्वशब्दस्य सर्वनामसंज्ञा न सिध्यति । तत्कल्पे—सर्वः आदिः पूर्ववृत्तिर्येषामिति विग्रहवाक्यात् विश्वादिघटितसमुदायपूर्ववृत्तिस्सर्वशब्द इति समासवाक्याच्च सर्वशब्दोत्तरवृत्तिसमुदायघटकास्सर्वनामसंज्ञाश्रया इति बोधात् सर्वशब्दोत्तरसमुदायघटकत्वस्य सर्वशब्दव्यावृत्तत्वात् ॥

एवमेव जन्मादीत्यत्र तद्गुणसंविज्ञानत्वे जन्मनो लक्षणघटकत्वम्, अन्यथा तदभावः । जन्म आदिर्यस्येति विग्रहवाक्यात् यत्पदार्थसमुदायनिरूपितप्रथमघटकतावज्जन्मेति बोधः, निरूपितत्वस्य षष्ठ्यर्थत्वात् । समासाच्च जन्मनिष्ठप्रथमघटकतानिरूपकसमुदाय इति बोधः ॥

अत्र प्रथमघटकताप्रविष्टोपस्थितिषु यतोवेत्यादिश्रुतिजन्यत्वं निवेश्यम् । इतरत्पूर्ववदूह्यम् । लम्बकर्णमानयेत्यादौ लम्बकर्णविशिष्टस्यैव आधेयतया द्वितीयार्थसमीपदेशसंयोगरूपानयनकर्मत्वेऽन्वयेन कर्णस्यापि तत्र आधेयतासम्बन्धेन धर्मिपारतन्त्र्येणान्वयाङ्गीकारात् कर्णविशिष्टस्य संयोगे कर्णस्यापि गगनादिरूपसमीपदेशसंयोगोत्पत्त्या

तादृशसंयोगे कर्णाधेयत्वस्याबाधात् पुरुषनिष्ठाविषयतानिरूपितविषयतावच्छेदककर्मत्वत्वावच्छिन्नविषयतानिरूपितकर्णनिष्ठविषयताप्रयोजकत्वात् तद्गुणसंविज्ञानता ॥

चित्रगुमानयेत्यादौ कर्मत्वे गवादेरन्वयासम्भवात् नातिव्याप्तिः ॥ न च—तत्र विशिष्टवैशिष्ट्यबोधस्वीकारे गवादेरपि परम्परया कर्मत्वेऽन्वयात् तल्लक्षणातिव्याप्तिः—इति वाच्यम् ॥ विशिष्टबोधतात्पर्यकत्वे तस्यापि तद्गुणसंविज्ञानत्वात्, विशेष्येविशेषणमिति रीत्या बोधतात्पर्यदशायामेव अतद्गुणसंविज्ञानत्वेन उदाहरणात्। यद्वा-विशेष्यस्य येन सम्बन्धेन यत्रान्वयः, तेन सम्बन्धेन विशेषणस्य तदन्वयित्वमेव तद्गुणसंविज्ञानत्वशरीरे प्रवेश्यमिति नोक्तदोषः ॥

तथा च—उक्तसूत्रे तद्गुणसंविज्ञानत्वाश्रयणात् जन्मादिसमुदायकारणत्वं ब्रह्मलक्षणं सम्प्रतिपन्नम् ॥

ननु—समुदायकारणत्वस्य लक्षणत्वं न सम्भवति, प्रत्येककारणत्वस्यापि अनतिप्रसक्तत्वेन तस्यैव लक्षणत्वसम्भवेन वैयर्थ्यात्। न च—स्थित्यादिकारणमन्यत्स्यादिति शङ्कानिरासकतया समुदायकारणत्वस्य लक्षणत्वाश्रयणान्न वैयर्थ्यमिति—वाच्यम्। तथाऽपि व्यभिचारावारकविशेषणघटितत्वेन इतरभेदानुमाने व्याप्यत्वासिद्धेः अधिकोक्तिरूपनिग्रहस्थानस्य वा दुर्वारता—इति चेन्न ॥ स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मान्तरघटितधर्मस्यैव व्याप्यतावच्छेदकत्वेऽपि जन्मनिरूपितकारणतात्वस्य समुदायनिरूपितकारणतात्वसामानाधिकरण्येऽपि तस्य समुदायनिरूपितकारणतात्वशरीरे घटकताविरहात्, जन्मस्थितिलयनिष्ठसमुदायत्वाश्रयनिरूपितकारणतात्वरूपोक्तलक्षणतावच्छेदकशरीरे जन्मादीनामाधेयतासम्बन्धेन समुदायत्वांशे विशेषणत्वेऽपि निरूपितत्वसम्बन्धेन कारणतांशे विशेषणता-

विरहात्, जन्मादिसमुदायनिरूपितकारणतात्वनिरूपितविषयतां प्रति जन्मादिकारणतात्वनिरूपितविषयिताया व्यापकताविरहात् तद्विषयिताऽव्यापकविषयितानिरूपकत्वस्यैव तद्घटकतारूपत्वात्, जन्मादिसमुदायनिरूपितकारणतात्वमित्याकारकज्ञाने जन्मादिनिरूपितकारणतात्वविषयिताविरहात्— —**इति सङ्क्षेपः** ॥

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

इति

श्रीशेषार्यवंशमुक्ताफलस्य श्रीयादवाद्रिनिवासरसिकस्य
श्रीमदनन्तार्यवर्यस्य कृतिषु

ब्रह्मलक्षणवादः

समाप्तः ॥

॥ श्रीः ॥

॥ श्रीः ॥

ईक्षत्यधिकरणविचारः

श्रीमन्महीशूरमहाराजाधिराजमहास्थानसभाभूषणैः
शेषार्यवंशमुक्ताफलैः श्रीयादवाद्रिनिवासरसिकैः
पण्डितमण्डलीसार्वभौमैः

श्री ॥ उ ॥ म. अ. अनन्तार्यवर्यैः
विरचितः ।

विद्वद्वरैः परिशोध्य

म. अ. अनन्तार्येण
प्र. भ. तो. नरसिंहार्येण च
कल्याणपुर-विचारदर्पण-मुद्राक्षरशालायामङ्कयित्वा
प्राकाश्यं नीतः ॥

१८९९.

मूल्यं रू. ०—६—०

॥ श्रीः ॥

ईक्षत्यधिकरणविचारः

नत्वा श्रीशपदाब्जे स्मृत्वा पङ्क्तिं गुरूणां च ।
ईक्षतिनीतिविचारं तनुतेऽनन्तार्यदासोऽयम् ॥

पूर्वोत्तराह्निकभेदाभिन्ने शारीरकशास्त्रे प्रथमाह्निकेन प्रमेयत्वव्यापककार्यतानिरूपितकारणत्वस्य ब्रह्मलक्षणत्वमुपपाद्यत इति तादृशलक्षणत्वोपपादनपरत्वं पूर्वाह्निकस्योपाधिः। तस्य लक्षणत्वोपपादनं च असम्भवातिव्याप्तिशङ्कावारकतया कार्यतायां प्रमेयत्वव्यापकत्वोपपादनेन च-इति द्वेधा भवति। तत्रासम्भवातिव्याप्तिशङ्का श्रुतिविप्रतिपत्तिप्रयुक्ता वादिविप्रतिपत्तिप्रयुक्ता चेति द्विविधा। तत्र श्रुतिविप्रतिपत्तिप्रयुक्तासम्भवशङ्का प्रथमपादेन, तादृशातिव्याप्तिशङ्का च त्रिपाद्या; वादिविप्रतिपत्तिप्रयुक्तासम्भवातिव्याप्तिशङ्का च द्वितीयाध्यायगतेन प्राथमिकेन पादद्वयेन क्रियत इति षट्पाद्यास्तादृशशङ्कावारकत्वं; अनन्तरपादद्वयस्य च कार्यतायां प्रमेयत्वव्यापकत्वोपपादनपरत्वमिति अध्यायद्वयस्य उपाध्युपपत्तिः॥

तत्र श्रुतिविप्रतिपत्तिप्रयुक्तासम्भवातिव्याप्तिशङ्कावारकत्वं प्रथमाध्यायस्य, तादृशासम्भवशङ्कावारकत्वं च प्रथमपादस्योपाधिः॥

यद्यपि—असम्भवशङ्कावारकत्वं प्रथमपादस्य न सम्भवति; चिदचिद्विलक्षणब्रह्मासिद्धिशङ्कामुखेन तादृशब्रह्मसद्भावस्थापनपरत्वात्,

लक्ष्याभ्युपगमेन लक्षणाभावशङ्काया एवासम्भवशङ्कारूपत्वात्, अत्र च तादृशब्रह्मानभ्युपगमेनैव पूर्वपक्षप्रवृत्तेः। **तथाऽपि**—तादृशब्रह्मनास्तित्वशङ्कानिरासकत्वमेवासम्भवशङ्कावारकत्वमित्यनेन विवक्षितं; असम्भवपदस्य लक्ष्यासम्भवप्रयुक्तलक्षणासम्भवपरत्वात्। एवं च—प्रधानादिकमेव जगत्कारणमिति ब्रह्मानभ्युपगमेन प्रवृत्तासम्भवशङ्कावारकः प्रथमपादः, त्रिपादी च ब्रह्म जगत्कारणमस्तु प्रधानादिकमपि तथा स्यादित्यतिव्याप्तिशङ्कानिरासिकेति विभागः ॥

ननु—एतादृशविभागो निर्मूलः—इति चेन्न; विषयवाक्यस्वारस्यात्सूत्रस्वारस्याच्चोक्तविभागसिद्धेः। तथा हि--सद्विद्या तावत् सर्वेषु कारणवाक्येषु प्रधानभूता; तदितरकारणवाक्यानां प्रसिद्ध्यर्थकवैपदघटितत्वेन तदर्थानुवादकत्वात्, व्यष्टिसमष्टिसृष्टित्रिवृत्करणादीनां सृष्ट्युपयुक्तानां बहूनामर्थानां प्रतिपादनाच्च। अतस्तस्याः प्रधानपरत्वे सर्वेषां वेदान्तानां तत्परत्वमनिवार्यम्; एवमानन्दवल्ल्याः जीवपरत्वे भृग्वानन्दवल्ल्योः समानार्थकत्वात् भृगुवल्लीस्थलक्षणवाक्यस्य जीवपरत्वे सति तदितरेषामपि तत्परत्वमनिवार्यम्। एवमाकाशप्राणज्योतिरिन्द्रादिपदानां विशेषसमर्पकतया तेषां प्रसिद्धाकाशादिपरत्वे वाक्यान्तराणामपि तत्परत्वमनिवार्यमिति प्राधान्यलक्षणवाक्यैकवाक्यत्वविशेषसमर्पकत्वादीनां प्रथमपादोदाहरणेषु सत्त्वात्, त्रिपाद्युदाहरणेष्वसत्त्वात्। उक्तविषयवाक्यगतविशेषात् तादृशविभागस्सिध्यति, एवं सूत्रस्वारस्यादपि विभागस्सिध्यति; त्रिपाद्यां आनुमानिकमप्येकेषामित्यत्र अपिशब्दप्रयोगेण तादृशविभागसूचनात् ॥

अत एव **कल्पतरुग्रन्थे** आनुमानिकाधिकरणे—

"पूर्वत्र हि प्रधानाद्येव जगत्कारणमिति प्रत्यवस्थितं परमात्मनिषेधेन, इह तु तमभ्युपेत्य प्रधानाद्यपि कारणमिति प्रत्य-

वर्ण्यते। सूत्रकारोऽपि अपिशब्दं प्रयुञ्जानो ब्रह्माभ्युपगमेन कश्चित्कोऽयं विचार इति सूचयामास" —इत्युक्तम् ॥

तदधीनत्वादर्थवदित्यानुमानिकाधिकरणगुणसूत्रे पाराशर्यविजयेऽप्युक्तम्—

"प्रथमसूत्रे अपिशब्देन समुच्चेतव्यतया प्रकृतत्वात् तच्छब्देन परमपुरुषः परामृश्यते" —इति ॥

यदि च—आनुमानिकाधिकरणे निरीश्वरसाङ्ख्यस्य पूर्वपक्षित्वात् तेन ब्रह्माभ्युपगमपूर्वकमतिव्याप्तिशङ्काकरणं न युज्यते। न च तत्र सेश्वरसाङ्ख्य एव पूर्वपक्षी, अत एव प्रकृतिश्चेत्यधिकरणे तदभिमतनिमित्तेश्वरवादनिरासो युज्यत इति—वाच्यम्; तथा सति भाष्यादौ पुरुषान्न परं किञ्चिदिति पञ्चविंशपुरुषातिरिक्ततत्त्वनिषेधपूर्वकं पूर्वपक्षवर्णनानुपपत्तेः, आनुमानिकाद्यधिकरणेषु निरीश्वरसाङ्ख्यं प्रतिक्षिप्य प्रकृत्यधिकरणे सेश्वरसाङ्ख्यप्रतिक्षेपसम्भवाच्च, सूत्रस्थापिशब्देन महदादीनामेव समुच्चयः, न ब्रह्मणः; शास्त्रमात्रे ब्रह्मणो बुद्धिस्थत्वात्, तच्छब्दस्य सर्वनामत्वाच्च। तदधीनत्वादित्यत्र तच्छब्देन ब्रह्मपरामर्शसम्भवात् अपिशब्देन ब्रह्मणस्समुच्चयविरहेऽपि न क्षतिः। तथा चोक्तापिशब्दस्य निरुक्तविभागसूचकत्वमनुपपन्नम्—इति विभाव्यते॥ तदाऽपि—उक्तविभागो युज्यत एव। तथा हि—प्रथमपादे प्रथमसूत्रात् प्रधानतया विपरिणतब्रह्मपदस्य द्वितीयसूत्र इव ईक्षत्यधिकरणादावन्वयेन सदीक्षतेरिति न्यायेन साध्यलाभसम्भवेऽपि नाशब्दमिति साध्यं निर्दिष्टम्॥ अन्तस्तद्धर्मोपदेशादित्यत्र भेदव्यपदेशाच्चान्य इति साध्यं निर्दिष्टम्। अयं च निर्देशो ब्रह्मशब्दस्य अननुवृत्तिज्ञापकः; इतः पूर्वं चिदचिद्विलक्षणब्रह्मणोऽप्रसिद्ध्या तस्य तादात्म्येन साध्यत्वे साध्याप्रसिद्धिप्रसङ्गात्। प्रथमपादे तादृशब्रह्मसिद्धौ तस्य त्रिपाद्यां साध्यत्वं सम्भवति।

न च–प्रथमपादे ब्रह्मपदाननुवृत्तौ त्रिपाद्यामपि तदननुवृत्त्या साध्यलाभो न युक्त इति–वाच्यम्; द्वितीयपादे 'अत एव च स ब्रह्म' इति ब्रह्मपदस्य, तृतीयपादे 'ईक्षतिकर्मव्यपदेशात्सः' इत्युक्ततच्छब्दस्य, चतुर्थपादे 'प्राज्ञो हि प्रकरणात्' इति प्राज्ञशब्दस्य च साध्यसमर्पकत्वेन ब्रह्मशब्दाननुवृत्तावपि बाधकविरहात् ॥

वस्तुतस्तु—ब्रह्मपदप्राज्ञपदयोराक्षेपपरिहारार्थत्वेनान्यार्थत्वात् साध्यसमर्पकत्वाभावेऽपि न क्षतिः; स इत्यस्यैव सर्वत्र साध्यसमर्पकत्वसम्भवादीक्षतिकर्माधिकरणस्य त्रिपादीमध्यमपादमध्यमाधिकरणत्वेन तद्गतस्य स इत्यस्य मध्यमणिन्यायेन पूर्वोत्तराधिकरणेष्वन्वयसम्भवात्, तदुपर्यपीत्याद्यधिकरणत्रयस्य प्रासङ्गिकगर्भाधिकरणत्वेनास्याधिकरणस्य पादमध्यत्वोपपत्तेः। स इत्यस्य साध्यसमर्पकत्वाभावे वैयर्थ्यस्य दुष्परिहरत्वात् ॥

यद्यपि--स इत्यस्य वेदान्तवेद्यदेवताविशेषनिर्धारकतया सार्थक्यं सम्भवति; 'परात्परं पुरिशयं पुरुषमीक्षते' इत्युक्तपुरुषपदार्थस्यैव स इत्यनेन परामर्शात्; पुरुषपदस्य विष्ण्वसाधारण्यं च **स्कान्दे**—

"यथाशङ्करशब्दोऽयं महादेवेऽवतिष्ठते।
तथा पुरुषशब्दोऽयं वासुदेवेऽवतिष्ठते॥"—

इत्यनेकवचनसिद्धम्। **तथाऽपि**–स इत्यस्य सर्वत्रान्वय एव सकलवेदान्तप्रतिपाद्यत्वं देवताविशेषस्य सिध्यतीति तस्य साध्यसमर्पकत्वमावश्यकम्। एवं च–प्रथमपादे प्रधानादिभेदस्य साध्यत्वात् त्रिपाद्यां च ब्रह्मणस्साध्यत्वात् निरुक्तविभागस्सिध्यति ॥

ननु–प्रथमपादस्य ब्रह्मानभ्युपगमेन प्रवृत्तशङ्कानिरासकत्वमिति न युक्तं; ईक्षत्यधिकरणे गतिसामान्यादिति सिद्धान्तहेतोरसङ्गतेः, ब्रह्मकारणत्वपरोपनिषदन्तरसाम्यात् सद्विद्याया अपि ब्रह्मपरत्वमावश्यकमिति तत्सूत्राभिप्रायात्। एवमानन्दमयाधिकरणस्य जग-

त्कारणं जीव इति पूर्वपक्षनिरासार्थकत्वे जीवासम्भावितधर्मप्रतिपादक-सकलश्रुत्युपन्यासस्यैव युक्ततया आनन्दवल्लीमात्रनिर्णायकन्यायग्रथनानुपपत्तिः; श्रुतत्वाच्चेति पूर्वाधिकरणसूत्रोदाहृतश्रुतिप्रतिपादितजीवासम्भावितधर्मैरेव जीवातिरिक्तब्रह्मसिद्धेः; 'अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्', 'अधिकं तु भेदनिर्देशात्'- इत्यादिभिः कृतकरत्वाच्च उक्ताधिकरणस्यैव वैयर्थ्यापत्तिश्चेति तदधिकरणस्यानन्दवल्लीप्रतिपाद्यानन्दमयः किं जीवः ब्रह्म वेति विचारपरताया एव युक्तत्वात्। एवं-'अन्तस्तद्धर्मोपदेशात्', 'आकाशस्तल्लिङ्गात्'-इत्यत्र तच्छब्देन ब्रह्मपरामर्शात्तद्घटितहेतोरसिद्धिश्च—इति चेत् ॥

मैवम्; गतिसामान्यशब्देन ईक्षणात्मकोपदेशपरोपनिषदन्तरसाम्यस्याचेतनभेदसाधकतया विवक्षितत्वान्नानुपपत्तिः। आनन्दमयाधिकरणे जीवासम्भावितधर्मप्रतिपादकोपनिषदन्तरैर्जीवभेदसाधने ब्रह्मणो जीवभेदसिद्धावपि आनन्दमयो जीवस्यादिति शङ्कानिरासासम्भवात्। ब्रह्म जीवाभिन्नं, आनन्दमयो जीवः-इति शङ्काद्वयनिरासायानन्दवल्लीमात्रोदाहरणोपपत्तेः। अधिकोपदेशादित्यादिभिः कृतकरत्वासम्भवश्च वक्ष्यते ॥

सौत्रं तत्पदद्वयमपि न ब्रह्मपरामर्शकं; 'अन्तस्तद्धर्मोपदेशात्', 'आकाशस्तल्लिङ्गात्' इति सूत्रद्वयेऽपि भेदव्यपदेशाच्चान्य इत्यतोऽन्य इत्यस्यानुवृत्त्या—अन्तस्थः प्रसिद्धादित्यादन्यः, तद्धर्मोपदेशात्, आदित्यान्यासाधारणधर्मोपदेशात्, आदित्यासम्भावितधर्मोपदेशात्; आकाशपदार्थः प्रसिद्धाकाशादन्यः, आकाशान्यलिङ्गात्, आकाशासम्भावितलिङ्गादित्यर्थात्, अन्यपदार्थस्यैव तच्छब्देन परामर्शात्। न च-तच्छब्दस्य निर्दिष्टपरामर्शकत्वेऽपि अनुवृत्तिलब्धार्थस्य परामर्शो न युक्तः, एवमादित्याद्यसम्भावितधर्मस्य विवक्षितत्वे 'न च स्मार्तमतद्धर्माभिलापात्' 'नानुमानमतच्छब्दात्' इति निर्देशवत्

अतद्धर्मात् अतल्लिङ्गादिति निर्देशापत्तिश्च ; अतो ब्रह्मपरामर्शकत्वमेव युक्तमिति--वाच्यम् ; स्वघटितग्रन्थघटकशब्दजन्योपस्थितिविषयत्वरूप-निर्दिष्टत्वस्य अनुवृत्तिलब्धार्थेऽपि सत्त्वात् ॥ नचस्मार्तमित्यत्र नञो भेदपरत्वेऽपि तद्विशिष्टवाचकत्वाभावेन नचस्मार्तमतद्धर्मादि-त्युक्ते भेदस्स्यादित्यर्थस्स्यादित्यगत्या[1] गुरुभूतन्यायानुसरणात् तच्छब्दस्य ब्रह्मपरामर्शकत्वं स्वीकृत्य ब्रह्माभ्युपगमेन पूर्वपक्ष-स्वीकारे च भेदव्यपदेशाच्चान्य इति सूत्रासङ्गतिः। आदित्यमण्ड-लान्तस्स्थात् प्रसिद्धादित्यादन्यः य आदित्ये तिष्ठन्निति भेदव्यपदेशा-दिति हि तत्सूत्रार्थः, ब्रह्मणि आदित्यभेदस्य वाक्यान्तरसिद्धत्वेऽपि तद्वाक्यप्रतिपाद्यस्यादित्यत्वे विरोधाभावात्, ब्रह्मण्यादित्यभेदानङ्गी-कारेण पूर्वपक्षे च तत्सङ्गतेः ॥

यत्तु---अन्तरादित्यवाक्यस्यादित्यादन्तर इति श्रुतिस्वारस्यात्[2] अन्तरादित्यविद्याप्रतिपाद्यादित्यादन्य इति तत्सूत्रार्थ इति अति-व्याप्तिनिरासपक्षेऽपि नासङ्गतिः—इति। तन्न ; तथा सति श्रुति-साम्यादिति निर्देशापत्तेः ; किञ्च श्रुतिसाम्यं किं शब्दसाम्यं अर्थसाम्यं वा ? नाद्यः--असिद्धेः, यत्किञ्चित्साम्यस्य च व्यभिचारित्वात् ; नान्त्यः--विग्रहविशिष्टस्य मण्डलान्तर्वृत्तित्वप्रतिपादिकायामन्तरा-दित्यविद्यायां अन्तरात्मत्वमात्रप्रतिपादकान्तर्यामिब्राह्मणसमानार्थ-कत्वासिद्धेः ॥

यदपि--परमेश्वरत्वे पूर्वसूत्रेण समर्थिते परमेश्वर एव मण्डलाभि-मान्यस्त्विति शङ्कायां य आदित्ये तिष्ठन्निति भेदव्यपदेशात् पर-

---

१ (पा.) भेदधर्मादित्यर्थस्स्यात.

२ (पा.) साम्यात्.

मेश्वरो मण्डलाभिमानिनोऽन्य इत्यर्थः—इति। तदपि न; परस्परानुपजीविसाम्यद्वयपरत्वेनाधिकरणभेदप्रसङ्गात्, चकारास्वारस्यापत्तेः, तस्य सूत्रद्वयेऽपि साध्यैक्यसूचकत्वात्; तस्मादादित्यातिरिक्तब्रह्मासिद्धिशङ्कावारकत्व एवोक्तसूत्रं सङ्गतमिति असम्भववारकत्वं प्रथमपादस्येति युक्तम् ॥

न च—उक्तप्रथमपादोपाधेः 'सुषुप्त्युत्क्रान्त्योर्भेदेन' 'पत्यादिशब्देभ्यः' इति तृतीयपादसूत्रयोरतिव्याप्तिः, तयोर्मुक्तातिरिक्तब्रह्मसद्भावव्यवस्थापकत्वात्; एवं चतुर्थपादगतकारणत्वेन चाकाशादिष्वित्याद्यधिकरणत्रयेऽप्यतिव्याप्तिः, तेषां प्रधानजीवव्यतिरिक्तब्रह्मसद्भावव्यवस्थापकत्वादिति—वाच्यम्; स्पष्टजीवादिलिङ्गकवाक्यविचाराभावस्य विशेषत्वात्, तृतीयचतुर्थपादयोः स्पष्टजीवादिलिङ्गकवाक्यविचाररूपत्वादतिव्याप्तिविरहादिति दिक् ॥

अत्र—प्रमेयत्वव्यापककार्यतानिरूपितकारणता चेतनाचेतनातिरिक्तद्रव्यवृत्तिः, अचेतनवृत्तित्वाभावे सति चेतनवृत्तित्वाभावे सति उपादानतात्वात्, यत्र यद्वृत्तित्वे सति उपादानतात्वं तत्र तदतिरिक्तद्रव्यवृत्तित्वमिति व्याप्तेः, पटावृत्त्युपादानतायां पटातिरिक्तमृदादिद्रव्यवृत्तित्वदर्शनात्—इत्यनुमानेन चिदचिद्विलक्षणब्रह्मसिद्धिं मनसि कृत्वा तत्र विशेषणासिद्धिविशेष्यासिद्धिवारकाणि सप्ताधिकरणानि वेदाचार्येण निबद्धानि। तत्र च—विशेषणासिद्धिपरिहारकाणि ईक्षत्यधिकरणाकाशाधिकरणज्योतिरधिकरणानि त्रीणि, आनन्दमयाधिकरणान्तरधिकरणप्राणाधिकरणेन्द्रप्राणाधिकरणानि चत्वारि विशेष्यासिद्धिवारकाणि—इति विवेकः ॥

न च—सूक्ष्मचिदचिच्छरीरकब्रह्मरूपविशिष्टनिष्ठायामुपादानतायां सिद्धान्ते विशेषणीभूतचिदचिन्निष्ठत्वस्यापि स्वीकारात् तद्वृत्तित्वाभावघटितहेतोरसिद्धिः, भगवच्छरीरत्वाभाववदचेतनवृत्तित्वाभावादेर्हेतु-

घटकत्वेऽपि तथा, तादृशाचेतनादेस्सिद्धान्तेऽनङ्गीकारात्, साङ्ख्यादिभिस्तदङ्गीकारेऽपि भगवत एवानङ्गीकारेण तद्घटितहेतोरसिद्धिरिति–वाच्यम्; यत्किञ्चिच्छरीरत्वाभाववच्चेतनाचेतनवृत्तित्वाभावयोः हेतुघटकत्वात्। तत्र चेतनपदेन आश्रयस्वतादात्म्यान्यतरसम्बन्धेन पुण्यवतो ग्रहणान्नासिद्धिः; सिद्धान्ते भगवद्धर्मभूतज्ञानरूपनिग्रहानुग्रहयोरेव पुण्यपापरूपतया तादात्म्येन तद्वतो भगवज्ज्ञानस्य किञ्चिच्छरीरत्वाभावेन तद्वृत्तित्वाभावमादाय हेतूपपत्तेः, अचेतनपदेनास्वयंप्रकाशस्य ग्रहणेन शरीरत्वाभाववदचेतनस्य गुणादेरेव प्रसिद्धेः। साध्यमपि तादृशचेतनाचेतनातिरिक्तद्रव्यवृत्तित्वमेवेत्युपादानतायां भगवच्छरीरभूतप्रधानवृत्तित्वस्याबाधात् विशिष्टनिष्ठत्वासिद्धिः॥

तत्र तादृशाचेतनवृत्तित्वाभावोऽसिद्धः, सद्विद्यायाः स्वतन्त्रस्य प्रधानस्यैव जगत्कारणत्वबोधनादित्याशङ्क्य निराकरोति—ईक्षतेर्नाशब्दमिति॥

छान्दोग्ये श्रूयते—

"सदेव सोम्येदमग्र आसीत्, एकमेवाद्वितीयं, तदैक्षत बहुस्यां प्रजायेयेति, तत्तेजोऽसृजत, तत्तेज ऐक्षत बहुस्यां प्रजायेयेति, तदपोऽसृजत, ता आप ऐक्षन्त बह्व्यस्स्याम प्रजायेमहीति, ता अन्नमसृजन्त॥" —इति॥

अत्र संशयः–सच्छब्दवाच्यं साङ्ख्योक्तं स्वतन्त्रं प्रधानं, उत तच्छरीरकं ब्रह्म?—इति॥

अत्र पूर्वपक्षः॥ सच्छब्दवाच्यं स्वतन्त्रं प्रधानमेव; कुतः? इदमिति त्रिगुणात्मकं प्रसिद्धमचेतनं कार्यं निर्दिश्य तस्य सदासीदेकमेवेति स्थूलावस्थाशून्यसद्रूपाभेदप्रतिपादनात् प्रत्यक्षसिद्धस्थूलावस्थाचेतनाभेदस्य ब्रह्मण्यसम्भवेन सत्पदस्य ब्रह्मपरत्वायोगात्। न च–इदंपदमपि स्थूलजगच्छरीरकब्रह्मपरमिति नानुपपत्तिरिति–वाच्यम्; जग-

ब्रह्मणोः शरीरशरीरिभावं शरीरवाचकानां शब्दानां शरीरिपर्यन्तत्वं चाजानानं श्वेतकेतुं प्रति तच्छरीरकपरमात्मपरतया इदंशब्दप्रयोगायोगात्, यादृशशब्दप्रयोगे शिष्यस्य विवक्षितार्थबोधो भवेत् तादृशशब्दानामेव दीनवत्सलैर्गुरुभिः प्रयोक्तव्यत्वात्, इदंशब्दस्य जगत्परताया एव युक्तत्वात्; एवं-एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपादनपरे-यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं भवति-इत्यादिदृष्टान्तत्रये विकारविकारिणोर्ग्रहणेन तत्साम्याय दार्ष्टान्तिकेऽपि विकारविकारिणोरेव ग्रहणौचित्यात्, दृष्टान्ते विकारिणोर्ग्रहणं दार्ष्टान्तिके च विकारिशरीरकस्येति स्वीकारे वैषम्यापत्तेः, प्रतिज्ञादृष्टान्तरूपेण प्रवृत्तसदेवेत्यादिवाक्ये अनुमानाकारतासत्त्वेनानुमानिकप्रधानग्रहणस्य युक्तत्वाच्च ॥

न च लिङ्गाभावः, 'तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ' इति कार्यलिङ्गोपन्यासात्, श्रुत्येकसमधिगम्ये ब्रह्मणि लिङ्गोपन्यासायोगात्; एवं-रूपस्पर्शादिहीनस्य सच्छब्दार्थस्य कथं रूपाद्याश्रयानेकब्रह्माण्डहेतुत्वमित्याशङ्कानिरासाय प्रवृत्ते द्वादशे खण्डे-"न्यग्रोधफलमत आहरेति, इदं भगव इति, भिन्धीति, भिन्नं भगव इति, किमत्र पश्यसीति, अण्व्य इवेमा धाना भगव इति, आसामङ्गैकां भिन्धीति, भिन्ना भगव इति, किमत्र पश्यसीति, न किञ्चन भगव इति; तँ होवाच यं वै सोम्यैत; मणिमानं न निभालयस एतस्यैव किल सोम्यैषोऽणिम्न एवं महान् न्यग्रोधस्तिष्ठति"-इत्यादौ दृष्टान्तस्वारस्येन सच्छब्दार्थस्य परिणामित्वावगमात् प्रधानमेव सच्छब्दवाच्यम् ॥

अथ-सत्पदस्य प्रधानपरत्वमयुक्तम्; तस्य तदैक्षतेति ईक्षणाश्रयत्वप्रतिपादनात्, गौरो जानातीत्यादौ नैयायिकनये अवच्छेदकतासम्बन्धेनाश्रयत्वस्याख्यातार्थत्ववत् सिद्धान्ते स्वाश्रयशरीरत्वसम्बन्धेन आश्रयत्वस्याख्यातार्थत्वात्, जीवस्याणुत्वेन ज्ञानस्याव्याप्यवृत्तित्वा-

भावेन शरीरेऽवच्छेदकत्वायोगात्। तथा प्रकृते स्वाश्रयशरीरत्वसम्ब-न्धेन आश्रयत्वस्याख्यातार्थत्वेऽपि स्वतन्त्रे प्रधाने तदसम्भवः; तन्मते प्रधानस्य भगवच्छरीरत्वाभावेन उक्तसम्बन्धेनाश्रयत्वस्याख्याता-र्थत्वात्। उक्तसम्बन्धेनाश्रयत्वस्याख्यातार्थत्वं च सूत्रकारानुमतं, ईक्षतेर्न प्रधानमिति न्यासं विना शब्दागम्यस्य स्वतन्त्रप्रधानस्य ईक्षणासम्भवप्रतिपादनेन शब्दगम्यस्य भगवच्छरीरभूतप्रधानस्ये-क्षणाश्रयत्वसम्भवसूचनात्—**इति चेन्न**॥ तत्तेज ऐक्षतेति गौणे-क्षणसाहचर्येण कूलं पिपतिषतीत्यादाविव फलाव्यवहितपूर्वावस्थायां ईक्षतिधातोर्लाक्षणिकत्वात्॥

न च–तेजआदिशब्दा अपि तत्तच्छरीरकपरमात्मपरा एवेति गौणेक्षणसाहचर्यमसिद्धमिति–वाच्यम्; 'हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' इति वक्ष्यमाणे नामरूपव्याकरणे अनुप्रवेशस्य वैयर्थ्यपरिहाराय नामरूपयोस्स्वपर्य-न्तत्वलाभस्य प्रयोजनस्य कल्पनीयतया तदनन्तरं तेजआदिशब्दानां ब्रह्मपरत्वसम्भवेऽपि अनुप्रवेशपूर्वकनामरूपव्याकरणात्पूर्वं तेजआदि-शब्दानां तच्छरीरकपरत्वायोगात्॥

न च–अनुप्रवेशो नेदानीं साध्यः, अनादिसिद्धत्वात्, तथा च तस्य नामरूपव्याकरणार्थत्वमेव उक्तश्रुतिविवक्षितमिति पूर्वमपि तेजआदि-शब्दैः ब्रह्मोपस्थापनं युक्तम्; यद्वा भविष्यज्जन्मनामपि पूर्वव्यवहारो-युज्यते;

"अतीत्यैकादशाहन्तु नामकर्म तथाऽकरोत्।
ज्येष्ठं रामं महात्मानं भरतं कैकयीसुतम्॥
सौमित्रिं लक्ष्मणमिति शत्रुघ्नमपरं तथा।
वसिष्ठः परमप्रीतो नामानि कुरुते तदा॥"—

इति द्वादशेऽहनि रामादिनाम्नः करिष्यमाणत्वेऽपि कौसल्याऽजनय-द्राममिति पूर्वं तत्तन्नाम्ना व्यवहारदर्शनादिति–वाच्यम्; एवमपि तत्तेज

ऐक्षतेत्यत्र तेजश्शब्दस्य ब्रह्मपरत्वे तत्तेजोऽसृजतेति वाक्येऽपि तेजश्शब्दस्य ब्रह्मपरत्वापत्तेः। न चेष्टापत्तिः, ब्रह्मणस्सृज्यत्वाभावात् ॥

न च—'स एव सृज्यस्स च सर्गकर्ता स एव पात्यत्ति च पाल्यते च' इति पराशरवचनात् तेजश्शरीरकस्य सृज्यत्वसम्भवः; एवं बहु स्यामिति बहुशरीरकस्य स्वस्यैव स्रष्टव्यत्वेन सङ्कल्पात्तस्यैव सृज्यत्वमावश्यकं, अन्यथा सत्यसङ्कल्पानुपपत्तेः—इति वाच्यम्; तथाऽपि 'तस्माद्यत्र क्वचन शोचति स्वेदते वा पुरुषः, तेजस एव तदध्यापो जायन्ते' इत्युत्पत्तिपरवाक्ये तेजआदिपदस्य विशिष्टपरत्वायोगेनासङ्गतेः, पूर्वं विशिष्टयोः कार्यकारणभावोक्तौ विशेषणयोः तदुपपत्तिकथनानौचित्यात्: एवं पूर्वत्र तेजआदिपदानां विशिष्टपरत्वे व्यष्टिसृष्टिप्रतिपादनपरे 'हन्ताहमिमास्तिस्रो देवताः' इत्यादिवाक्ये इदंशब्देन विशिष्टस्यैव परामर्शापत्तेः। न चेष्टापत्तिः, तदवस्थपरमात्मनु जीवशरीरकपरमात्मनः प्रवेशासम्भवेन प्रवेशयोग्यतेजोऽबन्नानामेव परामर्शावश्यकत्वात् ॥

तथा च—विशिष्टस्य समष्टिसृष्टिकर्मत्वं विशेषणानां व्यष्टिसृष्टिकर्मत्वमित्यपाङ्क्त्यापत्तिः; एवं नामरूपव्याकरणत्रिवृत्करणादिरूपव्यष्टिसृष्ट्युत्पत्तिप्रदर्शनपरे 'यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य' इति वाक्ये विशेषणेष्वेव तत्प्रदर्शनानुपपत्तिश्च। एवं जीवस्य शरीरद्वारा सत्कार्यत्वं बोधयितुं शरीरस्य सत्कार्यभूतभूतत्रयमयत्वप्रतिपादनपरे 'अन्नमशितं त्रेधा विधीयते' 'आपः पीतास्त्रेधा विधीयन्ते' 'तेजोऽशितं त्रेधा विधीयते' इत्यादिवाक्ये, 'अन्नमयं हि सोम्य मनः, आपोमयः प्राणः, तेजोमयी वागिति' इत्यत्र च विशेषणानां ग्रहणानुपपत्तिः; तस्मादुत्तरत्र बहुस्थलेषु तेजआदिपदानां विशिष्टपरत्वासम्भवेन विशेषणमात्रपरत्वावश्यकतया तत्तेजऐक्षतेत्यत्रापि विशेषणमात्रपरत्वावश्यकतया ईक्षणस्य गौणत्वमवर्जनीयमिति तत्साहचर्यात्तदैक्षतेत्यत्रापि गौणमेवेक्षणमिति न दोषः ॥

अथ—तत्त्वमसीति सत्तादात्म्यमुपदिश्य तदनुसन्धाननिष्ठस्य 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये, अथ सम्पत्स्ये' इति मोक्षाभिधानात् मोक्षजनकतावच्छेदकीभूतजीवनिष्ठविशेष्यतानिरूपिताभेदसम्बन्धावच्छिन्नप्रकारताश्रयत्वं सत्पदार्थे लभ्यते, तच्च सत्पदार्थस्य प्रधानत्वे न युज्यते; जीवविशेष्यकप्रकृतिविविक्तत्वज्ञानस्य मोक्षकारणत्वेऽपि प्रकृत्यात्मकत्वज्ञानस्य तथात्वाभावात्। एवं च मोक्षजनकतावच्छेदकीभूतजीवनिष्ठविशेष्यतानिरूपितभेदनिष्ठप्रकारतानिरूपितप्रतियोगितासम्बन्धावच्छिन्नप्रकारताश्रयत्वस्य प्रधानत्वसाधकस्य सच्छब्दार्थेऽभावात् प्रधानत्वकुण्ठकस्य जीवनिष्ठविशेष्यतानिरूपिताभेदसम्बन्धावच्छिन्नप्रकारताश्रयत्वस्य सत्त्वाच्च सच्छब्दवाच्यं न प्रधानं; तदिदमभिप्रेत्य सूत्रितं 'तन्निष्ठस्य मोक्षोपदेशात्', 'हेयत्वावचनाच्च'—इति चेत्॥ तन्न—ब्रह्माभेदज्ञानस्यापि मोक्षकारणत्वाभावेन सिद्धान्तेऽप्यसङ्गतेः। न च—त्वंपदं तच्छरीरकपरं, एवं च जीवशरीरकनिष्ठविशेष्यतानिरूपिताभेदसम्बन्धावच्छिन्नप्रकारताश्रयत्वं ब्रह्मण्युपपद्यत इति—वाच्यम्; तथा सति सम्बुद्ध्यन्तपदसमभिव्याहारस्थले तादृशपदयुष्मत्पदयोः समानार्थकत्वनियमेन श्वेतकेतुपदस्यापि विशिष्टपरत्वापत्तेः। न चेष्टापत्तिः, प्रकृतवाक्यजन्यशाब्दबोधाश्रयत्वेन इच्छाविशेष्यत्वरूपसम्बोधनविभक्त्यर्थस्य तत्रान्वयायोगात्; भगवांस्त्वमेव तद्ब्रवीत्विति प्रष्टारं पुत्रं प्रति आचार्यस्य बुबोधयिषासत्त्वेऽपि सर्वज्ञं परमात्मानं प्रति तदयोगात्, परमात्मन एव प्रष्टृत्वे च प्रश्नं प्रति जिज्ञासायाः तां प्रत्यज्ञानस्य च कारणतया तयोः परमात्मन्यापत्तेः॥

यद्यपि—सप्तखण्डीनवखण्डीभेदभिन्नायां सद्विद्यायां तत्त्वमसीति वाक्यं न श्वेतकेतुप्रश्नस्योत्तरघटकं; नवखण्डीघटकत्वात्, सप्तमखण्डान्ते तद्धास्य विजज्ञाविति विजज्ञाविति द्विरुक्त्या उत्तरस्य समाप्तिद्योतनात्,

'उद्दालको हारुणिः श्वेतकेतुं पुत्रमुवाच' इति पुनरुपक्रमाच्च, नव खण्ड्यास्स्वातन्त्र्यप्रतीतेः; तत्तेजोऽसृजतेत्यादिनाऽचेतनस्याऽप्रम- शितमित्यादिना शरीरद्वारा चेतनस्य च कार्यत्वोपपादनेन सप्तख- ण्ड्यामेव एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया उपपादितत्वाच्च । तथापि–जीवे शरीरद्वारककार्यत्वस्येव ज्ञानावस्थाद्वारककार्यत्वस्यापि सत्त्वात् तदुपपादनाय सुषुप्तिमरणाद्यवस्थाप्रतिपादनपरनवखण्ड्या अपि तदुत्तरत्वमावश्यकं; अस्तु वा नवखण्डी स्वतन्त्रा; तथाऽपि त्वंपदेन विशिष्टस्य परामर्शो न युक्तः; नवखण्ड्यामपि 'भूय एव मा भगवान् विज्ञापयतु' इति प्रश्नसत्त्वेन तदुत्तरत्वाक्षतेः। किं च खण्डा- न्तेषु 'स्वप्नान्तं मे सोम्य विजानीहि' इत्युपदेशजन्यज्ञानयोग्यस्य 'न्यग्रोधफलमाहर' 'लवणमेतदुदकेऽवधायाथ मा प्रातरुपसीदथाः' इत्यादिनियोगार्हस्य जीवस्यैव त्वंशब्देन परामर्शात् खण्डान्तेषु त्वंशब्दस्य विशिष्टपरत्वमयुक्तम् ॥

न च–श्वेतकेतुपदं सम्बुद्ध्यन्तमपि विशिष्टपरं, सम्बोधनार्थस्य विशेषणेऽन्वयः, एवं खण्डादावध्याहर्तव्यानि त्वंपदान्यपि विशिष्ट- पराण्येव, विजानीहीत्याद्यर्थस्य च विशेषणेऽन्वय इति न दोष इति– वाच्यम्; तथा सति जामातुरसन्निधाने पुत्रीं प्रति त्वत्पतिस्सुन्दर इति जानीहीत्यर्थपरस्य जामातस्त्वं सुन्दरोऽसि जानीहीति वाक्यस्य प्रयो- गापत्तेः, पुत्रीपतिरूपजामातृपदार्थैकदेशे पुत्र्यां सम्बुद्ध्यर्थस्य त्वं- पदार्थैकदेशे तस्यां जानीहीत्याख्यातान्तार्थस्य चान्वयसम्भवात् । अत- स्तद्वारणाय सम्बुद्ध्यर्थप्रकारतानिरूपितविशेष्यतासम्बन्धेनाख्यातान्तार्- थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन च शाब्दबोधे पदजन्योप- स्थितेर्मुख्यविशेष्यतासम्बन्धेन हेतुत्वस्यावश्यकतया तादृशकारण- विरहान्नैकदेशे तथाऽन्वयबोधसम्भव इति । सत्पदस्य ब्रह्मपरत्वे महान् क्लेशः, प्रधानपरत्वे च तत्त्वमसीत्यस्य त्वं सच्छब्दार्थप्रकृतिशरीरक-

इत्यर्थः; तच्छब्दस्य स्थूलशरीरस्थप्रकृतिशरीरकपरत्वात्। स आत्मेत्यस्य प्रधानं शरीरमित्यर्थात् 'शैत्यं हि यत्सा प्रकृतिर्जलस्य' इतिवत् विधेयप्राधान्यात्पुंस्त्वोपपत्तिः ॥

अथ—प्रधानस्य जगत्कारणत्वे प्रतिज्ञाविरोधः प्रसज्यते, उपक्रमे ह्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातं, तच्च कार्यकारणयोरनन्यत्वेन कारणभूतसद्विज्ञानं तत्कार्यचेतनाचेतनप्रपञ्चस्य ज्ञाततयैवोपपादनीयम्; तत्तु—प्रधानकारणत्वे चेतनवर्गस्य प्रधानकार्यत्वाभावात् प्रधानविज्ञानाच्चेतनविज्ञानासिद्धेर्विरुध्यते—इति चेन्न। सिद्धान्तेऽपि प्रतिज्ञाविरोधस्यापत्तेः, चेतनवर्गस्य नित्यत्वेन ब्रह्मकार्यत्वस्याभावात्। न च—शरीरद्वारकं ज्ञानावस्थाद्वारकं च ब्रह्मकार्यत्वं चेतनवर्गस्यापि सम्भवतीति—वाच्यम्, शरीरस्य प्रकृतिपरिणामत्वेन ज्ञानप्रसरणस्य प्रकृतिकार्यभूतेन्द्रियादिहेतुकत्वेन उक्तोभयविधकार्यत्वस्य प्रधाननिरूपितस्यापि चेतनवर्गे सम्भवात् ॥

वस्तुतस्तु—ज्ञानावस्थाद्वारकं कार्यत्वं प्रतिज्ञोपपादकतया नाभिमतं; विकारविकारिभावस्यैव तदुपपादकताया दृष्टान्तत्रयसिद्धत्वात्, 'एतद्ध स्म वै तद्विद्वांस आहुः, पूर्वे महाशाला महाश्रोत्रिया न नोऽद्य कश्चनाश्रुतममतमविज्ञातमुदाहरिष्यतीति ह्येभ्यो विदाञ्चक्रुः' इत्युत्तरवाक्ये—तेजोऽबन्नान्येव ज्ञात्वा नोऽस्माकं, एभ्यस्तेजोऽबन्नेभ्यः व्यतिरिक्तं, अश्रुतममतमविज्ञातं कोऽपि नोदाहर्तुं शक्नोतीति तेजोऽबन्नेभ्य एव सर्वं विज्ञातवन्त इति। यत्र प्रकृतिकार्यभूततेजोऽबन्नात्मकत्वाभावः तत्र श्रुतत्वाद्यभाव इति व्यतिरेकेण—'यदु रोहितमिवाभूदिति, तेजसस्तद्रूपमिति तद्विदाञ्चक्रुः; यदु शुक्लमिवाभूदित्यपां रूपमिति तद्विदाञ्चक्रुः; यदु कृष्णमिवाभूदित्यन्नस्य रूपमिति तद्विदाञ्चक्रुः; यद्वविज्ञातमिवाभूदित्येतासामेव देवतानां समासः' इति रोहितशुक्लकृष्णरूपेष्वेकैकरूपवत्त्वेन ज्ञायमानस्य तेजआद्येकैकस्वरू-

पत्त्वं तेन रूपेणाज्ञायमानस्य पीतमाञ्जिष्ठधूसरशोणितादिरूपवत्त्वेन ज्ञायमानस्यापि रोहितशुक्लकृष्णतेजोऽबन्नसमुदायात्मकत्वमुक्त्वा यत्र श्रुतत्वादिकं तत्र तेजोऽबन्नात्मकत्वमित्यन्वयेन चाचेतन एव प्रतिज्ञाया उपपादितत्वेन चेतनवर्गे तदुपादानावश्यकत्वाप्रतीतेः ॥

न च—पूर्ववाक्ये तेजोऽबन्नव्यतिरिक्ताश्रुतस्य निषेधेऽपि तादृशश्रुतस्यानिषेधात् उक्तव्यतिरेकव्याप्तिर्न प्रतीयत इति—वाच्यम्; अश्रुतनिषेधस्य प्रकृतानुपपादकतया व्यर्थत्वेन श्रुतनिषेधे तात्पर्यावश्यकत्वात्, अश्रुतश्रुतयोरैक्येन तन्निषेधस्य तन्निषेधरूपत्वोपपत्तेश्च ॥

न च—श्रुतत्वस्य वायुगगनादिसाधारणस्य तेजोऽबन्नात्मकत्वव्याप्यत्वं न सम्भवतीति—वाच्यम्; 'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते सर्वमिदं विज्ञातं भवति' इति मैत्रायणीयश्रुतौ इदंशब्दार्थप्रत्यक्षविषयत्वविशिष्टज्ञानत्वस्य व्याप्यत्वप्रतीत्या वाय्वाकाशयोः प्रत्यक्षविषयत्वाभावेन व्यभिचारात्, कथञ्चिर्ज्जीवे सूक्ष्मचिदचिद्विशिष्टब्रह्मकार्यत्वाङ्गीकारेऽपि कालनित्यविभूत्योस्तदभावेन प्रतिज्ञायास्सिद्धान्तेऽपि सङ्कोचावश्यकत्वात् ॥

न च—उदाहृतमैत्रायणीयश्रुतौ जगत आत्मभिन्नत्वेन प्रतिज्ञाया उपपादनात्; सद्विद्याया अपि परमात्मपरत्वं युक्तमिति—वाच्यम्; अनुवादानां पुरोवादानुरोधित्वस्यावश्यकतया खलुशब्दघटितत्वेन अनुवादरूपाया मैत्रायणीयश्रुतेस्सद्विद्यानुरोधित्वस्य न्याय्यत्वेऽपि पुरोवादरूपसद्विद्यायास्तदनुरोधित्वस्यान्याय्यत्वात् । एतेन—'आत्मा वा इदमेक एवाग्र आसीत्, एको ह वै नारायण आसीत्' इत्यादिश्रुत्यन्तरसाम्यात् सद्विद्याया ब्रह्मपरत्वमिति—निरस्तम् । पुरोवादानुवादभावापन्नस्थल एवोक्तगतिसामान्यन्यायस्य प्रवृत्तेः ॥

अथ—स्वप्नान्तं मे सोम्य विजानीहीति, यत्रैतत्पुरुषस्स्वपिति नाम, सता सोम्य तदा सम्पन्नो भवति, स्वमपीतो भवति, तस्मादेनं स्वपितीत्याचक्षते,

स्वं ह्यपीतो भवति' इति सुप्तस्य जीवस्य सच्छब्दार्थे लयप्रतिपादनात् तत्प्रतियोगिकलयाऽऽश्रयत्वस्य तदुपादानत्वव्याप्यत्वात् जीवोपादानत्वस्याचेतने प्रधानेऽसम्भवात् सच्छब्दस्य ब्रह्मपरत्वमावश्यकं– इति चेन्न । जीवस्य नित्यत्वेन मुख्यलयासम्भवादौपचारिकलयस्य प्रधानेऽपि सम्भवात् ॥

किञ्च–'वाङ्मनसि सम्पद्यते, मनः प्राणे, प्राणस्तेजसि' इत्यादौ इन्द्रियादीनामनुपादानभूतमनआदौ सम्पत्तिशब्दार्थलक्षणसंयोगोक्त्या अत्राप्यनुपादानभूतप्रधानेऽपि सम्पत्तिशब्दार्थलक्षणसंयोग उपपद्यते । 'यत्रैतत्सुप्तस्समस्तस्सम्प्रसन्नः स्वप्नं न विजानाति, आसु तदा नाडीषु सुप्तो भवति' इति श्रुत्या नाडीत्वावस्थापन्नस्य प्रधानस्य, 'अथ यदा सुषुप्तो भवति, यदा न कस्य चन वेद हिता नाम नाड्यो द्वासप्तति- सहस्राणि हृदयात् पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते' इति श्रुत्या पुरीततित्वावस्थापन्नस्य च तस्य सुप्तजीवलयाश्रय- त्वोक्त्या तादृशलयाश्रयत्वस्य प्रधानव्यावर्तकत्वाभावात् सुषुप्तिस्थान- परीक्षाधिकरणे "तदभावो नाडीषु तच्छ्रुतेरात्मनि च" इत्यत्र नाड्यव- च्छिन्नपुरीतदवच्छिन्नब्रह्मण एव तादृशलयाश्रयत्वस्य व्यवस्थापयिष्य- माणतया तादृशपुरीतदवच्छिन्नब्रह्मण एव सिद्धान्ते सच्छब्देन ग्रह- णावश्यकतया तादृशविशिष्टब्रह्मणो जीवोपादानत्वाभावेन सम्पत्ति- शब्दार्थलय उपादानत्वव्याप्य इत्यस्य सिद्धान्तेऽप्यसम्भवात् । तस्मा- त्सदेवेत्यादौ सच्छब्दवाच्यं प्रधानमिति ॥

राद्धान्तस्तु–सच्छब्दवाच्यं न प्रधानं, किन्तु सूक्ष्मचिदचिच्छरीरकं ब्रह्मैव; बहुस्यां प्रजायेयेत्याकारकेक्षणस्य 'सेयं देवतैक्षत हन्ताहमिमा- स्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि, तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' इत्याकारकेक्षणस्य च 'तत्तेजोऽसृजत तासां त्रिवृतं त्रिवृतमेकैकामकरोत्' इत्युत्तरवाक्येना-

भिहितस्य सूक्ष्मचिदचिच्छरीरकब्रह्मभिन्नेऽसम्भवात् स्रक्ष्यामीत्यादिरूपेक्षणस्य केवलब्रह्मणि सम्भवेऽपि बहुस्यामित्याकारकस्य तस्य विशिष्टनिष्ठत्वात् ब्रह्मणः स्वरूपतो बहुभावासम्भवेन विशेषणीभूतशरीरद्वारैव तस्य वक्तव्यत्वात्, 'तदैक्षत बहुस्यां प्रजायेयेति' ईक्षणस्य सच्छब्दार्थसूक्ष्मचिदचिच्छरीरकं ब्रह्म बहुशब्दार्थस्थूलचिदचिच्छरीरकब्रह्माभेदरूपमिति विशिष्टाद्वैतविषयकस्य स्वाश्रयत्वबहुभावाभ्यां ब्रह्मणि निमित्तोपादानत्वरूपोभयविधकारणत्वसूचकस्य सद्विद्याप्रतिपाद्यस्य सद्विद्याया विशिष्टाद्वैततात्पर्यसूचनद्वारा तदर्थानुवादिनां सर्वेषां वेदान्तानामपि तात्पर्यज्ञापकत्वरूपं प्राधान्यमस्तीति स्फोरयितुं शास्त्रारम्भे हेतुत्वेनोपन्यासात् ॥ अत एव—आनन्दमयोऽभ्यासादितिवत् प्रतिज्ञानन्तरं हेतूपन्यासस्योचितत्वात् नाशब्दमीक्षतेरिति न्यासो युक्त इति निरस्तं; निरुक्तप्राधान्यसूचनायैव प्रथमं हेतूपन्यासात् ॥

यद्यपि—बहुस्यामित्याकारकत्वविशिष्टेक्षणस्यैव विशिष्टाद्वैतवादिस्वाभिमतार्थसूचकतया बहुस्यामीक्षतेर्नाशब्दमित्येव सूत्रयितुमुचितम्। **तथाऽपि**—तथान्यासे तेजःप्रभृतिशब्दानां विशिष्टपरत्वज्ञापनद्वारा स्वस्य गौणेक्षणसाहचर्यप्रयुक्तगौणत्वशङ्कानिरासकस्य सेयं देवतेत्यादिवाक्यप्रतिपाद्येक्षणस्य ब्रह्मणस्सर्वशरीरकत्वप्रयुक्तसर्वशब्दवाच्यत्वरूपसिद्धार्थज्ञापकस्यासङ्ग्रहप्रसङ्ग इत्युभयविधेक्षणसङ्ग्रहाय ईक्षतेरिति सामान्यनिवेशोपपत्तेरेतादृशेक्षणस्यापि सङ्ग्रहेणाशब्दमित्यस्य तेजःप्रभृतिशब्दवाच्यं नेत्यर्थस्यापि विवक्षितत्वात्। एतादृशार्थसूचनाभिप्रायेणैवेक्षतेर्नानुमानमिति न्यासपरित्यागः; अन्यथा—'नानुमानमतच्छब्दात्' 'आनुमानिकमप्येकेषामिति चेन्न' इत्यादिसूत्रेषु स्वतन्त्रप्रधानपरतया प्रयुक्तस्यानुमानशब्दस्यात्र परित्यागे बीजाभावेनासङ्गतिप्रसङ्गात्। एतेन- गौणश्चेन्नात्मशब्दादित्यादिसूत्रेण ईक्षणस्या-

गौणत्वं प्रसाध्य तादृशेक्षणेन प्रधानव्यावृत्तिसाधनमयुक्तं, साक्षादात्मशब्देनैव प्रधानव्यावृत्तिसाधनस्योचितत्वेनात्मशब्दान्नाशब्दमिति न्यासो युक्त इति-निरस्तम्; विशिष्टाद्वैतनिमित्तोपादानैक्यसर्वशब्दवाच्यत्वादिरूपसिद्धान्तार्थज्ञापनार्थं ईक्षतेर्नाशब्दमिति न्यासाङ्गीकारात्; तत्र ब्रह्मणस्तेजःप्रभृतिशब्दवाच्यत्वसाधकं द्वितीयेक्षणघटितोक्तसूत्रार्थमजानानेन गौणत्वशङ्कायां कृतायां तन्निरासाय गौणश्चेदित्यादिसूत्रप्रवृत्तेः ॥

एवमीक्षतिधातोः फलाव्यवहितपूर्वावस्थालाक्षणिकत्वे तत्र बहुस्यां प्रजायेयेतीत्यन्तार्थस्य हन्ताहमित्यारभ्य एकैकां करवाणीत्यन्तार्थस्य तत्तद्वाक्यजन्यबोधसमानाकारकस्यान्वयानुपपत्तिः; उक्तस्थले इतिशब्दपूर्वभागस्य तादृशानुपूर्व्यवच्छिन्नवाक्यपरत्वात् इतिशब्दस्य शाब्दबोधसमानविषयकत्वार्थकत्वात्, अयं घट इति ज्ञानमित्यादौ तथाबोधात्। हन्ताहमित्यत्र हन्त दययेत्यर्थः, हन्त हर्षेऽनुकम्पायामिति कोशात् ॥

न च-तदैक्षतेति वाक्यस्य सेयं देवतेत्यादिवाक्यस्य च तादृशार्थे लक्षणाङ्गीकारान्नानुपपत्तिरिति—वाच्यम्; वाक्यस्य शक्त्यभावेन शक्यसम्बन्धरूपलक्षणाया अप्यसम्भवात्। न च-अर्धमन्तर्वेदिं मिनोमीत्यर्धं बहिर्वेदिं मिनोतीत्यादौ मीमांसकैर्वाक्यस्य देशविशेषे लक्षणाङ्गीकारात् 'आत्मा वाऽरे द्रष्टव्यश्श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यत्र सिद्धान्तिभिरपि वाक्यस्य दर्शनसमानाकारध्याने तदङ्गीकारात्, स्वज्ञाप्यसम्बन्धरूपायास्तस्याः वाक्यसाधारण्यात् प्रकृते तथाऽङ्गीकारो युज्यत इति-वाच्यम्; साङ्ख्यमते वाक्यलक्षणाया अनङ्गीकारेण तैस्तथा वक्तुमशक्यत्वात् । अत एव-गौणश्चेन्नात्मशब्दादित्यत्र ईक्षतिधातोरेव गौणत्वमाशङ्कितं; न तु वाक्यस्य; पूर्वसूत्रात्प्रथमान्ततया अनुकृष्टस्येक्षतिधातोस्तत्रान्वयात् ॥

न च–गौणश्चेदित्यत्रानुकृष्टेक्षतिपदस्य तद्घटितसमुदायपरत्वात् वाक्यलक्षणाभिप्रायकल्पनं सम्भवतीति–वाच्यम्; एवमपि लक्षणाया एव दोषात्। नवकृत्वोऽभ्यस्तात्मलक्षणा हि–अन्वयानुपपत्त्या तात्पर्यानुपपत्त्या वा? । नाद्यः–ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मेति नवकृत्वोऽभ्यस्तेनात्मपदेन चेतनत्वेनावगते सच्छब्दार्थे ईक्षतिधातु-मुख्यार्थान्वयानुपपत्तेरभावात्। न द्वितीयः–आत्मपदेन आदेशपदेन च स्थितिप्रयोजकसङ्कल्पवत्त्वरूपनियन्तृत्वेनावगते तस्मिन्नुत्पत्ति-प्रयोजकसङ्कल्पवत्त्वस्य तात्पर्यविषयत्वावश्यकतया तात्पर्यानुपप-त्तेरप्यभावात् ॥

न च—इदं सर्वं अचेतनं; ऐतदात्म्यं–एष आदेशशब्दार्थो-पदेश्यं प्रधानं, आत्मा स्वरूपं यस्य, तदेतदात्म–प्रधानस्वरूप-मित्यर्थः; स्वार्थे ष्यङ् । तत् सत्यं–प्रधानस्य प्रपञ्चाभिन्नत्वं प्रामाणिकमित्यर्थः। स आत्मा–आदेशशब्दार्थभूतं प्रधानं ते शरीर-मित्यर्थः, त इत्यध्याहारात्; आत्मपदस्य शरीरवाचित्वात्, 'आत्मा जीवे धृतौ देहे स्वभावे परमात्मनि। यत्नेऽर्केऽग्नौ मतौ वाते' इति नानार्थ-कोशात्; तत्त्वमसि श्वेतकेतो–त्वं तादृशप्रधानशरीरक इत्यर्थः। एवं च–आत्मपदस्य शरीरपरत्वेन चेतनवाचित्वाभावात् तस्यान्वया-नुपपत्त्यादिवारकत्वं न युज्यते; ईक्षतिधातोर्गौणत्वं वदतः पूर्वपक्षिण आत्मपदस्य चेतनपरत्वाभ्युपगमायोगात् सच्छब्दार्थस्यात्मशब्द-बोध्यं चेतनत्वमभ्युपगम्य तस्य मुख्येक्षणांशे विवादस्य 'विक्रीते करिणि किमङ्कुशे विवादः' इति न्यायग्रस्तत्वात्; अतो गौणश्चेन्नात्म शब्दादित्यात्मशब्देन ईक्षणस्य गौणत्वशङ्कावारणमनुचितम्— इति वाच्यम्। आङ्पूर्वकदिशिधातोः प्रशासनार्थकस्य उपदेशे लक्षणाप्रसङ्गात् ॥

न च—अकर्तरि च कारक इति विहितस्य घञः कर्तरि लक्षणायाः सिद्धान्ते आवश्यकत्वात् साम्यमिति—वाच्यम्; प्रथमश्रुतप्रातिपदिकस्य प्रशासनार्थकत्वे सिद्धे तत्कर्मत्वस्य ब्रह्मणि बाधेन चरमश्रुतघञ्प्रत्ययस्य कर्तरि लक्षणाया युक्तत्वेऽपि प्रत्ययानुरोधेन प्रकृतेर्लक्षणाया अनुचितत्वात्, प्रयाजशेषेण हवींष्यभिघारयतीत्यत्र पूर्वतन्त्रे प्रयाजशेषरूपप्रातिपदिकानुरोधेन तृतीयाया द्वितीयार्थे लक्षणामाश्रित्य प्रयाजशेषं हविस्सु प्रक्षिपेदित्यर्थाङ्गीकारात्, तथा प्राणा वा ऋषय इत्यत्र ऋषिशब्दानुरोधेन बहुवचनश्रुतेः गौणत्वस्य गौण्यसम्भवादित्यत्र वक्ष्यमाणत्वात्, कर्तुरेव साधकतमत्वरूपकरणत्वस्याबाधेन विशिष्टयोरुपादानोपादेयभावाङ्गीकर्तॄणां सिद्धान्तिनां मते 'स एव सृज्यस्स च सर्गकर्ता स एव पात्यत्ति च पाल्यते च' इति पराशरवचनानुसारेण प्रशासनकर्मत्वस्यापि ब्रह्मण्यबाधेन प्रत्ययस्यापि लक्षणाया अप्रसिद्धेश्च ॥

न च—अत्र ब्रह्मणि प्रशासनकरणत्वकर्मत्वयोस्सत्त्वेऽपि न घञ्प्रत्ययार्थत्वसम्भवः, तमित्यस्य प्रमाणान्तरप्रसिद्धमित्यर्थात्, अन्तर्यामिब्राह्मणादौ ब्रह्मणि प्रशासनकर्तृत्वस्य प्रसिद्धावपि तत्करणत्वकर्मत्वयोरप्रसिद्धेः; तथा च प्रत्ययस्य कर्तरि लक्षणा आवश्यकीति—वाच्यम्; प्रधानगतोद्देश्यत्वस्यापि प्रमाणान्तरसिद्धत्वाभावात्, 'उपदेशोऽजनुनासिकः' इति सूत्रे करणाधिकरणयोश्चेति ल्युटा बाधितस्य घञोऽकर्तरि च कारक इत्यनेनाप्रसङ्गमाशङ्क्य—'कृत्यल्युटो बहुलम्' इति घञो भाष्यकृता समर्थितत्वेन तन्न्यायेनात्रापि तेनैव सूत्रेण घञ्सिद्धौ लक्षणाया अप्रसङ्गात्, आदेशोऽस्यास्तीत्यादेश इति घञन्ताद्भाववाचिन आदेशशब्दात् कर्तृतासम्बन्धेन सम्बन्धिपरस्यार्शआद्यच्प्रत्ययस्य स्वीकारेण लक्षणाविरहाच्च ॥

किञ्च–आदेशशब्दस्य उपदेश्यपरत्वे अप्राक्ष्य इत्यन्तेनैव तत्सिद्धेरादेशशब्दो व्यर्थः । एवं सदेव सोम्येति च वक्ष्यमाणरीत्या नपुंसकान्तेन पदान्तरेण निर्देशे स्वरसेऽपि पुल्लिङ्गशब्देन निर्देशो नियन्तृप्रत्ययार्थ एव नियन्तृपरस्यादेशशब्दस्य 'एष त आत्माऽन्तर्याम्यमृतः', 'स त आत्मान्तर्याम्यमृतः', 'एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायणः'—इत्यत्र पर्यवसानेन तत्प्रसिद्धापेक्षस्य निर्देशस्य पुल्लिङ्गत्वोपपत्तेः ; तच्छब्दस्य प्रसिद्धार्थकत्वात् ॥

अपि च आदेशशब्दस्य उपदेश्यपरत्वे उपादानमात्रस्य प्रतिज्ञातत्वेन तस्यैवोपपादनीयत्वात् उत्तरत्र 'तदैक्षत' 'असृजत' इति कर्तृत्वाभिधानानुपपत्तिः ; अतोऽपेक्षितविधानन्यायादत्रत्यादेशशब्दस्थाने मुण्डकबृहदारण्यकयोः 'आत्मनि खल्वरे दृष्टे श्रुते' इति नियन्तृपरमात्मशब्दप्रयोगाच्च आदेशशब्दस्यादेष्टृपरत्वमावश्यकम् ॥

न च–उक्तरीत्या आदेशशब्दस्य स्थितिकर्तृपरतया 'हन्ताहमिमा' इत्यादिना वक्ष्यमाणस्थितिकर्तृत्वोपपत्तावपि तदैक्षतेति सृष्टिकर्तृत्वाभिधानानुपपत्तिस्तदवस्थैव, सृष्टिस्थितिप्रलयसाधारणागन्तुकावस्थात्वावच्छिन्ने धातोर्लक्षणायां च प्रकृत्यस्वारस्यं सिद्धान्तेऽपि प्राप्तमिति–**वाच्यम् ;** अजहल्लक्षणापेक्षया जहल्लक्षणाया जघन्यत्वोक्तेः । उक्तं च व्याप्तेश्चसमञ्जसमित्यत्र शाङ्करभाष्ये–"लक्षणायामपि सन्निकर्षविप्रकर्षौ भवत" इति । 'ओमित्येतदक्षरमुद्गीथमुपासीत' इत्यत्र—ओङ्कारसदृशमुद्गीथमित्यर्थः ; उद्गीथावयवं ओङ्कारमिति विवक्षायां गौण्या वृत्त्या स्वार्थहानेरवयवलक्षणैव ज्यायसी, सन्निकृष्टत्वात्–इत्युक्तम् । इदं च भाष्यं ब्रह्मानन्दीये व्याख्यातं–सिंहो बाल इत्यादौ सिंहादिपदस्य क्रूरत्वशूरत्वादिनेव ओमितिपदस्य प्राशस्त्यविशेषेण गौण्या वृत्त्या बोधकत्वे मुख्यार्थहानिरिति वाच्यम्; अवयवलक्षणा–

उद्गीथावयवत्वेन लक्षणा, सन्निकृष्टत्वात्–उद्गीथरूपमुख्यार्थघटितधीः- प्रयोजकत्वात्—इति। उक्तरीत्या ईक्षणाभिधानान्यथानुपपत्तिसूचिता- देशपदतात्पर्यविषयस्यादेष्टृत्वस्यापेक्षितेरित्यनेन सूचनान्न तदनभिधान- प्रयुक्तन्यूनता; सूत्रे अशब्दं नेत्यन्वयानुरोधिन्यासं विना नाशब्द- मिति न्यासो ह्यादेशपदस्य नियन्तृपरत्वद्योतनाय; आशब्दमीक्षतेः, नामपर्यन्तमीक्षतेः नामरूपव्याकरणपर्यन्तमीक्षतेः, सच्छब्दवाच्यं ना पुमान् चेतनः–इत्यर्थान्तरस्यापि प्रतीतेः; आदेशपदस्य कर्तृत्व- परत्वाभावे बहूनामीक्षणानामसङ्गतिद्योतनात्, पुंवाचकस्य नेत्यस्य प्रयोगेण पुल्लिङ्गादेशपदवाच्यत्वासम्भवसूचनात्। एवं ऐतदात्म्यमिदं सर्वमित्यस्य सर्वमचेतनं प्रधानाभिन्नमित्यर्थोऽपि न युक्तः; सर्वशब्द- स्य सङ्कोचापत्तेः, 'इदं सर्वमसृजत' इति तैत्तिरीयके 'विज्ञानं चावि- ज्ञानं च' इति चेतनाचेतनात्मकप्रपञ्चस्य सर्वशब्देन ग्रहणेनाचेतन- मात्रस्य ग्रहणायोगात्, सन्मूलास्सोम्येमा इति पूर्ववाक्ये सर्वशब्दविशे- षितप्रजाशब्देनाचित्संसृष्टचेतनस्य ग्रहणेनात्र सर्वशब्दविशेषितेदंपदे- नापि तस्यैव ग्रहणौचित्यात्॥

न च—पूर्ववाक्ये प्रजाशब्देनाचित्संसृष्टजीवमात्रपरामर्शे तस्य सदु- पादानकत्वसन्निष्ठलयप्रतियोगित्वरूपसन्निष्ठत्वयोरनुपपत्तिरिति प्रजा- शब्दस्य ब्रह्मपर्यन्तत्वमावश्यकमिति—वाच्यम्; तथात्वे ऐतदात्म्य- मिदं सर्वमित्यस्य स्थूलशरीरकं ब्रह्म सूक्ष्मशरीरकब्रह्माभिन्नमित्यर्थात्, इदं सर्वमित्यस्य स्थूलशरीरकब्रह्मपरत्वात् एतदात्मा स्वरूपं यस्ये- त्यर्थात्, विशिष्टयोरुपादानोपादेयभावस्य विशेषणविशेष्ययोरुपादा- नोपादेयभावगर्भत्वेन सन्मूला इति वाक्यस्य विशेषणविशेष्ययोरुपा- दानोपादेयभावपरत्वे प्रजाशब्दस्याचित्संसृष्टजीवपरत्वेऽपि बाधक- विरहात्। ऐतदात्म्यमित्यस्य चेतनाचेतनात्मकप्रपञ्च एतन्नियन्तृक इत्यर्थः॥

इयांस्तु विशेषः—तद्वाक्यस्य विशिष्टयोरुपादानोपादेयभावपरत्वे सदन्तर्यामिकत्वरूपसदायतनत्वबहुवचनार्थबहुत्वयोर्विशेषणद्वारा प्रजाशब्दार्थेऽन्वयः, विशेषणविशेष्ययोस्तथात्वपरत्वे च साक्षादेव तयोरन्वयः; सन्मूलास्सत्प्रतिष्ठा इत्यत्र सच्छब्दस्य विशिष्टपरत्वं सदायतना इत्यत्र ब्रह्ममात्रपरत्वं, सता सोम्य तदासम्पन्न इत्यत्र सच्छब्दस्य विशेष्यपरत्वमिति–पूर्वकल्पे वैषम्यं, उत्तरकल्पे च सर्वत्र ब्रह्मपरत्वान्न वैषम्यमिति ॥

इदं तु बोध्यं—–यथा मोक्षदशायामभेदप्रतिपादकानां 'ब्रह्म वेद ब्रह्मैव भवति' इत्यादिश्रुतीनां सजातीययोर्निरन्तरसंयोगरूपलयपदवाच्यापृथक्सिद्धिविषयबोधपरत्वप्रतिपादनाय मैत्रायणीयोपनिषदि 'तस्मिन्नेव यजमानास्सैन्धवघना इव लीयन्त्येषा वै ब्रह्मैकता नाम हि सर्वे कामास्समाहिताः' इति श्रुतिः प्रवृत्ता; तथा ब्रह्मणि प्रपञ्चाभेदपराणां श्रुतीनामप्यपृथक्सिद्धिसंसर्गकबोधपरत्वं प्रतिपादयितुं सन्मूला इत्यारभ्य तत्त्वमसीत्यन्तं प्रवृत्तम्। यजमानाः–भगवदाराधनरूपोपासनकर्तारः, तस्मिन्नेव लीयन्ति–परमात्मानुयोगिकलयप्रतियोगिनः, एषा निरुक्तो लयः, ब्रह्मैकता–मुक्तावभेदप्रतिपादकत्वेन भासमानवाक्यप्रतिपाद्य इत्यर्थः। श्रुतिषु लयो हि द्विविधः प्रतिपाद्यते–नाशरूपः, संयोगरूपश्च। अवस्थाया यत्र लय उच्यते तत्र नाशरूप एव, क्वचित्तादृशनाशप्रतियोगित्वमेव द्रव्येऽप्युच्यते; यथा स्वमपीतो भवतीत्यादौ। संयोगरूपलयोऽपि द्विविधः—लयशब्दप्रतिपाद्यः ऐक्यशब्दप्रतिपाद्यश्चेति। स्वसमभिव्याहृतपदार्थतावच्छेदकनाशपूर्वकत्वे सति तदसंयुक्तपदार्थासंयुक्तत्वे सति तदनुयोगिकसंयोगरूपो लयधातुप्रतिपाद्यः; यथा पृथिव्यप्सु प्रलीयत इत्यादौ। सृष्टिकाले जलांशेषु कतिपयेषु पृथिवीत्वावस्थाया उत्पत्त्या कारणस्यांशद्वयमस्ति—कार्योपयुक्तस्तदनुपयुक्तश्चेति। तत्र कार्योपयुक्तांश उपादानं तदनु-

पयुक्तांशोऽपादानं, अत एवाद्भ्यः पृथिवीत्यादौ अनुपयुक्तांशादुपयु-
क्तांशस्य विभागमादाय पञ्चमी, तादृशापादानांशानामेवाप्स्विति
सप्तम्यन्तेन ग्रहणादुपादानांशेष्वपि पृथिवीत्वावस्थानाशपूर्वकं जलत्वा-
वस्थाया उत्पत्त्या तद्रूपेणापादानांशसाम्यतदसंयुक्तपदार्थासंयुक्तत्व-
तत्संयोगनाशत्वात् निरुक्तलयशब्दार्थोपपत्तिः। नाशपूर्वकत्वाघटितोक्त
संयोग एवैक्यशब्दार्थः, शुक्लगोः क्षीरे कपिलगोक्षीरं संसृष्टमेकीभूत-
मिति व्यवहारात्; यथा 'तमः परे देव एकी भवति', 'कर्माणि
विज्ञानमयश्चात्मा परेऽव्यये सर्वे एकी भवन्ति' इत्यादौ पृथिवीत्वा-
द्यवस्थाया इव तमस्त्वावस्थाया विज्ञानमयत्वावस्थायाश्च नाशा-
भावात् ॥

न चैवं–सर्वे एकीभवन्तीत्युक्ते एकीभावविवरणाय प्रवृत्ते—

'यथा नद्यस्स्यन्दमानास्समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय,

तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्'—

इति वाक्ये नामरूपविमोकाभिधानं व्यर्थमिति–वाच्यम्; प्राकृतनाम-
रूपयोस्साजात्यविरोधितया ऐक्यपदार्थघटकसाजात्यनिर्वाहाय तदु-
पादानात्। अत एव पूर्वत्र नामरूपादिसम्बन्धाभावरूपनिरञ्जनत्वस्य
परमसाम्यप्रयोजकत्वं निरञ्जनः परमं साम्यमुपैतीत्युक्तम् ॥

न च-लयपदार्थघटकं साजात्यं हि न येन केन चिद्रूपेण, अव्या-
वर्तकत्वात्; किन्तु अनुयोगितावच्छेदकरूपेण, पृथिव्यप्सु प्रलीयत
इत्यादौ तथा दर्शनात्, प्रकृते च तादृशब्रह्मत्वेन साजात्यस्य बाधा-
त्तस्मिन् लीयत इत्यनुपपन्नमिति–वाच्यम्; अनुयोगितावच्छेदकता-
पर्याप्त्यधिकरणरूपेण साजात्यमविवक्षितं, तदाश्रयरूपेण तद्विवक्षणे
दोषाभावात्, ब्रह्मपदार्थतावच्छेदकगुणकृतबृहत्त्वेन साजात्यसम्भवात्;
तस्य च स्वाश्रयाश्रयत्वसम्बन्धेन परममहत्परिमाणवत्त्वरूपत्वात्, मुक्तौ
धर्मभूतज्ञाने परममहत्परिमाणोत्पत्तेः, 'स चानन्त्याय कल्पते' इति

श्रुतिसिद्धत्वात्। अत एव सुबालोपनिषदि 'ब्रह्मैव सन् ब्रह्माप्येति' इति निरुक्तगुणकृतबृहत्त्वबोधनाय ब्रह्मैव सन्नित्युक्तं, अप्ययपदार्थे निरुक्तसाजात्यस्य घटकत्वेऽपि विशिष्टवाचकानामिति न्यायेनाप्ययपूर्वकस्यैतैर्निरुक्तनिरन्तरसंयोगमात्रपरत्वान्नासङ्गतिः। मैत्रायणीयवाक्येऽपि 'अत्र हि सर्वे कामास्समाहिताः' इति गुणकृतबृहत्त्वस्य साजात्यघटकत्वमभिहितं; अत्र–एकतायां, सर्वे कामाः—धर्मभूतज्ञानविकासरूपसत्यसङ्कल्पत्वादयः, समाहिताः—अन्तर्भूता इत्यर्थात्॥ एवं च–ब्रह्म वेद ब्रह्मैव भवतीत्यस्य ब्रह्मानुयोगिकनिरुक्तलयपदार्थभूतापृथक्सिद्धिसम्बन्धप्रतियोगी भवतीत्यर्थः; भूधातोरपृथक्सिद्धिपरत्वात्॥

न च--ब्रह्मैव सन्नित्यादौ द्वितीयब्रह्मपदस्य गुणकृतबृहत्त्वाश्रयपरत्वसम्भवान्न भूधातोरपृथक्सिद्धौ लक्षणा युक्तेति--वाच्यम्; तथा सति ब्रह्मपदस्य लक्षणापत्तेः, शक्यतावच्छेदकभिन्नरूपेण बोधे लक्षणावत् तदेकदेशपरित्यागेऽपि तस्या दुर्वारत्वात्। अत एव पिष्टमय्यो गाव इत्यत्राकृतिमात्रबोधतात्पर्येण गोपदप्रयोगे लक्षणेत्युक्तं शक्तिवादगादाधर्याम्। भूधातोः ब्रह्मपदस्य वा लक्षणासाम्येऽपि 'एषा वै ब्रह्मैकता नाम' इति श्रुत्यनुमतत्वात् भूधातोर्लक्षणैव युक्ता; 'यथा वै श्येनो निपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यमादत्ते' इति श्रुत्यनुमतत्वात् श्येनेनाभिचरन् यजेतेत्यत्र श्येनपदस्य श्येनसदृशयागे सैषा चतुष्पदा गायत्रीति श्रुत्यनुमतत्वाद्गायत्रीपदस्य च गायत्रीसदृशब्रह्मणि लक्षणायाः पूर्वोत्तरमीमांसासिद्धत्वात्, सदेव सोम्येत्यत्र वक्ष्यमाणरीत्या असधातोर्लयार्थकत्वस्य क्लृप्ततया तन्न्यायेनात्रापि भूधातोरेव तत्कल्पनस्य युक्तत्वाच्च। न च–एषा वै ब्रह्मैकतानामेत्यस्य उक्तलय एकताशब्दबोध्य इत्यर्थोऽस्त्विति–वाच्यम्; तथा सति तद्वाक्यस्यैव वैयर्थ्यापत्तेः, एकताप्रतिपादकवाक्यवेद्य इत्यर्थे च समानाधिकरणवाक्यतात्पर्यग्राहकतयैवोपयोगात्॥

न च–ममापि परेऽव्यये सर्व एकी भवन्तीत्यैक्यशब्दविवरणरूप-तयोपयोगोऽस्त्विति–वाच्यम्; यथा नद्यस्स्यन्दमाना इत्युत्तरमन्त्रेण तद्विवरणेन विवरणाकाङ्क्षाविरहात्। तथा च मैत्रायणीयवाक्यस्य मुक्तावभेदबोधकवाक्यतात्पर्यग्राहकत्ववत् सन्मूला इत्यादेरभेदश्रुति-सामान्यतात्पर्यग्राहकत्वं; यतस्सर्वाः प्रजाः सन्मूलास्सदायतनास्सत्प्र-तिष्ठाः, अत इदं सर्वमैतदात्म्यं एतदात्मवाचकशब्दजन्यबोधविशेष्यं; ष्यङो वाचकपदजन्यबोधविशेष्यत्वरूपसम्बन्धपरत्वात् जगत्समान-विभक्तिप्रयोज्यब्रह्मनिष्ठप्रकारतानिरूपितविशेष्यत्वरूपं ब्रह्मसामाना-धिकरण्यं सन्मूलत्वाद्यन्यतमहेतुकं तत्त्रयनियतापृथक्सिद्धिसम्बन्ध-प्रयुक्तमित्यर्थः। सामानाधिकरण्यं नाम—अभेदापृथक्सिद्ध्यन्यतर-संसर्गकबोधकजनकत्वम्। सत्यं ज्ञानमनन्तं ब्रह्मेत्यत्र सत्यानन्तपदाभ्यां सामानाधिकरण्यमभेदघटितं, ज्ञानपदेन सामानाधिकरण्यमपृथक्सि-द्ध्यभेदोभयसंसर्गघटितं; तेन ज्ञानस्वरूपत्वज्ञानगुणकत्वयोर्लाभः। नीलमुत्पलमित्यादौ गुणगुणिनोः देवोऽहमित्यादौ जीवशरीरयोः ब्रह्म-वनमित्यादौ जगद्ब्रह्मणोश्च सामानाधिकरण्यमपृथक्सिद्धिघटितमेव। तत्र जगद्ब्रह्मणोः सामानाधिकरण्यस्य अपृथक्सिद्धिसम्बन्धावगाहि-बोधपरत्वजनकत्वरूपतां ग्राहयति ऐतदात्म्यमित्यादिकं; अन्यथा तद्वाक्यस्यैव वैयर्थ्यापत्तेः, शरीरशरीरिभावस्य सदायतना इत्य-नेन प्राप्तत्वात्॥

न च–ष्यङः स्ववाचकपदजन्यबोधविशेष्यत्वरूपपरम्परासम्बन्धे लक्षणाप्रसङ्ग इति–वाच्यम्; सम्बन्धत्वावच्छिन्ने शक्तस्य तस्य निरुक्तपरम्परायामपि शक्तेरनपायात्। अस्तु वा लक्षणा, तथाऽपि न दोषः, वाक्यानर्थक्यापेक्षया लक्षणाया एव बलीयस्त्वात्, अत एव दर्शे कर्तव्यस्य अग्न्याधानादेश्चतुर्दश्यां करणे प्रायश्चित्तप्रतिपा-

दिकायां—

"यस्य हविर्निरुक्तं पुरस्ताच्चन्द्रमा अभ्युदेति त्रेधा तण्डुलान् विभजेद्ये मध्यमास्तानानयेऽधात्रे पुरोडाशमष्टाकपालं कुर्याद्ये स्थविष्ठास्तानिन्द्राय प्रमात्रे इदं चरुं येऽणिष्ठास्तान् विष्णवे शिपिविष्टाय श्रिते चरुम्"—

इति श्रुतौ त्रेधा तण्डुलान् विभजेदित्यनेन तण्डुलानां मध्यमादिभावेन विभागो न विधीयते, मध्यमादिवाक्यैरेव तत्सिद्ध्या वैयर्थ्यप्रसङ्गात्; किन्तु पूर्वदेवतापनयो विधीयते, तण्डुलपदस्य पूर्वदेवतासंयुक्तहविर्मात्रे लाक्षणिकत्वात्, हविषां च दधिमिश्रितपुरोडाशरूपेण त्रैविध्यात् त्रेधेत्यनुवादः । न चैवं लक्षणादोषः, वाक्यानर्थक्याल्लक्षणाया ज्यायस्त्वादिति—व्यवस्थापितं पूर्वतन्त्रे ॥ एवं च—सर्वं खल्विदं ब्रह्मेत्यादौ सर्वपदार्थस्यापृथक्सिद्धिसम्बन्धेनान्वयः; न तु सर्वपदस्य तच्छरीरकपरत्वमभ्युपगम्य तस्याभेदेनान्वयः; तथा सति इदंपदार्थस्य प्रत्यक्षविषयस्य तदेकदेशे सर्वस्मिन्नन्वयस्य वक्तव्यत्वेन व्युत्पत्तिविरोधापत्तेः, एवं नीलादिशब्दानां गुणमात्रवाचकत्वेऽपि न क्षतिः, अपृथक्सिद्धिसम्बन्धमादायैव नीलो घट इत्यादिसामानाधिकरण्यनिर्वाहात्, तत्त्वमसीत्यत्र त्वंपदस्य श्वेतकेतुमात्रपरत्वेन तत्पदार्थस्य तेजसो ब्रह्मणि तत्र अपृथक्सिद्धिसम्बन्धेनान्वयसम्भवात् ॥

एवं प्रतर्दनविद्यायां 'त्रिशीर्षाणं त्वाष्ट्रमहनं—तं मामायुरमृतमुपास्व' इत्यस्य अस्मच्छब्दार्थेन्द्रविशेष्यकापृथक्सिद्धिसंसर्गकप्राणपदार्थपरमात्मप्रकारकोपासनविधिपरत्वान्नानुपपत्तिः, अन्यथा मामित्यस्य तच्छरीरकपरत्वे अहनमित्यत्रापि अध्याहृताहम्पदस्य इन्द्रपरतया वैरूप्यापत्तेः । तथा च—तत्तेज ऐक्षतेत्यत्रापि तेजःपदार्थस्य तेजसो ब्रह्मणि तत्पदार्थे अपृथक्सिद्धिसम्बन्धेनान्वयात् तेजःपदस्य क्वचिद्विशिष्टपरत्वं, क्वचिद्विशेषणमात्रपरत्वमिति वैरूप्यानवकाशः । शरीरवाच-

कानां शब्दानां शरीरिपर्यन्तत्वमित्यादिभाष्यस्य शरीरिविशेष्यक-बोधजनकत्वमित्यर्थाङ्गीकारात् शरीरशरीरिभावरूपापृथक्सिद्धेस्संसर्गत्वेऽपि न विरोधः। यद्वा—ऐतदात्म्यमिति वाक्यं अपृथक्सिद्ध-प्रकारवाचिनां पदानां प्रकारिणि शक्तिग्राहकं, सर्वं खल्वित्यादावपि सर्वपदार्थस्य तदपृथक्सिद्धस्याभेदेन ब्रह्मण्यन्वयः॥

एवं च—तत्तेज ऐक्षतेत्यादौ तेजआदिपदानि विशिष्टपराण्येव, यत्र क्वचन शोचतीत्यादौ तु तेजःप्रभृतिपदानि विशेषणमात्रपराणि; तेजआदिपदानां क्वचिद्विशिष्टपरत्वे तत्प्रकरणे सर्वत्र विशिष्टपरत्वेन भाव्यमिति नियमायोगात्; साङ्ख्यमतेऽपि सदेव सोम्येदमित्यत्र सत्पदस्य स्थूलावस्थाशून्यप्रधानपरत्वस्य, सन्मूला इति वाक्ये सदायतना इति सच्छब्दस्य स्थूलावस्थप्रधानपरत्वस्य, 'सता सोम्य तदा सम्पन्नो भवति' इत्यत्र नाडीत्वाद्यवस्थापन्नप्रधानपरत्वस्य, चाङ्गीकारेण एकप्रकरणस्थैकानुपूर्व्यवच्छिन्नपदानामेकार्थपरत्वमिति नियमस्य तन्मतेऽप्यसम्भवात् विशिष्टयोः कार्यकारणभावस्य विशेषणयोः कार्यकारणभावगर्भतया यत्र क्वचनेत्यादेः विशेषणांशे तदुपपत्ति-प्रदर्शनपरत्वान्नासङ्गतिः॥

एवं च—पूर्वं तेजआदिपदानां विशेषणमात्रपरत्वस्यापि सत्त्वात् हन्ताहमिमा इत्यत्र विशेषणपरामर्शापत्तिः, विशिष्टगतसमष्टिसृष्टेर्विशेषणसमष्टिघटितत्वेन विशेषणांशे व्यष्टिसृष्टितदुपपत्त्यादिप्रदर्शनस्य नासङ्गतिः। एवं च—तत्तेज ऐक्षतेत्यत्र तेजःप्रभृतिशब्दानां विशिष्टपरत्वेन गौणेक्षणसाहचर्यप्रयुक्तगौणत्वशङ्कानुदयात् सच्छब्दवाच्यं न प्रधानं; इदम्पदस्य स्थूलचिदचिद्विशिष्टब्रह्मपरत्वेन तदभेदस्य सच्छब्दार्थे सूक्ष्मचिदचिद्विशिष्टे सम्भवात् आदेशपदेन नियन्तृतया-ऽवगतस्यैवानेन वाक्येनोपादानत्वोक्तेः तत्र प्रसिद्धकार्याभेदायोगात् श्वेतकेतोः पूर्वमीमांसोपचितमनस्कत्वाच्च आकृत्यधिकरणन्यायसिद्धं

इदम्पदस्य विशिष्टपरत्वं स्वयमेवासौ ज्ञास्यतीत्यभिप्रायेण वैशिष्ट्यस्य कण्ठरवेणानभिधानोपपत्तेः। एवं–तत्त्वमसीत्यत्र त्वम्पदश्वेतकेतु-पदादिकमपि विशिष्टपरं, सम्बोधनार्थस्य स्वप्नान्तं मे सोम्य विजानीही-त्याख्यातान्तार्थस्य च विशेषणेऽन्वयः; मुख्यविशेष्यतासम्बन्धेन पद-जन्योपस्थितेर्हेतुत्वमिति पूर्वपक्षोक्तहेतुतावच्छेदकसम्बन्धतावच्छेदक-मुख्यविशेष्यतात्वस्य अपृथक्सिद्धिसम्बन्धातिरिक्तसम्बन्धावच्छिन्न-प्रकारताभिन्नविशेष्यतात्वरूपस्य मुख्यविशेष्यत्वापृथक्सिद्धिसम्बन्धा-वच्छिन्नप्रकारत्वोभयसाधारणत्वेन तत्त्वमसीत्यादौ श्वेतकेतुपदार्थैकदेशे जीवे सम्बोधनविभक्त्यर्थस्य स्वप्नान्तं मे सोम्येत्यत्र त्वंपदार्थैकदेशे तत्र आख्यातान्तार्थस्य चान्वयोपपत्तेः; श्वेतकेतुनिष्ठप्रकारतायाः अपृथक्सिद्धिसम्बन्धावच्छिन्नतया तदतिरिक्तसम्बन्धावच्छिन्नप्रकार-ताभिन्नत्वाक्षतेः; जामातस्त्वं सुन्दरोसीति प्रयोगस्य पुत्र्युद्देश्यकस्य नापत्तिप्रसङ्गः, पुत्रीप्रतिरूपजामातृपदार्थैकदेशपुत्र्यां निरूपितत्व-सम्बन्धावच्छिन्नप्रकारतासत्त्वेनापृथक्सिद्धिसम्बन्धातिरिक्तसम्बन्धाव-च्छिन्नप्रकारताभिन्नविशेष्यताविरहेण तेन सम्बन्धेन पदजन्योपस्थिति-रूपकारणबाधात् ॥

एवं च–मोक्षजनकतावच्छेदकीभूतत्वंपदार्थनिष्ठविशेष्यतानिरूपि-ताभेदसम्बन्धावच्छिन्नप्रकारताश्रयत्वस्य प्रधानत्वव्यावर्तकस्य सत्त्वात् त्वंपदार्थनिष्ठप्रकारतानिरूपितभेदनिष्ठप्रकारतानिरूपितप्रतियोगितास-म्बन्धावच्छिन्नप्रकारताश्रयत्वस्य प्रधानत्वसाधकस्याभावाच्च सच्छ-ब्दवाच्यं न प्रधानम् ॥

एवं–प्रतिज्ञाविरोधादपि सच्छब्दवाच्यं न प्रधानं; स्वावच्छिन्न-पूर्ववृत्तितावच्छेदकत्व–स्वावच्छिन्नाभिन्नवृत्तित्व–स्वावच्छिन्नाविषयक-प्रतीतिविषयतावच्छेदकत्वैतत्त्रितयसम्बन्धेन सर्वपदार्थतावच्छेदकविशि-ष्टधर्मवत्त्वं हि–एकविज्ञानेन सर्वविज्ञानप्रतिज्ञार्थः। अत्र मृत्त्वावच्छि-

न्नोपादानतावच्छेदकत्वाभाववति घटत्वे व्यभिचारवारणाय प्रथम-सम्बन्धः, घटत्वावच्छिन्नोपादानतावच्छेदकत्वाभाववति दण्डत्वे व्यभि-चारवारणाय द्वितीयः, घटत्वावच्छिन्नोपादानतावच्छेदकत्वाभाववति घटत्वे तद्वारणाय तृतीयः। तेन कार्यकारणयोरभेदेन कारकव्यापार-वैयर्थ्यमिति शङ्कानवकाशः। यद्यपि–स्वभिन्नत्वनिवेशेनापि उक्त-व्यभिचारस्य उक्तशङ्कायाश्च वारणसम्भवात् गुरुभूतसम्बन्धनिवेशो निष्फलः; तथाऽपि–तस्य परिष्कारान्तरत्वान्न वैयर्थ्यं, यद्वा-श्रुतश्रुतपदयोः स्वभिन्नत्व एव तात्पर्यात् स्वभिन्नत्वमेव तृतीय-सम्बन्ध इति बोध्यम्। तथा च–सत्पदार्थतावच्छेदकं सर्वपदार्थता-वच्छेदकावच्छिन्नोपादानतावच्छेदकं; उक्तत्रितयसम्बन्धेन सत्पदार्थ-तावच्छेदकविशिष्टत्वात्, यत्र उक्तत्रितयसम्बन्धेन यद्धर्मविशिष्टत्वं तत्र तद्धर्मावच्छिन्नोपादानतावच्छेदकत्वमिति व्याप्तेः घटत्वादिविशि-ष्टमृत्त्वादौ दर्शनात्॥ 'उत तमादेशमप्राक्ष्यः येनाश्रुतं श्रुतं भवत्य-मतं मतमविज्ञातं विज्ञातं स्यात्' इत्युक्तादेशस्यैव सदेवेत्यादिवाक्ये सच्छब्देन ग्रहणात् येनाश्रुतमित्यादेश्च स्थूलरूपेणाश्रुतं सर्वं सूक्ष्म-रूपेण श्रुतं तदभिन्नं श्रुतं भवतीत्यर्थात् अग्र आसीदित्यनेन पूर्ववृत्ति-तावच्छेदकत्वरूपप्रथमसम्बन्धस्य येनाश्रुतं श्रुतं भवतीत्यनेन च द्वितीयतृतीयसम्बन्धयोर्लाभात् सत्पदार्थतावच्छेदके उक्तसम्बन्ध-त्रयेण सत्पदार्थतावच्छेदकत्वस्य नासिद्धिः॥

एवं च–प्रधानत्वस्य सत्पदार्थतावच्छेदकत्वे तदवच्छिन्नस्य जीवो-पादानत्वविरहेण सर्वपदार्थतावच्छेदकावच्छिन्नोपादानतावच्छेदकत्व-विरहात् उक्तसम्बन्धत्रयेण सत्पदार्थतावच्छेदकविशिष्टत्वरूपप्रति-ज्ञाया अनुपपत्तिः, व्यापकाभावे व्याप्यसत्त्वासम्भवात् सूक्ष्मचिद-चिद्विशिष्टब्रह्मत्वस्य तथात्वे च तस्य सर्वपदार्थतावच्छेदकस्थूलचिद-चिद्विशिष्टब्रह्मत्वावच्छिन्नोपादानतावच्छेदकत्वात् प्रतिज्ञोपपत्तिः।

न च—जीवोपादानत्वं न जीवस्वरूपनिरूपितोपादानत्वं, जीवस्वरूपस्य नित्यत्वेन कार्यत्वायोगात्, किं तु जीवापृथक्सिद्धवस्तूपादानत्वमेव तत्; तादृशं च वस्तु धर्मभूतज्ञानमिव शरीरमपीति तदुपादानत्वात् प्रधानस्यापि जीवोपादानत्वोपपत्तिरिति—वाच्यम्; एवमपि प्रधानस्य जीवधर्मभूतज्ञानोपादानत्वाभावेन सर्वोपादानत्वभङ्गात्। ब्रह्मणश्च पूर्वावस्थापन्नजीवीयधर्मभूतज्ञानशरीरकस्य उत्तरावस्थापन्नतच्छरीरकं प्रति उपादानत्वान्न सर्वोपादानत्वानुपपत्तिः ॥

ननु—अन्वयव्यतिरेकाभ्यां भूतत्रयमयत्वेनैव प्रतिज्ञायाः श्रुतावुपपादितत्वात् चेतने तदुपपादनमनावश्यकं, अत एव वियत उत्पत्त्यभावे प्रतिज्ञाहानिमुद्भावयता सूत्रकृता आत्मनो नित्यत्वमुक्तं; प्रतिज्ञा च नोपपादिता। न च—भूतत्रयमयत्वेनैव तदुपपादनस्यावश्यकत्वे आकाशादावपि तदुपपादनं न युज्यत इति—वाच्यम्; पञ्चीकरणप्रक्रियया आकाशादावपि भूतत्रयमयत्वस्य सत्त्वात्। तथा च—जीवे तदुपपादनस्यानावश्यकत्वात् प्रतिज्ञाविरोधादितिसूत्रं प्रक्षिप्तमेव, द्वैताद्वैतभाष्ययोरव्याख्यातत्वाच्च—इति चेत्॥ उच्यते—सद्विद्या तावत् एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपादनमुखेन षोडशखण्डात्मिका विशिष्टोपादानत्वपरा; तत्र प्रतिपिपादयिषितार्थस्य साधिष्ठताख्यापनाय पितापुत्राख्यायिकया प्रतिपिपादयिषितार्थोऽवतार्यते प्रथमखण्डेन, अनन्तरं षड्भिः खण्डैः स एवार्थः प्रतिपाद्यते, अनन्तरं च नवभिः खण्डैः स एवार्थः स्थाप्यत इति—प्रथमखण्डो नवखण्डी च आद्यषट्कशेषभूतौ। केनायं सिद्धो विभाग इति चेत् सद्विद्यान्त इव सप्तमखण्डान्तेऽपि तद्धास्य विजज्ञाविति विजज्ञाविति द्विरुक्त्या पित्रा पुत्रस्य उत्पिपादयिषितज्ञानस्य सम्यक् निष्पन्नत्वावगमात् अवान्तरार्थज्ञाननिष्पत्तिपरत्वे प्रतिखण्डं द्विरुक्त्यापत्तेः, नवखण्ड्यारम्भे उद्दालको हारुणिरिति पुनरुपदेशारम्भप्रतीतेश्च ॥

तथा च–सद्विद्या सर्वाऽपि विशिष्टोपादानत्वसमर्थनाय प्रतिज्ञोपपादनपरैव, तत्र जीवे प्रतिज्ञोपपादनस्यानावश्यकत्वे नामरूपव्याकरणप्रतिपादनपरवाक्ये नामरूपयोः स्वपर्यन्तत्वलाभाय परानुप्रवेशस्यावश्यकत्वेऽपि जीवद्वाराऽनुप्रवेशस्य जीवानुप्रवेशघटितत्वस्य व्यर्थत्वापत्तेः, जीवे प्रतिज्ञोपपादनाय जीवस्यापि कार्यत्वासिद्धये तदुपपादनात् ॥

एवं शरीरद्वारा जीवस्य कार्यत्वोपपादनपरस्यान्नमशितमित्यादिपञ्चमखण्डस्य ज्ञानावस्थाद्वारा शरीरद्वारा च तदुपपादनपरस्य स्वप्नान्तमित्याद्यष्टमखण्डस्य च वैयर्थ्यापत्तिः, तत्र हि खण्डे 'स्वप्नान्तं मे सोम्य विजानीहि'–इत्यादिना ज्ञानावस्थाद्वारकं 'अशनायापिपासे सोम्य विजानीहि'–इत्यादिना शरीरद्वारकं च कार्यत्वमुपपाद्य 'सन्मूलास्सोम्येमास्सर्वाः प्रजास्सदायतनास्सत्प्रतिष्ठाः'–इति जीवानामुक्तोभयविधकार्यत्वमत्त्वेन सदुपादानकत्वं सम्भवतीत्यभिधाय 'अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि सम्पद्यते, मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायां' इत्यनेन सुषुप्तिकाल इव मरणकालेऽपि जीवानां परदेवताशरीरे सति सम्पत्तिं प्रदर्श्य स य एषोऽणिमेति आदेशस्य सूक्ष्मावस्थापन्नस्य सर्वोपादानत्वमुपसंहृतं ; यतस्स आदेशस्सदित्युक्तः अयमणिमा उपादानतावच्छेदकसूक्ष्मचिदचिच्छरीरक इत्यर्थात्। प्रतिज्ञाविरोधादिति सूत्रं च न प्रक्षिप्तं, वृत्तिग्रन्थे तादृशासूत्रदर्शनात् ॥

किं च–गौणश्चेन्नात्मशब्दादित्यत्रात्मशब्दस्य गौणत्ववारकत्वं प्रतिपादयता सूत्रकृता देवताशब्दस्य तदनभिधानाच्यूनता। न च–देवताशब्दस्य 'हन्ताहमिमास्तिस्रो देवताः' इति अचेतने प्रयुक्तगौणदेवताशब्दसामानाधिकरण्येन गौणत्वसन्देहात् न तदभिधानम्;

यद्वा आकाशस्य शब्दादित्यस्येवात्मनश्शब्द इत्यस्याप्यङ्गीकारेणात्मवाचिदेवताशब्दस्यापि ग्रहणान्न न्यूनतेति–वाच्यम् ; एवमपि स्वाप्ययादिति सुषुप्तिकालीनजीवलयाश्रयत्वस्यास्फुटस्य प्रधानव्यावर्तकत्वमभिदधता सूत्रकारेण सत्प्रतिष्ठा इत्युक्तप्रलयकालीनलयाश्रयत्वस्य स्फुटस्य जीवोपादानत्वव्याप्यस्य प्रधानव्यावर्तकतया तदनभिधाने न्यूनतापत्तेः, प्रतिज्ञाविरोधादिति सूत्रसत्त्वे च प्रतिज्ञाशब्देन जीवस्य कार्यत्वोपपादनपरभागसामान्यस्य देवताशब्दघटितस्य प्रतिज्ञोपपादकस्य विवक्षितत्वान्न न्यूनतेति ॥

न चैवं–स्वाप्ययादिति व्यर्थं, यत्रैतत्पुरुषस्स्वपिति नामेत्यस्यापि ज्ञानावस्थाद्वारकजीवकार्यत्वोपपादनपरत्वात् प्रतिज्ञाशब्देन तस्यापि सङ्ग्रहादिति–वाच्यम्; प्रधानस्य सच्छब्दार्थत्वेऽपि प्रतिज्ञाविरोधाप्रवृत्तेः, जीवापृथक्सिद्धशरीरोपादानत्वरूपजीवोपादानत्वस्यापि तत्र सत्त्वात् जीवापृथक्सिद्धधर्मभूतज्ञानोपादानत्वमादायैव जीवे प्रतिज्ञोपपादनं कर्तव्यमिति निर्बन्धाभावात् ॥

न च–धर्मभूतज्ञानस्यापि सर्वान्तर्गतत्वात् तदुपादानत्वाभावेऽपि प्रतिज्ञाविरोधो दुर्वार इति–वाच्यम्; धर्मभूतज्ञानस्य विशेषणैकस्वभावत्वेन जीवस्य सत्पदार्थकार्यत्वेन तज्ज्ञानेन जीवस्य ज्ञातत्वेन तद्विशेषणीभूतधर्मभूतज्ञानस्यापि ज्ञाततासम्भवात्, तत्र प्रतिज्ञोपपादनार्थं तत्र कार्यत्वस्यानावश्यकत्वात्; अन्यथा कालेऽपि प्रतिज्ञोपपादनार्थं कार्यत्वस्यावश्यकत्वापत्तेः, कालस्य वस्तुविशेषणतयैव प्रतीतेः; विशेष्यस्य ज्ञातत्वेऽपि विशेषणस्याज्ञातत्वसम्भवात्तत्र प्रतिज्ञोपपादनमावश्यकमिति चेत्, प्रकृतेऽपि तुल्यम्। अतः प्रतिज्ञायाः प्रधानव्यावर्तकत्वायोगात् स्वाप्ययादिति सूत्रं प्रवृत्तं, तच्च प्रधानव्यावर्तकम्। तथा हि–जीवस्य नाशो हि जीवापृथक्सिद्धवस्तुनाशः, न तु जीवस्वरूपनाशः; तस्य नित्यत्वेन नाशाप्रतियोगित्वात्। तादृशापृथ-

त्सिद्धवस्तुनाशोऽपि द्विविधः, शरीरनाशधर्मभूतज्ञाननाशभेदात्; तादृशशरीरनाशरूपजीवनाशस्य शरीरोपादानभूते प्रधाने सम्भवेऽपि धर्मभूतज्ञाननाशात्मकजीवनाशस्य तादृशज्ञानानुपादाने प्रधानेऽसम्भवात्, स्वाप्ययरूपसम्पत्तेः प्रधानव्यावर्तकत्वोपपत्तिः॥

न च–ब्रह्मण्यपि तादृशधर्मभूतज्ञाननाशाश्रयत्वं न सम्भवति, बाह्यपदार्थविषयकत्वरूपजाग्रदवस्थापन्नधर्मभूतज्ञाननाशरूपसुषुप्तेस्तत्पूर्वावस्थापन्नधर्मभूतज्ञानरूपतदुपादान एव सम्भवात् तयोरेव उपादानोपादेयभावादिति–वाच्यम्; उत्पत्तिविनाशौ हि सिद्धान्ते अवस्थाया एव, द्रव्यस्य नित्यत्वाभ्युपगमात्, तादृशमुत्पत्तिमत्त्वं नाशप्रतियोगित्वं चावस्थायामिव तद्विशिष्टेऽपि पर्याप्तं, घटत्वावस्थाया उत्पत्तौ घटत्वावस्था उत्पन्नेतिवत् घट उत्पन्न इति तस्या नाशे सा नष्टेतिवत् घटो नष्ट इति च व्यवहारात्॥ एवं शरीरगतं धर्मभूतज्ञानगतं चोत्पत्तिमत्त्वं नाशप्रतियोगित्वं च तद्विशिष्टे जीवेऽपि पर्याप्तं, शरीरस्योत्पत्तौ नाशे च शरीरमुत्पन्नं नष्टमितिवत् चैत्र उत्पन्नो नष्ट इति व्यवहारात्; 'जीवापेतं वा व किलेदं म्रियते, न जीवो म्रियते' इत्येकादशखण्डे जीवे नाशप्रतियोगित्वव्यवहारस्य शरीरनाशविषयकत्वोपपादनात्; 'यत्रैतत्पुरुषस्स्वपिति नाम, सता सोम्य तदा सम्पन्नो भवति, स्वमपीतो भवति, तस्मादेनं स्वपितीत्याचक्षते' इति अष्टमखण्डे धर्मभूतज्ञानसामान्यनाशरूपसुषुप्तिदशायां जीवे नाशप्रतियोगित्वोक्तेश्च। तथा तादृशजीवे पर्याप्तमुत्पत्तिमत्त्वं नाशप्रतियोगित्वं च तच्छरीरके परमात्मनि पर्याप्तं, परमात्मानं प्रति जीवस्य शरीरत्वात्। अतो जीवशरीरत्वानापन्नद्रव्यनिष्ठावस्थागतोत्पत्तिविनाशप्रतियोगित्वयोश्चावस्थातदाश्रयद्रव्यतच्छरीरकपरमात्मसु पर्याप्तित्रयं, शरीरत्वतद्व्याप्यदेवत्वाद्यवस्थागतोत्पत्तिविनाशप्रतियोगित्वयोश्चावस्थातदाश्रयद्रव्यतच्छरीरकजीवतच्छरीरकपरमात्मसु पर्याप्ति-

चतुष्टयम्। एवं धर्मभूतज्ञाननिष्ठावस्थागतोत्पत्त्यादेरपि पर्याप्तिचतु-ष्टयादिकमित्यग्रे विवेचयिष्यते । एवं च–पूर्वोत्तरावस्थधर्मभूतज्ञान-योरुपादानोपादेयभावस्य तद्विशिष्टजीवयोरुपादानोपादेयभावव्याप्य-त्वात्तादृशजीवयोस्तथात्वस्य तच्छरीरकपरमात्मनोस्तथात्वव्याप्य-त्वाज्जाग्रदवस्थधर्मभूतज्ञाननाशप्रतियोगित्वस्य तादृशज्ञानाश्रयजीव-शरीरकपरमात्मनिष्ठत्वात्तादृशानुयोगिकत्वस्य च तत्पूर्वावस्थज्ञाना-श्रयजीवशरीरकपरमात्मनिष्ठत्वात् स्वाप्ययरूपसत्सम्पत्तेः परमात्मा-नुयोगिकत्वोपपत्तिः; पृथिवीत्वावस्थाजलत्वावस्थादेरुत्पत्तिविनाशवत्त्वेऽपि तदवस्थपृथिव्यादिशरीरकपरमात्मनोरुपादानोपादेयभावस्य अद्भ्यः पृथिवीत्यादिश्रुत्या तादृशपरमात्मनोरेव नाशानुयोगिप्रतियोगिभावस्य च 'पृथिव्यप्सु प्रलीयते' इत्यादिश्रुत्या प्रतिपादनस्य सिद्धान्त-सिद्धत्वात् ॥

एवं च--यत्रैतत्पुरुषस्स्वपितीत्यादेरयमर्थः। एतत्पुरुषः--एष पुरुषः, यत्र--यत्कालावच्छेदेन, स्वपिति नाम--स्वशक्यार्थविशिष्टत्वसम्बन्धेन स्वपितीत्यानुपूर्व्यवच्छिन्ननामवान्; नामपदस्य तद्विशिष्टपरत्वाभावेऽपि निपातत्वेन भेदान्वयसम्भवेन विशिष्टलाभः; तन्नामत्वं च–तन्निष्ठ-शक्तिनिरूपकत्वमेव; आख्यातस्य कर्तरि शक्तेः स्वपितीत्यस्य पुरु-षनामत्वोपपत्तिः, न तु सुबन्तत्वविशेषणघटितं तत्, प्रयोजनाभावा-द्गौरवाच्च । न च वाक्यव्यावृत्त्यर्थं तदावश्यकं; मुक्तानां परमा-गतिरिति वाक्यस्यापि नामत्वाङ्गीकारात् तिङन्तपदसाधारणपदत्व-निवेशेन तद्व्यावृत्तिसम्भवाच्च । 'सता सोम्य तदा सम्पन्नो भवति'– तत्कालावच्छेदेन प्रकृतसदनुयोगिकलयप्रतियोगी भवति; स्वमपीतो भवति–स्वानुयोगिकलयप्रयोजकधर्मवान् भवति, सम्पूर्वकपदिधातो-र्नाशमात्रार्थकत्वादकर्मकत्वं; अपीतेश्च लयप्रयोजकादृष्टादिरूपधर्मा-र्थकत्वात् धात्वर्थतावच्छेदकलयरूपफलाश्रयत्वेन स्वपदार्थस्य कर्मता;

अपीतिधातुसमभिव्याहृतद्वितीयार्थकर्मत्वं च परसमवेतत्वाघटितमिति फलस्य कर्तृगतत्वेऽपि आत्मना आत्मानं वेत्सीत्यादाविव द्वितीया बोध्या; स्वपिति नाम—स्वप्रतियोगिकस्वानुयोगिकलययोस्समानकालिकत्वमुक्त्वा तयोर्वाच्यवाचकभावज्ञापनाय कार्यकारणभावमाह—तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवतीति; स्वप्रतियोगिकस्वानुयोगिकलयप्रयोजकधर्मवत्त्वं स्वपिति नाम प्रवृत्तिनिमित्तमित्यर्थः। अत्र यद्यपि—ष्वप्शय इति स्वपितिधातोर्निष्पन्नः स्वपितिशब्दः, न तु स्वशब्दोपपदादपीतेः; तथाऽप्यशनायादिनिर्वचनवत् इदमर्थवादरूपमुपपद्यत इति द्रष्टव्यम् ॥

अथ—अत्र समभिव्याहृतक्रियाकर्तरि शक्तेन स्वपदेन स्वापकर्तुः पुरुषस्यैव ग्रहणं स्यात्, न तु परमात्मनः; चैत्रस्स्वपुत्रं पश्यतीत्यादौ तथा दर्शनात्; न चेष्टापत्तिः, 'सता सोम्य तदा सम्पन्नो भवति, स्वमपीतो भवति' इति सच्छब्दस्वशब्दयोरेकविषयत्वावश्यम्भावात्—इति चेन्न। पुरुषशब्दस्यापि परमात्मपर्यन्तत्वात्, मनुष्यादिनामरूपाभिमानरागलोभाद्यनुगुणबाहिर्ज्ञानप्रसरवत् जागरितावस्थजीवविशिष्टपरमात्मा देवमनुष्यादिनामरूपरागद्वेषलोभमोहाद्यौपयिकबाह्यान्तराभिमानकालुष्यरहितजीवशरीरकस्सन् आत्मन्यन्तर्भूत इत्यर्थ इति स्वाप्ययसूत्रटीकायां व्याख्यानात् ॥

न च—पुरुषपदस्य ब्रह्मपर्यन्तत्वमयुक्तं, तस्मादेनं स्वपितीत्याचक्षत इत्युपसंहारे लौकिकप्रसिद्ध्यनुवादात् लौकिकानां ब्रह्मणि तत्प्रसिद्धेरभावात्; एवं यत्रैतत्पुरुषः अशेषितानामपिपासितानामित्युक्तपुरुषपदयोर्ब्रह्मपर्यन्तत्वाभावेन वैरूप्यापत्तिश्चेति—वाच्यम्; प्रायपाठानुरोधेनाचक्षत इत्यस्य वैदिकप्रसिद्धिपरत्वात्; 'यत्रैतत्पुरुषोऽशिशिषति नामाप एव तदशितं नयन्ते; तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तदप आचक्षतेऽशनायेति' 'यत्रैतत्पुरुषः पिपासति

नाम तेज एव तत्पीतं नयते, तत्तेज आचष्ट उदन्येति'–इत्यत्राचक्षत इत्यनेन वैदिकप्रसिद्धेरेव विवक्षितत्वात्, लौकिकानां जलतेजसो- रशनायोदन्याव्यवहारविरहात्; अशनेच्छापानेच्छयोरेव तद्व्यवहारात् पुरुषशब्दस्य क्वचिद्विशेषणमात्रपरस्यापि तेजश्शब्दन्यायेन प्रकृते विशिष्टपरत्वे बाधकविरहात् ॥

न च–उत्तरखण्डयोः सर्वाः प्रजास्सति सम्पद्य न विदुस्सति सम्पत्स्यामह इति, सत आगम्य न विदुस्सत आगच्छामह इतीत्यत्र प्रजाशब्दस्य विशिष्टपरत्वाभावात्, अत्रत्यपुरुषपदस्य विशिष्टपरत्वं न युक्तं, सुषुप्तौ सति सम्पत्तेः प्रबोधदशायां सत आगमनस्य च स्वीकारे सति सम्पन्ना वयं सत आगता वयमिति प्रतीतिस्स्यादित्या- शङ्कानिरासाय तयोः खण्डयोः प्रवृत्तत्वात् पूर्वखण्डे पुरुषशरीरक- परमात्मनः सत्सम्पत्त्युक्तौ तत्रैव तादृशापत्तिवारणस्य युक्तत्वेऽपि जीवे तद्वारणानुचितत्वादिति–वाच्यम्; पूर्वखण्डे विशिष्टस्य तत्स- म्पत्त्युक्तावपि विशेषणांशे तादृशाशङ्कानिरासकतया उत्तरखण्डयोः प्रवृत्त्युपपत्तेर्विशिष्टे सत्सम्पत्तेर्विशेषणविशेष्योभयस्मिन् सत्सम्पत्ति- रूपत्वात्, तत्र विशेष्यांशे सर्वज्ञे तादृशप्रतीतिसत्त्वेन तदापादनासम्भ- वात्, विशेषणांश एव तादृशाशङ्काया निरसनीयत्वात्, पुरुषस्स्वपिति न विदुरित्येकवचनबहुवचनाभ्यां पूर्वत्र ब्रह्मपर्यन्ततया उत्तरत्र जीवमात्रपरत्वस्य च स्फोरणात्; यथा वकुलादिनानावृक्षरसानां मध्वन्तर्गतानां अहमस्य वृक्षस्य रस इति ज्ञानं नास्ति, यथा वा समुद्रं प्रविष्टानां गङ्गादीनां अहं गङ्गेत्यादिज्ञानं नास्ति, एवं सति सम्पन्ना वयं सत आगता वयमिति प्रजानां ज्ञानं नास्तीति तादृशखण्डद्वयार्थः; विषयग्राहकत्वावस्थापन्नज्ञानाभाववत्त्व- मुभयत्र साधारणधर्मः, सुषुप्तिकाले चेतनाचेतनयोर्विशेषाभावात्तादृश- ज्ञानसामग्रीसम्भावनाऽपि नास्तीति सूचयितुं जडदृष्टान्तोपादानम् ॥

न च–वकुलादिरसानां गङ्गादीनां च मध्वपूपसमुद्रयोः प्रवेशात् पूर्वमपि तादृशज्ञानाभावस्याविशेषात् प्रवेशानन्तरकालीनत्वस्य ज्ञानाभावे कीर्तनं व्यर्थमिति–वाच्यम्; विषयत्वाश्रयत्वान्यतरसम्बन्धावच्छिन्नप्रतियोगिताकस्य तादृशाकारविवेकसाक्षात्काराभावस्य विवक्षितत्वात् वकुलादिरसानां गङ्गादीनां च मध्वपूपसमुद्रप्रवेशात् प्रागुक्ताकारविवेकसाक्षात्कारविषयतया उक्तान्यतरसम्बन्धावच्छिन्नतादृशाभावविरहात् तादृशाभावलाभाय प्रवेशानन्तरकालीनत्वोक्तेस्सार्थकत्वात् । उक्तान्यतरसम्बन्धघटकविषयता च–कर्मप्रयोज्या ग्राह्या; तेन ईश्वरीयतादृशसाक्षात्कारस्य विषयतया नदीप्रजासु सत्त्वेऽपि न क्षतिः, सति सम्पत्स्याम इत्यादिसाक्षात्कारश्च मुक्तादीनां प्रसिद्ध इति नाप्रसिद्धिशङ्का; अहं वकुलरस इत्यादिसाक्षात्कारश्च भ्रमरादीनां प्रसिद्धः ॥

यद्यपि–भ्रमरादिसाक्षात्कारस्य अहं वकुलरस इत्याकारकत्वं न युज्यते; अयं वकुलरस इत्याकारकदर्शनस्यैव युक्तत्वात् । तथाऽपि अहम्पदस्य लाक्षणिकत्वान्नानुपपत्तिः, अन्यथा अहं वकुलरस इत्यादिसाक्षात्कारस्याप्रसिद्धेर्दुर्वारत्वात् । अत्र 'सति सम्पद्य न विदुः' इत्यादौ सम्पत्त्युत्तरकालीनत्वस्य न वेदनेऽन्वयः, किन्तु वेदनान्विते नञर्थे अभावे; चैत्रो न पचतीत्यादौ पाकाभावे वर्तमानत्वान्वयवत् इयवर्थोत्तरकालीनत्वस्यापि तत्रान्वयोपपत्तेः;

"प्रतिगृह्य तुलां यस्तु प्रायश्चित्तं न चेच्छति ।
अरण्ये निर्जने देशे भवति ब्रह्मराक्षसः ॥"—

इत्यत्र प्रतिग्रहोत्तरकालीनत्वस्य प्रायश्चित्तेच्छाभाव एवान्वयदर्शनात्, तत्रापीच्छायामेव तदन्वये प्रतिग्रहोत्तरकालीनाया इच्छाया अभावस्य प्रतिग्रहविमुखपुरुषसाधारणतया तस्यापि ब्रह्मराक्षसत्वप्रसङ्गात्, तद्वदिहाप्यभावेऽन्वयस्य युक्तत्वात् ॥

एवञ्च—उत्तरखण्डयोः प्रजाशब्दस्य विशिष्टपरत्वाभावेऽपि पुरुषशब्दस्य विशिष्टपरत्वात् निरुक्तस्वाप्ययस्य प्रधानव्यावर्तकत्वोपपत्तिः ॥

यद्वा—प्रायपाठानुरोधात् पुरुषशब्दो विशेषणमात्रपरः, स्वशब्दश्च स्वशरीरकपरः, तस्यात्मीयेऽपि शक्तेः; एवञ्च—परसमवेतत्वघटितकर्मत्वस्य द्वितीयार्थत्वेऽपि नानुपपत्तिः, विशिष्टयोरुपादानोपादेयभावस्य विशेषणविशेष्ययोरुपादानोपादेयभावगर्भत्वस्य न विलक्षणत्वादित्यधिकरणसिद्धतया वक्ष्यमाणत्वात् ब्रह्मनिष्ठजीवलयाश्रयत्वस्यापि विशिष्टोपादानत्वनिर्वाहकत्वप्रधानव्यावर्तकत्वयोरुपपत्तिः। अयमप्यर्थो भाष्यसम्मत एव; सुषुप्त्युत्क्रान्त्योर्भेदेनेति सूत्रे परिष्वञ्जकेन प्राज्ञेन परिष्वज्यमानस्याज्ञस्य जीवस्य भेदप्रतिपादनपरत्वेनाभ्युपगतायाः प्राज्ञेनात्मना सम्परिष्वक्त इति श्रुतेस्समानार्थकत्वस्य 'सता सोम्य तदा सम्पन्नो भवति' इति श्रुतावुक्तत्वात्॥ एवं गतिसामान्यादपि प्रधानव्यावृत्तिसिद्धिः; आत्मा वा इदमेक एवाग्र आसीत्, नान्यत्किञ्चन मिषत्, स ऐक्षत लोकान्नु सृजा—इत्याद्युपनिषदन्तरेषु गौणेक्षणसाहचर्याभावेन आत्मशब्दसत्त्वेन च चेतनपरत्वावश्यम्भावे सति सद्विद्याया अपि तथात्वस्यावश्यकत्वात् ॥

न च—सद्विद्यायाः पुरोवादत्वात् तदनुरोधेनैव इतरकारणवाक्यानां अर्थवर्णनं युक्तं, न त्वितरवाक्यानुरोधेन सद्विद्याया इति—वाच्यम्; कारणत्वानुवादकवाक्यानां कारणत्वांशे कारणत्वविधायकवाक्यानुरोधित्वस्यावश्यकत्वेऽपि कारणगतचेतनत्वाचेतनत्वादिधर्मांशे तदनुरोधित्वस्यानावश्यकत्वात्, सद्विद्याया एव तादृशधर्मविधायकवाक्यानुरोधित्वस्य युक्तत्वात्, यस्य वाक्यस्य यद्धर्मानुवादकत्वं तस्य तद्धर्मांशे तद्धर्मविधायकवाक्यानुरोधित्वमित्येव नियमात्;

आत्मा वा इदमेक एवाग्र आसीदित्यत्र अग्रकालवृत्तित्वविशिष्टैकत्व-विशिष्टेदमर्थे आत्मत्वस्य विधानाङ्गीकारात् ॥

न च—आत्मेत्यस्य विधेयत्वमनुचितं, मुख्यविशेष्यविशेषणतापन्नस्य धर्मितावच्छेदकभिन्नस्यैव विधेयत्वमिति नियमादिति—वाच्यम्; दध्ना जुहोतीत्यादौ विधेयभूतदध्नो मुख्यविशेष्यविशेषणत्वाभावेन प्राङ्मुखोऽन्नानि भुञ्जीतेत्यादौ विधेयभूते धर्मितावच्छेदकभिन्नत्वाभावेन तादृशनियमासिद्धेः; दध्यादिमुख्यप्रकारकमुदीच्यमानत्वबोधमादाय दध्यादौ विधेयत्वोपपादने च प्रकृतेऽपि तथैव विधेयत्वोपपादनसम्भवात्; सिद्धान्ते देवदत्तः पचतीत्यादौ आख्यातार्थमुख्यविशेष्यकदेवदत्तादिप्रकारकाभेदबोधवत् आत्मा वा इदमित्यत्रापि आत्मप्रकारकतादृशबोधाङ्गीकारेण तादृशनियमाङ्गीकारेऽपि बाधकविरहाच्च। सूत्रे गतिपदं बोधपरं, समानविषयकबोधजनकत्वादित्यर्थः ॥ तथा च—सद्विद्यातात्पर्यविषयो बोधो जगत्कारणत्वनिष्ठप्रकारतानिरूपितप्रधाननिष्ठविषयताशून्यः, उपनिषदन्तरतात्पर्यविषयबोधनिष्ठविषयत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयताशून्यत्वात्, विशेषाभावस्य सामान्याभावव्याप्यतायामविवादात् घटसामान्याभावव्याप्यतद्विशेषाभाववद्भूतलस्य दृष्टान्तत्वात् ॥

न केवलमुपनिषदन्तरसाम्यादत्र प्रधानकारणत्वप्रतिपादनाभावः, अस्यामपि छान्दोग्योपनिषदि चेतनस्यैव कारणत्वं स्पष्टमवगम्यत इत्याह 'श्रुतत्वाच्च'; सच्छब्दवाच्ये कारणे 'अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' इति जीवात्मकत्वस्य 'एष आत्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासस्सत्यकामस्सत्यसङ्कल्पः' इति चेतनत्वतद्व्याप्यधर्माणामभिधानात्। तथा अपरिच्छिन्नसुखरूपब्रह्मपदार्थे 'तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानतः, आत्मतः प्राण आत्मत आकाश आत्मतस्तेज आत्मत आविर्भावतिरो-

R Krishnaswami Sastri

भावौ, आत्मतोऽन्नम्' इत्यादिना सर्वकारणत्वोपदेशाच्च, परमात्मन एव कारणत्वस्य स्फुटमवगमाच्च न प्रधानं कारणम् ॥

ननु—अत्र सूत्रे श्रीमति भाष्ये—"तथा च श्रुत्यन्तराणि 'न तस्य कश्चित्पतिरस्ति लोके न चेशिता नैव च तस्य लिङ्गम्' 'स कारणं करणाधिपाधिपः' " इत्यादिभिन्नोपनिषद्गतश्रुतीनामुदाहरणमयुक्तं; तासां गतिसामान्यसूत्रविषयत्वात्—**इति चेत्**;

अत्र टीकाकृतः—

"पूर्वसूत्राभिप्रेतानामेव तत्रानुदाहृतानामिहोदाहरणं, न त्वेतत्सूत्रविषयवाक्यत्वेन, अस्य सूत्रस्य छान्दोग्योपनिषन्मात्रविषयत्वस्य दीपसारयोरप्युक्तेः"— इति वदन्ति ॥

ननु—गतिसामान्यं नाम वेदान्तजन्यबोधविशिष्टान्यबोधजनकत्वं, वैशिष्ट्यं च स्वनिष्ठविषयत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयतावत्त्वसम्बन्धेन; न तूक्तसम्बन्धेन उपनिषदन्तरजन्यबोधविशिष्टान्यबोधजनकत्वं, सङ्कोचे मानाभावात्। एवं च—छान्दोग्यगतदहरविद्याभूमविद्यादिवाक्यानामपि गतिसामान्यसूत्रविषयत्वमेव युक्तम्। न च—इष्टापत्तिः, श्रीभाष्यस्थदहरविद्योदाहरणस्यापि श्वेताश्वतरोपनिषद्वाक्यवत् सामान्यसूत्रविषयत्वसम्भवादिति—वाच्यम्; तथा सति श्रुतत्वाच्चेति सूत्रस्यैव वैयर्थ्यापत्तेः, 'अनेन जीवेनात्मनाऽनुप्रविश्य' 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा' इति चेतनत्वप्रतिपादकवाक्यानां गौणश्चेन्नात्मशब्दादित्यत्रैव उदाहृतत्वात्—**इति चेन्न** ॥ लक्षणाबीजभूतान्वयानुपपत्त्यादेरभावात् ईक्षतिधातोर्न लक्षणा युक्तेत्येतावन्मात्रस्य तत्र विवक्षितत्वेऽपि चेतनवाचकात्मादिपद-

श्रुत्या सच्छब्दार्थस्य चेतनमित्यर्थस्याविवक्षितत्वेन तादृशार्थबोधनाय श्रुतत्वाच्चेति सूत्रोपपत्तिः—इति सर्वमवदातम् ॥

इति

श्रीशेषार्यवंशमुक्ताफलस्य श्रीयादवाद्रिनिवासरसिकस्य

श्रीमदनन्तार्यवर्यस्य कृतिषु

ईक्षत्यधिकरणविचारः.

॥ श्रीः ॥

॥ श्रीः ॥

प्रतिज्ञावादः

श्रीमन्महीशूरमहाराजाधिराजमहास्थानसभाभूषणैः
शेषार्यवंशमुक्ताफलैः श्रीयादवाद्रिनिवासरसिकैः
पण्डितमण्डलीसार्वभौमैः
श्री ॥ उ ॥ म. अ अनन्तार्यवर्यैः
विरचितः ।

विद्वद्वरैः परिशोध्य

म. अ. अनन्तार्येण
प्र. भ. तो. नरसिंहार्येण च
कल्याणपुर-विचारदर्पण--मुद्राक्षरशालायामङ्कयित्वा
प्राकाश्यं नीतः ॥

१८९९.

मूल्यं रू. ०—३—०

॥ श्रीः ॥

प्रतिज्ञावादः

आराध्य वारिधिसुतादयिताङ्घ्रियुग्ममानम्य लक्ष्मणयतीश्वरमादरेण।
तोषाय सर्वविदुषां कुतुकात्प्रतिज्ञावादं सयुक्तिकमनन्तसुधीर्विधत्ते॥

इह खलु–**प्रतिज्ञाविरोधात् प्रतिज्ञाऽहानिरव्यतिरेकादित्यादिषु** प्रतिपादिताया एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया विवेचनाय सद्विद्यावटकः कश्चिदंशो व्याख्यायते॥

पिता तावदुद्दालकस्समस्तवेदवेदाङ्गपारीणं कर्ममीमांसोपचितमनसं श्वेतकेतुं प्रति पुत्रस्नेहेन ब्रह्मोपदिदिक्षुस्तस्य ब्रह्मजिज्ञासामुत्पादयितुमाह–'स्तब्धोस्युत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्'–इति। स्तब्धोऽसि–निर्व्यापारोऽसीत्यर्थः॥

यद्यपि—व्यापारसामान्याभावरूपं निर्व्यापारत्वं श्वेतकेतौ बाधितम्; **तथाऽपि** अलौकिकपुरुषार्थप्रयोजकव्यापारशून्यत्वरूपं स्तब्धत्वमबाधितमिति न दोषः। अलौकिकपुरुषार्थप्रयोजकव्यापारशून्यत्वं च प्रयोज्यतासम्बन्धेन मोक्षसाधनीभूतब्रह्मज्ञानेच्छाविशिष्टव्यापाराभावरूपं ब्रह्मज्ञानेच्छाभावपर्यवसितं, विशेष्याधिकरणनिष्ठविशिष्टाभावस्य विशेषणाभावरूपत्वात्। तथा च–ब्रह्मज्ञानेच्छाभाववान् स्तब्धपदार्थः, असधात्वर्थः प्रमाविषयत्वरूपं सत्त्वं, तदेकदेशप्रमायां ब्रह्मज्ञानेच्छाविरहविशिष्टस्याभेदसम्बन्धावच्छिन्नप्रकारतासम्बन्धेनान्वयादिच्छाविरहविशिष्टनिष्ठाभेदसम्बन्धावच्छिन्नप्रकारताकप्रमाविषयत्वं

—इति बोधः। तादृशेच्छाभावश्च—किं ब्रह्मज्ञानरूपविषयसिद्ध्या, उत तत्रेष्टसाधनताज्ञानविरहात्?—इति सन्देहेन पृच्छति 'उत तमादेशम्' —इत्यादिना ॥

यद्यपि—एतस्य ब्रह्मज्ञानं नास्तीत्युद्दालकस्य निश्चयसत्त्वात्प्रश्नप्रयोजकीभूतसन्देहो नोपपद्यते ; तथाऽपि आहार्यसन्देहेन प्रश्नोपपत्तिः। अत्र—आदेशशब्देन प्रशासिता प्रतिपाद्यते, आङ्पूर्वकदिशधातोः प्रशासने प्रसिद्धेः ; प्रशासनं—चेष्टाप्रयोजकेच्छा, भृत्यमादिशति नियमयतीत्यादौ भृत्यनिष्ठचेष्टाप्रयोजकेच्छाप्रतीतेः। सङ्कोचकमानाभावेन चेष्टासामान्यप्रयोजकेच्छावत्त्वरूपप्रशासितृत्वस्य स्थितिहेतुत्वरूपपालकत्वे पर्यवसानेन शब्दात् स्थितिनिरूपितनिमित्तकारणत्वमात्रलाभेऽपि उक्तादेशशब्दार्थविवरणरूपे उत्तरत्र तत्तेजोऽसृजतेति सृष्टिनिमित्तत्वस्यापि वचनादादेशशब्देन जगत्सृष्ट्यादिकर्तृत्वरूपं तन्निमित्तत्वमजहत्स्वार्थलक्षणया प्रतिपाद्यते। एतदभिप्रायेणैव प्राचां 'आदेशशब्देन जगन्निमित्तमुच्यते' इति व्याख्यासङ्गतिः। तच्छब्देन प्रमाणप्रसिद्धत्वमुच्यते। तथा च—विश्वस्य कर्तेत्यादिप्रमाणप्रसिद्धं विश्वकर्तारमित्यर्थः। प्रमाणजन्यप्रमितिविषयत्वरूपप्रमाणप्रसिद्धत्वस्य आदेशपदार्थे जगत्कर्तृत्वविशिष्टेऽन्वयात्कर्तृत्वेऽपि प्रमाणसिद्धत्वमन्वेतीति प्रमाणप्रतिपन्नकर्तृत्वलाभात्—ईश्वरो न जगत्कर्ता, तदुपादानत्वात्—इत्यनुमानस्यागमेन बाधस्सूचितः। अथवा—जगत्कर्तृत्वस्य नैयायिकादिभिरभ्युपगमात्तदंशे विप्रतिपत्त्यभावसूचनाय तच्छब्दः। 'पृच्छधातोर्द्विकर्मकतया तमाचार्यं जगन्निमित्तकारणं पृष्टवानसीत्यर्थः' —इत्यपि केचित्। न तूत्तरयच्छब्दसमानार्थकोयं तच्छब्दः, तथा सति यच्छब्दस्य प्रक्रान्तादेशत्वावच्छिन्नवाचितया तच्छब्दस्यापि तदर्थकत्वे आदेशपदार्थे तस्यानन्वयापत्तेः, घटो घट इत्यादाविव निराकाङ्क्षत्वात्, प्रक्रान्तवाचियच्छब्दस्थले तच्छब्दापेक्षाविरहाच्च ; "साधु चन्द्र-

मसि पुष्करैः कृतं मीलितं यदभिरामताधिके"–इत्यादौ तच्छब्दं विनाऽपि कृतपदोपस्थापितव्यापारस्याभेदेन मीलानन्वयितया यच्छब्देन बोधनात्। तदुक्तं सद्विद्याविजये–'तमादेशं–प्रसिद्धं नियन्तारं, उत्तरयच्छब्दस्य तच्छब्दनिरपेक्षत्वात् तच्छब्दः प्रसिद्धपरः'–इति ॥

येनाश्रुतमिति ॥ 'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विज्ञातं भवति' इति मैत्रायणीयश्रुत्यनुसारात् उपादानप्रकरणानुगुण्याच्च; येन श्रुतेन अश्रुतं श्रुतं भवति, येन मतेनामतं मतं भवति, येन विज्ञातेनाविज्ञातं विज्ञातं भवतीत्यर्थः । श्रुतेन येनेति तृतीयार्थोऽभेदः, श्रुतपदार्थे शाब्दबोधविशेषविषयेऽन्वेति, उक्तश्रुत्यनुरोधादेव इदं सर्वमित्यप्यध्याहार्यं, परिदृश्यमानस्थूलचिदचिच्छरीरकमिति तस्यार्थः; अश्रुतमित्यस्य स्थूलरूपावच्छिन्नशाब्दज्ञानीयविषयताशून्यमित्यर्थः ; तस्य सर्वपदार्थेऽन्वयात् स्थूलावस्थावच्छिन्नशाब्दज्ञानीयविषयताशून्याभिन्नं प्रत्यक्षविषयस्थूलचिदचिच्छरीरकं ब्रह्म शाब्दबोधीयविषयताविशिष्टजगन्निमित्ताभिन्नसूक्ष्मचिदचिद्वैशिष्ट्याव - च्छिन्नशाब्दबोधीयविषयताश्रयो भवतीति वाक्यार्थः ; श्रुतमित्यस्य सूक्ष्मचिदचिद्विशिष्टत्वेन श्रुतमित्यर्थात् ॥ अत्र–अश्रुतं श्रुतमित्यस्य पूर्वमश्रुतमिदानीं श्रुतमिति नार्थः; विशिष्टवैशिष्ट्यावगाहिबोधे विधेय उद्देश्यतावच्छेदकसमानकालीनत्वभाननियमस्य तिलकी कर्म कुर्वीत इत्यादाविव औत्सर्गिकत्वेन तद्बाधापत्तेः । तादृशनियमभङ्गभयादेव हि–"वर्षं जपन्निदं स्तोत्रमपुत्रः पुत्रवान् भवेत्"–इत्यादावपुत्रपदं पुत्रविरोधिपुत्रेच्छापरं, नञोऽसुर इत्यादाविव विरोध्यर्थकत्वादिति व्याख्यातं नैयायिकैः । एवं च–स्थूलसूक्ष्माचिदचिद्विशिष्टब्रह्मरूपकार्यकारणयोरभेदलाभादादेशपदेन कारणत्वघटितनिमित्तत्वलाभेन कार्याभिन्नत्वे सति कारणत्वरूपमुपादानत्वमुक्तं भवति ॥

न च–येन सर्वमिदं भवतीत्यनेनैव कार्यकारणयोरभेदलाभादश्रुतं

श्रुतमित्यादीनां वैयर्थ्यमिति—वाच्यम् ; कार्याभिन्नत्वे सति कारणत्वरूपोपादानत्वस्य तन्मात्रेण बोधनेऽपि सूक्ष्मचिदचिद्रूपकारणतावच्छेदकावच्छिन्नविषयतानवच्छेदकत्वरूपकारणतावच्छेदकभेदस्य कार्यतावच्छेदके बोधनाय अश्रुतमित्यादिपदानां सार्थक्यात् ; तद्बोधश्च कार्यकारणयोरत्यन्ताभेदे तत्कारकव्यापारवैयर्थ्यमिति नैयायिकाशङ्कापरिहाराय । कारणतावच्छेदककार्यतावच्छेदकयोरुक्तपारिभाषिकभेदबोधने च कार्यतावच्छेदकविशिष्टस्य पूर्वमभावेन तन्निष्पत्तये कारकव्यापारसार्थक्यमिति समाधानसूचनात् । तयोर्वास्तवभेदस्तु श्रुत्या बोधयितुमशक्यः, सूक्ष्मस्थूलचिदचिद्रूपयोस्तयोरवस्थाभेदेऽपि स्वरूपैक्येन भेदाभावात् ; आत्मनि खल्वर इत्यादिमैत्रायणीयश्रुतावपि सप्तम्याः 'दाने कर्णसमः' इत्यादाविव अभेदार्थकत्वात्पूर्वोक्तार्थ एव पर्यवसानम् । एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातमित्यादिभाष्यस्याप्येकपदस्य सूक्ष्मचिदचिच्छरीरकब्रह्मपरतया, सर्वपदस्य स्थूलसर्वशरीरकपरतया, तृतीयाया अभेदार्थकतया च सूक्ष्मचिदचिच्छरीरकब्रह्मज्ञानाभिन्नस्थूलचिदचिच्छरीरकत्वोपलक्षितब्रह्मज्ञानं प्रतिज्ञातमित्यर्थः । तथा च—स्वावच्छिन्नाभिन्नवृत्तित्वस्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्वावच्छिन्ननिरूपितकारणतावच्छेदकत्वैतत्त्रितयसम्बन्धेन धर्मविशिष्टधर्मवत्त्वं एकविज्ञानेन सर्वविज्ञानप्रतिज्ञार्थः । मृत्पिण्डघटादिस्थले घटत्वावच्छिन्नाभिन्नवृत्तित्वस्य घटत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य घटत्वावच्छिन्ननिरूपितकारणतावच्छेदकत्वस्य च मृत्पिण्डत्वे सत्त्वादुक्तत्रितयसम्बन्धेन घटत्वविशिष्टमृत्पिण्डत्वरूपधर्ममादाय वक्ष्यमाणदृष्टान्तत्वसङ्गतिः । दार्ष्टान्तिके च इयं प्रतिज्ञा सूक्ष्मसर्वशरीरकत्वस्थूलसर्वशरीरकत्वरूपधर्मद्वयमादायोपपादनीया। सा च सर्वस्य कार्य-

त्वमन्तरा न निर्वहतीति वियदादेः कार्यत्वोपपादकतया एतदुपादानं सूत्रभाष्ययोरविरुद्धमिति बोध्यम् ॥

अथवा—येनाश्रुतमित्यादेरयमर्थः ॥ श्रुतेन येनेति तृतीयार्थः प्रयोज्यत्वं, श्रुतं भवतीत्यस्य सोपादानकत्वेन श्रुतं भवतीत्यर्थः । तथा च—श्रुतत्वविशिष्टयत्प्रयोज्यत्वरूपतृतीयान्तार्थस्य श्रुतपदार्थैकदेशे सोपादानत्वप्रकारकश्रवणे अन्वयाद्विशिष्टनिरूपितप्रयोज्यत्वस्य विशेषणप्रयोज्यत्वे पर्यवसानस्य 'विशिष्टे विधिनिषेधौ सति विशेष्ये बाधे विशेषणमुपसङ्क्रामतः' इति न्यायसिद्धत्वेन यच्छ्रवणप्रयोज्यं सोपादानकत्वप्रकारकसर्वविशेष्यकश्रवणमित्यर्थः पर्यवस्यति । कार्यविशेष्यकसोपादानकत्वप्रकारकज्ञानजनकज्ञानविषयत्वमुक्तप्रतिज्ञार्थः; कार्यविशेष्यकसोपादानकत्वप्रकारकज्ञाने उपादानज्ञानस्य कारणत्वं विशेषणज्ञानविधयैव; ब्रह्मणि सर्वविशेष्यकसोपादानकत्वप्रकारकज्ञानजनकज्ञानविषयत्वं सर्वस्य ब्रह्मकार्यत्वमन्तरा न निर्वहतीति प्रतिज्ञाऽहानिरव्यतिरेकादित्याद्युपपत्तिः । अत्र कल्पे सर्वपदं सर्वत्वावच्छिन्नपरमेव, न तु सर्वशरीरकपरमिति ॥

एतेन—सर्वपदस्य सर्वशरीरकपरत्वे इदंपदार्थस्य प्रत्यक्षविषयत्वस्य एकदेशे सर्वस्मिन्नन्वयो वाच्यः, स च व्युत्पत्तिविरुद्धः; संयोगावच्छिन्नक्रियारूपगमनपदार्थैकदेशे संयोगे गुणाभेदान्वयतात्पर्येण गमनं गुण इत्यादेर्वारणाय अभेदसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतया शाब्दबोधे मुख्यविशेष्यतया पदजन्योपस्थितेर्हेतुत्वात्—**इति परास्तम्** ॥

सोपादानकत्वं च—स्वापृथक्सिद्धत्वस्वाव्यवहितोत्तरवृत्तित्वोभयसम्बन्धेन किञ्चिद्विशिष्टत्वं । आत्मनि खल्वरे दृष्ट इत्यादौ 'पाथसि पीते तृष्णा शाम्यति' इत्यादिवत् प्रयोज्यत्वं सप्तम्यर्थः; अन्यत्सर्वं पूर्ववत् ॥

अथ—कार्यविशेष्यकसोपादानकत्वप्रकारकज्ञानजनकज्ञानविषयत्वरूपा प्रतिज्ञा कार्यकारणयोरभेदमन्तराऽप्यपृथक्सिद्धिसम्बन्धमात्रान्निर्वहतीति उक्तप्रतिज्ञाया अभेदोपपादकत्वपरारम्भणाधिकरणविरोधः। तथा च आरम्भणाधिकरणभाष्यं "तस्मात्परमकारणाद्ब्रह्मणोऽनन्यत्वं जगत आरम्भणशब्दादिभ्यस्तदुपपादयद्भ्यो ऽवगम्यते" इति--'तस्माद्नातिरिक्तद्रव्यतया तज्ज्ञानेन ज्ञाततेत्यर्थः'- इति च। तस्मादयं कल्पो भाष्यविरुद्धः—**इति चेत्**। **मैवं**। सूक्ष्मचिदचिद्विशिष्टे ब्रह्मणि स्थूलचिदचिद्विशिष्टाभेदो हि स्थूलचिदचिद्वैशिष्ट्यरूपः, भेदाभावस्य प्रतियोगितावच्छेदकत्वरूपत्वात्; स चापृथक्सिद्धिरेव, नैयायिकानां विवादोऽप्यपृथक्सिद्धावेव, तैर्विशिष्टब्रह्माभेदस्य शुद्धब्रह्मणि स्वीकारेण तदंशे विवादायोगात्। तथा चैकविज्ञानेन सर्वविज्ञानप्रतिज्ञानिर्वाहाय सर्वत्र विशिष्टाभेदोपपादनं अपृथक्सिद्ध्युपपादनपरमेवेति न कश्चिद्विरोधः ॥

अत्र कल्पे येनाश्रुतमित्यादौ तृतीया, आत्मनि खल्वर इत्यादौ सप्तमी, एकविज्ञानेन सर्वविज्ञानमिति भाष्यादिकं च स्वरसत एवोपपद्यते ; अश्रुतं श्रुतं भवतीत्यस्य पूर्वमश्रुतमिदानीं श्रुतं भवतीत्यर्थादुद्देश्यतावच्छेदकविधेययोस्समानकालीनत्वाभावात्किञ्चिदस्वरसः परं सोढव्यः ॥

कार्यकारणयोरभेदाभिप्रायमजानानः पृच्छति 'कथं नु भगवस्स आदेशो भवति'—इति। सः—उक्तत्रितयसम्बन्धेन धर्मविशिष्टधर्मवान्; कार्यविशेष्यकसोपादानकत्वप्रकारकज्ञानजनकज्ञान विषयो वा आदेशः, कथं—मदीयजिज्ञासाविषयप्रकारवानित्यर्थः। **गुरुराह**—

"यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यं, यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्याद्वाचारम्भणं विकारो

नामधेयं लोहमित्येव सत्यं, यथा सोम्यैकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं कृष्णायसमित्येव सत्यम्; एवं सोम्य स आदेशो भवति"

—इति ॥

मृत्पिण्डघटादौ उक्तत्रितयसम्बन्धेन धर्मविशिष्टधर्मवत्त्वरूपप्रतिज्ञोपपत्तिः पूर्वमेवोक्ता । द्वितीयकल्पे मृण्मयमित्यस्य स्वापृथक्सिद्धत्वस्वाव्यवहितोत्तरवृत्तित्वोभयसम्बन्धेन मृद्विशिष्टमित्यर्थः । तस्याभेदसम्बन्धावच्छिन्नप्रकारतासम्बन्धेन ज्ञातपदार्थैकदेशे ज्ञानेऽन्वयः; सर्वपदं च यावन्मृदपृथक्सिद्धपरम् । तथा च—घटादिविशेष्यकमृद्विशिष्टप्रकारकज्ञानजनकज्ञानविषयत्वं मृदि सम्भवतीति भावः। रूपभेदान्नामधेयभेदाच्च कार्यकारणयोर्भेदात् दृष्टान्तेऽपि असम्भवशङ्कां परिहरति—वाचारम्भणमिति । वाचा—व्यवहारेण जलाहरणादिकार्येण च, व्यवहारस्य शक्त्या? जलाहरणादेर्लक्षणया च बोधात्, युगपद्वृत्तिद्वयस्य गंगायां घोषमत्स्यावित्यादाविव अविरुद्धत्वात् । तृतीयार्थश्च अध्ययनेन वसतीत्यादाविव प्रयोजकत्वं, घट इत्यादिव्यवहारार्थं जलाहरणादिकार्यार्थं च पृथुबुध्नोदराकारादिर्विकारो घटादिनामधेयं च मृत्पिण्डेनारम्भणं आरभ्यते प्राप्यत इत्यर्थः; कर्मणि ल्युट्, मृत्तिकाद्रव्यमेव घट इति व्यवहारं घट इति नामधेयं शक्तिसम्बन्धेन, जलाहरणादिरूपकार्याय घटत्वावस्थां च अपृथक्सिद्धिसम्बन्धेन प्राप्नोतीत्यर्थः । तत्तदर्थव्यवहारं प्रति तत्तदर्थशक्तपदज्ञानस्य कारणतया घट इत्यादिव्यवहारजनकतावच्छेदकत्वरूपं तत्प्रयोजकत्वं घटपदस्याप्यक्षतम् ॥ न च—शुकाद्युच्चरितश्लोकादिव्यवहारे अध्यापकाद्युच्चरितवेदव्यवहारे च व्यभिचारात् तच्छक्तपदज्ञानत्वेन तदर्थव्यवहारं प्रति हेतुत्वं न सम्भवतीति—वाच्यं; तदर्थबुबोधयिषापूर्वकतदर्थव्यवहारं प्रति तच्छक्तपदज्ञानत्वेन हेतुत्वे

बाधकाभावात्। एवं जलाहरणादिकं प्रति घटत्वावस्थाविशिष्टद्रव्य-त्वेन कारणतया घटत्वावस्थायाः कारणतावच्छेदकत्वरूपं प्रयोज-कत्वमक्षुण्णमिति बोध्यम्॥

कार्यकारणयोरभेदे प्रत्यभिज्ञारूपं प्रमाणमाह--मृत्तिकेत्येवेति। प्रातर्या मृत्तिकेहोपलब्धा सैवेदानीं घटादिरभूदित्यबाधितप्रत्यभिज्ञा दृश्यत इत्यर्थः। मृत्तिकेति--मृत्तिकेत्याकारकप्रत्यभिज्ञानं, सत्यमेव-अबाधितमेव। तथा च-कार्यकारणयोरभेदः प्रत्यभिज्ञारूपप्रमाणसिद्ध इति भावः। प्रतिज्ञावाक्ये जगत्कर्तृत्वरूपं तन्निमित्तत्वमुक्तमपि तदंशे विप्रतिपत्त्यभावात्तत्र दृष्टान्तेन समाधानं नोक्तम्॥ पुन-र्गुरुकुलप्रस्थापनशङ्कयाऽऽह--'न वै नूनं भगवन्तस्त एतदवेदिषुर्य-द्ध्येतदवेदिष्यन् कथं मे नावक्ष्यन्निति भगवांस्त्वेव मे तद्ब्रवी-त्विति'॥

ननु-तेषां ब्रह्मोपदेष्टृत्वाभावे तज्ज्ञानाभावः प्रतिपिपादयिषा-विरहो वा निमित्तमिति तदुपदेष्टृत्वाभावेन तज्ज्ञानाभाव एव कथ-मनुमीयते? यत्र यदुपदेष्टृत्वाभावस्तत्र तज्ज्ञानाभाव इति सामान्य-व्याप्तौ धर्मादिज्ञानवति पुरुषे प्रतिपिपादयिषाविरहेण तदुपदेष्टृत्वा-भावदर्शनेन व्यभिचारादित्यत उक्तं 'मे' इति। स्वीयकुमारेभ्योऽपि निरवधिकव्यामोहविषयाय मे इत्यर्थः। तथा च-ज्ञानार्थं मां प्रति प्रति-पिपादयिषाविरहोऽसिद्ध इति भावः। ब्रवीत्विति-दृष्टान्ते उपादानो-पादेयभावात् ज्ञातता उच्यते, इह तु कथमिति भावः। **गुरुराह**-'तथा सोम्येति होवाच, सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' -इति॥ अग्रे-सृष्टिपूर्वकाले, प्रलय इति यावत्; इदं-प्रत्यक्षविषयस्थूल कार्यशरीरकं ब्रह्म, अद्वितीयं-जगन्निमित्तकारणभूतकर्त्रन्तरनिरपेक्षं, स्ववृत्तिभेदप्रतियोगितानवच्छेदकोभयावृत्तिधर्मवत्तासम्बन्धावच्छिन्न-जगन्निमित्तकारणनिष्ठावच्छेदकताकप्रतियोगिताकभेदाभाववदित्यर्थः।

त्वपदं जगन्निमित्तकारणपरम् । अत्र निमित्तत्वं सर्वकार्यकर्तृत्वरूपं विवक्षितं, तेन न सिद्ध्यसिद्धिभ्यां व्याघातः, तेन न कालादृष्टादिकमादाय वाक्यार्थबाधः। एकं—अविभक्तनामरूपतया कार्यावस्थानिबन्धनबहुत्वशून्यं, सदासीत्—सूक्ष्मचिदचिच्छरीरकाभिन्नमासीदित्यर्थः; तथा च सूक्ष्मचिदचिद्विशिष्टे ब्रह्मणि स्थूलचिदचिद्विशिष्टाभिन्नत्वे सति तत्पूर्वकालवृत्तित्वलाभात्कार्याभिन्नत्वे सति कार्यपूर्वकालवृत्तित्वरूपोपादानत्वमुक्तं भवति। अत्र सच्छब्देन निर्देशस्सत्कार्यवादसूचनाय। मिथ्यावादिमतमनूद्य दूषयति—'तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतस्सज्जायेत, कुतस्तु खलु सोम्यैवं स्यादिति होवाच, कथमसतस्सज्जायेतेति'। तत्—तत्र, इदं—अद्वितीयं कार्यशून्यं, अत एवैकं, सद्विलक्षणं अज्ञानमासीत्; तस्मात्—असतोऽज्ञानात्, प्रातिभासिकात्—व्यावहारिकसत्ताशून्यात्, व्यावहारिकं सज्जायत इत्यर्थः। कथमसतस्सज्जायेतेति—अज्ञानस्यैवासिद्धिः असतस्सदुत्पत्त्यसम्भवश्च विवक्षितौ; सदेव सोम्येदमग्र आसीदिति निगमनगतसच्छब्देन मिथ्यात्वनिरासोऽभिप्रेतः। असदेवेदमग्र आसीदित्यावृत्त्या नैयायिकमतानुवादः, कुतस्तु खलु सोम्येति तन्निरासश्चाभिप्रेत इति प्राचां ग्रन्थेषु स्फुटम्॥

माध्वास्तु—सादृश्यप्राधान्याभ्यां प्रतिज्ञादृष्टान्तौ प्रवृत्तौ। तथा हि—येनाश्रुतं श्रुतं भवतीति। येन—श्रुतेन ब्रह्मणा, अश्रुतं श्रुतं भवति—ब्रह्मणि ज्ञाते तत्सादृश्यात्सर्वं ज्ञातं भवतीत्यर्थः; ब्रह्मज्ञानेन कृत्स्नफलसिद्धेः इतरत्सर्वं ज्ञातप्रायमित्यप्यर्थः। प्रथमे दृष्टान्तमाह यथेति; अत्रापि सादृश्यात् ज्ञानं विवक्षितम्। द्वितीये तत्पूर्वपदावृत्तेन 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्' इत्यनेन दृष्टान्तोपन्यासः; मृदित्येतस्मिन् पदे ज्ञाते सर्वं मृण्मयं मृत्पदापभ्रंशभाषा-

१. (टि) तेन—अद्वितीयपदस्य उक्तरीत्या निर्वचनेन॥

पदानि ज्ञातप्रायाणि, भाषापदानि त्वव्यापकानि, संस्कृतं तु सर्वदेश-व्यापकं; अतस्तत्तद्देशे तेन तेनापभ्रंशेन यो यो व्यवहारो भवति, तस्य सर्वस्यापि संस्कृतेनैव सम्भवादपभ्रंशोऽपि ज्ञातप्राय इत्यर्थः। उक्तार्थमुपपादयति–वाचारम्भणमिति। अपभ्रंशभूतं नामधेयं वाचा आरभ्यते, तस्मादनित्यं, मृत्तिकेति पदं तु नित्यम्। अपभ्रंशः तत्तत्पुरुषवागुपज्ञत्वान्न व्यापकः, संस्कृतपदं त्वपुरुषोपज्ञत्वाद्व्यापक-मित्यर्थः॥ —इति वदन्ति॥

अत्र चिन्त्यते—

सादृश्यरूपसम्बन्धेन सर्वज्ञानजनकज्ञानविषयत्वं उक्तप्रतिज्ञार्थं इति प्रथमः पक्षः; सर्वज्ञानजन्यफलजनकज्ञानविषयत्वमिति द्वितीयः॥ तत्राद्यपक्षे—वस्तुत्वादिघटितसादृश्यमादाय सर्वज्ञानजनकज्ञान-विषयत्वमव्यावर्तकमिति 'उत तमादेशमप्राक्ष्यो येनाश्रुतम्'–इत्यादिना ब्रह्मासाधारणतया तन्निर्देशानुपपत्तिः। भूयो धर्मघटितं चेत्सादृश्यं; तादृशसादृश्यमादाय सर्वज्ञानजनकज्ञानविषयत्वं घटादावेव सम्भवति, न ब्रह्मणि; जगद्ब्रह्मणोरत्यन्तविलक्षणत्वात्; वैसादृश्यादिरूपसम्बन्धा-न्तरमादायापि सर्वज्ञानजनकज्ञानविषयत्वस्य ब्रह्मणि सम्भवेन सादृश्य-मात्रस्य सम्बन्धतयोपपादने निर्बन्धाभावाच्च; एकसम्बन्धिज्ञानस्यापर-सम्बन्धिस्मृतिं प्रति हेतुत्वेऽपि ब्रह्मश्रवणे तत्सादृश्यमात्रादन्येषां श्रवणासम्भवाच्च। श्रुतमित्यादिपदानामपि स्मरणमात्रपरत्वे पौन-रुक्त्यम्॥ द्वितीयपक्षे च–सर्वं श्रुतं भवतीति कोऽर्थः? श्रुतमित्यस्य श्रुतप्रायमित्यर्थ इति चेत् श्रुतप्रायत्वं किमिदं? न तावत् स्वीय-श्रवणादिजन्यफलोपधायकब्रह्मज्ञानकत्वं, ब्रह्मज्ञानेन जायमानस्य फलस्य श्रवणादिजन्यत्वासम्भवेन बाधात्; नापि स्वीयश्रवणादिजन्य-तावच्छेदकावच्छिन्नफलोपधायकब्रह्मज्ञानकत्वं तत्, ब्रह्मज्ञानजगच्छ्र-वणयोरेकधर्मावच्छिन्नं प्रति जनकत्वे परस्परं व्यभिचारेण जन्यता-

वच्छेदकभेदावश्यंकत्वात्। श्रुतादिपदानामुक्तार्थपरत्वे लक्षणाप्रसङ्गश्च स्पष्टः, मृत्पिण्डादिपदानां स्वपरत्वमपि क्लिष्टम्। एवं मृत्पिण्डमृण्मय मृत्तिकाशब्दानां लोहमणिलोहशब्दयोर्नखनिकृन्तनकार्ष्णायसशब्दयोश्च परस्परं व्याघातः। एकेन मृत्पिण्डेन सर्वं मृत्पिण्डमयं विज्ञातं स्यात्। मृत्पिण्डमित्येव सत्यमित्युक्तौ हि भवतामविरोधः। किं च–'वाचारम्भणं विकारो नामधेयं' 'त्रीणि रूपाणीत्येव सत्यम्' इत्यत्रैतादृशार्थासम्भवेन तत्रार्थान्तरस्य वक्तव्यत्वात् तद्वैरूप्यमिहानुपपन्नम्॥ —इति॥

नैयायिकास्तु—येनाश्रुतं श्रुतमिति। श्रुतेन मतेन निदिध्यासितेन ब्रह्मणा सर्वं श्रुतं मतं निदिध्यासितं च स्यादिति शेषः। तथा चात्मतत्त्वज्ञानेन योगजधर्मे जाते तत्तत्पदार्थवृत्त्यसाधारणधर्मांशे निरवच्छिन्नप्रकारताकतावद्विशेष्यकबोधस्सम्भवतीति भावः। एकज्ञानेन कथमन्यज्ञानं, अतो दृष्टान्तमाह–यथा सोम्येति। एकेन मृत्पिण्डेन ज्ञातेन यथा मृदन्तरमपि ज्ञायते परमाण्वादेरप्रत्यक्षत्वात्पिण्डपदं स्थूलपृथिव्यर्थकं, मृत्पदं च पृथिवीपरम्। एकपदं येन धर्मेण तद्व्यक्तिप्रत्यक्षं तद्धर्मप्रकारक एव तद्धर्मावच्छिन्नव्यक्तिमात्रबोधो भवतीति सूचनार्थं, निर्धारणार्थकत्वपर्यवसाने तस्य च सजातीयविषयकत्वेन तथा लाभात्। तेन चक्षुस्संयुक्तघटस्य वस्तुतः पृथिवीत्वेऽपि यदा पृथिवीत्वप्रकारकचाक्षुषं तदा पृथिवीत्वेन सकलपृथिवीग्रहणं, यदा तु घटत्वेन तदा घटत्वेन यावद्घटप्रत्यक्षमिति घटत्वप्रकारकचाक्षुषकाले घटाख्यपृथिवीज्ञानस्य यावत्पृथिव्यविषयकत्वेऽपि न क्षतिः। मृण्मयमित्यत्र मृत्पदं पृथिवीपरं पृथिवीत्वतात्पर्यकं, मयट्प्राचुर्यार्थे। तथा च–पृथिवीत्वजातेरैक्येन सजातीयसंवलनरूपप्राचुर्यबाधेन समवायित्वरूपतदर्थकतया समवायेन यत्र पृथिवीत्वं तेषामेव प्रत्यक्षं न तु कालिकेन पृथिवीत्ववतोऽपि जलादेरिति भावः। चक्षुस्संयुक्त-

व्यक्तौ येन सम्बन्धेन यत्सामान्यं वर्तते तेनैव सम्बन्धेन तत्सामान्यस्य तदाश्रययावद्विशेष्यकत्वप्रकारकप्रत्यक्षहेतुत्वात् ॥

ननु तत्प्रत्यक्षस्य यावद्व्यक्तिविषयकत्वे किं मानमित्यत आह 'वाचारम्भणं विकारः'- इति। वाचा- घटमानयेत्यादिवाक्येन, आरम्भणं-प्रवृत्तिरूपो विकारो भवति, दृश्यते हि घटमानयेत्यादिवाक्या-त्तदानयने चेष्टा, तया च प्रवृत्तिः, तया च तदानयनेच्छा, तया च तदनुकूलं ज्ञानमाक्षिप्यते । तच्च शाब्दमेव; मानान्तरस्य तदानीमनुपस्थितेः। न च तच्छक्तिग्रहं विना स च तदानीं तदुपाया-भावेन कालान्तरीयशक्तिग्रहकारित एवेति। अत एव विकार इति फलविवक्षणं कार्येण स्वाकाङ्क्षितकारणपरम्पराक्षेपलाभार्थं सङ्गच्छते॥ ननु तत्र शक्तिभ्रमादेव शाब्दबोधसम्भवात्, अत आह–नामधेयं मृत्ति-केत्येव सत्यमिति । मृत्तिकेत्येव नामधेयं सत्यं, न पुनस्तद्विषयक-शक्तिग्रहः प्रमा–इत्यत्र विवादः। तथा च घटत्वादेरविशेषाच्छक्तिग्रह-विषयीभूतव्यक्तिविषयकशाब्दस्येवास्यापि प्रमात्वे बाधकाभावाच्छ-क्तिग्रहस्यैतद्विषयकत्वं सिद्धम् । तथा च–एतद्घटविषयकशाब्द-बोधस्स्वविषयविषयकशक्तिग्रहमूलकः, घटविषयकशाब्दत्वात्, तद्घट-शाब्दवत्–इत्यनुमानेन शक्तिग्रहसिद्धौ च औत्सर्गिकत्वाल्लाघवाच्च प्रमात्वमेव तस्येति । तथा च–यथा सामान्यलक्षणया एकघटादि-ज्ञानात्सर्वघटादिज्ञानं, तथा आत्मतत्त्वज्ञानाद्योगजधर्मद्वारा सार्वज्ञ्यम्। सामान्यलक्षणानङ्गीकारे एकघटव्यक्तिज्ञानेनापि व्यक्त्यन्तरबोध-सम्भवः, समानप्रकारकत्वस्यैव नियामकत्वात्, एकघटज्ञानस्य यावद्विषयकत्वेऽपि संशयनिवृत्त्यादिरूपफलसाम्यात् । एतत्पक्षे मृत्तिकेति नामधेयमन्यव्यक्तेरिति । अत एकघटे घटत्वप्रकारेण शक्तिग्रहाद्घटान्तरबोध उपपन्नः । एवमुत्तरवाक्यद्वयेऽपि लोहमणिपदं सुवर्णार्थकं, नखनिकृन्तनपदमयस्सामान्यपरम्— इत्याहुः ॥

तन्न। सामान्यप्रत्यासत्तेर्योगजधर्मस्य च प्रत्यक्षे कारणत्वेऽपि शाब्दबोधानुमितिरूपयोश्श्रवणमननयोरकारणत्वात्, येनाश्रुतमित्याद्यसङ्गतेः, श्रुतमतादिपदानां प्रत्यक्षपरत्वे च पौनरुक्त्यादिति ॥

शाङ्करास्तु—

येनाश्रुतं श्रुतमिति सामानाधिकरण्यं बाधपरम्। अश्रुतं—अन्यत्सर्वं यदभिन्नश्रुतं, तद्रूपव्यतिरेकेण नास्तीत्यर्थः। तथा चैकं सर्वस्याधिष्ठानमित्यर्थः प्रतिज्ञातः। तत्र मृत्पिण्डव्यतिरेकेण तद्विकारो यथा नास्तीति दृष्टान्ता यथासोम्येत्यादिना प्रतिपाद्यन्ते । मृत्पिण्डपदं च मुख्यार्थैकपदयोगात् भूमिरूपपिण्डार्थकं, पिण्डपदं च स्थौल्यबोधकं मृण्मयमात्रेऽप्युपादानत्वयोग्यतालाभाय, मृण्मयपदं च भूमिविकारमात्रार्थकम्। तथा च भूमिविकारस्सर्वो यथा भूमिं विना नास्तीत्यर्थः। भूमिविकारत्वं च साक्षादेव वृक्षादावक्षतमिति भूमेर्विभक्तपिण्डस्य नानाविकारानुपादानत्वेऽपि न क्षतिः ॥ यद्यपि—भूमिर्नोपादानं, वेदान्तिनां ब्रह्मण एवोपादानत्वात्; तथाऽपि—अधिष्ठानतावच्छेदकशुक्त्यादिव्यतिरेकेण रूप्यादि नास्तीत्यादिव्यवहाराद्भूमिविकारादिस्वरूपदशायामाधारतावच्छेदकभूम्यादिव्यतिरेकेण नास्तीति श्रुत्या तथोक्तं सर्वं मृण्मयं एकमृत्पिण्डाभिन्नविज्ञातस्वरूपमित्यपि बाधायां सामानाधिकरण्यम्। तत्र हेतुर्मृत्तिकेत्येव सत्यमिति। मृत्तिका भूमिरिति गृह्यमाणं चिदेव सत्यं, मृत्तिकास्वरूपस्य सत्यत्वाभावात्। तदवच्छिन्नचिद्रूपस्य दृष्टान्तत्वधीदशायां मृदो विविच्याज्ञानाद्भूमित्वेन ज्ञायमानत्वविरहेण चिद्रूपलाभार्थमितिशब्दः, मनो ब्रह्मेत्युपासीतेत्यादौ ज्ञायमानत्वस्येतिशब्दार्थत्वात्। आद्यर्थको वा इतिशब्दः, 'इति हेतुप्रकरणप्रकारादिसमाप्तिषु' इति कोशात्। तथा च भूमिविकारस्य विचारदशायां तत्स्वरूपमिव भूमिस्वरूपविचारदशायां तत्कारणान्यपञ्चीकृतभूतान्येव सत्यानि ; तेषामपि स्वरूपविचारदशायां तान्यपि मिथ्या। तत्कारणान्येव सत्यमित्य-

र्थलाभः, न त्वनिकृन्तनपदं चायस्सामान्यपरं, लोहमणिपदमपि सुवर्णार्थकं, तद्विशेषणमेकपदं चैकजातीयार्थकं, तदुपादानं च सर्वत्र एकजातीयत्वेन उपादानत्वसम्भवलाभाय, इतिशब्दस्तु तत्राप्युक्तरीत्या व्याख्येयः। मृत्तिकेत्येव सत्यमित्यादौ हेतुर्वाचारम्भणं विकारो नामधेयमिति । आरम्भणं—समवायिकारणजन्यं, उत्पत्तिः; वाचा वाङ्मात्रं, विचारासहमिति यावत् । तथा चोत्पत्तेस्सदसद्वेति निरूपयितुमशक्यतया उत्पन्नसामान्यं विचारासहमित्यर्थः । तथाऽप्यनाद्यविद्यादिसाधारण्येन हेत्वलाभादाह—विकारोनामधेयमिति, नाशादिविकृतियुक्तं नाममात्रं विचारासहमिति यावत्। अर्थे नामाभेदासम्भवादम्भक्ष इत्यादाविव मात्रार्थान्तर्भावेन विचारासहत्वलाभः । तथा च—उत्पत्त्यादिविकृतेस्तद्युक्तस्य संसर्गदुर्निरूपत्वादिना विचारासहत्वान्मिथ्यात्वमिति निर्विकारं ब्रह्मैव सत्यमिति दृष्टान्तोपपादकत्वेनोक्तमपि दार्ष्टान्तिकस्याप्युपपादकमिति भावः । एकमेवेति—एकपदेन सजातीयजीवादिभेदनिषेधः ; तस्य स्वान्यशून्यत्वरूपकैवल्यार्थकत्वेऽपि भेदनिषेधकपदान्तरोपादानाद्गोबलीवर्दन्यायेन स्वान्येत्यस्य जीवेश्वरादिरूपस्वान्यपरत्वावधारणात्। एवकारस्यापि प्रकृते शून्यविशेषणीभूतस्वगतभेदनिषेधबोधकत्वम्; अद्वितीयपदेन बहुव्रीहिसमासेन विजातीयद्वित्वावच्छिन्ननिषेधात्तादृशाद्वितीयस्य भेदनिषेधः । तदुक्तम्—

> "वृक्षस्य स्वगतो भेदो यत्र पुष्पफलादितः ।
> वृक्षान्तरात्सजातीयो विजातीयश्शिलादितः ॥
> तथा सद्वस्तुनो भेदत्रयं प्राप्तं निवार्यते ।
> एकावधारणद्वैतप्रतिषेधैस्त्रिभिः क्रमात् ॥" —इति ॥

अद्वितीयपदस्यैव सजातीयभेदनिषेधकत्वे इतरपदद्वयं भेदान्तरनिषेधकम् । अथवा—अद्वितीयपदं भेदत्रयनिषेधकम्, एकादिपदद्वयं सङ्कोचशङ्कापरिहारकम् ॥ —इति वदन्ति ॥

अत्रेदं चिन्त्यम्—

येनाश्रुतं श्रुतमित्यादौ ब्रह्मव्यतिरेकेण प्रपञ्चाभावबोधनाय बाधायां सामानाधिकरण्यं चेद्विवक्षितं, तदा स्थाणुः पुमानित्यादाविवाभेदबोधमात्रेण कृतकृत्यतया यत्पदोत्तरतृतीयाया अभेदार्थकतया अश्रुतं सर्वं यदभिन्नमित्यर्थसम्भवेन श्रुतपदं व्यर्थम् । सामानाधिकरण्यस्य बाधार्थत्वं च लक्षणां विना न सम्भवति; नीलो घट इत्यादौ नीलाभेदबोधेऽपि तद्व्यतिरेकेण तदभावाप्रतीतेः । एवं मृत्पिण्डव्यतिरेकेण तद्विकारो यथा नास्तीति यथा सोम्येत्यादेरर्थोऽपि न; सम्प्रतिपन्नार्थस्यैव दृष्टान्तत्वाद्वक्ष्यदुक्तार्थस्य श्वेतकेतुं प्रत्यसिद्धत्वात्। अन्यथा उपदेशवैयर्थ्यात्, दृष्टान्तानुसारेणैव प्रतिज्ञाया नेयत्वात् । मृत्पिण्डपदव्याख्यानं चायुक्तम् । भूमिर्हि—महापृथिवी वा तज्जातीयमात्रं वा? नाद्यः, अन्त्यावयवित्वेन तद्विकाराप्रसिद्धेः; नान्त्यः, एकशब्दस्य मुख्यार्थत्वविरोधात्, परानुपादानपृथिव्यपेक्षया परोपादानपृथिव्याः मुख्यत्वे मानाभावात् । मृण्मयांशोपादानत्वयोग्यत्वमपि पिण्डपदव्यतिरेकेणापि सिद्धमेव, पृथिवीत्वस्य तद्योग्यतावच्छेदकत्वे अस्थूलपृथिव्यामपि तत्सत्त्वात्, कपालत्वादेस्तथात्वे अस्थूलपृथिवीत्वावच्छेदेन तदभावात्। मयटो विकारार्थत्वमपि न सत्; मयड्वैतयोर्भाषायामित्यत्र भाषायामित्युपादानसामर्थ्येन छन्दसि विकारे मयटो दुर्लभत्वात्; आनन्दमयाधिकरणे विकारे मयडित्यानन्दमयशब्दव्याख्यानस्य शङ्कराचार्यकृतस्य मनोरमाकृता 'नित्यं वृद्धशरादिभ्यः' इत्यत्र भाषायामित्यनुवृत्तौ मानाभावाच्छरादित्वात् आनन्दमय इत्यत्र विकारे मयडिति समर्थनात् ॥

किंच—भूमिविकारस्सर्वो यथा भूमिं विना नास्तीति दृष्टान्तस्य सर्वस्यैकाधिष्ठानमिति प्रतिज्ञया कथमुपपत्तिः? जलादिविकारेषु जलादेरेवाधिष्ठानत्वपर्यवसानात्, भूमिविकारेषु भूमेरधिष्ठानत्वोक्तेर्ब्रह्मैव

सर्वाधिष्ठानमिति प्रतिज्ञाविरुद्धत्वाच्च; भूम्यवच्छिन्नचैतन्यस्य अधिष्ठानत्वेऽपि अधिष्ठानज्ञानेन तज्ज्ञानकार्यविलयापत्तेः ॥

एतेन—यद्यपि भूमिर्नाधिष्ठानमित्यादिकं—निरस्तम्। अधिष्ठानतावच्छेदकशुक्त्यादिव्यतिरेकेण रूप्यादिविरहस्य कथंचित्प्रसिद्धावपि अधिष्ठानतावच्छेदकभूम्यादिव्यतिरेकेण तद्विकारासत्त्वस्यानिश्चयात्। मृत्तिकेति गृह्यमाणं चिदेव सत्यमित्यपि न; मृत्तिकात्वप्रकारकज्ञानविषयत्वस्य मृत्तिकायामेव सम्भवेन मृत्तिकास्वरूपस्य सत्यत्वानाक्षेपात्तादृशरूपेण चिद्रूपं भासत इति भवतां कल्पनस्याप्रामाणिकत्वात्। इतिशब्दो ज्ञायमानत्वार्थक इत्यपि न; ज्ञानार्थकधातुयोगे 'मनो ब्रह्मेत्युपासीत' 'क्रमादमुं नारद इत्यबोधि सः'—इत्यादाविति शब्दस्य स्वपूर्ववृत्तिपदजन्यबोधप्रकारप्रकारकत्वपरत्वात्, ज्ञायमानत्वार्थकत्वे मानाभावात् ॥

यदपि—मृत्तिकेत्येव सत्यमित्यादौ हेतुर्वाचारम्भणं इत्यादि—इति; तन्न। हेतुपूर्वमेव साध्यनिर्देशस्यौत्सर्गिकत्वात्प्रथमं हेतुनिर्देशस्यानाकाङ्क्षितत्वात् ॥

यत्तु—अनादिसाधारण्येन मिथ्यात्वलाभार्थं विकारो नामधेयमिति—इति; तच्चिन्त्यम्। तेनैव हेतुना दृश्यसामान्यमिथ्यात्वसिद्धौ वाचारम्भणमित्यस्य उत्पत्तिमद्दृश्यमिथ्यात्वबोधकत्वेन भवद्व्याख्यानस्य वैयर्थ्यात्, गोबलीवर्दन्यायस्य च अगतिकगतित्वात् ॥ वाचेत्यत्र 'वष्टि भागुरिः'; इति टाप्सम्भवेऽपि आकारांशस्य प्रयोजनाभावात्; अस्मन्मते तृतीयान्ततया सार्थक्यात्; वाचेत्यादौ मात्रार्थानभावेऽपि लक्षणाप्रसक्तेः। अब्भक्ष इत्यादिवत्तत्कल्पकाभावाच्च ॥

एतेन—यो विकारस्सः, वाचारम्भणं—वागालम्बनं, व्यावहारिकमित्यर्थः; नामधेयं—नाममात्रं, नार्थः—**इत्यपि निरस्तम्। ब्रह्मज्ञाना**न्यज्ञानाबाध्यत्वे सति बाध्यत्वं व्यावहारिकत्वं; न नु **वाग्विषयत्वं**;

प्रातिभासिकादावपि सत्त्वात् । अतो वाचारम्भणमित्यनेन न व्यावहारिकत्वलाभः । अत्र कल्पे नामधेयग्रहणं च व्यर्थं, वाचारम्भणमित्यनेनैव मिथ्यात्वलाभात् ॥

एकमेवाद्वितीयमिति श्रुत्यर्थवर्णनमपि न सत्; सजातीयविजातीयप्रतियोगिकभेदवत्तद्धर्मप्रतियोगिकभेदान्तराणामपि सम्भवेन भेदमात्रे निषेधनिश्चयायोगात्, तद्धर्मभेदानामपि सजातीयभेदादावन्तर्भावे स्वगतभेदस्याप्यन्तर्भावसम्भवात् । किं च एवकारेण भेदनिषेधोऽपि वक्तुमशक्यः; एकशब्दसमभिव्याहृतैवकारस्य विशेषणसङ्गतत्वेन शङ्खः पाण्डर एवेत्यादाविव विशेषणायोगव्यवच्छेदकत्वात्, सदेवेत्यत्र एवकारसत्त्वेन विशेष्ये एतदन्वयकल्पनासम्भवात् ॥ किं च—स्वान्यशून्यं ब्रह्मेत्युक्तौ कथं तद्भेदनिषेधः? न च—विशेषणेऽपि निषेधान्वयात्तल्लाभ इति—वाच्यम्; विशेष्यबाधस्थल एव तथात्वात्; सविशेषणे हीति न्यायस्य बाधघटितत्वात् । एवं विजातीयभेदनिषेधेनैव स्वगतभेदनिषेधस्य स्वस्मिन् सिद्धतया वैयर्थ्याच्च ॥ तस्मादद्वैतमतमसङ्गतमिति—दिक् ॥

॥ श्रीः ॥

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

इति
श्रीशेषार्यवंशमुक्ताफलस्य श्रीयादवाद्रिनिवासरसिकस्य
श्रीमदनन्तार्यवर्यस्य कृतिषु
प्रतिज्ञावादः
समाप्तः ॥

॥ श्रीः ॥

आकाशाधिकरणविचारः

श्रीमन्महीशूरमहाराजाधिराजमहास्थानसभाभूषणैः
शेषार्यवंशमुक्ताफलैः श्रीयादवाद्रिनिवासरसिकैः
पण्डितमण्डलीसार्वभौमैः
श्री ॥ उ ॥ म. अ. अनन्तार्यवर्यैः
विरचितः ।

विद्वद्वरैः परिशोध्य

म. अ. अनन्तार्येण
प्र. भ. तो. नरसिंहार्येण च

कल्याणपुर-विचारदर्पण-मुद्राक्षरशालायामङ्कयित्वा
प्राकाश्यं नीतः ॥

१८९९.

मूल्यं रू. ० — ८ — ०

॥ श्रीः ॥

आकाशाधिकरणवादः

कलशाब्धिकन्यकायाः पतिं यतीन्द्रं च सादरं नत्वा ।
आकाशनयविचारं तनुते कुतुकादनन्तार्यः ॥

सदेव सोम्येदमग्र आसीदित्यादिकारणवाक्यप्रतिपाद्यमचेतनभिन्नं, ईक्षणवत्त्वात्, चैत्रादिवत्; तत् जीवभिन्नम्, आनन्दविशेषवत्त्वात्, व्यतिरेकेण जीववत्—इत्यनुमानाभ्यां कारणस्य चिदचिद्विलक्षणत्वमी-क्षत्यधिकरणानन्दमयाधिकरणयोः स्थापितम् ॥

यदि च—अन्वयव्यतिरेकिपरामर्शयोः स्वाव्यवहितोत्तरानुमितिं प्रति हेतुत्वस्वीकारे गौरवात् सर्वत्रान्वयव्याप्तिज्ञानादेवानुमितिः स्वीक्रियते, पृथिवी इतरेभ्यो भिद्यते, गन्धवत्त्वादित्यादावपि पक्षैक-देशे घटादौ साध्यनिरूपितान्वयव्याप्तिग्रहसम्भवात्, गन्धादिलक्षणस्य इतरभेदानुमापकत्वरूपव्यावर्तकत्वसम्भवात्। न्यायमतेऽपि विशेषण-ज्ञानाभावेन पृथिव्यामितरभेद इति साध्यविशेष्यकानुमितिस्वीकारेण विशेषणविशेष्यभावव्यत्यासावश्यकत्वादिति—यामुनादिसिद्धान्तरी-तिराद्रियते; **तदा**—जीवो जगत्कारणनिष्ठभेदप्रतियोगी, आनन्द-विशेषाभावात्—इत्यनुमानमेवानन्दमयाधिकरणसिद्धम् । सूचितं चेदं नेतरोऽनुपपत्तेरितिसूत्रेण ॥

न्यायपरिशुद्धावपि—ननु यदि केवलव्यतिरेकि न प्रमाणं, लक्षणं किमपि न स्यात्, तस्य तदात्मकत्वात्—इत्याशङ्क्य : शरीरमाप्यादिकं न भवति, गन्धवत्त्वात्, घटवदिति-पृथिवीविशेषे

इतरभेदसाधनात् लक्षणत्वम् । ननु—अनेकव्यक्तिसङ्ग्राहकलक्षणे तथा स्यात्, एकव्यक्तिलक्षणे तु कथम्? यथा आकाशादेश्शब्दमात्रवत्त्वादौ—इति चेन्न; आकाशादिशब्दानामपि जातिशब्दत्वात्, कल्पभेदात् बहवो ह्याकाशादयः। ननु—अस्तु तथा तेष्वपि, ईश्वरादिलक्षणं तु कथं? न हीश्वरस्य कल्पभेदात् भेदोऽस्तीति? सत्यं; ब्रह्मादयो नेश्वराः, सकलजगत्सृष्ट्याद्यकारणत्वात्, घटवत्; कालो न प्रकृतिः, महदादिविकाररहितत्वात्, चेतनवत्; त्रिगुणं कालातिरिक्तं, कालविकाररहितत्वात्, चेतनवत्—इति सर्वत्राप्यन्वयित्वमेव—इति समाहितम् ॥ विस्तृतं चैतत् केवलव्यतिरेकिभङ्गवादे ॥

तत्रानन्दमयाधिकरणाभिप्रेतानुमानस्य—कारणं जीवः, शरीरवत्त्वात्, चैत्रादिवदित्यनुमानेन बाधशङ्कायां अप्राकृतसाधारणशरीरवत्त्वस्य हेतुत्वे भगवति व्यभिचारः, प्राकृतशरीरवत्त्वस्यापि जगच्छरीरके तस्मिन् व्यभिचारः। स्वजनककर्मवत्तासम्बन्धेन शरीरत्वस्य हेतुत्वे चासिद्धिः। 'स एष सर्वेभ्यः पाप्मभ्य उदितः' इतिश्रुत्या तत्र कर्मसामान्याभावबोधनात् । तत्रत्यपाप्मशब्दस्य 'न सुकृतं दुष्कृतं सर्वे पाप्मानोऽतो निवर्तन्ते' इतिश्रुत्याऽनिष्टफलजनकत्वावच्छिन्ने शक्त्या तेन पुण्यपापोभयबोधनात्, स्वर्गादिरूपस्य पुण्यफलस्य मुमुक्षुं प्रति अनिष्टत्वात्—इति परिहाराभिप्रायेणान्तराधिकरणं प्रवृत्तम् । ततश्च प्रथमानुमानस्य ईक्षत्यधिकरणोक्तस्याकाशादिश्रुत्या बाधः—इत्याशङ्क्य परिहरति—आकाशाद्यधिकरणत्रयेण ॥

यद्यपि—प्रथमानुमानबाधनिरासकस्याकाशाद्यधिकरणत्रयस्य प्रथमानुमानप्रतिपादकेक्षत्यधिकरणानन्तर्यमेव युक्तम्; न त्वन्तराधिकरणानन्तर्यम्। तथाऽपि—ईक्षत्यधिकरणेनाचेतनसामान्यभेदसाधनानन्तरं चेतनसामान्यभेदसाधनस्य साम्येन बुद्धिस्थतया तदनन्तरमानन्दमयाधिकरणप्रवृत्तिस्तत्र च चेतनभेदसाधनानुमाने बाधशङ्कानिरासका

न्तरधिकरणप्रवृत्तावनन्तरमचेतनभेदसाधनानुमाने श्रुत्या बाधशङ्का-निरासकस्याकाशाधिकरणादेर्बाधनिरासकत्वसाम्यात् अवतारो युक्तः। नैयायिकनये हेत्वभावतद्व्याप्यवत्पक्षयोरसिद्धित्वस्येव सिद्धान्ते साध्याभावतद्व्याप्यवत्पक्षयोरपि बाधत्वस्वीकारेण अन्तरधिकरणपूर्वपक्षोक्तस्य जीवत्वव्याप्यशरीरवत्त्वस्यापि बाधत्वोपपत्तेः; नैयायिकैरपि—बाधसत्प्रतिपक्षभिन्ना ये हेत्वाभासास्तद्व्याप्या अपि तन्मध्य एवान्तर्भवन्ति, बाधव्याप्यस्सत्प्रतिपक्षः पृथक्, स्वतन्त्रेच्छेन मुनिना पृथगुपदेशादिति सत्प्रतिपक्षस्य बाधान्तर्भावे युक्तेऽपि मुनिवचनबलात् पार्थक्यम्—इत्युक्तत्वात्। अन्तरधिकरणस्य बाधनिरासकत्वमेव, बाधत्वं चानुज्ञायकत्वाघटितमेव। अतस्साध्याभावव्याप्यवत्पक्षस्य बाधत्वोपपत्तिः॥

नन्वेवमपि—जीवत्वव्याप्यशरीरवत्कारणस्य बाधत्वं नोपपद्यते; सिद्धान्ते तत्तदभावव्याप्यवत्ताज्ञानयोः संवलनदशायां संशयाकारानुमितेस्स्वीकारेण तदभावव्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वासम्भवात्, वह्न्यभावव्याप्यवत्ताज्ञानमात्रकाले वह्निपरामर्शाभावादेव अनुमित्यनुत्पत्त्या तदभावव्याप्यवत्ताज्ञानस्य तद्दशायामपि प्रतिबन्धकत्वानावश्यकत्वात्। न्यायपरिशुद्धौ साधारणधर्मविप्रतिपत्तिभ्यामेव संशय इति संशयकारणं प्रतिज्ञायागृह्यमाणबाधतारतम्यविरुद्धानेकज्ञापकोपस्थापनमिह विप्रतिपत्तिः। सा च सजातीयविजातीयाभासरूपद्विचतुरादिज्ञापकभेदात् बहुप्रकारा। प्रत्यक्षतदाभासविप्रतिपत्तेस्संशयो यथा—चक्षुषा समुखं प्रतिभाति दर्पणतलं, स्पर्शनेन त्वन्यथा; किमिदं समुखं दुर्मुखं वेति। अनुमानतदाभासविप्रतिपत्तेस्संशयो यथा—धूमवत्त्वात् पर्वतो वह्निमान्, निरालोकत्वात् अनग्निः, इत्यत्र साग्निरनग्निर्वेति सत्प्रतिपक्षस्थले संशयाकारानुमितेरुक्तत्वात्—**इति चेन्न**। वह्न्यभावव्याप्यवत्पक्षस्य बाधत्वं सत्प्रतिपक्षत्वं च विद्यते; परामर्शद्वयसंवलनदशायां तदभावव्याप्यवत्ताज्ञाने प्रामाण्य-

ग्रहे वह्न्यनुमितिप्रतिबन्धात्तद्दशायां बाधत्वमेव, उभयत्र प्रामाण्य-ग्रहादिरूपतारतम्याभावे संशयाकारानुमित्युत्पत्त्या तद्दशायां सत्प्रतिपक्षत्वमेवेत्यङ्गीकारात् ॥

अत एव शतदूषण्यां—सत्यादिवाक्यमखण्डार्थं, समानाधिकरणवाक्यत्वात्, लक्षणवाक्यत्वादित्यनुमानयोः— विगीतं वाक्यं विशिष्टार्थपरं, वाक्यत्वात्, व्यधिकरणवाक्यवत्—इत्यनुमानेन बाधस्सत्प्रतिपक्षश्चोक्तः ॥ इदं चानुमानं–"सर्वप्रतीत्यनुगुणत्वात् विशेषणक्लेशरहितत्वाच्चाधिकबलमेवेत्यनेन पूर्वयोर्बाधः प्रतिरोधो वेति समानाधिकरणत्वं लक्षणप्रतिपादकत्वं च अधिकमिति तद्विशेषणराहित्यमेवाधिकबलम्"–इति चण्डमारुते व्याख्यातम् ॥

एवं च–य एषोऽन्तरादित्य इति वाक्ये शरीरवत्त्वसर्वपापोदितत्वाभ्यां जीवपरलिङ्गाभ्यां कारणं जीवस्तद्भिन्नो वेति सन्देहे शरीररूपलिङ्गस्यासञ्जातविरोधितया प्राबल्यात्, आनन्दमयो जीवभिन्नः, शतगुणितोत्तरक्रमेणाभ्यस्यमाननिरतिशयदशापन्नानन्दवत्त्वात्–इत्यनुमानस्थहेत्वपेक्षया शरीरवत्त्वस्य लघुत्वेन प्राबल्याच्च जगत्कारणं जीवः, शरीरवत्त्वादित्यनेन बाधो युक्त इति बाधवारकान्तराधिकरणानन्तर्यमाकाशाधिकरणस्य युक्तम् ॥

आकाशस्तल्लिङ्गात् । **छान्दोग्ये श्रूयते**—"अस्य लोकस्य का गतिरिति, आकाश इति होवाच, सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते, आकाशं प्रत्यस्तं यन्ति, आकाशो ह्येवैभ्यो ज्यायान्, आकाशः परायणं स एष परोवरीयानुद्गीथस्स एषोऽनन्तः परोवरीयो हास्य जीवनं भवति परोवरीयसो ह लोकान् जयति, य एतदेवं विद्वान् परोवरीयांसमुद्गीथमुपास्ते ॥" —इति ॥

अत्रोत्कृष्टजीवनादिजनकोपासनीयोद्गीथनिष्ठविशेष्यतानिरूपिताभेदसम्बन्धावच्छिन्नप्रकारताश्रयः परोवरीयस्त्वविशिष्टाकाशः प्रतिपन्नः। परोवरीयांसमुद्गीथमित्यनयोस्समानविभक्तिकत्वेऽपि नाभेदान्वयः; योग्यताविरहात्, परोवरीयांसमिति द्वितीयाया उपासनान्वय्यभेदसम्बन्धावच्छिन्नप्रकारत्वार्थकत्वात्, प्रकृतेश्च परोवरीयस्त्वविशिष्टाकाशपरत्वादुद्गीथमिति द्वितीयान्तार्थोद्गीथविशेष्यकत्वस्याप्युपासनेऽन्वयात्। तत्र भूताकाशनिरूढाकाशश्रुतिजगत्कारणत्वलिङ्गाभ्यामगृहीतबलतारतम्याभ्यां संशयः, श्रुतेः प्राबल्यमङ्गीकृत्य पूर्वपक्षः, लिङ्गस्य प्राबल्यमादाय सिद्धान्तः—इति विवेकः॥

संशयस्तु—कारणवाक्यवेद्यं किमचेतनविशेष आकाशः, उत अचेतनभिन्नमिति **प्रथमः**; महानसीयवह्निमान् वह्निसामान्याभाववानिति विशेषधर्मावच्छिन्नसामान्यधर्मावच्छिन्नाभावोभयकोटिकसंशयवत् महानसीयवह्नितद्भेदोभयकोटिकसंशयस्यापि सम्भवेन तद्वत् प्रकृतेऽपि तथा संशयोपपत्तेः। तदर्थमाकाशवाक्यं स्पर्शशून्यत्वे सति शब्दवत्त्वरूपतन्मात्रसाधारणाकाशत्वस्य सदादिवाक्यप्रतिपाद्यकारणे विधायकं, उत प्राप्यत्वरूपपरायणत्वस्य तद्विशिष्टप्रकाशमानत्वात्मकयोगार्थस्य वा विधायकमिति **द्वितीयः**॥

न च—आकाशवाक्यस्य उद्गीथविद्याविधिपरत्वात् न रूढ्यर्थादिविधिपरत्वमिति—वाच्यम्; आकाशवाक्यस्य सद्विद्याप्रतिपन्ने सत्पदार्थे आकाशत्वविधानपूर्वकं कारणीभूताकाशाभेदेन उद्गीथोपासनविधिपरत्वेन उक्तसंशयोपपत्तेः। न चैवमपि—योगार्थरूढ्यर्थयोर्भावाभावरूपत्वाभावेन तदीयविषयितयोः परस्परप्रतिबध्यताप्रतिबन्धकत्वयोरवच्छेदकत्वासम्भवेन स्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वस्वसामानाधिकरण्योभयसम्बन्धेन विषयिताविशिष्टविषयितावत्त्वरूपं संशयत्वं उक्तज्ञानस्य नोपपद्यत इति—वाच्यम्। तद्वत्ताबुद्धिं प्रति

तदभाववत्ताज्ञानस्य प्रतिबन्धकत्वे अव्याप्यवृत्तित्वग्रहदशायां संयोगाभाववत्ताज्ञानस्य संयोगवत्ताबुद्धिं प्रति प्रतिबन्धकत्वापत्तिरिति तद्वारणाय संयोगविरुद्धविशेषणतासम्बन्धेन संयोगाभावप्रकारकनिश्चयत्वेन प्रतिबन्धकत्वमावश्यकम्। एवं च–तदभावतदभावव्याप्यतदभावावच्छेदकग्रहाणां पृथक्पृथगप्रामाण्यज्ञानाभावादिकं निवेश्य प्रतिबन्धकतास्वीकारे गौरवात् तद्वत्ताबुद्धिं प्रति तद्विरुद्धविशेषणतासम्बन्धावच्छिन्नप्रकारताशालिनिश्चयत्वेन एकमेव प्रतिबन्धकत्वं उक्तत्रिविधनिश्चयानां कल्प्यते। तदभावत्वतदभावव्याप्यत्वांशे अप्रामाण्यज्ञानाभावादिकं प्रतिबन्धकतावच्छेदकगर्भे न निवेश्यते, तथा प्रकारतायां तदभावत्वाद्यवच्छिन्नत्वं च॥ तथा च–उक्तरूढ्यर्थयोगार्थयोरपि तत्तद्विरुद्धसम्बन्धस्य उक्तज्ञाने भानात् निरुक्तसंशयत्वमुपपन्नम्। अत एव स्थाणुर्वा पुरुषो वेत्यादेस्सर्वानुभवसिद्धस्य संशयत्वस्य पङ्कजं वा सुधांशुर्वा मुखमित्यादेस्संशयालङ्कारत्वस्य च नानुपपत्तिः॥

ननु—

सिद्धान्ते उक्तविशिष्टविषयितारूपं संशयत्वमिति परिष्कार एव न सम्भवति, नैयायिकमते समानाकारकज्ञानेषु विषयताभेदे मानाभावेन प्रत्येकनिश्चयीयविषयतयोरेव संशये स्वीकरणीयत्वात्, संशयीयविषयत्वावच्छिन्नप्रतिबन्धकतासम्भवेऽपि सिद्धान्ते संयोगात्मकविषयतायाः ज्ञानभेदेन भिन्नतया संशयविषयतायाः प्रतिबन्धकतानवच्छेदकत्वेन स्वपदेन तदुपादानासम्भवात्। अथ–संशयाकारानुमितिस्वीकर्तृमते यथा वह्न्यभावव्याप्यवत्ताज्ञानस्य वह्निमत्ताधीप्रतिबन्धकतायां वह्निव्याप्यवत्ताज्ञानाभाववैशिष्ट्यं प्रतिबन्धकतावच्छेदककोटौ निवेश्यते, तथा वह्न्यभाववत्ताज्ञानप्रतिबन्धकतायामपि वह्निमत्ताज्ञानाभाववैशिष्ट्यं निवेशयितुमुचितं; तुल्यन्यायात्। एवं च

वक्ष्यमाणरीत्या सिद्धान्ते परोक्षसंशयस्वीकारेण पर्वते वह्निमत्ताबुद्धिं प्रति वह्निविरुद्धसम्बन्धावच्छिन्नप्रकारताविशिष्टज्ञानत्वेन प्रतिबन्धकत्वं स्वीक्रियते । प्रकारतावैशिष्ट्यं च स्वनिरूपितपर्वतत्वावच्छिन्नविशेष्यताकत्व स्वावच्छेदकावच्छिन्नविरुद्धसम्बन्धावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकज्ञानाभावावैशिष्ट्योभयसम्बन्धेन । एवं च वह्निव्याप्यवत्ताज्ञानाभावविशिष्टवह्न्यभावव्याप्यवत्ताज्ञानादेरनुगतरूपेण प्रतिबन्धकतानिर्वाहः । वह्निव्याप्यवत्ताज्ञाने अप्रामाण्यग्रहदशायां वह्न्यभावव्याप्यवत्ताज्ञानस्य प्रतिबन्धकतावत् वह्निसंशयस्यापि वह्निकोट्यंशे अप्रामाण्यग्रहदशायां वह्न्यभावकोट्यंशे प्रामाण्यग्रहदशायां वा वह्निमत्ताधीविरोधित्वमभ्युपगम्यत एव । अत एव बाधग्रन्थे चिन्तामणिकारमते वह्न्यभावांशे प्रामाण्यनिश्चयानास्कन्दितस्य वह्न्यभावसंशयस्यापि वह्निधीप्रतिबन्धकत्वमुक्तम् बाधगादाधर्यां । तन्निर्वाहाय च प्रतिबन्धकविशेषणाभावप्रतियोगिज्ञाने अप्रामाण्यज्ञानानास्कन्दितत्वं निवेश्याप्रामाण्यज्ञानानास्कन्दितताद‍ृशज्ञानाभावप्रामाण्यज्ञानान्यतरविशिष्टवह्न्यभाववत्ताज्ञानत्वेन वह्निधीप्रतिबन्धकत्वमङ्गीकार्यम् । तथा च संशयविषयताया अपि प्रतिबन्धकतावच्छेदकत्वं निर्वहति—इति चेत्॥ एवमपि यत्र संशयेऽप्रामाण्यज्ञानादिकं नास्ति तत्राव्याप्तेर्दुर्वारत्वात् । न च—उक्तोभयसम्बन्धेन विषयिताविशिष्टविषयितावत्त्वस्य प्रतियोगित्वानुयोगित्वान्यतरसम्बन्धेन लक्षणत्वान्नाव्याप्तिः, अप्रामाण्यज्ञानास्कन्दितघटाद्येकैकसंशयनिष्ठाया उक्तविषयतायास्तौसाद‍ृश्यरूपत्वेन अप्रामाण्यज्ञानानास्कन्दितसंशयेषु प्रतियोगितासम्बन्धेन सत्त्वात् अयं संशयो घटसंशयत्वेन घटसंशयान्तरसदृश इति व्यवहारादिति—वाच्यम् । एवमपि संशयस्थले प्रतिबध्यप्रतिबन्धकतावच्छेदकभावापन्नविषयतयोरेकज्ञाने असम्भवेन सामानाधिकरण्याभावेन एककोट्यंशे अप्रामाण्य-

ज्ञानास्कन्दितसंशयेऽप्युक्तलक्षणासम्भवतादवस्थ्यात् । प्रतिबध्यप्रतिबन्धकतावच्छेदकाभावापन्नयोरपि विषयितयोर्निश्चयान्तर्भावेणैव विरोधित्वं, न तु संशयेऽपीति नैयायिकमतस्य निर्बीजत्वात् । अन्यथा घटतदभावयोरपि अधिकरणविशेषावच्छेदेनाविरोधापत्तेः ॥ अत एवोक्तं न्यायपरिशुद्धौ—

"मिथस्स्फुटविरोधयोः स्थाणुत्वपुरुषत्वयोः स्फुरणं, स्थाणुर्वा पुरुषो वेति संशयः, मिथोविरोधाग्रहणे तयोर्विकल्पो न स्यात् । अत एव डोलावेगवत् अत्र स्फुरणक्रम इत्येके, एकस्मिन्युगपदन्योन्यप्रतिक्षेपकस्य धीविरुद्धत्वात् ॥"—इति ॥

अयमर्थः । स्फुटविरोधयोः—भासमानविरोधयोः ; परस्परविरोधावच्छिन्नसंसर्गतानिरूपितप्रकारताश्रययोरित्यर्थः ; स्फुरणं—ज्ञानं, परस्परविरोधावच्छिन्नसंसर्गतानिरूपितस्थाणुत्वपुरुषत्वनिष्ठप्रकारताकं ज्ञानं संशय इति यावत् । विकल्पो न स्यात्—संशये वाकारोल्लेखो न स्यात् । अत एव—विरोधभानादेव, परस्परविरोधावच्छिन्नसंसर्गतानिरूपितयोः प्रतिबध्यताप्रतिबन्धकतावच्छेदकभावापन्नयोः प्रकारतयोरेकज्ञाने असम्भवादेवेति यावत् । स्फुरणक्रमः—ज्ञानक्रमः ; अत्र एकस्यैवेन्द्रियसंयोगस्य एकप्रतिबध्यप्रतिबन्धकतावच्छेदकविषयताकज्ञानद्वयजनकत्वं कथमित्याशङ्का डोलावेगवदिति दृष्टान्तेन परिहृता । डोलाप्रसरस्य परस्परोपमर्दकदिग्द्वयसंयोगहेतुवेगद्वयजनकत्ववदिन्द्रिय संयोगस्यैकस्य उक्तज्ञानद्वयजनकत्वमुपपन्नमित्यर्थः । एवं च—संशय स्थले ज्ञानद्वयाङ्गीकारात् सामानाधिकरण्यघटितोक्तोभयसम्बन्धेन विषयताविशिष्टविषयतावत्त्वरूपं संशयलक्षणं न सम्भवति ॥

—इति चेत् ॥

मैवम् ॥ संशयस्थले ज्ञानद्वयस्वीकारेऽपि ज्ञानद्वयीयविषयतयोर्निरूप्यनिरूपकभावस्वीकारेण कोटिद्वयविषयतयोर्निरूपकतासम्बन्ध-

घटितसामानाधिकरण्याभावेऽपि एककोटिविषयताया निरूपकतासम्बन्धेन अपरकोटिविषयतायाश्च स्वनिरूपितविषयतानिरूपकत्वसम्बन्धेन एकस्मिन्नेव ज्ञाने सत्त्वोपपत्त्या उक्तलक्षणनिर्वाहात् । **यद्वा**—स्वनिरूपितविशेष्यतावच्छेदकावच्छिन्नविशेष्यतानिरूपितत्व-स्वावच्छेदकावच्छिन्ननिरूपितविरोधसम्बन्धावच्छिन्नसंसर्गतानिरूपितत्व स्वसामानाधिकरण्यैतत्त्रितयसम्बन्धेन प्रकारताविशिष्टप्रकारताकत्वं संशयत्वम् । उक्तं च **न्यायपरिशुद्धौ**—

"सामान्यधर्मिग्रहणे अप्रतिपन्नतद्विरोधं प्रतिपन्नमिथोविरोधानेक-विरुद्धविशेषणस्फुरणं संशयः ॥" —इति ॥

अत्र सामान्यधर्मिग्रहण इत्यनेन प्रथमसम्बन्धस्य, प्रतिपन्न-मिथोविरोधेत्यनेन द्वितीयसम्बन्धस्य, अनेकविशेषणस्फुरणं संशय इत्यनेन तृतीयस्य लाभः; अप्रतिपन्नतद्विरोधेत्यस्य धर्मितावच्छेदक-विरोधाविषयकत्वमर्थः । इदं चाहार्यसंशयस्यालक्ष्यत्वाभिप्रायेण तद्वारणाय तत्, तस्यापि लक्ष्यत्वे तु न देयम् । उक्तं **चात्मसिद्धौ यामुनाचार्यैः**—

"चैतन्यस्य विषयेण दृढसंयोगो हि निश्चयः । तस्यैव बहुभि-र्युगपददृढसंयोगस्संशयः ॥" —इति ॥

अत्र संयोगात्मकविषयताया दृढत्वं स्वावच्छेदकावच्छिन्न-निरूपितविरोधावच्छिन्नसंसर्गतानिरूपितविषयत्वासामानाधिकरण्यं ; सामानाधिकरण्यमपि पूर्ववत् स्वनिरूपितविषयतानिरूपकत्वसम्बन्धेन; तेन संशयस्थले ज्ञानद्वयाङ्गीकारेऽपि नानुपपत्तिः । अत्र युगपदिति पदं शैघ्र्यपरमिति न्यायपरिशुद्धावेव व्याख्यातम् ॥

वस्तुतस्तु—स्वनिष्ठानुयोगितावच्छेदकताकत्व-स्वविरोधावच्छिन्न-सम्बन्धावच्छिन्नानुयोगितावच्छेदकताकत्वोभयसम्बन्धेन धर्मविशिष्टसं-योगवज्ज्ञानत्वं संशयत्वमित्यात्मसिद्धिग्रन्थार्थः । सिद्धान्ते द्रव्य-

स्थले ज्ञानसंयोगो विशेष्यता, तत्संयोगानुयोगितावच्छेदकता प्रकारतेत्यादेर्विषयतावादे स्फुटमुपपादनात्। अयं स्थाणुर्वा पुरुषो वेति संशयीयायंपदार्थनिष्ठसंयोगे स्थाणुत्वपुरुषत्वोभयनिष्ठानुयोगितावच्छेदकताकत्वस्याङ्गीकारात्, नैयायिकमते विषयतायां व्यधिकरणधर्मस्यावच्छेदकत्वाङ्गीकारवत् ज्ञानीयसंयोगानुयोगितायां पुरुषत्वादेर्व्यधिकरणस्याप्यवच्छेदकत्वाङ्गीकारोपपत्तेः। संयोगे अदृढत्वमपि उक्तोभयसम्बन्धेन धर्मविशिष्टत्वमेव। अदृढत्वं च परस्परप्रतिक्षेपकाकारविशेष इति न्यायपरिशुद्धिग्रन्थस्यापि अयमेवार्थः ॥

अथ—स्थाणुर्वा पुरुषो वेति संशयः किं चाक्षुषः, उत मानसः? **नाद्यः**, भूतलं घटवदित्याकारकप्रत्यक्षोत्पत्तिकाले कथंचिदुपस्थितघटाभावादेर्भूतले प्रकारतया भानवारणाय समानधर्मधर्मितावच्छेदककतत्कोटिलौकिकप्रत्यक्षसामग्र्याः विपरीतकोटिभानप्रतिबन्धकत्वस्यावश्यमङ्गीकरणीयतया लौकिकसन्निकर्षजन्यसंशयस्य क्वाप्यसम्भवात्, योगजधर्मातिरिक्तालौकिकसन्निकर्षस्यानङ्गीकारेण तज्जन्यसंशयस्यापि असम्भवात्। **न द्वितीयः**, योगिनां योगजधर्मसहायेन मनसा अतीन्द्रियपदार्थभानार्थं मानसप्रत्यक्षाङ्गीकारेऽपि अयोगिनां तदनङ्गीकारात्। उक्तं च **न्यायपरिशुद्धौ**—

"मानसप्रत्यक्षमस्मदादीनां नास्त्येवेति वृद्धसम्प्रदायः, आत्मस्वरूपस्य तद्धर्मभूतज्ञानस्य स्वप्रकाशत्वात् सुखदुःखेच्छाद्वेषप्रयत्नानां तद्धतया अभिमतज्ञानविशेषानतिरेकस्य वेदार्थसङ्ग्रहे समर्थितत्वात् नित्यत्वाणुत्वादिविशिष्टात्माद्यनुभवस्य शास्त्रादिसिद्धत्वात् पूर्वानुभवादिज्ञानस्य स्मृतिरूपत्वात्, आत्मसुखादिव्यतिरिक्तबाह्यविषयेषु तस्य बाह्येन्द्रियानपेक्षप्रवृत्त्यनुपपत्तेरिति शास्त्रयोन्यधिकरणभाष्यस्यान्वारोहेणापि उपपत्तेः॥"—इति॥

—**इति चेन्न**॥

तत्कोटिकलौकिकप्रत्यक्षसामग्र्याः संशयातिरिक्तज्ञानं प्रति प्रतिबन्धकतास्वीकारेण लौकिकसन्निकर्षजन्यचाक्षुषादिसंशयस्यापि सम्भवेन संशयात् पूर्वं कोट्यंशे लौकिकसन्निकर्षसत्त्वेन संशयस्य उभयकोट्यंशेऽप्यलौकिकत्वमेवेति नैयायिकशपथस्यायुक्तत्वात् ।

उक्ताभिप्रायेणैव **चण्डमारुते** द्वितीयस्कन्धे—"संशयत्वं जातिविशेषः । न च चाक्षुषत्वादिना साङ्कर्यं ; कत्वादिव्याप्यतारत्वादिवत् चाक्षुषत्वादिव्याप्यसंशयत्वजात्यभ्युपगमे दोषाभावात् ॥"

—इत्युक्तम् । अतस्सन्निकृष्टकोट्यंशे प्रत्यक्षात्मकं असन्निकृष्टकोट्यंशे च स्मरणात्मकं ज्ञानद्वयमेव संशयः । ज्ञानद्वयविषयतयोर्निरूप्यनिरूपकभावः प्रागेवोक्तः ॥

नन्वेवमपि—कारणवाक्यप्रतिपाद्यं आकाशः, उत अचेतनभिन्नमिति संशयः किंरूपः, चाक्षुषत्वमानसत्वयोरसम्भवात्—इति चेत् । अनुमित्यात्मकः शाब्दानुमित्युभयात्मको वेति गृहाण ; 'भूताकाशे प्रसिद्ध्यतिशयपरायणत्वाद्यनुपपत्तिभ्यां संशयः' इति टीकोक्त्या उभयव्याप्यवत्ताज्ञानसम्पादनात् अनुमित्यात्मकत्वप्रतीतेः, आकाशपदरूढ्या आकाशविषयकशाब्दबोधस्य परायणत्वलिङ्गेन चेतनानुमितेश्च सम्भवेन निरूप्यनिरूपकभावापन्नविषयताकशाब्दानुमित्युभयात्मकस्य संशयस्योपपत्तेः । अथवा आकाशवाक्यस्य सदादिवाक्यैनैकवाक्यत्वाङ्गीकारेण सदाकाश ईक्षणवच्चेति बोधे जायमाने ईक्षणरूपार्थसामर्थ्येनाचेतनभेदस्यापि भानसम्भवेन सदाकाशः अचेतनभिन्नं वेति शाब्दबोधात्मक एव संशयः । न च—अर्थसामर्थ्येन भानं नाम लिङ्गाधीनविषयता, एवं च शाब्दबोधस्यार्थसामर्थ्यसिद्धपदार्थांशेऽनुमितित्वमेव, न शाब्दत्वमिति—वाच्यम्; तदंशे अनुमिनोमीत्यनुभवाभावेन शाब्दयामीत्यनुभवेन च तदंशेऽपि शाब्दत्वाभ्युपगमात् ॥

न च—स्थाणुत्वव्याप्यवक्रकोटरादिज्ञानदशायां संशयादर्शनेन विशेषदर्शनस्य संशयविरोधितया अचेतनभेदव्याप्येक्षणादिज्ञानदशायां न संशय इति—वाच्यम्; प्रामाण्यनिश्चयास्कन्दितस्यैव विशेषदर्शनस्य संशयविरोधितया विरुद्धोपस्थापकसामग्रीस्थले प्रामाण्याग्रहात् उक्तेक्षणवत्ताज्ञानस्य प्रमाण्यनिश्चयानास्कन्दितत्वात्। अनुमितिजनकत्वं तु अप्रामाण्यज्ञानानास्कन्दितत्वमात्रेणोपपद्यते। अत एव न्यायपरिशुद्धौ—अगृह्यमाणबलतारतम्यविरुद्धानेकवस्तुज्ञापकोपस्थापनमिह विप्रतिपत्तिरिति—प्रतिपादितमिति बोध्यम् ॥

एवं च—संशये कोट्योर्विरोधभानस्याङ्गीकारात् कारणवाक्यवेद्यमाकाशः उत अचेतनभिन्नमित्यस्य संशयत्वोपपत्तेः तद्वत्ताबुद्धिं प्रति तद्विरोधावच्छिन्नसंसर्गताकज्ञानस्य प्रतिबन्धकत्वादेव श्रीभाष्यादौ सार्वज्ञ्यादिबोधकवाक्यानां निर्गुणवाक्यविरोधित्वाभिधानं, नित्यो नित्यानां द्वासुपर्णेत्यादेरभेदश्रुतिविरोधित्वाभिधानं, अस्मिन्नधिकरणेऽप्यचेतनभेदसाधकानुमानस्याकाशश्रुत्या बाधाभिधानं च—उपपन्नं; तार्किकादिरीत्या गुणसामान्याभावादिधीप्रतिबन्धकज्ञानजनकत्वरूपविरोधाभावेन यथाश्रुते असङ्गतेः। इत्थं च प्रथमसंशये आकाशरूपाचेतनत्वाचेतनसामान्यभेदोभयकोटिकत्वाभिधानं तार्किकरीत्या। सिद्धान्ते त्वाकाशत्वाचेतनभेदोभयकोटिकत्वमपि सम्भवतीति बोध्यम् ॥

अत्र आकाशाधिकरणे पूर्वपक्षः ईक्षणलिङ्गेन कारणवाक्यवेद्यस्याचेतनभेदसाधनं न सम्भवति, कारणोद्देशेन आकाशत्वविधायकेन आकाशादेवेत्यादिना बाधात्, श्रुतिलिङ्गयोर्मध्ये श्रुतेर्बलवत्त्वेन तज्जन्यबोधस्य प्रामाण्यनिश्चयास्कन्दितत्वेनोक्तानुमितिप्रतिबन्धकत्वसम्भवात् अग्निहोत्रं जुहोतीतिवाक्यविहितस्याग्निहोत्रस्य देवतोद्देशेन द्रव्यत्यागात्मकयागघटितहोमरूपस्य द्रव्यसामान्यघटितत्वेन सामान्यस्य विशेषाकाङ्क्षासत्त्वेन दध्ना जुहोतीति वाक्यमुक्तहोमघटकद्रव्ये तादात्म्येन

दधि समवायेन दधित्वं वा विधत्त इति यथा स्वी क्रियते, तथा सदेव सोम्येदमग्र इत्यादिकारणवाक्यप्रतिपन्नसत्पदार्थस्यापि सामान्यरूपत्वेन विशेषाकाङ्क्षासत्त्वेन कारणोद्देशेन आकाशवाक्यं आकाशं आकाशत्वं वा विधत्त इति स्वीकार्यम् । न च—इदं वाक्यं कारणोद्देशेन प्राप्यत्वविधिपरं, अस्य लोकस्य का गतिरिति प्राप्यस्यैव पृष्टत्वात् । अन्यथा पञ्चम्यर्थकारणोद्देशेनाकाशत्वविधाने एकप्रसरताभङ्गापत्तेः, एकसुबन्तघटकपदयोरुद्देश्यविधेयोभयाबोधकत्वरूपैकप्रसरतायाम्सिद्धान्तसिद्धत्वादिति—वाच्यम् । "का साम्नो गतिरिति, स्वर इति होवाच ।

स्वरस्य का गतिरिति, प्राण इति होवाच । प्राणस्य का गतिरिति, अन्नमिति होवाच । अन्नस्य का गतिरिति, आप इति होवाच । अपां का गतिरिति, असौ लोक इति होवाच ।

अमुष्य लोकस्य का गतिरिति, अयं लोक इति होवाच"—इत्यत्र गतिशब्दस्य कारणपरतया तत्प्रायपाठेनास्य लोकस्य का गतिरित्यत्रापि गतिशब्दस्य कारणपरत्वौचित्येन प्राप्यपरत्वासम्भवात्; साम्नः स्वरज्ञानजन्यत्वेन ज्ञायमानस्वरस्यापि तत्र, स्वरस्य शब्दात्मकतया वायुगुणत्वेन तत्र प्राणस्य, प्राणे चान्नस्य, तस्मिंश्च वृष्टेः, तत्र मेघाद्याश्रयोर्ध्वलोकस्य, मेघादिवृष्टिसामग्रीसम्पत्तेः एतल्लोकस्थयज्ञादिजन्यत्वेन तादृशसामग्रीसम्पत्तौ यज्ञादिद्वारा एतल्लोकस्य—कारणत्वात्, अस्य लोकस्य का गतिरित्यस्य एतल्लोककारणजिज्ञासाविषयीभूततादृशकारणत्वव्याप्यधर्मावच्छिन्नमित्यर्थात् किंपदस्य जिज्ञासाविषयसमभिव्याहृतपदार्थतावच्छेदकव्याप्यधर्मावच्छिन्ने शक्तेः; तादृशजिज्ञासानिवर्तकस्योत्तरस्य कारणत्वव्याप्याकाशत्वविधायकत्वोपपत्तेः । "लोहितोष्णीषाः ऋत्विजः प्रचरन्ति, हिरण्यमालिनः प्रचरन्ति, सप्तदशारत्निर्वाजपेयस्य यूपः"—इत्यादौ उष्णीषमालारज्जुद्देशेन लोहितत्वहिरण्यत्वसप्तदशत्वानां विधेः पर्वतन्त्रसिद्ध-

तया एकसुबन्तबोध्ययोः परस्परमुद्देश्यविधेयभावेनान्वयो नास्तीति नियमासिद्धेः, सति तात्पर्ये तथा बोधाभ्युपगमात्॥ न च—सदेवेत्यादि-कारणवाक्यघटकसत्पदार्थस्याकाशत्वे तत्रेक्षणाद्यनुपपत्तिः, व्यापकस्य चेतनत्वस्याभावे व्याप्यस्येक्षणादेरसम्भवादिति—वाच्यम्। तत्र ईक्षति-धातोः गौणत्वाङ्गीकारात् दुःखाभाववति प्रधाने निरतिशयानन्दवत्त्व-रूपानन्दमयत्वस्याप्यौपचारिकत्वात्। न चेक्षत्यादीनां अनेकेषां गौणत्वकल्पनापेक्षया आकाशपदस्य यौगिकत्वमुचितमिति—वाच्यम्। योगाद्रूढिपूर्विकलक्षणायाः बलीयस्त्वस्य प्रोद्गात्रधिकरणसिद्धतया आकाशपदस्य योगाङ्गीकारापेक्षया ईक्षत्यादेर्लक्षणाया एव युक्तत्वात्; तस्मिन्नधिकरणे हि "प्रैतु होतुश्चमसः प्र ब्रह्मणः प्रोद्गातॄणां प्र यजमानस्य" इति—मन्त्रे उद्गातॄणां चमसः प्रैत्वित्यर्थके उद्गातृपदशक्यार्थस्य बहुत्वासम्भवात् उच्चैर्गायन्तीत्युद्गातार इति सामगानकर्तृत्वरूपप्रस्तोत्रादिसाधारणधर्मावच्छिन्ने योगस्य लक्षणाया वा कल्पनस्यावश्यकत्वे तत्र च योगाङ्गीकारे प्रकृतिप्रत्ययजन्योपस्थितिद्वयस्य प्रत्ययार्थ-धर्मकप्रकृत्यर्थबोधे तथाविधप्रकृतिप्रत्ययसमभिव्याहारज्ञानस्य च हेतुतायाः कल्पनीयतया तदपेक्षया लक्षणापक्षे तज्जन्यसामगानकर्त्रुप-स्थितेः एकस्या एव तद्बोधे हेतुत्वकल्पने लाघवात्। एवं भिन्नविषय-कप्रत्यक्षादिकं प्रति शाब्दसामग्रीप्रतिबन्धकतायां योगशक्तिजन्योप-स्थितिद्वयस्य सामग्रीकोटौ निवेशनीयतया तथाविधोपस्थितिद्वयस्य योग्यताज्ञानस्य च परस्परं विशेषणविशेष्यभावे विनिगमनाविरहेण यत्र प्रतिबध्यप्रतिबन्धकभावषट्कं तत्र लक्षणाजन्योपस्थितियोग्यता-ज्ञानयोः विशेष्यविशेषणभावे विनिगमनाविरहेण द्वयमिति रीत्याऽपि लक्षणापक्षे लाघवमभिप्रेत्य लक्षणापक्षस्सिद्धान्तितः। एवं च—प्रकृतेऽपि आकाशपदस्य योगस्वीकारापेक्षया ईक्षत्यादीनां लक्षणाकल्पनं युक्तम्। न चानेकपदलक्षणापेक्षया आकाशपदस्यैकस्य योगाङ्गी-

कारो युक्त इति वाच्यम् । "आकाश इति होवाच, आकाशादेव समुत्पद्यन्ते, आकाशं प्रत्यस्तं यन्ति, आकाशोह्येवैभ्यो ज्यायान्, आकाशः परायणं, यदेष आकाश आनन्दो न स्यात्, आकाशो ह वै नामरूपयोर्निर्वहिता प्राणश्च हास्मै तदाकाशं चोचुः" इति वाक्यस्थानां बहूनां चाकाशपदानां योगकल्पनस्य सिद्धान्तेऽपि सत्त्वात् । तथा च - आकाशपदरूढेरावश्यकतया रूढ्यर्थतावच्छेदकाकाशत्वेन बाधात् ईक्षणेनाचेतनभेदसाधनं न सम्भवति । उक्तं च टीकायाम्—

"कारणविशेषे आकाशादिपदश्रुत्या अवगते सति लिङ्गात्तद्विरुद्धनिश्चयोऽनुपपन्नः"॥ —इति ॥

अस्माच्च टीकावाक्यात् बाध इति पूर्वपक्षो युक्तः ॥

वस्तुतस्तु—श्रुतिलिङ्गयोर्विरोधे श्रुतेर्बलीयस्त्वमिति पूर्वतन्त्रे स्थापितम् । तथा हि—"कदाचन स्तरीरसिनेन्द्रसिश्च सिदाशुषः" इति मन्त्रे इन्द्रप्रकाशनसामर्थ्यरूपमिन्द्राङ्गत्वग्राहकं लिङ्गमस्ति, ऐन्द्र्या गार्हपत्यमुपतिष्ठत इति गार्हपत्याङ्गत्वबोधिका श्रुतिश्चास्ति । यद्यप्युदाहृतश्रुतौ मन्त्रविशिष्टोपस्थानस्य गार्हपत्याङ्गत्वबोधने मन्त्रस्य गार्हपत्याङ्गभूतोपस्थानाङ्गत्वमेव प्रतीयते, न तु तस्य गार्हपत्याङ्गत्वम् । तथापि सम्बोधनविभक्तिबलेन समीपास्थितिरूपोपस्थानस्य प्राप्तत्वेन मन्त्रस्य गार्हपत्याङ्गत्वमेव तच्छ्रुत्यभिप्रेतमिति कल्प्यते । तथा च गार्हपत्याङ्गत्वबोधकश्रुतीन्द्राङ्गत्वबोधकलिङ्गयोः विरोधे द्वयोस्समबलत्वमिति **पूर्वपक्षः** । न च—साक्षादङ्गत्वबोधकश्रुत्यपेक्षया अयं मन्त्रः इन्द्राङ्गत्वबोधकश्रुतिमान् इन्द्रप्रकाशनसामर्थ्यवत्त्वादिति श्रुत्यनुमानद्वारा अङ्गताबोधकस्य लिङ्गस्य विलम्बितधीजनकत्वेन दौर्बल्यमिति—वाच्यम् । अयं मन्त्रः इन्द्राङ्गत्ववान्, उक्तसामर्थ्यवत्त्वात्—इति साक्षादेवाङ्गत्वानुमितिजनकत्वसम्भवे श्रुतिं कल्पयित्वा तथाङ्गत्वसाधनस्यायुक्तत्वात् । अतः उभयो-

रपि तुल्यबलत्वात् प्रतिप्रधाना गुणावृत्तिरिति न्यायेन गार्हपत्येन्द्रयोः द्वयोरप्ययं मन्त्रसमुच्चयेनाङ्गम्। अस्तु वा लिङ्गस्य श्रुतिकल्पकतया प्रबलदुर्बलभावः, शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्यत इति न्यायेन मन्त्रस्याङ्गत्वाकाङ्क्षायाः श्रुत्यैव निरसनीयत्वात् । तथाऽपि अनुमितश्रुत्यां इन्द्राङ्गत्वमवर्जनीयं, पर्वतादौ प्रबलप्रत्यक्षसिद्धरूपादिकत्वस्येव दुर्बलानुमानसिद्धवह्निमत्त्वस्यापि दुरपह्नवत्वात् । न च—कदाचनेत्यादिमन्त्रस्य ऐन्द्र्येत्यादिप्रत्यक्षविनियोगश्रुतिसत्त्वेन विनियोगश्रुत्याकाङ्क्षाविरहात् इन्द्राङ्गताबोधकश्रुत्यनुमानं न सम्भवति, सिषाधयिषारूपपक्षताया अभावादिति—वाच्यम् ; मन्त्रस्य विनियोगश्रुत्याकाङ्क्षाविरहेऽपीन्द्रस्य स्वस्मारकमन्त्राकाङ्क्षासत्त्वेन सिषाधयिषानिर्वाहात्—इति प्राप्ते; न तावल्लिङ्गं स्वतः प्रमाणं। वेदोऽखिलो धर्ममूलमिति स्मृत्या वेदस्यैव कॢप्तस्यानुमानिकस्य वा धर्मबोधकत्वनियमात्, अङ्गत्वस्य च तज्जन्यापूर्वजनकापूर्वजनकतारूपस्य धर्मघटितत्वादङ्गत्ववाचिपदकल्पनानुकूलायाः श्रुतपदार्थनिष्ठयोग्यताया एव लिङ्गत्वरूपत्वाच्च ॥

यद्यपि—अङ्गत्वकल्पनानुकूलैव सा लिङ्गमिति वक्तुं शक्यत्वाद्वेदप्रयोज्यबोधविषयश्रेयस्साधनताकत्वं धर्मत्वमिति धर्मलक्षणसम्भवाच्च न लिङ्गेन श्रुत्यनुमानमावश्यकम् । तथाऽपि—साक्षादङ्गत्वानुमिति जनकत्वमपि लिङ्गस्य न सम्भवति ; श्रुत्या गार्हपत्यरूपाङ्गिबोधनेनाङ्गत्वाकाङ्क्षाविरहेण पक्षताविरहात् । इन्द्रस्य स्मारकाकाङ्क्षासत्त्वेऽपि ध्यानाद्युपायान्तरेणापि तन्निवृत्तिसिद्धेरेतन्मन्त्रविषयकत्वे प्रमाणाभावात् एतन्मन्त्रविशेष्यकेन्द्राङ्गत्वानुमितिर्न सम्भवत्येवेति कदाचनेति मन्त्रो गार्हपत्याङ्गमेव । न चैवं—मन्त्रगतेन्द्रशब्दस्य यज्ञसाधनसादृश्यादिदिधात्वर्थानुसाराद्वा जघन्यवृत्त्याश्रयणात् गौरवमिति—वाच्यम् ; श्रुत्या गार्हपत्ये विनियोगसिद्धावस्य गौरवस्य फलमुखत्वेन अदोषत्वादिति बलाबलाधिकरणतात्पर्यम् ॥

एवं च–सदेवेत्यादिश्रुतौ सत्पदार्थस्य सामान्यस्य विशेषाकाङ्क्षा-सत्त्वेन ब्रह्मणश्शास्त्रयोनित्वेनाचेतनभेदादिरूपविशेषबोधकश्रुति-कल्पनद्वारा साक्षाद्वा ईक्षणादिलिङ्गानां विशेषसाधकत्वं वाच्यम् । आकाशश्रुत्या विशेषाकाङ्क्षानिवृत्तेरुक्तलिङ्गस्य विशेषसाधकत्वं न सम्भवति । सत्पदस्याकाशश्रुत्या विशेषपरत्वे निश्चिते ईक्षत्यादीनां लक्षणाकल्पनं च फलमुखत्वान्न दोषः । तथा च–सिषाधयिषारूपपक्षताविरहात् अचेतनभेदानुमानं न सम्भवतीति शङ्कावारकत्वमेवास्याधिकरणस्येति पक्षताविरह इति–**पूर्वपक्षः**। उक्तं च **श्रीमति भाष्ये**–

"यदि हि साधारणशब्दैरेव सदादिभिः कारणमभ्यधायिष्यत, ईक्षणाद्यर्थानुरोधेन चेतनविशेष एव कारणमिति निरचेष्यत। आकाशशब्देन तु विशेष एव निश्चित इति नार्थस्वाभाव्यात् निर्णेतव्यमस्ति ॥" —इति ॥

सामान्यशब्देनाभिधाने विशेषाकाङ्क्षया सिषाधयिषारूपपक्षतासत्त्वेन चेतनविशेषानुमितिर्भवेत् । आकाशशब्देन विशेषनिश्चयसत्त्वेन पक्षताविरहान्नानुमानं युक्तमित्यर्थः ॥

न च–आकाशवाक्येन विशेषविधिं स्वीकृत्य ईक्षणादीनां गौणत्व-कल्पनापेक्षया 'आत्मा वा इदमेक एवाग्र आसीत्' इत्यनेन विशेष-विधिस्वीकारो युक्त इति–वाच्यम्; आत्मशब्दस्य जीवेश्वरसाधारणस्य मृदात्मको घट इत्यादिप्रयोगेणाचेतनसाधारणस्य च विशेषसमर्प-कत्वायोगात् । न च–आत्मन आकाशस्सम्भूत इत्याकाशस्य कार्य-त्वोक्त्या आकाशशब्दस्य कारणविशेषसमर्पकत्वं न सम्भवतीति–वाच्यम् ; अत्रत्याकाशपदस्य भूताकाशपरत्वात्, कारणवाक्यघट-काकाशपदस्य च तन्मात्ररूपसूक्ष्माकाशपरत्वेनाविरोधात् । तथा च–आकाशादेवेत्यादिवाक्येन शब्दतन्मात्रमेव विधीयत इति चेतनविशे-षस्य कारणत्वमयुक्तम् । अयमत्र निर्गलितार्थः--आकाशश्रुत्या ईक्षणादिलिङ्गानां बाध इति पूर्वः पक्षः---इति॥

ननु–अत्र श्रुतेर्लिङ्गबाधकत्वं नाम न तावत् ईक्षणादिलिङ्ग-जन्यानुमितिप्रतिबन्धकं यत् कारणविशेष्यकाकाशत्वप्रकारकज्ञानं तज्जनकत्वमिति युक्तम्, अचेतनभेदविषयकानुमितिं प्रति आकाशत्वज्ञानस्य तदभावाद्यनवगाहित्वेन प्रतिबन्धकत्वायोगात् ॥ न च–आकाशत्वज्ञानस्याचेतनभेदविरुद्धसम्बन्धावच्छिन्नाकाशत्वप्रकारकतया तादृशानुमितिप्रतिबन्धकत्वोपपत्तिः—इति वाच्यम् । तथाऽपि आकाशादेवेत्यादेः केवलस्वरूपसम्बन्धेनाकाशत्वप्रकारकबोधजनकत्वेऽपि उक्तविरोधावच्छिन्नसंसर्गताकबोधजनकत्वाभावेन बाधकत्वासम्भवात् विरोधावच्छिन्नसम्बन्धेन तदवच्छिन्ने आकाशपदस्य शक्तिविरहात् ॥ न च–अयमाकाश इति वाक्यजन्यबोधानन्तरं चेतनत्वसंशयानुदयेन तादृशसम्बन्धभानावश्यकतया तथाविधसम्बन्धेनाकाशत्वावच्छिन्न एव शक्तिरावश्यकीति–वाच्यम् । तथा सति तद्बोधानन्तरं घटत्वपटत्वकुड्यत्वादिसंशयानामपि अनुदयेन तत्तद्विरोधघटितसम्बन्धेनाकाशत्वावच्छिन्नेऽपि शक्तिस्वीकारापत्त्या शक्त्यानन्त्यापत्तेः ॥ न च–आकाशत्वं चेतनभेदव्याप्यमित्युद्बुद्धसंस्कारसत्त्वात् तद्विशिष्टाकाशत्वज्ञानत्वेन तस्य चेतनत्वज्ञानप्रतिबन्धकता, एवं घटत्वादिज्ञानेऽपि तदवच्छिन्नभेदव्याप्यत्वविषयकसंस्कारविशिष्टत्वेन प्रतिबन्धकता; यद्वा आकाशत्वे यद्यद्धर्मावच्छिन्नभेदव्याप्यत्वप्रकारकसंस्कारो वर्तते, आकाशत्वसम्बन्धे तत्तद्धर्मविरोधो भासत इति स्वीकृत्य तादृशविरोधावच्छिन्नसंसर्गताकधीत्वेनैव तत्तद्धर्मप्रकारकज्ञानं प्रति प्रतिबन्धकत्वमुपेयते; एवं च चेतनभेदविषयकानुमितिप्रतिबन्धकज्ञानजनकत्वमाकाशश्रुतेरुपपन्नमिति–वाच्यम् । तथा सतीक्षणादिमत्ताज्ञानस्याप्याकाशभेदव्याप्यमीक्षणादिकमिति संस्कारविशिष्टत्वेनाकाशत्वविरुद्धसंसर्गावगाहिज्ञानत्वेन वाऽऽकाशत्वप्रकारकधीप्रतिबन्धकतासम्भवेन लिङ्गस्यैव विनिगमनाविरहेण श्रुतिबाधकता-

पत्त्या पूर्वपक्षानुत्थितेः ॥ न च—लिङ्गविरोधेनाकाशश्रुतेर्बोधजनकत्वाभावे तस्याप्रामाण्यापत्तिर्दोषः, श्रुतिविरोधेन ईक्षणलिङ्गस्यानुमितिजनकत्वाभावे च न कश्चिद्दोष इति विनिगमकसत्त्वात् श्रुत्यैव लिङ्गबाध इति पूर्वपक्षोदय इति—वाच्यम् । ईक्षणविरुद्धसंसर्गावगाहिनः आकाशत्वज्ञानस्य ईक्षणवत्ताज्ञानप्रतिबन्धकतया श्रुत्या लिङ्गबाधेऽपि तदैक्षतेति श्रुतेर्बोधजनकत्वाभावेनाप्रामाण्यापत्तिसाम्यात् । इयांस्तु विशेषः—लिङ्गेन श्रुतिबाधे एकस्या आकाशश्रुतेरप्रामाण्यं, श्रुत्या लिङ्गबाधे च सार्वज्ञ्यसत्यसङ्कल्पत्वानन्दमयत्वाद्यनेकश्रुतीनां अप्रामाण्यमिति महान् दोषः ॥ न च—सार्वज्ञ्यादिश्रुतेर्गौणार्थविषयकबोधजनकत्वसम्भवात् नाप्रामाण्यमिति—वाच्यम्; आकाशश्रुतेरपि तत्सम्भवात् ॥ एवं च—ईक्षणादिलिङ्गजन्यानुमितिप्रतिबन्धकज्ञानजनकत्वरूपं लिङ्गबाधकत्वं अभ्युपगम्य न पूर्वपक्षावतारो युक्तः, नापि तादृशानुमितिजनकसिषाधयिषारूपपक्षताविघटकत्वरूपलिङ्गबाधकत्वं श्रुतेरभ्युपगम्य तदवतारे घनगर्जितेन मेघानुमित्यादिस्थले व्यभिचारेण तस्याः पक्षतात्वायोगात् ॥ न च—तत्रापि फलानुरोधात् सिषाधयिषा कल्प्यते. नैयायिकैरपि लिङ्गदर्शनव्याप्तिस्मरणादिना पूर्वानुमित्या नाशस्थले फलानुरोधेन सिषाधयिषान्तरं कल्पयित्वैवानुमितिनिर्वाहाङ्गीकारात्; अत एवोक्तं **न्यायपरिशुद्धौ**—"सिषाधयिषितधर्मविशिष्टधर्मी पक्षः" इति—इति वाच्यम् । श्रुत्या आत्मनिश्चयवतोऽपि अनुमितिर्जायतामितीच्छावशात् मननात्मकानुमितेरङ्गीकारवत् सामान्यस्य विशेषाकाङ्क्षायाः आकाशश्रुत्या निरासेऽपि श्रुत्यन्तरविषयकानुमितिर्जायतामितीच्छासम्भवात् एकलिङ्गेनानुमितेऽपि लिङ्गान्तरेणानुमितिर्जायतामितीच्छया अनुमितेरेकविषयेऽनेकहेतूपन्यासं कुर्वतस्सूत्रकारस्य सम्मततया कथंचिद्विषयसिद्धावपि विशेषान्तरमादाय इच्छासम्भवात्,

येन पुंसा आकाशश्रुतिर्न दृष्टा तस्याचेतनभेदबोधकश्रुत्यनुमानसम्भवाच्च ॥ अथैवं—विरोधाधिकरणविरोधः, तत्र हि 'औदुम्बरीं स्पृष्ट्वा उद्गायेत्' इति श्रुतिविरुद्धाया अपि औदुम्बरी सर्वा वेष्टयितव्येति स्मृतेः प्रामाण्यं दुर्वारं, स्मृतित्वेन श्रुतिमूलकत्वानुमानात् प्रत्यक्षश्रुतिविरोधस्य ग्रहणाग्रहणादिश्रुतिषु बहुशो दर्शनेनानैकान्त्यात् प्रामाण्याभावसाधकत्वानुपपत्तेरिति–पूर्वपक्षं कृत्वा ; सर्वत्र धूमदर्शनानन्तरं व्याप्तिस्मरणेऽपि जिज्ञासाविरहेऽनुमित्यनुदयात् परोक्षज्ञानमात्रेऽनुमित्यर्थापत्तेरेव वा जिज्ञासायाः कारणत्वमुपेयते । अतः स्पर्शश्रुत्या वेष्टनाभाववत्त्वमौदुम्बर्या निश्चितत्वेन वेष्टनविषयकजिज्ञासाविरहेण स्मृत्या न मूलश्रुत्यनुमानसम्भव इति स्मृतेरप्रामाण्यमिति भाष्यकारेण शबरस्वामिना सिद्धान्तितम् । भवदुक्तरीत्या तत्रापि मूलश्रुत्यनुमानसम्भवेन वेष्टनस्मृतेः प्रामाण्योपपत्तिः—इति चेन्न ॥ तत्र वार्त्तिककारेण भाष्यमतं दूषयित्वा मूलश्रुत्यनुमानमङ्गीकृत्य वेष्टनस्मृतेः प्रत्यक्षश्रुतिविरोधेन यावच्छ्रुतिदर्शनं अननुष्ठानलक्षणमप्रामाण्यमित्यर्थे तदधिकरणतात्पर्योपवर्णनेन तद्विरोधाभावात् । तस्मात् श्रुतेः पक्षताविघटकत्वमपि न सम्भवति ॥ —इति ॥

मैवम् । श्रुतिर्नाम—अप्रामाण्यज्ञानानास्कन्दिततद्धर्मावच्छिन्नविषयकबोधजनकानुपपत्तिज्ञानाजन्यशक्तिग्रहजन्यतद्धर्मावच्छिन्नविषयकोपस्थितिजनकः शब्दस्तद्धर्मावच्छिन्ने, गङ्गायां घोष इत्यत्र गङ्गापदस्य प्रवाहश्रुतित्ववारणाय जनकान्तमुपस्थितिविशेषणं ; गवादिशब्दस्य गच्छतीति व्युत्पत्तिलभ्यगमनाश्रयत्वावच्छिन्नविषयकोपस्थितिजनकत्वात्तद्धर्मावच्छिन्ने श्रुतित्ववारणायानुपपत्तिज्ञानाजन्येति शक्तिग्रहविशेषणम् । रूढ्यर्थबाधानन्तरमेव योगार्थशक्तिज्ञानात् न तत्रातिव्याप्तिः । तद्धर्मावच्छिन्नव्याप्यधर्मप्रतिपादको वेदघटकश्शब्दः, तत्प्रतिपाद्यतादृशधर्मो वा तद्धर्मावच्छिन्ने लिङ्गम् ; न तु तद्धर्मावच्छिन्न-

व्याप्यसामान्यात्मकमनुमानं, तस्य दुर्बलत्वात् । किन्तु श्रुतेर्दुर्बलं वाक्याच्च प्रबलं वैदिकं लिङ्गम् । तच्च द्विविधं–एकपदात्मकमनेकपदात्मकञ्चेति । तत्राद्यं यथा–तल्लिङ्गादित्यादौ परोवरीयस्त्वादिकं, द्वितीयं यथा–तत्रैव सर्वभूतकारणत्वम् ॥

यत्तु–परोद्देशेन प्रवृत्तपुरुषकृतिकारकत्वेन विहितं यत् तत्त्वं तदङ्गत्वं, स्वर्गोद्देशप्रवृत्तपुरुषकृतौ यागानुकूलायां करणत्वेन विध्यन्वयात् यागे लक्षणसमन्वयः, प्रधानोद्देशप्रवृत्तपुरुषकृतौ प्रयाजाद्यनुकूलायां प्रयाजादेः करणत्वेन विध्यन्वयात् प्रयाजादावपि सद्द्रव्यगुणकर्तृकालदेशादौ प्रयाजाद्युद्देश्यकयागानुकूलकृतौ करणत्वकर्तृत्वाधिकरणत्वादिकारकत्वेन विधेयत्वात्तत्रापि लक्षणोपपत्तिः । निरुक्ताङ्गत्वघटकीभूतोद्देश्यताकृतिकारकत्वयोरन्यतरस्य प्राधान्येन वाचकश्शब्दः श्रुतिः । सा च द्वितीयातृतीयादिविभक्तिरूपा कृदन्तनिष्ठा, तृजादिव्यावृत्त्यर्थं प्राधान्येनेति; तस्य कारकत्वविशिष्टद्रव्यवाचित्वेन प्राधान्येन कारकत्ववाचित्वाभावान्नातिव्याप्तिः । ऐन्द्र्या गार्हपत्यमुपतिष्ठत इत्यादौ द्वितीयाया उद्देश्यत्वरूपशेषित्ववाचकत्वात् तृतीयायाश्च कारकत्वरूपशेषत्वबोधकत्वात् लक्षणसङ्गतिः । लिङ्गं नाम--अङ्गत्वघटकीभूतपरोद्देश्यताकृतिकारकत्ववाचकपदकल्पनानुकूलयोग्यता ; यथा स्रुवेणावद्यतीत्यत्र स्रुवनिष्ठाद्रवपदकल्पनानुकूला, एवं मन्त्रेषु स्वार्थप्रवृत्त्युद्देश्यतावाचिपदकल्पनानुकूला स्ववृत्तिकारकत्ववाचिपदानुकूला च योग्यता लिङ्गम् । तच्च द्विविधं--वस्तुसामर्थ्यरूपं शब्दसामर्थ्यरूपं च । तत्र स्रुवेणेत्यादौ आद्यं, बर्हिर्देवसदनं दामीत्यादौ लवनप्रकाशनसामर्थ्यरूपं द्वितीयम्–इति **मीमांसकैरुक्तम् ॥ तदपि**–अङ्गत्वप्रमाणभूतश्रुत्यादीनामेव लक्षणं, तेषामेव प्रकृतत्वात् ; अस्मदुक्तं तु श्रुत्यादिसामान्यलक्षणमिति न विरोधः । श्रुतेर्लिङ्गबाधकत्वमपि लिङ्गजन्यानुमितौ अप्रामाण्यग्राहकत्वमेव,

कदाचनेत्यादिमन्त्रगतेन्द्रप्रकाशकत्वरूपलिङ्गजन्यानुमितौ ऐन्द्र्या गार्हपत्यमिति श्रुतेरप्रामाण्यग्राहकत्वात्। न च—विनिगमनाविरहेण लिङ्गस्यैव श्रुतिजन्यबोधे अप्रामाण्यग्राहकत्वरूपं श्रुतिबाधकत्वमेव लिङ्गस्यास्त्विति—वाच्यम्। अविलम्बेनाङ्गत्वबोधिकायाः श्रुतेर्विलम्बेन तद्ग्राहकेण लिङ्गेन बाधायोगात् अविलम्बितधीजनकस्य बलवत्त्वात्, अन्यथा वह्न्यौष्ण्यग्राहिप्रत्यक्षस्यापि तदभावग्राहकेणानुमानेन बाधापत्तेः। उक्तं च **पार्थसारथिमिश्रैः**—

"प्रत्यक्षे चानुमाने च यथा लोके बलाबलम्।
शीघ्रमन्दरगामित्वात् तथैव श्रुतिलिङ्गयोः॥" —इति॥

न च—तदैक्षतेत्यादीनामपि तत्तदर्थे श्रुतित्वात् कथमेकया आकाशश्रुत्या बहुश्रुतीनां बाध इति—वाच्यम्। चैत्रस्सर्वज्ञो महापण्डितो धार्मिक इत्यादौ धर्मिवाचकचैत्रपदस्य यथाश्रुतार्थपरिकल्पनं स्वीकृत्य धर्मवाचकानां यथासम्भवं सङ्कोचकल्पनस्य दर्शनेन आकाशश्रुत्या ईक्षणादिश्रुतीनां बाधोपपत्तेः। एवं लिङ्गजन्यानुमितिजनकसिषाधयिषाविघटकत्वमपि श्रुतेर्लिङ्गबाधकत्वं; शाब्दीह्याकाङ्क्षा शब्देनैव प्रपूर्यत इति न्यायेन सदेवेत्यादिसामान्यज्ञानजन्यविशेषाकाङ्क्षायाः श्रुतिविषयकानुमितौ हेतुत्वेऽप्युत्थाप्याकाङ्क्षायाः श्रुत्यनुमितिहेतुत्वाभावात्; अन्यथा परार्थानुमितौ सिद्धसाधनस्यादोषत्वापत्तेः, तत्राप्येतदुत्तरक्षणवृत्तित्वविशिष्टानुमितिर्जायतामितीच्छासम्भवात्। परानुमितावुत्थिताकाङ्क्षाया एव पक्षतात्वावश्यकत्वात्। उक्तरीत्या श्रुतेर्लिङ्गबाधकत्वात् कारणस्याचेतनभेदसाधनानुमानमयुक्तमिति—**पूर्वपक्षस्सम्भवत्येव**॥

ननु—एवं आत्मन आकाश इति श्रुतौ कार्यत्वरूपलिङ्गश्रवणात् कारणत्वं न सम्भवतीत्याशङ्क्य सूक्ष्मस्थूलदशाभेदेन परिहाराभिधानं भाष्ये नोपपद्यते, कारणत्वश्रुतेः कार्यत्वलिङ्गेन बाधायोगात्।

प्रत्युत श्रुत्यैव ईक्षणादिलिङ्गबाधवत् कार्यत्वलिङ्गबाधस्यापि वक्तव्यत्वात्—इति चेन्न। तदैक्षतेत्यादीनां स्वार्थबोधकत्वासम्भवेन गौणार्थकत्वेऽपि सम्भूतशब्दस्य गौणार्थकत्वे वाय्वादावप्युत्पत्त्यसिद्ध्यापत्त्या गौणार्थकत्वमपि न युज्यत इत्यधिकाशङ्कया सम्भूतत्वलिङ्गे पृथक् पूर्वपक्षसिद्धान्तयोरुपपत्तेः। यद्वा—आकाशकारणत्वश्रुत्या एकया कारणविषयात्मश्रुत्याकाशविषयसम्भूतत्वलिङ्गयोः कथं बाध इति शङ्कायाः, आत्मशब्दस्य स्वरूपेऽपि रूढिसत्त्वात् सम्भूतपदसमानाधिकरणाकाशशब्दस्य स्थूलपरत्वादुभयोरपि न बाध इत्यभिप्रायेण समाधानस्य च सङ्गतेः। न च—आत्मन आकाश इति आत्मपदश्रुतिबाधो दुर्वार एव, अनुपपत्तिज्ञानं विना आत्मपदजन्योपस्थितिविषयस्य शरीरप्रतिसम्बन्धिरूपार्थस्य त्यागात् स्वरूपाद्यर्थान्तराणां अनुपपत्तिग्रहदशायामेव उपस्थाप्यत्वादिति—वाच्यम्; अस्मिन् प्रकरणे, अयमात्मा, आकाश आत्मा, आदेश आत्मा, योग आत्मेति आत्मपदेन शरीरभिन्नस्यैव ग्रहणेनानुपपत्तिज्ञानासहकृतपदजन्योपस्थितिविषयत्वरूपप्रसिद्धत्वस्य जीवादावभावेन तत्त्यागस्य श्रुतिबाधत्वायोगात् ॥

नन्वेवमपि—'ब्रह्म वा इदमग्र आसीत्', 'आत्मा वा इदमेक एवाग्र आसीत्', 'एको ह वै नारायण आसीत्', 'अथ पुरुषो ह वै नारायणोऽकामयत प्रजास्सृजेयेति', 'सोऽध्वनः पारमाप्नोति', 'तद्विष्णोः परमं पदं', 'स उत्तमः पुरुषः', 'सेयं देवतैक्षत', 'तेजः परस्यां देवतायां', 'अपहतपाप्मा दिव्यो देव एको नारायणः', 'स कारणं करणाधिपाधिपः', 'नित्यो नित्यानां चेतनश्चेतनानां'—इत्यादिश्रुतीनां कारणस्य चेतनताबोधकानां; 'आकाशशरीरं ब्रह्म', 'यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः', 'आकाशवत्सर्वगतश्च नित्यः', 'य आकाशे तिष्ठन्', 'य एषोऽन्तर्हृदय आकाशः', 'तस्मिन् शेते यस्मिन् पञ्च पञ्च जना

आकाशश्च प्रतीष्ठितः'–इत्यादिश्रुतीनां आकाशभेदबोधकानां, 'यस्सर्वज्ञस्सर्ववित्', 'सत्यकामस्सत्यसङ्कल्पः'–इत्यादि लिङ्गानां; च पूर्वपक्षे बाधो वक्तव्य इति एकया आकाशश्रुत्या परश्शतश्रुतिसहकृतानां परश्शतलिङ्गानां नारायणकारणताबोधकस्मृतिपुराणानां च बाधमभ्युपगम्य पूर्वपक्षावतारो न युक्तः॥ न च–उक्तबहुबाधापत्तेस्सिद्धान्तयुक्तित्वात् तदाच्छादनेन पूर्वपक्ष इति–वाच्यम्; एकैकवाक्यस्याच्छादनेन पूर्वपक्षस्य क्वचित् कृत्वाचिन्तामङ्गीकृत्य वर्णनेऽपि सर्वाच्छादनेन कृत्वाचिन्ताश्रयणस्यायोगात्, ईक्षत्यधिकरणे गतिसामान्यादित्यनेनानेकचेतनत्वग्राहकश्रुतिलिङ्गानां उक्ततया तदधिकरणोपरि पूर्वपक्षं कुर्वता तदाच्छादनायोगाच्च। अत आकाशेऽतिव्याप्तिवारणपरतया आकाशाद्यधिकरणत्रयव्याख्यानं युक्तम्; न त्वत्यन्तानुचितकृत्वाचिन्ताश्रयणेनासम्भववारणपरतया व्याख्यानम्––**इति चेत्**॥

मैवम्। लोकवेदयोश्चेतनविषये तत्प्रीतिसम्पादनाय तत्राविद्यमानैर्गुणैर्बहुधा स्तुतिदर्शनेन स्तुतिपरत्वसन्देहविषयत्वरूपान्यथासिद्धत्वस्य चेतनकारणताग्राहकश्रुतिलिङ्गादिषु सत्त्वेनाकाशश्रुतौ तदभावेनाकाशश्रुतीनां बाहुल्यस्य प्रदर्शितत्वेनानन्यथासिद्धत्वप्राबल्यवत्या आकाशश्रुत्या बहुश्रुतिलिङ्गानां बाधो युक्त इति पूर्वपक्षिणः आशयात् कृत्वा चिन्तायाः अनाश्रयणादिति॥

ननु––अस्य लोकस्य कागतिरिति प्रश्नवाक्यस्थस्य सर्वजगत्कारणत्वरूपसर्वलोकगतित्वलिङ्गस्योपक्रमस्थत्वेनाकाशश्रुत्यपेक्षया बलवत्त्वम्––**इति चेन्न**। प्रश्नस्य पृथिवीलोकगतिमात्रविषयत्वेन सर्वलोकगतिविषयत्वासिद्धेः। शालावत्यदाल्भ्यजैवलिभिरारब्धायां कथायां प्रथमं शालावत्यदाल्भ्ययोः। प्रश्नोत्तरपरम्परा प्रसूता––

"का साम्नो गतिरिति, स्वर इति होवाच, स्वरस्य का गतिरिति, प्राण इति होवाच, प्राणस्य का गतिरिति, अन्नमिति होवाच,

अन्नस्य का गतिरिति, आप इति होवाच, अपां का गतिरिति, असौ लोक इति होवाच, अमुष्य लोकस्य का गतिरिति, न स्वर्गं लोकमतिनयेदिति होवाच ॥"—

इति दाल्भ्येन स्वर्गलोके सामपरम्पराविश्रान्तिभूमित्वेन स्थापिते तस्य पक्षश्शालावत्येन दूषितः—'अप्रतिष्ठितं वै किल दाल्भ्य साम' इति। स्वर्गस्य मनुष्यकृतयजनाद्यधीनस्थितिकत्वेनानन्याधीनस्थितिकत्वरूपप्रतिष्ठात्वं नास्तीत्यर्थः। एवं दूषितस्वपक्षतया शिष्यभावं प्राप्तस्य दाल्भ्यस्य शालावत्यस्य च प्रश्नद्वयं प्रवृत्तं—'अमुष्य लोकस्य का गतिरिति, अयं लोक इति होवाच, अस्य लोकस्य का गतिरिति, न प्रतिष्ठां लोकमति नयेदिति होवाच'—इति। ततश्शालावत्यपक्षो जैवलिना दूषितः—अन्तवद्वै किल शालावत्य साम—इति। पृथिवीलोकस्य परिच्छिन्नत्वेन तस्यापरिच्छिन्नकारणवत्त्वावश्यकतया तस्यापि कारणपरम्पराविश्रान्ति भूमित्वं न सम्भवतीत्यर्थः। तदनन्तरं प्रवृत्ते जैवलिं प्रति शालावत्यप्रश्ने अस्य लोकस्य का गतिरिति इदंपदस्य पूर्वसन्दर्भानुसारेण पृथिवीमात्रपरत्वात् पृथिवीकारणत्वरूपस्य उक्तगतित्वस्य प्राथमिकत्वेऽपि नाकाशश्रुतिबाधकत्वसम्भवः॥ न च—पृथिवीमात्रकारणत्वस्यापां प्रसिद्धत्वेन प्रश्नवैयर्थ्यात्, अस्येति सर्वनामश्रुतेः प्रकरणात् बलीयस्याः सर्वकार्यविषयत्वौचित्याच्च अयं प्रश्नः सर्वलोकगतिविषय एवेति—वाच्यम्; अपां कारणस्य तेजसः प्रसिद्धत्वेऽपि अपां कागतिरिति प्रश्नवत् प्रकृतेऽपि प्रश्नोपपत्तेः, अन्तवत्त्वदूषणाभिधानेन प्रसिद्धविलक्षणमनन्तं कारणमस्तीत्यभिप्रायेण प्रश्नोपपत्तेश्च, प्रत्यक्षविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नवाचकस्य इदम्पदस्य सर्वलोकविषयत्वायोगाच्च॥ न च—अन्तवत्त्वदोषपरिहाराय प्रश्नस्य प्रवृत्तत्वेन सर्वजगत्कारणविषयत्वावश्यकत्वात् अस्येत्यस्य छत्रिन्यायेन सर्वजगल्लक्षकत्वमावश्यकमिति—वाच्यम्; सर्वजगत्कारणस्यापि अपरिच्छिन्नत्व-

विशिष्टपृथिवीकारणत्वेन प्रश्नसम्भवात् लक्षणाकल्पनस्यायुक्तत्वात्, पृथिवीरूपकारणस्यान्तवत्त्वदोषकथनानन्तरं प्रवृत्तस्य प्रश्नस्यानन्तत्व-विशिष्टविषयकत्वावश्यकत्वात् ॥

न च—अपृथक्सिद्धत्वस्वाश्रयापृथक्सिद्धत्वान्यतरसम्बन्धावच्छिन्नाभावाप्रतियोगित्वरूपस्य देशापरिच्छिन्नत्वस्य ध्वंसाप्रतियोगित्व-रूपकालपरिच्छिन्नत्वस्य वा नित्यविभूतिनिष्ठोक्तसम्बन्धावच्छिन्नाभाव-प्रतियोगिनि ध्वंसप्रतियोगिनि च भूताकाशे असम्भवात् ब्रह्मण्येव सम्भवात् अनन्तत्वलिङ्गस्य निरवकाशत्वेन प्रबलत्वात् तेन श्रुतिबाधो युक्तः—इति वाच्यम्; प्रतिष्ठात्वलिङ्गवत् अनन्तत्वस्यापि आपेक्षिकत्वोपपत्तेः। दाल्भ्याभिमतस्वर्गलोकोद्भावितप्रतिष्ठितत्वदोष-परिहाराय हि शालावत्येन स्वर्गलोकस्यापि गतित्वेनाभिमते पृथिवीतले प्रतिष्ठात्वमुपन्यस्तम्। न हि प्रतिष्ठात्वं निरपेक्षं ब्रह्म-णोऽन्यत्र सम्भवति, सापेक्षं तु स्वर्गेऽपि सम्भवत्येवेति तत्र स्वर्गव्यावृत्तपृथिव्याकाशसाधारणस्य प्रतिष्ठात्वस्य विवरणवत् अत्रापि अनन्तत्वस्य कालिकसम्बन्धेन पृथिवीव्यापकत्वे सति तदनधिकरण-कालवृत्तित्वात्मकपृथिव्यधिककालवृत्तित्वरूपस्य विवक्षणीयतया तस्याकाशसाधारणस्य निरवकाशत्वाभावात् ॥

न चैवमपि—स्वभिन्ननिष्ठोत्कर्षानवधित्वरूपं स्वभिन्ननिरूपितापकर्षानाश्रयत्वरूपं वा परोवरीयस्त्वं, निरवकाशत्वात् सफलत्वाच्च, आकाशश्रुत्यपेक्षया बलवत्, एवं स्वभिन्नकारणानपेक्षसर्वभूतकारणत्व-मपि एवकारार्थघटितं तेजःप्रभृतिसृष्टौ वाय्वादिकारणापेक्षे आकाशे न सम्भवतीति तदपि निरवकाशमिति—वाच्यम्; 'परोवरीयसो हि लोकान् जयति, परोवरीयसो ह्येवहास्यास्मिन् लोके जीवनं भवति, तथाऽमुष्मिन् लोके'—इति फलवचनपर्यालोचनया ऐहिकामुष्मिक-जीवनसाधारणस्य परोवरीयस्त्वस्य निरतिशयत्वेन व्यवस्थापयितु-

मशक्यतया परोवरीस्त्वमात्रस्य भूताकाशेऽपि सम्भवात्, ब्रह्मणोऽपि जगत्सृष्टौ अदृष्टादिसापेक्षत्वेनैवकारार्थघटितसर्वभूतकारणत्वस्य ब्रह्मण्यसम्भवात्, कथञ्चिदेवकारार्थसमर्थनस्य भूताकाशेऽपि सम्भवात्। तथा च–श्रुतेर्जात्या बहुत्वेन च प्राबल्यात्तयैव च लिङ्गानां बाधात् आकाश एव जगत्कारणमिति ईक्षणलिङ्गकानुमानमयुक्तम् ॥—इति **पूर्वः पक्षः** ॥

सिद्धान्तस्तु—यथाक्रतुन्यायेन ध्येयस्य प्राप्यत्वमवगतं, कारणं तु ध्येय इत्यनेन च कारणस्य ध्येयत्वं च । तच्च कारणं किमित्यपेक्षायां यतो वेति सामान्येनोपक्रम्य आनन्दाद्ध्येवेति आनन्दरूपविशेषे पर्यवमानं कृतम् । तथा च–कारणस्यानन्दरूपत्वेऽपि प्रकाशमानत्वापरिच्छिन्नत्वयोः अभावादितरेच्छानधीनेच्छाप्रयोज्यप्राप्तिकर्मत्वरूपं प्राप्यत्वं न सम्भवति; 'यत्तदद्रेश्यं', 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इत्यादिभिः ब्रह्मणो ज्ञानाविषयत्वस्य च चतुष्पात्त्वादिकथनेन परिच्छिन्नत्वस्य चावगमादित्यभिप्रायेण अस्य लोकस्य कागतिरिति प्रश्न उपन्यस्तः । तत्र गतिपदस्य उपक्रमानुसारात् कारणपरत्वेऽपि प्राप्यपरत्वं च विद्यत एव। उपक्रमो हि स्वावगतार्थप्रकारतां कल्पयति, न त्वन्यार्थकत्वं वारयति। तथा च–गतिशब्दस्य कारणप्राप्योभयपरत्वात् न कश्चिद्दोषः। अत एव गतिः प्राप्येति व्याख्यातम् । आकाशादेवेत्युत्तरवाक्यं च कारणस्यानन्दरूपस्य प्रकाशमानत्वानन्तत्वोभयविधानपूर्वकं प्राप्यत्वोपपादनपरं, आकाशः परायणमित्युक्तः ॥

यद्यपि—आनन्दप्रकरण एव 'यदेष आकाश आनन्दो न स्यात्' इत्यानन्दस्य प्रकाशमानत्वमुक्तमिति न वाक्यान्तरापेक्षा। **तथाऽपि** तत्रत्याकाशपदस्य देशापरिच्छेदपरत्वान्नानुपपत्तिः। 'को ह्येवान्यात्कः प्राण्यात्, यदेष आकाश आनन्दो न स्यात्, एषह्येवानन्द-

याति'–इति स्वयं पूर्णानन्दत्वाभावे अन्येषामानन्दप्रदत्वायोगस्याभिप्रेतत्वात् । अतस्त्यमाकाशत्वं प्रकाशमानत्वरूपम्, आनन्त्यं च सर्ववस्तुसामानाधिकरण्यार्हत्वरूपं वस्त्वपरिच्छिन्नत्वम् ; न हीदमनन्तत्वं आपेक्षिकतया योजनं सहते, उपपत्तिरूपतात्पर्यलिङ्गसहितत्वेन सङ्कोचानर्हत्वात् । जैबलिना पृथिवीलोकमन्तवत्त्वेन दूषितवता किं तर्ह्यनन्तं वस्तु तस्य कारणमिति पृष्टे, नाकाश इत्युत्तरिते, कथमेतस्य वस्त्वपरिच्छिन्नत्वं कालापरिच्छिन्नत्वं चेत्याकाङ्क्षायां—सर्वजगदुत्पत्तिलयकारणत्वरूपोपादानत्वप्रतिपादनेन वस्त्वपरिच्छेदस्यानादिकालप्रवृत्तसकलजगन्मूलकारणत्वोक्त्याऽनादित्वलाभेनानादिभावस्यनाशासम्भवेन कालापरिच्छेदस्य उपपादानात् ॥

ब्रह्मणश्चेतनाचेतनसामानाधिकरण्यं हि द्विविधं–पूर्वोत्तरकालीनावस्थावच्छिन्नयोरभेदावगाहिबोधजनकत्वं समानकालीनावस्थावच्छिन्नयोस्तादृशबोधजनकत्वं चेति ॥ तत्राद्यं–उपादानोपादेयभावप्रयुक्तम् ; अन्त्यञ्च–अपृथक्सिद्धिसम्बन्धावच्छिन्नाधाराधेयभावरूपशरीरशरीरिभावप्रयुक्तम् ; लोके मृत् घटः नीलो घट इत्यादौ द्विविधस्यापि दर्शनात् ॥

तत्राद्यं–तत्त्वमसीत्यादिबद्धावस्थजीवसामानाधिकरण्यं, 'सदेव सोम्येदमग्र आसीत्' इत्यादिस्थूलावस्थचेतनसामानाधिकरण्यं च ; 'सन्मूलास्सोम्येमास्सर्वाः प्रजास्सदायतनाः' इत्यादिना जगद्ब्रह्मणोरुपादानोपादेयभावं प्रतिपाद्य, 'ऐतदात्म्यमिदं सर्वं' इति सर्वत्र तत्प्रयुक्तसामानाधिकरण्यमुपपाद्य, तत्त्वमसीति विशेषे उपसंहरन्त्या श्रुत्या स्थूलावस्थचेतनाचेतनसामानाधिकरण्ये कार्यकारणभावस्य नियामकताबोधनात् ; 'सर्वं खल्विदं ब्रह्म तज्जलान्' इतिश्रुतौ कार्यकारणभावस्य सामानाधिकरण्यनियामकतायाः कण्ठोक्तत्वाच्च ॥

द्वितीयं च—शुद्धस्वरूपचेतनसामानाधिकरण्यं, कारणावस्थाचेतनसामानाधिकरण्यं च; 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणस्स्थितः' इति शरीरशरीरिभावमुक्त्वा 'स ब्रह्मा स शिवस्सेन्द्रस्सोऽक्षरः परमस्स्वराट्' इति तत्प्रयुक्तसामानाधिकरण्योपपादनात्, तत्राक्षरशब्देन मुक्तस्य ग्रहणात्, 'कूटस्थोऽक्षर उच्यते' इत्यादौ मुक्ते अक्षरशब्दप्रयोगात्, तस्य च परमः स्वराडिति विशेषणात्। परमत्वं च यदपेक्षया अतिशयितावस्था नास्ति तादृशावस्थावत्त्वं, स्वराट्त्वं अकर्मवश्यत्वम्—इति महाचार्यैर्व्याख्यातम्; 'तत्तेज ऐक्षत' इत्यस्य तेजश्शरीरकं ब्रह्मेत्यर्थात् ॥

ननु—द्रव्याद्रव्यसाधारणस्य द्रव्यत्वाघटितस्यापृथक्सिद्धिसम्बन्धावच्छिन्नाधाराधेयभावरूपस्य शरीरशरीरिभावस्यैव सामानाधिकरण्यनियामकत्वसम्भवात् उपादानोपादेयभावस्य तथात्वकल्पनमनुचितं; तत्त्वमसीत्यादावपि त्वंपदेन श्वेतकेत्वपृथक्सिद्धत्वेनैव बोधः, न तु द्रव्यत्वघटिततच्छरीरकत्वेन; **आनन्दमयाधिकरणभाष्ये** 'विशिष्टवाचित्वे शरीरवाचकत्वं न प्रयोजकं, अपि तु अपृथक्सिद्धप्रकारवाचित्वमेव; जातिगुणवाचिपदसामानाधिकरण्यानुरोधात्' इत्युक्तत्वात्॥ अत एव—'एतस्मिन् सम्प्रसादोऽन्वाचरित्वा' इत्यादौ सुषुप्त्यवस्थावाचकस्यापि सम्प्रसादपदस्य 'एष सम्प्रसादोऽस्माच्छरीरात्' इत्यादौ जीववाचित्वं, 'रसोऽहमप्सु कौन्तेय', 'पुण्यो गन्धः पृथिव्यां च' इत्यादौ रसगन्धादिपदानां ब्रह्मपर्यन्तत्वं च उपपद्यते ॥ न चैवं—रसगन्धादिशब्दानां तदाश्रयजलपृथिव्यादिवाचकत्वमपि स्यादिति—वाच्यम्; जलादेः मधुरत्वसुरभित्वाद्यवच्छिन्ननिरूपितापृथक्सिद्धिसम्बन्धावच्छिन्नाधारतास्वीकारेऽपि रसत्वगन्धत्वाद्यवच्छिन्ननिरूपिताधारतायाः अस्वीकारात् परमात्मनि तादृशाधारतास्वीकाराच्च रसोऽहमित्यादेरुपपत्तिः ॥

उक्तं च टीकायां—

"नियतनिष्कर्षकपदानामपि तथात्वं प्रयोगविशेषापेक्षं, न तु सार्वत्रिकं, रसोऽहमित्यादिप्रयोगात्; अतः पृथिव्याद्यपेक्षयैव गन्धादिशब्दानां नियतनिष्कर्षकत्वम् ॥" —इति ॥

तदपेक्षया नियतनिष्कर्षकत्वं च तन्निरूपितापृथक्सिद्धिसम्बन्धावच्छिन्नाधेयतानवच्छेदकधर्मावच्छिन्नवाचित्वमेव । तथा च—निरुक्तशरीरशरीरिभावेनैव सर्वत्र सामानाधिकरण्योपपत्तेः कार्यकारणभावस्य तन्नियामकत्वकल्पनमनुचितम्—इति चेन्न ॥ मृदयं घटः, बालो युवा जातः इत्यादौ कार्यकारणभावस्यापि सामानाधिकरण्यनियामकत्वदर्शनात्, सर्वं खल्विदमिति श्रुतिसिद्धत्वाच्च । इयान् विशेषः—कार्यकारणभावप्रयुक्तसामानाधिकरण्यस्थले सदेव सोम्येदमग्र आसीदित्यादौ स्थूलचिदचिच्छरीरकं सूक्ष्मचिदचिच्छरीरकाभिन्नमिति बोधे उद्देश्यतावच्छेदकस्थूलशरीरकत्वे विधेयतावच्छेदकसूक्ष्मशरीरकत्वस्य प्रयोज्यतासम्बन्धेन धर्मिपारतन्त्र्येण भानं तत्त्वमसीत्यादिशरीरात्मभावनिबन्धनं, सामानाधिकरण्यस्थले चोद्देश्यतावच्छेदकस्य समानकालीनत्वसम्बन्धेन विधेये भानं । यद्वा—उपादानोपादेयभावस्थले विशिष्टे विशिष्टस्य जन्यत्वाभेदोभयसम्बन्धेनान्वयः । शरीरात्मभावस्थले च केवलाभेदेनेति विशेषः । एतदभिप्रायेणैव यावद्विकारमित्यत्र श्रीभाष्यम्—

"ऐतदात्म्यमिदमित्यादिभिः आकाशस्य विकारत्ववचनेन तस्याकाशस्य ब्रह्मणो विभागः उत्पत्तिरुक्तैव ॥"—इति ॥

अत्राकाशस्य विकारत्ववचनेनेत्यस्य—विशिष्टे विशिष्टजन्यत्वस्य संसर्गत्वाद्विशेषणे तज्जन्यत्वं संसर्गः—इत्याकाशस्य तज्जन्यत्वं तद्वाक्यबोध्यमित्यर्थः । एवं च वस्त्वपरिच्छेदरूपानन्तत्वस्योपादानोपादेयभावरूपोपपत्तिसहितत्वेन बलवत्त्वात् आकाशश्रुत्या तस्य

सङ्कोचरूपबाधायोगात् श्रुतिबाधकत्वमेव। न च—पृथिव्यां प्रतिष्ठात्वमापेक्षिकमिति—वाच्यम्; निश्चलत्वरूपप्रतिष्ठात्वस्य ज्योतिश्चक्रान्तर्गतत्वेन भ्रमणशालिस्वर्गव्यावृत्तस्य पृथिव्यामसङ्कुचितत्वात्॥

यदुक्तं—सदेवेतिवाक्यस्थसत्पदार्थस्य विशेषाकाङ्क्षासत्त्वात् आकाशवाक्यं शब्दतन्मात्रत्वविधायकमिति; **तन्न,** सदेवेत्यादिकारणवाक्ये उपादानत्वे सति निमित्तत्वरूपकारणत्वस्यावगतत्वेन तथाविधोभयकारणत्वस्यापि जिज्ञासया अस्य लोकस्येत्यादेः प्रवृत्तत्वस्य वाच्यतया शब्दतन्मात्रत्वस्य उपादानगोचरापरोक्षज्ञानघटितकर्तृत्वव्याप्यत्वाभावेनाकाशादेवेत्यस्य तन्मात्रविधायकत्वे तथाविधप्रश्नोत्तरत्वानुपपत्तेः। न हि कस्तिष्ठति पचतीति प्रश्नस्य स्थितिमत्त्वपाककर्तृत्वोभयव्याप्यधर्मप्रश्नपरस्य घटस्तिष्ठतीत्यनेनैकमात्रवृत्तिव्याप्यधर्मप्रतिपादकेन उत्तरं सम्भवति। अतस्तद्वाक्यं योगार्थविधिपरमेव, किं चाकाशवाक्यस्य तन्मात्रत्वविधायकत्वे प्रसिद्धिबाधो दुर्वार एव; आकाशपदस्य तन्मात्रे प्रसिद्ध्यभावात्। एवमाकाशवाक्यस्य ह्येवशब्दोपबन्धेनानुवादित्वात् सदेवेत्यादिकारणवाक्यमेव तत्प्रापकं वक्तव्यम्। तत्र च—ईक्षणादिकं प्रतीतमिति तद्विरुद्धाकाशत्वं नानेन विधातुं शक्यं, उत्पत्तिशिष्टगुणावरुद्धे गुणान्तरानवरोधात्। किं च सकलश्रुतिस्मृतीतिहासपुराणानां भगवतः कारणत्वे यन्महातात्पर्यं तद्विरोधेनाकाशवाक्यं कथमचेनविशेषत्वविधायकं? निर्णीतं हि—महावाक्यविरुद्धार्थे अवान्तरवाक्यस्याप्रामाण्यं; यथा स्वर्गार्थाग्निहोत्रपरमहावाक्यार्थस्य 'यद्यमुष्मिन् लोकेऽस्ति वा न वा' इत्यादेः तदवान्तरवाक्यस्य एवमाकाशवाक्यस्याचेतनकारणतापरत्वे तद्वाक्यगतानां सर्वभूतकारणत्वसर्वस्माज्ज्यायस्त्वपरायणत्वादीनां लिङ्गानां अनुपपत्तिः; सर्वभूतकारणत्वं चाचित्संसृष्टचेतनसामान्यकारणत्वं; महच्छब्दपञ्चशब्दपृथिव्यादिशब्दसमभिव्याहाराभावे भूतशब्दस्याचित्संसृष्टचेतन-

परत्वं स्वतः प्राप्तम्; 'यतो वा इमानि भूतानि जायन्ते; येन जातानि जीवन्ति', 'न हिंस्यात्सर्वा भूतानि', 'भूतानां प्राणिनः श्रेष्ठाः' इत्यादिप्रयोगस्वारस्यात्। अचित्संसृष्टचेतनकारणत्वं चाचित्कारणत्वं; चेतनगतधर्मभूतज्ञानकारणत्वं च–चेतनस्य स्वरूपतः कार्यत्वायोगात् स्वभिन्नत्वस्वसामानाधिकरण्योभयसम्बन्धेन परिमाणविशिष्टपरिमाणवत्त्वरूपं यद्विकारित्वं, तद्व्यापककार्यतानिरूपितकारणत्वपर्यवसितम्; निरुक्तविकारित्वं चाचेतनचेतनगतधर्मभूतज्ञानोभयसाधारणम्। न ह्यागन्तुकावस्थासामान्यं विकारशब्दार्थः; तथा सति जीवेश्वरादीनामपि वायुसंयोगादिसत्त्वेन विकारित्वापत्तेः। अत एव–जीवस्य सङ्कोचविकासरूपपरिमाणद्वयाङ्गीकर्तृजैनमत एव विकारित्वमापादितं 'न च पर्यायादप्यविरोधो विकारादिभ्यः' इति सूत्रे। अन्यथा स्वमतेऽपि जीवेश्वरयोः आगन्तुकापृथक्सिद्धधर्मरूपावस्थावत्त्वात्मकद्रव्यलक्षणवत्त्वेन विकारित्वापत्तेः। स्वजनकसूक्ष्मावस्थावत्त्वस्वजनकसङ्कल्प वत्त्वोभयसम्बन्धेन स्थूलावस्थासामान्यवत्त्वमेव सर्वभूतनिरूपितोभयविधकारणत्वमिति फलितम्। सूक्ष्मावस्थावत्त्वं च–स्वाश्रयापृथक्सिद्धिसम्बन्धेन, तथाविधसम्बन्धस्यापि 'बालोऽपि यः प्रजानाति तं देवाः स्थविरं विदुः', 'काठिन्यवान् यो बिभर्ति'–इत्यादिमहर्षिव्यवहारेण वृत्तिनियामकत्वात्। उपादानत्वं न गौणं, सर्वस्यापि स्वस्वधर्मभूतज्ञानव्यतिरिक्तस्य भगवच्छरीरत्वेनाचेतनजीवीयधर्मभूतज्ञानयोरपि अपृथक्सिद्धिसम्बन्धेन भगवति सत्त्वात्। आकाशे च न स्वजनकसूक्ष्मावस्थावत्त्वसम्बन्धेन स्थूलावस्थासामान्यवत्त्वरूपं सर्वभूतोपादानत्वं, धर्मभूतज्ञानगतसूक्ष्मावस्थायाः उक्तसम्बन्धेनाकाशेऽभावात्। स्वाश्रयापृथक्सिद्धत्वं च–स्वाश्रयशरीरकत्वं; तेन शरीरान्तर्गतस्याकाशस्य स्वाश्रयापृथक्सिद्धिसम्बन्धेन धर्मभूतज्ञानगतसूक्ष्मावस्थावत्त्वेऽपि न क्षतिः॥

उक्तं च श्रीमति भाष्ये—

"निखिलजगदेककारणत्वं हि अचिद्वस्तुनः प्रसिद्धाकाशशब्दाभिधेयस्य नोपपद्यते, चेतनवस्तुनः तत्कार्यत्वासम्भवात् ॥"

—इति ॥

वस्तुतस्तु—आकाशस्य उपादानतावादिमते स्वजनकसूक्ष्मावस्थावत्त्वं अपृथक्सिद्धिसम्बन्धेनैव निवेश्यम् । तत्सम्बन्धेनैवाकाशे अचेतनगतस्थूलावस्थासामान्यवत्त्वात् । एवं च—जीवीयधर्मभूतज्ञानगतसूक्ष्मावस्थाया अपृथक्सिद्धिसम्बन्धेन आकाशेऽभावात् चेतनांशं प्रति आकाशस्य तन्मतरीत्या उपादानत्वं न सम्भवतीति भाष्याभिप्रायः । स्वजनकसङ्कल्पवत्तासम्बन्धेन स्थूलावस्थावत्त्वरूपं निमित्तत्वं तु अचेतनगतावस्थां प्रत्यपि आकाशस्य न सम्भवत्येवेति ॥

यद्यपि—आकाशादेवेति वाक्ये सर्वभूतोत्पत्तिकारणत्वमेवाकाशस्य प्रतीयते, उत्पूर्वकपद्लृधातोः उत्पत्त्यर्थकत्वात् । **तथाऽपि** सिद्धान्ते स्थूलावस्थायाः उत्पत्तिरूपत्वात् सूक्ष्मावस्थायाश्च लयरूपत्वात् स्वजनकावस्थावत्त्वसम्बन्धेन स्थूलसूक्ष्मोभयविधावस्थासाधारणावस्थासामान्यवत्त्वं सर्वभूतोत्पत्तिलयकारणत्वमिति नानुपपत्तिः । आकाशस्य कारणत्वे चाकाशत्वावस्थायाः शब्दतन्मात्रत्वावस्थाया वा स्वजनकावस्थावत्त्वसम्बन्धेनाकाशे अभावात्, 'सर्वाणि ह वा इमानि भूतानि' इत्यत्र सर्वपदसङ्कोचश्च दुर्वारः ॥

ननु—यतो वा इमानीत्यत्र इदम्पदस्याकाशभिन्नपरतया न सङ्कोचः । इदं सर्वमसृजतेत्यत्र इदम्पदस्य ब्रह्मभिन्नपरतामङ्गीकृत्य सिद्धान्तेऽपि ब्रह्मणः सृज्यकोटिनिवेशस्य वारणीयत्वात् । न च—'स एव सृज्यस्स च सर्गकर्ता' इत्यादिना ब्रह्मणोऽपि विशिष्टरूपेण सृज्यत्वावगमात्; अत्र नेदं पदस्य ब्रह्मभिन्नपरत्वावश्यकतेति—वाच्यम्;

(१.) (टि) स्वजनकसूक्ष्मावस्थावत्त्वसम्बन्धेनेवेत्यर्थः ॥

'जगत्सर्वं शरीरं ते' इत्यादौ जगत्पदस्य ब्रह्मतद्धर्मभूतज्ञानातिरिक्त-परत्वावश्यकत्वात्, तयोर्ब्रह्मशरीरत्वाभावात्। तथा च—स्पर्शाभाववत्त्वे सति शब्दवत्त्वरूपशब्दतन्मात्रसाधारणाकाशत्वावच्छिन्नभेद-विशिष्टस्योद्भूतशब्दवत्त्वरूपस्य भूतत्वस्य व्यापकं यत् कार्यत्वं तन्निरूपितकारणत्वं स्पर्शवत्त्वव्यापककार्यतानिरूपितकारणत्वपर्यवसितं सर्वभूतकारणत्वं आकाशस्य नानुपपन्नं; विशेष्यवन्निष्ठविशिष्टवद्भेदस्य विशेषणाभावरूपतया उद्भूतशब्दवन्निष्ठोक्तभेदस्य स्पर्शरूपत्वात्। यद्वा इमानीत्यस्य स्पर्शवन्तीत्यर्थः—**इति चेन्न**। भूतशब्दस्य महच्छब्दपञ्चशब्दादिसमभिव्याहाराभावे महाभूतपरत्वासम्भवस्य उक्तत्वात्। एवं सर्वैः कल्याणगुणैः सर्वस्मान्निरतिशयोत्कर्षवत्त्वरूपं सर्वज्यायस्त्वमपि आकाशस्य न सम्भवति, सर्वकल्याणगुणवत्त्वपर्यवसितस्य तस्याकाशे असम्भवात्॥ न च—नित्यमुक्तादिनिष्ठकल्याणगुणानां ब्रह्मण्यप्यभावात् सर्वकल्याणगुणवत्त्वं ब्रह्मणोऽप्यसम्भवीति—वाच्यम्; ब्रह्मणस्सर्वशरीरकत्वेन स्वाश्रयत्वस्वाश्रयापृथक्सिद्धत्वान्यतरसम्बन्धावच्छिन्नकल्याणगुणत्वव्यापकाधेयतानिरूपकत्वरूपस्य तस्य ब्रह्मण्यबाधात्, सर्वगन्धस्सर्वरस इत्यादौ एवमेव उपपादनीयत्वात्॥

यद्वा—कल्याणगुणवृत्तिजातित्वव्यापकावच्छेदकताकाधेयतानिरूपकत्वं सर्वकल्याणगुणवत्त्वं, ब्रह्मणि कल्याणगुणव्यक्तिसामान्याभावेऽपि तज्जात्यवच्छिन्नसामान्यस्य सत्त्वात् न बाधः। सिद्धान्ते—अतिरिक्तजातेरभावेऽपि द्रव्ये अवस्थाविशेषात्मकस्य गुणादौ **स्वरूपात्मकस्य** सौसादृश्यात्मकजातेः यथावस्तुसंस्थानं अनुसन्धेयमिति श्रीभाष्यसिद्धत्वात्॥

यद्यपि—सौसादृश्यस्य प्रतिव्यक्तिभिन्नस्यानुगतव्यवहारहेतुत्वं नोपपद्यते; **तथाऽपि** तस्य सादृश्यरूपत्वेन प्रतियोगित्वानुयोगित्वा-

न्यतरसम्बन्धेन प्रत्येकस्यापि सर्वव्यक्तिवृत्तित्वादनुगतव्यवहारोपपत्तेः तद्घटनिष्ठं सादृश्यं तस्मिन् अनुयोगितासम्बन्धेन तदन्यघटेषु प्रतियोगितासम्बन्धेन वर्तते ; अयं घटः इतरघटैः घटत्वेन सदृश इति व्यवहारात्, सादृश्यस्य साधारणधर्मरूपतामते मुखगतकान्तेरपि प्रतियोगितासम्बन्धेन चन्द्रवृत्तित्वस्वीकारात्; तार्किकमते सत्तायास्समवाय स्वसमवायिसमवेतत्वरूपसम्बन्धभेदेऽपि घटस्सन् सामान्यं सदिति एकजातीयव्यवहाराङ्गीकारवत् सिद्धान्ते सम्बन्धभेदेऽपि एकविध-व्यवहारोपपत्तिरित्यादिकं जातिवादे स्पष्टम् ॥

यद्यपि—निरुक्तं सर्वकल्याणगुणवत्त्वं नित्यादिसाधारणं ; तथाऽपि स्वव्यधिकरणसङ्कल्पाप्रयोज्यत्वस्य गुणेषु विशेषणात् नातिव्याप्तिः । अत एव श्रीमति भाष्ये—'सर्वस्माज्ज्यायस्त्वं च निरुपाधिकं, सर्वैः कल्याणगुणैः सर्वेभ्यो निरतिशयोत्कर्षः'—इत्युक्तम् । निरुपाधिकत्वस्य स्वव्यधिकरणेत्यादिरूपत्वात् उत्कर्ष इति उत्पूर्वककृषिधात्वर्थविशेषणत्वात् निरुपाधिकमिति द्वितीया, परायणत्वं च इतरप्राप्तीच्छानधीन-मुक्तगतेच्छाजन्यप्राप्तिकर्मत्वम् । प्राप्तिकर्मत्वरूपायनत्वघटकप्राप्तौ इतरप्राप्तीच्छानधीनेच्छाजन्यत्वस्य परशब्दार्थत्वात् परविशेषणाच्चार्चिरादिव्यावृत्तिः । मुक्तोपसृप्यव्यपदेशादिति सूत्रेऽपीदृशमुक्तप्राप्यत्वस्य परमात्मत्वसाधकत्वस्याभिमतत्वादेव नार्चिरादौ व्यभिचारः । यद्वा—परायणत्वघटकप्राप्यत्वमेव इतरेच्छानधीनेच्छाप्रयोज्यचेतन-कर्तृकप्राप्तिविषयत्वं, इष्टतमत्वस्य कर्मत्वघटकत्वात् । तत्र परत्वं च उत्कर्षानवधित्वे सति स्थिरत्वम् । अतः उक्तानां गुणानां लिङ्गानां आकाशवाक्य एव विद्यमानत्वात् तद्वाक्यगतं आकाशत्वं स्वप्रकाशत्व-रूपमेवेति बोध्यम् ॥

सूत्रार्थस्तु—आकाशादेवेति वाक्यगताकाशपदतात्पर्यविषयः आकाशपदरूढ्यर्थात् भिन्नः, रूढिबाधकानां लिङ्गानां उक्तवाक्य

एव सत्त्वादिति पूर्वसूत्रादनुकृष्टस्य विधेयवाचकस्य अस्य पदस्याकाश-पदरूढ्यर्थभिन्नपरत्वात्, सूत्रस्थाकाशपदस्य तद्वाक्यगताकाशपदतात्पर्यविषये लक्षणास्वीकारात् । अन्यथा—आकाशपदतात्पर्यविषयत्वावच्छेदेन उक्तभेदसाधने आत्मन आकाश इति वाक्यप्रतिपन्ने बाधात्; ब्रह्मपरत्वकोटिकतया संशयिताकाशपदतात्पर्यविषये लक्षणास्वीकारे च आकाशोऽर्थान्तरत्वादिव्यपदेशादित्यस्यानुत्थितिः; भूतपरत्वब्रह्म-परत्वोभयकोटिकसंशयनिवेशेऽपि दहराधिकरणानुत्थितिरिति उक्त-वाक्यघटकाकाशपदतात्पर्यविषय एव लक्षणा युक्तेति बोध्यम् ॥

यत्तु—आकाशपदस्य योगपक्षे गौरवमभिहितं, तत्तु—सार्वज्ञ्यसत्य-सङ्कल्पत्वाद्यनन्तगुणप्रतिपादकानन्तवेदवाक्यानां लक्षणाप्रयुक्तगौरवा-पेक्षया अल्पीय इति न दोषावहम् । उक्तं च **श्रीभाष्ये**—

"अनेकवाक्यगतिसामान्यं चैकेनानुवादसरूपेणान्यथाकर्तुं न शक्यते ॥" —इति ॥

एवं चाचेतनविशेषत्वस्याकाशत्वाविधानान्न बाधः । नापि पक्षता-विरहः आकाशवाक्यस्य प्रकाशमानत्वविधायकत्वेऽपि कारणं चेतनं अचेतनं वेति विशेषानवगमेनाकाङ्क्षासत्त्वेन सिषाधयिषारूपपक्षतासद्भावात्, आ काशते स्वस्मै प्रकाशत इति टीकावाक्ये च स्वस्मा इत्यस्य स्वीयाय मुक्तायेत्यर्थः । तेनाकाशवाक्येन न चेतनत्वावगम इति सिषाधयिषोपपत्तिः; तद्वाक्ये प्राप्यत्वोपयुक्तस्य मुक्तं प्रति भासमानत्व-स्यैव विवक्षितुमुचितत्वात्, अपेक्षितविधेरिति न्यायात् । यद्वा—स्वस्मा इत्यस्य आत्मन इत्येवार्थः ॥ न चैवं—स्वकर्तृकव्यवहारजनकतावच्छेदक-स्वनिरूपितविषयताश्रयत्वरूपचेतनत्वस्याकाशवाक्यादेव लाभात् सिषाधयिषारूपपक्षताविरहः शङ्क्यः । ईक्षत्यधिकरणे हि अनुमानेन श्रुत्या च कारणस्याचेतनभेदसाधनमभिप्रेतं, श्रुतत्वाच्चेति सूत्रेण श्रुत्याऽप्यचेतनभेदसाधनात् । एवं चाकाशवाक्यस्य स्वप्रकाशत्वरूपयोगार्थता-

पक्षे अनुमानेन तत्साधनसम्भवेऽप्युक्ताकाशश्रुत्यैवाचेतनभेदसिद्ध्या सर्वथा अचेतनभेदो न सम्भवतीति पूर्वपक्षासम्भवात्। पूर्वपक्षस्तु रूढिपक्षमवलम्ब्यैवावतारित इति बोध्यम् ॥

न च—अस्मिन्नधिकरणे निखिलजगत्कारणत्वादिलिङ्गेनाकाशश्रुतेः रूढ्यर्थबाधाङ्गीकारो न युक्तः, पूर्वतन्त्रे क्वापि तथाऽनङ्गीकारादिति—वाच्यम् ; आकाशादेवेत्याकाशप्रतिपादकस्य श्रुत्याभासतया श्रुतित्वाभावात् । तद्धर्मावच्छिन्नविषयकश्रुतित्वं च अप्रामाण्यज्ञानानास्कन्दितबोधजनकतद्धर्मावच्छिन्नविषयकनिरुक्तोपस्थितिजनकत्वम्। एवं च गङ्गायां घोष इत्यत्र गङ्गापदस्य प्रवाहत्वावच्छिन्नोपस्थितिजनकत्वेऽपि तादृशोपस्थितेरप्रामाण्यज्ञानानास्कन्दितबोधजनकत्वाभावात् यथा श्रुत्याभासता, तत्र प्रवाहे घोषाधिकरणत्वबाधेन प्रवाहबोधस्याप्रमाण्यज्ञानास्कन्दितत्वात् ; तथाऽकाशादेवेति वाक्यजन्याकाशत्वबोधस्यापि कारणत्वादिलिङ्गबाधेन अप्रामाण्यज्ञानास्कन्दितत्वेनाभासतैव । ततश्च लिङ्गेन बाधेऽपि नानुपपत्तिः ॥

उक्तञ्च टीकायां—

"यथा गङ्गाशब्दः स्वार्थसमर्पणक्षमो भूतलधर्मतया प्रत्यक्षसिद्धघोषाधिकरणत्वलिङ्गविरोधेनान्वययोग्यस्वार्थप्रतिपादन-क्षमत्वाभावात् श्रुत्याभासः । एवं अकाशशब्दोऽपि योग्यार्थश्रुतिमूललिङ्गापेक्षया श्रुत्याभास एव ॥" —इति ॥

एवं श्रुतेः प्राबल्यं हि प्रथमोपस्थितिप्रयुक्तं, लिङ्गानां च बहुत्वप्रयुक्तमिति प्रथमोपस्थितिप्रयुक्तप्राबल्यादपि बहुत्वप्रयुक्तम् ; तदेव बलवत्। विप्रतिषिद्धधर्मसमवाये भूयसां स्यात् स्वधर्मत्वमिति न्यायात्; 'अग्नीषोमीयं पशुमालभेत' इत्युत्पत्तिवाक्ये 'देवतासम्बन्धेनावगतं पशोर्हविष्ट्वं हृदयस्याग्रे अवद्यति' इत्यादिहृदयादिहविष्ट्वावगमकाने-

कवाक्यविरोधात् सद्वारकं व्यवस्थापितं पूर्वतन्त्रे । किञ्च द्विविधं हि लिङ्गं-शब्दसामर्थ्यमर्थसामर्थ्यं चेति । तत्राद्यं श्रुतिलिङ्गेत्यादिसूत्रे विवक्षितम् । तद्धि गौणमुख्यसाधारणम् । मुख्यासम्भवे गौणे विश्राम्यति । चरमन्तु वस्तुनो द्वैरूप्यायोगात् श्रुतेरेव बाधकम् । तद्यथा—'सोमेन यजेत', 'आदित्यो यूपः', 'कृष्णलं श्रपयेत्' 'हस्तेनावद्यति'—इत्यादौ सोमयागाभेदादित्यसामानाधिकरण्येनावगम्यते। न हि श्रौतोऽपि क्रियाद्रव्ययोरभेदः कृष्णलानां मुख्यः पाकः, हस्तादेरवदानसामान्याङ्गत्वं वाऽङ्गीक्रियते, क्रियात्वस्य द्रव्यभेदव्याप्यतया कृष्णलत्वादेः पाकाद्यभावव्याप्यतया च तथाविधलिङ्गेन श्रुतेर्बाधात् । न च-तत्र क्रियायां द्रव्याभेदस्य वाक्यार्थतया तद्बाधेन लिङ्गेन वाक्यस्यैव बाधः, न श्रुतेरिति—वाच्यम्; तथा सति कारणे आकाशभेदस्यापि वाक्यार्थतया तद्बाधेऽपि श्रुतिबाधकत्वानापत्तेः ॥

ननु—ऐन्द्र्या गार्हपत्यमुपतिष्ठत इत्यादावपि कथं श्रुतिलिङ्गयोर्विरोधः । द्वितीयातृतीयाभ्यां प्रतियोग्यनुपरक्तशेषशेषिभावमात्रबोधनात्, तादृशस्य च ऐन्द्र्याः शेषत्वस्य गार्हपत्यशेषित्वस्य च भिन्नप्रतियोगिसाधारणस्याविरोधात् । ऐन्द्र्या इन्द्रं प्रति शेषत्वं गार्हपत्यस्य कां चिदाग्नेयीं प्रति शेषित्वं चादाय श्रुतेरुपपत्तेः । द्वितीयान्तगार्हपत्यपदसमभिव्याहृततृतीयान्तैन्द्रीपदबोध्यं गार्हपत्यनिष्ठशेषितानिरूपितैन्द्रीनिष्ठशेषत्वं च वाक्यवेद्यं मन्त्रबोध्येन्द्रनिष्ठशेषितानिरूपितशेषत्वविरुद्धमिति वाक्यलिङ्गयोरेव विरोधात् , लिङ्गेनैव वाक्यबाधापत्तेः ॥

यदि च—अत्र न केवलवाक्येन लिङ्गस्य विरोधः, गार्हपत्यपदस्य इन्द्रे द्वितीयाया वा आधारत्वे लक्षणासम्भवात्; किं तु वाक्यसहितया श्रुत्या । तथा च श्रुतिलिङ्गयोर्विरोधेऽपि इदमुदाहरणं भवति। अत

एव **पार्थसारथिना**—

"शेषशेषित्वं हि...श्रुत्यैन्द्रीगार्हपत्ययोः ।
उक्तमन्योन्यविषयनियमस्त्वेकवाक्यतः ॥"

इति कारिकया उक्तपूर्वपक्षं कृत्वा—

"सत्यं वाक्यविरोधोऽस्ति श्रुतितोऽपि विरुध्यते ।
सहिते हि विरुध्येते न तु लिङ्गेन केवले ॥"

इति समाहितमिति—**विभाव्यते** । **तदा** सोमेन यजेतेत्यादावपि श्रुतिलिङ्गविरोधे लिङ्गेन सोमपदश्रुतेः यथाश्रुतार्थं परित्यज्य मतुबन्तार्थलक्षणास्वीकाररूपो बाधोऽस्त्येवेति, तद्वत् आकाशादेवेत्यादावपि चेतनाचेतनात्मककृत्स्नजगदुपादानताभिन्ननिमित्ततारूपेणार्थसामर्थ्यरूपलिङ्गेनाकाशश्रुतेर्बाधो युज्यत एव ॥ न च—प्रत्यक्षाद्यवगतस्यार्थसामर्थ्यात्मकलिङ्गस्य श्रुत्या बाधासम्भवेऽपि शब्दैकगम्यस्य तस्य श्रुत्या बाधस्सम्भवत्येव ; 'कदा चन स्तरिरसि' इति मन्त्रे इन्द्रपदस्येन्द्रप्रकाशनसामर्थ्यबाधवत् ईक्षतिधातोरप्याकाशश्रुत्या सङ्कल्पार्थकत्वबाधसम्भवेन निमित्तत्वस्यापि बाधोपपत्तेरिति—वाच्यम् ; पुरोवादानुरोधेनानुवादस्य नेयतायास्सर्वसिद्धत्वेन पुरोवादभूतसद्विद्यागतेक्षणस्याकाशश्रुत्या बाधायोगात् ; अन्यथा उत्पत्तिशिष्टद्रव्यादेरपि उत्पन्नशिष्टद्रव्यादिना बाधापत्तेः । एवं तत्त्वबुभुत्सया प्रश्नस्थलेऽपि बहुशश्चेतनकारणताग्राहकश्रुतिलिङ्गानां दर्शनेन तेषां स्तुतिपरतया अन्यथासिद्ध्यसम्भवेन सत्सहकृतपरश्शतलिङ्गैराकाशश्रुतेर्बाधो युक्त एव ॥ **यद्यपि**—अत्राधिकरणद्वयस्य ऐकरूप्येण धर्मशब्देन लिङ्गशब्देन वा हेतूपस्थापनं सम्भवति, अथवा पूर्वाधिकरणे धर्मलिङ्गान्यतरशब्देन हेतुं निर्दिश्य आकशश्चेति वा निर्देष्टुं शक्यम्; चशब्दमहिम्ना पूर्वहेत्वनुकर्षसिद्धेः । तथाऽपि पूर्वाधिकरणे धर्मशब्देनात्र च लिङ्गशब्देन हेतुं निर्दिशतोऽयं भावोऽवगम्यते ;

श्रुत्यवलम्बनपूर्वपक्षस्य लिङ्गमात्रेण निरासासम्भवेऽपि अनन्यथा-सिद्धत्वरूपप्राबल्यवल्लिङ्गेन निरासस्सम्भवतीति लिङ्गपदस्या-नन्यथासिद्धत्वरूपप्राबल्यविशिष्टपरत्वात् । तत्रापि लिङ्गादिति विहाय तल्लिङ्गादित्युक्तिस्तु चेतनत्वग्राहकश्रुतिबोधनायेति बोध्यम् ॥

अद्वैतवादिनस्तु—आकाशशब्दस्य 'आत्मन आकाशस्सम्भूतः' इत्यादिश्रुतिषु भूतविशेष इव 'आकाशो ह वै नामरूपयोर्निर्वहिता' इत्यादौ ब्रह्मण्यपि प्रयोगदर्शनेन आकाशादेवेतिवाक्यगताकाशपद-तात्पर्यविषयस्य भूतत्वब्रह्मत्वाभ्यां सन्देहे भूतविशेषनिरूढप्रथमानुप-जातविरोध्याकाशपदानुरोधेन बहून्यपि चरमाणि सर्वकारणत्वज्या-यस्त्वानन्तत्वादीनि भूताकाशे कथं चिद्योज्यानीति प्राप्ते ; यद्यप्या-काशपदं सर्वाणीत्यादितः प्रथमं, तथाऽपि परिहारवाक्यस्थाकाशपदा-दपि प्रथमानुपजातविरोधिप्रश्नानुसारेण उत्तरवाक्यस्य नेयत्वात्, 'अस्य लोकस्य का गतिः' इति प्रश्नस्य च दृश्यमानसर्वप्रपञ्चविषयत्वात् सर्व-लोकगतिरेवाकाशपदेन प्रतिवक्तव्या । न च सर्वलोकान्तर्गतो भूता-काशस्सर्वलोकगतिः, किं च सर्वकारणत्वादिबह्वनुग्रहार्थमेकमाकाशपदं जघन्यवृत्त्या ब्रह्मपरं, 'त्यजेदेकं कुलस्यार्थे' इति न्यायात् ; तस्मा-त्सोपाधिकं ब्रह्मैवाकाशपदेन उपास्यत्वेन उपक्षिप्तमिति सिद्धान्तः॥ —इति वदन्ति ॥

तन्न । यतः संशये कोटिद्वयसमानाधिकरणधर्मवत्ताज्ञानस्यैव साधारणधर्मवत्ताज्ञानविधया संशयहेतुत्वं, न तु कोटिद्वयसम्बन्धिधर्म-वत्ताज्ञानस्य तथा, आत्मनि नित्यत्वतदभावसहचरितद्रव्यत्ववत्ता-ज्ञानस्य आत्मा नित्यो न वेति संशयहेतुत्वेऽपि नित्यत्वतदभाव-विषयकज्ञानवत्ताज्ञानस्य तथात्वाभावात् ॥

यद्यपि—साधारणधर्मवत्ताज्ञानस्य कोट्युपस्थितिद्वारा संशयहेतुत्वं संशयजनककोट्युपस्थितिजनकत्वरूपं सम्बन्धान्तरेण कोटिद्वयविशिष्ट-

धर्मवत्ताज्ञानस्यापि कोट्युपस्थितिहेतुत्वादक्षतं ; सम्बन्धिज्ञानस्य सम्बन्ध्यन्तरस्मारकत्वात् । **तथाऽपि**—साधारणधर्मवत्ताज्ञानजन्यकोट्युपस्थितेरेव संशयहेतुत्वात् सम्बन्धान्तरेण कोटिसम्बद्धधर्मवत्ताज्ञानजन्योपस्थितेः तद्धेतुत्वाभावात् सम्बन्धान्तरेण कोटिसम्बद्धज्ञानं न संशयहेतुः ॥

एवं च—आकाशपदतात्पर्यविषये आकाशब्रह्मोभयबोधकाकाशपद्बोध्यताज्ञानात् आकाशो भूताकाशो ब्रह्म वेति संशयवर्णनमयुक्तम्। न च—आकाशपदस्य स्वनिरूपितवृत्तिमत्तासम्बन्धेन भूताकाशत्वब्रह्मत्वोभयसमानाधिकरणतया तेन सम्बन्धेन तद्वत्त्वस्याकाशपदतात्पर्यविषये सत्त्वात् उभयत्र आकाशपदप्रयोगज्ञानस्य साधारणधर्मवत्ताज्ञानविधया हेतुत्वोपपत्तिरिति—वाच्यम् ; अश्रुतवेदान्तस्य ब्रह्मणि आकाशपदवृत्तिज्ञानाभावेन आकाशपदे उभयसाहचर्यज्ञानाभावेन संशयायोगात्, तेन[1] 'सर्वाणि ह वा इमानि भूतानि' इति वाक्यस्याकाशशब्दवत् 'आकाशो ह वै नामरूपयोर्निर्वहिता' इति वाक्यस्याकाशपदस्यापि ब्रह्मविषयत्वानिश्चयात् श्रुतवेदान्तस्याकाशादेवेत्यत्रापि ब्रह्मपरत्वनिश्चयेन संशयासम्भवात् ॥

यद्यपि—एकोनसहस्राधिकरणन्यायेन आकाशो ह वा इति वाक्यस्य परमात्मविषयत्वसम्प्रतिपत्तिस्सुवचा । किं च 'यदेष आकाश आनन्दो न स्यात्' इत्यादौ पूर्वाधिकरण एव प्रतिपादितपरब्रह्मप्रतिपादकानन्दवल्लीगताकाशपदस्य ब्रह्मणि प्रयोगात् संशयोपपत्तिः । **तथाऽपि**—चिदचिद्विलक्षणब्रह्मासम्भवरूपलक्ष्यासम्भवप्रयुक्तलक्षणासम्भवनिरासात्मकायोगव्यवच्छेदस्य प्रथमपादसाध्यत्वेनातिव्याप्तिपरिहारकत्वरूपान्ययोगव्यवच्छेदपरतयाऽधिकरणयोजनस्यायुक्तत्वेन तथा संशयवर्णनायोगात् ॥ न च—एतत्पूर्वैरधिकरणैरेव चिद-

---

१. (टि) तेन पूर्णेणेत्यर्थः ॥

चिद्विलक्षणब्रह्मसिद्ध्या उक्तसंशयोपपत्तिरिति—वाच्यम्; 'सदेव सोम्येदमग्र आसीत्', 'ब्रह्मविदाप्नोति परं', 'आत्मन आकाशस्सम्भूतः' इत्यादिसद्ब्रह्मात्मादिशब्दानां साधारणानामाकाशप्राणेन्द्रादिविशेषपर्यवसाने सति चिदचिद्विलक्षणकारणास्तित्वासिद्धेः; ईक्षणानन्दविशेषानुगुणतया नेयत्वे सत्येव तत्सिद्धेश्च। अत उक्तरीत्या साधारणधर्मवत्ताज्ञानात् संशयोपपादनमयुक्तम् ॥

यदपि—भूताकाशः परमेश्वरो वेत्याकाशशब्दलिङ्गाभ्यां संशय इति न्यायरक्षामणावुक्तम्; तदपि न—आकाशश्रुतेरेव सत्त्वेन लिङ्गाभावात्, अपरिच्छिन्नत्वरूपानन्तत्वस्य शुद्धब्रह्मलिङ्गत्वेन परमेश्वरलिङ्गत्वाभावात् ॥

न च—परिमाणाधिक्यरूपं गुणाधिक्यरूपं वा ज्यायस्त्वं ईश्वरलिङ्गं अस्तीति—वाच्यम्; तथा सति आकाशपदतात्पर्यविषयो भूताकाशः परमेश्वरः शुद्धं वेति त्रिकोटिकसंशयापत्तेः। न च—विशिष्टशुद्धयोस्तादात्म्यात् शुद्धलिङ्गमपि स्वाश्रयतादात्म्येन विशिष्टे अस्तीति शुद्धस्य संशयकोटित्वमिति—वाच्यम्; तथा सति स्वाश्रयतादात्म्यसम्बन्धेन ब्रह्मधर्माणां भूताकाशेऽपि सत्त्वेन भूताकाशत्वनिश्चयस्यैव युक्तत्वेन संशयानुपपत्तेः। अत एव कार्यगतहिरण्यश्मश्रुत्वादेः कारणे उक्तसम्बन्धेन व्यपदेश इति पूर्वाधिकरणे भवद्भिरङ्गीकृतम्। एवमाकाशशब्दस्य ब्रह्मणि गौणवृत्तिप्रतिपादनमपि न युक्तम्; शक्तिसम्भवे लक्षणाया एवायुक्तत्वेन गौण्या अत्यन्तायुक्तत्वात्, अपशूद्राधिकरणे जगद्वाचित्वाधिकरणे च शूद्रशब्दस्य कर्मशब्दस्य च शङ्करभाष्येऽपि योगशक्तेरेवाङ्गीकारात्, अन्यथा तत्रापि रूढ्यर्थबाधेन लक्षणाया एवाङ्गीकारापत्तेः ॥

यत्तु—पद्मान्यविशेष्यकपङ्कजनिकर्तृत्वप्रकारकशाब्दत्वावच्छिन्नं प्रति पङ्कजपदं पद्मे शक्तमिति रूढिज्ञानत्वेन प्रतिबन्धकता, अन्यथा

केवलयोगशक्त्या कुमुदादिबोधापत्तेः। तत्र शाब्दबोधे पङ्कज-पदजन्यत्वं निवेश्यं; अन्यथा कर्दमजादिपदात् पङ्कजनिकर्तृत्वेन कुमुदादिबोधस्य अनुदयप्रसङ्गात्। तत्राप्यवयवशक्त्या पङ्कजपदजन्यत्वं निवेश्यम्। तेन समुदायलक्षणया पङ्कजपदात् पङ्कजनिकर्तृत्वेन कुमुदादिबोधस्य उक्तरूढिज्ञानकाले सम्भवेऽपि न क्षतिः। एवं पद्मान्यविशेष्यकत्वं पद्मत्वानवच्छिन्नविशेष्यताकत्वं; तेन कुमुदादावेव पद्मत्वेन भ्रमात्मकरूढिज्ञानकाले न ताद्रूप्येण कुमुदादिबोधानुपपत्तिः। एवं च—प्रकृतेऽपि आकाशपदं महाभूतविशेषे रूढमिति रूढिज्ञानस्य आकाशान्यविशेष्यकावयवशक्तिज्ञानजन्यप्रकाशमानत्वरूपयोगार्थबोधं प्रति प्रतिबन्धकत्वावश्यकतया योगेन ब्रह्मबोधासम्भवात् ब्रह्मण्या-काशपदस्य लक्षणा आवश्यकी। शूद्रादिशब्दजन्ययोगार्थबोधे च न जातिविशेषे रूढिज्ञानस्य प्रतिबन्धकत्वम्; तस्य जातिविशेषा-वच्छिन्ने योगरूढत्वाभावात्, मण्डपपदादेरिव यौगिकरूढताया एव स्वीकारात्। आकाशपदस्य च योगरूढत्वेन तत्र योगेन आकाशा-न्यबोधो न सम्भवति। अत एव—प्रोद्गात्रधिकरणे उद्गातृपदस्य योगेन प्रस्तोत्रादिबोधकत्वसम्भवेऽपि ऋत्विग्विशेषे रूढिज्ञानस्य प्रतिबन्धकत्वाभिप्रायेणैव लक्षणा समाश्रिता। तस्मात् **श्रीभाष्ये** आकाशपदस्य ब्रह्मणि योगवर्णनमयुक्तम्॥ —इति॥

तन्न। योगरूढत्वं हि—रूढिशक्यतावच्छेदकसमानाधिकरणयोग-शक्यतावच्छेदककत्वं, न तु रूढिशक्यतावच्छेदकव्यापकतत्कत्वम्; तथा सति स्थलपद्मनाभीपद्मादिसाधारणपद्मत्वं प्रति पङ्कजनिकर्तृ-त्वस्य व्यापकत्वाभावेन पङ्कजपदस्यापि योगरूढत्वानुपपत्तेः। न च—नाभीगतपद्मतात्पर्येण पङ्कजपदप्रयोगोऽप्रामाणिक इति—वाच्यम्। 'रिरक्षिषोचितजगत्तापरम्परापरामिव प्रथयति नाभिपङ्कजम्' इति **श्रीरङ्गराजस्तवे** अभियुक्ततमानां प्रयोगदर्शनात्॥

यदि च—तत्र उपमाद्यर्थवर्णनेन नाभीगतपद्मतात्पर्यकत्वं नास्ति इत्युच्यते। तदाऽपि—'हेमाम्भोजैर्निबिडनिकटे रामसीतोपनीतैः' इति प्रयोगविषयस्वर्णपद्मसाधारणपद्मत्वव्यापकत्वाभावात् योगशक्यतावच्छेदकस्येति योगरूढत्वानुपपत्तिरम्भोजपदस्य दुर्वारैव । एवं च—शूद्रादिसाधारणशोचितृवाचकशूद्रशब्दस्यापि योगरूढतया तत्रापि 'केवलयोगार्थबोधानुपपत्त्या उक्तप्रतिबध्यप्रतिबन्धकभावस्यैवाप्रामाणिकत्वात्, **चिन्तामणिकृता** रूढिज्ञानप्रतिबन्धकताया अस्वीकाराच्च। अत एव—पङ्कजनिकर्तृत्वनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकतासम्बन्धेन शाब्दं प्रति तादात्म्येन पद्मत्वं हेतुरिति न केवलयोगेन कुमुदादेर्बोधप्रसङ्गः; पद्मत्वं प्रयोगोपाधिरिति प्राचीनप्रवादस्यापि उक्त एवार्थ इति **मीमांसकमतमपि** निरस्तम्। **शूद्रशब्दात्** केवलयोगार्थबोधाङ्गीकारस्यापशूद्राधिकरणसिद्धस्यानुपपत्तेः । प्रोद्गात्रधिकरणे भाष्यकारादिभिः लक्षणया उद्गातृप्रस्तोतृप्रतिहर्तृरूपऋत्विक्चतुष्टयपरत्वस्य **शास्त्रदीपिकाकृता** सुब्रह्मण्यातिरिक्तत्रितयपरत्वस्य चाङ्गीकारेऽपि नवीनैर्योगेनैव त्रितयपरत्वस्वीकारादपि नोक्तप्रतिबन्धकतासम्भवः ॥

भाट्टदीपिकायां—"प्रैतु होतुश्चमसः प्र ब्रह्मणः प्रोद्गातॄणां प्र यजमानस्य" इति मन्त्रे उद्गातृपदरूढ्यर्थस्य बहुत्वासम्भवात् बहुवचनस्य एकत्वे लक्षणा । न चास्य मन्त्रस्य सर्वतोमुखादावुत्कर्षप्रतिपादकस्य वा त्रिलक्षणा योगो वेति वाच्यम्; गुणभूतप्रत्ययानुरोधेन प्रधानभूतप्रातिपदिके त्रिविधाया अपि अन्याय्यकल्पनाया अनुपपत्तेः—**इत्याशङ्क्य**; उद्गातृशब्दो यौगिक एव, उत्पूर्वकगाधातोः 'उद्गायतीनामरविन्दलोचनम्' इत्यादौ उत्कृष्टगानमात्रे प्रयोगेण सामविशेषे रूढिविरहात्, ऋत्विग्विशेषे प्रयोगस्य

निरूढलक्षणयाऽप्युपपत्तेः । तस्मादुद्गातृशब्दो योगेन त्रितयपरः- इति सिद्धान्तितम्; आकाशपदं च शुद्धयौगिकमेवेति तत्त्वमार्तण्डे उक्तम् ॥

तथा च-योगजन्यबोधस्य सर्वसिद्धत्वात् शाब्दप्रत्यक्षयोः युगपदुत्पत्त्यङ्गीकारेण एकसामग्र्या अपरबुद्धिप्रतिबन्धकताविरहाच्च योगपक्षे न गौरवमिति दिक् ॥

॥ श्रीः ॥

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

इति
श्रीशेषार्यवंशमुक्ताफलस्य श्रीयादवाद्रिनिवासरसिकस्य
श्रीमदनन्तार्यवर्यस्य कृतिषु
आकाशाधिकरणविचारः
समाप्तः ॥

॥ श्रीः ॥

श्रीभाष्यभावाङ्कुरः

श्रीमन्महीशूरमहाराजाधिराजमहास्थानसभाभूषणैः

शेषार्यवंशमुक्ताफलैः श्रीयादवाद्रिनिवासरसिकैः

पण्डितमण्डलीसार्वभौमैः

श्री ॥ उ ॥ म. अ. अनन्तार्यवर्यैः

विरचितः ।

विद्वद्वरैः परिशोध्य

म. अ. अनन्तार्येण

प्र. भ. तो. नरसिंहार्येण च

कल्याणपुर-विचारदर्पण-मुद्राक्षरशालायामङ्कयित्वा

प्राकाश्यं नीतः ॥

१८९९.

मूल्य रू. ० - १ - ०

श्रीभाष्यभावाङ्कुरः

नमो रामानुजार्याय तस्मै निस्सीमतेजसे ।
विश्वत्राणाय यस्यासीदवतारो महीतले ॥
श्रीकौशिककुलोत्तंसराघवार्याय धीमते ।
कृतोऽयमञ्जलिर्मुग्धः कृपाकल्लोलमालिने ॥

पूर्वोत्तरद्विकभेदभिन्ने शारीरकशास्त्रे पूर्वद्विकेन प्रमेयत्वव्यापककार्यतानिरूपितकारणत्वस्य ब्रह्मलक्षणत्वं व्यवस्थापितम् । तथा च तादृशकारणत्वस्य ब्रह्मलक्षणत्वोपपादनपरत्वं पूर्वद्विकस्योपाधिः । तस्य लक्षणत्वोपपादनं चासम्भवातिव्याप्तिशङ्कानिरासकतया तादृशकार्यतायां प्रमेयत्वव्यापकत्वोपपादनेन चेति द्वेधा भवति ॥ तत्र असम्भवातिव्याप्तिशङ्का च श्रुतिविप्रतिपत्तिप्रयुक्ता वादिविप्रतिपत्तिप्रयुक्ता चेति द्विधा । तत्र श्रुतिविप्रतिपत्तिप्रयुक्तासम्भवशङ्का प्रथमपादेन तादृशातिव्याप्तिशङ्का च त्रिपाद्या, वादिविप्रतिपत्तिप्रयुक्तासम्भवातिव्याप्तिशङ्का च द्वितीयाध्यायगतेन प्राथमिकेन पादद्वयेन च निराक्रियत इति षट्पाद्यास्तादृशशङ्कावारकत्वम्; तदनन्तरपादद्वयस्य च कार्यतायां प्रमेयत्वव्यापकत्वोपपादनपरत्वमित्यध्यायद्वयस्योक्तोपाध्युपपत्तिः ॥

उपासनप्रवृत्तिप्रयोजकार्थनिरूपणमुत्तरद्विकेन क्रियत इति तत्परत्वमुत्तरद्विकस्योपाधिः ॥ अर्थस्य उपासनप्रवृत्तिप्रयोजकत्वञ्च— साक्षात्परम्परया वा उपासन प्रवृत्तौ यज्जनकं तत्त्वावच्छेदकत्वरूपं तदवच्छेदकविषयताश्रयत्व रूपं वा ग्राह्यम् । उपासनप्रवृत्तौ हि—

मोक्षत्वावच्छिन्नविषयकेच्छा तद्धर्मावच्छिन्नविषयकसाधनताज्ञानं च कारणम् । मोक्षश्च- निश्शेषाविद्यानिवृत्तिपूर्वकब्रह्मानुभवः; तत्र विशेष्यांशभूतब्रह्मानुभवगोचरेच्छायां तत्रानुकूलत्वज्ञानस्य कारणतया ज्ञानगतानुकूल्यस्य विषयानुकूल्याधीनत्वेन तत्र विषयीभूतब्रह्मानुकूल्यज्ञानस्य कारणतया तादृशब्रह्मानुकूलत्वज्ञानस्य च ब्रह्मणि निर्दोषत्वकल्याणगुणाकरत्वज्ञानाधीनतया तदुभयनिरूपणपरस्य उभयलिङ्गपादस्य उपासनप्रवृत्तिप्रयोजकार्थनिरूपणपरत्वम् ॥

एवं—मोक्षघटकाविद्यानिवृत्तीच्छायां चाविद्यापदार्थकर्मतत्प्रयोज्यप्रकृतिसम्बन्धैतदुभयरूपसंसारे द्विष्टसाधनताज्ञानं कारणं; अभावरूपफलेच्छायां प्रतियोगिनि द्विष्टसाधनताज्ञानस्य कारणत्वात् ॥

एवं च—संसारस्य दुःखादिसाधनत्वनिरूपणपरस्य वैराग्यपादस्यापि तथात्वोपपत्तिः। प्रवृत्तिजनकतावच्छेदककोटिप्रविष्टं साधनत्वञ्च फलोपधायकत्वरूपं, न तु स्वरूपयोग्यत्वं; तादृशेष्टसाधनताविषयकज्ञानादप्रवृत्तेः । फलोपधायकतावच्छेदकञ्च कर्माङ्गकत्वविशिष्टतत्तद्गुणविषयकोपासनत्वमिति । तद्घटकतत्तद्गुणविषयकत्वनिरूपणपरस्य गुणोपसंहारपादस्य तद्घटककर्माङ्गनिरूपणपरस्य चतुर्थपादस्य च तथात्वमुपपन्नम् । तादृशोपासनस्य मोक्षोपधायकत्वं हि न तावदपृथक्सिद्धिसम्बन्धेन, तादृशसम्बन्धेन उपासनस्य सत्त्वेऽपि प्रारब्धकर्माधीनशरीरनाशपर्यन्तं मोक्षाभावस्य 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये' इति श्रुति सिद्धत्वात्; किन्तु—स्वजन्योत्तरपूर्वाघाश्लेषविनाशपूर्वकभोगाधीनप्रारब्धनाशप्रयोज्योत्क्रान्त्यनन्तरकालीनार्चिरादिगतिजनितदेशविशेषावच्छिन्नब्रह्मप्राप्तिरूपो यः स्वव्यापारस्तद्वृत्तासम्बन्धेन । तादृशब्रह्मप्राप्तेर्व्यापारत्वञ्च 'अथ य एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' इति

दहरविद्यावाक्यसिद्धं ; तत्र 'अहरहर्वा एवं वित्' इति पूर्वनिर्दिष्टोपासकस्य एतच्छब्देन ग्रहणात्, समुत्थायेति धात्वर्थोत्क्रान्तौ समित्यनेन पूर्वोत्तराघाश्लेषविनाशपूर्वकभोगाधीनप्रारब्धनाशोत्तरकालीनत्वस्य विवक्षितत्वात्, उपसम्पद्येत्यत्र धात्वर्थब्रह्मप्राप्तौ उपेत्यनेन देशविशेषाच्छिन्नत्वस्य समित्यनेन अर्चिरादिगमनजनितत्वस्य च बोधनात् ॥

एवञ्च—चतुर्थाध्यायगतत्रिपाद्या निरुक्तव्यापारस्य चतुर्थपादेन कार्यभूतमोक्षप्रकारस्य च प्रतिपादनात् चतुर्थाध्यायस्य उपासनप्रवृत्तिप्रयोजकार्थपरत्वम्; तत्र प्रथमपादे स्वजन्यपूर्वोत्तराघाश्लेषविनाशपूर्वकभोगाधीनप्रारब्धनाशप्रयोज्यत्वस्य उत्क्रान्तौ प्रतिपादनात्, द्वितीयपादे उत्क्रान्तिस्वरूपनिरूपणपूर्वकं तदुत्तरकालीनत्वस्य अर्चिरादिगतौ प्रतिपादनात्, तृतीये अर्चिरादिमार्गनिरूपणपूर्वकं तद्गतिजनितब्रह्मप्राप्तेः प्रतिपादनाच्च पादत्रयस्य निरुक्तव्यापारप्रतिपादकत्वसत्त्वात् । एवञ्च—वैराग्योभयलिङ्गपादयोः फलेच्छोपयोग्यर्थनिरूपणद्वारा अतिरिक्तपादषट्कस्य फलसाधनत्वघटकार्थनिरूपणद्वारा च उपासनप्रवृत्तिप्रयोजकार्थपरत्वनिर्वाहः ॥

तत्र—व्यापारसाधारणफलातिरिक्तोपासनप्रवृत्तिप्रयोजकार्थपरत्वं तृतीयाध्यायस्य, तादृशफलपरत्वञ्च चतुर्थाध्यायस्योपाधिः ॥

न च—आवृत्तिरसकृदुपदेशादित्यारभ्य आप्रयणात्तत्रापि हीत्यन्ताधिकरणषट्के तृतीयाध्यायोपाधेरतिव्याप्तिः, चतुर्थाध्यायोपाधेरव्याप्तिश्चेति—वाच्यम् ; तृतीयाध्यायोपाधिघटकार्थे फलातिरिक्तत्वस्येव तादृशाधिकरणषट्कसिद्धार्थातिरिक्तत्वस्यापि निवेशात् तादृशार्थसहितफलपरत्वस्य चतुर्थाध्यायोपाधित्वाच्च अतिव्याप्त्यव्याप्त्योरभावात् । तत्र मोक्षघटकनिवृत्तिप्रतियोगितावच्छेदकव्याप्यधर्मावच्छिन्नविशेष्यकानिष्टसाधनत्वप्रकारकबोधपरत्वं वैराग्यपादस्योपाधिः । तादृशनिवृत्तिप्रतियोगितावच्छेदकं च कर्मतत्प्रयोज्यान्यतरत्वं, भूत-

सूक्ष्मपरिष्वङ्गभुक्तावशिष्टकर्मात्मकानुशयादिसाधारणं ; तद्व्याप्यधर्मश्च भूतसूक्ष्मपरिष्वङ्गत्वादिकं, तदवच्छिन्नविशेष्यकानिष्टसाधनत्वादि-बोधश्च शाब्दो मानसो वा प्रथमाधिकरणादिभिर्भवतीति एतत्पादस्य तत्परतानिर्वाहः ॥

यद्यपि–प्रथमाधिकरणे सूक्ष्मभूतपरिष्वङ्गस्य स्वर्गसुखसाधनत्व-मेव प्रतीयते, न त्वनिष्टसाधनत्वं; तथाऽपि तदधिकरणे "भाक्तं वा नात्मवित्वात्" इतिसूत्रेण देवभृत्यभावप्रतिपादनेन तत्प्रयुक्तक्लेशस्य सातिशयत्वस्य च तदुत्तराधिकरणे 'कृतात्यय' इतिसूत्रभागेन तादृश-सुखस्य नश्वरतायाश्च प्रतिपादनेन तादृशसुखस्य मुमुक्षुं प्रत्यनिष्टत्वात् अनिष्टसाधनताबोधनिर्वाहः । न च--उक्तरीत्या अनिष्टसाधनताबोध-परत्वं स्वप्नसुषुप्तिमूर्छावस्थाप्रतिपादकोत्तरपादीयाधिकरणेष्वप्यस्ती-त्यतिव्याप्तिरिति वाच्यम् ; ब्रह्मगुणतात्पर्यकत्वाभावस्यापि विशेषण-त्वात् तेषा चाधिकरणाना स्वाप्नपदार्थसृष्ट्युपयोगसत्यसङ्कल्पत्व-सुषुप्त्याधारत्वादिगुणतात्पर्यकत्वेन तदभावविरहात् । मूर्छाधिकरण-स्यापि ब्रह्मगुणतात्पर्यकत्वं उत्तरपादे निरूपयिष्यते ॥

अत्रेत्थं भाष्यम् —

"उपासनारम्भाभ्यर्हितोपायश्च प्राप्यवस्तुव्यतिरिक्तवैतृष्ण्यं प्राप्यतृष्णा चेति । तत्सिद्ध्यर्थं जीवस्य लोकान्तरेषु सञ्चरतो जाग्रतः स्वपतः सुषुप्तस्य मूर्छतश्च दोषाः परस्य ब्रह्मणस्तद्रहितता कल्याणगुणाकरत्वञ्च प्रथमद्वितीययोः पादयोः प्रतिपाद्यते ॥

—इति ॥

अयमर्थः । उपासनारम्भाभ्यर्हितोपायः–उपासनप्रवृत्तावसाधारण-कारणं ; असाधारणपदेन कालादिव्यावृत्तिः । प्राप्यवस्तुव्यति-रिक्तवैतृष्ण्यं–प्राप्यो यो मोक्षः तद्घटकाभावप्रतियोगिनि संसारे अनिष्टसाधनताज्ञानाधीनो यो द्वेषः तदधीना संसारनिवृत्ताविच्छेति

यावत्। प्राप्यतृष्णा--ब्रह्मानुभवेच्छा। प्राप्यवस्तुव्यतिरिक्तवैतृष्ण्य-मित्यस्य कर्मफलास्थिरत्वनिश्चयाधीनस्तद्विषयो द्वेष इति तु नार्थः; तथा सति कर्मफलानित्यत्वप्रतिपादकस्य कृतात्यय इत्येतावन्मात्रस्याव-श्यकत्वेऽपि यावत्संसारं प्रकृतिसम्बन्धप्रतिपादनपरप्रथमाधिकरणा-दीनामनुपयोगापत्तेः। लोकान्तरेषु सञ्चरतः, जाग्रतः--जाग्रच्छब्दवि-वक्षितस्यारोहावरोहणवतः; तथा च--जाग्रदवस्थायाः आहारविहारा-द्यनेकरूपत्वेऽपि तद्दशायां प्रकृतिसम्बन्धकर्मसम्बन्धादेः निश्चितत्वेन निर्दोषत्वशङ्कानुदयात्। आरोहावरोहरूपायां जाग्रद्दशायामेव तादृशशङ्कोदयेन तन्निरासाय तथाविधजाग्रद्दशायामेव दोषः प्रथमे पादे प्रतिपाद्यत इत्यर्थः। स्वपत इति स्वप्नावस्थस्य ग्रहणं, सुषुप्तपद-समभिव्याहारेण गोबलीवर्दन्यायात्; सुषुप्तस्येति भूतत्वं न विवक्षितम्, ञीतः क्त इति वर्तमाने क्तप्रत्ययविधानात्। अत्रावैरूप्याय सुप्वपत इति शत्रन्ततया निर्देशे कर्तव्ये निष्ठान्ततया निर्देशः, 'तद्यत्रैतत्सुषुप्त-समस्तः सम्प्रसन्नः स्वप्नं न विजानाति यदा सुषुप्तस्स्वप्नं न कथञ्चन पश्यति' इत्यादिश्रुतिनिर्देशानुरोधादिति बोध्यम्। कल्याणगुणाकर-त्वञ्चेति भाष्यानन्तरम् इतिशब्दः प्रकारवचनोऽध्याहर्तव्यः। ततश्चोभयलिङ्गत्वं अधिकराहित्यं फलप्रदत्वमित्येवंरूपोऽर्थ प्रति-पाद्यत इत्यर्थः; तेन प्रतिपाद्यत इत्येकवचनस्य नानुपपत्तिः। दोषा इति बहुवचनान्तपदार्थस्येतिशब्दार्थे एवाभेदेनान्वयः, प्रतिपाद्यत इत्यनेनानन्वयात्॥

न चैवमपि--पूर्वाद्धिकार्थानुक्रमणिकाभाष्ये निरस्तनिखिलदोष-गन्धस्य अपरिमितोदारगुणसागरस्य प्रतिपादितत्वाभिधानात् परस्य ब्रह्मणस्तद्रहितता कल्याणगुणाकरत्वञ्च प्रतिपाद्यत इति भाष्यासङ्गति रिति--वाच्यम्ः तदुक्तार्थाक्षेपेणैव उभयलिङ्गपादप्रवृत्त्या वैयर्थ्या-भावात्। स्पष्टीकरिष्यते चेदं "न स्थानतः" इत्यधिकरणे॥

तथा च--उदाहृतभाष्येण जीवविशेष्यको यो लोकान्तरगमनागमनकालावच्छेदेनानिष्टजनकतावच्छेदकावच्छिन्नकर्मतत्प्रयोज्यान्यतरात्मकसंसारसम्बन्धप्रकारकबोधस्तत्परत्वं वैराग्यपादस्य उपाधिरित्युक्तं भवति; गमनागमनकालावच्छेदेनेत्युपादानात् न स्वप्नाद्यवस्थाप्रतिपादकाधिकरणातिव्याप्तिः । एवं वैराग्यपादे पेटिकाद्वयं—आरोहणपेटिका आरोहणपेटिका चेति । आरोहणावच्छेदेन दोषप्रतिपादिका आरोहणपेटिका, अवरोहणावच्छेदेन तत्प्रतिपादिका अवरोहणपेटिका; तत्र प्रथमाधिकरणमारोहणपेटिका, तदतिरिक्ताधिकरणपञ्चकं अवरोहणपेटिकेति बोध्यम् ॥ तत्र यावत्संसारकालं प्रकृतिसम्बन्धप्रतिपादनाय प्रथमाधिकरणम् ॥

॥ सू ॥ तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥ ३।१।१ ॥

अत्र संशयः । पूर्वदेहसम्बन्धध्वंसाधिकरणीभूतः उत्तरदेहसम्बन्धप्रागभावाधिकरणं च यः कालः तादृशकालावच्छिन्नो जीवः इन्द्रियाद्याश्रयभूतसूक्ष्मावच्छिन्नो न वेति । अत्र स्थूलदेहसम्बन्धकाले तदन्तर्गतभूतसूक्ष्मसम्बन्धस्य जीवे पूर्वपक्षिणोऽपि अनुमतत्वात् अवच्छिन्नान्तं धर्मिविशेषणम्; सर्वत्र भूतसूक्ष्माणां सत्त्वेन तत्सम्बन्धस्यावर्जनीयतया निश्चितत्वात् कोटित्वोपपत्तये इन्द्रियाद्याश्रयेति ॥

अत्र पूर्वपक्षः । तादृशकालावच्छिन्नो जीवः तादृशभूतसूक्ष्मानवच्छिन्न एव, लोकान्तरगमनकाले जीवस्य तादृशभूतसूक्ष्मावच्छिन्नत्वग्राहकप्रमाणाभावात्; भोग्यभोगोपकरणभोगस्थानवत् भोगायतनानामपि शरीराणां तत्रत्यैरेव भूतैरारम्भसम्भवेन तदर्थमितो भूतसूक्ष्मनयनानपेक्षणात् ॥

अथ—पञ्चाग्निविद्यागतप्रश्नप्रतिवचनाभ्यां तादृशकालावच्छेदेन इन्द्रियाद्याश्रयभूतपरिष्वक्तत्वं सिद्ध्यति । एवं हि तत्र श्रूयते—श्वेतकेतु-

आरुणेयं पाञ्चालराजः प्रवाहणः 'वेत्थ यदितोऽधिप्रजाः प्रयन्ति, इति कर्मिणां गन्तव्यदेशं, 'वेत्थ यथा पुनरावर्तन्ता३ इति' पुनरावृत्तिप्रकारं, 'वेत्थ पथोर्देवयानस्य पितृयाणस्य च व्यावर्तना३' इति देवयानपितृयाणयोः व्यावर्तकाकारौ, 'वेत्थ यथाऽसौ लोको न सम्पूर्यता' इति स्वर्गलोकस्याप्राप्तारं, 'वेत्थ यथा पञ्चम्यामाहुतावापःपुरुषवचसो भवन्ति' इति अपां पञ्चमाहुति-प्रयोज्यं पुरुषपदाभिलापयोग्यत्वं पुरुषपदार्थतावच्छेदकीभूतं देहत्व-रूपपरिणामं च पप्रच्छ ॥ श्वेतकेतुस्तावत् इमान् प्रश्नान् प्रतिवक्तु-मजानन् स्वपित्रे न्यवेदयत्; सोऽप्यजानन् तमेव पाञ्चालराजं 'यामेव कुमारस्यान्ते वाचमभाषथास्तामेव मे ब्रूहि' इति पप्रच्छ । अयं च प्रश्नः पाञ्चालराजकर्तृकपञ्चप्रश्नीरूप एव, तत्र पञ्चमप्रश्नप्रतिवचनस्य इतरप्रश्नप्रतिवचनानुकूलत्वात् प्रथमं तदेव वदन् द्युलोकमग्नित्वेन रूपयित्वा 'तस्मिन्नेतस्मिन्नग्नौ देवाश्श्रद्धां जुह्वति, तस्या आहुतेः सोमो राजा सम्भवति' इत्यादिना देवाख्या जीवस्य प्राणाः द्युलोकाग्नौ श्रद्धाख्यं वस्तु प्रक्षिपन्ति, सा च श्रद्धा सोमराजाख्याऽमृतमय-देहरूपेण परिणमते, तं चामृतमयदेहं त एव प्राणाः पर्जन्ये अग्नित्वेन रूपिते प्रक्षिपन्ति, स च देहस्तत्र प्रक्षिप्तो वर्षं भवति, तच्च वर्षं त एव प्राणाः पृथिव्यामग्नित्वेन रूपितायां प्रक्षिपन्ति, तच्च तत्र प्रक्षिप्तमन्नं भवति, तच्चान्नं त एव पुरुषेऽग्नित्वेन रूपिते प्रक्षिपन्ति, तच्च तत्र रेतो भवति, तच्च त एव योषायामग्नित्वेन रूपितायां प्रक्षिपन्ति, तच्च प्रक्षिप्तं तत्र गर्भो भवतीत्युक्त्वाऽऽह—'इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' इति । एतावता यागादिकर्तॄणां देहान्तर्गत-भूतसूक्ष्मस्य श्रद्धाशब्दविवक्षितस्य यागजन्यादृष्टवशात् स्वर्गलोकाव-च्छेदेन देवशरीररूपेण परिणामः, तादृशादृष्टनाशे पर्जन्यावच्छेदेन वर्षरूपेण, ततः पृथिव्यामन्नरूपेण, ततः पुरुषे रेतोरूपेण, ततो योषिति

गर्भरूपेण परिणाम इति प्रतीयते। न च—उक्तश्रुत्यां भूतसूक्ष्मस्य गमने-प्रतीतावपि तद्विशिष्टस्य जीवस्य गमनासिद्धिरिति—वाच्यम्; आपः पुरुषवचस इत्यनेनैव तत्सिद्धेः; पुरुषशब्दस्य पुरुषावात्ममानवाविति कोशेन शरीरविशिष्टात्मपरत्वात् तत्सामानाधिकरण्यानुरोधेनाप्छब्दस्यापि विशिष्टपरत्वावश्यकत्वात्, विशिष्टस्यैव गमनादि-सिद्धेः ॥ —इति चेत् ॥

मैवम्। 'स वा एष पुरुषोऽन्नरसमयः' इत्यादौ पुरुषशब्दस्य शरीरमात्रपरतया प्रयोगात् अत्रापि तन्मात्रपरताया एव युक्तत्वात्, अन्यथा अप्छब्दस्य श्रद्धावर्षान्नरेतोगर्भशब्दानां च विशिष्टपरत्वा-वश्यकतया लक्षणाप्रसङ्गात्; भूतसूक्ष्मस्य वर्षान्नादीनां च शरीर-त्वाभावेन शरीरवाचकानां शब्दानां शरीरिपर्यन्तत्वन्यायस्याप्रवृत्तेः। किं च—अस्याः श्रुतेः शरीरान्तर्गतभूतसूक्ष्मस्य लोकान्तरानुवृत्ति-र्नार्थः, तच्छ्रुतेर्यागादिजन्यादृष्टात् देवशरीरप्राप्तिः तादृशादृष्टनाशे पुनः क्रमात् मनुष्यशरीरप्राप्तिरित्येवं परत्वात् श्रद्धाशब्दस्य फला-वश्यम्भावनिश्चयपरतया 'देवाश्श्रद्धां जुह्वति' इत्यस्य विषयतासम्ब-न्धेन तादृशनिश्चयं इन्द्रियाणि स्वर्गे प्रक्षिपन्ति, तादृशश्रद्धाधीन-यागाद्यनुष्ठानप्रवर्तकानि भवन्तीत्यर्थात्; 'तस्या आहुतेस्सोमो राजा सम्भवति' इत्यस्य तादृशयागादिना देवशरीरं अदृष्टाकृष्टैः देव-लोकस्थैरेव भूतैर्जायत इत्यर्थसम्भवात्; एतल्लोकाद्भूतनयनाक्षेप-कत्वायोगात् ॥

न च—आहुतिकर्मद्रव्याहुतिजन्यद्रव्ययोरुपादानोपादेयभावस्य पर्ज-न्याद्याहुतौ दर्शनात् द्युलोकाहुतावपि श्रद्धापदार्थस्य देवशरीरोपादानत्वं कल्पनीयं, अन्यथा वैरूप्यप्रसङ्गात्, तथा च श्रद्धाशब्देनापि अपामेव भूतान्तरसंसृष्टानां ग्रहणं युज्यते, श्रद्धा वा आप इति श्रुतौ श्रद्धाशब्दस्याब्वाचकत्वोक्तेरिति—वाच्यम्; एवमपि—अग्निहोत्रा-

इति भूतक्षीरान्तर्गतानामपां जीवेन सह गमनस्य श्रुत्यन्तरसिद्धतया तादृशामपामेवात्र अप्छब्दार्थत्वात्, श्रद्धापूर्वकानुष्ठेयतया श्रद्धाशब्द-वाच्यत्वस्य देवदेहं प्रत्युपादानत्वस्य च सिद्धेः। तथा च वाजसने-यके षट्प्रश्नब्राह्मणे श्रूयते—

"ते वा एते आहुती हुते उत्क्रामतस्तेऽन्तरिक्षमाविशतस्तेऽन्त-रिक्षमाहवनीयं कुर्वाते, वायुं समिधं मरीचीमेव शुक्रामाहुतिं तेऽन्तरिक्षं तर्पयतस्ते तत उत्क्रामतस्ते दिवमाविशतस्ते दिव-माहवनीयं कुर्वाते, आदित्यं समिधं चन्द्रमसमेव शुक्रामाहुतिं ते दिवं तर्पयतस्ते तत आवर्तेते ते इमामाविशतस्ते इमा-माहवनीयं कुर्वाते।"—

इत्यारभ्य,

"ते पुरुषमाविशतस्ते स्त्रियमाविशतः यतस्ततः पुत्रो जायते।"
—इति॥

न च—देवताविग्रहतदागमनादीनां देवताधिकरणे निर्णीतत्वात् अग्निभिरूढानां देवताभिरुपभुक्तानां क्षीरादीनां जीवपरिष्वञ्जकत्वा-योगात् आहुत्योरेकदेशस्य देवताभिर्भुक्तत्वं एकदेशान्तरस्य जीव-दशायामग्नौ प्रक्षिप्तस्य यावन्मरणमभुक्तत्वेनावस्थानं ततो जीवस्य लोकान्तरगमनकाले परिष्वञ्जकत्वमिति कल्पने गौरवात्तादृशश्रुते-रर्थवादत्वमेवेति—वाच्यम्। यतो देवताभिर्भुक्तानां न देवताकर्तृक-व्यापारजन्यगलाधस्संयोगाश्रयत्वं, किन्तु देवतातृप्तिहेतुभूतदर्शन-विषयत्वं; 'न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति' इति श्रुतेः। तथा च—भुक्तानामेव जीवपरिष्वञ्जकत्वसम्भवात् न कल्पनागौरवं, किञ्च कालान्तरभाविस्वर्गादिजनकत्वनिर्वाहाय व्यापा-रत्वेनापूर्वस्याकल्पनेन लाघवं च; तादृशाहुतेरेव स्वर्गादिसुखहेतुभूत-शरीरारम्भकत्वात्॥

न च—'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति, प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' इति श्रुत्या 'मनष्षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति' इति स्मृत्या च इन्द्रियाणां गमनबोधनात् निराश्रयाणां च तेषां गमनासम्भवात् तदाश्रयसूक्ष्मशरीरस्य गमनसिद्धिरिति—वाच्यम्; 'यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं' इत्यादिश्रुतौ प्राणानां जीवमरणकाले अग्न्यादिष्वप्ययश्रवणात् उत्क्रमणश्रुतेः देहत्यागमात्रपरत्वात् जीवेन सह गमनपरत्वायोगात्, आचार्यमनुगच्छन्ति शिष्या इत्यादाविव तमुत्क्रामन्तमिति श्रुतेः गमनपरत्वेऽपि पृथग्गमनबोधपरतया सूक्ष्मशरीरस्य जीवपरिष्वञ्जकतया गमनासिद्धेश्च ॥

न च—इष्टादिकारिणां पितृयाणातिरिक्तमार्गाभावात् पितृयाणमार्गैकदेश एवानुसन्धानाय पञ्चाग्निविद्यायां प्रतिपाद्यत इति वक्तव्यं, तथा च पितृयाणवाक्ये—

> "ते धूममभिसम्भवन्ति, धूमाद्रात्रिं रात्रेरपरपक्षं अपरपक्षाद्यान् षड्दक्षिणैतिमासान्—मासेभ्यः पितृलोकं पितृलोकादाकाशं आकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति ॥"—

इति श्रवणात् तत्र सोमराजपदस्य देवशरीरकेष्टादिकारिपरत्वात् तदनुरोधेन 'तस्या आहुतेस्सोमो राजा सम्भवति' इति पञ्चाग्निविद्यागततत्पदस्यापि तच्छरीरकपरत्वावश्यकत्वात् श्रद्धाशब्दस्यापि विशिष्टपरत्वं युक्तमिति सूक्ष्मशरीरकस्यैव गमनं सिध्यतीति—वाच्यम्; तत्र 'ते धूममभिसम्भवन्ति' इति बहुवचनेन निर्दिष्टानां प्राप्तॄणां एव इत्येतच्छब्देन परामर्शायोगात्, तं देवा भक्षयन्तीति देवभक्ष्यत्वोक्त्या प्राप्तरि जीवे तदसम्भवाच्च; प्राप्यस्य चन्द्रमस एव एत-

च्छब्देन परामर्शात्। तस्माज्जीवस्य गमनागमनकालयोः सूक्ष्मभूतपरिष्वङ्गे प्रमाणाभावः ॥ —इति ॥

राद्धान्तस्तु—गमनागमनकालावच्छिन्नोऽपि जीवः भूतसूक्ष्मपरिष्वङ्गवानेव; पञ्चाग्निविद्यागतप्रश्नप्रतिवचनाभ्यां तथाऽवगमात्, तत्र पुरुषवचस इति पुरुषपदवाच्यत्वबोधात् पुरुषपदस्य च कोशानुरोधेन शरीरविशिष्टात्मन्येव शक्तेः, 'स वा एष पुरुषोऽन्नरसमयः' इत्यादौ पुरुषशब्दस्य लाक्षणिकत्वात्, लाक्षणिकार्थव्युदासायैव श्रुतौ वचश्शब्दनिर्देशात्, तस्या आहुतेर्गर्भस्सम्भवतीति पञ्चम्या आहुतेर्गर्भसम्भवस्य स्थाने वाजसनेयके तस्या आहुतेः पुरुषस्सम्भवतीति श्रवणात्, पञ्चमाहुतौ विशिष्टस्यैव होम्यत्वावगमात्। अग्निहोत्राहुतिभूताब्विशिष्टस्य होम्यत्वं तु न युक्तं, तथा सति अबादिपदानां लक्षणाप्रसङ्गात्; मन्मते चाप्छब्दस्य सूक्ष्मशरीरवाचितया शरीरवाचकानामिति न्यायप्रवृत्तेः। उक्तं च टीकायाम्—

> "यदा त्वप्छब्द एव जीवशरीरभूतभूतसूक्ष्मपरः, तदा तस्य देवमनुष्यादिशब्दवत् चेतनविषयत्वं स्वरसतरम् ॥"—इति ।

किञ्च—इन्द्रियाणां गमनश्रुत्या अग्निहोत्राहुत्यन्तर्गतानामपामिन्द्रियाश्रयत्वासम्भवात् सूक्ष्मशरीरस्य गमनावश्यकता। न चाप्ययश्रुत्या गमनश्रुतेरन्यथासिद्धिः, अग्निं वागप्येतीत्याद्यप्ययश्रुतौ 'ओषधीर्लोमानि वनस्पतीन् केशाः' इति ओषधीषु लोम्नां वनस्पतिषु केशानां चाप्ययस्य प्रत्यक्षबाधितस्य प्रतीत्या तादृशश्रुतेः प्रतीयमानार्थे तात्पर्यायोगात्; ओषधीर्लोमानि—लोमाभिमानिदेवता ओषध्यभिमानिदेवतामप्येति, लोमाभिमानित्वं विहाय केवलमोषध्यभिमानिनी भवतीत्यर्थावश्यकतया, तदनुरोधेन 'अग्निं वागप्येति' इत्यस्यापि वागभिमानिनी अग्निमप्येति वागभिमानित्वं विहाय केवलाग्निर्भवतीत्यर्थात्;

"अग्निर्वाग्भूत्वा मुखं प्राविशत्, वायुः प्राणो भूत्वा नासिके प्राविशत्, आदित्यश्चक्षुर्भूत्वा अक्षिणी प्राविशत्, दिशश्श्रोत्रं भूत्वा कर्णौ प्राविशत्, ओषधिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशन्"—इत्यादिश्रुत्या ओषध्यभिमानिदेवतानां लोमाभिमानिदेवतानां च ऐक्यप्रतीतेः अप्ययस्य तदभिमानित्वरूपतन्नियन्तृत्वपरित्यागरूपत्वस्य युक्तत्वात् ॥

न चैवं—अग्न्यादीनां मरणकाले वागाद्यभिमानित्वपरित्यागे प्राणानामुत्क्रान्तिचन्द्रसंवादादिकार्यासिद्धिप्रसङ्गः, अधिष्ठानदेवतासहितानामेव तेषां कार्यकारित्वात्, अन्यथा देवताधिष्ठानस्यैव वैयर्थ्यप्रसङ्गादिति—वाच्यम्; म्रियमाणतादशायां सर्वेषामिन्द्रियाणां स्वस्वकार्यादर्शनेन तत्कालावच्छेदेन वागादीनां वचनादिरूपोपकारविशेषोत्पत्त्यनुकूलाभिमानविशेषपरित्यागस्यैव विवक्षितत्वात्; मरणानन्तरं चन्द्रमसा संवादाद्यनुपपत्तेरुत्तरकाले तादृशाभिमानपरित्यागस्याकल्पनात् ॥

न चैवं—अग्निं वागप्येतीत्यत्र वाक्पदस्य धातोश्च लक्षणापत्त्या तदपेक्षया वाक्पदस्येन्द्रियपरत्वं स्वीकृत्य धातोरसत्कल्पत्वरूपातीतत्वसादृश्ये लक्षणाङ्गीकारः परोक्त एव युक्त इति—वाच्यम्; शरीरवाचकानां शब्दानां शरीरिणि शक्तेस्सत्त्वेन लक्षणाविरहस्य "अभिमानिव्यपदेशः" इति सूत्रसिद्धत्वात् ॥ न चैवमपि—धातोर्लक्षणाया मतद्वयेऽपि सत्त्वात् परपक्ष एव किं नोपेयत इति—वाच्यम्; असत्कल्पत्वस्य स्वस्वकार्यजनकत्वाभावस्य फलोपधायकत्वाभावरूपत्वे तस्य जीवद्दशायामपि कदाचित्सत्त्वान्मरण एव तदुक्त्ययोगात्, जनकतावच्छेदकधर्मरूपस्वरूपयोग्यत्वाभावरूपत्वे चास्मदुक्तार्थ एव पर्यवसानात्, जनकतावच्छेदकघटकस्य वागिन्द्रियत्वादेस्सत्त्वेन तद्घटकीभूतदेवताभिमानविरह एव पर्यवसानात्। तथा चेन्द्रियाणां

गमनसिद्ध्या तदाश्रयदेहगमनस्यावश्यकत्वात् पञ्चाग्निविद्यावाक्यस्य तत्परत्वमेवोचितम्। षट्प्रश्नब्राह्मणं च-देवतातृप्तिमुखेन शुभतरजन्म-हेतुत्वपर्यन्ताहुतिवैभवानुसन्धानपरं अग्निहोत्राहुत्यन्तर्गतानामपां सूक्ष्म-शरीराप्यायकतया तेन सह गमनपरं वा; 'देहारम्भिका आप-श्चाहुत्येकदेशरूपास्सन्तु' इति टीकायामुक्तत्वेनाहुतीनां सूक्ष्मदेहाप्या-यकत्वस्याभ्युपगतत्वात् ॥

न चैवं—भूतसूक्ष्मजीवयोः प्रत्येकं गमनसिद्धावपि भूतसूक्ष्मविशिष्ट-जीवस्य गमनासिद्धिः, पञ्चमाहुतिजन्यगर्भे जीवसंयोगमात्राङ्गीकारा-देव 'आपः पुरुषवचसः' इत्यस्योपपत्त्या पूर्वाहुतिषु जीवसंयोगासाध-कत्वात्, 'सप्तमे मासे जीवेन संयुक्तो भवति, अष्टमे मासे सर्वसम्पूर्णो भवति, पितूरेतोऽतिरेकात् पुरुषो भवति' इति गर्भोपनिषदि सप्तमास-पर्यन्तं जीवसंयोगाभावस्तदनन्तरं जीवसंयोग इत्यस्य सिद्धेश्चेति—वाच्यम्; पितृयाणवाक्यगतसोमराजशब्दानुरोधेन पञ्चाग्निविद्यागत-तच्छब्दस्यापि विशिष्टपरत्वेन पूर्वाहुतिष्वपि विशिष्टस्यैव होम्यत्व-सिद्ध्या विशिष्टस्य गमनसिद्धेः ॥

न च—पितृयाणगतसोमराजशब्दस्य एकवचनान्तत्वात् प्राप्य-चन्द्रपरत्वमुक्तमिति—वाच्यम्; तथा सति एष सोमो राजेति वाक्य-स्यैव वैयर्थ्यप्रसङ्गात्, प्रसिद्धेन चन्द्रमश्शब्देन पूर्वनिर्दिष्टस्य पुन-स्तत्पर्यायाभ्यां सोमराजशब्दाभ्यां निर्देशे फलाभावात्, अस्माकं च पञ्चाग्निविद्यायां 'तस्या आहुतेस्सोमो राजा सम्भवति' इति निर्दिष्टः एषः चन्द्रप्राप्तिमानिष्टादिकारीत्येतच्छब्दार्थविधेयकबोधाङ्गीकारेण पञ्चाग्निविद्यागतसोमराजपदस्येष्टादिकारिविषयत्वप्रतिपत्तेः, प्रयोज-नस्य सद्भावात्। एतदभिप्रेत्यैव 'अश्रुतत्वादिति चेन्न' इतिसूत्रप्रवृत्तेः, सोमो राजा सम्भवतीत्युक्तदिव्यदेहप्राप्तिः कदेत्याकाङ्क्षायां—'चन्द्रमस-मभिसम्भवन्त्येष सोमो राजा' इत्यनेन वर्तमानकालावच्छिन्नचन्द्र-

प्राप्तिविशिष्टस्य तादृशदिव्यदेहोक्त्या चन्द्रप्राप्तिकालावच्छेदेन तादृशदेहप्राप्तिरिति अर्थबोधनेनापि तस्य सफलत्वात्, 'सप्तमे मासे जीवेन संयुक्तो भवति' इति च शरीरचलनादिहेतुभूतजीवसंयोगाभिप्रायम्। किञ्च चन्द्रमसमभिसम्भवतीत्यभिसम्भवनक्रियाकर्तृतया प्रथमान्तनिर्दिष्टस्य प्राप्तुरेव एतच्छब्देन परामर्शो युक्तः, न तु द्वितीयान्तविशिष्टस्य चन्द्रस्य; 'प्रजापतिर्वरुणायाश्वमनयत्सस्तां देवतामार्च्छत्' इत्यत्र स इति प्रथमान्तपदेन चतुर्थ्यन्तनिर्दिष्टस्य वरुणस्य न ग्रहणं, अपि तु समानविभक्त्यन्तनिर्दिष्टस्य प्रजापतेरेव ग्रहणमिति तस्यैव 'वारुणांश्चतुष्कपालान्निर्वपेत्' इति विहितेष्टिरित्यस्य पूर्वकाण्डे स्थापितत्वात्, असति बाधके समानविभक्तिकपदान्तरेण निर्दिष्टस्यैव सर्वनाम्ना ग्रहणमिति नियमात्, 'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः' इत्यत्र तच्छब्देन द्वितीयान्तनिर्दिष्टस्यैव परज्योतिषो ग्रहणात्, असति बाधक इति तत्र प्राप्तुः पुरुषोक्तत्वानुपपत्तेर्बाधकस्य सत्त्वात्॥

न च—समानवचनकपदानिर्दिष्टस्यैव सर्वनाम्ना ग्रहणमित्यपि नियमदर्शनात् बहुवचनान्तपदनिर्दिष्टानामेकवचनान्तपदेन ग्रहणानुपपत्तिरिति—वाच्यम्; अत्रापि 'असति बाधके' इत्यस्य वक्तव्यतया समानवचनकपदनिर्दिष्टस्य चन्द्रस्य ग्रहणे वाक्यवैयर्थ्यरूपबाधकस्योक्तत्वेन बहुवचनान्तनिर्दिष्टस्यापि एकवचनान्तेन परामर्शोपपत्तेः; एकवचनस्य जात्यभिप्रायकत्वात्, अस्मिन् प्रकरणे वचनसारूप्यनिर्बन्धादर्शनाच्च; 'तद्देवानामन्नं तं देवा भक्षयन्ति' इति बहुवचनान्तनिर्दिष्टस्याभिसम्भवितुः तदन्नमित्येकवचनेन निर्देशात्॥

न च—तदपि वाक्यं चन्द्रविषयमिति—वाच्यम्; 'ते चन्द्रं प्राप्यान्नं भवन्ति' इति वाजसनेयके प्राप्तुरन्नत्वाभिधानात्, तृप्तिहेतुभूतदर्शनविषयत्वरूपान्नत्वस्य चन्द्र इव प्राप्तर्यपि सम्भवात्; 'तथा वायुर्भूत्वा

धूमो भवति, धूमो भूत्वा अभ्रं भवति' इति एकवचनेन निर्दिश्य, 'त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा जायन्ते' इत्युक्त्वा 'यो ह्यन्नमत्ति यो रेतस्सिञ्चति तद्भूय एव भवति' इत्येकवचनेन निर्देशदर्शनात् ॥

तथा च–पितृयाणवाक्यषट्केन एष सोमो राजेत्यनेन पञ्चाग्निविद्योक्तसोमराजपदस्य देवशरीरविशिष्टेष्टादिकारिपरत्वज्ञापनात् सूक्ष्मशरीरविशिष्टस्य गमनसिद्धिः ॥ न च–तस्या आहुतेस्सोमो राजेत्यत्र सोमराजशब्दः चन्द्रपर एव, आहुतेस्सम्भवतीति–श्रद्धाहुत्याप्यायितो भवति, तादृशाहुतिजन्यकलावृद्धिमान् भवतीत्यर्थः; एष सोमो राजेति च तादृशकलावृद्धिः कदेत्यपेक्षायां इष्टादिकारिणां प्राप्त्यनन्तरमिति बोधनाय प्रवृत्तमिति सफलमेव, ततश्च 'तद्देवानामन्नं तं देवा भक्षयन्ति' इति च तादृशकलावृद्धिमत्त्वात् देवतातृप्तिकरत्वोपपादकं सम्यगुपपद्यते; एवं च उभयोरपि वाक्ययोः चन्द्रपरत्वात् न विशिष्टस्य गमनसिद्धिरिति–वाच्यम्; तथा च सति सम्भवतीत्यस्य लक्षणाप्रसङ्गात् ॥ न च–भवन्मते सोमराजपदस्य देवशरीरके लक्षणासत्त्वात् साम्यमिति–वाच्यम्; एवमपि पर्जन्यो वा व गौतमाग्निरित्यारभ्य तस्मिन्नेतस्मिन्नग्नौ देवास्सोमं राजानं जुह्वतीति सोमराजस्य पर्जन्ये होम्यत्वश्रवणाच्चन्द्रस्य पर्जन्ये प्रविलयाभावेन सोमराजशब्दस्य चन्द्रविषयत्वायोगात् लक्षणाया आवश्यकत्वात्। यथा श्येनेनाभिचरन् यजेतेत्यादौ श्येनशब्दस्य यथा वै श्येनो निपत्यादत्त इत्यादिश्रुत्या निपत्यादानरूपश्येनसादृश्यावच्छिन्ने गौणी लक्षणा सिद्ध्यति; एवमिहापि समानप्रकरणे वाजसनेयके 'ते चन्द्रं प्राप्यान्नं भवन्ति, तांस्तत्र देवा यथा सोमं राजानमाप्यायस्वापक्षीयस्वेत्येवमेनांस्तत्र भक्षयन्ति' इति श्रुत्याऽप्यमृतमयदेहत्वदेवतातृप्तिहेतुभूतदर्शनविषयत्वरूपसोमसादृश्यावच्छिन्ने सोमशब्दस्य गौणता सिध्यति,

तादृशलक्षणा न दोषाय। तथा च एष सोमो राजेत्यस्य भवदुक्त-प्रयोजनासम्भवात् अस्मदुक्तप्रयोजनस्यैव वाच्यतया पञ्चाग्निविद्या-घटकसोमराजपदस्य विशिष्टपरत्वात् विशिष्टस्यैव गमनसिद्धिरिति ॥

सूत्रार्थस्तु—'प्राणवता शब्दात्' इति पूर्वाध्यायीयसूत्रात् विपरि-णतं प्राणवानित्यनुषज्यते। यद्वा—'अश्रुतत्वादिति चेन्नेष्टादिकारिणाम्' इत्यत इष्टादिकारीति प्रश्नप्रतिवचनवाक्याच्च अद्भिरिति विपरिणतं; तदन्तरप्रतिपत्ताविति तच्छब्देन संज्ञामूर्तीति निर्दिष्टदेहस्य परामर्शः; प्रतिपत्ताविति प्राप्तिपूर्वकालपरं, अवच्छेद्यत्वं सप्तम्यर्थः, तस्य सम्परि-ष्वङ्गेऽन्वयः। यद्वा-यथा गोषु दोग्धव्यासु गत इत्यादौ गोपदोत्तर-सप्तम्या दोहनमर्थः, तस्य पूर्वकालीनत्वसम्बन्धेन गमनेऽन्वयात् भवि-ष्यद्दोहनकर्माभिन्नगोदोहनपूर्वकालीनगमनवानिति बोधः; तथाऽत्रापि उत्पत्स्यमानायामित्यध्याहारात् उत्पत्स्यमानशरीरान्तरसम्बन्धो-त्पत्तिपूर्वकालीनत्वस्य परिष्वङ्गे बोधः; सति सप्तम्यास्समभिव्याहृत-क्रियार्थकत्वात्, भविष्यदर्थकप्रत्ययसमभिव्याहारे पूर्वकालीनत्वस्य संसर्गत्वात्। तथा च-इष्टादिकारी देहान्तरप्राप्तिप्रागभावाधिकरण-कालावच्छिन्नाप्रातियोगिकसम्बन्धवान् गच्छति; 'वेत्थ यथा पञ्च-म्यामाहुतावापः पुरुषवचसो भवन्ति' इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति प्रश्नप्रतिवचनाभ्यां तथाऽवगमादित्यर्थः ॥

यद्यपि—अत्र तदन्तरप्रतिपत्तावित्यनेनैवान्तरालकाललाभात् रंहतीति व्यर्थं; तथाऽपि—तदन्तरप्रतिपत्तावित्यनेन काले तादृशप्राप्ति-प्रागभावाधिकरणत्वलाभेऽपि पूर्वदेहसम्बन्धध्वंसाधिकरणत्वलाभाय तदुपादानं, उद्देश्यतावच्छेदकीभूतपरिष्वङ्गस्य समानकालीनत्व-सम्बन्धेन गमने भाने तुल्यवित्तिवेद्यतया गमनकालीनत्वस्यापि परि-ष्वङ्गे भानेन पूर्वदेहसम्बन्धध्वंसभानस्यार्थिकत्वादिति बोध्यम्। अत्र प्रश्नप्रतिवचनाभ्यामित्यनुक्त्वा प्रश्ननिरूपणाभ्यामित्युक्तिः येन

प्रथमं पृष्टं तेनैव पाञ्चालराजेन निरूपणं कृतमित्येतादृशार्थ-सूचनाय ॥

ननु—प्रश्नप्रतिवचनाभ्यां केवलानामपामेव सम्बन्धसिद्धौ विवक्षितस्य सर्वभूतसूक्ष्मसम्बन्धस्यासिद्धिरित्यत आह—

॥ सू ॥ त्र्यात्मकत्वात्तु भूयस्त्वात् ॥ ३ ॥ १ ॥ २ ॥

वैशेष्यात्तु तद्वादः इत्यतस्तद्वाद इत्यनुवर्तते । त्र्यात्मकत्वादिति ल्यब्लोपे पञ्चमी; तदर्थश्च प्राप्त्युत्तरकालीनत्वं, पूर्वसूत्रस्थपरिष्वङ्गेऽन्वेति; प्रासादाच्चैत्रेण दृष्ट इत्यादौ आरोहणोत्तरकालीनत्वस्य पञ्चम्यर्थस्य दर्शनान्वयात् प्रासादारोहणकालीनचैत्रकर्तृकदर्शनविषय इत्यन्वयबोधवत् त्र्यात्मकत्वप्राप्त्युत्तरकालीनाप्कर्तृकपरिष्वङ्गकर्मभूत इत्यर्थः ॥ यद्वा—हेतुत्वं पञ्चम्यर्थः, परिष्वङ्गान्वयि। त्रिवृत्करणदेहसम्बन्धहेतुत्वं च—

"नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना ।
नाशक्नुवन् प्रजास्स्रष्टुं"—

इत्यनेन सिद्धम् ; तत्र त्रिवृत्करणाभावस्य देहसम्बन्धात्मकप्रजासर्जनाभावे प्रयोजकत्वोक्त्या तदभावप्रयोजकीभूताभावप्रतियोगित्वरूपतद्धेतुत्वलाभात् । तथा च आप इत्यनेन त्रिवृत्कृतानामपामेव ग्रहणात् श्रुत्या भूतसूक्ष्मपरिष्वङ्गस्सिध्यतीति भावः ॥ नन्वेवं सकलभूतसूक्ष्मस्य कथमप्छब्देन ग्रहणमित्यत उक्तं 'भूयस्त्वात्तद्वादः' इति । वैशेष्यात्त्विति सूत्रे भूयस्त्वस्य व्यवहारहेतुत्वोक्तावपि शरीरे अपां भूयस्त्वमस्तीति ज्ञापनायेदमिति न वैयर्थ्यं; देहे लोहितादिभूयस्त्वेनारम्भकेषु अपां भूयस्त्वं, मनुष्यादिशरीरेषु पार्थिवत्वव्यवहारस्तु देहावारकत्वचः पार्थिवत्वादन्तर्जलभूयस्त्वाग्रहणादेवेति बोध्यम् ॥

ननु—अप्पदस्य त्रिवृत्कृताप्परतया प्रश्नप्रतिवचनाभ्यां त्रिवृत्कृतभूतसूक्ष्मसम्बन्धसिद्धावपि न सूक्ष्मशरीरसम्बन्धसिद्धिः; अग्निहोत्राहुत्यन्तर्गतजलसम्बन्धपरतयाऽपि तच्छ्रुतेरन्यथासिद्धेरित्यतआह—

॥ सू ॥ **प्राणगतेश्च**—॥३॥१॥३॥

तदन्तरप्रतिपत्तौ इष्टादिकारी सम्परिष्वक्त इति च वर्तते। तथा च—देहाद्देहान्तरगमनकालावच्छिन्नो जीवः सूक्ष्मशरीरसम्बन्धवान्, इन्द्रियवत्त्वात्, कालान्तरावच्छिन्नजीववत्—इत्यनुमानसहकृतया पञ्चाग्निविद्यया तत्सिद्धिरिति भावः। न चासिद्धिः, तमुत्क्रामन्तमिति श्रुत्या तत्सिद्धेः; एतज्ज्ञापनायैव सूत्रे गतिग्रहणम् ॥

ननु—तादृशश्रुतेर्देहत्यागमात्रपरत्वात् न गमनकालावच्छेदेनेन्द्रियवत्त्वसिद्धिः, ग्रामान्निष्क्रामन्तं देवदत्तमनुनिष्क्रान्तो यज्ञदत्त इत्यादौ देवदत्तस्य ग्रामत्यागानन्तरं यज्ञदत्तस्य तत्प्रतीतावपि देवदत्तस्य यत्र यत्र गमनं यज्ञदत्तस्य तत्र तत्रेत्यप्रतीतेः। अत आह श्रीभाष्ये स्मर्यते चेति। प्राणगतिरिति प्रथमान्तमनुषज्यते; चकारात् श्रूयत इत्यस्य समुच्चयः। तथा च—

"शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥"

इत्यादिस्मृत्युपबृंहितया तादृशश्रुत्या तत्सिद्धिरिति भावः ॥

ननु—उक्तोपबृंहणमप्रमाणं, अग्निं वागप्येतीत्यादिश्रुतिविरुद्धत्वात्, श्रुतिविरुद्धस्मृतेरप्रामाण्यस्य विरोधाधिकरणसिद्धत्वात्; तथा चोत्क्रमणश्रुतेः देहत्यागमात्रपरत्वात् असिद्धितादवस्थ्यमित्याशङ्क्य परिहरति—

॥ सू ॥ **अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात्** ॥ ३ ॥ १ ॥ ४ ॥

अत्र नञः इतिशब्दस्य चावृत्तिः। तथा चाप्ययश्रुतेरिति नेति

चेन्न-इन्द्रियवत्त्वसिद्धिर्न सम्भवतीति चेन्न; अप्ययश्रुतेर्देवतापक्रमण-रूपगौणार्थपरत्वादित्यर्थः। एवं च-श्रुतिविरोधाभावेन स्मृतेः प्रामाण्यात् तदुपबृंहितयोत्क्रमणश्रुत्या तत्कालावच्छेदेन इन्द्रियवत्त्वा-सिद्ध्या तद्धेतुकानुमानसहकृताभ्यां प्रश्नप्रतिवचनाभ्यां तत्काला-वच्छेदेन जीवस्य सूक्ष्मशरीरसिद्धिरिति भावः॥

ननु-जीवस्यान्तरालकालावच्छेदेन सूक्ष्मशरीरवत्त्वं नोक्तानुमानेन सिद्ध्यति, अतीन्द्रियार्थे अनुमानस्य स्वातन्त्र्येण प्रामाण्याभावस्य शास्त्रयोन्यधिकरणसिद्धत्वात्; नापि तत्सहकृतया पञ्चाग्निविद्यया, तत्र पञ्चमाहुतौ जीवस्याप्सम्बन्धोक्तावपि प्रथमाद्याहुतिषु तदनुक्त्या तत्कालावच्छेदेन जीवस्य तत्सम्बन्धासिद्धेरित्याशङ्क्य परिहरति—

॥ सू ॥ प्रथमेऽश्रवणादिति चेन्न
ता एव ह्युपपत्तेः ॥ ३ ॥ १ ॥ ५ ॥

अत्रापि नञितिशब्दयोरावृत्तिः, विषयवाक्यादपामित्यनुवर्तते। प्रथमे होमे अपां कर्मतया अश्रवणात्, इति नेति चेन्न-शरीरविशिष्टस्य गमनं नेति चेन्न। हिशब्दः-श्रद्धा वा आप इति श्रुतौ श्रद्धाशब्द-वाच्यत्वप्रसिद्धिपरः; हि-श्रद्धाशब्दवाच्यत्वेन प्रसिद्धा आप एव, प्रथमे श्रुता इति शेषः। उपपत्तेः-प्रश्नप्रतिवचनोपपत्तेः, 'वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' इति प्रश्ने यथाशब्दार्थस्य जिज्ञासाविषयकारणजन्यत्वस्य पञ्चमाहुतौ, इति तु पञ्चम्यामाहुतावाप इति प्रतिवचने इतिशब्दार्थस्याहुतिचतुष्टयरूपकारणजन्यत्वस्य च पञ्चमाहुतौ बोधात्, समानाधिकरणयोरेव जन्यजनकभावात्। अप्सु पञ्चमाहुतेः कर्मतासम्बन्धेन सत्त्वेन प्रथमाहुतेरपि तेन सम्बन्धेन तत्र सत्त्वमावश्यकम्। तथा च-प्रथमाद्याहुतिकर्मभूताः आपः, पञ्चमाहुति-कर्मत्वात्, पञ्चमाहुतिहोम्यवत्-इत्यनुमानात् प्रथमाहुतिकर्मणामपि अप्त्वसिद्धिः॥

न च-प्रथमाहुतिकर्मसु पञ्चमाहुतिकर्मत्वमसिद्धं ; प्रथमाद्याहुतिः पञ्चमाद्याहुतिसमानाधिकरणा, तज्जनकत्वात्, यत्र यज्जनकत्वं तत्र तत्सामानाधिकरण्यमिति व्याप्तेः। उपपत्तेरित्यस्य उक्तार्थश्च प्रश्न-प्रतिवचनोपपत्तेरिति भाष्येणोक्तः ॥

यद्वा–उपपत्तेरित्यस्य उत्तरोत्तराहुतिकर्मोपादानत्वोपपत्तेरित्यर्थः ; सोमाकारेण परिणामश्च अपामेवोपपद्यत इति भाष्ये सूचितत्वात्। प्रथमाहुतिकर्मभूता आपः, सोमात्मकानुपादानत्वात्। सोमस्याप्त्वं च वर्षोपादानत्वादिभिस्सिद्धमिति ॥

ननु–उक्तश्रुतियुक्तिभिर्भूतसूक्ष्मस्य गमनसिद्धावपि न तद्विशिष्ट-जीवस्य गमनं सिध्यति; प्रथमाद्याहुतिषु श्रद्धादीनामचेतनानामेव होम्यत्वात् श्रद्धादिशब्दस्य विशिष्टपरत्वकल्पने मानाभावात्, पुरुषवचसो भवन्तीत्यस्य सप्तमे मासे गर्भे जीवस्य प्रवेशादेवोपपत्ते-रुत्क्रान्तिश्रुतेरपि प्रत्येकगमनादेवोपपत्तेरित्याशङ्क्य परिहरति—

॥ सू ॥ अश्रुतत्वादिति चेन्नेष्टादिकारिणां
प्रतीतेः ॥ ३ ॥ १ ॥ ६ ॥

अत्रापि नञितिशब्दयोरावृत्तिः, इष्टादिकारिणामित्यस्याश्रुतत्वा-दित्यत्राप्यन्वयः। तथा च–इष्टादिकारिणां पञ्चाग्निविद्यायामश्रुत-त्वात् तस्य विशिष्टस्य गमनं न सिध्यतीति चेन्न, पितृयाण वाक्यघटकेन एष सोमो राजेत्यनेन पञ्चाग्निविद्याघटकसोमराजपद-विवक्षिततयेष्टादिकारिणां प्रतीतेरित्यर्थः ॥

ननु—एष सोमो राजेत्यस्य पञ्चाग्निविद्योक्तसोमराजः इष्टादि-कारीत्यर्थपरत्वे तं देवा भक्षयन्तीत्यस्यानुपपत्तिः; जीवस्यानदनीय-त्वादित्यत आह—

॥ सू ॥ भाक्तं वाऽनात्मवित्वात्तथा हि दर्शयति ॥ ३ ॥ १ ॥ ७ ॥

अश्रुतत्वादिति चेत्यतः इष्टादिकारिण इति प्रथमान्तमनुवर्तते,

कृतात्यय इत्यतो दृष्ट इति सप्तम्यन्तं, अनिष्टादिकारिणामपि च श्रुतमित्यतः श्रुतमिति भावक्तान्तम्; तथेत्यस्य चावृत्तिः, वाशब्दः उक्तशङ्काव्यावृत्त्यर्थः। श्रुतं--भक्ष्यत्वश्रवणं, दृष्टे--देवतृप्तिहेतुभूतदर्शनविषयत्वरूपभोगोपकरणत्वावच्छिन्ने, भाक्तं- लाक्षणिकम् ॥

ननु--तृप्तिहेतुभूतदर्शनविषयत्वमपि असिद्धमित्यत आह--अनात्मवित्त्वादिति। इष्टादिकारिणः, तथा--निरुक्तदेवभोगोपकर्णं, अनात्मवित्त्वात्--यागाद्युपकारकत्वे सति ब्रह्मज्ञानविधुरत्वात्, यथा पशुरित्यनुमानात् तत्सिद्धिरित्यर्थः। अत्र दंशमशकादिरूपतृतीयस्थाने व्यभिचारवारणाय सत्यन्तं. यागादिकर्तरि ब्रह्मज्ञे व्यभिचारवारणाय विशेष्यम्। एवमनुमानेन तत्सिद्धिमुक्त्वा श्रुत्याऽपि तत्सिद्धिमाह--"तथा हि दर्शयति"। यथा पशुरेवं स देवानामिति श्रुतिरनात्मविदां देवभोगोपकरणत्वं दर्शयतीत्यर्थः ॥

॥ सू॥ कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च ॥ ३ ॥ १ ॥ ८ ॥

पूर्वाधिकरणे संसारकालसामान्यावच्छेदेन प्रकृतिसम्बन्धोऽवर्जनीय इत्युक्तम् । अस्मिन्नधिकरणे तादृशकालसामान्यावच्छेदेन तद्धेतुभूतकर्मसम्बन्धस्साध्यत इति सङ्गतिः। भाष्ये तु--

"केवलेष्टापूर्तदत्तकारिणां धूमादिना पितृयाणेन पथा गमनं कर्मफलावसाने पुनरावर्तनं चाम्नातं, यावत्सम्पातमुषित्वा अथैतमेवाध्वानं पुनर्निवर्तन्ते ॥"--इत्युक्तम्।

अत्र गमनमित्यनन्तरं भूतपरिष्वङ्गादियुक्तं चिन्तितमिति-शेषः। तेन तादृशगमनस्य यावत्सम्पातमिति श्रुत्याऽनाम्नानेऽपि न दोषः। एवं च--सङ्गतिसूचनायैव भाष्ये गमनमित्यन्तोपादानं, चिन्तितपदाध्याहाराभिप्रायेणैव टीकायां 'विषयशुद्ध्यर्थं अवान्तरसङ्गत्यर्थं चाह केवलेति' इति तद्भाष्यस्य सङ्गतिप्रतिपादकत्वमुक्तम् ॥

केचित्तु—य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्तीत्यारभ्येत्यध्याहृत्य यावत्सम्पातमुषित्वा अथैतमेवाध्वानं पुनर्निवर्तन्त इत्याम्नातमित्यन्वयात् नानुपपत्तिः—इति **वदन्ति** ॥

अत्र संशयः । देवदेहध्वंसाधिकरणं मनुष्यादिदेहप्रागभावाधिकरणं च यः कालः तदवच्छिन्नरूपः स्वर्गादवरोहन् जीवः पुण्यादिकर्मवान्न वेति ॥

अत्र पूर्वः पक्षः ॥ तादृशकालावच्छिन्नो जीवः कर्माभाववानेव, यावत्कर्मसत्त्वं स्वर्गे वासस्य कृत्स्नकर्मनाशानन्तरमेव स्वर्गादवरोहणस्य च 'यावत्सम्पातमुषित्वा अथैतमेवाध्वानं पुनर्निवर्तन्ते' इति श्रुतिसिद्धत्वेनावरोहणकालावच्छेदेन कर्मासम्भवात्, यावत्सम्पातमित्यस्य पतनपर्यन्तं स्वर्गे उषित्वेत्यर्थाङ्गीकारे यावन्मरणं जीवतीति वाक्यस्येव वैयर्थ्यापत्त्या यावत्कर्मसत्त्वमुषित्वेत्यर्थस्यैव युक्तत्वात्; सम्पतत्यनेन स्वर्गमिति योगवृत्त्या सम्पातशब्दस्य कर्मपरत्वात् ॥

न च—यावत्सम्पातमित्यस्य यावच्छरीरपातमित्यर्थपरत्वात् तद्वाक्यस्य साफल्यं, स्वर्गे एकशरीरनाशानन्तरं शरीरान्तरारम्भो न सम्भवतीत्येतादृशार्थज्ञापकत्वादिति—वाच्यम्;

"प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम् ।
तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे ॥"—

इति वाजसनेयकश्रुत्या एतल्लोकसम्पादितकर्मसामान्यनाशानन्तरमेवावरोहणोक्त्या तदनुरोधेन यावत्सम्पातमिति श्रुतेरपि यावत्कर्मसत्त्वमित्यर्थस्यैव युक्तत्वात् ॥ न च—"य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्, ब्राह्मणयोनिं क्षत्रिययोनिं वैश्ययोनिं वा; अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन्, श्वयोनिं वा सूकरयोनिं वा चण्डालयोनिं वा" इतिश्रुत्या अवरोहणदशायामपि पुण्यपापसम्बन्धस्सिध्यति; अभ्याश इतिपदस्य

दिश इतिवत् प्रथमाबहुवचनान्तस्य अभ्याङ्पूर्वादशूव्याप्ताविति धातोर्निष्पन्नस्याभ्यागन्तार इत्यर्थपरत्वात्; एवं च उक्तश्रुत्यनुरोधात् यावत्सम्पातमिति श्रुतौ सम्पातपदस्य प्राप्यान्तमिति श्रुतौ कर्मपदस्य च स्वर्गजनककर्मत्वरूपविशेषधर्मावच्छिन्ने लक्षणा स्वीक्रियत इति—वाच्यम्; उक्तश्रुतौ रमणीयचरणा इत्यस्य स्मृतिविहितसन्ध्यावन्दनादिरूपशुभाचारपरत्वात् कपूयचरणा इत्यस्य दुरागमविहिताशुभाचारपरत्वात् पुण्यपापपरत्वासिद्धेः, सदाचारदुराचारयोरेव शुभाशुभयोर्निहेतुत्वसिद्धेः; अन्यथा सन्ध्यावन्दनादेरानर्थक्यापत्तेः, चरणमाचारश्शीलमिति नित्यकर्मपर्यायत्वेन प्रयोगात्; वेदेऽपि 'यान्यनवद्यानि कर्माणि, तानि सेवितव्यानि; यान्यस्माकं सुचरितानि, तानि त्वयोपास्यानि' इति कर्माचारयोर्भेदेन व्यपदेशात्, 'न वायुक्रिये पृथगुपदेशात्' इतिसूत्रे पृथगुपदेशस्य भेदसाधकतयोपन्यासात् आचारकर्मणोर्भेदसिद्धेः। तथा चोक्तश्रुत्या अवरोहणदशायां बोधितस्याचारस्य साक्षात्सम्बन्धेन बाधेऽपि स्वजन्यापूर्ववत्तासम्बन्धेनाबाधात् तेन सम्बन्धेन श्रुतेराचारसत्त्वपरतया तद्दशायामाचारजन्यापूर्वसिद्धावपि न पुण्यपापलक्षणकर्मसिद्धिः; आचारजन्यापूर्वं च व्रीह्यादिनिष्ठापूर्ववत् पुण्यपापविलक्षणमेव। यद्वा—सन्ध्यावन्दनादेराचारस्य स्वविषयकानुभवजन्यसंस्कारसम्बन्धेन शुभयोर्निहेतुत्वं स्वीक्रियत इति तद्दशायां तेन सम्बन्धेनाचारसिद्धावपि न कर्मसिद्धिः; किञ्च यावत्सम्पातमित्यस्य उपक्रमगततया रमणीयचरणा इत्यादेरुपसंहारगततया उपसंहारानुरोधेन उपक्रमे लक्षणा न युक्ता; वेदोपक्रमाधिकरणे उपक्रमगतवेदपदानुरोधेन उपसंहारगतऋगादिपदानामेव लक्षणास्वीकारात्। तस्मात्कर्मसामान्यनाशानन्तरमेव स्वर्गादवरोहणात् तद्दशायां जीवः कर्मसामान्याभाववानेव ॥ —इति ॥

राद्धान्तस्तु—अवरोहणकालावच्छिन्नो जीवः कर्मवानेव, यावत्सम्पातमित्यादौ सम्पातपदादेः रमणीयचरणा इत्याद्यनुरोधेन स्वर्गजनककर्मलाक्षणिकत्वात्। न च—चरणशब्दः आचारपरः, "वर्णा आश्रमाश्च स्वकर्मणि निष्ठाः प्रेत्य कर्मफलमनुभूय ततश्शेषेण विशिष्टदेशजातिकुलरूपायुश्श्रुतवित्तवृत्तसुखमेधसो हि जन्म प्रतिपद्यन्ते, विष्वञ्चो विपरीता नश्यन्ति" इति गौतमस्मृत्या, "ततः परिवृत्तौ कर्मफलशेषेण जातिं रूपं वर्णं बलं मेधां प्रज्ञां द्रव्याणि धर्मानुष्ठानमिति प्रतिपद्यन्ते" इति आपस्तम्बस्मृत्या चावरोहणदशायां कर्मशेषप्रतिपादनेन तादृशस्मृत्युपबृंहितायाः रमणीयचरणा इति श्रुतेः कर्मपरत्वस्य युक्तत्वात् ॥

न चैवं चरणपदस्य लक्षणाप्रसङ्गः; चर्यतेऽनुष्ठीयत इति चरणमिति व्युत्पत्त्या चरणपदस्य कर्मवाचकत्वोपपत्तेः, श्रुतौ पृथङ्निर्देशस्य च गोबलीवर्दन्यायेनोपपत्तेः अनवद्यानि कर्माणीत्यस्य प्रत्यक्षश्रुतिसिद्धश्रौतकर्मपरत्वात्, अस्माकं सुचरितानीत्यस्याचारानुमितश्रुतिसिद्धस्मार्तकर्मपरत्वात्। न चोक्तरीत्या कर्मण एव जन्मादिहेतुत्वे आचारस्य वैफल्यापत्तिरिति वाच्यम्; 'सन्ध्याहीनोऽशुचिर्नित्यमनर्हस्सर्वकर्मसु', 'आचारहीनं न पुनन्ति वेदाः'—इत्यादिवचनेनानुमितश्रुतिसिद्धसन्ध्यावन्दनादेः पुण्यजनककर्मस्वधिकारापादकत्वेन सार्थक्यात्, आचारहीनमित्यत्राचारपदस्याचारानुमितश्रुतिसिद्धसन्ध्यावन्दनादिपरत्वात् ॥

न च—कृत्स्नस्य स्मार्तकर्मणः कथमाचारानुमितश्रुतिसिद्धत्वं, केषुचित् स्मृत्यनुमितश्रुतिविहितत्वस्य सन्ध्यावन्दनादौ चाहरहस्सन्ध्यामुपासीतेति प्रत्यक्षश्रुतिविहितत्वस्य च दर्शनात्; किं च सिद्धान्ते विप्रकीर्णशाखाया एव स्मृत्याचारमूलत्वाभ्युपगमात् नित्यानुमेयवेदानङ्गीकारात् सर्वेषामेव प्रत्यक्षसिद्धत्वमेव; एवं च प्रत्यक्षश्रुति-

सिद्धानां श्रौतानामग्निहोत्रादीनामङ्गित्वं आचारानुमितश्रुतिसिद्धतया आचारशब्दवाच्यानां स्मार्तानामङ्गत्वमिति व्यवस्थानुपपत्तिरिति–वाच्यम्। श्रुतिमुख्यतात्पर्यविषयविधानकत्वं श्रौतत्वं, तदवान्तरतात्पर्यविषयविधानकत्वं स्मार्तत्वं; वेदस्य श्रौतकर्मविधानाय प्रवृत्तेस्तन्मध्ये प्रसङ्गादेव स्मार्तकर्मविधानात् मुख्यतात्पर्यविषयस्याङ्गित्वमवान्तरतात्पर्यविषयस्याङ्गत्वमिति विभागोपपत्तेः। आचारानुमितश्रुतिविहितसन्ध्यावन्दनादेरिति भाष्ये आदिशब्दगृहीतस्मार्तकर्मत्वसामानाधिकरण्येनाचारानुमितश्रुतिविहितत्वं विवक्षितम्। श्रुतावाचारानुमितत्वमपि न नित्यानुमितत्वं, किन्तु देशकालभेदेनानुमितत्वरूपं बोध्यमिति नानुपपत्तिः; तथा च चरणशब्दस्याचारे कर्माणि च शक्तावपि रमणीयचरणा इत्यत्र उदाहृतस्मृत्यनुरोधेन कर्मपरत्वात् यावत्सम्पातमित्यत्र सम्पातपदादेर्लक्षणा आवश्यकी॥

न च–उपसंहारानुरोधेन उपक्रमे लक्षणा न युक्तेत्युक्तम्–इति वाच्यम्; अकृतप्रायश्चित्तानां अभुक्तफलानां नानाविधदेवमनुष्यपक्षिसरीसृपादिनानाविधदेहभोगार्थानां कर्मणां एकेन स्वर्गशरीरेण भोगासम्भवेन स्वर्गभोगेन नाशासम्भवात् उक्तार्थे तात्पर्यायोगेन तात्पर्यानुपपत्त्यैव तत्र लक्षणाङ्गीकारात्; ब्रह्मविद्यायाश्च प्रायश्चित्तरूपत्वात् कर्मनाशकत्वमङ्गीक्रियते, पुण्यस्यापि मुमुक्ष्वपेक्षया पापत्वेन तन्नाशकत्वोपपत्तेः। अथवा उपसंहारगतबहुवाक्यानुरोधात् उपक्रमेऽपि लक्षणा युज्यते, 'अथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतम्' इत्युपक्रमे यथागतमित्यर्थकेन यथेतमित्यनेनैवकारेण च पूर्वोक्तधूमादिमार्गे अवरोहणदशायां प्रातिलोम्येन क्रमप्रतीतावपि आकाशाद्वायुमित्युपसंहारगतबहुवाक्यानुरोधात् यथेतमितीतपदस्याकाशादिगमने यथा लक्षणा स्वीक्रियते तथा प्रकृतेऽपि सम्भवात्; उक्ताभिप्रायसूचनायैव सूत्रे यथेतमनेवञ्चेत्युपादानात्। अन्यथा

यथेतमाकाशं आकाशाद्वायुमिति श्रुत्यैव क्रमस्य स्फुटं प्रतिपन्नत्वेन सन्दिग्धार्थनिश्चायकत्वरूपन्यायनिबन्धनत्वाश्रये सूत्रे तादृशक्रमप्रतिपादनाय यथेतमनेवञ्चेत्युक्तिवैयर्थ्यापत्तेः। तस्मादवरोहन् जीवः कर्मवानेव—इति॥

सूत्रार्थस्तु॥ अत्र अश्रुतत्वादिति सूत्रादिष्टादिकारीत्यनुवर्तते, अथैतमेवाध्वानं पुनर्निवर्तन्त इति विषयवाक्यात् निवर्तत इत्येकवचनान्तं, निवर्तत इत्यनुवृत्त्यभिप्रायेणैव दीपे भुक्तशिष्टकर्मवान्निवर्तत इत्युक्तं, कृतस्य पुण्यकर्मणः अत्यये नाशे तन्नाशकालावच्छिन्नः इष्टादिकारी अनुशयवान् भुक्तशिष्टकर्मवान् निवर्तते; रमणीयचरणा इत्यादिश्रुत्या वर्णा आश्रमाश्चेत्यादिस्मृत्या च तथाऽवगमादित्यर्थः।

अथ—अत्रानुशयशब्देन स्वर्गजनककर्मण एकदेशो विवक्षितः, उत कर्मान्तरम्? नाद्यः, कर्मणः अद्रव्यत्वेन तस्यैकदेशायोगात्; न च—अयं स्वर्गभोगमनुभूय तदनन्तरं विशिष्टयोनिं गच्छत्विति भगवत्सङ्कल्प एव यागजन्यं पुण्यरूपं कर्म, तत्र स्वर्गभोगमनुभूयेत्यंशस्य फले जातेऽपि अंशान्तरस्य फलानुत्पत्त्या तदेवांशान्तरमनुशय इति—वाच्यम्; तादृशसङ्कल्पस्य एकज्ञानरूपस्य स्वर्गभोगेन नाशावश्यकतया तदंशस्यावस्थानानुपपत्तेः। न द्वितीयः, अनुशयो ह्युपभुक्तशिष्टं कर्मेति भाष्यस्य ततश्शेषेणेत्यादिस्मृतेश्चास्वारस्यापत्तेः, कर्मान्तरस्योपभुक्तशेषत्वाभावात्—इति चेत्। उच्यते। ज्ञानं हि द्रव्यं, तत्तत्पदार्थविषयकत्वमवस्था; तत्रायं स्वर्गं भजतु तदनुभवानन्तरं शुभयोनिं गच्छत्विति—अवस्थाद्वयविशिष्टं ज्ञानमेव यागादिना जायते; तत्र स्वर्गभोगेनैकावस्थाया नाशेऽपि अवस्थान्तरविशिष्टस्य सत्त्वाविरोधात् तस्यैवानुशयपदेन ग्रहणम्॥

वस्तुतस्तु–कर्मान्तरमेवानुशयः; तस्य भुक्तशिष्टत्वव्यवहारश्च-भोक्तव्यकर्मसमुदायप्रविष्टत्वे सति भुक्तत्वाभावपरः; यादृशधर्मस्वरूप योग्यसमुदायप्रविष्टत्वे सति तादृशधर्माभाववत्त्वं यत्र तत्र तादृशधर्मवच्छिष्टत्वेन व्यवहारस्य नियतत्वात्, 'हतशेषा निशाचराः' इत्यादौ तथा दर्शनात् उक्तं च टीकायाम्–"कर्मान्तरमनुशयः, न तु स्वर्गार्थकर्मण एकदेशः"–इति। सूत्रे यथेतमनेवमिति उभयमपि विभागजनकव्यापाररूपे निवर्तत इति धात्वर्थे विशेषणं; यथेतमिति गमनसादृश्यं, तच्च स्वजन्यसंयोगानुयोगिकसंयोगजनकत्वरूपं विवक्षितं; अनेवमित्यनेन च स्वजन्यसंयोगानुयोगिभिन्नानुयोगिकसंयोगजनकत्वस्वजन्यसंयोगानुयोगिसंयोगजनकत्वाभावोभयरूपं विवक्षितम्, वाय्वादिप्राप्तेः पितृलोकाद्यप्राप्तेश्चानेवमिति भाष्यात्, तत्र विभागजनकक्रियासमुदायरूपनिवर्तने आकाशपर्यन्तावच्छेदेन जातक्रियासु सादृश्यं तदनन्तरजातक्रियासु वैधर्म्यमिति विवेकः ॥

॥ सू ॥ **चरणादिति चेन्न तदुपलक्षणार्थेति कार्ष्णाजिनिः** ॥ ३ ॥ १ ॥ ९ ॥

अत्र अश्रुतत्वादित्यत इष्टादिकारिण इति विषयवाक्याच्च योनिमापद्येरन्नित्यनुवर्तते। अग्न्यादिगतिश्रुतेरित्यतः श्रुतिरिति प्रथमान्तम्। इत्थं च–इष्टादिकारिणः चरणात् योनिमापद्येरन्निति चेन्न; श्रुतिः–रमणीयचरणा इत्यादिश्रुतिः, तदुपलक्षणार्था–अनुशये लाक्षणिकी, इति कार्ष्णाजिनिराचार्यो मन्यत इत्यर्थः ॥

सू ॥ **आनर्थक्यमिति चेन्न तदपेक्षत्वात्** ॥ ३ ॥ १ ॥ १० ॥

पूर्वसूत्रात् चरणस्येति, उत्तराच्च सुकृतस्येत्यनुषज्यते। चरणस्य स्मार्ताचारस्यानर्थक्यमिति चेन्न; सुकृतस्य तदपेक्षत्वात्–तदङ्गकयागाद्यनुष्ठानजन्यत्वादित्यर्थः ॥

॥ सू ॥ सुकृतदुष्कृते एवेति तु बादरिः ॥३॥१॥११॥

चरणे इति वर्तते । सुकृतदुष्कृते चरणपदवाच्ये इत्यर्थः । अत्र बादरिणा लक्षणाया एव खण्डनात् स्मार्ताचारस्याङ्गत्वं स्वीकृतमेव, उत्तरपक्षत्वाद्बादरिपक्ष एवाचार्यसम्मत इति बोध्यम् ॥

॥ सू ॥ अनिष्टादिकारिणामपि च श्रुतम् ॥३॥१॥१२॥

पूर्वाधिकरणे सूक्ष्मदेहस्यापि कारणभूतस्सकलसांसारिकदुःखनिदानभूतः कर्मसम्बन्धः मुक्तिपर्यन्तमनुवर्तत इत्युक्तम् । तत्रैव स्वर्गभोगस्य क्षयिष्णुत्वं च कृतात्यय इति भागेन सूचितम् ॥ एवं क्षयिष्णुत्वादिदोषदुष्टस्य स्वर्गसुखस्य जनकं यागादिकमपि यावज्जीवकर्तव्यस्नानसन्ध्यावन्दनादिविहितानुष्ठाननिषिद्धपरिहाररूपस्मार्ताचारमपेक्षत्वाद्‌तिदुष्करमितिचरणादिति सूत्रेण प्रकटीकृतम् । इदानीमनिष्टादिकारिणां अत्यल्पभूतं क्षयिष्णुत्वादिदोषदूषितमपि स्वर्गसुखम् "काकमांसं शुनोच्छिष्टं स्वल्पं तदपि दुर्लभम्" इति न्यायेन दुर्लभमिति सूचयितुं ग्रामं गच्छन् वृक्षमूलान्युपसर्पतीति न्यायेनापि स्वर्गलोकप्राप्तिर्नास्ति प्रत्युत यमसदने रौरवादिषु च भूयान् यातनानुभवः कीटजन्मप्राप्तिश्चेति निरूप्यते ॥

अथवा—यावत्सम्पातमिति अविशेषश्रवणस्य स्वतस्सङ्कोचसाकाङ्क्षस्य रमणीयचरणा इति औपसंहारिकवचनानुसारेण सङ्कोचाश्रयणेऽपि इह चन्द्रमसमेव ते सर्वे गच्छन्तीति श्रुतौ न सङ्कोचसम्भव इत्याक्षेपे—अनिष्टादिकारिणः चन्द्रप्राप्तिशून्याः, तत्कारणविद्याकर्मरहितत्वात्, कारणाभावे कार्याभाव इति व्याप्तिः—इत्यनुमानसहकृतया तेनासौ लोको न सम्पूर्यत इति श्रुत्या सङ्कोच आवश्यक इति निरूप्यते; साधुकर्मसम्बन्धनियमो नास्तीत्युच्यत इति टीकायाः साधुकर्मनियाम्यस्वर्गलोको नास्तीत्युच्यत इत्यर्थः । तेनास्याधिकरणस्य साधुकर्मसम्बन्धरहितेषु द्युलोकप्राप्त्यभावप्रतिपादकत्वेन साधुकर्म-

सम्बन्धाभावप्रतिपादकत्वाभावेऽपि न क्षतिः । यद्वा—टीकावाक्यं यथाश्रुतमेव, अनिष्टादिकारिणामित्यनेन यागादिजन्यपुण्यरूपसाधुकर्माभावप्रतिपादनात्, अनिष्टादिकारिपदस्य इष्टादिकारिणो न भवन्तीति अनिष्टादिकारिण इति व्युत्पत्त्या यागादिकर्तृभिन्नपरत्वे नरकादिगन्तॄणामपि पूर्वोत्तरजन्मसु यागादिकृतिसम्भवेन तद्भिन्नत्वाभावात्, भेदस्य व्याप्यवृत्तित्वात् । अनिष्टादिकारिणामित्यनेन ग्रहणानुपपत्तिः । भेदस्याव्याप्यवृत्तित्वे च यागादिकर्तॄणामपि तेन पदेन सङ्ग्रहापत्तिः । तेष्वपि यागाद्यनुष्ठानानन्तरं कृतिमद्भेदसत्त्वात् अनिष्टादिकारिपदस्य यागादिजन्यापूर्ववद्भिन्नपरत्वावश्यकत्वात् ॥

न चैवमपि—तद्दोषतादवस्थ्यं, नरकादिगन्तृषु पूर्वोत्तरजन्मसु कदाचित्तादृशापूर्वसम्भवेन तद्भेदायोगात् भेदस्याव्याप्यवृत्तित्वे यागाद्यनुष्ठातृष्वपि तत्पूर्वं तादृशभेदसम्भवादिति—वाच्यम् ; अनिष्टादिकारिपदस्य तादृशापूर्ववत् भेदविशिष्टपरत्वेनादोषात्, तादृशयागादिकर्तृषु पूर्वं तद्भेदसत्त्वेऽपि गमनदशायां तद्भेदाभावेन वैशिष्ट्यायोगात्, निरुक्तभेदवैशिष्ट्यस्य यागादिरूपविहितानुष्ठातृषु निषिद्धानुष्ठातृषु च सत्त्वादुभयविधानामपि अनिष्टादिकारिपदेन ग्रहणमुपपन्नम् । उक्तं च भाष्ये—"ये विहितं न कुर्वन्ति निषिद्धं च कुर्वन्ति ते उभयेऽपि पापकर्माणोऽनिष्टादिकारिणः"—इति ॥ न च—नञ इष्टादिकारिपदेनान्वये सुकृतं न कुर्वन्तीत्यर्थस्य इष्टपदेनान्वये निषिद्धं कुर्वन्तीत्यर्थस्य बोधसम्भवात् समासद्वयं भाष्याभिप्रेतमिति—वाच्यम् ; तन्त्रावृत्त्येकशेषाणामन्यतमेन समासद्वयाश्रयणस्य क्लिष्टत्वात्, 'उभयेऽपि पापकर्माणः' इति अनुगतरूपेण उभयोरनिष्टादिकारिपदेन ग्रहणपरभाष्यासङ्गतेश्च ; अस्माकन्तु पुण्यवद्भेदस्य पापरूपत्वात् तथाऽभिधानोपपत्तिः ॥

अत्र संशयः । यागादिजन्यापूर्ववद्देवतां तादृशभेदकालाव-च्छेदेन चन्द्रगमनमस्ति न वेति । अस्तीति पूर्वः पक्षः; 'ये वै के चास्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति' इति कौषीतकी-श्रुत्या चन्द्रगमने लोकान्तरगन्तृत्वव्यापकत्वप्रतीतेः ॥

न च–पापकर्मणां नरकानुभवानन्तरं चन्द्रगमनाभावेऽप्युक्तव्या-पकत्वमुपपद्यते, तेषामेव कदाचित् स्वर्गगमनसम्भवेन प्रतियोगिवैय-धिकरण्यघटितस्य भेदघटितस्य वा तस्य सम्भवादिति–वाच्यम्; विद्यानिष्ठानां यागादिकर्तॄणां चन्द्रगमनस्य श्रुत्यन्तरसिद्धस्यानुवा-दित्वे उक्तश्रुतेर्वैयर्थ्यापत्त्या यदा यदा लोकान्तरगमनं तादृशकाल-सामान्यावच्छेदेन चन्द्रप्राप्तिरिति अपूर्वार्थे तात्पर्याङ्गीकारस्य युक्त-त्वात्; नरकादिगन्तॄणामपि चन्द्रप्राप्तिर्दुर्वारा ॥

न च–चन्द्रप्राप्तिर्द्युलोकप्राप्तिरूपैव, पञ्चाग्निविद्यायां देवशरीर-प्राप्तिहेतुत्वेनोक्ताया द्युलोकप्राप्तेरेव पितृयाणवाक्ये तद्धेतुभूतचन्द्र-प्राप्तित्वेनाभिधानात्; एवं च यागादिफलत्वेनाभिहितस्वर्गप्राप्तेश्च यागाद्यननुष्ठातृषु न सम्भवः, तथा सति यागादेरेव वैफल्यापत्ते-रिति–वाच्यम्; स्वर्गपदार्थदुःखासम्भिन्नसुखस्य यागादिफलत्वेऽपि मार्गघटकतया तल्लोकगमनमात्रस्य तत्फलत्वाभावेन तस्य यागाद्य-कर्तृष्वपि सम्भवाविरोधात्, तादृशसुखानुभवस्यैव तत्त्वसम्भवात् ॥

न च–इष्टादिकारिणाममृतमयदेहप्राप्त्यर्थं चन्द्रगमनस्यावश्य-कत्वेऽपि यमसदनगन्तॄणां चन्द्रगमनेन न किञ्चित्प्रयोजनमिति–वाच्यम्; "एतद्वै स्वर्गस्य लोकस्य द्वारं यश्चन्द्रमाः तं यत् प्रत्याह-तमतिसृजते, य एनं प्रत्याहत इह वृष्टिर्भूत्वा वर्षति त इह कीटो वा पतङ्गो वा शकुनिर्वा"–इत्यादिकौषीतकीश्रुत्या चन्द्रस्य पुण्य-पापपरीक्षकतया उक्तत्वेनायं स्वर्गसुखयोग्यः अयं तदयोग्य इति निश्चयार्थमेव तद्गमनस्यावश्यकत्वात्, यमसदनस्य पितृलोकैकदेश-

त्वात्, पितृलोकप्राप्त्यन्यथानुपपत्त्या धूमादिमार्गावश्यकत्वे सिद्धे चन्द्रगमनस्यावर्जनीयत्वात् ॥

न च—गन्तव्यस्थलैक्येऽपि गन्तृभेदात् मार्गानियमसम्भवः, विदुषां देवयानेन अविदुषां पितृयाणेन चन्द्रगमनदर्शनात्, तथा पितृलोकप्राप्तिः पुण्यकृतां धूमादिना अपुण्यकृतां तु मार्गान्तरेणेति न चन्द्रप्राप्त्यावश्यकतेति वाच्यम्; 'द्वे सृती अशृणवं पितॄणामहं देवानां उत मर्त्यानां ताभ्यामिदं विश्वमेजत् समेति' इति बृहदारण्यश्रुत्या विश्वशब्दासङ्कोचेन देवयानपितृयाणव्यतिरिक्तमार्गान्तरेण कस्यापि लोकान्तरगमनं नास्तीत्यर्थस्य प्रतीतेः ॥

न च—'केनासौ लोको न सम्पूर्यते' इति प्रश्नस्य स्वर्गलोकः केन न प्राप्यत इत्यर्थकस्योत्तरतया—

"अथैतयोः पथोः न कतरेण च तानीमानि क्षुद्राण्यसकृदावृत्तीनि भूतानि भवन्ति, जायस्वम्रियस्वेत्येतत् तृतीयं स्थानं, तेनासौ लोको न सम्पूर्यते" —इति श्रूयते ॥

उत्तरस्यायमर्थः; यानि भूतानि उक्तयोर्देवयानपितृयाणयोः पथोर्मध्ये, न कतरेण—न केनापि मार्गेण, गच्छन्ति; तानीमानि क्षुद्राणि—दंशमशककीटादीनि, असकृदावृत्तीनि सन्ति; जायस्व म्रियस्वेति भवन्ति, जननमरणाभिन्नासाधारणधर्माश्रयाः; एतत्—एतादृशाः पापकर्माणः, तृतीयस्थानं—स्थानशब्दानुरोधात् एकत्वान्नपुंसकत्वं च, तेन—तादृशतृतीयस्थानशब्दितेन पापकर्मणा, असौ लोकः—स्वर्गलोकः, न प्राप्यत इति। तथा च—उक्तश्रुत्या ये देवयानेन पितृयाणेन वा न गच्छन्ति तेषां संसारावर्तनजननमरणादिकं स्वर्गलोकाप्राप्तिश्चेत्युक्त्या मार्गान्तरासत्त्वसूचनात् बृहदारण्यश्रुतिगतविश्वशब्दस्य विद्यानिष्ठकर्मनिरतसाकल्यपरतया सङ्कोचावश्यकतया

यमसदनगन्तॄणां न पितृयाणावश्यकतेति—**वाच्यम्** । यदभावस्यानिष्टप्रयोजकत्वं शास्त्रोक्तं तस्य विधेयत्वमिति नियमस्य——

"यो वा एतदक्षरं गार्ग्य विदित्वाऽस्मिन् लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति"—

इत्यादौ दर्शनेन प्रकृते मार्गद्वयगमनाभावे अनिष्टकथनेन मार्गद्वयस्य विधेयत्वावश्यकतया एतयोः पथोरित्यस्य मार्गगतिहेतुभूतविद्याकर्मपरत्वावश्यकत्वात्, मार्गद्वयगमनस्य पुरुषव्यापारसाध्यत्वाभावेन विधानायोगात्, तदभावस्यानिष्टप्रयोजकत्वोक्तेर्व्यर्थतापत्तेः । तथा च-तादृशश्रुतेः विद्याकर्मरहितानां स्वर्गसुखाप्राप्तिः जननमरणादिप्राप्तिश्चेत्यर्थपरतया मार्गघटकतया स्वर्गप्राप्तिर्नास्तीत्यर्थपरत्वाभावेन बृहदारण्यगतविश्वशब्दस्य सङ्कोचायोगात् ॥

न च- उक्तश्रुतेः सुखानुभवार्थं स्वर्गप्राप्त्यभावपरत्वे विद्याराहित्योक्तिर्व्यर्था, विद्यासत्त्वेऽपि तादृशस्वर्गप्राप्तेरभावात् विद्यानतामानुषङ्गिकतयैव चन्द्रप्राप्तिरूपस्वर्गप्राप्तेस्सत्त्वात् तदुक्तेरानुषङ्गिकतयाऽपि स्वर्गप्राप्त्यभावपरत्वमावश्यकमिति—वाच्यम्; तेषां सर्वथा चन्द्रप्राप्त्यभावे देहारम्भानुपपत्तेः, देहारम्भस्य पञ्चमाहुतिसाध्यत्वात्, "अथ यो दक्षिणे प्रमीयते पितॄणामेव महिमानं गत्वा चन्द्रमसस्सायुज्यं गच्छति" इति श्रुत्या विद्यानिष्ठानां चन्द्रप्राप्तेरपि तात्कालिकसुखार्थत्वात्, चन्द्रस्यातिवाहिकत्वेन मुक्तानां तत्कृतोपचारस्वीकारावश्यकत्वाच्च ॥

वस्तुतः—"वेत्थ यथा केनासौ लोको न सम्पूर्यता" इति प्रश्नस्य प्रयतां सर्वेषां चन्द्रप्राप्तिसत्त्वात् बहुभिः प्रयद्भिरपि येन केन कारणेन चन्द्रलोको न सम्पूर्यते न निबिडीक्रियत इत्यर्थः, न तु केन पुंसा चन्द्रलोको न प्राप्यत इति; तथा सति यथाशब्दवैयर्थ्यापत्तेः, धातोर्लक्षणाप्रसङ्गाच्च; विद्याकर्मरहितानां क्षुद्रजन्तूनां देहारम्भाय

चन्द्रलोके असकृद्गमनागमनवत्त्वेऽपि तेषां चन्द्रलोके अवस्थानाभावात्। तल्लोकस्य निबिडतेत्युत्तरस्यार्थः, असकृदावृत्तीनीति गमनागमनमभिधाय न सम्पूर्यत इति पूर्त्यभावमात्रप्रतिपादनात्। तस्माद्निष्टादिकारिणां मार्गघटकतया चन्द्रप्राप्तिरावश्यकीति ॥

सिद्धान्तस्तु—अनिष्टादिकारिणामानुषङ्गिकतयाऽपि तत्प्राप्तिर्नास्ति, 'य इमे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति' इति—पितृयाणोत्पत्तिवाक्ये इष्टादिकारिणामधिकारित्वेन बोधनादुत्पत्तिशिष्टाधिकार्यवरुद्धेऽधिकार्यन्तरस्य विधानायोगात्, उक्तकौषीतकीवाक्यस्य इष्टादिकारिगतकार्त्स्न्यपरत्वस्य युक्तत्वात्, गुणविशिष्टे ज्ञाते गुणान्तराकाङ्क्षानुदयवदधिकारिविशिष्टे ज्ञातेऽपि अधिकार्यन्तराकाङ्क्षानुदयस्य समत्वेनोत्पत्तिशिष्टगुणावरुद्ध इति न्यायवदुत्पत्तिशिष्टाधिकार्यवरुद्ध इत्यपि न्यायस्यावश्यकल्पनीयत्वात्। उक्तकौषीतकीवाक्यगतविश्वशब्दस्य सङ्कोचानङ्गीकारे चन्द्रगमनान्यथानुपपत्त्या अनिष्टादिकारिणां देवयानं पितृयाणं वा कल्प्यत इत्यत्र विनिगमनाविरहादुभयकल्पनाप्रसङ्गः । तथा सति चार्चिरादिगतिप्रयोजकज्ञानविषयतायाः परमात्मसाधकत्वस्य 'श्रुतोपनिषत्कगत्यभिधानात्' इतिसूत्राभिप्रेतस्यानुपपत्तिः ॥

ननु--देवयानस्य उत्पत्तिवाक्येन विद्यावदधिकारिकत्वावगमात् विद्याविरहिणां तदसम्भवः—इति चेत्। तुल्यं प्रकृतेऽपि; अनिष्टादिकारिणां प्रयोजनाभावादपि न चन्द्रप्राप्तिसम्भवः, 'एतद्वै स्वर्गस्य लोकस्य द्वारं यश्चन्द्रमाः' इत्यादिश्रुतिश्च विद्यानिष्ठकर्मनिष्ठोभयविषया, यथाकर्म यथाविद्यमिति तत्रैवोक्तेः। ततश्च न परीक्षार्थतयाऽपि चन्द्रप्राप्तिसम्भवः, नापि देहारम्भकीभूतपञ्चमाहुत्यर्थतयाऽपि चन्द्रप्राप्तिरावश्यकी, 'तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्ति अण्डजं जीवजमुद्भिज्जं च' इति श्रुतौ—उद्भिज्जशब्दविवक्षितयोः स्वेदजो-

ध्द्रिज्जयोः पञ्चमाहुतिनिरपेक्षं देहारम्भप्रतीत्या, स्मृतावपि- द्रौपदी- धृष्टद्युम्नादीनां पुण्यकर्मणामपि तथा प्रतीतेश्चानिष्टादिकारिणामपि पञ्चमाहुतिं विनैव देहरम्भसम्भवात्। किञ्च—अथैतयोरिति श्रुत्या तृतीयस्थानशब्दितानां पापकर्मणां द्युलोकाप्राप्तेः कण्ठोक्तत्वादपि न तेषां देहारम्भाय चन्द्रप्राप्तिकल्पनसम्भवः। न च—पापकर्मणां द्युलोकादौ गमनागमनवत्त्वेऽपि चिरावस्थानाभावात् अनिबिडत्वमेव प्रतीयते, न तु द्युलोकाप्राप्तिरिति—वाच्यम्; तथा सति जुगुप्साहेतुज्ञानविषयार्थप्रतिपादकत्वानुपपत्तेः, तेनासौ लोको न सम्पूर्यत इत्युक्त्वा तस्माज्जुगुप्सेतेत्युक्त्या पूर्वोक्तार्थस्य जुगुप्साहेतुज्ञानविषयत्वलाभात्, न सम्पूर्यत इत्यस्य न प्राप्यत इत्यर्थकत्वे च काकमांसमिति न्यायेन स्वल्पसुखस्यापि दुर्लभत्वसूचनेन जुगुप्साहेतुज्ञानविषयत्वसम्पत्तेः॥

न च—न सम्पूर्यत इत्यस्य न निबिडीक्रियत इत्यर्थाङ्गीकारेऽपि चिरावस्थानाभावलाभात् तत्सुखस्य दुर्लभत्वमवगम्यत इति—वाच्यम्; तत्र गमनाङ्गीकारे तद्दर्शनादिजन्यसुखस्यावर्जनीयत्वेन सुखसामान्यस्य दुर्लभत्वालाभात् तल्लाभाय न प्राप्यत इत्यर्थस्यैव युक्तत्वात् प्रकृतार्थापोषकशक्त्यपेक्षया प्रकृतार्थपोषकलक्षणायाः अदोषत्वेन धातोर्लक्षणाङ्गीकारे क्षतिविरहात्; 'वेत्थ यथा केनासौ लोकः' इति प्रश्नवाक्ये तल्लोकप्राप्त्यभावे कारणाभावप्रयुक्तत्वप्रतिबन्धकप्रयुक्तत्वादिप्रकारकजिज्ञासया यथेत्यस्योपादानात्, अथैतयोः पथोरित्युत्तरवाक्ये च देवयानपितृयाणरूपकारणाभावप्रयुक्तत्वबोधनात्। पथिन्शब्दस्य देवयानपितृयाणरूपमुख्यार्थाङ्गीकारे बाधकविरहेण लक्षणया विद्याकर्मपरत्वाश्रयणमयुक्तं, विद्याकर्मफलभूतमार्गद्वयभ्रष्टानां दुर्गतिकथनस्य विद्याकर्मविधानौपयिकतया सार्थक्यसम्भवात्, भगवत्प्रसादेन विना न मोक्ष इत्यादौ भगवत्प्रसादाभावस्यानिष्टजनकत्वो-

क्तावपि भगवत्प्रसादस्य विधेयत्वाभावेन व्यभिचारेण यदभावस्यानिष्टप्रयोजकत्वं शास्त्रोक्तं तत्तत्साधनान्यतरस्य विधेयत्वमित्येव नियमावश्यकत्वात्; तथा च—यानि भूतानि देवयानपितृयाणयोरन्यतरेण न गच्छन्ति, तानि जायस्व म्रियस्वेति ईश्वरशासनेनासकृदावृत्तीनि भवन्तीत्यथैतयोरिति श्रुतेरर्थः; जायस्व म्रियस्वेतीत्यनन्तरमीश्वरशासनेनेत्यध्याहारात्। यद्वा; असकृदावृत्तीनि भवन्ति—गमनागमनवन्ति भवन्ति, जायन्ते म्रियन्ते चेत्यर्थः; पुरुषादिव्यत्ययश्छान्दसः। अथवा—असकृदावृत्तीनि भवन्तीति वर्तमानकालावच्छेदेन जननमरणपरं, जायस्व म्रियस्वेति भूतकालावच्छेदेन तत्परं जज्ञिरे मम्रिरे चेत्यर्थः ॥

वस्तुतस्तु—

"पुरीमवस्कन्द लुनीहि नन्दनं
मुषाण रत्नानि हरामराङ्गनाः।
विगृह्य चक्रे"—

इत्यादौ अस्वास्थ्यकर्मककृधात्वर्थव्यापारे यथा पुरीकर्मकावस्कन्दनादीनां अभेदान्वयः तथा जायस्व म्रियस्वेति जननमरणादीनामपि भूधात्वर्थासाधारणधर्मे अभेदेनान्वयः; इतिशब्दश्चाभेदान्वयतात्पर्यग्राहकः; जायस्व म्रियस्वेति च न मध्यमपुरुषैकवचनं; समुच्चयेऽन्यतरस्यामित्यनेन एककर्त्रन्वयित्वे सति अनेकक्रियात्वरूपसमुच्चयाश्रयक्रियावाचिधातोः लोडस्तस्य च सकलपुरुषवचनविषये परस्मैपदिभ्यः कर्तरि ह्यादेशस्य आत्मनेपदिभ्यो भावकर्मकर्तृषु स्वादेशस्य च विकल्पेन विधानात्; सङ्ख्याकालपुरुषाद्यभिव्यक्तिश्चानुप्रयोगाधीना, समुच्चये सामान्यवचनस्येत्यनेन समुच्चये लोड्विधौ, समुच्चीयमानधात्वर्थतावच्छेदकव्यापकधर्मावच्छिन्नवाचित्वरूपसामान्य-

वचनत्वाश्रयधातोरनुप्रयोगस्य विधानात्। अत्रापि जननत्वमरणत्वादि-व्यापकधर्मावच्छिन्नवाचिभूधातोरनुप्रयोगात् सङ्ख्याकालादेर्बोधः ॥

एतेन जायस्व म्रियस्वेति श्रुतावनुप्रयोगाभावेऽपि समुच्चये लोड्भवति; क्रियामात्रविवक्षणेन सङ्ख्याकालाद्यनभिव्यक्त्यनपेक्षणेनानुप्रयोगाभावोपपत्तेः, अनुप्रयोगविधायकसूत्रभाष्ये प्रत्याख्यानाच्च । अत एव—एतच्छ्रुतिसमानार्थके "आ च सत्यलोकादा चार्वाचेर्जायस्व म्रियस्व" इति विपरिवर्तमानमात्मानं जीवलोकं चावलोक्येति वाचस्पति प्रयोगेऽपि अनुप्रयोगाभावोपपत्तिरिति शेखरकृतां प्रयासो नोपादेयः; भवन्तीत्यनुप्रयोगस्य सत्त्वात्, वर्तमानकालस्याविवक्षणे प्रायशस्सर्वेषामपि जीवानां यदा कदाचित् असकृदावर्तनजननमरणादिसत्त्वेन तृतीयस्थानत्ववारणाय तद्विवक्षणस्यावश्यकत्वाच्च, तद्विवक्षणे च वर्तमानकालावच्छिन्नासकृदावर्तनादिविशिष्टस्य तृतीयस्थानत्वबोधेन तादृशकालावच्छेदेनैव तृतीयस्थानत्वमिति पर्यवसानात् । वाचस्पतिवचनेऽपि अनुप्रयोगाभावोऽसिद्धः, विपरिवर्तमानमिति सामान्यवचनानुप्रयोगस्य सत्त्वात् श्रुतौ वर्तमानकालस्य विवक्षासम्भवसूचनायैव शानचः प्रयोगात् ॥

जायस्व म्रियस्वेति श्रुतौ उक्तार्थचतुष्टयं च टीकायामेवोक्तं—

> "जायस्व म्रियस्वेतीश्वरशासनानुवर्तीनीत्यर्थः, जायन्ते म्रियन्त इति वाऽर्थः; वेदस्वातन्त्र्यात्। जज्ञे मम्र इति भूतार्थता वा, पुरीमवस्कन्द लुनीहि नन्दनमित्यादिवत्"—इति ॥

वेदस्वातन्त्र्यादिति व्यत्ययो बहुलमित्याद्यनुशासनादिति भावः; एतच्च भूतार्थता वेत्युत्तरत्रापि काकाक्षिन्यायेनान्वेति। पुरीमवस्कन्द लुनीहि नन्दनमित्यादिवदित्यत्र भूतार्थता वेत्यतो वेत्यस्यानुवृत्त्या कल्पान्तरत्वलाभः । अत्र वाकारान्तरानुक्तिः तादृशदृष्टान्तस्य प्रथमकल्पेऽप्यन्वयसूचनाय, द्वितीयतृतीयकल्पयोश्च वेदस्वातन्त्र्यादि-

त्युक्त्या लौकिकदृष्टान्तानन्वयप्रतीतेः । एवं च—अवस्कन्देत्यादीनि विधिलोडन्तान्येव, पुरीमवस्कन्देत्यादिरूपभृत्यप्रेषणद्वारा अस्वास्थ्यं चक्र इत्यर्थः। तत्र पुरीमवस्कन्देत्यादिकं यथा भृत्यान्प्रति शासनाकारः तथाऽत्रापि जायस्व म्रियस्वेतीश्वरशासनाकार इति प्रथमकल्पार्थः ॥ वाकारानुषङ्गेण चतुर्थकल्पानुरोधेनार्थश्च पूर्वमेवोक्तः। एतत्तृतीयं स्थानमिति एतच्छब्देन जननमरणाभिन्नासाधारणधर्माश्रयाणां ग्रहणं; क्षुद्राणि भूतानि जायस्व म्रियस्वेति भवन्तीति पूर्ववाक्ये क्षुद्रभूताभिन्नाः जननमरणाभिन्नासाधारणधर्माश्रया इत्याख्यातार्थमुख्यविशेष्यकबोधेन मुख्यविशेष्यस्यैव सर्वनाम्ना परामर्शोपपत्तेः ॥

सूत्रार्थस्तु—चरणादित्यतः चरणमिति प्रथमान्तं, चन्द्रमसं गच्छन्तीति श्रुतिवाक्यात् चन्द्रमस इति षष्ठ्यन्तं, 'न तृतीये तथोपलब्धेः' इत्यतः तथेति च। एवं चानिष्टादिकारिणामपि चन्द्रमसश्चरणं गमनं अस्तीति शेषः। चशब्दो हेत्वर्थः, यतः यथाश्रुतं चन्द्रमसमेव ते सर्वे गच्छन्तीति सर्वेषां चन्द्रगमनं श्रुतमित्यर्थः ॥

ननु पापिनामपि चन्द्रगमने तेषां स्वर्गसुखानुभवस्यैव प्रसङ्गेन दुःखानुभवासम्भवेन पापस्य निष्फलत्वापत्तिरित्यत आह—

॥ सू ॥ संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॥ ३ ॥ १ ॥ १३ ॥

तुशब्दः उक्तशङ्कानिरासार्थः। अत्रापि श्रुतिवाक्यात् चन्द्रमसीति सप्तम्यन्तं, सुकृतदुष्कृते इत्यतो दुष्कृतमिति चानुवर्तते । वैवस्वतं सङ्गमनमिति श्रुतिवाक्याच्च वैवस्वतस्येति षष्ठ्यन्तं, जात इति चाध्याहार्यं; वैवस्वतस्य संयमने शासने जाते सतीत्यन्वयः। संयमन इति सतिसप्तमी; तदर्थश्च जननमेव, समभिव्याहृतक्रियाया एव सातिसप्तम्यर्थत्वात्, गोषु दुग्धासु गत इत्यादौ दोहनकर्मीभूतगोकर्मकदोहनोत्तरकालीनगमनवानिति बोधात्, तत्र गोपदोत्तरसप्त-

म्यर्थदोहनस्योत्तरकालीनत्वसंसर्गेण गमनेऽन्वयात्; गोषु दुह्यमानासु आगत इत्यादिवर्तमानार्थकक्तसमभिव्याहारे समानकालीनत्वस्येवातीतार्थक्तसमभिव्याहारे उत्तरकालीनत्वस्य संसर्गत्वात्; प्रकृतेऽपि संयमनपदोत्तरसप्तम्यर्थस्य जननस्य उत्तरकालीनत्वसम्बन्धेनेव जन्यत्वसम्बन्धेनापि अनुपूर्वकभूधात्वर्थानुभवे अन्वयः। एवञ्च—यमाज्ञाजन्यदुष्कृतानुभवानन्तरकालीनावितरेषाञ्चारोहावरोहौ भवत इत्यर्थः। 'संयमन इति निमित्तसप्तमी, यमाज्ञयेत्यर्थः'—इति टीका। तत्र निमित्तसप्तमीत्यस्य निमित्तत्वसंसर्गकबोधजनिका सतिसप्तमीत्यर्थः, न तु निमित्तात्कर्मयोग इति सूत्रविहिता सप्तमीत्यर्थः; तत्र संयोगसमवायान्यतरात्मककर्मयोगस्य यमशासनेऽभावात्, तस्य दुष्कृतानुभवफलत्वाभावाच्च, फलस्यैवात्र निमित्तपदेन ग्रहणात्, चर्मणि द्वीपिनं हन्तीत्यादौ विनियोज्यत्वप्रकारकेच्छाजन्यत्वस्य सप्तम्यर्थतया चर्मविशेष्यकताहशेच्छाजन्यद्वीपिहननवानिति बोधात्; शासनविशेष्यकताहशेच्छाजन्यत्वस्य दुष्कृतानुभवे बाधात्॥

उक्तं च कैयटे—

"क्रियाफलमिह निमित्तत्वेन विवक्षितं, यत्क्रियाप्रयोजकं यदर्थः क्रियारम्भः ततो हेताविति तृतीयायां प्राप्तायां सप्तमी विधीयते, तस्य निमित्तस्य कर्मणा यदि संयोगस्सम्बन्धः; तेन 'वेतनेन धान्यं लुनाति' इत्यत्र सप्तमी न भवति, वेतनस्य धान्येन संयोगाभावात्॥" —इति॥

यद्वा—संयमन इति निमित्तात्कर्मयोग इत्यनेनैव सप्तमी, यमशासनस्य फलत्वाभावेऽपि तत्परिपालनस्य फलत्वाक्षतेः॥

"चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्।
वालेषु चमरीं हन्ति सीम्नि पुष्कलको हतः॥"—

इत्यत्रापि चर्मादेः फलत्वाभावेन तल्लाभस्यैव फलत्वात्। चर्मलाभेच्छाजन्यत्वस्य सप्तम्यन्तार्थत्ववत् शासनपरिपालनेच्छाजन्यत्वस्यापि तथात्वसम्भवात्। अयं दुष्कृतमनुभवत्वित्याकारकधर्मभूतज्ञानात्मकस्य यमशासनस्य विषयतायाः दुष्कृते सत्त्वेन कर्मयोगस्यापि सत्त्वात्, ज्ञानस्य द्रव्यत्वेन विषयतायाश्च संयोगरूपत्वेन संयोगात्मककर्मयोगस्यैव सम्भवात् ॥

के चित्तु—

संयमन इत्यस्य यमशासनविषये तत्पुर इत्यर्थः: अधिकरणे सप्तमी। 'संयमने यमशासने तत्प्रयुक्तयातना अनुभूय' इति भाष्यस्यापि—यमशासन इति शास्त्यस्मिन्नित्यधिकरणे ल्युट्, यमाज्ञाविषये संयमनीपत्तने यमप्रयुक्तयातना अनुभूयेति व्याख्यानसम्भवान्न विरोधः ॥ न च—यमपत्तने अनुभूयेत्यनुक्त्वा यमशासनविषयत्वेन पत्तनस्याभिधाने प्रयोजनाभाव इति—वाच्यम्; संयमनीपदस्य यमपत्तनेरूढिसत्त्वेऽप्यकारान्तसंयमनपदस्य तत्र रूढिविरहात्तथा व्याख्यानोपपत्तेः, 'प्रभवति संयमने ममापि विष्णुः' इत्यादौ संयमनपदस्य शासने प्रयोगेण तत्र रूढिसद्भावात्। किं च नरकेषु दुष्कृतमनुभूय येषामारोहावरोहौ तत्र पत्तनाधिकरणकानुभवानन्तरकालीनत्वस्य बाधेनानिष्टादिकारिकर्तृकारोहावरोहत्वावच्छेदेन तादृशानुभवानन्तरकालीनत्वस्यान्वयोपपत्तये यमशासनविषयत्वेन पत्तननरकोभयसाधारणरूपेणाभिधानमुचितम्। एवमभिधानस्योक्तप्रयोजनञ्च तत्रापि तद्व्यापारादविरोध इति सूत्रकृतैव वक्ष्यते। किञ्च यमपत्तने अनुभूयेत्युक्ते तादृशानुभवे यमाज्ञाजन्यत्वं न लभ्यते, यमाज्ञाविषये अनुभूयेत्युक्तौ च यमशासनस्य धर्मिपारतन्त्र्येण जन्यतासम्बन्धेनानुभवे भानात्तज्जन्यत्वं लभ्यते, अतस्तल्लाभाय च तथाऽभिधानम्। एवञ्च—संयमन इति निमित्तसप्तमीति टीकायां निमित्तसप्तमीत्यस्य निमि

त्त्वसंसर्गरूपान्वयरूढ्यर्थतावच्छेदकप्रकारकबोधजनिका. अधिकरण-सप्तमीत्यर्थः ॥

न च—यमशासनविषयत्वरूपयोगार्थतावच्छेदकरूपतत्पत्तनत्वरूप-रूढ्यर्थतावच्छेदकरूपाभ्यां पत्तनस्याधिकरणतया बोधेऽपि धर्मिपार-तन्त्र्येण शासनस्य जन्यतासम्बन्धेनानुभवे भानसम्भवात् रूढ्यर्थ-तावच्छेदकपरित्यागो भाष्ये किमर्थं कृतः—इति वाच्यम्; रूढ्यर्थता-वच्छेदकस्यापि भानाङ्गीकारे तादृशपत्तनाधिकरणकानुभवानन्तर-कालीनत्वस्यावच्छेदकावच्छेदेनान्वयस्य विवक्षितस्य बाधापत्तेः। तथा च 'तत्रापि तद्व्यापारादविरोधः' इति सूत्रावतरणिकाभाष्यम्—"ननु सप्तसु लोकेषु गच्छतां कथं यमसदनप्राप्तिरत आह—'तत्रापी-त्यादि' इति'। तथा च—रूढ्यर्थताऽवच्छेदकस्य घटकत्वाभिप्रायेण शङ्का, अघटकत्वाभिप्रायेण समाधानमिति बोध्यम् ॥ न चैवं—यमसदन-प्राप्तिवचनानि पुराणादिषु पठ्यन्ते, तन्निबन्धनेयमाशङ्केति टीका-विरोधः—इति वाच्यम्; तादृशपुराणवचनानां सत्त्वात् रूढ्यर्थस्य घटकत्वमावश्यकमिति शङ्कावष्टम्भवर्णनपरत्वात् ॥

—इति वदन्ति ॥

ननु चन्द्रमसमेव ते सर्वे गच्छन्तीति श्रुत्या अनिष्टादिकारिणां चन्द्रारोहावरोहयोस्सिद्धावपि यमाज्ञाधीनदुःखानुभववत्त्वमसिद्धमिति शङ्कायामुक्तं—'तद्गतिदर्शनात्' इति। तच्छब्देन यमाज्ञाधीनदुष्कृ-तानुभवस्य परामर्शः, 'अयं लोको नास्ति न पर इति मानी पुनः पुनर्व-शमापद्यते मे', 'वैवस्वतं सङ्गमनं जनानाम्' इत्यादिश्रुत्या तादृशानु-भवप्राप्तेस्सिद्धत्वात्; अयं लोको नास्ति न पर इति मानी—इहामुत्र चादृ-ष्टजन्यं सुखं नास्तीति मननशीलः, तादृशसुखार्थं विहितं कर्माकुर्वाण इति यावत्; पुनः पुनर्वशमापद्यते मे—पुनःपुनर्जन्मजरामरणादिप्राप्त्या मदाज्ञाविषयतां प्राप्नोतीत्यर्थात्; जनानां सङ्गमनं प्राप्यमित्यर्थः।

अत यद्यपि—अयमेव लोकः स्त्र्यन्नपानादिरूपोऽस्ति न परलोक इति मानीत्यर्थः एकनञ्घटितपाठमङ्गीकृत्य एवकारमध्याहृत्य परैर्व्याख्यातः, तथाऽपि नञ्द्वयघटितपाठस्यैव सर्वत्र सत्त्वेन प्रामाणिकत्वात् चकारमध्याहृत्य व्याख्यानमेव युक्तमित्यभिप्रेत्य टीकायामित्थं व्याख्यातम् ॥

ननु—उक्तश्रुत्या यमाज्ञाविषयत्वसिद्धावपि न तादृशानुभववत्त्वसिद्धिः। न च—यमाज्ञाविषयत्वस्य तज्जन्यदुःखानुभवव्याप्यत्वाद्धूमोऽस्तीति वाक्याद्वह्नेरिव मे वशमापद्यत इत्यनेनापि दुःखानुभववत्त्वस्याऽऽनुमानिकी सिद्धिस्सम्भवतीति—वाच्यम्; दुःखानुभवशून्येषु यमभटेष्वपि यमाज्ञाविषयत्वस्य सत्त्वेन व्यभिचारात्—**इत्याशङ्क्य;** अयं लोको नास्तीति दुरभिमानस्यानिष्टफलकथनाय प्रवृत्ते तद्वाक्ये कीर्त्यमानं यमवश्यत्वं दुःखानुभवोपधायकयमाज्ञाविषयत्वरूपमेव वक्तव्यं; केवलाज्ञाविषयत्वस्यानिष्टत्वाभावात्। तथा च—श्रुतिघटकवशपदस्य तादृशयमाज्ञाविषयत्वे लक्षणा समाश्रयणीयेति समाधानं मनसि निधाय तादृशलक्षणायास्तात्पर्यानुपपत्तिमूलिकायास्तादृशवशपदस्य तादृशानुभवोपधायकयमाज्ञाविषयत्वे तात्पर्यग्रहाधीनत्वात्तादृशतात्पर्यग्राहकमुपबृंहणमुदाहरति—

॥ सू॥ **स्मरन्ति च** ॥ ३ ॥ १ ॥ १४ ॥

अनिष्टादिकारिणामित्यनुवर्तते, पूर्वसूत्रात्तद्गतिमिति द्वितीयान्तं, पराशरादय इत्यध्याहार्यम्। अनिष्टादिकारिणां तादृशानुभवप्राप्तिं पराशरादयः स्मरन्तीत्यर्थः।

"अङ्गुल्यष्टभागोऽपि न सोऽस्ति द्विजसत्तम।
न सन्ति प्राणिनो यत्र कर्मबन्धनिबन्धनाः॥"—

इति प्रकृत्य,

"सर्वे चैते वशं यान्ति यमस्य भगवन् किल ।
आयुषोऽन्ते तदा यान्ति यातनास्तत्र चोदिताः ॥"—

इत्यादिना तादृशानुभवोपधायकाज्ञाविषयतास्मरणात् । एवञ्च—उक्तोपबृंहणानुरोधात् श्रुतिघटकवशपदस्यापि तादृशार्थपरत्वमावश्यकमिति भावः । यमवश्यतां स्मरन्तीति भाष्ये वश्यतापदमपि तादृशानुभवोपधायकवश्यतापरमिति न तद्विरोधः ॥ अत्र यद्यपि—सर्वे चैत इत्यादेरनिष्टादिकारिमात्रविषयत्वं न प्रतीयते, सर्वसाधारण्येन प्रवृत्तत्वात्, तथाऽप्युत्तरत्र भगवद्भक्तानां यमविषयगमनाभावस्य प्रतिपादनात् तद्वचनस्यानिष्टादिकारिमात्रविषयत्वमावश्यकमित्याशयः ॥

॥ सू ॥ अपि सप्त ॥ ३ ॥ १ ॥ १५ ॥

अत्राप्यनिष्टादिकारिणामिति स्मरन्तीति तद्गतय इति चतुर्थ्यन्तं चानुवर्तते । अनिष्टादिकारिणां तादृशानुभवप्राप्तये सप्तनरकानपि स्मरन्तीत्यर्थः ॥

ननु—नरकादिप्राप्तिप्रतिपादकपुराणवचनानुसारात् वशमापद्यत इति श्रुतिघटकवशपदस्य तादृशानुभवप्रयोजकाज्ञाविषयत्वे लक्षणेति न युक्तं, यमसदनप्राप्तिप्रतिपादकवचनानुसारेण तत्सदनप्राप्तिफलिततद्भृत्यताप्रयोजकाज्ञाविषयत्वे लक्षणायाः विनिगमनाविरहेणापत्तेः, भाक्तं वा नात्मवित्त्वादिति सूत्रोक्तन्यायेन देवसदनं प्राप्तानां देवभृत्यत्ववत् यमसदनं प्राप्तानां तद्भृत्यत्वस्यावर्जनीयत्वात्, द्वयोरपि पुराणवचनयोः साङ्ख्यस्मृतिमन्वादिस्मृतिवत् न्यूनाधिकभावविरहेण वेदोपबृंहणत्वात्—इत्याशङ्क्य; तयोर्विरोधं परिहरति—

॥ सू ॥ तत्रापि तद्व्यापारादविरोधः ॥ ३ ॥ १ ॥ १६ ॥

अत्रानिष्टादिकारिणामिति चरणादिति चानुवर्तते; तत्रापि—सप्त-नरकेष्वपि, अपिना यमसदनस्य समुच्चयः, तद्व्यापारात्—यमशासनात्; अनिष्टादिकारिणां चरणात्—गमनात्, अविरोधः—यमसदन-नरकप्राप्त्योः क्रमादविरोध इत्यर्थः। तथा च—तद्वचनयोरपि न विरोध इति भावः ॥

उक्तपूर्वपक्षे सिद्धान्तमाह—

॥ सू ॥ विद्याकर्मणोरिति तु प्रकृतत्वात् ॥३॥१॥१७॥

अत्र उत्तरसूत्रात् तथा नेत्यनुवर्तते, देवयानपितृयाणे इत्यध्याहार्यं; तुशब्दस्सिद्धान्तद्योतनार्थः। तथा न—अनिष्टादिकारिणां चन्द्रगमनं नेत्यर्थः; इतिशब्दो हेत्वर्थे, यतो देवयानपितृयाणे विद्याकर्मणोः विद्याकर्मफलानुभवार्थे, फलानुभवार्थत्वरूपसम्बन्धस्य षष्ठ्यर्थत्वात्। उक्तं च टीकायाम्—"सम्बन्धसामान्यविषया षष्ठी तादर्थ्यपर्यवसायिनी, तादर्थ्यं च तत्फलभोगार्थत्वम्"—इति। न च—षष्ठ्या जन्यत्वार्थकत्वमभ्युपगम्य विद्याकर्मजन्ये देवयानपितृयाणे इत्यर्थः कुतो नोक्तः—इति वाच्यम्; देवयानपितृयाणयोः विद्याकर्मजन्यत्वविरहात्, तद्गमनयोस्तज्जन्यत्वसम्भवेऽपि षष्ठ्यास्सम्बन्धसामान्यविषयत्वावश्यकत्वात्, देवयानपितृयाणगमनस्य विद्याकर्मव्यापारत्वबोधनाय फलभोगार्थत्वरूपसम्बन्धस्यैव षष्ठ्यर्थत्वस्य युक्तत्वात्। एवं च—पितृयाणगमनं अनिष्टादिकार्यवृत्ति, कर्मजन्यत्वात्, यस्य यज्जन्यत्वं तस्य तच्छून्यावृत्तित्वमिति व्याप्तौ—विद्याशून्यावृत्तिविद्याजन्यदेवयानगमनस्य दृष्टान्तत्वमित्युक्तानुमानेनानिष्टादिकारिणां पितृयाणगमनाभावसिद्ध्या तद्घटकचन्द्रगमनाभावसिद्धिः ॥

ननु देवयानपितृयाणगमनयोः विद्याकर्मजन्यत्वासिद्ध्या साधनवैकल्यासिद्ध्योर्दुर्वारतेत्यत उक्तं प्रकृतत्वादिति; 'तद्य इत्थं विदुः ये

येमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसम्भवन्ति' इति देव-यानवाक्ये विद्याविशिष्टस्य, 'य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति' इति वाक्ये कर्मविशिष्टस्य च प्रकृतत्वादित्यर्थः; विशिष्टस्य प्रकृतत्वे च तस्यैव तच्छब्देन परामर्शात्, धनवान् सुखीत्यादाविव उद्देश्यतावच्छेदकीभूतविद्याकर्मणोर्मार्गप्राप्तौ जन्यता-सम्बन्धेन भानात् देवयानपितृयाणगमनयोर्विद्याकर्मजन्यत्वसिद्धिरिति भावः। 'प्रकृता हि देवयाने विद्या पितृयाणे च कर्म' इति भाष्यं च विशेषणतया प्रकृतत्वपरमिति न तद्विरोधः॥

ननु—उक्तरीत्या अनिष्टादिकारिणां पितृयाणगमनाभावसिद्धावपि न चन्द्रगमनाभावसिद्धिः, मार्गान्तरेण चन्द्रगमनसम्भवात्; अन्यथा तेषां देहारम्भस्य पञ्चमाहुतिसापेक्षस्यानुपपत्तेरित्यत आह—

॥ सू॥ न तृतीये तथोपलब्धेः॥ ३॥ १॥ १८॥

अत्र तथेत्यस्यावृत्तिः, तृतीये—अनिष्टादिकारिणि, तथा न—इष्टादि-कारिसादृश्यं न; तादृशसादृश्यं च देहारम्भाय पञ्चमाहुतिसापेक्षत्वं, कुतः—तथोपलब्धेः; अथैतयोः पथोरिति श्रुत्या तृतीयस्थानशब्दि-तस्यानिष्टादिकारिणः स्वर्गाप्राप्तिवचनेन पञ्चमाहुत्यभावप्रतीतेरित्यर्थः। न चैवं—देहत्वावस्थां प्रति पञ्चमाहुतेः कारणत्वस्य इति तु पञ्चम्या-माहुताविति श्रुतिसिद्धस्यानुपपत्तिः, व्यभिचारादिति—वाच्यम्; अव्यवहितोत्तरत्वस्य कार्यतावच्छेदकगर्भे निवेशात्॥

ननु—अव्यवहितोत्तरत्वनिवेशे गौरवं, पुरुषवचस इत्यत्र पुरुष-पदस्य पञ्चमाहुत्यव्यवहितोत्तरदेहपरत्वे लक्षणाप्रसङ्गश्च; अतः इति तु पञ्चम्यामित्यादिश्रुतेर्देहत्वावस्थात्वावच्छिन्नं प्रति पञ्चमाहुतेः कारणत्वपरत्वमेव युक्तं, अथैतयोरिति श्रुतौ च पापकर्मणां सुखानुभवा-र्थस्वर्गप्राप्त्यभाव एवोच्यतां—इत्याशङ्क्य; पुरुषपदलक्षणायाः अव्यव-हितोत्तरत्वनिवेशस्य चावश्यकतां सूचयितुमाह—

॥ सू ॥ स्मर्यतेऽपि च लोके ॥ ३ ॥ १ ॥ १९ ॥

अत्रापि तथेति वर्तते, संयमने त्वनुभूयेत्यतः इतरेषामिति च पुण्यकर्मणामित्यर्थकं; इतरेषां पुण्यकर्मणां द्रौपदीधृष्टद्युम्नप्रभृतीनां, लोके—पुण्यफलभूतदेहे, लोकशब्दस्य तद्यथेह कर्मचितो लोक इत्यादाविव फलपरत्वात्; तथा स्मर्यते—पञ्चमाहुत्यनपेक्षा स्मर्यत इत्यर्थः। अत्रापिशब्द इतरेषामित्यस्यानुषक्तस्य पुण्यकर्मार्थत्वतात्पर्यग्राहकः। देहस्य लोकशब्देनाभिधानं प्रसिद्ध्यतिशयद्योतनार्थम्; 'शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र यस्मै त्वम्' इत्यादावशनिपदस्य वज्रायुधपरस्यापि शनिविरुद्धार्थव्यञ्जकत्ववदत्रापि लोकशब्दस्य पुण्यफलार्थकस्यापि प्रसिद्ध्यतिशयव्यञ्जकत्वसम्भवात्। देहान्वितस्य प्रसिद्ध्यतिशयरूपव्यङ्ग्यार्थस्य धर्मिपारतन्त्र्येण तथाशब्दार्थे पञ्चमाहुत्यनपेक्षायां भानमभिहितम्। उक्तञ्च टीकायाम्—'लोकशब्दः प्रसिद्ध्यतिशयद्योतनार्थः'—इति। वस्तुतः—इतरेषां पञ्चमाहुत्यनपेक्षा लोके स्मर्यत इत्यन्वयात् प्रसिद्धत्वसम्बन्धेन लोकवृत्तित्वस्य सप्तम्यन्तार्थस्य स्मृतावन्वय इति बोध्यम्। तथा च—अव्यवहितोत्तरत्वनिवेशनं लक्षणाकल्पनं चावश्यकमिति भावः। एतेन—पञ्चाग्निविद्यायाः इष्टादिकारिविषयत्वस्य 'अश्रुतत्वादिति चेन्न' इति सूत्रसिद्धत्वात् पुण्यजन्यदेहत्वावस्थां प्रत्येव पञ्चमाहुतेः कारणत्वबोधनात् तत्र व्यभिचाराभावात् अव्यवहितोत्तरत्वनिवेशनं लक्षणाकल्पनं चानावश्यकमिति—निरस्तम् ॥

ननु श्रुतिसिद्धार्थस्यातिप्रसिद्ध्याऽपि स्मृत्या सङ्कोचो न युक्त इत्यत आह—

॥ सू ॥ दर्शनाच्च ॥ ३ ॥ १ ॥ २० ॥

अत्राप्यनिष्टादिकारिणामिति तथेति च वर्तते, 'तेषां खल्वेतेषां भूतानां त्रीण्येव बीजानि भवन्ति' इति श्रुत्या केषांचिदनिष्टादि-

कारिणां पञ्चमाहुत्यभावबोधनादित्यर्थः। यद्यपि तादृशश्रुतौ पञ्चमाहुत्यभावस्य न बोधः; तथाऽपि स्वेदजसङ्ग्रहायोद्भिज्जपदस्यायोनिजत्वावच्छिन्ने लक्षणाया आवश्यकत्वेन रेतोजन्यत्वाभावलाभात्पञ्चमाहुत्यभावस्य मानसो बोधो भवतीति भावः। तदेतदाह—

॥ सू ॥ तृतीयशब्दावरोधस्संशोकजस्य ॥ ३ ॥ १ ॥ २१ ॥

संशोकजस्य—स्वेदजस्य, तृतीयेनोद्भिज्जशब्देन अयोनिजत्वावच्छिन्ने अजहत्स्वार्थलक्षणया ग्रहणमित्यर्थः। तथा च केवलपापकर्मणां चन्द्रगमनं नेति सिद्धम् ॥

॥ सू ॥ तत्स्वाभाव्यापत्तिरुपपत्तेः ॥ ३ ॥ १ ॥ २२ ॥

पूर्वाधिकरणे देवयानपितृयाणयोर्विद्याकर्मफलार्थत्वादनिष्टादिकारिणां विद्याकर्मफलाभावात् देवयानाभाववत् पितृयाणमपि नास्तीत्युक्तं, अस्मिन्नधिकरणे शरीरस्य सुखदुःखभोगार्थत्वात् आकाशादिशरीरेणानुभोक्तव्यसुखाद्यभावात् आकाशादिशरीरकत्वं नास्तीति निरूप्यते। यद्वा—यथेतमनेवं चेति पितृयाणमार्गविषयविचारे प्रस्तुते प्रसङ्गात्तादृशमार्गस्यानिष्टादिकारिविषयत्वाभावं व्यवस्थाप्य पूर्वप्रस्तुतमार्गघटकाकाशादिभावो विचार्यत इति कृतात्यय इत्यधिकरणेन सङ्गतिः, पूर्वाधिकरणं तु प्रासङ्गिकमिति—बोध्यम्। अवरोहणप्रकारस्तावच्छ्रूयते—

"अथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशं, आकाशाद्वायुं, वायुर्भूत्वा धूमो भवति, धूमो भूत्वा अभ्रं भवति, अभ्रं भूत्वा मेघो भवति, मेघो भूत्वा प्रवर्षति, त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा जायन्ते" —इति ॥

अत्राकाशवायुपदयोस्तद्वृत्त्यसाधारणधर्मलाक्षणिकत्वमावश्यकं, वायुर्भूत्वा धूमो भवति धूमो भूत्वा अभ्रं भवतीत्याद्युपरितनस्फुटतरभूयोवाक्यानुसारात्, तत्र वायुर्भूत्वेत्यादौ वाय्वादिवृत्त्य-

साधारणधर्मवत्त्वरूपवाय्वाद्यभेदस्य जीवे असम्भवात्। वाय्वादिपदस्य तच्छरीरार्थकत्वं स्वीकृत्य तच्छरीरकाभेदपरत्वमुपगम्यते वा, उत तत्सदृशपरत्वं स्वीकृत्य तत्सदृशाभेदपरत्वमुपगम्यत इति सन्देहः ॥ तत्र पूर्वः पक्षः—वाय्वादिपदस्य तच्छरीरकार्थकत्वमेव युक्तं, तत्सदृशार्थकत्वे लक्षणाप्रसङ्गात्। एवं च–यथेतमाकाशमित्यत्राकाशपदमपि तच्छरीरकत्वे लाक्षणिकमित्यभ्युपगन्तव्यम्। न च–मेघो भूत्वा प्रवर्षतीति क्विबन्तने वर्षसादृश्यस्य बोधसम्भवेऽपि तच्छरीरकत्वस्याबोधात् तदनुरोधेन वाय्वादिपदस्यापि तत्सदृशार्थकत्वमेव युक्तमिति–वाच्यम्; जीवस्य वर्षशरीरकत्वेऽपि वर्षशरीरकजीवान्तरसादृश्यस्यैव प्रवर्षतीत्यनेन बोधनसम्भवात्। न च–जीवस्याकाशादिशरीरानुभाव्यसुखदुःखाद्यभावात् तद्वाक्यस्याकाशादिशरीरकत्वप्राप्तिपरत्वं न सम्भवतीति–वाच्यम्; श्रुतार्थोपपत्तये प्रयोजनस्यापि कल्पनीयत्वात्, अन्यथा भूतानां सर्वत्र सुलभत्वात्, प्रयोजनाभावात् भूतपरिष्वक्तगमनस्यापि अकल्पनप्रसङ्गात्; एवं 'तानि परे तथा ह्याह' इत्यत्र प्रयतां परमात्मसम्पत्तौ प्रयोजनाभावात् तेजः परस्यां देवतायामिति श्रुतौ परमात्मसम्पत्तिर्न सम्भवतीति पूर्वपक्षे प्रमाणानुरोधेन प्रयोजनस्य कल्पनीयत्वात् न प्रमाणप्रतिपन्नार्थत्याग इति सिद्धान्तस्याप्यसङ्गतिप्रसङ्गात्; तस्मात् श्रुत्यनुरोधादाकाशादिशरीरकत्वे सिद्धे तत्फलभूतसुखभोगादिकमपि कल्पनीयमिति ॥

राद्धान्तस्तु—

आकाशादिभावस्तत्सादृश्यापत्तिरेव, न तु तच्छरीरकत्वम्; प्रयोजनाभावात्, आकाशाद्यभिमानिदेवतानामेवाकाशादिशरीरजन्यसुखादिभोगवत्त्वेनावरोहतामनुशायिनां तज्जन्यभोगासम्भवेन प्रयोजनकल्पनाया असम्भवात्। न च--अवरोहतामेव तदभिमानिदेवतात्व-

मपि कल्पनीयमिति--वाच्यम्; सर्गाद्यकालमारभ्याप्रलयं अनुश-यिभ्योऽन्यासामाकाशाद्यभिमानिदेवतानां कृत्स्नत्वेन प्रतिक्षणमवरो-हतामनुशयिनां तथात्वकल्पनायोगात्, एकस्मिन् शरीरे युगपद्भो-क्तृद्वयसमावेशाङ्गीकारे यदैकस्य भोजनादाविच्छा तद्दशाया-मन्यस्य शयनादीच्छासम्भवेन परस्परविरोधेन भोगानुत्पादस्यैव प्रसङ्गात्; तस्मात्प्रयोजनकल्पनासम्भवान्न तच्छरीरकत्वसम्भवः। किञ्च--वर्षशरीरकस्यापि वर्षशरीरकजीवान्तरसादृश्यपरत्वं प्रवर्षतीत्यस्य न सम्भवति, हंसेऽपि हंसान्तरकर्तृकाचारसदृशाचारमादाय हंसो हंसतीत्यस्यापत्तेः। अतः आचारे भेदधर्मवत्त्वैतदुभयरूपसादृश्ये आचारे च खण्डशः क्विप्प्रत्ययस्य शक्तिः; तत्र प्रथमाचारे हंसस्य कर्तृतासम्बन्धेनान्वयः, हंसान्विताचारस्य भेदे हंसकर्तृकाचारत्वाव-च्छिन्नप्रतियोगितासम्बन्धेन आधेयतासम्बन्धेन च धर्मेऽन्वयात्तयोश्च द्वितीयाचारेऽन्वयाद्धंसकर्तृकाचारत्वावच्छिन्नभिन्नतद्वृत्तिधर्मवदाचारा-श्रयत्वस्य हंसे बाधात् हंसो हंसतीत्यादिप्रयोगाभाववत् वर्षशरीर-केऽपि वर्षशरीरककर्तृकाचारत्वावच्छिन्नभेदघटितस्य वर्षशरीरककर्तृ-काचारसदृशाचारस्य वर्षशरीरके बाधादवरोहतां वर्षशरीरकत्वे प्रवर्षतीत्यस्यानुपपत्तिः। अतोऽवरोहतामाकाशादिशरीरकत्वासम्भ-वादाकाशादिभावस्तत्सादृश्यापत्तिरेव॥ तथा च--अथैतमेवाध्वान-मित्यादेरयमर्थः। अथ--अनन्तरं, एतमेव--धूममार्गं, यथेतं--यथा-गतं, पुनर्निवर्तन्ते; धूमराज्यपरपक्षदक्षिणायनषण्मासपितृलोका-काशक्रमेण गमनात्तेनैव क्रमेणावरोहणे प्राप्ते तत्र विशेषमाह--आकाशं, आकाशाद्वायुम्; यथा आकाशाच्चन्द्रमसमभिसम्भवन्ति, एवं चन्द्रमस आकाशमभिसम्भवन्तीत्यारोहावरोहयोराकाशाभि-सम्भवोऽविशिष्ट इत्यर्थः। आकाशाभिसम्भवो हि आकाशसादृश्यं, या आपश्चन्द्रमण्डले शरीरमारब्धवत्यः तासां कर्मक्षये द्रवीभूताना-

मेकाशगतानां भेदकाकारप्रहाणेनाकाशसादृश्ये तच्छरीरकाणां जीवानामप्याकाशशरीरकसादृश्यसम्भवात्तासां चापरं इतश्चामुतश्च नीयमानानां वायुसादृश्ये तच्छरीरकजीवानामपि वायुशरीरकजीव-सादृश्यापत्तेः; इत्थं च—वायुर्भवतीत्यस्य तादृशसूक्ष्मशरीरको जीवो वायुशरीरकसदृशो भवतीत्यर्थः। अपो बिभर्तीत्यभ्रमिति व्युत्पत्त्या अभ्रशब्देन जलधारणावस्थस्य मिहसेचन इति धातुनिष्पन्नेन मेघशब्देन वर्षोन्मुखत्यावस्थापन्नस्य प्रतिपादनान्न पौनरुक्त्यं; पौन-रुक्त्यं हि न पूर्वप्रतिपन्नार्थप्रतिपादकत्वं, तथा सति 'इन्द्रो महेन्द्र-स्सुरनायको वा' इत्यादौ रूढ्यर्थमादाय तदापत्तेः; किन्तु पूर्वाप्रति-पन्नार्थाप्रतिपादकत्वं तद्वाच्यमिति पूर्वाप्रतिपन्नस्य योगार्थस्याधिकस्य बोधात्तदापत्त्यसम्भव इति॥

सूत्रार्थस्तु—अत्र कृतात्ययेऽनुशयवानित्यत अनुशयवत इति षष्ठ्यन्तं, संयमन इत्यतस्तद्गतिरिति प्रथमान्तमनुवर्तते; अनुशयवतः—जीवस्य, तद्गतिः—आकाशादिप्राप्तिः, तत्स्वाभाव्यापत्तिरूपैव आका-शादिसादृश्यापत्तिरूपैव, न तु तच्छरीरकत्वरूपेत्यर्थः; उपपत्तेः—आकाशादिजन्यसुखदुःखभोगाभावोपपत्तेः। तथा चावरोहन् जीवः आकाशादिशरीरकत्वाभाववान्, आकाशादिजन्यभोगाभाववत्त्वे सति कर्मवत्त्वात्, यत्र यज्जन्यभोगाभाववत्त्वे सति कर्मवत्त्वं तत्र तच्छरीर-कत्वाभाव इति व्याप्तेः। अत्र घटादिजन्यभोगाभाववति तच्छरीरके परमात्मनि व्यभिचारवारणाय कर्मवत्त्वनिवेशः॥

॥ **सू॥ नातिचिरेण विशेषात्** ॥ ३ ॥ १ ॥ २३ ॥

व्रीह्यादिप्राप्तिप्रागभावकालावच्छिन्ना आकाशादिसादृश्यापत्तिरूपा आकाशादिप्राप्तिः किमतिचिरकालावच्छिन्ना नेति संशयः। अत्र—विधिकोटिस्सामानाधिकरण्येन, निषेधकोटिरवच्छेदकावच्छेदेन॥ अत्र पूर्वपक्षः—आकाशादिप्राप्तिः अतिचिरकालावच्छिन्नापि सम्भवति,

नियमहेत्वभावात् । न च—अतो वै खलु दुर्निष्प्रपतरमिति व्रीह्यादि-भावविषयश्रुत्या व्रीह्यादिविभागजनकनिष्क्रमणे दुरित्यनेन चिरकाली-नत्वरूपकृच्छ्रत्वस्याभिधानात्, तत्पूर्वकालीनाकाशादिप्राप्तौ चिर-कालावच्छिन्नत्वाभावः प्रतीयते—इति वाच्यम्; अतो वै खल्वित्या-दिवाक्यं हि व्रीह्यादिषु न चिरावस्थानविधायकं, आकाशादि-प्राप्तावप्यनियमतश्चिरकालीनत्वस्य व्रीह्यादिप्राप्तावपि प्राप्तत्वात्; किन्तु व्रीह्यादिप्राप्तेः चिरकालावच्छिन्नत्वनियमविधायकं तद्वाक्यमभ्युप-गन्तव्यम् । तथा च व्रीह्यादिप्राप्तौ चिरावच्छिन्नत्वनियमबलात् आकाशादिप्राप्तौ तादृशनियमव्यावृत्तिप्रतीतावपि आकाशादिप्राप्तौ सामानाधिकरण्येनानियमतः प्राप्तस्य चिरकालावच्छिन्नत्वस्य न व्यावृत्तिसिद्धिः; किञ्च निर्प्रेत्युपसर्गद्वयपूर्वकपतृधातोः भावल्युड-न्तस्य सिद्धे दुर्निष्प्रपतनमिति रूपे तत्र च छान्दसे नकारस्य रेफादेशे दुर्निष्प्रपतरमिति सिध्यति; तदर्थे च उत्तरदेशसंयोगानु-कूलव्यापारे दुरित्यनेन दुःखजनकत्वरूपस्य चिरकालीनत्वरूपस्य वा कृच्छ्रत्वस्य बोधेऽपि व्रीह्यादिप्राप्तौ तदबोधात् तत्पूर्वाकाशादि-प्राप्तावचिरकालीनत्वस्य प्रतीतिस्सुतरां न सम्भवति; उत्तरदेशस्यापि धात्वर्थप्रविष्टत्वाच्च न गम्यादेरिव सकर्मकता ॥

एतेन—दुर्निष्प्रपतरमिति शब्दो न ल्युडन्तो वर्णविकारवान्, अपि तु खलन्ताद्दुर्निष्प्रपतशब्दादातिशायिनिके तरप्रत्यये छान्दसे तशब्दलोपे दुर्निष्प्रपतरमिति रूपं, ततश्चातिशयस्य प्रतियोग्याका-ङ्क्षायां प्रागनुक्रान्ताकाशादीनां बुद्धिसन्निधानात् प्रतियोगित्वेनान्वयः स्यात्; ततश्च व्रीह्यादिष्वाकाशाद्यपेक्षया चिरावस्थानोक्त्या आका-शादिष्ववस्थानस्य तदपेक्षया अल्पकालत्वपर्यवसानात् समीहित-सिद्धिरिति—**निरस्तम्** । व्रीह्यादिविभागजनकनिष्क्रमणे तरपा अति-शयस्य प्रतीतावपि व्रीह्याद्यवस्थाने तदप्रतीत्या अवस्थानस्य चिर-

कालीनत्वासिद्धेः; बलवत्तर इत्यादौ तरपा बले अतिशयप्रतीतावपि बलतरमित्यादौ तदप्रतीत्या तरपो विशेषणगतातिशयबोधकत्व-स्वाभाव्येन दुर्निष्प्रपतरमित्यादौ निष्क्रमणस्य विशेष्यत्वेन तत्रा-तिशयबोधानिर्वाहाच्च ॥

न च—दुरुपपदात् पतृधातोः कर्त्रर्थे डप्रत्यये सति दुर्निष्प्रपत-मिति रूपसिद्धौ ततस्तरप्प्रत्यये दुर्निष्प्रपततरमिति रूपसिद्धिः, तथा च विशेषणीभूतनिष्क्रमणे तरपा अतिशयबोधसम्भवः, भूमो भवतीत्या-द्युपक्रमानुरोधात्, पुंस्त्वस्यावश्यकत्वेऽपि तद्भूय एव भवतीत्युत्तर-वाक्ये स इत्यध्याहृततच्छब्दार्थे इष्टादिकारिणि नपुंसकतच्छब्देन रेत-स्सिग्योगी भवतीत्यर्थप्रतीतेः, तथाऽत्रापि नपुंसकलिङ्गोपपत्तिरिति—वाच्यम्; जनेरुपपदान्तरयोगे डप्रत्ययविधानसत्त्वेऽपि पतृधातोस्तद-नुशासनविरहात्। न च—डप्रत्ययविधायकसूत्रे अन्येभ्योऽपि दृश्यत इति वक्तव्यधात्वन्तरेभ्योऽपि डप्रत्ययस्यानुशिष्टत्वात् दृशिग्रहणं सर्वोपाधिव्यभिचारार्थमिति वृत्तावुक्तत्वात् पतृधातोरपि तत्सिद्धि-सम्भव इति--वाच्यम्; क्लिष्टकल्पनाप्रसङ्गात्। तस्मादाकाशादि-प्राप्तिरनियमेन चिरकालावच्छिन्नाऽपि सम्भवतीति ॥

राद्धान्तस्तु—आकाशादिप्राप्तिः नातिचिरकालावच्छिन्ना; 'अतो वै खलु दुर्निष्प्रपतरम्' इत्यनेन तथा बोधनात्, निष्प्रपतर-मित्यनेनातिकृच्छ्रनिष्क्रमणप्रतीतेः, खलन्ताद्दुर्निष्प्रपतशब्दात्तर-प्प्रत्यये तकारलोपेनोक्तरूपसिद्धेः, तरबर्थातिशयस्य विशेषणीभूत-कृच्छ्रत्वे बोधादतिकृच्छ्रत्वसिद्धेः। अत इति पञ्चम्यन्तार्थव्रीह्यादि-विभागजनकत्वान्विते उत्तरदेशसंयोगानुकूलव्यापाररूपनिष्क्रमणे अति-कृच्छ्रत्वं हि चिरावस्थानोत्तरकालीनत्वमेव, नरकान्निर्गमनमतिसङ्कट-मित्यादौ चिरावस्थानोत्तरकालीनत्वरूपसङ्कटत्वस्यैव बोधात्, वै-शब्दस्यैवकारसमानार्थकत्वेन चैत्रस्यैवेदं धनमित्यादौ धने चैत्रान्य-

निरूपितस्वत्वाभावचैत्रनिरूपितस्वत्वयोर्बोधवत् अतिकृच्छ्रनिष्क्रमणे व्रीह्यादिविभागजनकत्वतदन्यविभागजनकत्वाभावयोर्बोधात्, चिराबस्थानोत्तरकालीननिर्गमने आकाशादिविभागजनकत्वाभावसिद्ध्या आकाशादिप्राप्तौ चिरकालावच्छिन्नत्वाभावलाभात् ॥

सूत्रार्थस्तु—अत्रेष्टादिकारिणामिति तत्स्वाभाव्यापत्तिरिति च वर्तते, इष्टादिकारिणां आकाशादिसादृश्यापत्तिरूपतत्प्राप्तिश्चिरकालावच्छिन्नभिन्ना. अतो वै खल्वितिश्रुत्या व्रीह्यादिप्राप्तौ चिरकालावच्छिन्नत्वस्याकाशादिप्राप्तौ तदभावरूपविशेषस्य च सिद्धेरिति ।

॥ सू ॥ अन्याधिष्ठिते पूर्ववदभिलापात् ॥ ३ ॥ १ ॥ २४ ॥

अवरोहतां जीवानां व्रीह्यादिभावस्तावच्छ्रूयते---'मेघो भूत्वा प्रवर्षति, त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा जायन्ते'—इति ॥

अत्र संशयः---किं व्रीह्यादिभावो व्रीह्यादिशरीरकत्वं, उत जीवान्तराधिष्ठितेषु व्रीह्यादिषु संश्लेषमात्रमिति ॥ अत्र पूर्वपक्षः–व्रीह्यादिशरीरकत्वमेव व्रीह्यादिभावः, त इह व्रीहियवा जायन्त इति व्रीह्यादिशरीरकत्वविशिष्टनिष्ठोत्पत्तिमत्त्वश्रवणात्, विशिष्टनिष्ठोत्पत्तिश्च विशिष्टाधिकरणक्षणध्वंसानधिकरणक्षणसम्बन्ध एव । न च–इष्टादिकारिणां व्रीह्यादिशरीरप्राप्तिप्रयोजककर्माभावात् न तच्छरीरकत्वसम्भवः, त इत्यादिश्रुतौ च व्रीह्यादिपदं तत्संश्लिष्टपरमिति–वाच्यम्; तथा सति लक्षणाप्रसङ्गात्, देवतोद्देश्यकद्रव्यत्यागरूपयागस्य हिंसाङ्कत्वेन यागात्पुण्योत्पत्तिवद्धिंसया पापस्याप्यवर्जनीयतया तादृशपापस्यैव व्रीह्यादिभावहेतुत्वाच्च, 'शरीरजैः कर्मदोषैर्याति स्थावरतां नरः' इति स्मृत्या कायिकव्यापारजन्यपापस्य स्थावरभावहेतुतासिद्धेश्च । न च- मरणावच्छिन्नव्यापाररूपहिंसायाः स्वानुकूलकृतिमत्तासम्बन्धेन पापजनकतया तेन सम्बन्धेन हिंसायाश्शामितृ-

निष्ठत्वेऽपि यजमाननिष्ठत्वाभावादिष्टादिकारिणां न पापसम्भव इति–वाच्यम्; ऋत्विक्कर्तृकक्रियाणां यजमाने पुण्यजनकत्वोपपत्तये स्वानुकूलकृतिमत्त्वस्वानुकूलकृतिप्रयोजकार्त्विज्यवरणकर्तृत्वान्यतरसम्बन्धेन विहितनिषिद्धक्रिययोः पुण्यपापहेतुत्वस्यावश्यकतया शमितृकर्तृकहिंसायाः शमितरीव यजमानेऽपि पापजनकत्वस्य दुर्वारत्वात् ॥

न च–न हिंस्यात्सर्वा भूतानीति निषेधस्य हिंसात्वावच्छेदेन बलवदनिष्टाननुबन्धित्वाभावरूपबलवदनिष्टानुबन्धित्वबोधकत्वे 'अग्नीषोमीयं पशुमालभेत' इति श्रुतिबोधितस्याग्नीषोमीयहिंसायां बलवदनिष्टाननुबन्धित्वस्य बाधापत्तिः, अतो न हिंस्यादित्यादेर्विहितहिंसातिरिक्तहिंसात्वावच्छेदेनैव बलवदनिष्टानुबन्धित्वबोधकत्वं वाच्यम्, उत्सर्गापवादन्यायात्; तथा च यागीयहिंसातिरिक्तहिंसाया एव पापजनकतया नेष्टादिकारिषु पापसम्भव इति-वाच्यम्; अग्नीषोमीयं पशुमालभेतेत्यस्य यागविधायकत्वेन हिंसाविधायकत्वाभावात्, आङ्पूर्वकलभधातोर्यागे लाक्षणिकत्वात्, उत्सर्गापवादन्यायाप्रवृत्तेः, व्याप्यधर्मावच्छिन्नविधिव्यापकधर्मावच्छिन्ननिषेधसत्त्वस्थल एव तत्प्रवृत्तेः ॥

न च–आलभेतेत्यस्य हिंसापूर्वकत्वविशिष्टयागे लक्षणाङ्गीकारेण विशिष्टविधिस्वीकारात् हिंसाया अपि विधेयत्वमुपपद्यत इति-वाच्यम्; तथा सति अग्नीषोमीयपशुकर्मकत्वस्य धात्वर्थैकदेशहिंसायामन्वयासम्भवेन याग एवान्वयस्य वाच्यतया हिंसासामान्यस्यैव विधानापत्त्या विहितहिंसातिरिक्तहिंसाया एवाप्रसिद्ध्यापत्तेः, हिंसायामेव कथञ्चिदन्वयाभ्युपगमे चाग्नीषोमीयपशुकर्मकयागस्यालाभापत्तेः, विशिष्टे लक्षणाया असम्भवात्। अत एव मीमांसकैरालभेतेत्यस्य केवलयागे लक्षणा स्वीकृता ॥

उक्तञ्च भाट्टरहस्ये—

"धात्वर्थश्च क्वचिच्छक्यार्थ एव भावनायां प्रकारः, यथा यजेतेत्यादौ; क्वचित्तु लक्ष्यार्थः, यथा अग्नीषोमीयं पशुमालभेतेत्यादौ। यागो लक्ष्यार्थोऽपि क्वचिच्छक्यार्थयुक्तः, यथा प्रष्ठैरुपतिष्ठत इत्यादावात्मनेपदानुरोधेन समीपस्थितिरूपशक्यार्थविशिष्टमभिधानम् ॥" —इति ॥

न च-हिंसापूर्वकयाग एव लक्षणाऽस्तु। अग्नीषोमीयं पशुमित्यस्य चोभयत्रान्वयाच्चानुपपत्तिरिति- वाच्यम् । आलभेतेत्यस्य विशिष्टे लक्षणामुपगम्य विशिष्टस्य विधेयत्वाङ्गीकारे माहिंस्यादित्यत्र हिंसिधातोः विहितहिंसातिरिक्तहिंसायां लक्षणापत्त्या गौरवात्तदपेक्षया आलभेतेत्यस्य केवलयागे लक्षणाङ्गीकारस्यैव युक्तत्वात्, तत्कल्पे हिंसिधातोर्लक्षणाविरहात् । किं च--विशिष्टे विशेषणान्वयो हि विशेष्यविशेषणयोरन्वयाबाधस्थल एव, न तु विशेषणे तद्बाधे, अनित्यो घट इत्यादौ विशेषणे अनित्यत्वानन्वयात् । प्रकृते हिंसायां बलवदनिष्टाननुबन्धित्वरूपविध्यर्थस्य नान्वयसम्भवः, न हिंस्यादिति निषेधेनैतदभावबोधनेन बाधात् । न च--न हिंस्यादित्यस्य विहितहिंसातिरिक्तहिंसाया अनिष्टसाधनत्वबोधकत्वान्न दोष इति—वाच्यम्; तथा सत्यन्योन्याश्रयापत्तेः, अग्नीषोमीयं पशुमालभेतेत्यस्य विशिष्टविधित्वे न हिंस्यादित्यस्य विहितातिरिक्तविषयत्वसिद्धिः। तस्य विहितातिरिक्तविषयत्वसिद्धौ विशेषणान्वयाबाधेन विशिष्टविषयत्वसिद्धिरिति ॥

इति

श्रीशैलार्यवंशमुक्ताफलस्य श्रीयादवाद्रिनिवासरसिकस्य
श्रीमदनन्तार्यवर्यस्य कृतिषु

यावत्संपादितः

श्रीभाष्यभावाङ्कुरः ॥

॥ श्रीः ॥

॥ श्रीः ॥

लघुसामानाधिकरण्यवादः

श्रीमन्महीशूरमहाराजाधिराजमहास्थानसभाभूषणैः

शेषार्यवंशमुक्ताफलैः श्रीयादवाद्रिनिवासरसिकैः

पण्डितमण्डलीसार्वभौमैः

श्री ॥ उ ॥ म. अ. अनन्तार्यवर्यैः

विरचितः ।

श्रीकाञ्चीपुरनिवासिभिः

विद्वद्वरेण्यैः श्री ॥ उ ॥ ति. अ. कृ. श्रीनिवासार्यवर्यैः

सम्यक् परिशोध्य ।

म. अ. अनन्तार्येण

प्र. भ. तो. नरसिंहार्येण च

कल्याणपुर-विचारदर्पण-मुद्राक्षरशालायामङ्कयित्वा

प्राकाश्यं नीतः ॥

१८९८.

मूल्यं रू. ० — ४ — ६

॥ श्रीः ॥

लघुसामानाधिकरण्यवादः

श्रीरमणचरणयुगलं ध्यात्वा नत्वा च सम्यगाचार्यान् ।
सामानाधिकरण्ये वादं वितनोत्यनन्तार्यः ॥

इह खलु 'सर्वं खल्विदं ब्रह्म', 'तत्त्वमसि' 'अयमात्मा ब्रह्म'—इति समानाधिकरणवाक्यार्थो विचार्यते ॥

सामानाधिकरण्यं नाम—अभेदसम्बन्धावच्छिन्नप्रकारताकबोधजनक-वाक्यत्वम् । स्तोकं पचतीत्यादिक्रियाविशेषणस्थले सामानाधिकरण्य-मिष्टमेव । अत्र वाक्यत्वनिवेशात् न तादृशबोधजनकपदज्ञानादावति-व्याप्तिः ॥

यदि च—तादृशबोधजनकत्वं तद्बोधौपयिकाकाङ्क्षादिमत्त्वं, तेन न तद्बोधानुपधायकव्यक्तिविशेषेऽव्याप्तिः । अत एव—"भिन्नप्रवृत्ति-निमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिस्सामानाधिकरण्यम्"—इत्यस्य व्याख्यानावसरे श्रुतप्रकाशिकायामुक्तम्—

"समानविभक्त्या ऐक्यबोधनं वृत्तिशब्देन विवक्षितम् ॥"

—इति ॥

निरुक्तबोधौपयिकसमानविभक्तिमत्त्वादिरूपाकाङ्क्षाशालित्वं वृत्ति-शब्दार्थ इत्यर्थः—इत्युच्यते । तदा—वाक्यत्वं न देयं; 'प्रकृत्या चारुः', 'धान्येन धनवान्', 'दाने कर्णसमः'—इत्यादौ विभक्त्यर्थस्याभेदस्य प्रकारत्वान्नातिव्याप्तिः ॥

यद्वा—स्वप्रकृतिकविभक्तिसजातीयविभक्तिप्रयोज्याभेदनिष्ठप्रकारता-निरूपितविशेष्यताप्रयोजकविशेष्यवाचकपदघटितवाक्यत्वं तत्। स्वपदं विशेष्यवाचकपदपरं, साजात्यं च विभक्तिविभाजकप्रथमात्वादिना ; नीलो घट इत्यादावभेदस्य विभक्त्यर्थत्वोपगमात् लक्षणसङ्गतिः ॥ अत्र प्रकृत्या चारुरित्यादिवारणाय प्रयोज्यान्तम् ॥

ननु—एवं 'स्तोकं पचति', 'स्तोकं पाकः' इत्यादौ सामानाधिकरण्यव्यवहारानुपपत्तिः ; क्रियाविशेषणपदोत्तरद्वितीयायाः अभेदार्थकत्वेऽपि तस्या विशेष्यवाचकपदप्रकृतिकविभक्तिसजातीयत्वाभावात्। न चेष्टापत्तिः, धात्वर्थैकाधिकरण्ये तु 'स्तोकमोदनस्य पाकः' इति भवत्येवेति कातन्त्रपरिशिष्टरीत्या तत्र सामानाधिकरण्यव्यवहारस्य ग्रन्थकारसम्मतत्वात्—इति **चेन्न** ॥

स्वप्रकृतिकविभक्तिसजातीयत्वं हि—स्वाव्यवहितोत्तरविभक्तिवृत्ति-सुब्विभाजकधर्मासमानाधिकरणसुब्विभाजकधर्मवत्त्वसम्बन्धावच्छिन्न-विशेष्यवाचकपदाभाववत्त्वम्। 'प्रकृत्या चारुः' इत्यादौ चारुपदोत्तर-विभक्तिवृत्तिप्रथमात्वासमानाधिकरणतृतीयात्वरूपतादृशधर्मवत्त्वसम्बन्धेन विशेष्यवाचकचारुपदस्य प्रकृतिपदोत्तरतृतीयायां सत्त्वेन न तत्सम्बन्धावच्छिन्नतदभाववत्त्वरूपसाजात्यमिति न दोषः । 'स्तोकं पचति' इत्यादौ च पचिधातूत्तरविभक्तिवृत्तिसुब्विभाजकधर्माप्रसिद्ध्या तत्सम्बन्धावच्छिन्नतदभावस्य संयोगेन गुणाभावस्येव व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकस्य केवलान्वयितया स्तोकपदोत्तरद्वितीयायामपि सत्त्वान्नानुपपत्तिः। 'स्तोकं पाकः' इत्यत्र तु पचिधातूत्तरं घञ्प्रत्यय-सत्त्वेन तदुत्तरविभक्त्यप्रसिद्ध्या पूर्ववदुपपत्तिः ॥ 'धान्येन धनवान्' इत्यादिवारणाय च अभेदार्थकतृतीयान्तसमभिव्याहृततद्धितान्तभिन्नत्वमपि निवेश्यम् ॥

अत्र कल्पे—समानाधिकरणपदेषु प्रातिपदिकं विशेषणान्वय-परं, तथा समानविभक्तिः विशेष्यैक्यपरा, 'समानविभक्त्या ऐक्य-बोधनं वृत्तिशब्देन विवक्षितम्'—इति **श्रुतप्रकाशिकास्वारस्यम्** ॥

नीलोत्पलमित्यादौ समासस्थले 'इदं दधि' इत्यादाविव लुप्त-विभक्तिस्मरणस्य प्राचीनैरङ्गीकाराच्च नाव्याप्तिः । ब्रह्मणो जिज्ञासेति विग्रहार्थपरश्रुतप्रकाशिकायां लुप्तविभक्तिस्मरणानभ्युपगमस्तु नव्या-नुरोधेन । तदभिप्रायेणैव च पूर्वकल्प इति बोध्यम् ॥ "भिन्नप्रवृ-त्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः"—इति प्राचां लक्षणे 'भिन्नप्रवृत्तिनिमित्तानाम्' इति स्वरूपकीर्तनमात्रं, न तु लक्षणप्रविष्टम् । तेन भिन्नत्वमात्रस्याव्यावर्तकतया परस्परभिन्नत्वस्य च परस्परत्व-घटितत्वेन दुर्वचत्वेऽपि न क्षतिः । न वा—जातित्वादिविशिष्ट-घटत्वादिपरामर्शकतदादिपदघटिते 'घटस्सः' इत्यादिवाक्ये सूक्ष्मस्थूल-चिदचिद्विशिष्टब्रह्माभेदप्रतिपादके 'सदेव सोम्येदमग्र आसीत्', इति वाक्येऽप्यव्याप्तिः । तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेद-कत्वरूपस्य तदपर्याप्तविषयतापर्याप्त्यधिकरणत्वरूपस्य वा भेदस्य निवेशेनाव्याप्तिवारणेऽपि तत्पदस्य वैयर्थ्यं दुर्वारम् । घटः कुम्भ इत्यादौ घटविशेष्यकतत्प्रकारकाभेदान्वयबोधाप्रसिद्ध्यैव तद्बोधघटित-लक्षणातिव्याप्तिविरहात् ॥

यत्तु—जिज्ञासाधिकरणभाष्यम्—

> "सत्यत्वादीनां ब्रह्मस्वरूपत्वे सामानाधिकरण्यासिद्धिश्च एक-स्मिन् वस्तुनि वर्तमानानां पदानां निमित्तभेदानाश्रयणात्"—

इति ॥ **तच्च**—प्रवृत्तिनिमित्तभेदस्याभेदान्वयबोधनियामकतया तद-भावादभेदान्वयबोधघटितलक्षणाभावाभिप्रायमिति न कश्चिद्विरोधः— इति ध्येयम् ॥

अत्र भास्करानुयायिनः—

तादात्म्यसम्बन्धावच्छिन्नप्रकारताकबोधजनकवाक्यत्वं सामानाधिकरण्यम्। तादात्म्यं च भेदसमानाधिकरणाभेदः, न तु भेदाभेदोभयम्। नीलो घट इत्यादौ घटत्वादिरूपैकधर्मावच्छिन्ने नीलादिप्रतियोगिकभेदाभेदयोर्भानासम्भवात्, तयोरेकवत्ताज्ञानस्य अपरवत्ताधीविरोधित्वात् ॥

न च—तत्प्रकारकज्ञानस्यैव तदभावधीविरोधित्वं, न तु तत्संसर्गकज्ञानस्येति—वाच्यम्; तस्यापि अनुभवानुरोधेन प्रतिबन्धकत्वावश्यकत्वात्। न हि संयोगेन घटवत्ताज्ञानदशायां घटसंयोगाभावधीरुत्पद्यते। एवञ्च गुणगुणिनोरंशांशिनोः कार्यकारणयोश्च भेदाभेदाङ्गीकारात् 'सत्यं ज्ञानमनन्तं ब्रह्म', 'सर्वं खल्विदं ब्रह्म' इत्यादिसामानाधिकरण्योपपत्तिः ॥ एतन्मते हि—ब्रह्मणः पारमार्थिककल्याणगुणजातं जगतस्सत्यत्वं ब्रह्मोपादानकत्वं च—अभ्युपगम्यते। उपाधियुक्तब्रह्मांशो जीव उच्यते। उपाधिश्च—अन्तःकरणम्। अतोजीवब्रह्मणोरभेदः स्वाभाविकः, भेद औपाधिकः; अचिद्ब्रह्मणोस्तु उभयमपि स्वाभाविकम्—इति विवेकः ॥

ननु—नीलो घट इति ज्ञाने भेदसमानाधिकरणाभेदस्यापि विषयता न सम्भवति। घटत्वविशिष्टे हि तादृशाभेदस्य विषयत्वे भेदस्यापि घटत्वविशिष्टे विषयताया आवश्यकत्वेन पूर्वं घटत्वविशिष्टे भेदनिश्चयस्यावश्यं वाच्यत्वात् घटे नीलभेदस्य संशयोत्तरं घटे नीलस्य भेदसमानाधिकरणाभेदसंसर्गनिश्चयस्यानुपपत्तेः, तत्र नीलभेदनिश्चयस्य हेतुत्वात् ॥ **तदुक्तमनुमानदीधितौ**—

"साध्यसामानाधिकरण्यविशिष्टहेतोः पक्षे निश्चयस्तु पक्षे साध्यनिश्चयं विनाऽनुपपन्नः ॥" —**इति** ॥

एतावांस्तु भेदः—यत अग्निसामानाधिकरण्यविशिष्टधूमवान् पर्वत इति पर्वतांशे विशिष्टधूमस्य प्रकारत्वात् अग्निरपि तत्र प्रकारः, घटो नील इत्यादौ तु घटे विशिष्टाभेदस्य संसर्गत्वात् भेदस्यापि ससर्गता। अत एव घटे भेदसंसर्गकज्ञाने भेदसंसर्गेण नीलप्रकारकज्ञानमेव हेतुः, औचित्यात्; न तु भेदप्रकारकम्—इति चेन्न ॥ भेदसामानाधिकरण्योपलक्षिताभेदविषयतायामुक्तदोषाभावात् ॥

अथ—भेदस्य तथा भाने किं नियामकम्—इति चेत् ॥ **अत्रोच्यते**—तद्घटे तद्घटस्य संयोगादिसम्बन्धेन धीर्न प्रमा, किन्तु तद्घटभिन्ने—इतिव्यवस्थासिद्धये विशिष्टधीमात्रे विशेष्ये विशेषणस्य भेदसमानाधिकरणस्सम्बन्धो विषय इति कल्प्यते । तथा सति तद्घटे तद्घटस्य संयोगसत्त्वेऽपि तद्भेदोपलक्षिताधिकरणवृत्तित्वविशिष्टसंयोगादिसम्बन्धस्यासत्त्वान्नोक्तधीः प्रमा—इति ॥

नचैवं—नीलघटयोर्भेदाभेदाङ्गीकारे नीलेऽपि घटे न नीलो घट इति धीः प्रमा स्यात्—इति वाच्यम् । नञ्भेदादिपदाभिलप्यज्ञाने तादात्म्यविरोधित्वविशिष्टभेदस्य विषयत्वात् ॥ अत एव—वृक्षे कपिसंयोगो नेत्यादिज्ञानेऽपि कपिसंयोगविरोध्यभावस्यैव विषयत्वात् वृक्षे तादृशधीरप्रमा, गुणादौ तादृशधीः प्रमा ; विरोधस्य पदानुपस्थाप्यत्वेऽपि संसर्गतया भानसम्भवात् ॥

अथ—खण्डमुण्डयोर्व्यक्तिजात्यात्मना घटशरावयोः कार्यकारणरूपेण गोपुच्छयोरेकदेशैकदेशिभावेन च भेदाभेदसत्त्वात् खण्डो मुण्डः घटश्शरावो गौःपुच्छमिति सामानाधिकरण्यापत्तिः—**इति चेन्न**॥ स्ववृत्तितद्व्यक्तित्वरूपाभेदस्यैव समानाधिकरणप्रतीतिविषयत्वाभ्युपगमात्। खण्डवृत्तितद्व्यक्तित्वरूपाभेदस्य मुण्डादावसत्त्वात्, गोपदस्य तच्छरीरावच्छिन्नात्मपरतया च तद्वृत्तितद्व्यक्तित्वस्य पुच्छादावभावात्।गोपदस्य शरीरपरत्वे तादृशप्रयोग इष्यत एव; अवयवसमु-

दायातिरिक्तावयव्यनभ्युपगमात् ॥ अत एव–'शिरः पाणिरुदरं पादश्च शरीरम्'–इति दृश्यते प्रयोगः ॥

तथा च–चिदचितोः ब्रह्मैकदेशत्वात् 'शुक्लः कृष्णो रक्तश्चायं घटः' इतिवत्, 'व्यक्तं विष्णुस्तथाऽव्यक्तं पुरुषः काल एव च ।' इत्यादिसामानाधिकरण्योपपत्तिः ॥ —इति वदन्ति ॥

यादवप्रकाशीयास्तु—चिदचिदीश्वराणां त्रयाणामपि पारमार्थिकानां सन्मात्रब्रह्मपरिणामत्वाभ्युपगमात्, उपादानोपादेययोश्च स्वाभाविकभेदाभेदाङ्गीकारात् 'सर्वं खल्विदं ब्रह्म' इत्यादिसामानाधिकरण्योपपत्तिः । अन्यत्सर्वं पूर्ववत् ॥ —**इत्याहुः** ॥

तदुभयमपि—'नैकस्मिन्न सम्भवात्' इत्यार्हतमतं दूषयता सूत्रकृता–**निरस्तप्रायम्** ॥ एकस्मिन् भेदाभेदयोरसम्भवस्य उक्तत्वात् तयोश्च परस्पराभावरूपत्वेन विरुद्धत्वात् ॥

ननु—कार्यकारणादिरूपावच्छेदकभेदेन भेदाभेदयोरङ्गीकारः । तदुक्तं **वाचस्पत्ये**—

"कार्यात्मना तु नानात्वमभेदः कारणात्मना ।
हेमात्मना यथाऽभेदः कुण्डलाद्यात्मना भिदा ॥"—इति ॥

तथा च–संयोगतदभावयोरिव अवच्छेदकभेदान्न विरोधः–**इति चेत्** ॥

उच्यते । तन्मते हि–युगपत्क्रमेण वा यानि कार्याणि एकोपादानव्यक्त्या जनितानि तेषामुपादेयमात्रगतरूपैः कटकत्वकुण्डलत्वादिभिः परस्परं भेद एव । तद्रूपोपादानगतरूपाभ्यां कुण्डलत्वहेमत्वादिभ्यां च भेदाभेदौ । अत एव एकघटोपादानकानां रूपरसादीनामपि भेदव्यवस्था ॥

अत एवोक्तं **भामत्याम्**—

"हाटकत्वेन रूपेणैव कटकादेः कुण्डलत्वादिमत्यभेदः; न तु कटकत्वादिरूपेण । तेन रूपेण तत्र तस्य भेद एव । एवं

भेदोऽपि हाटकत्वादिना कटकादेः कुण्डलत्वादिमत्यस्ति। हाटकत्वादिरूपेण ज्ञानेऽपि कुण्डलत्वादिना जिज्ञासोदयात् ॥”

—इति ॥

एतदनुसारेणैव उक्तकारिका ब्रह्मानन्देन व्याख्याता । कार्यात्मना कार्यमात्रगतरूपैः कटकत्वकुण्डलत्वादिभिः कटककुण्डलादीनां मिथो भेदः। एवं कारणात्मनेत्यत्र कार्यात्मनेत्यनुपज्यते। तथा च—कारणगतेन कार्यगतेन च रूपेण हेमत्वकुण्डलत्वादिभ्यां अभेदः नानात्वमित्यनुपज्यते। अभेदः—अभेदोऽपि भिदाभिदैवेति। तथा च—भेदाभेदमतमवच्छेदकनिरपेक्षमिति विरोधो दुष्परिहरः॥ तदिदमभिप्रेत्योक्तं **न्यायसिद्धाञ्जने वेदान्ताचार्यैः**—

“भिन्नाभिन्नत्वं भवदभिमतं विरुद्धमिति वक्तुमपि लज्जामहे ॥”

—इति ॥

द्वितीयपक्षे च विष्णोः कार्यत्वेन कार्यमात्रगतैः विष्णुत्वव्यक्तत्वादिधर्मैः भेदस्यैवाङ्गीकारात्—‘व्यक्तं विष्णुस्तथाऽव्यक्तं पुरुषः काल एव च’, ‘ज्योतींषि विष्णुर्भुवनानि विष्णुः’—इत्यादिसामानाधिकरण्यानुपपत्तिः ॥

ननु—कटकत्वोपहिते कुण्डलभेदस्वीकारेऽपि तदुपलक्षिते तदभेदः स्वीक्रियत एव अत एव।‘इदं कुण्डलं कटकं’ इति प्रत्ययः । तथा च विष्णुत्वोपलक्षिते व्यक्ताद्यभेदसत्त्वान्नानुपपत्तिः—**इति चेन्न** ॥ क्लिष्टकल्पनापत्तेः। तस्मात्—भेदाभेदमतमसङ्गतं सूत्रविरुद्धं चेति ॥

न चैवं—विशिष्टधीमात्रे भेदस्य संसर्गतावच्छेदकत्वानभ्युपगमे तद्घटस्तद्घटवानिति प्रत्ययस्य प्रमात्वापत्तिरिति—वाच्यम् । तद्घटप्रतियोगिकत्वविशिष्टसंयोगानुयोगित्वस्य तद्घटेऽनङ्गीकारादेव उक्तापत्तिविरहात्। अन्यथा विशिष्टधीमात्रे भेदस्य विषयत्वे घटाभावो घटाभाववानित्यादिबुद्धेरप्रमात्वापत्तिः—**इति दिक्** ॥

शाङ्करास्तु—

मिथस्साकाङ्क्षसमानविभक्तिकपदत्वरूपं **सामानाधिकरण्यं चतुर्धा।** आद्यं–भिन्नसत्ताकयोस्तादात्म्यबोधकाकाङ्क्षाघटितं, यथा इदं रजतमित्यादौ व्यावहारिकप्रातिभासिकयोः। बाधायां बाध्यमानतादात्म्योपलक्षिताधिष्ठानस्य बोधकाकाङ्क्षाघटितं, यथा स्थाणुः पुमानित्यादौ; स्थाणुः पुरुषत्वेन ज्ञात इति स्थाणोः पुरुषतादात्म्यस्य बाधविषयत्वात्, बाध्यमानपुरुषतादात्म्योपलक्षितस्थाणुरूपाधिष्ठानस्य प्रतीतेः। स्थाणुव्यतिरेकेण पुमान्नास्तीति पुंसो मिथ्यात्वप्रत्ययात्। "इदं सर्वं यदयमात्मा पुरुष एव, इदं सर्वं जगच्च सः, ज्योतींषि विष्णुः"—इत्यादिष्वपि बाधार्थं विशेषणविशेष्यभावे समानसत्ताकयोस्तादात्म्यबोधकाकाङ्क्षाघटितं, यथा नीलमुत्पलमित्यादौ; अभेदेऽखण्डार्थबोधकं, यथा 'नित्यं विज्ञानमानन्दं ब्रह्म, सत्यं ज्ञानमनन्तं ब्रह्म', 'तत्त्वमसि', 'अयमात्मा ब्रह्म' इत्यादौ। अखण्डार्थत्वं च संसर्गाविषयकशाब्दज्ञानजनकत्वं; अभेदश्च न संसर्गः, तस्य भेदव्याप्यत्वात्। तत्र सत्यत्वाद्युपलक्षितशुद्धानामैक्यनिश्चयार्थं सत्यादिपदत्रयोपादानम्; अन्यथा सत्यत्वाद्युपलक्षितात् भेदो ज्ञानत्वानन्तत्वाद्युपलक्षितवृत्तिरिति भ्रमानिवृत्त्या ब्रह्मस्वरूपमोक्षस्य स्वप्रकाशचिदानन्दादिभिन्नानान्तवत् स्वरूपेणाभेदबुद्ध्या तत्प्राप्तेरपुरुषार्थत्वबुद्ध्या तत्साधनश्रवणादावप्रवृत्तिः तस्य मिथ्यात्वबुद्ध्या ब्रह्मज्ञाने मिथ्याविषयकत्वरूपभ्रमत्वज्ञानादविद्यानिवर्तकत्वानुपपत्तिश्च॥ तावत्पदसत्त्वे तु सत्यत्वाद्युपलक्षितानां परस्परावृत्तिपरस्परप्रतियोगिकभेदकत्वं विना समानविभक्तिकवैदिकसत्यादिपदजन्यशाब्दधीविषयत्वमनुपपन्नमिति धियानन्तरं परस्परावृत्तिभेदप्रतिगित्वनिश्चयान्नोक्तभेदभ्रमः॥

तदुक्तं कल्पकतरौ—

"इतरव्यावृत्तिश्चार्थान्न शब्दात्" —इति ॥

इतरव्यावृत्तिः—सत्यत्वाद्युपलक्षितान्यस्माद्व्यावृत्तिः, सत्यत्वाद्युपलक्षितानामैक्यमिति यावत् । तथा च—उक्तभ्रमनिवृत्तये सत्यादिपदत्रयं सार्थकमिति । अथवा—सत्यादिपदमसत्यादिव्यावृत्तिविशिष्टवस्तुपरम्, भावाद्वैताङ्गीकारात् पारमार्थिकाभावभूतधर्माणां मण्डनमिश्रादिसम्मतत्वात् । अत्र अनन्तपदं देशकालवस्तुपरिच्छेदत्रयरहितपरं ; अत्यन्ताभावप्रतियोगित्वं देशपरिच्छेदः, ध्वंसप्रागभावप्रतियोगित्वं कालपरिच्छेदः, भेदप्रतियोगित्वं वस्तुपरिच्छेदः । अत्र व्यावहारिकभेदप्रतियोगिनि ब्रह्मण्यसम्भववारणाय भेदे स्वसमानसत्ताकत्वं विशेषणं देयम् । 'अति अदि बन्धने'—इति धातुनिष्पन्नस्य अन्तपदस्य बन्धनार्थकतया बन्धनस्य च किञ्चिद्देशकालसंसर्गविरोधिस्वरूपतया संसर्गाभावप्रतियोगित्वरूपत्वमिव किञ्चिद्वस्त्वैक्यरूपमेलनाविरोधितया भेदप्रतियोगित्वरूपत्वमपि सम्भवतीतिन कश्चिद्दोषः ॥ —इत्याहुः ॥

अत्र त्रिविधसामानाधिकरण्यघटकीभूतं तादात्म्यं यदि भिन्नत्वे सति अभिन्नसत्ताकत्वं, अधिष्ठानसत्तया 'सद्रजतं' 'सन् घटः' इत्यादिप्रतीत्युपपत्तौ तदतिरिक्तसत्ताया अध्यस्तेरनभ्युपगमात् ; शुक्तिरजतयोः जगद्ब्रह्मणोर्निरुक्ततादात्म्यसत्त्वात् 'इदं रजतं', 'सर्वं खल्विदं ब्रह्म', इत्यादिसामानाधिकरण्योपपत्तिः—इत्युच्यते । तदा एकाश्रितरूपरसादीनां घटसत्ता एकैवेति रूपरसादेरन्योन्यं सामानाधिकरण्यव्यवहारापत्तिः । एवमन्तःकरणवृत्त्यवच्छिन्नचैतन्यविषयावच्छिन्नचैतन्ययोस्सत्ताभेदविरहात् एकदेशस्थोपाध्योस्सत्ताभेदकत्वाभावात् विषयतादात्म्यवच्चैतन्यं साक्षात्कार इति भवद्भिरभ्युपगमात् ज्ञानं घट इति व्यवहारापत्तिः ॥

यदि च भेदसमानाधिकरणाभेदस्तादात्म्यं तदा पूर्वोक्तदोषः, ज्ञानं घट इति व्यवहारापत्तिश्च, घटादिनिष्ठज्ञानविषयतायास्तादात्म्यरूपत्वात् । बाधार्थसामानाधिकरण्योपपादनं चासङ्गतं, लक्षणां विनैव निर्वाहे समानाधिकरणवाक्यघटकसकलपदलक्षणाया अयुक्तत्वात् ॥

इत्थं किल ते वदन्ति—

"य इह निर्विशेषचिन्मात्रब्रह्माज्ञानपरिणामस्वभावानां तत्तत्पदार्थानां तत्त्वोपदेशपरेषु वाक्येषु ब्रह्मणा सह सामानाधिकरण्यनिर्देशः स बाधार्थ एव ; अर्थान्तरासम्भवात्, तस्यैव तात्पर्यविषयत्वाच्च । तथा हि—अन्धकारादिषु स्थाणुं विशदमनवलोक्य यश्चोर इति मुह्यति, तं प्रति तत्त्वदर्शी वदति 'त्वद्दृष्टश्चोरः स्थाणुः' इति । तत्र चोरपदस्य चोरत्वारोपविषये लक्षणा, स्थाणुपदस्य च चोरत्वाभाववति लक्षणा । तथा च—चोरत्वप्रकारकारोपविषयश्चोरत्वाभाववानिति वाक्यार्थः ; चोरे स्थाणुत्वोपदेशस्यानपेक्षितत्वात् स्थाणुपदस्य चोरत्वाभावपरत्वात् । एवं 'इदं सर्वं', 'यदयमात्मा', 'पुरुष एवेदं सर्वं', इत्यादिषु सत्यासत्यसामानाधिकरण्येषु स्वरूपैक्यासम्भवात् सर्वत्वप्रकारकज्ञानविषयमिदं सर्वत्वाद्यभाववत्—इत्यर्थः । सर्वपदस्य सर्वत्वप्रकारकज्ञानविषये आत्मपदस्य च सर्वत्वाभाववति लक्षणाया आवश्यकत्वात् ॥

न च—स्थाण्वारोपितचोरबाधेऽपि चोरमात्रस्थितिवत् ब्रह्माध्यस्तप्रपञ्चबाधेऽपि प्रपञ्चस्वरूपस्थितिस्स्यात्—इति वाच्यम् ; इदं सर्वमिति सर्वस्यापि बाधप्रतीतौ बाधाविषयपदार्थस्यासम्भवात् । अतः चोरभयनिवृत्त्यर्थं स्थाणुत्वोपपादनेन चोरत्वबाधवत् 'द्वितीयाद्वै भयं भवति' इत्यादिप्रतिपन्नसमस्तसांसारिकभ्रमनिवृत्तये सर्वस्यात्मत्वोपदेशेन सर्वत्वाभाव एव विवक्षितः ॥" इति ॥

अत्राहुः—

"किमिह प्रपञ्चमिथ्यात्वं सिद्धं कृत्वा सामानाधिकरण्यस्य बाधपरता

स्वीक्रियते, उत सामानाधिकरण्यशक्त्यैव प्रपञ्चमिथ्यात्वपर्यवसितो बाधो बोध्यते ॥" —इति ॥

नाद्यः—मिथ्यात्वस्यान्यत्र निरासात् । अस्तु वा मिथ्यात्वं, तथाऽपि न बाधार्थतैवात्र निश्चेतुं शक्या । 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' इत्यत्र उपासने सर्वविशेष्यकत्वस्याभेदसम्बन्धावच्छिन्नब्रह्मनिष्ठप्रकारताकत्वस्य च बोधेन शान्त्यर्थब्रह्मात्मकसर्वानुसन्धानविधानस्य भवद्भिर्व्याख्यातत्वात् तद्रीत्यैव उपास्तिवाचकपदस्यानुषङ्गेणाध्याहारेण वा सर्वत्र निर्वाहे अनेकपदलक्षणाभ्युपगमस्यायुक्तत्वात् ॥

अत एवोक्तं **श्रीभाष्ये तत्त्वमस्यादिवाक्यप्रस्तावे**—

"बाधार्थत्वे च सामानाधिकरण्यस्य तत्त्वंपदयोः अधिष्ठानलक्षणा निवृत्तिलक्षणा चेति लक्षणादयस्त एव दोषाः ॥"

—इति ॥

नापि द्वितीयः—विशेषणविशेष्ययोरभेदस्य समानविभक्तिकत्वरूपसामानाधिकरण्यशक्त्या बोधे हि बाधस्स्यात्, तस्य तद्बोध्यत्वविरहात् । सत्यादिपदत्रयसार्थक्योपपादनं चायुक्तं, सत्यादिपदत्रयमध्ये अन्यतमपदमात्रसमभिव्याहृतब्रह्मशब्दस्य सामर्थ्यात्, पदद्वयवैयर्थ्ये आपादिते सत्यत्वोपलक्षितात् भेदो ज्ञानानन्दत्वाद्युपलक्षितवृत्तिरिति भ्रमनिवृत्तिर्न स्यादित्युक्तेरसङ्गतत्वात्, तदन्यद्वयोपलक्षितव्यक्तेस्तदानीमनभ्युपगमात् । न च—यत्र शाखायां प्रत्येकं पदत्रयमुक्तं तत्रोक्तत्रयोपलक्षितव्यक्तयः प्रसिद्धा इति—वाच्यम्; अन्यतमपदमात्रसमभिव्याहृतब्रह्मशब्दस्थले अन्यथाऽनुपपत्तिप्रतियोगिनो वैदिकसमानविभक्तिकतत्पदजन्यशाब्दधीविषयत्वस्यैवाभावात् तन्मूलकस्य परस्परावृत्तिभेदप्रतियोगित्वनिश्चयस्य भवदुक्तस्यानुदयेन भ्रमानिवृत्तितादवस्थ्यात् । एवमुक्तभ्रमनिवर्तकतया पदानां सार्थक्ये उक्त-

ब्रह्मस्वरूपानन्दे दुःखमिश्रत्वभ्रमे तत्साधनश्रवणादावप्रवृत्तेः तद्वारणाय पदान्तरोपादानमपि स्यात्। 'अति अदि बन्धने' इत्याद्यप्यसङ्गतं, बन्धनस्य किञ्चिद्देशसंसर्गविरोधित्वेऽपि किञ्चित्कालसंसर्गविरोधित्वे मानाभावेन बन्धनाभावे यस्य यत्कालसम्बन्धत्वं प्रसक्तं तत्कालसंसर्गस्य बन्धनसत्त्वेऽप्यनपायात्। अत एव किञ्चिद्वस्त्वैक्यरूपमेलनेत्याद्यप्यसङ्गतम्। यद्वस्त्वैक्यं बन्धने नास्ति तदैक्यस्य बन्धनाभावदशायामप्यभावेन तस्य बन्धनाबन्धनसाधारण्यादिति दिक्॥

माध्वास्तु—

सर्वेषां घटादिपदानां घटत्वाद्यवच्छिन्ने तदवच्छिन्ननियामकत्वावच्छिन्ने च शक्तिद्वयम्। तत्र ब्रह्मणि मुख्यशक्तिरितरत्रामुख्यशक्तिरिति भेदः। तथा च—'सर्वं खल्विदं ब्रह्म'—इत्यत्र सर्वपदस्य सर्वनियामकत्वावच्छिन्नपरतया तदभेदस्य ब्रह्मण्यबाधात् सामानाधिकरण्योपपत्तिः। एवमेव 'व्यक्तं विष्णुस्तथाऽव्यक्तम्' 'ज्योतींषि विष्णुः' इत्यादावप्यूह्यम्; नियामकत्वं च तदीयचेष्टासामान्यप्रयोजकेच्छावत्त्वं; अतो न राजा भृत्य इति व्यवहारापत्तिः, भृत्यचेष्टासामान्यस्य राजेच्छाप्रयुक्तत्वविरहात् ईश्वरातिरिक्तस्थले गुणगुणिनोर्भेदाभेदाङ्गीकारात् नीलमुत्पलमुत्पलस्य रूपमित्यादिव्यवहारोपपत्तिः, ब्रह्मतद्गुणयोरत्यन्ताभेदाच्च सत्यं ज्ञानमित्याद्युपपत्तिः। अभेदे भेदकार्यकरणसमर्थस्य विशेषस्याभ्युपगमात् आनन्दं ब्रह्मणो विद्वान् इत्यादिभेदव्यवहारोपपत्तिः— **इत्याहुः**॥

अत्र घटादिपदानां घटत्वावच्छिन्ने तदवच्छिन्ननियामकत्वावच्छिन्ने च शक्तिरित्यत्र नास्माकं विरोधः; शरीरवाचिशब्दानां शरीरपर्यन्तत्वमिति वदतामस्माकमपि शक्तिद्वयस्येष्टत्वात्. 'यस्य चेतनस्य यद्द्रव्यं सर्वात्मना स्वार्थे नियाम्यं तत्तस्य शरीरम्' इतिश्रीभाष्योक्तशरीरत्वप्रतिसम्बन्धिशरीरित्वस्य उक्तनियामकतायामेव पर्य-

वसानात्। भेदाभेदाभ्युपगमस्तु पूर्वमेव निरस्तः, विशेषबलात्। आनन्दं ब्रह्मण इति भेदव्यवहारसमर्थनं तु हेयं; विशेषस्य षष्ठ्यर्थत्वाभावेन आधाराधेयभावस्य च तदर्थस्य भेदव्याप्यत्वेन प्रकृते च आनन्दे ब्रह्मभेदाभावेन तद्व्याप्यस्य ब्रह्माधेयत्वस्यापि बाधेन आनन्दं ब्रह्मण इति वाक्यस्य बाधितार्थकत्वप्रसङ्गात्॥

न च—अभेदेऽप्याधाराधेयभावो विशेषबलादभ्युपगम्यत इति नोक्तवाक्याप्रामाण्यापत्तिः—इति वाच्यम्। अभेदे आधाराधेयभावाङ्गीकारादेव वाक्यप्रामाण्योपपत्तौ विशेषाङ्गीकारस्य वैयर्थ्यात्। अभेदेऽप्याधाराधेयभावनियामकतया विशेषाङ्गीकारे तन्नियामकतया विशेषान्तरप्रसङ्गेन अनवस्थाया दुर्वारत्वात्। एवं विशेषस्य भेदव्यवहारोपपादकत्वे जीवब्रह्मणोरपि विशेषबलादेव भेदव्यवहारसम्भवादत्यन्ताभेद एव स्यादिति न किञ्चिदेतत्॥

सिद्धान्तविदस्तु—

घटादिपदानां घटादिशरीरकपरब्रह्मण्येव शक्तिः, घटादौ निरूढलक्षणा, कोशादिश्च निरूढलक्षणाग्राहकः, न शक्तिग्राहकः; तद्ग्राहकश्च 'सर्वे वेदा यत्पदमामनन्ति', 'वेदैश्च सर्वैरहमेव वेद्यः', 'वचसां वाच्यमुत्तमम्'—इत्यादिश्रुतिस्मृतिपुराणादिराकरे व्यक्तः। शरीरपदप्रवृत्तिनिमित्तभूतं तल्लक्षणं च ज्ञानावच्छिन्नानुयोगिताकापृथक्सिद्धिसम्बन्धनिरूपितद्रव्यत्वसमानाधिकरणप्रतियोगित्वम्। एतज्जीवस्येदं शरीरमित्यादौ ज्ञानावच्छिन्नानुयोगिताकापृथक्सिद्धिसम्बन्धनिरूपितद्रव्यत्वसमानाधिकणप्रतियोगित्वावच्छिन्नं शरीरपदार्थः, तदेकदेशज्ञानावच्छिन्नानुयोगितायां षष्ठ्यन्तार्थस्य एतज्जीववृत्तित्वस्यान्वयात् ज्ञानावच्छिन्नैतज्जीवनिष्ठानुयोगिताकापृथक्सिद्धिनिरूपितनिरुक्तप्रतियोगित्वावच्छिन्नाभिन्नमिदमिति बोधः। यस्य पृथिवी शरीरमित्यादावपि यन्निष्ठज्ञानावच्छिन्नानुयोगिताकापृथक्सिद्धिनिरू-

पितनिरुक्तप्रतियोगित्वावच्छिन्नाभिन्ना पृथिवीत्यादिको बोधः ॥

अत्र ज्ञानमेतस्य शरीरमिति व्यवहारापत्तिः, अस्मन्मते धर्मभूतज्ञानस्य द्रव्यत्वेन शरीरात्मनोरिव ज्ञानात्मनोरपि अपृथक्सिद्धिसम्बन्धसत्त्वेन द्रव्यत्वसमानाधिकरणतादृशप्रतियोगितावत्त्वात्; तद्वारणाय ज्ञानावच्छिन्नत्वनिवेशः, ज्ञानावच्छिन्नानुयोगिताकसम्बन्धप्रतियोगित्वस्यात्मगतपरिमाणादौ सत्त्वात् । परिमाणादिकं तस्य शरीरमित्यादिव्यवहारवारणाय प्रतियोगित्वे द्रव्यत्वसामानाधिकरण्यप्रवेशः श्रीभाष्योक्तलक्षणत्रयफलितमिदमेव शरीरशब्दप्रवृत्तिनिमित्तम् । अन्यथा यथाश्रुतलक्षणत्रयस्य प्रवृत्तिनिमित्तत्वे शरीरशब्दस्य शक्तित्रयापत्तेः, अन्यतमस्य प्रवृत्तिनिमित्तत्वे आधेयत्वविधेयत्वशेषत्वानि शरीरशब्दप्रवृत्तिनिमित्तानीति भाष्यविरोधात् ॥

तदिदमुक्तं **न्यायसिद्धाञ्जने**---

"अत्रेदं चतुर्थमपि लक्षणत्रयफलितं श्रीभाष्यकाराभिप्रेतं लक्षणमुच्यते--'यस्य चेतनस्य यदपृथक्सिद्धिविशेषणं द्रव्यं तत्तस्य शरीरम्'--इति । यावत्सत्तमसम्बन्धानर्हत्वमपृथक्सिद्धत्वं, आधेयत्वविधेयत्वशेषत्वान्यपृथक्सिद्धेरेव अवान्तरभेदा इह विवक्षिताः ॥" ---इति ॥

तथा च--ब्रह्मणि घटादिशरीरकत्वं घटादिनिष्ठद्रव्यत्वसमानाधिकरणप्रतियोगिताकतत्सम्बन्धनिरूपितज्ञानावच्छिन्नानुयोगिताश्रयत्वं, तदेव घटादिपदप्रवृत्तिनिमित्तमिति सर्वं खल्विदं ब्रह्मेत्यादौ सर्वनिष्ठद्रव्यत्वसमानाधिकरणप्रतियोगिताकापृथक्सिद्धिनिरूपितज्ञानावच्छिन्नानुयोगिताश्रयीभूतं ब्रह्मेत्यादिरीत्या बोधः । अत्र यद्यपि 'तत्त्वमसि', 'अहं ब्रह्मास्मि', 'सदेव सोम्येदमग्र आसीत्' इत्यादिकं वस्तुतो न समानाधिकरणवाक्यं; तत्त्वंपदार्थयोरभेदबोधविरहात् । यतः तत्र अबाधितार्थः सत्त्वं, नचास्मन्मते प्रमाविषयत्वरूपम् ॥

तदुक्तं **सर्वार्थसिद्धौ**—

"तत्त्वतो निरूपणे प्रामाणिकत्वातिरेकेण सत्त्वमन्यन्नास्तीति तच्च प्रामाणिकत्वमेव ॥" —इति ॥

तादृशसत्त्वघटकीभूतप्रमायां अभेदसम्बन्धावच्छिन्नप्रकारतासम्बन्धेन तत्पदार्थस्य सर्वज्ञत्वादिविशिष्टस्य ब्रह्मणोऽन्वयः । तादृशप्रमाविषयत्वरूपधात्वर्थान्विताख्यातार्थाश्रयत्वस्य त्वंपदार्थे श्वेतकेतुशरीरकपरमात्मन्यन्वय इति ब्रह्मनिष्ठाभेदसम्बन्धावच्छिन्नप्रकारताशालिप्रमाविषयत्वाश्रयः श्वेतकेतुशरीरकः परमात्मेतिबोधः । एवमेव अहं ब्रह्मास्मीत्यादावप्यूह्यम् ॥

तथाऽपि अभेदेन तत्प्रकारकप्रमाविषयत्वस्य तदभेदव्याप्यतया धूमोऽस्तीत्यादिवाक्यस्य वह्नितात्पर्यकत्ववत् अभेदतात्पर्यकत्वात् तेषामपि वाक्यानां भाष्यादौ समानाधिकरणवाक्यत्वेन व्यवहारः कृत इति ध्येयम् ॥

उक्तं च **सद्विद्याविजये महाचार्यैः**—

"तत्त्वमिति पदद्वयमपि परमात्मपर्यन्तं; श्वेतकेतुपदन्तु न तथा, सम्बोधनत्वात् । युष्मदुपपदत्वान्मध्यमपुरुषः ॥" —इति ॥

—**इति प्राहुः ॥**

इदन्तु तत्त्वं—अभेदापृथक्सिद्ध्येतदन्यतरसम्बन्धावच्छिन्नप्रकारताशालिबोधजनकवाक्यत्वं सामानाधिकरण्यम् । 'नलिमुत्पलं', 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादौ अभेदसम्बन्धावच्छिन्नप्रकारताकबोधमादाय सर्वं खल्विदं ब्रह्मेत्यादौ जगद्ब्रह्मणोरपृथक्सिद्धिसम्बन्धस्य—

'न तदस्ति विना यत्स्यान्मया भूतं चराचरम्'—

इत्यादिप्रमाणप्रतिपन्नत्वेन तदवच्छिन्नप्रकारताकबोधजनकत्वमादाय लक्षणसमन्वयः । नीलादिपदानां गुणमात्रपरत्वेऽपि च न क्षतिः, अपृथक्सिद्धिमादायैवसामानाधिकरण्योपपत्तेः । तत्त्वमसीत्यत्रापि त्वं-

पदस्य श्वेतकेतुमात्रपरतया तत्पदार्थस्य ब्रह्मणः अपृथक्सिद्धि-सम्बन्धावच्छिन्नप्रकारतासम्बन्धेन असधात्वर्थैकदेशप्रमायामन्वयात् ब्रह्मनिष्ठापृथक्सिद्धिसम्बन्धावच्छिन्नप्रकारताकप्रमाविषयस्त्वमिति — बोधः । शरीरवाचिशब्दानां शरीरिपर्यन्तत्वमित्यादिश्रीभाष्यवचसा-मपि शरीरितात्पर्यकत्वपरतया विरोधाभावात् । अन्यथा यथाश्रुतार्थ-पर्यालोचनया घटादिपदानां घटादिशरीरकत्वावच्छिन्ने शक्तिरिति स्वीकारे स्वरसगत्या कुत्रापि सामानाधिकरण्यं नोपपद्यते ॥

तथा हि—'सर्वं खल्विदं ब्रह्म' इत्यादौ सर्वपदस्य सर्वशरीरकपर-मात्मपरत्वे इदंपदार्थस्य प्रत्यक्षविषयस्य तदेकदेशे सर्वस्मिन्नभेद-नान्वयो वाच्यः, स च व्युत्पत्तिविरुद्धः । संयोगावच्छिन्नक्रियारूप-गमनपदार्थैकदेशसंयोगे गुणाभेदान्वयतात्पर्येण गमनं गुण इत्यादि-व्यवहारवारणाय अभेदसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यता-सम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति मुख्यविशेष्यतासम्बन्धेन पद-जन्योपस्थितेर्हेतुत्वस्य वाच्यत्वात् । परमसुन्दर इत्यादौ तु सुन्दर-पदार्थैकदेशसौन्दर्ये परमपदार्थाभेदान्वयोऽगतिककल्पन एव, अन्यथा तत्र तादृशतात्पर्यानिर्वाहात् ॥

एवं—तत्त्वमसीत्यादौ त्वंपदस्य श्वेतकेतुशरीरकपरमात्मपरत्वे श्वेतकेतुपदस्य श्वेतकेतुमात्रपरत्वे सम्बोधनस्थलसिद्धस्य युष्मच्छब्द-सम्बोध्यवाचकपदयोस्समानार्थकत्वनियमस्य व्याघातः ॥

न च—चैत्र त्वत्पितेत्यादौ युष्मच्छब्दस्य सम्बन्धिलक्षकत्वात् तत्र व्यभिचारात्तादृशनियम एवासिद्ध इति—वाच्यम् । समासस्थले तादृशनियमाभावेऽपि व्यासस्थले तादृशनियमे बाधकाभावात् । तत्र सम्बोध्यवाचकश्वेतकेतुपदस्यापि तच्छरीरकपरमात्मपरत्वे प्रकृत-वाक्यजन्यशाब्दबोधाश्रयत्वेन इच्छाविषयत्वरूपविभक्त्यर्थस्य प्रकृ-त्यर्थतादृशपरमात्मनि अन्वयो न सम्भवति । वक्तुरुद्दालकस्य सर्वज्ञं

परमात्मानं प्रति बुबोधयिषाविरहात् भगवान् स्वयमेव ब्रवीत्विति प्रष्टारं श्वेतकेतुं प्रत्येव बुबोधयिषोत्पत्तेः। परमात्मन एव प्रष्टृत्वे–प्रश्नं प्रति जिज्ञासायाः, तां प्रति चाज्ञानस्य, कारणतया परमात्मनोऽज्ञत्वमवर्जनीयं स्यात्। अतः पुत्रस्यैव प्रष्टृत्वात् तं प्रति प्रवृत्ते उपदेशे श्वेतकेतुभिन्नस्य परमात्मनः सम्बोध्यत्वं त्वंपदार्थत्वं चेत्युपहास्यम्। न च–श्वेतकेतुपदस्य श्वेतकेतुशरीरकपरमात्मपरत्वेऽपि तदेकदेश-श्वेतकेतौ प्रकृतवाक्यजन्यशाब्दबोधाश्रयत्वेन इच्छाविषयत्वरूपविभ-क्त्यर्थान्वयोपगमान्नानुपपत्तिः–इति वाच्यम्; तथा लोके क्वाप्यदर्श-नात्। अन्यथा पुत्रीं प्रति 'त्वत्पतिस्सुन्दरः' इति वक्तव्ये 'जामातस्त्वं सुन्दरोऽसि'–इति वाक्यस्य प्रयोगापत्तेः, पुत्रीपतिरूपजामातृपदार्थैक-देशपुत्र्यां सम्बोध्यत्वान्वयसम्भवात्॥

एवं–'द्यावापृथिव्यौ च नारायणः' इत्यादौ द्यावापृथिवीपदयो-स्तच्छरीरकपरमात्मपरत्वे द्विवचनार्थद्वित्वस्यैकदेशान्वयोऽयुक्तः। पाकानां बहुत्वे पक्तुरेकत्वेऽपि पाके बहुत्वान्वयतात्पर्येण पाचकान् पश्येत्यादिप्रयोगवारणाय विभक्त्यर्थसङ्ख्याप्रकारकबोधे पदजन्योप-स्थितेर्मुख्यविशेष्यतासम्बन्धेन हेतुत्वावश्यकत्वात्॥

एवं 'ज्योतींषि विष्णुः' इत्यादौ बहुवचनार्थबहुत्वान्वयानुपपत्ति-र्बोध्या॥

एवं घटादिपदानां घटादिशरीरकत्वावच्छिन्ने शक्तिस्वीकारे शक्य-तावच्छेदकगौरवं च। 'वचसां वाच्यमुत्तमम्' इत्यादिप्रमाणानि वेद-जन्यबोधविषयतापराणि, न तु घटादिपदानां तच्छरीरकत्वावच्छिन्ने शक्तिग्राहकाणीति न कश्चिद्विरोधः॥

वस्तुतस्तु–सिद्धान्ते शरीरवाचिशब्दानां तच्छरीरकपरमात्मन्यपि शक्तिरस्त्येव, तत्साधकबहुतरप्रमाणस्य भाष्यादौ प्रपञ्चितत्वात्।

परन्तु अपृथक्सिद्धिसम्बन्धावच्छिन्नप्रकारताकबोधजनकत्वरूपसामानाधिकरण्यमपि श्रीभाष्यकाराभिप्रेतमेव ॥

तथा च **जिज्ञासाधिकरणभाष्यम्**—

"जातिगुणयोरिव द्रव्याणामपि शरीरभावेन विशेषणत्वे गौरश्वो देवो मनुष्यो जातः पुरुषः कर्मभिरिति सामानाधिकरण्यं लोकवेदयोर्मुख्यमेव दृष्टचरम् ॥" —इति ॥

द्रव्याणामपृथक्सिद्धिसम्बन्धेन विशेषणतास्थलेऽपि सामानाधिकरण्यं मुख्यमेवेत्यर्थः ॥

पूर्वोक्तरीत्या चेतनापृथक्सिद्धत्वमेव हि शरीरभावः । प्रकृते तु केवलापृथक्सिद्धिसम्बन्ध एव शरीरभावपदार्थः । इदमेव सामानाधिकरण्यं शरीरशरीरिभावनिबन्धनमिति बहुस्थलेष्वाकरादौ व्याहृतम् । तथा च—'तत्त्वमसि श्वेतकेतो' इत्यादियादृशवाक्येषु उक्तरीत्या त्वमादिशब्दानां तच्छरीरकपरमात्मपरत्वे बाधकमुपलभ्यते ; तत्र अपृथक्सिद्धिसम्बन्धावच्छिन्नप्रकारतामादाय सामानाधिकरण्योपपत्तिः । यत्र च—तच्छरीरकपरमात्मपरत्वे न किञ्चिद्बाधकम् ; यथा 'व्यक्तं विष्णुस्तथाऽव्यक्तम्', 'ब्रह्मा नारायणः, शिवश्च नारायणः' इत्यादौ ; तत्र—ब्रह्मादिशरीरकस्याभेदेन नारायणेऽन्वयात् सामानाधिकरण्योपपत्तिरिति निगूढाभिप्रायः ॥

ननु—एवं घटादिपदानां तच्छरीरकत्वावच्छिन्ने शक्तिस्वीकारे शक्यतावच्छेदकगौरवम्—इति चेन्न । तादृशगौरवेऽप्यन्यथा लाघवसम्भवात् ॥

तथा हि—'ब्रह्मा नारायणः' इति शाब्दसामग्रीकाले अभेदेन तच्छरीरकप्रकारकज्ञानाभावप्रत्यक्षवारणाय तादृशप्रत्यक्षे शाब्दसामग्र्याः प्रतिबन्धकत्वं कल्पनीयम् ॥

सिद्धान्ते तु—तत्प्रकारकयोग्यताज्ञानसत्त्वेन तदभावरूपविषयासत्त्यैव तादृशप्रत्यक्षवारणात् तद्वारणाय न तत् कल्पनीयम् ॥ न च—अपृथक्सिद्धेस्संसर्गतामतेऽपि तत्संसर्गेण ब्रह्मप्रकारकज्ञानाभावप्रत्यक्षे तत्कल्पनीयमिति—वाच्यम् । ब्रह्मशरीरकप्रकारकज्ञानकाले ब्रह्मप्रकारकज्ञानस्यावश्यकतया सिद्धान्ते विषयासत्त्यैव तद्वारणात्, ब्रह्मप्रकारकज्ञानकाले च तच्छरीरकप्रकारकज्ञानस्याभावेन साम्याभावात् ॥ न च—सिद्धान्तेऽपि ब्रह्मशरीरकप्रकारकयोग्यताज्ञानत्वादिना गुरुभूतरूपेण योग्यताज्ञानादेः गुरुशरीरतादृशपदजन्यपदार्थोपस्थितेरपि हेतुत्वात् गौरवमिति—वाच्यम् । अपृथक्सिद्धिसंसर्गतामतेऽपि ब्रह्मादिपदस्य ब्रह्मादिशरीरकत्वावच्छिन्ने लक्षणाग्रहदशायां तादृशयोग्यताज्ञानादीनां हेतुत्वस्य कॢप्तत्वेन गौरव भावात् ॥ अधिकमन्यत्रानुसन्धेयम् ॥

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

इति

श्रीशेषार्यवंशमुक्ताफलस्य श्रीयादवाद्रिनिवासरसिकस्य

श्रीमदनन्तार्यवर्यस्य कृतिषु

लघुसामानाधिकरण्यवादः

समाप्तः ।

॥ श्रीः ॥

॥ श्रीः ॥

गुरुसामानाधिकरण्यवादः

श्रीमन्महीशूरमहाराजाधिराजमहास्थानसभाभूषणैः
शेषार्यवंशमुक्ताफलैः श्रीयादवाद्रिनिवासरसिकैः
पण्डितमण्डलीसार्वभौमैः
श्री ॥ उ ॥ म. अ. अनन्तार्यवर्यैः
विरचितः ।

श्रीकाञ्चीपुरनिवासिभिः
विद्वद्वरेण्यैः श्री ॥ उ ॥ ति. अ. कु. श्रीनिवासार्यवर्यैः
सम्यक् परिशोध्य ।

म. अ. अनन्तार्येण
प्र. भ. तो. नरसिंहार्येण च
कल्याणपुर-विचारदर्पण-मुद्राक्षरशालायामङ्कयित्वा
प्राकाश्यं नीतः ॥

१८९८.

मूल्यं रू. ० — ६ — ६

॥ श्रीः ॥

गुरुसामानाधिकरण्यवादः

श्रीमद्यादवभूधराङ्कणलसन्मदारमिन्दीवर-
श्रेणीकान्तिझरीपरीतवपुषं निध्याय नारायणम् ।
श्रीरामानुजसूचितश्रुतिशिखासिद्धान्तबद्धादर-
स्सामानाधिकरण्यसद्गमनिकां प्रथात्यनन्तस्सुधीः ॥ १ ॥

इह खलु 'सर्वं खल्विदं ब्रह्म', 'अयमात्मा ब्रह्म', 'तत्त्वमसि' इत्यादिसमानाधिकरणपदघटितवाक्यार्थो विचार्यते ॥

तत्पदप्रयोज्यविशेष्यताविशिष्टभेदसम्बन्धावच्छिन्नप्रकारताप्रयोजकत्वं तेन समं समानाधिकरणत्वम्; नीलमुत्पलमित्यादौ उत्पलपदप्रयोज्यविशेष्यताविशिष्टप्रकारताप्रयोजकत्वात् नीलपदस्योत्पलपदेन सामानाधिकरण्योपपत्तिः । प्रकारतायां विशेष्यतावैशिष्ट्यं च—स्वानवच्छेदकधर्मावच्छिन्नत्वस्वनिरूपितत्वोभयसम्बन्धेन । घटो घट इत्यादौ सामानाधिकरण्यवारणाय प्रथमसम्बन्धनिवेशः ॥

न च—तादृशप्रकारताप्रयोजकत्वं हि तादृशप्रकारताशालिबोधजनकज्ञानविषयत्वं, घटो घट इत्यादौ घटत्वावच्छिन्नविशेष्यतानिरूपितघटत्वावच्छिन्नप्रकारताशालिबोधाप्रसिद्ध्या तादृशबोधजनकताघटितोक्तलक्षणस्य नातिव्याप्तिप्रसक्तिः—इति वाच्यम्; तादृशप्रकारताशालिबोधौपयिकाकाङ्क्षाशालित्वस्यैव विवक्षणीयत्वात्, अन्यथा तद्बोधानुपधायकव्यक्तिविशेषे व्याप्तेः । घटो घट इत्यादिना

तादृशबोधाजननेऽपि तादृशबोधौपयिकप्रथमान्तघटपदसमभिव्याहृत-प्रथमान्तघटादिपदत्वरूपाकाङ्क्षासत्त्वेन तत्रातिव्याप्तिप्रसक्तेः ॥

न च—तादृशबोधाप्रसिद्धयैव तद्बोधौपयिकाकाङ्क्षात्वं प्रथमान्तघट-पदसमभिव्याहृतप्रथमान्तघटपदत्वेन कल्प्यत इति—वाच्यम्। धर्मितावच्छेदकतासम्बन्धेन अभेदसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रकारताशालि-बोधं प्रति प्रकारतासम्बन्धेन प्रथमान्तघटपदसमभिव्याहृतप्रथमान्त-पदजन्योपस्थितेर्हेतुताया एव लाघवेन कल्पनीयत्वात् आत्मनिष्ठ-प्रत्यासत्त्या हेतुत्वस्य धर्मितावच्छेदकताभेदेन कारणताबाहुल्य-प्रसङ्गेनायुक्तत्वात् ॥

एवं च—द्रव्यं घट इत्यादौ द्रव्यत्वावच्छिन्ने तादृशबोधोत्पत्त्य-नुरोधेन अभेदसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रकारताशालिबोधौपयि-काकाङ्क्षात्वस्य प्रथमान्तघटपदसमभिव्याहृतप्रथमान्तपदत्वे कॢप्तत्वेन तादृशाकाङ्क्षाशालिनि घटो घट इत्यादावतिप्रसक्तिवारणाय प्रथम-सम्बन्धनिवेशस्सार्थकः। स्वानवच्छेदकधर्मावच्छिन्नत्वं च स्वावच्छेद-कतापर्याप्त्यनवच्छेदकधर्मावच्छिन्नपर्याप्तिकावच्छेदकताकत्वम्। तेन घटो नीलघट इत्यादौ जातित्वविशिष्टघटत्वावच्छिन्नपरामर्शकतदादि-पदघटिते घटस्स इत्यादौ च सामानाधिकरण्योपपत्तिः। तत्र नील्य-जातित्वादिविशिष्टघटत्वस्य घटत्वाभेदेऽपि विशेष्यतावच्छेदकता-पर्याप्त्यवच्छेदकघटत्वनिष्ठैकत्वापेक्षया प्रकारतावच्छेदकतापर्याप्त्य-वच्छेदकनील्यघटत्वोभयत्वजातित्वादेर्भेदात् ॥

अत एव—'सदेव सोम्येदमग्र आसीत्' इत्यादौ स्थूलचिदचि-द्विशिष्टार्थकेदम्पदसमानाधिकरणत्वं सूक्ष्मचिदचिद्विशिष्टार्थकसत्पद-स्योपपन्नम्। तत्र विशेष्यतावच्छेदकीभूतस्थूलचिदचिदपेक्षया प्रकारता-वच्छेदकीभूतसूक्ष्मचिदचितोर्भेदाभावेऽपि विशेष्यताप्रकारतावच्छेदक-तापर्याप्त्यवच्छेदकयोः स्थूलसूक्ष्मावस्थयोर्भेदात्। स्तोकं पचतीत्यादौ

पत्तिभातुसमानाधिकरणत्वं स्तोकपदस्येष्टमेव । क्रियाविशेषणस्थले सर्वत्राभेदान्वयबोधोदयेन प्रकृते पाकत्वावच्छिन्ने स्तोकत्वावच्छिन्नस्य अभेदसम्बन्धेनान्वयात् ॥

उक्तं च **कातन्त्रपरिशिष्टे**—

"धात्वर्थैकाधिकरण्ये तु स्तोकमोदनस्य पाक इति
भवत्येव" —इति ॥

यदि च—विशेषणवाचकपदस्य विशेष्यवाचिपदसमानाधिकरणत्ववत् विशेष्यवाचिपदस्यापि विशेषणवाचिपदसामानाधिकरण्यमिष्यते ; **तदा**—विशेषणविशेष्योभयसाधारणं तत्पदप्रयोज्यविषयताविशिष्टविषयताप्रयोजकत्वं तेन समं सामानाधिकरण्यमिति वक्तव्यम् । विषयताविशिष्टत्वं च—स्वानवच्छेदकधर्मावच्छिन्नत्व-स्वनिरूपिततादात्म्यसम्बन्धनिष्ठसांसर्गिकविषयतानिरूपितत्वैतदुभयसम्बन्धेन । द्वितीयसम्बन्धनिवेशाद्घटमित्यादौ अम्पदप्रयोज्यविषयतानिरूपिताधेयतासम्बन्धावच्छिन्नघटत्वावच्छिन्नविषयताप्रयोजके अम्पदसामानाधिकरण्याभाववति घटपदे नातिप्रसङ्गः ॥

यत्तु—तत्पदप्रयोज्यतादात्म्यातिरिक्तसम्बन्धानवच्छिन्नविषयताविशिष्टतादात्म्यातिरिक्तसम्बन्धानवच्छिन्नविषयताप्रयोजकत्वं तेन समं सामानाधिकरण्यं विशेषणविशेष्योभयसाधारणं ; वैशिष्ट्यं च—स्वानवच्छेदकधर्मावच्छिन्नत्व-स्वनिरूपितत्वोभयसम्बन्धेन । तत्र प्रथमतस्तादात्म्यातिरिक्तसम्बन्धानवच्छिन्नत्वानिवेशनात् घटमित्यादौ घटपदसामानाधिकरण्याभाववति अम्पदे, उत्तरत्र तन्निवेशात् अम्पदसामानाधिकरण्यशून्यघटपदे च, नातिप्रसङ्गः—**इति** ॥ **तन्न** । तथा सति नीलं घटमानयेत्यादौ नीलपदसामानाधिकरण्यवति घटपदे तत्पदसामानाधिकरण्यवति नीलपदे चाव्याप्तेः । अन्तराभासमान-

१. (टि.) विशेषणवाचकपद विशेष्यवाचकपदोभयसाधारणमित्यर्थ. ॥

विशेष्यताप्रकारतयोरभेदमते तादात्म्यसम्बन्धावच्छिन्ननीलत्वावच्छिन्न प्रकारतानिरूपितविशेष्यताया एव अम्पदार्थकर्मत्वत्वावच्छिन्नविशेष्यतानिरूपिताधेयतासम्बन्धावच्छिन्नप्रकारत्वाभिन्नत्वेन तादात्म्यातिरिक्तसम्बन्धानवच्छिन्नत्वाभावात् ॥

यदि च—नीलो घट इत्यादौ विशेषणविभक्तेरभेदार्थकत्वात् अभेदप्रकारक एव बोधो जायते, न त्वभेदसम्बन्धावच्छिन्ननीलत्वावच्छिन्नप्रकारकः। तदुक्तं **जिज्ञासाधिकरणटीकायां**—

"समानाधिकरणपदेषु प्रातिपदिकं विशेषणान्वयपरम्। तत्स्थसमानविभक्तिर्विशेष्यैक्यपरा" —इति ॥

अयमर्थः। प्रातिपदिकं विशेषणान्वयपरम्। नीलादिपदं नीलरूपाद्यवच्छिन्नार्थकम्। तत्स्थसमानविभक्तिर्विशेष्यैक्यपरा तदव्यवहितोत्तरप्रथमाविभक्तिर्नीलरूपाश्रयघटत्वाश्रयरूपविशेष्ययोरभेदार्थका— इत्युच्यते। **तदा**—स्वनिरूपिततादात्म्यविषयतात्वेन संसर्गताप्रकारतासाधारणरूपेण तद्विषयताया निवेशान्न दोषः ॥

यद्वा—स्वजन्योपस्थितिविषयताऽनवच्छेदकधर्मावच्छिन्नोपस्थापकत्वस्वप्रयोज्यविषयतानिरूपिततादात्म्यनिष्ठविषयतानिरूपितविषयताप्रयोजकत्वोभयसम्बन्धेन तत्पदविशिष्टत्वमेव तत्पदस्य तेन साकं सामानाधिकरण्यम् ॥ नीलो घट इत्यादौ नीलपदजन्योपस्थितिविषयताऽनवच्छेदकघटत्वावच्छिन्नोपस्थापकत्वस्य नीलपदप्रयोज्यनीलत्वावच्छिन्नविषयतानिरूपितविभक्तिप्रयोज्यतादात्म्यविषयतानिरूपितघटत्वावच्छिन्नविषयताप्रयोजकत्वस्य घटपदे सत्त्वेन घटपदस्य नीलपदसामानाधिकरण्योपपत्तिः॥ एवं नीलपदेऽपि घटपदसामानाधिकरण्यं ग्राह्यम्। नीलघटः नीलोत्पलमित्यादिसमासस्थलेऽपि नीलपदप्रयोज्यनीलत्वावच्छिन्नविषयतानिरूपिततादात्म्यनिष्ठसांसर्गिकविषयतानिरूपितविषयताप्रयोजकत्वसत्त्वात्सामानाधिकरण्यनिर्वाहः ।

अत्र घटो घट इत्यादिवारणाय प्रथमसम्बन्धस्य, घटः पट इत्यादि-वारणाय द्वितीयसम्बन्धस्य च निवेशः । भिन्नप्रवृत्तिनिमित्तकानां शब्दानामेकस्मिन्नर्थे वृत्तिस्सामानाधिकरण्यमिति भाष्योदाहृतशाब्दिकलक्षणस्याप्ययमेवार्थः । तत्र भिन्नधर्मावच्छिन्नोपस्थापकत्वार्थकेन भिन्नप्रवृत्तिनिमित्तानामित्यनेन प्रथमसम्बन्धस्य एकपदप्रयोज्यविषयतानिरूपिततादात्म्यविषयतानिरूपितविषयताप्रयोजकत्वतात्पर्यकेण एकस्मिन्नर्थे वृत्तिरित्यनेन द्वितीयसम्बन्धस्य लाभात् । सम्बन्धद्वयनिवेशनप्रयोजनं चोक्तं **जिज्ञासाधिकरणटीकायां**—

"तत्र भिन्नप्रवृत्तिनिमित्तकानामित्यनेन विशेषणतो विशेष्यतश्च एकार्थानां घटः कुम्भ इत्यादीनां न सामानाधिकरण्यमित्युक्तम्। एकस्मिन्नर्थे वृत्तिरित्यनेन चोभयतो भिन्नार्थानां गौरश्वो महिष इत्यादीनां न सामानाधिकरण्यम्"—इति ॥

अत्र—यद्यपि घटो घट इत्यादावतिव्याप्तिवारणमेव प्रथमसम्बन्धनिवेशनप्रयोजनं सम्भवति । तथाऽपि स्वनिरूपितशक्त्यनिरूपकत्वरूपस्वभिन्नत्वनिवेशेनापि घटो घट इत्यादिवारणसम्भवात् स्वविषयकज्ञानजन्योपस्थितिविषयताऽनवच्छेदकधर्मावच्छिन्नोपस्थापकत्वपर्यन्त-निवेशफलं घटः कुम्भ इत्यादिवारणमेवेत्यभिप्रेत्य तावत्पर्यन्तानुधावनमित्यवसेयम् ॥

अथात्र—'स्वजन्योपस्थितिविषयताऽनवच्छेदकधर्मावच्छिन्नोपस्थापकत्वं हि न तावत्तादृशधर्मावच्छिन्नविषयकोपस्थितिजनकज्ञानविषयत्वम् । तथा सति यत्र नीलो घट इत्यादौ घटपदत्वादिना धर्म्यन्तरावगाहिभ्रमाद्घटत्वावच्छिन्नविषयकोपस्थितिः तत्र नीलादिपदजन्योपस्थितिविषयताऽनवच्छेदकघटत्वावच्छिन्नविषयकोपस्थिति-जनकज्ञानविषयत्वस्य घटपदेऽभावेनाव्याप्तेः । किन्तु तादृशोपस्थितिजनकतावच्छेदकीभूतविषयितानिरूपकतावच्छेदकधर्मावच्छिन्नत्वम् ।

तथा च—घटः कुम्भ इत्यादावतिव्याप्तिर्दुर्वारा घटपदजन्योपस्थिति-विषयताऽनवच्छेदकीभूतगजशिरोदेशत्वाद्यवच्छिन्नविषयकोपस्थितिजनकतावच्छेदकीभूतविषयितानिरूपकतावच्छेदकीभूतानुपूर्व्यवच्छिन्नत्वस्य कुम्भपदे सत्त्वात्—इति चेत् ॥ **इदमत्र टीकातात्पर्यम्**—'लटश्शतृशानचावप्रथमा समानाधिकरणे', 'तत्पुरुषस्समानाधिकरणः कर्मधारयः' इत्यादिसूत्रस्थसमानाधिकरणशब्दविवरणार्थं सामानाधिकरण्यलक्षणमुक्तं **पतञ्जलिना**—'भिन्नप्रवृत्तिनिमित्तकानां शब्दानामेकस्मिन्नर्थे वृत्तिस्सामानाधिकरण्यम्' इति। तत्र भिन्नप्रवृत्तिनिमित्तकानामित्यस्य भिन्नधर्मावच्छिन्नोपस्थापकानां भिन्नधर्मावच्छिन्नशक्तिनिरूपकाणामिति वा अर्थः। एकस्मिन्नर्थे वृत्तिः एकत्व विशिष्टविषयकबोधजनकत्वमेकत्वनिष्ठविषयतानिरूपितविषयताप्रयोजकत्वपर्यवसितम्। स्वजन्योपस्थितिविषयताऽनवच्छेदकधर्मावच्छिन्नोपस्थापकत्वस्वप्रयोज्यविषयतानिरूपितैकत्वनिष्ठविषयतानिरूपितविषयताप्रयोजकत्वोभयसम्बन्धेन स्वनिरूपितशक्यतानवच्छेदकधर्मावच्छिन्नशक्तिनिरूपकत्वस्वप्रयोज्यविषयतानिरूपितैकत्वनिष्ठविषयतानिरूपितविषयताप्रयोजकत्वोभयसम्बन्धेन वा तत्पदविशिष्टतत्पदत्वं तेन समं सामानाधिकरण्यम्—इति फलितम् ॥

अत्र—एकत्वनिष्ठविषयेत्यत्र एकत्वं तादात्म्यरूपं ग्राह्यम्, सङ्ख्यारूपत्वे नीलो घट इत्यादौ नीलपदोत्तरैकवचनस्यैकत्वपरत्वाङ्गीकारेण सामानाधिकरण्योपपादनेऽपि नीलान्युत्पलानीत्यादौ तदनुपपत्तेः। एवं स्वप्रयोज्यविषयतानिरूपिततादात्म्यनिष्ठविषयतायां विभक्तिप्रयोज्यत्वं निवेश्यम। तेन राजा तस्य पुत्रश्च दर्शनीयावित्यत्र तत्पदस्य न राजपदसामानाधिकरण्यापत्तिः। तत्पदस्य वक्तृबुद्धिविषयाभेदविशिष्टराजत्वाद्यवच्छिन्नोपस्थापकतया विषयताया विषयस्वरूपतामते तत्पदप्रयोज्यवक्तृबुद्धिविषयनिष्ठविषयताया

राजपदप्रयोज्यत्वानपायात्. राजपदतत्पदयोः घटो नीलघट इत्यादिवत् भिन्नधर्मावच्छिन्नोपस्थापकत्वात्। एतदभिप्रेत्यैवोक्तं **जिज्ञासाधिकरणटीकायाम्** —

"समानविभक्त्यैक्यबोधनं वृत्तिशब्देन विवक्षितं; तेन—राजा तस्य पुत्रश्च दर्शनीयावित्यत्र राजपदतच्छब्दयोस्सामानाधिकरण्यव्यावृत्तिः। तत्र हि प्रकृतपरामर्शितच्छब्दादैक्यावगमः, न तु समानविभक्त्या॥ ननु—नीलान्युत्पलानीत्यादौ सामानाधिकरण्यं न स्यात्; विशेष्यबहुत्वादेकार्थवृत्तित्वानुपपत्तेः। मैवम्। एकस्मिन्नितिपदस्य समभिव्याहृतपदान्तरोपस्थापिताकारानधिकरणत्वव्यावृत्त्यर्थत्वात्। तत्तत्पदोपस्थापितानेकविशेषणापेक्षया साधारणत्वं ह्येकशब्दार्थः। न हि नीलान्युत्पलानीत्यत्र नीलत्वानधिकरणेषु उत्पलत्वं वर्तते। अतस्तत्र सामानाधिकरण्यमुपपन्नम्॥" —इति॥

अयमर्थः। विभक्त्या ऐक्यबोधनं विभक्तिप्रयोज्यैकत्वनिष्ठविषयतानिरूपितविषयताप्रयोजकत्वम्॥ तच्छब्दादैक्यावगम इति। इदं च तच्छब्दस्य वक्तृबुद्धिविषयाभेदविशिष्टराजत्वाद्यवच्छिन्ने शक्तिरित्यभिप्रायेण॥

यदि—नैयायिकाद्युक्तरीत्या वक्तृबुद्धिविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने शक्तिस्स्वीक्रियते। तथा च—न राजतत्पदयोस्सामानाधिकरण्यापत्तिः। तयोर्भिन्नधर्मावच्छिन्नोपस्थापकत्वाभावात्—**इत्युच्यते**॥ **तदा**—धान्येन धनवान्, राहोश्शिर इत्यादावतिव्याप्तिवारकतया समानविभक्त्येत्यस्य सार्थकता. समानविभक्त्येत्यस्य विशेष्यवाचकपदोत्तरविभक्तिसजातीयेत्यर्थात्। साजात्यं च—विभक्तिविभाजकप्रथमात्वादिना॥ एकत्वं सङ्ख्यारूपमित्यभिप्रायेणाशङ्कते—**नन्विति**। तादात्म्यमेवैक्यपदेन विवक्षितमित्याशयेन समाधत्ते-**मैवमिति**॥

अथात्र—तादात्म्यविषयतायां समानविभक्तिप्रयोज्यत्वविवक्षणे नीलोत्पलमित्यादिसमासेऽव्याप्तिः । न च तत्र लुप्तस्मृतविभक्तिप्रयोज्यैव तादात्म्यविषयतेति वाच्यम् । तत्पुरुषस्थले कैश्चिल्लुप्तविभक्तिस्मरणाभ्युपगमेऽपि कर्मधारयस्थले कैरपि तदनभ्युपगमात्—इति चेन्न ॥ समानविभक्तिप्रयोज्येत्यनेन तादृशविभक्त्यप्रयोज्यत्वसंसर्गावच्छिन्नत्वोभयाभाववत्त्वस्य विवक्षितत्वात् । समासस्थले तादात्म्यनिष्ठसांसर्गिकविषयतायां सम्बन्धावच्छिन्नत्वाभावेनोभयाभावसत्त्वात् । अत्र पूर्वोक्तरीत्या घटः कुम्भ इत्यादौ गजशिरोदेशत्वाद्यवच्छिन्नोपस्थापकत्वादिकमादायातिव्याप्तिवारणाय तत्पदजन्योपस्थितिविशिष्टोपस्थितिजनकतावच्छेदकविषयितानिरूपकतावच्छेदकधर्मावच्छिन्नत्वं तत्पदनिरूपितशक्तिविशिष्टशक्तिनिरूपकतावच्छेदकधर्मावच्छिन्नत्वं वेति पूर्वोक्तलक्षणयोर्निष्कर्षो बोध्यः । उपस्थितावुपस्थितिवैशिष्ट्यं च—स्वविषयतानवच्छेदकधर्मावच्छिन्नविषयकत्वस्वप्रयोज्यविषयतानिरूपिततादात्म्यनिष्ठविषयतानिरूपितविषयताप्रयोजकत्वोभयसम्बन्धेन । शक्तौ शक्तिवैशिष्ट्यं च—स्वानवच्छेदकधर्मावच्छिन्नत्वस्वप्रयोज्यविषयतानिरूपिततादात्म्यनिष्ठविभक्तिप्रयोज्यविषयतानिरूपितविषयताप्रयोजकत्वोभयसम्बन्धेनेति ॥

तत्र—'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' इति शाण्डिल्यविद्यावाक्यम् । तत्र सर्वशब्दः सर्वशरीरकपरः । तदेकदेशे सर्वस्मिन्निदंपदार्थस्य प्रत्यक्षविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नस्याभेदेनान्वयः । इदंपदार्थविशेषितसर्वपदार्थं प्रत्यक्षविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नाभिन्नसर्वशरीरकत्वावच्छिन्ने ब्रह्मपदार्थस्याभेदेनान्वयः । विशेषणविभक्तेरभेदार्थकत्वे च—प्रथमान्तब्रह्मपदार्थस्य ब्रह्मतादात्म्यस्य आश्रयतासम्बन्धेनान्वयः ॥ जायत इति जम्, लीयत इति लम् । जलशब्दौ डप्रत्ययान्तौ ।

अनिति जीवतीत्यन्, क्विबन्तोऽयं शब्दः । जं च लं च अन् च जलानिति समाहारद्वन्द्वः ॥

न च—उत्पत्त्याश्रयलयाश्रयादिरूपाणां जलादिपदार्थानां भेदाभावात् द्वन्द्वो न सम्भवति, द्वन्द्वसमासस्य पदार्थभेदव्याप्यत्वात्—इति वाच्यम् । पदार्थभेदाभावेऽपि पदार्थतावच्छेदकभेदादेव प्रमाणप्रमेयेत्यादाविव द्वन्द्वोपपादनसम्भवात् । ततश्च तस्य जलानिति षष्ठीतत्पुरुषः । जलादिपदार्थैकदेशजानिलयस्थितिषु च तच्छब्दार्थब्रह्मप्रयोज्यत्वावच्छिन्नस्याभेदसम्बन्धेनान्वयः । द्वन्द्वान्ते श्रूयमाणस्येव द्वन्द्वादौ श्रूयमाणस्यापि प्रत्येकमभिसम्बन्धस्य 'चक्रे तच्छत्रुमित्रे' इत्यादौ दृष्टत्वात् । इतिशब्दार्थश्च हेतुत्वं, तच्च ज्ञानज्ञाप्यत्वम् । तदेकदेशज्ञाने तज्जलानित्यन्तार्थस्य तज्जत्वतल्लत्वतदन्त्वावच्छिन्नस्य प्रकारतासम्बन्धेनान्वयः, तादृशज्ञानज्ञाप्यत्वस्य ब्रह्मणि तत्तादात्म्ये वाऽन्वयः । खल्वर्थश्च यतो वेत्यादिप्रमाणजन्यप्रमितिविषयत्वरूपं प्रमाणप्रसिद्धत्वम् । तस्य च तज्जत्वाद्यवच्छिन्ने हेतौ ब्रह्मणि तत्तादात्म्ये वा साध्ये चान्वयात् प्रमाणप्रसिद्धतज्जत्वाद्यवच्छिन्नप्रकारकज्ञानज्ञाप्यत्वविशिष्टप्रमाणप्रसिद्धब्रह्माभिन्नं तादृशज्ञानज्ञाप्यत्वविशिष्टप्रमाणप्रसिद्धतत्तादात्म्यवद्वा इदं सर्वमिति बोधः । अत्र च परिदृश्यमानसर्वशरीरकत्वावच्छिन्ने ब्रह्मणस्तादात्म्येन तत्तादात्म्यस्य वा आश्रयतासम्बन्धेन साध्यत्वं, तत्र ब्रह्मजातत्वावच्छिन्नादिकं तादात्म्येन ब्रह्मजातत्वादिकं वा स्वरूपसम्बन्धेन हेतुः । तादृशहेतोश्च स्वरूपासिद्धिवारणाय साध्यस्य चाबाधितत्वसूचनाय खलुशब्द इति पर्यवसानम् ॥

उक्तं च सर्वत्र प्रसिद्धोपदेशादित्यत्र भाष्ये—

"ब्रह्मणो जातत्वात् ब्रह्मणि लीनत्वात् ब्रह्माधीनस्थितिकत्वाच्च हेतोर्ब्रह्मात्मकं सर्वं खल्विदं जगदित्युक्ते यस्माज्जगज्जन्म-

स्थितिलयाः वेदान्तेषु प्रसिद्धाः, तदेवात्र ब्रह्मेति प्रतीयते ;
तच्च परमेव ब्रह्म ॥"　　—इति ॥

अत्र टीका—"इतिशब्देन हेतुतयोक्तत्वात् जन्मादीनां प्रमाण-सिद्धत्वं, प्रमाणप्रसिद्धस्यैव हि हेतुता, तत्कृततादात्म्यस्य प्रसिद्धत्वं खलुना सिध्यति ॥"　　—इति ॥

अत्र यद्यपि—अर्थापत्त्या हेतौ प्रमाणसिद्धत्वस्य भानं स्वीकृतं, न खलुना । तथाऽपि 'आक्षेपतः प्राप्तादाभिधानिकस्यैव ग्राह्यत्वात्' इति भाष्यानुरोधेन शब्दशक्त्या भानासम्भवस्थल एवार्थापत्तेः स्वीकरणीयतया हेतौ खलुशब्देन प्रसिद्धत्वभानं युक्तम् । न चैवं टीकाविरोधः, हेतुतयोक्तत्वात् ; "हेतुतयोक्तत्वादपि" इत्यर्थाङ्गी-कारेण अपिशब्देन खलुशब्दस्य सङ्गृहीतत्वात् । अत्र तज्जत्वादीनां प्रत्येकमेव हेतुत्वं, न मिलितानां ; वैयर्थ्यात् । अत्र तज्जत्वं—तदभिन्नत्वे सति तदव्यवहितोत्तरक्षणोत्पत्तिकत्वरूपं तदुपादेयत्वम् । तेन ब्रह्मजन्यत्वमात्रस्य तत्तादात्म्यशून्ये घटादौ सत्त्वेन उक्त-साध्यव्यभिचारेऽपि न क्षतिः । स्थूलावस्थाविशिष्टब्रह्मणश्च उत्पत्ति-रस्त्येव, बहुस्यामिति बहुत्वावस्थाविशिष्टस्योत्पत्तेस्सङ्कल्पितत्वात् ; स्वाधिकरणक्षणध्वंसानधिकरणक्षणसम्बन्धरूपोत्पत्तिशरीरे च विशिष्ट-ब्रह्माधिकरणतैव प्रवेश्या । तेन ब्रह्माधिकरणक्षणध्वंसानधिकरण-क्षणाप्रसिद्धावपि न क्षतिः । तल्लत्वमपि—तदात्मकनाशप्रतियोगित्वम् । सूक्ष्मचिदचिद्विशिष्टं ब्रह्मैव स्थूलचिदचिद्विशिष्टब्रह्मणो नाशः ; उपा-दानस्यैव कार्यनाशरूपत्वात् कपालत्वाद्यवस्थाविशिष्टमृद एव घटनाश-रूपत्वात् । तथा च—सूक्ष्मचिदचिद्विशिष्टब्रह्मात्मकनाशप्रतियोगित्वस्य स्थूलचिदचिद्विशिष्टब्रह्मरूपकार्ये सत्त्वमव्याहतम् ॥

न चैवं—ब्रह्मणो विनाशप्रतियोगित्वे तदप्रतियोगित्वबोधिकायाः 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिश्रुतेर्विरोध इति—वाच्यम् । विशिष्टे

ब्रह्मणि नाशप्रतियोगितायाः पर्याप्तत्वेऽपि शुद्धविशेष्ये तदपर्याप्तेः। सत्यं ज्ञानमित्यादेश्च शुद्धविषयत्वात् अत्र अनन्तपदार्थकाला-परिच्छेदस्य ध्वंसप्रागभावप्रतियोगितापर्याप्त्यनधिकरणत्वरूपत्वात्। तदन्त्वं च–तत्सङ्कल्पप्रयुक्तास्थितिमत्त्वं। स्थितिश्च–स्वाधिकरण-क्षणध्वंसाधिकरणक्षणसम्बन्धरूपद्वितीयक्षणसम्बन्धः ॥

यद्यपि–ब्रह्मसङ्कल्पप्रयुक्तनिरुक्तस्थितिमत्त्वरूपं ब्रह्मतादात्म्यशून्ये घटादौ व्यभिचरति। तथाऽपि–स्वसामानाधिकरण्यस्वप्रयोज्यत्वोभय-सम्बन्धेन ब्रह्मसङ्कल्पविशिष्टनिरुक्तस्थितिमत्त्वस्यैव तदन्त्वरूपत्वान्न दोषः ॥

एतेन–सर्वं खल्विदं ब्रह्मेत्यादौ बाधार्थं सामानाधिकरण्यं ; यथा हि स्थाणुश्चोर इत्यादौ स्थाणुपदं स्थाणुज्ञाननिवर्त्यपरं, त्वद्दृष्टश्चोरः स्थाणुज्ञाननिवर्त्य इत्यर्थः। एवं–सर्वं खल्विदमित्यत्रापि ब्रह्मपदं ब्रह्मज्ञाननिवर्त्यपरं, तत्र हेतुस्तज्जलानिति। यत्र ब्रह्मजन्यत्वं तत्प्रयुक्तनाशप्रतियोगित्वं तत्प्रयुक्तस्थितिमत्त्वं वा, तत्र ब्रह्मज्ञान-निवर्त्यत्वमिति व्याप्तेः। ब्रह्मपदस्य तत्तादात्म्यपरत्वं न सम्भवति, तज्जलानिति हेत्वनन्वयापत्तेः। ब्रह्मजन्यत्वादेस्तत्तादात्म्यव्याप्यत्वा-भावात् घटादौ व्यभिचारात्—**इति निरस्तम्** ॥ उक्तरीत्या घटादिव्यावृत्तब्रह्मजन्यत्वादेरेव ब्रह्मतादात्म्यरूपसाध्ये हेतुत्वसम्भवात् ब्रह्मपदस्य तज्ज्ञाननिवर्त्यपरत्वे लक्षणापत्तेरिति। सर्वपदस्य सर्व-शरीरकपरत्वं च लक्षणां विनैवोपपादयिष्यते। अत्र पक्षता-वच्छेदकीभूतं सर्वशरीरकत्वं च न सर्वत्वाश्रयशरीरकत्वम्, तस्य जीवसाधारण्येनाव्यावर्तकत्वात् ॥

ननु—प्रमेयत्वव्यापकस्वनिष्ठज्ञानावच्छिन्नानुयोगिताकापृथ-क्सिद्धिसम्बन्धनिरूपितप्रतियोगिताकत्वरूपं प्रमेयत्वव्यापकशरीरता-निरूपकत्वं तत्। तच्छरीरकत्वं हि–तन्निष्ठज्ञानावच्छिन्नानुयोगि-

ताकापृथक्सिद्धिसम्बन्धनिरूपितद्रव्यत्वसमानाधिकरणप्रतियोगित्वम् ; चैत्रस्येदं शरीरमित्यादौ चैत्रनिष्ठज्ञानावच्छिन्नानुयोगिताकापृथक्सिद्धिसम्बन्धनिरूपितद्रव्यत्वसमानाधिकरणप्रतियोगितावदिदम् —इति बोधात् । तत्र ज्ञानावच्छिन्नानुयोगिताकापृथक्सिद्धिसम्बन्धनिरूपितद्रव्यत्वसमानाधिकरणप्रतियोगिताश्रयः शरीरपदार्थः । तदेकदेशे अनुयोगितायां च षष्ठ्यन्तार्थस्य चैत्रवृत्तित्वस्यान्वयः । यस्य पृथिवी शरीरमित्यादौ यन्निष्ठज्ञानावच्छिन्नानुयोगिताकापृथक्सिद्धिसम्बन्धनिरूपितद्रव्यत्वसमानाधिकरणप्रतियोगितावती पृथिवीति बोधः अत्र–ज्ञानं एतस्य शरीरमिति व्यवहारापत्तिः ; सिद्धान्ते धर्मभूतज्ञानस्य द्रव्यत्वेन शरीरात्मनोरिव ज्ञानात्मनोरपि अपृथक्सिद्धिसम्बन्धसत्त्वेन द्रव्यत्वसमानाधिकरणतादृशप्रतियोगितावत्त्वात् । तद्वारणाय ज्ञानावच्छिन्नत्वनिवेशः । ज्ञानावच्छिन्नानुयोगिताकसम्बन्धप्रतियोगित्वस्य आत्मगतपरिमाणादौ सत्त्वात् परिमाणमेतस्य शरीरमिति व्यवहारवारणाय प्रतियोगित्वे द्रव्यत्वसमानाधिकरणत्वनिवेशः । श्रीभाष्योक्तलक्षणत्रयफलितमिदमेव शरीरशब्दप्रवृत्तिनिमित्तम् ; अन्यथा–यथाश्रुतलक्षणत्रयस्य प्रवृत्तिनिमित्तत्वे शरीरशब्दस्य शक्तित्रयापत्तेः, अन्यतमस्य प्रवृत्तिनिमित्तत्वे "आधेयत्वविधेयत्वशेषत्वानि शरीरशब्दप्रवृत्तिनिमित्तानि" इति भाष्यविरोधात् ॥ तदुक्तं **न्यायसिद्धाञ्जने**—

> "अत्रेदं चतुर्थमपि लक्षणत्रयफलितं भाष्यकाराभिप्रेतं लक्षणमुच्यते । यस्य चेतनस्य यदवस्थमपृथक्सिद्धविशेषणं द्रव्यं, तत्तस्य शरीरम् । आधेयत्वविधेयत्वशेषत्वानि अपृथक्सिद्धेरेव अवान्तरभेदा इह विवक्षिताः" —इति ॥

तथा च प्रमेयत्वव्यापकनिरुक्तशरीरतानिरूपकत्वमेव सर्वशरीरकत्वम्—इति चेत् ॥

R. Krishnaswami Sastri

नैवम् ॥ निरुक्तशरीरित्वस्य गुणादिसाधारण्याभावेन प्रमेयत्वव्यापकत्वाप्रसक्तेः। नापि द्रव्यत्वव्यापकशरीरतानिरूपकत्वं तत्, ब्रह्मतज्ज्ञानयोरपि द्रव्यत्वसत्त्वेन तत्र तच्छरीरत्वाभावात्। किन्तु ब्रह्मतज्ज्ञानान्यद्रव्यत्वव्यापकस्वनिष्ठज्ञानावच्छिन्नानुयोगिताकापृथक्सिद्धिसम्बन्ध - निरूपितद्रव्यत्वसमानाधिकरणप्रतियोगिताकत्वरूपं ब्रह्मतज्ज्ञानान्यद्रव्यत्वव्यापकशरीरतानिरूपकत्वमेव सर्वशरीरकत्वम्। तत्र इदंपदस्य प्रत्यक्षविषयतावच्छेदकत्वोपलक्षितब्रह्मतज्ज्ञानान्यत्वरूपधर्मावच्छिन्नपरत्वेन सर्वपदस्य सर्वद्रव्यशरीरकपरत्वेन च उक्तार्थलाभसम्भवात्। निरुक्तसर्वशरीरकत्वावच्छिन्ने च सर्वपदस्य शक्तिरेव ; घटादिपदानामपि घटादिनिष्ठद्रव्यत्वसमानाधिकरणप्रतियोगिताकापृथक्सिद्धिसम्बन्धनिरूपितज्ञानावच्छिन्नानुयोगिताश्रयत्वरूपघटादिशरीरकत्वावच्छिन्न एव शक्तेः, घटत्वावच्छिन्ने च निरूढलक्षणायाः स्वीकारात्। 'अमरा निर्जराः' इत्यादिकोशश्च अमरादिपदानां देवत्वाद्यवच्छिन्ने निरूढलक्षणाग्राहक एव, न शक्तिग्राहकः। तद्ग्राहकाणि च—'सर्वे वेदा यत्पदमामनन्ति', 'वेदैश्च सर्वैरहमेव वेद्यः', 'वचसां वाच्यम्'—इत्यादिप्रमाणानि आकरादावुक्तानि ॥

उक्तं च अविरोधलक्षणे सूत्रकृता—

"चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्" —इति ॥

अयमर्थः। चराचरव्यपाश्रयः—जङ्गमस्थावरविषयकः तत्तच्छब्दव्यवहारः, भाक्तः—कोशादिना गृहीतनिरूढलक्षणाधीन एव ; तद्भावभावित्वात्—ब्रह्मरूपशक्यार्थप्रतीत्यनन्तरभावित्वात्, अभाक्तव्यवहारस्येति शेषः।

तथा च—वेदान्तश्रवणात्प्राक् ब्रह्मणि शक्तिग्रहासम्भवेन शक्त्यधीनव्यवहारासम्भवात् जङ्गमस्थावरादिविषयकः सर्वोऽपि व्यवहारो

निरूढलक्षणाधीन एव । तथा च सर्वशब्दस्य शक्त्यैव सर्वशरीरक-परत्वमुपपन्नम् ॥

अत्र हेतुत्वबोधकस्य इतिशब्दस्य आवृत्त्या अनुमितिरर्थः; तस्याश्च शान्तपदार्थद्वेषाभावाश्रयैकदेशद्वेषाभावे प्रयोज्यतासम्बन्धेनान्वयः । इतिशब्दार्थानुमितौ च ब्रह्मतादात्म्यविशेषितसर्वशरीरकत्वावच्छिन्नस्य विषयितासम्बन्धेनान्वयः । शमस्य च स्वसामानाधिकरण्यस्वसमान-कालीनत्वोभयसम्बन्धेन धात्वर्थोपासने धर्मिपारतन्त्र्येणान्वयः ॥

तथा च—ब्रह्मजन्यत्वादिज्ञानज्ञाप्यब्रह्मतादात्म्यविशिष्टसर्वशरीरक-त्वावच्छिन्नविषयकानुमितिप्रयोज्यद्वेषाभावाश्रयः उक्तोभयसम्बन्धेन द्वेषाभावविशिष्टकृतिसाध्योपासनाश्रय इति बोधः । ब्रह्मणस्सर्वशरीर-कत्वज्ञाने सर्वस्मिन् स्वेष्टसाधनत्वज्ञानोत्पत्त्या इष्टसाधनताज्ञानस्य द्वेषं प्रति प्रतिबन्धकत्वात् द्वेषाभावं प्रति प्रयोजकत्वोपपत्तिः । उपासनस्य कर्मसाकाङ्क्षत्वेन अनुपक्तस्य ब्रह्मपदस्य विभक्तिपरिणामेन धात्वर्थेऽन्वयात् ब्रह्मविषयकोपासनलाभः ॥

न च—सर्वं खल्विदं ब्रह्मेत्यत्र सकलपदानां द्वितीयान्ततां स्वीकृत्य धात्वर्थेऽन्वयवर्णनमेव युक्तमिति—वाच्यम् । सर्वमिदं ब्रह्मखल्विति प्रसिद्धवन्निर्देशेन तादृशवाक्यघटकपदानां द्वितीयान्तत्वेनाप्रतीतेः, सर्वान्तर्यामित्वविशिष्टब्रह्मण उपासने कर्मतयाऽन्वये सर्वात्मत्व-रूपगुणावरुद्धे गुणान्तरविधानासम्भवेन "स क्रतुं कुर्वीत मनो मयः प्राणशरीरः" इत्यादिना विधीयमानानां मनोमयत्वादिगुणानां तत्रान्वयानुपपत्तेः, उत्पत्तिशिष्टगुणावरुद्धे गुणान्तरविधानायोगात् 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' इत्यस्य मोक्षहेतु-भूतोपासनविधायकत्वस्य स क्रतुं कुर्वीतेत्यस्य तादृशोपासनानुवादेन गुणविधायकतायाश्च सिद्धान्तसिद्धत्वात् ॥

उक्तं च **सर्वत्र प्रसिद्धोपदेशादि**त्यत्र **श्रीभाष्ये**—

"सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीतेत्यत्रैव उपासनं विधीयते सर्वात्मकं ब्रह्म शान्तस्सन् उपासीतेति। स क्रतुं कुर्वीतेति तस्यैव गुणोपादानार्थोऽनुवादः। उपादेयाश्च गुणा मनोमयत्वादयः। अतस्सर्वात्मकं ब्रह्म मनोमयत्वादिगुणकमुपासीत—इति वाक्यार्थः॥" —इति॥

अत्र सर्वात्मकं ब्रह्मेत्यस्य सर्वात्मकत्वोपलक्षितं ब्रह्मोपासीतेत्यर्थः; सर्वात्मत्वस्य उपासने प्रकारतयाऽन्वये उत्पत्तिशिष्टगुणावरुद्धे गुणान्तरविधानासम्भवेन उक्तानुपपत्तेर्दुर्वारत्वात्। गुणोपादानार्थः—गुणविधानार्थः। उपादेयाः—विधेयाः॥

उक्तं च तत्र **टीकायां**—

"ननु—उपासनविधेरुत्पत्तिशिष्टसर्वात्मकत्वगुणावरोधान्मनोमयत्वादीनां नोपास्याकारत्वम्—इति चेन्न। सर्वात्मकत्वस्य उपासनविधिवाक्यस्थत्वाभावात्। तज्जत्वतल्लत्वतदन्त्वैः सर्वमिदं ब्रह्मखल्विति निर्देशः उपासनविध्येकवाक्यत्वं निवारयति, न ह्युपासीत खल्विति वचनव्यक्तिर्घटते॥"—इति॥

ननु—उत्पत्तिशिष्टगुणावरुद्धेऽपि गुणान्तराणां विधेयतया शाब्दबोधप्रयोजकसामग्रीसत्त्वे तेषां विधानसम्भवादुक्तनियमो निर्युक्तिकः—इति **चेन्न**। गुणविशिष्टे उपासने प्रतिपन्ने तत्र गुणान्तरजिज्ञासानुदयेनाकाङ्क्षाविरहात्, जिज्ञासाया एवाकाङ्क्षारूपत्वात् स्वनिष्ठविधेयतानिरूपितोद्देश्यतासम्बन्धेन गुणविषयकान्वयबोधं प्रति स्वनिष्ठविधेयतानाश्रयस्यानिष्पाद्यस्वसजातीयगुणस्य स्वनिष्ठविधेयताश्रयत्वसम्बन्धेन प्रतिबन्धकत्वाभ्युपगमेन तादृशप्रतिबन्धकाभावघटितसामग्रीविरहाच्च॥

अत्र—चरमसम्बन्धघटकस्वपदं उत्पत्तिशिष्टगुणपरं, इतरत्सर्वं गुणान्तरपरम्। 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्' इत्यत्र आमिक्षारूपोत्पत्तिशिष्टगुणावरुद्धे यागे वाजिनरूपगुणान्तरस्य विधानं न सम्भवतीति तद्विशिष्टयागान्तरविधायकं वाजिभ्यो वाजिनमिति वाक्यमिति—**गुणाधिकरणे सिद्धान्तितम्**॥

तत्र हि—स्वनिष्ठविधेयतानिरूपितोद्देश्यतासम्बन्धेन वाजिनरूपगुणान्वयबोधं प्रति वाजिननिष्ठविधेयताश्रयवाजिनानिष्पाद्यवाजिनसजातीयामिक्षारूपगुणस्य स्वनिष्ठविधेयताश्रयत्वसम्बन्धेन यागे सम्बद्धस्य प्रतिबन्धकत्वं, विशिष्टविधिस्थले सर्वत्र विशेषणविशेष्ययोरेकस्या एव विधेयतायाः पर्याप्तेः आमिक्षानिष्ठविधेयताश्रयत्वं यागस्योपपन्नम्॥

अत्र स्वनिष्ठविधेयताश्रयत्वानिवेशाद्गुणद्वयविशिष्टकर्मविधिस्थले बोधस्य नानुपपत्तिः, तत्र गुणद्वये यागे चैकस्या एव विधेयतायाः पर्याप्तेः। उत्पत्तिशिष्टपुरोडाशाद्यवरुद्धेष्वाग्नेयादिषु 'व्रीहिभिर्यजेत' 'यवैर्यजेत' इत्यादिवैकल्पिकविध्यन्तर्गतव्रीह्याद्यन्वयबोधोपपत्तये स्वानिष्पाद्यत्वानिवेशः, पुरोडाशस्य च व्रीहिनिष्पाद्यत्वेन तदनिष्पाद्यत्वाभावात्। 'सोमेन यजेत' इत्युत्पत्तिशिष्टसोमाद्यवरुद्धयागे ऐन्द्रवाय्वादिवाक्यैर्देवतान्वयबोधोपपत्तये स्वसाजात्यनिवेशः। साजात्यं च—द्रव्यत्वदेवतात्वादिरूपेणेति। तथा च—प्रकृतेऽपि उत्पत्तिशिष्टसर्वात्मत्वविशिष्टोपासने मनोमयत्वादिगुणानां विधानासम्भवात् सर्वात्मत्वस्य नोत्पत्तिवाक्ये निवेशो युक्तः॥

ननु—अत्र 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' इति विहितोपासनानुवादेन गुणविधायकं स क्रतुमित्यादिवाक्यमिति तावन्न युक्तम्। मनोमयत्वप्राणशरीरत्वादिरूपगुणानां विधेयानां भेदेन वाक्यभेदापत्तेः। किन्तु मनोमयत्वादिविशिष्टोपास-

---

१. (टि.) विधेयत्वात्.

नान्तरस्यैव विधायकमित्यङ्गीकर्तुं युक्तं, तदानीं विशिष्टनिष्ठाया विधेयताया ऐक्येन वाक्यैक्यनिर्वाहात्। अत एव–'उप सद्भिश्चरित्वा मासमग्निहोत्रं जुहोति' इति वाक्यस्य, 'यावज्जीवमग्निहोत्रं जुहोति' इति वाक्यान्तरप्राप्ताग्निहोत्रानुवादेन उपसद्यागकरणकत्वमासरूप-कालोभयविधाने वाक्यभेदापत्त्या तदुभयविशिष्टकर्मान्तरस्यैव विधायकं तद्वाक्यम्–इति मीमांसकैस्सिद्धान्तितम्॥ उक्तं च—

"प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः ।
अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः ॥" — इति ॥

—इति चेत् ॥

अत्र केचित्—मनोमयत्वादिगुणानामेव प्रकारितासम्बन्धेन उपासने विधानाङ्गीकारे ब्रह्मविशेष्यकस्य धर्म्यन्तरे मनोमयत्वादिगुण-प्रकारकस्य समूहालम्बनोपासनस्य मोक्षहेतुतावारणाय मनोमयत्वादि-गुणनिष्ठप्रकारतानिरूपितब्रह्मनिष्ठविशेष्यताकत्वस्यैकस्यैव विधेयतायाः स्वीकरणीयतया वाक्यभेदविरहात् मनोमयत्वादिनिष्ठप्रकारतानिरूपित-ब्रह्मनिष्ठविशेष्यताकत्वरूपविशिष्टपदार्थे विधेयतायाः पर्याप्तत्वेन तद्घटकेषु मनोमयत्वादिष्वपि विधेयतासत्त्वादुपादेयाश्च मनोमय-त्वादय इति भाष्यस्य न विरोधः ॥

न च–ब्रह्मनिष्ठविशेष्यताकत्वस्यापि पूर्ववाक्येन प्राप्तत्वात्तादृश-विशेष्यतांशे निरूपितत्वसम्बन्धेन मनोमयत्वादिप्रकारतानामेव विधेयताया वाक्यभेदापत्तिर्दुर्वारैवेति—वाच्यम् । तावताऽपि मनो-मयत्वादिगुणनिष्ठप्रकारतानिरूपितत्वस्यैकस्यैव विशेष्यतांशे विधान-सम्भवेन वाक्यैक्यनिर्वाहात्, ब्रह्मनिष्ठविशेष्यताया ऐक्येन तदा-त्मकनिरूपितत्वस्याप्यैक्यात् ॥

वस्तुतस्तु—ब्रह्मविशेष्यकत्वविशिष्टोपासने मनोमयत्वादिप्रकार-कत्वमेव विधेयं, क्रतुशब्दार्थोपासने अन्वयार्थं मनोमय इत्यस्य

षष्ठ्यन्तत्वेन परिणामस्वीकारस्यावश्यकत्वेन षष्ठ्यन्तमनोमयशब्देन च मनोमयत्वादिप्रकारकत्वस्य बोधनात् । उक्तसमूहालम्बने च न ब्रह्मविशेष्यकत्वावच्छेदेन मनोमयत्वादिप्रकारकत्वम्—इति तद्व्युदासः । मनोमयत्वादिप्रकारकत्वं च तन्निष्ठप्रकारतानिरूपकत्वं ; निरूपकत्वस्य च ज्ञानस्वरूपत्वेनैक्यान्न विधेयभेदः । इत्थं च—तस्यैव गुणोपादानार्थोऽनुवादः—इति भाष्यस्य उपासनस्योद्देश्यताबोधकस्य न विरोधः ॥ **इत्याहुः** ॥

ततश्च—सर्वं खल्विदं ब्रह्मेत्यादौ सर्वशब्दस्य तच्छरीरकपरमात्मपरत्वात् सर्वपदब्रह्मपदयोः सामानाधिकरण्यं मुख्यमेवेति सिद्धम् । एवं तत्त्वमसीत्यादावपि शरीरिशरीरभावनिबन्धनमेव सामानाधिकरण्यम् ॥

यद्यपि—तत्त्वमसीत्यादौ सामानाधिकरण्यं नास्ति, तत्त्वंपदार्थयोरभेदबोधविरहात् । तत्र ह्यसधात्वर्थः सत्त्वं, तच्च सिद्धान्ते प्रमाविषयत्वमेव । उक्तं च **अद्रव्यसरे सर्वार्थसिद्धौ** —

"तत्त्वतो निरूपणे प्रामाणिकत्वातिरेकेण सत्त्वमन्यन्नास्ति, प्रामाणिकत्वमेव सत्त्वम् ॥" इति ॥

तादृशसत्त्वरूपधात्वर्थघटकीभूतप्रमायामभेदसम्बन्धावच्छिन्नप्रकारतासम्बन्धेन तत्पदार्थस्य सर्वज्ञत्वादिविशिष्टब्रह्मणोऽन्वयः । तादृशप्रमाविषयत्वरूपधात्वर्थान्वितास्त्याताार्थाश्रयत्वस्य त्वंपदार्थे श्वेतकेतुशरीरकपरमात्मन्यन्वय इति ब्रह्मनिष्ठाभेदसम्बन्धावच्छिन्नप्रकारताशालिप्रमाविषयत्वाश्रयः श्वेतकेतुशरीरकपरमात्मेति बोधः ॥ यद्वा स्वप्रतियोगिवृत्तित्वस्वानुयोगिवृत्तित्वोभयसम्बन्धेन भेदविशिष्टान्यधर्म एव असधात्वर्थः, तादृशश्च धर्मः तद्व्यक्तित्वमेव, तद्व्यक्तित्वरूपधात्वर्थे च तत्पदार्थस्य ब्रह्मण आधेयतयाऽन्वयः । शेषं पूर्ववत् ॥ अत्र कल्पे ब्रह्मवृत्तितद्व्यक्तित्वाश्रयत्ववान् श्वेतकेतुशरीरक-

परमात्मा—इति बोधः। एवं च तत्त्वंपदार्थयोः परस्परमभेदान्वयबोधा-भावात् सामानाधिकरण्यं न सम्भवति ॥

न च—अत्र तत्पदार्थस्य धर्मिपारतन्त्र्येण त्वंपदार्थेऽप्यभेदान्वय-बोधाङ्गीकारान्नानुपपत्तिः; प्रथमान्तविशेष्यविशेषणवाचकपदसमभि-व्याहृतासधातुभूधातुसमभिव्याहारस्थले तथा व्युत्पत्तिकल्पनात् घटो नीलो भवतीत्यादावपि सामानाधिकरण्यमिति—वाच्यम्। विशेष्यान्विते धर्मिपारतन्त्र्येण विशेषणान्वयस्य विशिष्टवैशिष्ट्यबोधस्थले स्वीका-रेऽपि विशेष्यानन्विते तदनभ्युपगमात्। प्रकृते तत्पदार्थविशेष्यस्य असधात्वर्थस्य आख्यातार्थेऽन्वयेन त्वंपदार्थे अन्वयविरहात् तत्र तत्पदार्थस्य धर्मिपारतन्त्र्येणान्वयासम्भवात् ॥

तथाऽपि—प्रकृते आख्यातस्य निरर्थकत्वमित्यभिप्रायात् धर्मि-पारतन्त्र्येणान्वयसम्भवात् सामानाधिकरण्यमुपपन्नम्। सिद्धान्ते अर्थापत्त्यधीनभानस्य स्वीकारात् ब्रह्मनिष्ठाभेदसम्बन्धावच्छिन्नप्रकार-ताकप्रमाविषयत्वाश्रयत्वं ब्रह्मवृत्त्यसाधारणधर्माश्रयत्वं वा त्वंपदा-र्थस्य तादात्म्येन ब्रह्मान्वितत्वं विनाऽनुपपन्नमित्यर्थापत्त्या तादात्म्येन ब्रह्मणस्त्वंपदार्थे भानान्नानुपपत्तिः ॥

वस्तुतस्तु—आख्यातस्य निरर्थकत्वे ब्रह्मकृ.तेतद्व्यक्तित्वस्य ब्रह्मा-भेदरूपत्वेन ब्रह्मपदप्रयोज्यविषयतानिरूपितासधातुप्रयोज्यतद्व्यक्ति-त्वरूपतादात्म्यनिष्ठविषयता.निरूपितविषयताप्रयोजकत्वात् त्वंपदस्य तत्पदसामानाधिकरण्यमुपपन्नम्। पूर्वोक्तलक्षणे च विभक्त्यप्रयोज्यत्व-सम्बन्धावच्छिन्नत्वोभयाभावस्थाने विभक्त्यप्रयोज्यत्व-धात्वप्रयोज्य-त्वसम्बन्धावच्छिन्नत्वैतत्त्रितयाभावनिवेशेन प्रकृतेऽप्युक्तलक्षणसम्भ-वात् ॥ एतत्सर्वमभिप्रेत्योक्तं **जिज्ञासाधिकरणश्रीभाष्ये**—

"तत्पदं सर्वज्ञं सत्यसङ्कल्पं जगत्कारणं ब्रह्म परामृशति 'तदैक्षत बहुस्याम्' इत्यादिषु तस्यैव प्रकृतत्वात्। तत्स-

मानाधिकरणं त्वंपदं च अचिद्विशिष्टजीवशरीरकं ब्रह्म प्रतिपादयति ॥" —इति ॥

आनन्दमयाधिकरणभाष्येऽपि—

"तत्त्वमसीति सामानाधिकरण्ये तत्पदं जगत्कारणभूतं सत्यसङ्कल्पं सर्वकल्याणगुणाकरं निरस्तसमस्तहेयगन्धं परमात्मानमाचष्टे । त्वमिति च तमेव सशरीरजीवशरीरकमाचष्ट इति सामानाधिकरण्यं मुख्यवृत्तम् ॥" —इति ॥

सर्वज्ञं—उभयावृत्तिधर्मत्वव्यापकनिरवच्छिन्नविषयताकज्ञानाश्रयं; तेन प्रमेयत्वादिना सर्वविषयकज्ञानाश्रयत्वस्यास्मदादिसाधारण्येऽपि न क्षतिः ॥

यदि च—जीवज्ञाने यादृशी यादृशनिरूप्यनिरूपकभावापन्नविषयता, सा सर्वाऽपि भगवज्ज्ञाने स्वीक्रियते । न च—विशकलिततत्तत्पदार्थज्ञानेनैव ब्रह्मणस्सार्वज्ञ्यनिर्वाहे निरूप्यनिरूपकभावापन्नविषयताकज्ञानाङ्गीकारो व्यर्थ इति—वाच्यम् । तथा सति ब्रह्म भूतलं घटवत्तया जानातीति व्यवहारानुपपत्तिरित्युच्यते ॥ **तदा**—भ्रमान्यवृत्तिविषयितात्वव्यापकस्वनिरूपिताधेयताकज्ञानाश्रयत्वं सर्वज्ञत्वम् । स्वपदं ज्ञानपरमिति बोध्यम् । अव्यवहितपूर्वत्वसम्बन्धेन फलविशिष्टस्वीयसङ्कल्पसामान्यकत्वं- सत्यसङ्कल्पत्वम् ॥

अथ—अस्य स्वर्गो भूयादित्याकारकभगवत्सङ्कल्पस्यैव यागादिजन्यपुण्यरूपत्वेन कीर्तनादिना तस्य नाशाङ्गीकारात् स्वीयसङ्कल्पसामान्यान्तर्गतकीर्तननाश्यसङ्कल्पे उक्तसम्बन्धेन फलविशिष्टत्वाभावादसम्भवः—इति चेन्न ॥ पुण्यपापभिन्नत्वस्य स्वीयसङ्कल्पे निवेशेन सामञ्जस्यात् कल्याणगुणत्वव्याप्यजातित्वव्यापकस्वनिरूपिताधेयतासामानाधिकरण्यकत्वं—सर्वकल्याणगुणाकरत्वम् । सिद्धान्ते अतिरिक्तजात्यस्वीकारेऽपि तावद्विषयकज्ञानस्यैव तत्रतत्र जातिरूपत्वमित्यस्य

जातिवादे स्पष्टत्वात् ॥ तेन जीववृत्तिकल्याणगुणानां ब्रह्मावृत्तित्वेऽपि न क्षतिः । अपृथक्सिद्धिसम्बन्धावच्छिन्नहेयत्वावच्छिन्नप्रतिबध्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नप्रतिबन्धकत्वं–निरस्तसमस्तहेयगन्धत्वम् ॥

अथ–पूर्ववाक्यात् यद्धर्मावच्छिन्ने यद्धर्मावच्छिन्नान्वयबोधः तद्धर्मावच्छिन्नविशिष्टतद्धर्मावच्छिन्नोपस्थापकत्वस्य 'शुक्ला शोभनाक्षी पूर्णश्रृङ्गा घटोध्नी गौस्तामानय' इत्यादौ तच्छब्दे दृष्टत्वेऽपि पूर्ववाक्यजन्यबोधाविषयधर्मावच्छिन्नोपस्थापकत्वं न दृष्टमिति प्रकृते 'तत्तेजोऽसृजत' इत्यनेन पूर्ववाक्येन जगत्कर्तृत्वप्रकारकबोधोदयेन तद्विशिष्टपरामर्शकत्वसम्भवेऽपि सर्वज्ञत्वसत्यसङ्कल्पत्वादिविशिष्टोपस्थापकत्वं तच्छब्दस्य न सम्भवति—**इति चेन्न** । सङ्कल्पाधीनजगत्कर्तृत्वं सत्यसङ्कल्पत्वसर्वज्ञत्वाभ्यां विनाऽनुपपन्नमित्यर्थापत्त्यैव पूर्ववाक्यजन्यबोधे तयोर्ब्रह्मांशे प्रकारतया भानोपपत्तेः। समस्तकल्याणगुणाकरत्वनिरस्तसमस्तहेयगन्धत्वयोरर्थापत्त्या भानं च परब्रह्मविषयकशाब्दसामान्य एव क्लृप्तम् ॥

उक्तं च **न स्थानतोऽपीत्यत्र भाष्ये**—

> "पृथिव्यादिस्थानतोऽपि परस्य ब्रह्मणोऽपुरुषार्थगन्धो न सम्भवति । कुतः ? **उभयलिङ्गं सर्वत्र हि** । यतः, सर्वत्र–श्रुतिस्मृतिषु, परं ब्रह्म, उभयलिङ्गं–उभयलक्षणं, अभिधीयते ; निरस्तनिखिलदोषत्वकल्याणगुणाकरत्वोभयलक्षणोपेतमित्यर्थः ॥" —इति ॥

अयमर्थः । ब्रह्म स्थानप्रयुक्तदोषसामान्याभाववत्, स्वविशेष्यकत्वविशिष्टश्रुतिस्मृतिजन्यबोधत्वव्यापकोभयलिङ्गप्रकारताकत्वात् ; यत् स्वविशेष्यकत्वविशिष्टश्रुत्यादिजन्यबोधत्वव्यापकयद्धर्मप्रकारताकं, तत् तादृशधर्मवदिति सामान्यव्याप्तौ–जीवत्वविशिष्टजीवो दृष्टान्तः ।

तत्र स्वविशेष्यकत्वविशिष्टश्रुत्यादिजन्यबोधत्वव्यापकजीवत्वप्रकारताकत्वस्य जीवत्वविशिष्टत्वस्य च सत्त्वात् ॥

न च—एवमुक्तानुमानेन उभयलिङ्गघटकदोषसामान्याभावसिद्धावपि स्थानप्रयुक्तदोषाभावरूपतद्विशेषाभावासिद्धिरिति—वाच्यम्। सिद्धान्ते विशेषाभावकूटस्यैव सामान्याभावरूपत्वेन तादृशसामान्याभावसिद्धौ तद्घटकविशेषाभावस्यापि सिद्धेः। विशेषाभावसूचनायैव सूत्रे **अपि-शब्दः** ॥ तथा च—श्रुत्यादिजन्यबोधे सर्वत्र क्वचिच्छब्दात् क्वचिदर्थापत्त्या उभयलिङ्गभानमभ्युपगन्तव्यम् ॥

एवं च—उक्ताधिकरणन्यायेन उभयलिङ्गभानस्य सार्वत्रिकत्वात् तदंशे कण्ठोक्तिर्नात्यन्तापेक्षितेत्यभिप्रेत्य **जिज्ञासाधिकरणभाष्ये** उभयलिङ्गानुक्तिरिति—बोध्यम् ॥ तस्मात्तत्त्वमसीत्यस्य पूर्ववाक्यजन्यबोधे अर्थापत्त्या उभयलिङ्गस्य भानात्तत्र तच्छब्देन तद्विशिष्टब्रह्मपरामर्शसम्भवः ॥

उक्तं च—**आनन्दमयाधिकरणटीकायाम्**—

"तदैक्षत तदसृजतेति यथासङ्कल्पं सृष्टिश्रवणेन सत्यसङ्कल्पत्वादिगुणानामनिरोहितत्वावगमात् तिरोधायकहेयसम्बन्धानर्हत्वमर्थसिद्धमित्यभिप्रायेण निरस्तनिखिलदोषत्वमुक्तम्। जगद्व्यापारोपयिकगुणान्तराणामन्यत्र कण्ठोक्तानां सद्विद्यायां गतिसामान्यन्यायादर्थसिद्धत्वमित्यभिप्रेत्योक्तम्—**अनवधिकेति** ॥" —इति ॥

तथा च—अनिरोहितसत्यसङ्कल्पत्वं तिरोधायकहेयानर्हत्वं विनाऽनुपपन्नमित्यर्थापत्त्या, निरस्तनिखिलदोषत्वस्य कारणतावच्छेदकीभूतब्रह्मत्वघटकगुणकृतब्रह्मत्वरूपानन्तगुणवत्त्वं विना जगत्कारणत्वमनुपपन्नमित्यर्थापत्त्या च, कल्याणगुणाकरत्वस्य पूर्ववाक्यजन्यबोधे भानात् एतद्वाक्यघटकतच्छब्देन तद्विशिष्टपरामर्शसम्भवतीति—भावः ॥

आनन्दमयाधिकरणभाष्ये—परमात्मानमित्यत्र परमशब्देन सर्वज्ञत्वाभिधानान्न न्यूनता । ततश्च तत्त्वमसीत्यत्र सर्वज्ञत्वादिविशिष्टतत्पदार्थभेदस्य त्वंपदार्थे श्वेतकेतुशरीरकपरमात्मनि बोधादुदाहृतभाष्यद्वयसिद्धं तत्त्वंपदयोस्सामानाधिकरण्यं निष्प्रत्यूहम् ॥

अत्र च त्वंपदार्थमुख्यविशेष्यकबोधाङ्गीकारान्न मध्यमपुरुषानुपपत्तिः; 'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः' इत्यनुशासनेन युष्मच्छब्दाप्रयोज्यत्वपदप्रयोज्यत्वोभयाभाववद्युष्मदर्थनिष्ठमुख्यविशेष्यताविशिष्टप्रकारताप्रयोजकधातूत्तरं मध्यमपुरुषस्वीकारात् । वैशिष्ट्यं च स्वनिरूपितत्वस्वनिरूपितविषयतानिरूपितत्वान्यतरसम्बन्धेन । 'चैत्र त्वं पचसि' इत्यादौ युष्मच्छब्दाप्रयोज्यत्वाभावेन उक्तोभयाभाववती या त्वंपदार्थनिष्ठमुख्यविशेष्यता स्वनिरूपिताख्यातार्थकृतिनिष्ठप्रकारतानिरूपितत्वसम्बन्धेन, तद्विशिष्टविषयता पाकनिष्ठा; तत्प्रयोजकपचिधातूत्तरं मध्यमपुरुषोपपत्तिः । यत्र—चैत्र सुन्दरोऽसीत्यादौ युष्मच्छब्दाप्रयोगस्थले अर्थापत्त्या त्वंपदार्थस्य भानं, तत्र त्वंपदार्थनिष्ठविशेष्यताया अर्थापत्तिप्रयोज्यत्वेन पदप्रयोज्यत्वाभावेन उभयाभाववत्तया तादृशमुख्यविशेष्यताविशिष्टप्रकारताप्रयोजकासधातूत्तरं मध्यमोपपत्तिः । एतत्स्थलसङ्ग्रहार्थमेव त्वंपदार्थनिष्ठमुख्यविशेष्यतायां युष्मच्छब्दप्रयोज्यत्वमनिवेश्य उभयाभावनिवेशः । एतत्स्थलसङ्ग्रहायैव सूत्रे **स्थानिनीति** प्रयुक्तम् । ज्ञाधातूत्तराख्यातस्य निरर्थकतामते ज्ञाधातूत्तरं मध्यमनिर्वाहाय सम्बन्धमध्ये स्वनिरूपितत्वनिवेशः । ततश्च तत्त्वमसीत्यत्र आख्यातस्य निरर्थकत्वेऽपि मध्यमपुरुषोपपत्तिः ॥

अथ—यत्र तण्डुलं पचतीत्युक्तनर्थापत्त्या च देवदत्तादिरूपकर्तृलाभः, तत्र देवदत्तनिष्ठविषयतायाः पदप्रयोज्यत्वाभावेन उभयाभाववत्तया तादृशमुख्यविशेष्यताविशिष्टप्रकारताप्रयोजक-

त्वात् पचिधातोस्तदुत्तरं मध्यमपुरुषवारणाय प्रकृतवाक्यजन्यबोधाश्रयत्वेन इच्छाविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नत्वस्य मुख्यविशेष्यतायां निवेशावश्यकतया तत्त्वमसीत्यादौ मध्यमपुरुषानुपपत्तिः; श्वेतकेतुशरीरकपरमात्मत्वावच्छिन्नमुख्यविशेष्यतायास्सम्बोध्यतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नत्वाभावात्, श्वेतकेतुशरीरावच्छिन्नजीवत्वस्य निरुक्तसम्बोध्यतावच्छेदकत्वेऽपि तच्छरीरकपरमात्मत्वस्य तथात्वाभावात्, वक्तुरुद्दालकस्य सर्वज्ञं परमात्मानं प्रति बुबोधयिषाविरहात्। भगवान्स्वयमेव तद्ब्रवीत्विति प्रष्टारं श्वेतकेतुं प्रत्येव बुबोधयिषोत्पत्तेः श्वेतकेतुशरीरकपरमात्मन एव प्रष्टृत्वे प्रश्नं प्रति जिज्ञासायास्तां प्रति च अज्ञानस्य कारणतया परमात्मनोऽज्ञत्वमवर्जनीयं स्यात् । अतः पुत्रस्यैव प्रष्टृत्वात्तादृशप्रश्नोत्तररूपेण तत्त्वमसीत्यादिवाक्येन सम्बोध्यत्वं तस्यैव युक्तमिति तच्छरीरकपरमात्मत्वस्य सम्बोध्यतावच्छेदकत्वाभावेन तदवच्छिन्नमुख्यविशेष्यतामादाय मध्यमपुरुषोपपादनं न सम्भवति ॥

न च—तादृशधर्मावच्छिन्नत्वस्य मुख्यविशेष्यतायां निवेशे तत्रोभयाभावनिवेशनवैयर्थ्यमिति- वाच्यम् । भवच्छब्दप्रयोगस्थले मध्यमवारणाय तदावश्यकत्वात् ॥ न च—अवच्छेदककोटिप्रविष्टानामवच्छेदकत्वकल्पे श्वेतकेतुशरीरकपरमात्मत्वावच्छिन्नमुख्यविशेष्यतायां सम्बोध्यतावच्छेदकत्वोपलक्षितश्वेतकेतुत्वावच्छिन्नत्वस्यापि सत्त्वेन मध्यमोपपत्तिरिति—वाच्यम् । तण्डुलं पचतीत्यादौ यत्र त्वत्पुत्रादिरूपार्थस्य अर्थापत्त्या भानं, तत्र त्वत्पुत्रत्वावच्छिन्नमुख्यविशेष्यतायां सम्बोध्यतावच्छेदकधर्मावच्छिन्नत्वस्योक्तोभयाभावस्य च सत्त्वेन तमादाय मध्यमपुरुषापत्तिवारणाय सम्बोध्यतावच्छेदकत्वोपलक्षितधर्मनिष्ठसाक्षात्सम्बन्धावच्छिन्नावच्छेदकताकत्वस्य मुख्यविशेष्यतायां निवेश्यतया तत्त्वमसीत्यत्रानुपपत्तेर्दुर्वारत्वात् ॥

मैवम् ॥ युष्मदर्थतावच्छेदकधर्मावच्छिन्नत्वस्य मुख्यविशेष्यतायां निवेशेन तण्डुलं पचतीत्यादौ देवदत्तादेरर्थापत्त्या भानस्थले मध्यमापत्तेः तत्त्वमसीत्यादौ तदनुपपत्तेश्च वारणात्, युष्मत्पदस्य सम्बोध्यतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने निरूढलक्षणायाः तच्छरीरकपरमात्मत्वावच्छिन्ने शक्तेश्च स्वीकारेण तच्छरीरकपरमात्मत्वस्यापि युष्मदर्थतावच्छेदकत्वात् । अत्र विशेष्यतायां मुख्यत्वनिवेशात् त्वं वा अहमस्मीत्यादौ न मध्यमापत्तिः ; तत्र युष्मदर्थस्याधेयतासम्बन्धेन असधात्वर्थासाधारणधर्मे प्रकारत्वेऽपि मुख्यविशेष्यताविरहात् ॥

यद्वा—युष्मच्छब्देतरपदाप्रयोज्ययुष्मदर्थतावच्छेदकावच्छिन्नमुख्यविशेष्यताविशिष्टप्रकारताप्रयोजकधातूत्तरं मध्यम इति युष्मद्युपपद इत्याद्यनुशासनार्थः । शेषं पूर्ववत् ॥

एवमेव—'अहं मनुरभवम्', 'अहं ब्रह्मास्मि'—इत्यादौ अहं पदस्य स्वशरीरकपरमात्मपरत्वेऽपि उत्तमपुरुषोपपत्तिः । अस्मद्युत्तम इत्यनुशासनानुरोधेन अस्मच्छब्दाप्रयोज्यत्वपदप्रयोज्यत्वोभयाभाववती अस्मदर्थतावच्छेदकावच्छिन्नमुख्यविशेष्यताविशिष्टा अस्मच्छब्देतरपदाप्रयोज्यास्मदर्थतावच्छेदकावच्छिन्नमुख्यविशेष्यताविशिष्टा वा या प्रकारता तत्प्रयोजकधातूत्तरं उत्तमपुरुष इत्यभ्युपगमात् ॥

एवं च—अस्मच्छब्दप्रयोगे तदप्रयोगे च उत्तमपुरुषोपपत्तिः । मुख्यविशेष्यतायां अस्मदर्थतावच्छेदकावच्छिन्नत्वस्य निवेशात् पचतीत्यादौ अर्थापत्त्या देवदत्तादिरूपकर्त्रभानस्थले नोत्तमपुरुषप्रसङ्गः। अस्मदर्थतावच्छेदकं च स्वतन्त्रवक्तृतावच्छेदकत्वोपलक्षितधर्मः, तदवच्छिन्नशरीरकत्वं च । ततश्च—अहं मनुरभवमित्यादौ अहंपदस्य तच्छरीरकपरमात्मपरत्वे नानुपपत्तिः । 'रामो द्विर्नाभिभाषते'—इत्यादौ रामत्वावच्छिन्नमुख्यविशेष्यतायाः स्वतन्त्रवक्तृतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नत्वेऽपि तस्यामस्मच्छब्दाप्रयोज्यत्वपदप्रयोज्यत्वो

भयाभावस्य अस्मच्छब्दातिरिक्तपदाप्रयोज्यत्वस्य वा असत्त्वात् न तत्रोत्तमापत्तिः । तथा च–उक्तरीत्या शरीरशरीरिभावनिबन्धनं सामानाधिकरण्यं मुख्यवृत्तमेव ॥ —इति ॥

अत्र केचित्—

तत्पदप्रयोज्यविषयताविशिष्टविषयताप्रयोजकत्वमेव तेन समं सामानाधिकरण्यम् । वैशिष्ट्यं च–स्वानवच्छेदकधर्मावच्छिन्नत्वस्वनिरूपिततादात्म्यापृथक्सिद्ध्यन्यतरनिष्ठविषयतानिरूपितत्वोभयसम्बन्धेन । नीलमुत्पलं, इयं गौः—इत्यादौ नीलगवादिपदानां गुणजातिमात्रपरत्वेऽपि उत्पलत्वेदन्त्वाद्यवच्छिन्ने नीलरूपगोत्वादीनामपृथक्सिद्धिसम्बन्धेनान्वयात् सामानाधिकरण्यमुपपन्नम् ॥ एवं च–सर्वं खल्विदं ब्रह्मेत्यादौ सर्वपदस्य सर्वत्वावच्छिन्नमात्रपरत्वेऽपि न सामानाधिकरण्यानुपपत्तिः, ब्रह्मणस्सर्वस्मिन्नपृथक्सिद्धिसम्बन्धेनान्वयसम्भवात् । अभेदापृथक्सिद्ध्यन्यतरसम्बन्धावच्छिन्नप्रकारताशालिबोधं प्रति समानविभक्तिकत्वादिज्ञानस्य हेतुत्वात् सर्वस्मिन् ब्रह्मणस्तादात्म्येनान्वयबोधस्य योग्यताज्ञानाभावेन असम्भवेऽप्यपृथक्सिद्धिसम्बन्धेन तदन्वयबोधे बाधकविरहात् । ब्रह्मजन्यत्वविशिष्टद्रव्यत्वब्रह्माधीनलयप्रतियोगित्वविशिष्टद्रव्यत्वब्रह्माधीनस्थितिकत्वविशिष्टद्रव्यत्वानां ब्रह्मनिष्ठापृथक्सिद्धिसम्बन्धावच्छिन्नव्यापकतानिरूपितव्याप्यताश्रयत्वात् तज्जलानिति हेतूपपत्तिः । तज्जलानित्यस्य ब्रह्मोपादेयत्वादिपरतामनङ्गीकृत्य ब्रह्मजन्यतादिसामान्यपरत्वेऽपि न क्षतिः । घटादावपृथक्सिद्धिसम्बन्धेन ब्रह्मणस्सत्त्वात् घटादिरूपे व्यभिचारवारणाय हेतौ द्रव्यत्वनिवेशः । एवं तत्त्वमसीत्यत्र त्वंपदस्य श्वेतकेतुमात्रपरत्वेऽपि नानुपपत्तिः । धात्वर्थे अपृथक्सिद्धिरूपसम्बन्धे तत्पदार्थस्य ब्रह्मणो निरूपितत्वसम्बन्धेन धात्वर्थस्य चाश्रयतया त्वंपदार्थेऽन्वयाङ्गीकारेण ब्रह्म-

निरूपितापृथक्सिद्धिसम्बन्धाश्रयस्त्वमिति बोधात्। उक्तरीत्यैव 'अहं ब्रह्मास्मि' इत्यादौ अहम्पदस्य परमात्मपर्यन्तत्वाभावेऽपि बोध ऊह्यः। अहं मनुरभवमित्यादौ—मनुपदं मनुशरीरकपरं, अहंपदं च यथाश्रुतार्थकमेव। पूर्वमते च सर्वं खल्विदं ब्रह्मेत्यत्र सर्वपदस्य सर्वशरीरकपरमात्मपरत्वे तदेकदेशे सर्वस्मिन्निदम्पदार्थस्यान्वयोऽङ्गीकार्यः; स चायुक्तः। संयोगावच्छिन्नक्रियारूपगमनपदार्थैकदेशसंयोगे गुणाभेदान्वयतात्पर्येण गमनं गुण इत्यादिप्रयोगवारणाय विशेष्यतासम्बन्धेन अभेदसम्बन्धावच्छिन्नप्रकारताशालिशाब्दबोधं प्रति मुख्यविशेष्यतासम्बन्धेन पदजन्यपदार्थोपस्थितेर्हेतुत्वस्य वाच्यतया प्रकृते उक्तकारणाभावेन एकदेशान्वयासम्भवात्। एवं तत्त्वमसीत्यत्र त्वंपदस्य श्वेतकेतुशरीरकपरमात्मपरत्वे सम्बोधनस्थलसिद्धस्य सम्बोधनान्तयुष्मच्छब्दयोस्सामानाधिकरण्यनियमस्य भङ्गापत्तेः॥

न च—चैत्र त्वत्पितेत्यादौ युष्मच्छब्दस्य सम्बन्धिलाक्षणिकत्वात् तत्र व्यभिचारात्तादृशनियम एवासिद्ध इति—वाच्यम्। समासस्थले तादृशनियमाभावेऽपि व्यासस्थले तादृशनियमे बाधकविरहात्। तत्र सम्बोध्यवाचकश्वेतकेतुपदस्यापि तच्छरीरकपरमात्मपरत्वे प्रकृतवाक्यजन्यशाब्दबोधाश्रयत्वेन इच्छाविषयत्वरूपविभक्त्यर्थस्य प्रकृत्यर्थे तादृशपरमात्मनि अन्वयो न सम्भवति। वक्तुरुद्दालकस्य सर्वज्ञं परमात्मानं प्रति बुबोधयिषाविरहात्। भगवांस्त्वेवमेतद्ब्रवीत्विति प्रष्टारं श्वेतकेतुं प्रत्येव बुबोधयिषोत्पत्तेः परमात्मन एव प्रष्टृत्वे तदज्ञानमवर्जनीयम्॥ अतः पुत्रस्यैव प्रष्टृत्वात् तं प्रति प्रवृत्ते उपदेशे श्वेतकेतुभिन्नस्य परमात्मनः सम्बोध्यत्वं त्वंपदार्थत्वं चेत्युपहास्यम्॥

न च—श्वेतकेतुपदस्य परमात्मपर्यन्तत्वेऽपि तदेकदेशश्वेतकेतौ निरुक्तविभक्त्यर्थान्वयोपगमात् नानुपपत्तिरिति—वाच्यम्; विभक्त्यर्थस्य

सम्बोध्यत्वस्य प्रकृत्यर्थैकदेशेऽन्वयासम्भवात् । अन्यथा—पुत्रीं प्रति 'त्वत्पतिस्सुन्दरः' इति वक्तव्ये 'जामातस्त्वं सुन्दरोऽसि' इति वाक्यप्रयोगापत्तिः ; पुत्रीपतिरूपजामातृपदार्थैकदेशपुत्र्यां सम्बोध्यत्वान्वयसम्भवात्। एवं—'द्यावापृथिव्यौ च नारायणः', 'ज्योतींपि विष्णुर्भुवनानि विष्णुः'—इत्यादौ विभक्त्यर्थद्वित्वबहुत्वादीनामेकदेशान्वयोऽपि न युक्तः। पाकानां द्विबहुत्वे पक्तुरेकत्वेऽपि 'पचन्तौ पश्य' 'पचमानान्पश्य' इत्यादिप्रयोगवारणाय विभक्त्यर्थसङ्ख्याप्रकारकान्वयबोधे पदजन्योपस्थितेर्मुख्यविशेष्यतासम्बन्धेन हेतुत्वावश्यकत्वात्, "पदानां तत्तच्छरीरंकत्वावच्छिन्ने वृत्तिर्ह्यपर्यवसानवृत्तिः" इति भाष्यादौ व्यक्तम्। सा च रूढ्यपेक्षया जघन्या योगतुल्या चेति साक्षादप्यविरोधं जैमिनिरित्यत्र टीकायामुक्तम् ॥

अतश्च रूढ्यर्थस्य बाधस्थल एव यौगिकार्थस्यापर्यवसानवृत्तिगम्यार्थस्य वा स्वीकार उचितः । **आकाशस्तल्लिङ्गादित्याधिकरणे** रूढ्यर्थस्य बाधात्, आ-समन्तात्, काशते-प्रकाशते—इति योगवृत्त्या ब्रह्मपरत्वं, **अजामन्त्रेऽपि** न जायत इत्यजेति योगेन प्रकृतिपरत्वं, **जगद्वाचित्वादित्यधिकरणे** यस्य चैतत्कर्मेति कर्मशब्दस्य क्रियतइति कर्मेति योगवृत्त्या कार्यसामान्यपरत्वञ्चाङ्गीकृतम्। न हि रूढ्यर्थस्याबाधे योगाङ्गीकारः तत्तुल्यापर्यवसानवृत्त्यङ्गीकारो वा युक्तः । तस्मात्—सर्वं खल्विदं ब्रह्म, तत्त्वमसीत्यादौ उक्तरीत्या रूढ्यर्थस्याबाधात् उक्तार्थ एव युक्तः । भाष्येऽपि—तत्त्वमसीत्यत्र त्वंपदस्य परमात्मपरतामङ्गीकृत्य प्रथमं निर्वाहमुक्त्वा, तत्कल्पे उक्तानुपपत्तिं प्रतिसन्धाय अस्मदुक्तार्थ एव निर्भरमङ्गीकृत्य निगमनं कृतम् ॥

तथा च जिज्ञासाधिकरणभाष्यम्—

"ऐतदात्म्यमिदं सर्वमिति प्रतिज्ञातार्थस्य तत्त्वमसीति सामानाधिकरण्येन विशेषे उपसंहारः ॥" —इति ॥

अयमर्थः ॥ तद्वाक्यार्थस्य विशेषे उपसंहारो हि नाम—तद्वाक्यजन्य-बोधविशेष्यतावच्छेदकव्याप्यधर्मावच्छिन्ने तादृशविशेष्यतानिरूपित-प्रकारतावच्छेदकावच्छिन्नप्रकारताशालिबोधजनकं वाक्यम् । यथा—पर्वतो वह्निमानिति प्रतिज्ञातार्थस्य नीलपर्वतो वह्निमानिति विशेषे उपसंहारः । तत्र हि—पर्वतत्वरूपविशेष्यतावच्छेदकव्याप्यनीलपर्वत-त्वावच्छिन्ने तद्वाक्यजन्यबोधप्रकारतावच्छेदकीभूतवह्निसम्बन्धित्वा-वच्छिन्नप्रकारताकबोधजनकत्वमस्ति ॥

एवं—प्रकृते सर्वत्वव्याप्यश्वेतकेतुत्वावच्छिन्ने ऐतदात्म्यमिदं सर्वमिति वाक्यजन्यबोधप्रकारतावच्छेदकीभूतब्रह्मापृथक्सिद्धित्वावच्छिन्नप्रकार-ताकबोधजनकत्वमादायैव तत्त्वमसीत्यस्य उपसंहाररूपता वर्णनीये-ति अस्मदुक्तार्थ एव उदाहृतभाष्यतात्पर्यमवसीयते । तत्त्वंपदस्य परमात्मपर्यन्तत्वे च निरुक्तोपसंहाररूपता न युज्यत एव ॥

यद्यपि—ऐतदात्म्यमिदं सर्वमित्यत्र सर्वत्वावच्छिन्ने ऐतदात्म्य-पदार्थस्य ब्रह्मशरीरत्वावच्छिन्नस्य अभेदेनान्वयात् तत्त्वमसीत्यत्र श्वेतकेतुत्वरूपव्याप्यधर्मावच्छिन्ने ब्रह्मशरीरत्वावच्छिन्नस्य अभेदान्वय-विरहात् नोपसंहाररूपता सङ्गच्छते ॥ **तथाऽपि**—तद्धर्मावच्छिन्नस्या-भेदान्वयस्थले तद्धर्मस्याप्याश्रयतासम्बन्धेनान्वयस्य धर्मिपारतन्त्र्येणा-न्वयबोधाङ्गीकारात् अपृथक्सिद्ध्याश्रयत्वरूपशरीरत्वावच्छिन्नस्य सर्वपदार्थेऽभेदान्वये अपृथक्सिद्धेरपि सर्वस्मिन्प्रकारत्वमावश्यकमिति तदादाय उपसंहाररूपतासङ्गतिः ॥   —**इत्याहुः** ॥

अत्र वदन्ति—समानविभक्तिकविशेष्यविशेषणवाचकपदसमभि-व्याहारस्थलेऽपि अपृथक्सिद्धिसम्बन्धेन बोधाङ्गीकारे 'आयुर्घृतं', 'अग्निर्माणवकः'—इत्यादौ कारणत्वसादृश्यादिसम्बन्धेन अन्वयबोधा-ङ्गीकारसम्भवात् तत्र सर्वत्र लक्षणाप्रतिपादनं ग्रन्थकृतां विरुध्यते ।

ननु च–तादृशसमभिव्याहारस्थले कारणत्वादेस्संसर्गता न सम्भवति, तादात्म्यातिरिक्तत्वात्—इति चेत्। तादात्म्यातिरिक्तत्वाविशेषात् अपृथक्सिद्धेरपि तत्स्थले संसर्गता न सम्भवतीति तुल्यम्। एवमुक्तस्थले अपृथक्सिद्धिसम्बन्धेनान्वयबोधाङ्गीकारे आनन्दमयाधिकरणभाष्यविरोधः॥ तत्र हि इत्थं **भाष्यम्**—

"यत्तूक्तं–उपात्तद्रव्यकवाक्यस्थगुणशब्दः केवलगुणाभिधायीति, अरुणयेतिपदेन केवलगुणस्यैवाभिधानम्–इति; तन्नोपपद्यते। लोकवेदयोर्द्रव्यवाचिपदसमानाधिकरणस्य गुणवाचिनः क्वचिदपि केवलगुणाभिधानादर्शनात् उपात्तद्रव्यकवाक्यस्थं गुणपदं केवलगुणाभिधायीत्यप्यसङ्गतम्। पटश्शुक्ल इत्यादिषु उपात्तद्रव्यकेषु शुक्लविशिष्टस्यैवाभिधानात् पटस्य शुक्ल इत्यत्र शौक्ल्यविशिष्टपटाप्रतिपत्तिरसमानविभक्तिनिर्देशकृता, न पुनरुपात्तद्रव्यकत्वकृता। तत्रैव पटस्य शुक्लो भाग इत्यादिसमानविभक्तिनिर्देशे शौक्ल्यविशिष्टद्रव्यं प्रतीयते॥"

—इति॥

मीमांसकास्तावद्वदन्ति—

'अरुणयैकहायन्या पिङ्गाक्ष्या सोमं क्रीणाति'–इत्यत्र अरुणपदं गुणमात्रपरं; अरुणादिशब्दानां गुण एव शक्तेः, गुणिनि लक्षणायाश्च स्वीकारात्। तादृशारुण्यस्य च क्रयभावनायां करणत्वेनान्वयः, तस्यापि द्रव्यघटितपरम्परया कारणत्वसम्भवात्। अभेदबोधस्तु पार्ष्ठिकः, न तु शाब्दः; गुणवाचिपदप्रयोज्यगुणाश्रयनिष्ठाभेदसम्बन्धावच्छिन्नप्रकारताशालिबोधं प्रति गुणवाचिपदधर्मिकद्रव्यवाचिपदसमभिव्याहारज्ञानप्रतिबन्धकताया आवश्यकत्वात्। अन्यथा 'घटस्य शुक्लः', 'पटस्यारुणः', 'यदग्ने रोहितं रूपम्' इत्यादौ गुणाश्रयाभेदबोधापत्तेः॥"

—इति॥

तन्मतं दूषयितुमुपन्यस्यति—**यत्तूक्तमिति** ॥ उपात्तद्रव्यक-वाक्यस्थगुणशब्दः--गुणवाचिपदधर्मिकद्रव्यवाचिपदसमभिव्याहारज्ञानं, केवलगुणाभिधायि--गुणवाचिपदप्रयोज्यगुणाश्रयनिष्ठभेदसम्बन्धावच्छिन्नविषयताशालिबोधप्रतिबन्धकः—इत्यर्थः ॥ तथा च द्रव्यघटित-परम्परासम्बन्धेन गुणस्यैव क्रयभावनां प्रति कारणत्वं तृतीयया प्रतीयते—इति भावः । 'रक्तः पटः', 'शुक्ला गौः', इत्यादौ द्रव्य-वाचिपदसमभिव्याहारज्ञाने सत्यपि गुणाश्रयाभेदबोधोदयेन गुणवाचि-पदधर्मिकद्रव्यवाचिपदसमानविभक्तिकत्वज्ञानाभावविशिष्टतत्पदधर्मि-कद्रव्यवाचिपदसमभिव्याहारज्ञानस्य निरुक्ताभेदबोधं प्रति प्रतिबन्ध-कत्वं स्वीकरणीयम् । तथा च—प्रकृते उक्तसमभिव्याहारज्ञाने सत्यपि द्रव्यवाचिपदसमानविभक्तिकत्वज्ञानाभावरूपविशेषणाभावेन विशिष्ट-तादृशप्रतिबन्धकाभावसत्त्वात् गुणाश्रयाभेदबोधो निष्प्रत्यूह इत्यभि-प्रायेण तन्मतं दूषयति—**तन्नोपपद्यत** इति ॥

एतावता परोक्तप्रतिबध्यप्रतिबन्धकभावमभ्युपगम्य अरुणयेत्यादौ गुणाश्रयाभेदबोध उपपादितः ॥ इदानीं तदुक्तप्रतिबन्धकतामेव खण्डयति—उपात्तद्रव्यकवाक्यस्थगुणपदं केवलगुणाभिधायीत्यप्यस-ङ्गतमिति ॥ पटस्य शुक्ल इत्यादौ अभेदान्वयबोधवारणाय द्रव्यवाचि-पदसमभिव्याहारज्ञानस्य प्रतिबन्धकतां स्वीकृत्य पटश्शुक्ल इत्यादौ तदु-पपत्तये च उक्तसमानविभक्तिकत्वज्ञानस्य तत्रोत्तेजकत्वकल्पनापेक्षया गुणाश्रयाभेदबोधे उक्तसमानविभक्तिकज्ञानस्य हेतुतां स्वीकृत्य तादृश कारणाभावादेव पटस्य शुक्ल इत्यादौ अभेदान्वयबोधवारणं युक्तम् ॥ एवञ्च—'गुणे शुक्लादयः पुंसि' इत्यनुशासनानुरोधेन अरुणादिशब्दस्य गुणे तदाश्रये च शक्तेरावश्यकतया प्रकृते गुणाश्रयाभेदबोधेन न किञ्चिद्बाधकं, तद्धेतुभूतस्य समानविभक्तिकत्वज्ञानस्य सत्त्वात्—इति भावः । तथा च—समानाधिकरणवाक्यस्थले यद्यप्यपृथ-

क्सिद्धिसम्बन्धेनान्वयबोधो भाष्यकृदभिमतः, तदा अरुणयेत्यादौ सामानाधिकरण्यनिर्वाहाय अरुणादिपदस्य गुणिपरत्वोपपादनमसङ्गतं स्यात् । एवं समानाधिकरणवाक्यस्थले अपृथक्सिद्धिसम्बन्धेन अन्वयबोधाङ्गीकारे सत्यज्ञानादिवाक्यस्थले ज्ञानपदार्थस्य अचेतन-गतस्थूलावस्थाचेतनगतज्ञानानन्त्यरूपज्ञानबृहत्त्वैतदुभयहेतुभूतसङ्कल्प वत्त्वरूपबृंहणत्वघटकसङ्कल्पे अभेदान्वयमङ्गीकृत्य ज्ञानपदस्य तदाश्रयपरत्वोपपादनं टीकाकृतां विरुध्यते ॥

ननु–उक्तरीत्या भाष्यकारादीनामपृथक्सिद्धिसम्बन्धेनान्वयबोधे तात्पर्यविरहेऽपि तैर्लाघवात् तथा निर्वाहः किमर्थं न कृतः–**इति चेन्न** ॥ सर्वादिपदस्य सर्वशरीरके लक्षणाग्रहदशायां सर्वं बुध्वेति वाक्यात् सर्वशरीरकाभेदान्वयबोधस्य अपृथक्सिद्धिसंसर्गतावादिनाऽपि आवश्यकतया तादृशबोधे तथाविधसमभिव्याहारज्ञानयोग्यताज्ञानादी-नां हेतुत्वस्य क्लृप्तत्वेन गौरवाभावात् सर्वपदस्य सर्वशरीरकत्वाव-च्छिन्ने शक्तिवादिभिरपृथक्सिद्धिसंसर्गकबोधस्य क्वाप्यनङ्गीकारेण तादृश बोधं प्रति उक्तसमभिव्याहारज्ञानादिहेतुत्वस्य एतन्मता-सिद्धस्यैव संसर्गतामते कल्पनीयत्वेन गौरवात् ॥

यत्तूक्तं–अभेदसम्बन्धावच्छिन्नप्रकारताशालिबोधहेतुभूतायाः पद-जन्योपस्थितेः मुख्यविशेष्यतासम्बन्धेन अभावात् इदंसर्वमित्यत्र सर्व-पदार्थसर्वशरीरकैकदेश सर्वस्मिन् इदंपदार्थस्यान्वयो न सम्भवति–इति ॥ **तन्न** । विशेष्यतायां मुख्यत्वस्य शरीरत्वनिष्ठविशेष्यत्वा-निरूपितप्रकारताऽन्यत्वरूपत्वेनोक्तस्थले सर्वनिष्ठशरीरतानिरूपकत्व-रूपसर्वपदार्थघटकसर्वनिष्ठप्रकारतायाः शरीरत्वनिष्ठविशेष्यतानिरूपि-तत्वेन तदनिरूपितप्रकारताभेदसत्त्वात् उक्तकारणसंवृत्तेः ॥

एवञ्च–'द्यावापृथिव्यौ च नारायणः', 'ज्योतींषि विष्णुः'–इत्यादौ विभक्त्यर्थद्वित्वबहुत्वादीनामपि एकदेशान्वयोपपत्तिः, तत्रापि कारण-तावच्छेदकसम्बन्धघटकमुख्यत्वस्य निरुक्तरूपत्वात् ॥

यदपि—तत्त्वमसीत्यत्र त्वंपदस्य श्वेतकेतुशरीरकपरमात्मपरत्वे सम्बोधनस्थलसिद्धस्य सम्बोधनान्तपदयुष्मच्छब्दयोः समानार्थकत्व-नियमस्य भङ्गप्रसङ्गः—इति ॥ **तदपि न**—पदानां तत्तच्छरीरकत्वा-वच्छिन्ने वृत्तिश्च रूढिशक्तिरेवेति तस्य रूढ्यपेक्षया दौर्बल्यं योगतुल्य-त्वञ्चासिद्धमेव । **साक्षादप्यविरोधम्**इत्यत्र टीकायां तु परमात्मनि शक्तेर्योगतुल्यत्वाभिधानस्य पूर्वपक्षघटकत्वेन तत्र टीकाकृतां न निर्भर इति विदितमेव विदुषाम् ॥

ननु—योगापेक्षया अपर्यवसानवृत्तेः प्राबल्ये आकाशाद्यधिकरणे योगार्थाङ्गीकरणमयुक्तम्—इति **चेन्न** । तच्छरीरकतया निर्देश्यर्थेन भाष्ये योगप्रदर्शनात् ॥ अत एव टीकायां अपर्यवसानवृत्तिरप्युप-लक्षिता ॥

ननु—एवं छन्दोऽभिधानादित्यत्रापि तच्छरीरकपरमात्मपरत्वेन मुख्यत्वसम्भवात् गौणपरत्वाश्रयणं व्यर्थम्—इति **चेन्न** । 'चतुष्पदा षड्विधा' इति चतुष्पात्त्वषाड्विध्यकीर्तनावैयर्थ्याय तत्सादृश्येन गौण-वृत्तेरेव तत्राश्रयणादिति दिक् ॥

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

— —

इति
श्रीशेषार्यवंशमुक्ताफलस्य श्रीयादवाद्रिनिवासरसिकस्य
श्रीमदनन्तार्यवर्यस्य कृतिषु
गुरुसामानाधिकरण्यवादः
समाप्तः ।
॥ श्रीः ॥

॥ श्रीः ॥

शरीरवादः

श्रीमन्महीशूरमहाराजाधिराजमहास्थानसभाभूषणैः

शेषार्यवंशमुक्ताफलैः श्रीयादवाद्रिनिवासरसिकैः

पण्डितमण्डलीसार्वभौमैः

श्री ॥ उ ॥ म. अ. अनन्तार्यवर्यैः

विरचितः ।

श्रीयादवाद्रिनिवासि-

पण्डितवर्य-श्री ॥ उ ॥ स्था. कुप्पनैयङ्गार्यविरचितया

श्रीकाञ्चीपुरवासि-

विद्वद्वरेण्य—श्री ॥ उ ॥ ति. अ. कु. श्रीनिवासार्यसंशोधितया

तात्पर्यदीपिकाख्यया टिप्पण्या

समेतः ।

म. अ. अनन्तार्येण

प्र. भ. तो. नरसिंहार्येण च

कल्याणपुर-विचारदर्पण-मुद्राक्षरशालायामङ्कयित्वा

प्राकाश्यं नीतः ॥

१८९८.

मूल्यं रू ०—५—०

श्रीः

शरीरवादः

श्रीकान्तकान्तपदपङ्कजसौरभश्री-
पारीणचित्तनिभषट्चरणः प्रवीणः ।
श्रीलक्ष्मणार्यमभिवन्द्य शरीरवादं
सारार्थसङ्गतमनन्तसुधीर्विधत्ते ॥

इह तावच्छरीरशब्दप्रवृत्तिनिमित्तं विचार्यते ॥

शरीरपदप्रवृत्तिनिमित्तभूतं शरीरत्वं हि न तावज्जातिः, तत्साधक-प्रमाणाभावात् ॥

न च—इदं शरीरमिदं शरीरमित्यनुगतप्रतीतिरेव तत्साधिका, अनुगतप्रतीतेर्बाधकविरहे जातिसाधकत्वात्—इति वाच्यम् । सिद्धान्ते अनुगतप्रतीतेः संस्थानविषयकत्वेन तदतिरिक्तजातिसाधकत्वा-सम्भवात् ॥

न च—संस्थानस्यावयवसंयोगादिरूपत्वेन प्रतिव्यक्तिभिन्नत्वात्कथ-मनुगतप्रतीतिविषयत्वमिति—वाच्यम् । नैयायिकादिमते सुवर्णरजत-ताम्रमृद्घटादिभेदेन भिन्नस्य घटत्वस्य घटोऽयं घटोऽयमित्याद्यनुगत-प्रतीतिविषयत्ववत्संस्थानस्यापि तदुपपत्तेः, सुवर्णरजतादिघटेषु घटत्व-स्यैक्ये साङ्कर्यापत्तेः ॥

किं च—गोत्वादिजातिरूपत्वेनाभिमतं संस्थानं हि नावयवसंयोग-स्वरूपं, रूपरसादिषु गुणेष्वात्मादिद्रव्येषु चोक्तसंस्थानाभावेन

तत्रातिरिक्तजातिकल्पनापत्तेः ; किं तु विषयतासम्बन्धेन यावद्गो-व्यक्तिषु सम्बद्धं तावद्विषयकज्ञानमेव । तदेव च इयं गौरित्यादि-प्रतीतौ स्वरूपतः प्रकारतया भासत इति न व्यक्तिभेदेन संस्थानस्य भेदोऽपि, यावद्घटादिविषयकज्ञानमेव यावद्घटव्यक्तिष्वनुगतमनतिप्रसक्तं घटत्वादिजातिरिति तदेव दण्डादिजन्यतावच्छेदकं घटपदशक्यतावच्छेदकं चेति—वादान्तरे स्पष्टम् ॥

तदिदमभिप्रेत्योक्तं **जिज्ञासाधिकरणभाष्ये**—

"संस्थानं नाम स्वासाधारणरूपमिति यथावस्तुसंस्थानमनु-सन्धेयम्" —इति ॥

उक्तं च **न्यायसिद्धाञ्जने**—

"एकजातीयमिति व्यवहारस्य तत्तदुपाधिविशेषेणोपपत्तेः, राशि-सैन्यपरिषदादिष्वैक्यव्यवहारवत् । उपाधिश्चायमनेकेषामेक-स्मृतिसमारोहः" —इति ॥

तथा च—तावद्विषयकज्ञानमेव सिद्धान्ते जातिः, तस्य स्वरूपतो भानं चेष्टमिति प्रकृतेऽपि इदं शरीरमिदं शरीरमित्यादिप्रतीतेः तावद्विषयकज्ञानरूपजातिविषयकत्वाङ्गीकारेण तस्यैव शरीरपदप्रवृत्ति-निमित्तत्वस्वीकारे शरीरशब्दस्य घटादिशब्दवत्ससम्बन्धिकत्वानुप-पत्तिः । ससम्बन्धिकत्वं हि सम्बन्धिविषयकाकाङ्क्षोत्थापकत्वं । तच्च जातिप्रवृत्तिनिमित्तकत्वे न घटते, गवादिशब्दवत् । अतस्तदतिरिक्तं प्रवृत्तिनिमित्तं वाच्यमित्यभिप्रेत्योक्तं **न तु दृष्टान्तभावादित्यत्र श्रीभाष्ये**—

"यस्य चेतनस्य यद्द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुं शक्यं, तच्छेषतैकस्वरूपं च, तत्तस्य शरीरमिति शरीरलक्षण-मास्थेयम्" —इति ॥

अत्र श्रुतप्रकाशिकानुसारिणः—

'यस्य चेतनस्य यद्द्रव्यं सर्वात्मना स्वार्थे नियन्तुं शक्यं तत्तस्य शरीरम्'--इति **प्रथमलक्षणं**। राजनियाम्यो भृत्य इत्यादौ राजकृतिप्रयुक्त चेष्टाश्रयत्वस्य भृत्यादौ बोधात्कृतिप्रयुक्तस्वीयचेष्टासामान्यकत्वरूप- नियाम्यत्वं शरीरपदप्रवृत्तिनिमित्तमित्यर्थः । एतज्जीवस्य इदं शरीर- मित्यादौ षष्ठ्यर्थ आधेयत्वं। तस्य शरीरपदार्थैकदेशकृतावन्वयादे- तज्जीवनिष्ठकृतिप्रयुक्तस्वीयचेष्टासामान्यकमिदमिति बोधः । उक्त- रीत्यैव च 'यस्यात्मा शरीरं, यस्य पृथिवी शरीरम्' इत्यादौ बोध ऊह्यः । अत भृत्यो राजशरीरमिति व्यवहारवारणाय सामान्यपद- निवेशनं । भृत्यनिष्ठचेष्टाविशेषस्य राजकृतिप्रयुक्तत्वेऽपि तत्सामा- न्यस्य तत्प्रयुक्तत्वविरहात् । एवं च परकायप्राणेन्द्रियादीनामपि न तज्जीवं प्रति शरीरव्यवहारविषयत्वं ; परकायगतचेष्टासामान्यस्य तज्जीवकृतिप्रयुक्तत्वाभावात्, प्राणेन्द्रियाणामेतज्जीवमोक्षानन्तरमप्या प्रलयमवस्थानेन तदीयचेष्टासामान्यस्य तत्कृतिप्रयुक्तत्वाभावात् । धर्मभूतज्ञानस्य जीवकृतिप्रयुक्तचेष्टासामान्यकत्वाङ्गीकारे ज्ञानमेतस्य शरीरमित्यादिव्यवहारवारणाय ज्ञानावच्छिन्नानुयोगिताकसम्बन्धप्रति- योगित्वमप्युक्तलक्षणे प्रवेश्यम् । ज्ञानप्रतियोगिकसम्बन्धश्च न ज्ञाना- वच्छिन्नानुयोगिताकः ॥

इत्थं च ज्ञानावच्छिन्नानुयोगिताकसम्बन्धप्रतियोगित्वे सति कृति- प्रयुक्तस्वीयचेष्टासामान्यकत्वं शरीरपदप्रवृत्तिनिमित्तमिति फलितम् ॥

एतज्जीवस्य इदं शरीरमित्यादौ षष्ठ्यर्थाधेयत्वस्य शरीरपदार्थैक- देशे अनुयोगितायां कृतौ चान्वयं स्वीकृत्य बोध ऊह्यः ॥ जीव- शरीरे वृक्षादावीश्वरशरीरे पर्वतादौ च सूक्ष्मस्य तत्तत्कृतिप्रयुक्तचेष्टा- विशेषस्याङ्गीकारान्न शरीरव्यवहारविषयत्वानुपपत्तिः ॥

उक्तं च **न्यायसिद्धाञ्जने**—"स्थावरादावतिसूक्ष्मस्य नियमम-विशेषस्यास्मदादिभिर्दुर्ग्रहत्वात्" —इति ॥

यदि च—स्थावरादौ पर्वतादौ च सूक्ष्मतया चेष्टाविशेषसद्भावे मानाभावादुक्तलक्षणाव्याप्तिरित्युच्यते, **तदा**—एतदस्वरसेनैव **लक्षणा-न्तरमुक्तं श्रीभाष्ये**—

"यस्य चेतनस्य यद्द्रव्यं सर्वात्मना धारयितुं शक्यम्, तत्तस्य शरीरम्" —इति ॥

कृतिप्रयुक्तस्वप्रतियोगिकपतनप्रतिबन्धकसंयोगसामान्यकत्वं शरीर-पदप्रवृत्तिनिमित्तमित्यर्थः । एतज्जीवस्येदं शरीरमित्यादौ षष्ठ्यर्था-धेयत्वस्य कृतावन्वयादेतज्जीवनिष्ठकृतिप्रयुक्तस्वप्रतियोगिकपतनप्रति-बन्धकसंयोगसामान्यकमिदमिति बोधः । अत्र सामान्यपदोपादानान्न पुत्रः पितुश्शरीरमिति व्यवहारापत्तिः । पुत्रप्रतियोगिकपतनप्रतिबन्धक-संयोगविशेषस्य पितृकृतिप्रयुक्तत्वेऽपि तत्सामान्यस्य तत्प्रयुक्तत्वा-भावात् ॥

न च—यादृशयूकादिकं कस्य चिच्छिरस्येवोत्पन्नं तत्रैव नष्टं, तादृश-यूकादौ तच्छरीरव्यवहारापत्तिरेवमपि दुर्वारेति—वाच्यम् ॥ यूकादि-शरीरप्रतियोगिकसंयोगः तदीयजीवानुयोगिकः, एतदीयशिरोऽनुयो-गिकश्च । तत्रैतच्छिरोऽनुयोगिकयूकादिशरीरादिप्रतियोगिकसंयोगस्य एतत्कृतिप्रयुक्तत्वेऽपि तदीयजीवानुयोगिकसंयोगस्य एतत्कृतिप्रयुक्त-त्वाभावेनोक्तदोषविरहात् ॥ न चैवं—चैत्रस्येदं शरीरमिति व्यवहारा-नुपपत्तिः; एतच्छरीरप्रतियोगिकात्मानुयोगिकसंयोगस्य चैत्रकृति-प्रयुक्तत्वेऽपि भूतलानुयोगिकसंयोगस्य चैत्रकृतिप्रयुक्तत्वाभावादिति-वाच्यम् । भूतलानुयोगिकसंयोगस्यापि चैत्रशरीरक्रियाजन्यत्वेन चैत्र-कृतिप्रयुक्तत्वानपायात् । स्वप्रतियोगिकत्वानिवेशे चैत्रस्येदं शरीर-

मित्याद्यनुपपत्तिः, शरीरक्रियां विनाऽपि जाते शरीरानुयोगिक-पटादिप्रतियोगिकसंयोगे चैत्रकृतिप्रयुक्तत्वाभावात्। अतस्तन्निवेशः ॥

अथ—गुरुत्ववत्सु द्रव्येषु पतनस्य प्रसक्ततया तत्प्रतियोगिकसंयोगे पतनप्रतिबन्धकत्वस्वीकारेऽपि गुरुत्वशून्यजीवादिप्रतियोगिकसंयोगस्य पतनप्रतिबन्धकत्वासम्भवात् 'यस्यात्मा शरीरम्' इत्यादिश्रौतव्यवहारानुपपत्तिः—**इति चेन्न** ॥ जगदाधारत्वादिबोधकश्रुतिबलादेव जीवादिप्रतियोगिकेश्वरानुयोगिकसंयोगस्यापि पतनप्रतिबन्धकत्वाभ्युपगमात्, आधारतायाः पतनप्रतिबन्धकसंयोगानुयोगित्वरूपत्वात्। पतनप्रतिबन्धकत्वं परित्यज्य कृतिप्रयुक्तस्वप्रतियोगिकसंयोगसामान्यस्य शरीरपदप्रवृत्तिनिमित्तत्वस्वीकारेऽपि क्षतिविरहाच्च । सौभरिप्रभृतियोगिनां यान्येकदाऽनेकशरीराणि, यानि च मुक्तस्य 'स एकधा भवति, द्विधा भवति' इत्यादिश्रुतिसिद्धान्यनेकशरीराणि, तत्र सर्वशरीरेषु जीवानुयोगिकसंयोगप्रतियोगित्वाभावेऽपि तादृशशरीरप्रतियोगिकसंयोगसामान्ये तत्तदात्मकृतिप्रयुक्तत्वानपायान्न दोषः ॥

अत्र निरुक्तशरीरलक्षणस्य कालादिविभुद्रव्येष्वव्याप्तिः । विभूनां मिथो नित्यसंयोगस्य सिद्धान्तेऽङ्गीकारेण कालादिप्रतियोगिकसंयोगसामान्यस्येश्वरकृतिप्रयुक्तत्वासम्भवात् । कृतिप्रयुक्तस्वप्रतियोगिकजन्यसंयोगसामान्यकत्वस्य शरीरपदप्रवृत्तिनिमित्तत्वे जन्यत्वस्य ध्वंसप्रतियोगित्वत्वप्रागभावप्रतियोगित्वत्वादिरूपविकल्पग्रासेन प्रवृत्तिनिमित्तभेदापत्त्या शरीरपदस्य नानार्थत्वापत्तिः ॥

अतो लक्षणान्तरमुक्तम्—

"यस्य चेतनस्य यद्द्रव्यं सर्वात्मना शेषतैकस्वरूपं, तत्तस्य शरीरम्"
—इति ॥

तच्छेषत्वं हि तन्निष्ठातिशयाधायकत्वं। प्रकृते च—तन्निष्ठातिशयः कार्यत्वकारणत्वान्यतररूपः। तदाधायकत्वं च तदवच्छेदकत्वं।

तथा च--ज्ञानावच्छिन्नानुयोगिताकापृथक्सिद्धिसम्बन्धावच्छिन्नकार्यत्वकारणत्वान्यतरावच्छेदकत्वं शरीरपदप्रवृत्तिनिमित्तमित्यर्थः । सूक्ष्मचिदचिद्विशिष्टब्रह्मणः कारणत्वात् स्थूलचिदचिद्विशिष्टस्य च तस्य कार्यत्वात् ब्रह्मनिष्ठकार्यत्वकारणत्वान्यतरावच्छेदकत्वस्य प्रपञ्चसामान्ये सत्त्वात् प्रपञ्चस्य शरीरत्वोपपत्तिरिति 'यस्यात्मा शरीरं, यस्य पृथिवी शरीरं' 'जगत्सर्वं शरीरं ते' इत्यादिव्यवहारोपपत्तिः ॥

तत्र षष्ठ्यर्थाधेयत्वस्य कार्यत्वकारणत्वान्यतरस्मिन्नन्वयाद्ब्रह्मनिष्ठकारणत्वकार्यत्वान्यतरावच्छेदिका पृथिवीत्यादिरित्यादिबोधः ॥ जीवस्यापि शरीरविशिष्टस्यैव सुखदुःखादिकार्यकारित्वात्तच्छरीरस्य तन्निष्ठकारणत्वावच्छेदकत्वात् एतज्जीवस्येदं शरीरमित्यादिव्यवहारनिर्वाहः ॥

यद्यपि—जीवस्य सुखादिकार्यं प्रति शरीरविशिष्टत्वेन न कारणत्वं, शरीरविशिष्टात्मत्वेनात्मविशिष्टशरीरत्वेन वा कारणतेत्यत्र विनिगमनाविरहेण गुरुतरकार्यकारणभावद्वयापत्तेः; किं तु दण्डचक्रादिन्यायेन शरीरस्यात्मनश्च प्रत्येकमेव कारणताद्वयमिति 'एतज्जीवस्येदं शरीरम्' इत्यादिकं नोपपद्यते। तथाऽपि—उक्तलक्षणे कारणतायाः प्रयोजकतासाधारणरूपेणैव निवेशेन शरीरात्मनोः प्रत्येकं कारणत्वेऽपि एकविशिष्टापरत्वरूपसामग्रीत्वेन कार्योत्पत्तिप्रयोजकत्वाक्षतेः जीवनिष्ठप्रयोजकतावच्छेदकत्वमादायैव उक्तव्यवहारोपपत्तिः। उक्तावच्छेदकतायामपृथक्सिद्धसम्बन्धावच्छिन्नत्वनिवेशाच्च भृत्यविशिष्टराजादेः कार्यकारित्वेऽपि न भृत्यो राजशरीरमिति व्यवहारापत्तिः। राजनिष्ठकार्योत्पादकतायां भृत्यस्य स्वस्वामिभावसम्बन्धेनावच्छेदकत्वेऽप्यपृथक्सिद्धिसम्बन्धावच्छिन्नावच्छेदकत्वविरहात्। ज्ञानमेतस्य शरीरमिति व्यवहारवारणाय च ज्ञानावच्छिन्नानुयोगिताकत्वनिवेशः ॥

एतेन—विनिगमनाविरहेण जीवविशिष्टशरीरस्यापि कार्योत्पत्तिप्रयोजकत्वेन, जीवश्शरीरस्य शरीरमिति व्यवहारापत्तिः, शरीरनिष्ठकार्योत्पादकतायां अपृथक्सिद्धिसम्बन्धेन जीवस्यावच्छेदकत्वादिति—**निरस्तम्** ॥ शरीरनिष्ठकार्योत्पादकतायां स्वानुयोगिकापृथक्सिद्धिसम्बन्धप्रतियोगित्वरूपाधेयतासम्बन्धेन जीवस्यावच्छेदकत्वेऽपि ज्ञानावच्छिन्नानुयोगिताकापृथक्सिद्धिसम्बन्धेन अतथात्वात्। मुक्तादेरपि शरीरविशिष्टत्वेनैव विहारादिकार्यजनकत्वान्न तच्छरीरादावव्याप्तिः ॥

एतल्लक्षणत्रयफलितं **चतुर्थमपि लक्षणं न्यायसिद्धाञ्जने** प्रतिपादितम्—

"यस्य चेतनस्य यदवस्थमपृथक्सिद्धविशेषणद्रव्यं तत्तस्य शरीरम्" —इति ॥

ज्ञानावच्छिन्नानुयोगिताकापृथक्सिद्धिसम्बन्धनिरूपितद्रव्यत्वसमानाधिकरणप्रतियोगित्वं शरीरपदप्रवृत्तिनिमित्तमित्यर्थः । एतज्जीवस्येदं शरीरमित्यादौ ज्ञानावच्छिन्नानुयोगिकापृथक्सिद्धिसम्बन्धनिरूपितद्रव्यत्वसमानाधिकरणप्रतियोगितावच्छिन्नं शरीरपदार्थः । तदेकदेशज्ञानावच्छिन्नानुयोगितायां षष्ठ्यन्तार्थस्यैतज्जीवनिष्ठत्वस्यान्वयात् ज्ञानावच्छिन्नैतज्जीवनिष्ठानुयोगिताकापृथक्सिद्धिसम्बन्धनिरूपितद्रव्यत्वसमानाधिकरणप्रतियोगित्वावच्छिन्नमिदमिति बोधः ॥ सिद्धान्ते धर्मभूतज्ञानस्य द्रव्यत्वेन शरीरात्मनोरिव ज्ञानात्मनोरपि अपृथक्सिद्धिसम्बन्धसत्त्वेन द्रव्यत्वसमानाधिकरणतादृशप्रतियोगितावत्त्वात् ज्ञानमेतस्य शरीरमिति व्यवहारवारणाय ज्ञानावच्छिन्नानुयोगिताकत्वनिवेशः । ज्ञानावच्छिन्नानुयोगिताकापृथक्सिद्धिसम्बन्धप्रतियोगित्वस्यात्मगतपरिमाणादौ सत्त्वात्परिमाणमेतस्य शरीरमिति व्यवहारवारणाय प्रतियोगित्वे द्रव्यत्वसामानाधिकरण्यप्रवेशः ॥

न च—एतल्लक्षणस्य सौभरिशरीरादावव्याप्तिः; तत्रैकस्मिन् शरीरे जीवापृथक्सिद्धत्वसत्त्वेऽपि शरीरान्तरे तदसम्भवादिति—वाच्यम्। यतश्शरीरपदशक्यतावच्छेदकमपृथक्सिद्धिनिरूपितद्रव्यत्वसमानाधिकरणप्रतियोगित्वमेव। एतज्जीवस्येदं शरीरमित्यादौ स्वनिष्ठज्ञानावच्छिन्नानुयोगिताकत्वस्वीयज्ञानानुयोगिकत्वान्यतरसम्बन्धस्य षष्ठ्यर्थतया विशिष्टार्थलाभः। जीवापृथक्सिद्धिरहिते सौभरिप्रभृतिशरीरेऽपि ज्ञानापृथक्सिद्धिसम्बन्धस्य प्रदीपवदावेश इति न्यायसिद्धत्वेन स्वीयज्ञानानुयोगिकापृथक्सिद्धिसम्बन्धप्रतियोगित्वमादाय तत्र शरीरव्यवहारनिर्वाहात्॥

ननु—शरीरात्मनोरपृथक्सिद्धिसम्बन्धो न सम्भवति, यावत्सत्तमसम्बन्धानर्हयोरेवापृथक्सिद्धिसम्बन्धाभ्युपगमात्; मृतशरीरस्य जीवसम्बन्धरहिततयाऽप्यवस्थानदर्शनेन तयोर्यावत्सत्तमसम्बन्धानर्हत्वविरहात्—इति चेन्न॥ पूर्वं शरीरतया स्थितस्य द्रव्यस्य चेतनवियोगानन्तरक्षण एव नाशाभ्युपगमेनानुपपत्तिविरहात्॥

तथा च न तु दृष्टान्तभावादित्यत्र श्रीभाष्यम्—

"मृतशरीरं तु चेतनवियोगक्षण एव विशरीतुमारब्धं क्षणान्तरे विशीर्यते। पूर्वशरीरतया परिक्लृप्तसंघातैकदेशत्वेन तत्र शरीरत्वव्यवहारः।" —इति॥

एवमेव पूर्वलक्षणेष्वप्यव्याप्तिपरिहार ऊह्यः॥

—इत्याहुः॥

अन्ये तु—

यस्य चेतनस्येत्यादिभाष्यमेकलक्षणपरमेव, न तु लक्षणत्रयपरम्। तत्सूचकवाकाराद्यभावात्; आधेयत्व-विधेयत्व-शेषत्वानि प्रवृत्तिनिमित्तमिति भाष्यविरोधाच्च। तत्र प्रत्येकधर्मस्य शक्यतावच्छेदकत्वेऽतिप्रसक्तिविरहेऽपि समुदायस्य तथात्वस्वीकारस्तु शरीरपदादाधेयत्वविधेयत्वशेषत्वानां बोधानुभवादेव॥

न च—एतज्जीवस्येदं शरीरमिति वाक्यजन्यबोधानन्तरमिदंपदार्थ-विशेष्यकजीवाधेयत्वादिसंशयः कस्यापि जायते। अत्र आधेयत्वादि-त्रयस्य शरीरपदजन्यबोधविषयत्वावश्यकतया समुदायस्य तच्छ-क्यतावच्छेदकत्वमावश्यकं। यथा पद्मत्वस्यानतिप्रसक्तत्वेऽपि पङ्कजनि-कर्तृत्वस्य बोधानुरोधेन पङ्कजादिपदशक्यतावच्छेदकत्वस्वीकारः॥

ननु—एतज्जीवस्येदं शरीरमिति वाक्यादाधेयत्वादित्रितयस्य बोधेऽपि न त्रितयस्य शक्यतावच्छेदकत्वावश्यकता, तत्राधेयत्वमात्रस्य शक्यतावच्छेदकत्वेऽपि विधेयत्वशेषत्वयोरर्थापत्तिवशेन भानसम्भ-वात्। सिद्धान्ते पदजन्यपदार्थोपस्थितिविषयस्येव अर्थापत्तिविषयस्यापि शाब्दबोधे भानाङ्गीकारात्, शरीरत्वमाधेयत्वशेषत्वाभ्यां विना अनुपपन्नमित्यर्थापत्तेः प्रकृतेऽपि सम्भवात्। अत एव हि घटेनजल-माहरेत्यादौ छिद्रेतरत्वं विना जलाहरणमनुपपन्नमित्यर्थापत्तिविषयी-कृतस्य छिद्रेतरत्वस्य शाब्दबोधभानमानुभाविकम्—इति चेन्न॥ "आक्षेपतः प्राप्तादाभिधानिकस्यैव ग्राह्यत्वात्" इति भाष्यानुरोधेन अर्थापत्तिविषयस्य शाब्दबोधे भानस्य शक्त्यसम्भवस्थल एव स्वीकारात्॥ —इति वदन्ति॥

'यस्य वेदाश्शरीरं, यस्य यज्ञाश्शरीरम्' इत्यादौ वेदयज्ञपदयो-स्तदभिमानिदेवतापरत्वस्य श्रुतप्रकाशिकायामुक्तत्वात् उक्तशरीर-लक्षणस्य वेदयज्ञयोरसत्त्वेऽपिन क्षतिः॥ यद्यपि देवतोद्देश्यकद्रव्यत्याग-रूपयज्ञपदार्थैकदेशद्रव्ये शरीरपदार्थस्याभेदान्वयसम्भवात् वेदयन्तीति वेदाः—इति व्युत्पत्तिसिद्धज्ञानसाधनत्वरूपयौगिकार्थघटकज्ञाने च तत्सम्भवाद्वेदयज्ञपदयोर्लक्षणाभ्युपगमो व्यर्थः। तथाऽपि संयोगानुकूल-क्रियारूपगमनपदार्थैकदेशसंयोगे गुणाभेदान्वयतात्पर्येण गमनं गुण इत्यादिव्यवहारवारणाय अभेदसम्बन्धावच्छिन्नप्रकारतानिरूपित-

१. जिज्ञासाधिकरण—श्रीभाष्ये.

विशेष्यतासम्बन्धेन शाब्दबोधं प्रति पदजन्योपस्थितेर्मुख्यविशेष्यतासम्बन्धेन हेतुत्वावश्यकतया प्रकृतेऽप्येकदेशे अभेदान्वयबोधासम्भवमभिप्रेत्य वेदयज्ञपदयोर्लक्षणास्वीकारान्नानुपपत्तिः ॥ 'परमसुन्दरः परमात्मा' इत्यादौ परमपदार्थस्य सुन्दरपदार्थैकदेशे सौन्दर्ये आत्मपदार्थैकदेशज्ञाने चाभेदान्वयबोधप्रतिपादनं **गदाधरादीनां** गत्यन्तरविरहेणैव। तथाऽन्वयं विना तादृशतात्पर्यानिर्वाहादिति ध्येयम् ॥

तार्किकास्तु--[1] 'चेष्टेन्द्रियार्थाश्रयश्शरीरम्' इतिसूत्रानुरोधादन्त्यावयवित्वे सति चेष्टावत्त्वं, अन्त्यावयवित्वे सति इन्द्रियाश्रयत्वं, अन्त्यावयवित्वे सति भोगावच्छेदकत्वं वा शरीरपदप्रवृत्तिनिमित्तं ॥ तत्र **प्रथमे** एतज्जीवस्येदं शरीरमित्यादौ कृतिप्रयोज्यत्वस्य षष्ठ्यर्थस्य शरीरपदार्थैकदेशचेष्टायामन्वयादन्त्यावयवित्वसमानाधिकरणैतज्जीवनिष्ठकृतिप्रयोज्यचेष्टावदिदमिति बोधः ॥ **द्वितीये** षष्ठ्यर्थस्य ज्ञानजनकत्वस्य शरीरपदार्थैकदेशे इन्द्रिये अन्वयादन्त्यावयवित्वसमानाधिकरणैतज्जीवनिष्ठज्ञानजनकेन्द्रियाश्रय इदमिति बोधः ॥ **तृतीये** षष्ठ्यर्थाधेयत्वस्य सुखादिसाक्षात्काररूपभोगेऽन्वयादेतज्जीवनिष्ठभोगनिरूपितान्त्यावयवित्वसमानाधिकरणावच्छेदकतावदिदमिति बोधः ॥ हस्तः एतस्य शरीरमिति व्यवहारवारणाय सर्वत्र सत्यन्तम्—**इत्याहुः** ॥

तच्चिन्त्यं ॥ **प्रथमकल्पे** चेष्टाशब्देन क्रियामात्रविवक्षायां घटो देवदत्तशरीरमितिव्यवहारापत्तिः; देवदत्तकृतिजन्यक्रियावत्त्वस्य अन्त्यावयवित्वसमानाधिकरणस्य घटे सत्त्वात्। हिताहितप्राप्तिपरिहारानुकूलक्रियाया विजातीयाया वा चेष्टाशब्देन विवक्षणे देवदत्त ईश्वरस्य शरीरमिति व्यवहारस्य भवदनभिमतस्य प्रसङ्गः; ईश्वरकृतिप्रयुक्त-

---

१. न्यायसूत्रम् (१-११) २. (टि.) अत्र अर्थशब्दः भोगरूपप्रयोजनपरः। सुखस्याश्रयपदस्य अधिकरणमवच्छेदकं चार्थः। आद्ये लक्षणद्वय प्राथमिकं, द्वितीये चरमलक्षणमभिप्रेतम् ॥

चेष्टावत्त्वस्य देवदत्ते सत्त्वात्। कृत्यसाधारणकारणकत्वस्य षष्ठ्यर्थता-स्वीकारेणोक्तातिप्रसङ्गवारणेऽपि अहल्यादिशरीरभूताशिलादावुक्त-लक्षणाव्याप्तिर्दुर्वारा॥ द्वितीये समवायेन इन्द्रियवत्त्वविवक्षणे असम्भवः इन्द्रियावयवेष्वतिव्याप्तिश्च । संयोगेन तद्विवक्षणे घटादावतिप्रसङ्गः, स्वजन्यज्ञानावच्छेदकत्वसम्बन्धेन तद्विवक्षणे च रामादिशरीरेष्वव्याप्तिः; ईश्वरज्ञानस्य नित्यत्वात्, व्याप्यवृत्तित्वेनावच्छेदकनिरपेक्षत्वाच्च; शिलाकाष्ठादिरूपाहल्यादिशरीरेऽव्याप्तिश्च ॥ तृतीये वेश्मादावति-व्याप्तिः; वने सिंहनाद इत्यादौ सिंहकण्ठावच्छेदेन जायमानशब्दं प्रति वनस्येव देहावच्छेदेन जायमानभोगं प्रति वेश्मादेरवच्छेदकत्वसम्भवात्, वेश्मन्यस्य भोग इति व्यवहाराच्च ॥

न च—स्वावयवातिरिक्तदेशानवच्छिन्नत्वस्य[1] भोगनिरूपितावच्छेदक-तायां निवेशान्न दोषः; वेश्मनश्च देहावच्छिन्नस्यैवावच्छेदकत्वात्, स्वावयवातिरिक्तदेशानवच्छिन्नावच्छेदकत्वविरहात् स्वावयवातिरिक्त-त्वस्य देशविशेषणत्वाच्च नासम्भवः; शरीरनिष्ठावच्छेदकतायाः पादे सुखमित्यनुरोधेन स्वावयवावच्छिन्नत्वेऽपि तदतिरिक्तदेशानवच्छिन्न-त्वात् —इति वाच्यम् । परकायस्य प्रविष्टं प्रति शरीरत्वापत्तेः; ईश्वरभोगस्य व्याप्यवृत्तित्वेन तदवच्छेदकाप्रसिद्ध्या रामशरीरादा-वव्याप्तेश्च ॥

तथा च अपीतौ तद्वत्प्रसङ्गादसमञ्जसमित्यत्र श्रीभाष्यम्—

"न च भोगायतनत्वं शरीरत्वमिति शरीरत्वसम्भवः, भोगा-यतनेषु वेश्मादिषु शरीरत्वाप्रसिद्धेः। यत्र वर्तमानस्यैव सुख-दुःखोपभोगस्तदेव भोगायतनम्—इति चेन्न, परकायप्रवेश-

---

१. अत्र—स्वावयवातिरिक्तदेशः स्वानाधारत्वेन विवक्षणीयः। तेन वेश्मनः शरीराधारस्य शरीरातिरिक्तस्य तदवयवातिरिक्तस्य च देशविधया शरीरावच्छेदेन जायमानभोग प्रति उक्तरीत्या अवच्छेदकत्वेऽपि नासम्भवः ॥

जन्यसुखदुःखभोगायतनस्य परकायस्य प्रविष्टं प्रति शरीरत्वा-
प्रसिद्धेः। ईश्वरस्य तु स्वतस्सिद्धनित्यनिरतिशयानन्दस्य भोगं
प्रति चिदचिद्वस्तुनोरायतनत्वनियमो न सम्भवति ॥"

— इति ॥

आयतनत्वमवच्छेदकत्वं शङ्कते—यत्र वर्तमानस्यैवेति । वर्तमा-
नस्य यस्य यत्रैव सुखदुःखोपभोग इत्यन्वयेन यन्निष्ठनिरवच्छिन्ना-
वच्छेदकताकः सुखादिसाक्षात्कार इत्यर्थः । अलर्थावच्छेदकतायामे-
वकारार्थस्य स्वावयवातिरिक्तदेशानवच्छिन्नत्वस्यान्वयेन नचेत्याद्यस्मदु-
क्तशङ्कायामेव भाष्यतात्पर्यात् ॥

आनन्दे निरतिशयत्वं च व्याप्यवृत्तित्वं बोध्यम् । तस्माच्छ्रीभा-
ष्योक्तलक्षणमेव लोकवेदप्रयोगानुगुणम् । तथा च अचिद्वस्तूनामिव
चिद्वस्तूनामपि परमात्मशरीरत्वाच्छरीरवाचिशब्दानां शरीरिपर्यन्त-
त्वात्, 'सर्वं खल्विदं ब्रह्म', 'अयमात्मा ब्रह्म', 'तत्त्वमसि'—
इत्यादिसमानाधिकरणव्यवहारोपपत्तिः। अत एव—'अनेन जीवेनात्म-
नाऽनुप्रविश्य नामरूपे व्याकरवाणि'—इत्यनुप्रवेशपूर्वकनामरूप-
व्याकरणं परमात्मन उपपद्यते। जीवेनात्मनेत्यत्र जीवशरीरकेण मयेत्य-
र्थात् । अन्यथा यथाश्रुतानुरोधाज्जीवात्मन एवानुप्रवेशकर्तृत्व-
स्वीकारे—'तदेवानुप्राविशत्, तदनुप्रविश्य, सच्च त्यच्चाभवत्'—इति पर-
मात्मनोऽनुप्रवेशकर्तृत्वप्रतिपादकश्रुत्यन्तरविरोधापत्तिः ॥

नन्वेवम्—आत्मनेति तृतीयाऽनुपपत्तिः, व्याकरवाणीति तिङा
कर्तुरभिधानात्, अनभिहिते कर्तरीति विधानात्, स्वोत्तरप्रत्ययभिन्न-
स्वसमभिव्याहृतपदसामान्यवृत्तिकर्तृत्वादिबोधतात्पर्याभावकं यत्स्वं
तस्मात्तृतीयादिर्भवतीति हि तृतीयेत्याद्यनुशासनार्थः। स्वं—तृतीयादि-

---

१. यन्निष्ठनिरवच्छिन्नेत्यत्र—निरवच्छिन्नत्वं एवकारार्थतयाऽभिमतं, स्वावय-
वातिरिक्तदेशानवच्छिन्नत्वरूपं अलर्थावच्छेदकताविशेषणं वक्ष्यमाणमिहाभिप्रेतम्॥

प्रकृतिः । 'चैत्रेण पच्यते तण्डुलः' इत्यादौ स्वं–चैत्रपदं, तत्समभिव्याहृततदुत्तरप्रत्ययभिन्नपदसामान्ये कर्तृत्वबोधतात्पर्यकत्वाभावसत्त्वात्तस्मात् तृतीयोपपत्तिः। प्रकृते च तादृशं स्वं नात्मपदं, तत्समभिव्याहृततदुत्तरप्रत्ययभिन्नपदसामान्यान्तर्गततिङादौ कर्तृत्वतात्पर्यकत्वस्यैव सत्त्वात् ॥ न च–व्याकरणकर्तृत्वतात्पर्यकत्वस्य तिङादौ सत्त्वेप्यनुप्रवेशकर्तृत्वतात्पर्यकत्वविरहस्य स्वोत्तरप्रत्ययभिन्नस्वसमभिव्याहृतपदसामान्ये सत्त्वादात्मपदात्तृतीयोपपत्तिः ; स्वतात्पर्यविषयीभूतार्थनिष्ठस्वसमभिव्याहृतयत्किञ्चित्क्रियानिरूपितकर्तृत्वतात्पर्यकत्वाभाववत् स्वसमभिव्याहृतस्वोत्तरप्रत्ययभिन्नपदसामान्यकं यत्स्वं तस्मात्तृतीयादिरित्यनुशासनार्थाङ्गीकारात्–इति वाच्यम्। तथा सति 'पक्वानि भुङ्क्ते चैत्रः' इत्यादौ चैत्रपदात्तृतीयापत्तेः । स्वं–चैत्रपदं तत्तात्पर्यविषयीभूतचैत्रादिरूपार्थनिष्ठं यत् यत्किञ्चित्स्वसमभिव्याहृतपाककर्तृत्वं तत्तात्पर्यकत्वाभावस्य स्वसमभिव्याहृतपदसामान्ये सत्त्वात् । अतः स्वतात्पर्यविषयीभूतार्थनिष्ठप्रधानक्रियानिरूपितकर्तृत्वतात्पर्यकत्वाभाववत् स्वसमभिव्याहृतपदसामान्यकं यत्स्वं तस्मात्तृतीयादिरित्येवानुशासनार्थो वाच्यः। पक्वानि भुङ्क्ते चैत्र इत्यादौ चैत्रनिष्ठं यत्प्रधानक्रियाकर्तृत्वं भोजनकर्तृत्वरूपं तत्तात्पर्यकत्वस्यैव स्वसमभिव्याहृतपदसामान्यान्तर्गततिङादौ सत्त्वान्नानुपपत्तिः । प्रकृते चात्मपदतात्पर्यविषयीभूतार्थनिष्ठं यत्प्रधानभूतव्याकरणक्रियाकर्तृत्वं तत्तात्पर्यकत्वस्यैव स्वसमभिव्याहृतपदसामान्यान्तर्गततिङादौ सत्त्वेन न तादृशं स्वमात्मपदमिति तस्मात्तृतीयानुपपत्तिः—इति चेत् ॥

अत्र ब्रूमः–समानाकारकज्ञानेषु विषयताभेदानङ्गीकर्तृनैयायिकादिमते–'चैत्रेण दृश्यमानं घटं मैत्रः पश्यति'—इत्यादौ द्वितीयानुपपत्तिः। चैत्रदर्शनमैत्रदर्शनोभयनिरूपितं विषयत्वरूपं कर्मत्वमेकमिति घटनिष्ठं यत्प्रधानक्रियानिरूपितविषयत्वादिरूपं कर्तृत्वं

तत्तात्पर्यकत्वस्यैव स्वसमभिव्याहृतपदसामान्यान्तर्गतकृत्प्रत्यये सत्वान्न तादृशं स्वं घटपदमिति 'अनभिहिते कर्तरि' इत्यादेः कर्तृत्वादि-विशेष्यतया प्रातिपदिकार्थे अविवक्षिते सति तृतीयेत्येवार्थः । प्रातिपदिकार्थविशेषणतयैव कर्तृत्वे अविवक्षिते इति यावत् । अवधारणपरतया प्रातिपदिकार्थविशेष्यतया कर्तृत्वे विवक्षिते तदुत्तरं तृतीयेतिपर्यवसितार्थः स्वीकार्यः । चैत्रेण दृश्यमानं घटं मैत्रः पश्यतीत्यादौ प्रातिपदिकार्थविशेष्यतया कर्मत्वस्य विवक्ष-णाद्वितीयोपपत्तिः । एवं च अनेन जीवेनात्मनाऽनुप्रविश्य इत्यादौ प्रातिपदिकार्थविशेष्यतया कर्तृत्वस्य विवक्षणाच्च तृतीयोपपत्तिः ॥

अथैवं—चैत्रादिकर्तृत्वविशेषितपाकादितात्पर्येण चैत्रेण पचतीति प्रयोगापत्तिः । एवं चैत्रमैत्रोभयकर्तृकपाकस्थले चैत्रकर्तृकपाककर्ता मैत्र इत्यन्वयतात्पर्येण 'चैत्रेण पचति मैत्रः' इति प्रयोगापत्तिश्च । कर्तृत्वविशेषणताऽनापन्नक्रियायां तृतीयार्थकर्तृत्वान्वयव्युत्पत्तिमङ्गी-कृत्य उक्तापत्तिवारणे च 'चैत्रेण पाचयति मैत्रः' इत्यादौ ण्यर्थकर्तृत्व-विशेषणतापन्नपाकादौ तृतीयार्थकर्तृत्वान्वयानुपपत्तिः—**इति चेन्न** ॥ आश्रयातिरिक्तविशेषणताऽनापन्नकर्तृत्वविशेषणताऽनापन्नक्रियायामेव तृतीयार्थकर्तृत्वान्वय इति व्युत्पत्तिस्वीकारेणोक्तदोषाभावात्, चैत्रेण पाचयतीत्यादौ कर्तृत्वनिर्वाहकव्यापारो णिजर्थः । तत्राश्रयातिरिक्ते व्यापारे कर्तृत्वं विशेषणमिति तद्विशेषणतापन्नक्रियायां तृतीयार्थकर्तृ-त्वस्य विशेषणत्वे न किंचिद्बाधकं । चैत्रेण पचति मैत्र इत्यादयश्च न प्रयोगाः । तत्राश्रय एव कृतेर्विशेषणतया तद्विशेषणतापन्नक्रियायां तृतीयार्थकर्तृत्वस्य बोधनासम्भवात् कृतिविशेष्यकबोधाभिप्रायेण चैत्रेण पचतीति वारणायाश्रयविशेषणत्वमुपेक्ष्य तदतिरिक्तविशेषणत्वनिवेशः।

—इति ॥

१. प्रधानतया.

ज्ञानरत्नप्रकाशिकाकृतस्तु—'अनभिहिते कर्तरि तृतीया' इत्यादेः स्वतात्पर्यविषयीभूतार्थनिष्ठस्वसमभिव्याहृतयत्किञ्चित्क्रियानिरूपित-कर्तृत्वतात्पर्यकत्वाभाववत् स्वसमभिव्याहृतसामान्यकं यत्स्वं तस्मात्तृतीयादिरित्येवार्थः ॥ न चैवं—पक्वानि भुङ्क्ते चैत्र इत्यादौ चैत्रपदात्तृतीयापत्तिः, चैत्रनिष्ठं यत्पाकादिकर्तृत्वं तत्तात्पर्यकत्वाभावस्य स्वसमभिव्याहृतपदसामान्ये सत्त्वात्—इति वाच्यम् । स्वसमभिव्याहृत-पदाभिहितप्रधानक्रियानिरूपितकर्तृत्वादिनिष्ठविषयतानिरूपितविषय-ताप्रयोजकभिन्नत्वस्य स्वपदार्थे विशेषणत्वेनानुपपत्त्यभावात्, पक्वानि भुङ्क्ते चैत्र इत्यादौ चैत्रपदस्याख्याताभिहितप्रधानक्रियाकर्तृत्वनिष्ठ-विषयतानिरूपितविषयताप्रयोजकतया तदभिन्नत्वाभावात् । अनेन जीवेनात्मनेत्यादौ चाख्याताभिहितप्रधानभूतव्याकरणक्रियाकर्तृत्व-निष्ठविषयतानिरूपितविषयताप्रयोजकं यदहमादिपदं तद्भिन्नत्वस्यात्मपदे सत्त्वात् आत्मपदतात्पर्यविषयीभूतार्थनिष्ठानुप्रवेशकर्तृत्वतात्पर्य-कत्वविरहस्य स्वसमभिव्याहृतपदसामान्ये सत्त्वाच्चात्मपदात्तृतीयोपपत्तिः ॥ —**इति वदन्ति** ॥

अत्र यद्यपि चैत्रेण दृश्यमानं घटं मैत्रः पश्यतीत्यादौ घटपदस्य शानच्प्रत्ययाभिहितप्रधानक्रियाकर्मत्वनिष्ठविषयतानिरूपितविषयता-प्रयोजकत्वेन तद्भिन्नत्वाभावात् द्वितीयानुपपत्तिः ॥

न च—सिद्धान्ते ज्ञानभेदेन ज्ञानसंयोगात्मकविषयताया भेदान्नानुपपत्तिः, सिद्धान्ते ज्ञानस्य द्रव्यत्वेन प्रसरणवत्त्वेन च तत्संयोग-स्यैव विषयतारूपत्वात्—इति वाच्यम् । एवमपि धारावाहिकज्ञानस्य घटसम्बद्धस्थिरद्रव्यात्मकस्य ऐक्ये तत्स्थले तादृशज्ञानस्य गृहीत-ग्राहित्वतात्पर्येण ज्ञातमेव जानातीति व्यवहारानुपपत्तिः । तत्र प्रधाना-प्रधानक्रिययोरैक्ये तत्संयोगस्याप्यैक्येन क्तप्रत्ययेन प्रधानक्रिया-कर्मत्वस्यैवाभिधानात् । तथाऽपि धारावाहिकज्ञानस्थले निरन्तरज्ञान-सन्ततिरेव, न त्वेकज्ञानमिति—**तेषामाशयः** ॥

यदि च—धारावाहिकज्ञानस्थले ज्ञानैक्यमानुभाविकं सिद्धान्तसिद्धं च तदाऽस्मदुक्तरीत्या तत्रापि नानुपपत्तिः । तथा च—अनुप्रवेशपूर्वकं नामरूपव्याकरणं परमात्मन एवेति सिद्धम् ॥

नन्विदमनुपपन्नम्—परमात्मनो विभुत्वाङ्गीकारात् । अनुप्रवेशो हि—अन्तस्संयोगावच्छिन्नक्रियारूपो गतिविशेषः । गतिश्च—विभुत्वाभावसाधकतया सूत्रकारेणैव निर्दिष्टा 'उत्क्रान्तिगत्या गतनाम्' इति । तस्मादणोर्जीवस्यैवानुप्रवेशो युक्तः—**इति चेत्** ॥ **उच्यते**—अनुप्रवेशस्य गतिविशेषरूपत्वेऽपि तस्य जीवनिष्ठत्वात्, परमात्मकृतिजन्यत्वेन तत्कर्तृकत्वाच्च नानुपपत्तिः । यथा हि—नैयायिकादिनये देवदत्तो ग्रामं गच्छतीत्यत्र जीवस्य विभुत्वेऽपि शरीरनिष्ठा या संयोगानुकूलक्रिया तदनुकूलकृतिमत्त्वमेव देवदत्तशरीरावच्छिन्नात्मनि प्रतीयते, न तु गमनादिरूपक्रियावत्त्वं । सर्वत्र शरीरनिष्ठक्रियानुकूलकृतेरेवात्मनि भानाङ्गीकारात् । तथा 'अनुप्रविश्य नामरूपे व्याकरवाणि' इत्यत्र अनुप्रवेशरूपधात्वर्थोत्तरकालीनत्वस्य ल्यबन्तार्थस्य स्वप्रकृत्यर्थसमानकर्तृकत्वविशिष्टाश्रयतासम्बन्धेन नामरूपव्याकरणेऽन्वयाङ्गीकारात् परमात्मनि जीवरूपशरीरनिष्ठानुप्रवेशानुकूलकृतिमत्त्वं भासते, न त्वनुप्रवेशवत्त्वमिति नानुपपत्तिः ॥

न च—एवं जीवस्य विभुत्वेऽपि गत्यादिकर्तृत्वमुपपद्यते, शरीरनिष्ठगमनादिरूपक्रियां प्रति कर्तृत्वसम्भवात्, ग्रामं गच्छतीत्यादिवत्—इति वाच्यम् । यत उत्क्रान्त्यादिसूत्रं नैयायिकमतनिराकरणपरं ; तथाहि—जीवो विभुत्वाभाववान्, क्रियावत्त्वात्—इत्यनुमानमभिप्रेत्य तत्र स्वरूपासिद्धिशङ्कानिरासकतया उत्क्रान्तीत्यादिसूत्रं प्रवृत्तम् ॥

तथा च—उत्क्रान्त्यादिना श्रुतिसिद्धत्वान्न स्वरूपासिद्धत्वमिति—भावः । ऊर्ध्वदेशसंयोगावच्छिन्नक्रियात्वादिरूपोत्क्रान्तित्वादिना च हेतुत्वं न सम्भवति, नीलधूमादिवद्वैयर्थ्यात् ॥

अथ–'तेन प्रद्योतेनैष आत्मा निष्क्रामति, चक्षुषो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यः' इत्युत्क्रान्तिप्रतिपादकश्रुत्या, 'ये वैके चास्माल्लोकात्प्रयन्ति, चन्द्रमसमेव ते सर्वे गच्छन्ति' 'तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे' इति गत्यागतिप्रतिपादकश्रुतिभ्यां च शरीरनिष्ठोत्क्रान्त्यादिरूपक्रियानुकूलकृतेरेव आत्मनि बोधेऽपि क्रियावत्त्वस्याबोधात् स्वरूपासिद्धिः—इति चेन्न ॥ नैयायिकादिनये उत्क्रान्त्यादिकाले शरीराभावेन निष्क्रामतीत्यादिना रथोगच्छतीत्यादिवत् क्रियाश्रयत्वस्यैव बोधावश्यकतया क्रियावत्त्वरूपहेतोरात्मनि सिद्धेरिति सूत्राभिप्रायात्। अधिकमन्यत्र विवेचितम् ॥

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

इति

श्रीशेषार्यवंशमुक्ताफलस्य श्रीयादवाद्रिनिवासरसिकस्य
श्रीमदनन्तार्यवर्यस्य कृतिषु

शरीरवादः

समाप्तः।

॥ श्रीः ॥

॥ श्रीः ॥

शरीरवादतात्पर्यदीपिका[1].

(टीकावतरणम्)

अयं शरीरवादः । अत्र च भगवतस्सर्वेश्वरस्य सर्वशास्त्रपरमतात्पर्यविषयीभूतं त्रिविधचेतनाचेतनशरीरत्वं सप्रकारं प्रपञ्च्यते । अयं च शरीरात्मभावः अन्तर्यामिब्राह्मणादिषु सुव्यक्तं प्रतिपादितः । प्रकृष्टसत्त्वोद्रेकजनितजीवपरयाथात्म्यज्ञानाभिलाषिभिः सर्वैरप्यवश्यं ज्ञातव्योऽप्ययमेवार्थः; 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो', 'पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति', 'भोक्ता भोग्यं प्रेरितारं च मत्वा', 'अयमात्मा ब्रह्म', 'सर्वं खल्विदं ब्रह्म', 'यस्यात्मा शरीरं यस्य पृथिवी शरीरम्'—इत्यादिश्रुतिशतैर्भूयोभूयस्सम्यगुपदिष्टश्च । जगद्ब्रह्मणोश्शरीरात्मभावे सम्यग्विज्ञाते चेतनाचेतनयोस्सर्वेश्वरपारतन्त्र्यप्रतिपत्तिस्सुखेन भवतीति ॥

---

१. टीकेयं श्रीयादवाद्रिनिवासिपण्डितवरैः श्री ॥ उ ॥ ति·ऐ-स्था ॥ कुप्पनैयङ्गार्यैः विरचिता, श्रीकाञ्चीपुरवासिविद्वद्वरेण्यैः श्री ॥ उ ॥ ति-अ-कु-श्रीनिवासार्यवर्यैः सम्यक् परिशोध्य मुद्रणार्थं सम्प्रेषिता च ॥

॥ श्रीः ॥

शरीरवादतात्पर्यदीपिका.

पु. प.

२. १. **किन्तु विषयतासम्बन्धेनेति** ॥ तत्तद्गोव्यक्तिभेदकूटवद्वृत्तिविषयतासम्बन्धेनेत्यर्थः ; तेन केवलविषयतासम्बन्धेन गोविषयकप्रतीतेः पदार्थान्तरे सत्त्वेऽपि न क्षतिः ॥

२. ६. **वादान्तरे स्पष्टमिति** ॥ अयं च कल्पः न्यायसिद्धाञ्जनेऽपि प्रतिपादितः ॥ इयं तत्सूक्तिः—"ननु यदि संस्थानमेव सामान्यं तर्हि तद्रहितेषु रूपरसादिषु कथं निर्वाहः । तव वा कथमुपलक्षणरहितेषु तेषु? लक्षणमेवोपलक्षणमिति चेत् किं तत्? प्रतीतिरिति चेत्, आत्माश्रयप्रसङ्गात् । अस्माकं तु तदेवैकीकरणमिति नोपद्रवः" इत्यादि ॥ अयं भावः । सर्वत्र तत्तत्संस्थानविशेषस्य तत्तज्जात्यभिव्यञ्जकत्वदर्शनात् संस्थानरहितेषु रूपरसादिषु कथं जातिप्रतीतिनिर्वाहः—इति **शङ्काग्रन्थार्थः** ॥ यत्रावयवसंयोगरूपसंस्थानप्रसिद्धिः तत्र तस्य जातिव्यञ्जकत्वं ; यत्र न प्रसिद्धिः तत्र तत्तज्जातिनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन तत्तत्प्रतीतेरेव तत्तज्जातिव्यञ्जकोपलक्षणत्वाङ्गीकारापेक्षया लाघवेन तादृशप्रतीतिरेवानुगता जातिरास्तां । तथा च नात्माश्रयः— इति **समाधानग्रन्थार्थः** ॥ विस्तरस्तु तद्ग्रन्थे द्रष्टव्यः ॥

संस्थानातिरिक्तजातिवादी नैयायिकश्शङ्कते—**नन्विति** ॥ नैयायिकैरपि संस्थानातिरिक्तजातिवादिभिस्संस्थानस्य जात्युपलक्षणत्वाङ्गीकारेण रूपादौ उपलक्षणीभूतसंस्थानाभावात्कथं

पु. प.

२. ६. तत्र जातिमत्त्वमिति सिद्धान्तिनश्चोद्यं—**तत्र वेति**॥ संस्थानस्य जात्युपलक्षणत्वं न सार्वत्रिकं, किन्तु संस्थानयोगिषु द्रव्येष्वेव ; रूपादिषु तु तेषां लक्षणमेव जात्युपलक्षणमिति नैयायिकश्शङ्कते—**लक्षणमेवेति** ॥ लक्षणस्य चक्षुर्मात्रग्राह्यत्वादिरूपस्य न रूपत्वाद्युपलक्षणत्वं सम्भवति, तस्य रूपत्वघटितत्वेन आत्माश्रयप्रसङ्गात्—इत्यन्यदेव लक्षणं तत्र उपलक्षणं वक्तव्यम्। तच्च तदघटितं रूपत्वप्रतीतिनियामकं दुर्वचमिति तावद्विषयकप्रतीतिविषयत्वमेव अनायत्या रूपत्वोपलक्षणं वाच्यम् । तदप्युक्तात्माश्रयदोषग्रस्तमेव । रूपमात्रविषयकप्रतीतिविषयत्वस्य तदवच्छेदकरूपत्वज्ञानमन्तरा दुर्ग्रहत्वात्—इत्याह **आत्माश्रयप्रसङ्गादिति** ॥

तदेवैकीकरणमिति ॥ तावद्विषयकप्रतीतिविषयत्वमेव रूपादीनां एकजातीयत्वमित्यर्थः । विषयतासम्बन्धेन तादृशप्रतीतिरेव रूपत्वादिजातिरि... पर्यवसितम् । यद्यपि तादृशप्रतीतेः रूपत्वप्रकारकप्रतीतित्वेन न हि रूपत्वपदवाच्यत्वम् , उक्तात्माश्रयप्रसङ्गतादवस्थ्यात्; नापि तत्तद्व्यक्तित्वेन, अननुगमात्—इति तादृशप्रतीतेः जातिरूपत्वं सिद्धान्तेऽपि नोपपद्यते । तथाऽपि चक्षुर्मात्रजन्यज्ञानविषयतात्वेन तस्य रूपत्वपदप्रवृत्तिनिमित्तत्वाङ्गीकारेण अदोषः ॥ न चैवं रूपत्वेऽपि रूपत्ववत्ताव्यवहारप्रसङ्ग इति वाच्यम् । चक्षुर्जन्यज्ञानीयविषयतायां प्रकारतारूपायां द्रव्यनिष्ठविशेष्यतानिरूपितत्वस्य निवेशेन उक्तदोषवारणात् । तत्र अपृथक्सिद्धसम्बन्धावच्छिन्नत्वस्यापि निवेशेन परम्परया द्रव्यांशे रूपत्वावगाहिज्ञानमादाय न रूपत्वे तद्व्यवहारप्रसङ्ग इति ॥

पु. प.

३. ८. **बोध ऊह्य इति** ॥ यन्निष्ठकृतिप्रयुक्तव्यापारसामान्यक आत्मा, यन्निष्ठकृतिप्रयुक्तव्यापारसामान्यवती पृथिवी—इति बोधः ॥

४. ८. कृतिप्रयुक्तस्वप्रतियोगिकपतनप्रतिबन्धकसंयोगसामान्यवत्त्वं शरीरपदप्रवृत्तिनिमित्तम् । एतज्जीवस्येदं शरीरमित्यादौ षष्ठ्यर्थाधेयत्वस्य कृतावन्वयात् । एतज्जीवनिष्ठकृतिप्रयुक्तस्वप्रतियोगिकपतनप्रतिबन्धकसंयोगसामान्यकमिद मिति बोधः ॥

अत्र केचित्—"अस्मदादिशरीरस्य सुषुप्त्यादिदशायामितरैरन्यत्र निक्षेपादिसम्भवेन तादृशपतनप्रतिबन्धकसंयोगस्य अस्मदादिकृतिप्रयुक्तत्वविरहेण, जीववत्परकायप्रवेशस्थले परकीयकृतिमात्रजन्यधारणस्य असम्भवेन चाव्याप्त्यापत्तेः ; एवं कालादिविभुद्रव्यस्य पतनसम्भावनाविरहेण तदीयसंयोगस्य पतनप्रतिबन्धकत्वविरहेण तत्रेश्वरशरीरत्वानुपपत्तिः"—इत्याहुः ॥ तन्न विचारसहम् । तथा हि—सुषुप्त्यादिदशायां सुप्तशरीरस्यान्यैरन्यत्र निक्षेपसम्भवेऽप्युक्तलक्षणस्य न तत्राव्याप्तिः। तत्र पतनप्रतिबन्धकसंयोगे स्वव्यधिकरणक्रियाऽजन्यत्वस्य निवेशेन तत्रान्यदीयशरीरक्रियाजन्यत्वस्यैव तत्कर्तृकविक्षेपरूपसंयोगे सत्त्वेन तदजन्यत्वस्य तत्राभावेन तमादाय उक्तानुपपत्तिविरहात् ॥

यद्वा—स्वसमानाधिकरणज्ञानसमानकालीनत्वतादात्म्योभयसम्बन्धेन व्यक्तिविशिष्टत्वस्य पतनप्रतिबन्धकसंयोगे विशेषणीयतया नोक्तानुपपत्तिः । इदञ्च विशेषणं मूलस्थज्ञानविशिष्टार्थकपष्ठ्यन्तचेतनपदेन विवक्षितम् ॥

पृ. प.

४. ८. अत एव जीववत्परकायप्रवेशस्थले जीववत्परकायस्य न परं प्रति शरीरत्वानुपपत्तिः। परस्य तद्दशायां ज्ञानासत्त्वेन निरुक्त-सम्बन्धद्वयेन तच्छरीरनिष्ठपतनप्रतिबन्धकसंयोगस्य व्यक्ति-विशिष्टत्वाभावेन तथाविधसंयोगस्य निरुक्तसंयोगसामान्या-नन्तर्भावात्। तादृशशरीरनिष्ठपतनप्रतिबन्धकसंयोगस्य स्वव्याधिकरणपिशाचादिशरीरनिष्ठक्रियाजन्यत्वेन स्वव्यधिकर-णक्रियाऽजन्यत्वरूपविशेषणान्तरघटितनिरुक्तपरिष्कारेणापि तद्वारणसम्भवात्। कालादिविभुद्रव्येषु ग्रन्थकृतैव "अथ–गुरुत्ववत्सु द्रव्येषु पतनस्य प्रसक्ततया तत्प्रतियोगिकसंयोगे पतनप्रतिबन्धकत्वस्वीकारेऽपि गुरुत्वशून्यजीवादिप्रतियोगिक-संयोगस्य पतनप्रतिबन्धकत्वासम्भवात्; यस्यात्मा शरीरं इत्यादिव्यवहारानुपपत्तिः–इति चेत्" इत्यन्तेन शरीरत्वा-नुपपत्तिमाशङ्क्य; नेत्यादिना "जगदाधारत्वादिप्रतिपादकश्रुति-बलादेव जीवादिप्रतिपादकेश्वरानुयोगिकसंयोगस्यापि पतन-प्रतिबन्धकत्वाभ्युपगमात् आधारतायाः पतनप्रतिबन्धकसंयो-गानुयोगित्वरूपत्वात्"–इत्यन्तेन तत्परिहारः कृतः ॥

यदपि–आधारतायाः पतनप्रतिबन्धकसंयोगरूपत्वे घटादेः रूपाद्याधारत्वासम्भवप्रसङ्गः–इति चोदनम्; तदपि मन्दम्। न हि सर्वत्रैव आधारत्वमीदृशमभिमतम्, येन उक्तदोषस्स्यात्; किन्तु द्रव्याधारत्वमेव। उक्तरूपं घटादिरूपाद्याधारत्वं तु तत्प्रतियोगिकापृथक्सिद्ध्यनुयोगित्वरूपमेवेति नोक्तानुप-पत्तिः। न चैवं आधारशब्दस्य नानार्थकत्वप्रसङ्ग इति वाच्यम्; इष्टत्वात्। आधारतात्वस्य आधारत्वमिति अनुगतप्रतीतिवि-षयत्वरूपस्य आधारपदप्रवृत्तिनिमित्ततावच्छेदकत्वाङ्गीकारेण

पु. प.

४. ८. वा तद्वारणात् । यदपि घटसंयुक्तं भूतलमितिवत् भूतलसंयुक्तो घट इत्यपि व्यवहारसत्त्वेन घटादावपि भूतलसंयोगानुयोगित्वस्य अङ्गीकरणीयतया आधारताया उक्तरूपत्वे घटादेः स्वाधारताप्रसङ्ग इति चोद्यम् । तदपि न । पतनप्रतिबन्धकसंयोगानुयोगित्वरूपं तदाधारत्वं हि तद्व्यक्तिविशिष्टत्वरूपमिह विवक्षितम् । व्यक्तिवैशिष्ट्यं च स्वभिन्नत्वस्वविशिष्टसंयोगवत्त्वोभयसम्बन्धेन । संयोगे स्ववैशिष्ट्यं च स्वनिष्ठपतनानुत्पादप्रयोजकत्वस्वप्रतियोगिकत्वोभयसम्बन्धेन । तथा च घटादेः तद्भिन्नत्वाभावेन न तदाधारताप्रसङ्गः ॥ एतेन—न च संयोगजनकक्रियाश्रयस्य प्रतियोगित्वमेव नानुयोगित्वमिति घटादेरनुयोगित्वाविरहात् न स्वाधारत्वप्रसङ्ग इति वाच्यम् । तथा सति उभयकर्मजन्यसंयोगेन हस्तादेर्यत्र घटादिधारकत्वं तत्र हस्तादेः घटाद्याधारत्वानुपपत्तिप्रसङ्गात्—इति चोद्यसमाधाने निरस्ते ॥ उक्तरीत्या आधारत्वपरिष्कारे हस्तादेर्घटाद्याधारत्वानुपपत्तिविरहात् । पतनप्रतिबन्धकस्वप्रतियोगिकत्वविशिष्टसंयोगानुयोगितायाः आधारतारूपत्वाङ्गीकारेणापि उक्तानुपपत्तिवारणात् । घटप्रतियोगिकत्वविशिष्टसंयोगानुयोगितायाः हस्तादौ स्वीकारात्, घटे च तदस्वीकारात् ॥

यद्यपि हस्तादिप्रतियोगिकत्वविशिष्टघटाद्यनुयोगिकसंयोगत्वेनापि पतनप्रतिबन्धकत्वमिति तदनुयोगितायाः घटादौ सद्भावेन घटादेर्हस्ताद्याधारताप्रसङ्गो निरुक्तपरिष्कारे दुरपह्नवः । तथाऽपि निरुक्तप्राथमिकपरिष्कारेण तद्व्यावर्तनं सुवचम् । अत एव "एवमन्येन धृते घटादौ अधस्तादन्यहस्त·

पु. प.

४. ८. क्रियया संयोगः, पूर्वसंयोगनिवृत्तिश्च । तत्र हस्तादेः घटाद्याधारत्वानुपपत्तिः, घटस्य हस्ताधारताप्रसङ्गश्च" इत्यन्तेन प्रोक्तानुपपत्तिरपि निरस्ता । उक्तपरिष्कारोपरि तादृशदोषाप्रसक्तेः ॥

९.२४. **तन्निष्ठातिशयः कार्यत्वकारणत्वान्यतररूप इति** ॥ शेषत्वस्वरूपनिरूपणावसरे "सत्तालाभस्यातिशयरूपत्वान्निकर्षात्मकधर्मेतराकारोह्यतिशयः" इति श्रुतप्रकाशिकायामनुगृहीतत्वेन अत्र कारणत्वादेरातिशयत्वमुक्तम् । कारणत्वस्यात्र करणकलेबरप्रदानादिरूपत्वेन, कार्यत्वस्य तद्धाक्त्वरूपत्वेन च सत्तालाभरूपत्वस्य निर्वक्तुं शक्यत्वात् ॥

६. १. **ज्ञानावच्छिन्नेति** ॥ यत्तु--नित्यविभूतिनित्यसूर्यादिविशिष्टतया ब्रह्मणः कारणत्वस्य कार्यत्वस्य वा विरहेण तत्र ब्रह्मशरीरत्वानुपपत्तेः—इति । तन्न ; जन्माद्यधिकरणसिद्धकारणत्वरूपलक्षणे आत्यन्तिकलयरूपमोक्षकारणत्वस्यापि घटकतया तदाक्षिप्तमुक्तप्राप्यत्वमुक्तिप्रापकत्वान्यतररूपकार्यत्वकारणत्वान्यतरस्य ब्रह्मनिष्ठातिशयरूपत्वसम्भवात् । प्राप्यत्वेनैव रूपेण नित्यविभूतिविशिष्टं स्वात्मानं प्रापयामीति सङ्कल्पद्वारा कारणत्वेन च तदवच्छेदकत्वरूपनिरुक्तशेषत्वस्य तत्रापि सत्त्वेन नानुपपत्तिगन्धोऽपि ॥

नित्यविभूत्यादेः प्राप्यान्तर्भावश्च जन्माद्यधिकरणश्रुतप्रकाशिकायामनुगृहीतः ॥ इयं च तत्सूक्तिः—"ननु यदीश्वरोलिलक्षयिषितः"—इत्यारभ्य, "तदेवं लक्षणान्तर्भूतेन लयांशेनोपलक्षितायास्त्रिपाद्विभूतेरपि जिज्ञास्यान्तर्भावसिद्धिस्सूत्रिता भवतीति"—इत्यादि ॥

पु. प.

८. ७. **प्रदीपवदावेश इति न्यायसिद्धत्वेनेति** ॥ 'प्रदीपवदावेशः तथा हि दर्शयति' इति सूत्रम् । इदं च सूत्रं शारीरकमीमांसाशास्त्रे चतुर्थाध्याये अभावाधिकरणस्थम् । अस्य भाष्यम्—"यथा प्रदीपस्यैकस्यैकस्मिन् देशे वर्तमानस्य स्वप्रभया देशान्तरावेशः, तथाऽऽत्मनोऽप्येकदेहस्थितस्यैव स्वप्रभारूपेण चैतन्येन सर्वशरीरावेशो नानुपपन्नः । यथा चैकस्मिन्नपि देहे हृदयाद्येकप्रदेशवर्तिनोऽपि चैतन्यव्याप्त्या सर्वस्मिन् देहे आत्माभिमानः, तद्वत् । इयान् विशेषः—अमुक्तस्य कर्मणा सङ्कुचितज्ञानस्य देहान्तरेष्वात्माभिमानानुगुणा व्याप्तिर्न सम्भवति । मुक्तस्य त्वसङ्कुचितज्ञानस्य यथासङ्कल्पमात्माभिमानानुगुणा व्याप्तिरिदमिति ग्रहणानुगुणा च नानुपपन्ना ॥ तथा हि दर्शयति—

'वालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवस्स विज्ञेयस्स चानन्त्याय कल्पते ॥' इति ।

अमुक्तस्य कर्म नियामकं, मुक्तस्य तु स्वेच्छेति विशेषः"
—इति ॥

एतद्भाष्यार्थपर्यालोचनयैव 'प्रदीपवदावेश इति न्यायसिद्धत्वेन' इत्युक्तिः ॥ सौभरिप्रभृतीनां योगिनां ज्ञानद्वारैवानेकशरीरेषु व्याप्तिरिति पातञ्जले योगशास्त्रे "निर्माणचित्तान्यस्मितामात्रात्" इति ; सूत्रवार्तिके "कदाचित्तु योगिनामेकान्तःकरणेनैव नानादेहेषु व्यवहारं न निराकुर्मः ; स्वतन्त्रेच्छस्य नियन्तुमशक्यत्वात्"—इति ग्रन्थेन प्रतिपादितमिति ॥

पु. प.

९. ३. 'नन्वेतज्जीवस्येदं शरीरम्' इति वाक्यमारभ्य—

९. १४. 'आक्षेपतः प्रासादाभिधानिकस्यैव प्राबल्यात्' इति पर्यन्तम् ॥

अत्र च ब्रह्मण इति षष्ठ्याःसम्बन्धसामान्यार्थकत्वं वा, कर्मत्वार्थकत्वं वेति विशये शेषेषष्ठीत्यनुशासनेन सम्बन्धसामान्यार्थकत्वाङ्गीकारेऽपि जिज्ञासापदसमभिव्याहारबलात्सम्बन्धसामान्यस्य कर्मत्वरूपविशेषसिद्ध्या ब्रह्मणो जिज्ञास्यत्वसम्भवात् षष्ठ्याः कर्मत्वार्थकत्वमयुक्तमिति प्राप्ते प्रधानतया जिज्ञास्यस्य ब्रह्मणः कर्मत्वस्याक्षेपसिद्धत्वादपि कर्तृकर्मणोः कृतीत्यनुशासनस्य कर्मणि द्वितीयेत्यनुशासनवत् कर्मत्वेऽपि शक्तिग्राहकत्वाङ्गीकारेण आभिधानिकत्वस्वीकार एव न्याय्य इति सिद्धान्तितम् ॥

अत्र केचित् "आक्षेपतः प्रासात्" इत्यादिभाष्यं कृप्तशक्त्या अभिमतार्थभानसम्भवस्थले अर्थापत्त्या तद्भानस्यानौचित्यप्रदर्शनपरम् । अतः आधेयत्वादिधर्मत्रयस्य शक्यतावच्छेदकत्वाङ्गीकारे गौरवात्मानाभावाच्च प्रत्येकधर्मस्यैव शक्यतावच्छेदकत्वाङ्गीकारो युक्तः, लाघवात्"—इत्याहुः ॥ तत्तु न समीचीनतया प्रतिभाति । तथा हि ब्रह्मण इत्यत्र षष्ठ्याः यथा वा कर्मत्वार्थकत्वं कर्तृकर्मणोः कृतीत्यनुशासनवशादङ्गीकार्यं, तथा शरीरपदस्याप्याधेयत्वविधेयत्वशेषत्वानि शरीरशब्दप्रवृत्तिनिमित्तमित्युपपादयिष्यत इति "विवक्षितगुणोपपत्तेः" इति सूत्रभाष्यस्वारस्यात्, "यो लोकत्रयमाविश्यति" गीतावचनस्वारस्याच्च शरीरशब्दस्याधेयत्वादिधर्मत्रयविशिष्टे शक्तिरङ्गीकार्या ; उभयत्रापि न्यायस्य तुल्यत्वात् ॥

पु. प.

९. ३. यदपि–धर्मत्रयस्य शक्यतावच्छेदकत्वे गौरवेण न तदवच्छिन्ने शक्तिः ; क्लृप्तेऽपि नोक्तन्यायाश्रयणमत्र युज्यते–इति प्रतिपादनं, तदसमीचीनम् । बोधेऽनुभवसिद्धे गौरवेण एकतरपरित्यागायोगात् । अन्यथा पङ्कजशब्दस्य पङ्कजनिकर्तृत्वविशिष्टपद्मत्वावच्छिन्ने शक्त्यसिद्धिप्रसङ्गात् ॥

किञ्च त्रयस्य मिलितस्य शक्यतावच्छेदकत्व एव हि गौरवं, न त्वेकैकस्य। तथा सति इतरयोश्शक्यतावच्छेदकत्वं न स्यात् इति कथमुक्तन्यायप्रसर इति वाच्यम् । विनिगमनाविरहेण त्रयाणामपि शक्यतावच्छेदकस्य दुर्वारत्वात् ॥

एवं भगवच्छब्दस्य ज्ञानादिसमुदायविशिष्टे शक्तेस्समर्थिततया तन्त्रन्यायेनात्रापि धर्मत्रयावच्छिन्ने शक्तिसमर्थने बाधकाभावाच्च। अपि च–दुःखासम्भिन्नत्वसुखत्वोभयावच्छिन्ने धानकर्मत्वगोत्वोभयविशिष्टे च स्वर्गधेन्वादिपदानां नैयायिकैरप्येकशक्त्यङ्गीकारात् तन्त्रन्यायेनाप्याधेयत्वादिधर्मत्रयविशिष्टे शक्तिव्यवस्थापनस्य सुशकत्वाच्च॥ अधिकमन्यत्रानुसन्धेयम्॥

९. १६. **स्वीकारादिति वदन्ति**॥ एतत्कल्पद्वयं न्यायसिद्धाञ्जनेऽपि जडद्रव्यपरिच्छेदे प्रदर्शितम् । इयं च तत्सूक्तिः—"एतच्चैकलक्षणमिति केचिद्व्याचख्युः ; लक्षणत्रयमित्यपरे । एकत्वपक्षे व्यवच्छेद्यपरिक्लेशः ; अन्ये त्वेकलक्षणत्वेऽपि जन्मादित्रयस्य ब्रह्मलक्षणत्व इवात्रापि न व्यवच्छेद्यं सिद्धमस्ति, शङ्कितं तु सममित्याहुः"—इति ॥ एतत्कल्पद्वयस्याप्ययंभावः—"यस्य चेतनस्य यद्द्रव्यं सर्वात्मना नियन्तुं धारयितुं च शक्यं तच्छेषतैकस्वरूपं च" इत्यादिश्रीभाष्यसूक्तेः लक्षणत्रयपरत्ववर्णनं शेषत्वरूपनिष्कृष्टस्वरूपस्यावश्यं ज्ञातः

प.

१६. व्यत्वप्रतिपादनाय । उक्तरीत्या नियाम्यत्वधार्यत्वरूपलक्ष-
णद्वयस्यापि कुत्रचिदव्याप्त्यादिसम्भावनया शेषत्वात्मक-
लक्षणस्यावतारितत्वात्, अस्य च कुत्राप्यव्याप्त्यादेरनभि-
धानाच्च, अस्यैव निष्कृष्टलक्षणत्वं प्रतीयते। शेषत्वात्मकस्वरूप-
याथात्म्यं तु मुमुक्षुभिरवश्यं ज्ञातव्यमेव, "देहासक्तात्मबुद्धिः"
इत्याद्यनुगृहीतरीत्या संसारमूलभूतषड्विधभ्रमेषु मध्ये स्वस्वात-
न्त्र्यभ्रमस्य स्वस्यैव प्रधानफलभोक्तृत्वादिप्रतिपादकस्य
निवर्तकत्वात्, तास्मिन् सम्यज्ज्ञाते स्वभोक्तृत्वाद्यसम्भवाच्च।
अत एव ज्ञातृत्वकर्तृत्वाद्यपेक्षया जीवात्मनश्शेषत्वविशेष
एव स्वरूपनिरूपकतया पूर्वाचार्यैरनुगृहीतः। एतादृशशेषत्वं
विना विद्यमानस्य सर्वस्य आत्मीयस्यापि दुस्सहत्वं परमाचार्यै-
र्भगवद्यामुनमुनिभिः स्तोत्ररत्ने "न देहमित्यादि" श्लोके
सुव्यक्तमन्वग्राहि॥ शेषत्वं च—"शेषः परार्थत्वात्" "पर-
गतातिशयाधानेच्छया उपादेयत्वमेव यस्य स्वरूपं, स शेषः,
परश्शेषी, परस्य प्रयोजनमेव यस्य परमप्रयोजनम्"
—इत्यादिसूत्रभाष्यटीकादिभिस्सम्यङ्निरूपितम्॥ ईदृशं शेषत्वं
चाचेतनेषु कदाऽपि न प्रतिकूलतया सम्भावनार्हम्। चेतने
ज्ञातृत्वकर्तृत्वादिसमानाधिकरणतया प्रतिपादितत्वेन कदा-
चित् स्वप्रयोजनसहत्वसम्भावनार्हमपि भवेदित्याशयेन
"आधेयत्वविधेयत्वशेषत्वानि शरीरशब्दप्रवृत्तिनिमित्तमि-
त्युपपादयिष्यते" इति "विवक्षितगुणोपपत्तेः" इतिसूत्रभाष्ये
अनुगृहीतग्रन्थस्वारस्येनैकलक्षणपरतयाऽपि व्याख्यातम्।
तत्कल्पे शेषत्वस्याधेयत्वविधेयत्वसामानाधिकरण्यवैशिष्ट्य-
प्रतिपादनेन अचेतनवत् चेतनस्यापि स्वभोगोद्देश्यकप्रवृत्त्य-
नर्हत्वस्वप्रवृत्त्युद्देश्यभोगानर्हत्वादिलक्षणसर्वप्रकारपारतन्त्र्य-

पु. प.

९.१६. प्रतीत्या नोक्तदोषप्रसक्तिः ॥ न च चेतनस्याचिद्वत्पारतन्त्र्याङ्गीकारे ज्ञातृत्वकर्तृत्वादिकं विफलमिति शङ्क्यम् । "स्वप्रयोजननिवृत्तिः शेषत्वफलं, परप्रयोजनप्रवृत्तिः प्रयत्नफलं, तद्विषयप्रीतिश्चैतन्यफलम्"—इत्याचार्यानुगृहीतरीत्या पारतन्त्र्याविरोधिस्वरूपानुरूपव्यापारेषु ज्ञातृत्वकर्तृत्वादेस्सार्थक्यसम्भव इत्यन्यत्र विस्तरः ॥

१०.७. **तार्किकास्त्विति** ॥ चेष्टेत्यादि । कथं चेष्टाश्रयः—ईप्सितं जिहासितं वार्थमधिकृत्य ईप्साजिहासाप्रयुक्तस्य तदुपायानुष्ठानलक्षणा समीहा चेष्टा; सा यत्र वर्तते तच्छरीरम्। कथमिन्द्रियाश्रयः— यस्यानुग्रहेणानुगृहीतानि उपघाते चोपहितानि स्वविषयेषु साध्वसाधुषु वर्तन्ते, स एषामाश्रयः; तच्छरीरम् । कथमर्थाश्रयः—यस्मिन्नायतने इन्द्रियार्थसन्निकर्षादुत्पन्नयोः सुखदुःखयोः प्रतिसंवेदनं प्रवर्तते, स एषामाश्रयः तच्छरीरम् । —**इति तद्भाष्यम्** ॥

१६.८. **अनुप्रवेशस्य गतिविशेषरूपत्वेऽपीति** ॥ अत्र अपिशब्देन परमात्मनः प्रकारान्तरेणाप्यनुप्रवेशोऽस्तीति सूच्यते। स च प्रतिवस्तुपरिसमाप्यवर्तमानत्वरूपः पूर्णतया स्थितिविशेषः । यथा घटत्वादिजातयः घटादिव्यक्तिषु परिसमाप्य वर्तन्ते तथा परं ब्रह्मापि चेतनाचेतनेषु सर्वेषु पदार्थेषु सर्वदा परिपूर्णतया द्वित्वादिविलक्षणसम्बन्धेन वर्तते । अत एव सर्ववस्तुसामानाधिकरण्यार्हत्वमप्यस्योपपद्यत इति—

सर्वमवदातम् ॥

॥ श्रीः ॥